श्रीः

श्रीहरिः ।

मीमांसादर्शनम् ।

श्रीशबरस्वामिविरचितभाष्यसहितम् ।

सप्तमाध्यायप्रभृति द्वादशाध्यायान्तम् ७-१२

पं० रत्नगोपालभट्टेन संशोधितम् ।

चौखम्भासंस्कृतपुस्तकालयाऽध्यक्ष-
हरिदासात्मज हरिकृष्णदासगुप्तेन
स्वकीये विद्याविलास यन्त्रे
संमुद्रितम् ।

—:o:—

MÍMÂNSADARŜANA,

With the commentary of Sab[illegible] sw.

Seven to Twelve Chap[illegible].

Edited by

[illegible]ndita Ratna Gopála Bhatta.

[illegible] Vidyâ Vilâsa Pre[illegible]

[illegible] Hari[illegible] [illegible]dâsa Gupt[illegible]

B[illegible]

To be had from the Chowkhamba Sanskrit Book Depot.

Benares City.

श्रीहरिः ।

मीमांसादर्शनम् ।

श्रीशबरस्वामिविरचितभाष्यसहितम् ।

सप्तमप्रभृति–नवमाध्यायपर्यन्तम् । ७–९ ।

पं० रत्नगोपालभट्टेन संशोधितम् ।

चौखम्भासंस्कृतपुस्तकालयाऽध्यक्ष-
हरिदासात्मजहरिकृष्णदासगुप्तेन
स्वकीये विद्याविलास यन्त्रे
संमुद्रितम् ।

—:o:—

MÎMÂNSÂDARŜANA,

With the commentary of Sabara swami,

SEVEN TO NINE CHAPTERS.

Edited by

Pandita Ratna Gopâla Bhatta.

PRINTED AT THE VIDYÂ VILÂSA PRESS,

BY HARIKRISHNA DÂSA GUPTA.

BENARES CITY.

1910.

श्रीहरिः ।

मीमांसादर्शनाधिकरणसूची ॥ अ० ७ । ८ । ९ ॥

अ० ७ । पा० ४ ॥

अ० ८ पा० १ ॥

अथोत्तरषट्के मीमांसादर्शने शाबरभाष्ये

सप्तमस्य अध्यायस्य प्रथमः पादः ॥ ७ ॥ १ ॥

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ॥ १ ॥

पूर्वेण अध्यायषट्केन प्रत्यक्षविहितधर्म्माणां कर्म्मणां दर्शपूर्णमासादीनाम् इतिकर्त्तव्यता चिन्तिता। उत्तरेणेदानीम् अविहितेतिकर्त्तव्यताकेष्वैन्द्राग्नादिषु चिन्तयितुमिष्यते। तत्र यदि दर्शपूर्णमासादीनां प्रकरणे ये विहिता धर्म्मास्ते सर्वकर्म्मसु विहिता भवन्ति। ततस्तैरेव धर्मैरैन्द्राग्नादयोऽपि धर्म्मवन्त उक्तास्तथा कर्त्तव्याश्चेति, न अर्थ उत्तरेण षट्केन। अथ ये यस्य प्रकरणे उच्यन्ते, ते तत्रैव उक्ता भवन्ति। ततोऽधर्म्मकाणि ऐन्द्राग्नादीनि। तेषु चिन्ता भवति। किमेषां धर्माः सन्ति, उत नेति। यदा च सन्ति, तदा, के? कियन्तो वा? कथं चानुष्ठातव्याः? इति। तदर्थमुत्तरः षट्कः प्रवर्त्तनीयः॥

तत्र सप्तमेन तावत् सन्ति धर्म्मा इत्युच्यते। अष्टमेन च इमे अस्येति। इत्थं प्रयोक्तव्या इति नवमेन। दशमैकादशद्वादशैरेतावन्तः प्रयोक्तव्याः, न अतोऽधिका इति॥

तत्रेदं विचार्य्यते, किं यजिप्रयुक्ता एते धर्म्माः। कथं यजिर्गुणवान् स्यादित्येवमर्थमाम्नायन्ते? आहोस्विद् अपूर्वप्रयुक्ताः। कथमपूर्वं स्यादिति। यदि यजिप्रयुक्तास्ततः सर्वार्थाः। अथ अपूर्वप्रयुक्तास्ततो यथाप्रकरणं व्यवतिष्ठन्ते। किं पुनरत्र युक्तम्। अपूर्वप्रयुक्ता इति। अपूर्वं हि फलवत्। अफलो यजिः। फलवति च प्रयासो विधीयमानोऽर्थवान् भवति। तस्मादपूर्वप्रयुक्ता धर्म्माः। अतः परमाचार्य्यस्य सूत्रोपन्यासः॥ श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यादिति। मुख्यानि अपूर्वाणि। तानि हि फलवत्त्वात् प्रधानानि। प्रधाने च मुख्यशब्दः। तेषां भेद उक्तः शब्दान्तरादिभिर्हेतुभिः। तस्मिन् मुख्यभेदे सति यथाधिकारं भावः स्याच्छेषाणाम्। ये यस्य अपूर्वस्य अधिकारे प्रकरणे शिष्यन्ते, ते तस्यैव

भवेयुः । श्रुतिप्रमाणत्वात् । अयमस्यापूर्वस्य शेषः । अयमस्येत्यत्र श्रुतिरेव प्रमाणं क्रमते । न प्रत्यक्षादीनामन्यतमत् । श्रुत्या च ये यस्य प्रकरणे श्रूयन्ते, ते तस्यैव भवितुमर्हन्ति । न चान्यस्योक्तोऽर्थोऽन्यस्य भवति । न हि यद्देवदत्तस्य ग्रामाच्छादनादिकं, तद्यज्ञदत्तस्य भवति । तस्माद् यथाप्रकरणं व्यवस्था धर्माणाम् ॥ १ ॥ सिद्धान्तः ॥

उत्पत्त्यर्थाविभागाद्वा सत्त्ववदैकधर्म्यं स्यात् ॥ २ ॥

अथ वा, नैतदेवं, यथाप्रकरणं धर्माणां व्यवस्था इति । कथं तर्हि । ऐकधर्म्यं स्यादिति । समानधर्मता । सर्वे धर्माः सर्वार्थाः । कुतः । उत्पत्त्यर्थाविभागात् । उत्पत्तिरिति यजिं ब्रूमः । अपूर्वस्योत्पादनात् । अर्थ इति अपूर्वं ब्रूमः । यजिप्रयोजनत्वात् । तयोरविभागः । सर्वाण्यपूर्वाणि यजिमन्ति । यजिसंयोगेन धर्म्माः शिष्यन्ते । यजेतेत्युक्ता उक्ताः । ते यजौ न सम्भवन्ति । तस्य अफलत्वात् । तत्र-असम्भवन्तस्तत्सम्बद्धेषु अपूर्वेषु विज्ञायन्ते । स च यजिसम्बन्धः सर्वेषामपूर्वाणां तुल्यः । तस्मात् सर्वार्था भवन्ति । सत्त्वधर्म्मवत् । यथा सत्त्वधर्म्माः, गौर्न पदा स्प्रष्टव्य इति गोत्वसम्बन्धेन श्रूयमाणास्तत्रासम्भवन्तस्तत्सम्बद्धेषु पिण्डेषु विज्ञायन्ते । तस्य च गोत्वसम्बन्धस्याविशेषात् सर्वगवीषु शुक्लनीलकपिलकपोतिकासु भवन्ति । एवमिहापि ॥

उच्यते । विषम उपन्यासः । तत्र गोसामान्यसम्बन्धेन धर्म्मा विधीयन्ते । गौर्न पदा स्प्रष्टव्य इति । इह पुनर्यजिविशेषसम्बन्धेन धर्मा विधीयन्ते । दर्शपूर्णमासाभ्यां यजेतेति, ज्योतिष्टोमेन यजेतेति । विशिष्टयजिसम्बद्धे एव अपूर्वे भवितुमर्हन्ति, न सर्वत्रेति । तत्र ब्रूमः दर्शपूर्णमासाभ्यां यजेतेत्यत्र न शक्यन्ते यागविशेषे धर्मा विधातुम् । किं कारणम् । यदा यजौ धर्मा विधीयन्ते, तदा यजिरनूद्यते । यजेतेत्यभिति । यदि यजिर्विधीयेत, न धर्मैः सम्बध्येत । न हि द्वयोर्विधीयमानयोः परस्परेण सम्बन्धो भवति । अनुवादश्च सन् अविशेषात् सर्वयागानुवादः । तस्मात् सर्वार्था धर्माः ॥ ननु दर्शपूर्णमासशब्दो विशेषको भविष्यति । न दर्शपूर्णमासशब्दः शक्नोति यागं विशेष्टुम् । अयं हि विधिर्वा स्याद्, अनुवादो वा । यदानुवादस्तदा धर्मसम्बन्धार्थः । स च धर्मसम्बन्धो यागानुवादेनैव तयोः सिद्धः ॥

ननु निवृत्तिकरो भविष्यति । दर्शपूर्णमासौ एवेत्थं कुर्य्याद्, नान्यान् इति । नैवं शक्यम् । यत् कारणं, न तस्यान्यनिवृत्तिरर्थः । ननु परिसङ्ख्यया करिष्यति । नात्र परिसङ्ख्या युज्यते । यदि अन्येन वाक्येन यागमात्रे धर्मप्रसङ्गः कृतः स्यात्, तत एतत् पुनर्वचनं परिसङ्ख्यां कुर्यात् । अथ पुनरसति प्रसङ्गे अनेनैव प्रसङ्गोऽनेनैव निवृत्तिरित्यतिभार एकस्यैव वाक्यस्य भवति ॥

एवं तर्हि, न अत्र यजेतेति शब्दो धर्मविधिभिः सम्बद्ध्यते, यजेत इत्थमिति । केन तर्हि ? दर्शपूर्णमासशब्देन । प्रत्यक्षो हि तेनास्य संयोगः । दर्शपूर्णमासाभ्यां यजेतेति । परोक्षो धर्मविधिभिः । कस्तदा वाक्यार्थः । दर्शपूर्णमासौ कुर्य्यादिति । नैवं शक्यम् । एवं सति धर्मा असम्बद्धाः पारिप्लवा भवन्ति । कथं कृत्वा । येयमाख्यातिकी विभक्तिः— यजेतेति । सा दर्शपूर्णमासयोः कर्त्तव्यतां विदधाति । तत्र कथं यागमात्रेण यागविशेषेण वा धर्मसम्बन्धः स्यात् । विधायिका विभक्तिर्नास्तीत्यसम्बद्धा धर्मा भवन्ति ॥ नैष दोषः । न वयं वाक्येन धर्माणां सम्बन्धं करिष्यामः । केन तर्हि । प्रकरणेन । कथम् । कर्त्तव्यतायां चोदितायामितिकर्त्तव्यताकाङ्क्षा भवति । कथं कुर्य्यादिति । प्रकरणेन धर्माः सम्बद्ध्यन्ते, इत्थं कुर्य्यादिति नैवं शक्यम् । यदा हि दर्शपूर्णमासौ कर्त्तव्यतया चोद्येते, तदा इतिकर्त्तव्यताकाङ्क्षा एव नास्ति । प्रज्ञातेतिकर्त्तव्यतात्वात्तयोः । असत्याञ्चेतिकर्त्तव्यताकाङ्क्षायां प्रकरणमेव नास्ति । एवं हि उक्तम् । असंयुक्तं प्रकरणादितिकर्त्तव्यतार्थित्वादिति ॥ एवं तर्हि, नैवात्र यागे धर्मा विधीयन्ते । नापि दर्शपूर्णमासयोः कर्त्तव्यतोच्यते । किन्तर्हि ? दर्शपूर्णमासाभ्यां यजेतेति पदद्वयेन विशिष्टं यागमनूद्यात्र धर्मा विधीयन्ते । दर्शपूर्णमासाभ्यां यजेतेत्थमिति । एवमपि दर्शपूर्णमासाभ्यामित्यनुवादो न युज्यते । तृतीयार्थस्यासिद्धत्वात् । पूर्ववान् अनुवादो भवति । अपूर्वश्च तृतीयार्थः । सोऽवश्यं विधातव्यः । तस्मिंश्च विधीयमानेऽन्यदेवासम्बद्धमापद्यते । दर्शपूर्णमासौ यजेः करणमिति । तस्मात् स एव प्रथमः पक्षोऽस्तु । यागानुवादेन धर्माणां विधिरिति ॥

ननु तत्रापि दर्शपूर्णमासाभ्यामित्येतन्न सम्बद्ध्यते । ननु सम्भन्त्स्यते । कालवचनः सन् प्रायिको नित्यानुवादो भविष्यति । प्रायेण यागानां दर्शपूर्णमासकालत्वात् । तृतीया च कालस्य अर्थकृतं गुण-

भावमालोच्योपपद्यते । तथा चेत् सर्वे धर्माः सर्वार्था भवन्ति ॥ २ ॥ पूर्वपक्षः ॥

चोदनाशेषभावाद्वा तद्भेदाद् व्यवतिष्ठेरन्नुत्पत्तेर्गुणभूतत्वात् ॥ ३ ॥

कर्मचोदनायाः शेषभूतो धर्मसमाम्नायः, एकदेशभूत इत्यर्थः । दर्शपूर्णमासाभ्यां यजेत, अनया अग्न्यन्वाधानादिकया इतिकर्त्तव्यतयेति । तस्यां चोदनायां यजेर्गुणभावः श्रूयते । दर्शपूर्णमासशब्दो यजिवचनः । करणभावोऽत्र यजेः श्रूयते । दर्शपूर्णमासाख्येन यागसमुदायेनान्यत् कुर्य्यादिति । यत् ततोऽन्यत् तत् कर्त्तव्यतया चोद्यते, न यजिः । अपूर्वं च तत् । ननु फलमत्र वाक्ये श्रूयते । स्वर्गकामो यजेतेति । तत् कर्त्तव्यं स्यात् । सत्यं श्रूयते, न तु तद् यजिना क्रियते । विनष्टे यजौ तद्भवति । अपूर्वं तु तेन क्रियते । तस्मात् तस्य कर्त्तव्यतोच्यते । यस्य कर्त्तव्यता तद् इतिकर्त्तव्यतया सम्बद्ध्यते । तस्मादपूर्वार्था धर्माः । तेषां चापूर्वाणां भेदः । अतस्तद्भेदाद् यथाप्रकरणं व्यवतिष्ठन्ते धर्मा इति ॥

अथैतस्मिन् पक्षे कथं दर्शपूर्णमासशब्देन यागो विशेष्यते ? । उच्यते । नैवात्र यागो विशेष्यते । किं तर्हि । अपूर्वभावनैव उभयपदविशिष्टोच्यते । यथा अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणातीति । विषम उपन्यासः । तत्र ह्यन्यद् द्रव्यम्, अन्यो गुणः । तेन तत्रोभयविशेषणत्वं युज्यते । इह पुनर्यागः एव तौ दर्शपूर्णमासौ । तेनेहोभयविशेषणत्वं न युज्यते । उच्यते । इहापि यजेतेति सामान्यं, दर्शपूर्णमासौ इति विशेषः । अन्यच्च सामान्यमन्यो विशेषः ॥ एवमपि श्रुत्या सामान्येन भावना, वाक्याद् विशेषेण । न चैतद् युगपद्भवतीति । एवं तर्हि, नैवात्र श्रुत्यर्थः परिगृह्यते । किन्तर्हि ? वाक्यार्थः । किङ्कारणम् । श्रुत्यर्थे परिगृह्यमाणे दर्शपूर्णमासशब्दोऽनर्थको भवति । यजतिश्चानुवादः । यजत्यात्मकत्वाद्दर्शपूर्णमासयोः । यजतिसामानाधिकरण्याच्च दर्शपूर्णमासशब्दस्य ॥ ३ ॥ उत्तरम् ॥

सत्त्वे लक्षणसंयोगात् सार्वत्रिकं प्रतीयेत ॥ ४ ॥

यत्तु सत्त्ववदिति । अत्र गवाकृतौ धर्म्मः श्रूयते । आकृतेः पदाऽर्थत्वात् । न च तत्र सम्भवति । अतोऽसौ आकृतिः सहचारि-

पिण्डलक्षणार्था विज्ञायते । यथा गङ्गायां गाव इति । तच्च साहचर्य्यं सर्वपिण्डानामविशिष्टमिति, सर्वपिण्डेषु विहितं भवति । तस्मात् तत् सार्वत्रिकं प्रतीयेत । इह तु यजेर्गुणभावेन श्रवणाद् नैव यजौ धर्म्माः श्रूयन्ते । किं तर्हि ? अपूर्वं इत्येवमपदिष्टो हेतुः । तस्मादनुपन्यासः सत्त्ववदिति ॥ ४ ॥ आशङ्कानिरासः ॥

अविभागात्तु नैवं स्यात् ॥ ५ ॥

अथ तु-शब्दः पक्षव्यावृत्तौ । नैतदेवम्— अपूर्वप्रयुक्ता धर्म्मा इति । यजिप्रयुक्ता एव । कुतः । अविभागात् । यजिना अविभागो धर्माणाम् । प्रत्यक्षं केचिद् द्रव्ये श्रूयन्ते, केचिद् देवतायां, केचिन्मन्त्रेषु । एष च यजिः । यद् द्रव्यं देवतामुद्दिश्य मन्त्रेण त्यज्यते, स एष प्रत्यक्षो यजिना सम्बन्धो धर्माणाम् । अपूर्वेण त्वानुमानिकः । फलेऽपि यजेः प्रत्यक्षश्रुतो गुणभावः स्वर्गकामो यजेतेति । आनुमानिकोऽपूर्वेण । अनुमानाच्च प्रत्यक्षं बलीयः । तस्माद् यज्यर्था धर्माः । ननु यजिर्भङ्गित्वात् कालान्तरे फलं दातुमसमर्थः । तत्र कृता धर्मा असमर्था एव भवन्तीत्युक्तम् । अत्र स्थितस्य न्यायस्य आक्षेपेण प्रत्यवस्थानं क्रियते । तैलपानवदेतद्भविष्यति । यथा तैलपानं घृतपानं वा भङ्गित्वेऽपि सति कालान्तरे मेधास्मृतिबलपुष्ट्यादीनि फलानि करोति । एवं याजिरपि करिष्यति, किं नोऽदृष्टाश्रुतेनापूर्वेण कल्पितेनेति ॥ ५ ॥ आ० ॥

द्व्यर्थत्वं च विप्रतिषिद्धम् ॥ ६ ॥

एवञ्च सति सर्वे धर्माः सर्वार्था भवन्ति । तथाचैन्द्राग्नादिषु प्रयाजादयः सन्ति । तत्र सौर्य्ये कर्मणि प्रयाजानां दर्शनमुपपद्यते । प्रयाजे कृष्णलं जुहोतीति । इतरथा प्रयाजाश्च विधातव्याः । प्रयाजेषु च कृष्णलहोमः । तथा च द्व्यर्थं तत् स्यात् । द्व्यर्थत्वं च विप्रतिषिद्धम् । तस्माद् यजिप्रयुक्ता धर्मा इति ॥ ६ ॥ युक्तिः ॥

उत्पत्तौ विध्यभावाद्वा चोदनायां प्रवृत्तिः स्यात् ततश्च कर्म्मभेदः स्यात् ॥ ७ ॥

नैतदेवं, यजिप्रयुक्ता धर्मा इति । चोदनायां प्रवृत्तिः स्यात् । चोदनेत्यपूर्वं ब्रूमः । चोदनार्थत्वाद् अपूर्वार्थत्वात् अपूर्वप्रयुक्ता धर्माः । फलवत्त्वादित्युक्तो हेतुः । यत्तु, प्रत्यक्षो यजिसम्बन्धो धर्माणामिति ।

अत्र ब्रूमः । उत्पत्तौ विध्यभावात् । उत्पत्तिरिति यजिं ब्रूमः । उत्पत्तौ यजौ नास्ति विधिः । यज्यर्था धर्मा इति । केवलं यजौ श्रूयन्ते, क्रियन्ते च । नैतावता तदर्था भवन्ति । यथा, वाससि रागः श्रूयते । वासो रञ्जयतीति, वाससि च क्रियते । न चाऽसौ तदर्थः । स्त्र्यर्थः पुरुषार्थो वा भवति । एवमिहापि यजौ श्रूयमाणाः क्रियमाणाश्च अपूर्वार्था भवेयुरर्थवत्त्वाय । ततश्च कर्मभेदः स्यात् । यतोऽपूर्वार्था इति । यत्तु, यजेः प्रत्यक्षं, फले गुणभाव इति । न कृत्वा अपूर्वं भवतीति, प्राणालिको विज्ञायते । प्रणाड्यापि च येन क्रियते तत् कारणं भवति । यथा, गोमयैः पचति, तुषपक्का भवन्तीति । यत्तु तैलपानवद् यजितः फलं भवतीति । अत्र ब्रूमः । तैलपानस्यापि न कालान्तरे फलं भवति । धातुसाम्यं तस्य फलम् । तच्च तत्कालमेव । यच्च फलं बलपुष्ट्यादि, तत् सम्यगाहारपरिणामाद्भवति । तस्माद्विषम उपन्यासः ॥ ७ ॥ आ० नि० ॥

यदि वाऽप्यभिधानवत् सामान्यात् सर्वधर्मः स्यात् ॥८॥

यद्यप्यपूर्वं प्रयोजकं धर्माणां, तथापि सर्वधर्मः स्यात् स स पदार्थः । अभिधानवत् सामान्यात् । अभिधानं तावदेतेषां समानम् । अपूर्वमित्यभिधानवद् धर्मेणापि अस्य समानेन भवितव्यम् । वाहीकवत् । यथा, वाहीकोऽतिथिरागतः, यवान्नमस्मै प्रक्रियतामित्युक्ते, यो यो वाहीकस्तस्य तस्य यवान्नं क्रियते । यथा वा, अक्ष्यामये मुद्गौदनो भोक्तव्यः, उदरामये पयः पातव्यमिति । सर्वत्र च हि अक्ष्यामये मुद्गौदनो भुज्यते, उदरामयेऽपि पयः पीयते । एवमिहापि एकस्य अपूर्वस्य ये धर्माः श्रुतास्ते सर्वापूर्वाणां भवितुमर्हन्ति । अपि च, अरुणपराशरा नाम शाखिनः । तेषां परिचरेषु स्मृतिरूपं ब्राह्मणं भवति । ये दर्शपूर्णमासयोर्धर्मास्ते सर्वेष्टीनामग्नीषोमीयस्य च इत्यारभ्य, यावत्सर्वाः प्रकृतिविकृतयोऽनुक्रान्ता इति । तच्चानुक्रमणमेतमेव न्यायं सूचयति । तस्मादपूर्वप्रयुक्तत्वेऽपि सर्वे धर्माः सर्वार्था इति ॥ ८ ॥ आ० ॥

अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु पूर्ववत्त्वात् प्रयोगस्य कर्मणः शब्दभाव्यत्वाद्विभागाच्छेषाणामप्रवृत्तिः स्यात् ॥ ९ ॥

उपवर्णनापरिहारस्तावदुच्यते । यदुक्तं, वाहीकवदिति । अत्र ब्रूमः । अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु । अर्थो वाहीकत्वम् । तद्देशसम्बन्धः, सोऽविभक्तः । सर्ववाहीकेष्वनुगत इत्यर्थः । तन्निमित्तश्च प्रीतिविशेषो, न पुरुषनिमित्तः । कथं ज्ञायते । पूर्ववत्त्वात् प्रयोगस्य । पूर्ववान् अत्र प्रयोगः । बहुशो वाहीकाश्च अवाहीकाश्च भोजिताः तत्र अन्वयव्यतिरेकाभ्यां ज्ञातमेतत् । देशनिमित्तेयं यवान्नप्रियता, न पुरुषनिमित्ता । तस्मात्तथा स्याद् वाहीकादिष्वभिधानेषु । अथेह कर्मणः शब्दभाव्यत्वम् । नान्यतः शक्यमेतज्ज्ञातुं, कस्यापूर्वस्य धर्मा इति । शब्देन च व्यवस्थिता विज्ञाता धर्माः । अपूर्वाणां च विभागः अतः शेषाणामन्यत्र विहितानामन्यत्राप्रवृत्तिः स्यात् ॥९॥ आ०नि०॥

स्मृतिरिति चेत् ॥ १० ॥

अथ यदुक्तं, स्मृतिरिति । तस्य कः परिहारः ? ॥ १० ॥ आ० ॥

न पूर्ववत्त्वात् ॥ ११ ॥

पूर्ववती हीयं स्मृतिः । चोदकं धर्मग्राहकं वक्ष्यति । विध्यन्तो वा प्रकृतिवदिति । तेन प्रापितानां धर्माणामयमनुवादः । एतन्न्यायपूर्विका, नाप्राप्तानां विधायिका । यत् कारणं, व्यवस्था धर्माणामेतेन न्यायेन भवति ॥ ११ ॥ आ० नि० ॥

अर्थस्य शब्दभाव्यत्वात् प्रकरणनिबन्धना-
च्छब्दादेवान्यत्र भावः स्यात् ॥ १२ ॥

इदं निगमनसूत्रम् । निगमनं च प्रतिज्ञाया हेतोश्च पुनर्वचनम् । तदिदमुच्यते । यस्मादेवं, तस्मादर्थस्य अग्न्यन्वाधानादेः शब्दभाव्यत्वात्, प्रतिप्रकरणं च निबन्धनाच्छब्दादेव अन्यत्र भावः स्यात् । यथा, गन्धर्वाप्सरसो वा एतमुन्मादयन्ति य उन्माद्यत्येता वै गन्धर्वाऽप्सरसो यद्राष्ट्रभृतम् । तस्मै स्वाहा ताभ्यः स्वाहेति जुहोतीत्यग्निप्रकरणे उत्पन्नानां राष्ट्रभृतामुद्बाहे उपदेशः । एतेषां राष्ट्रभृतो जुहोत्यभ्यातानां जुहोतीति । असत्येतस्मिन् वचने यथाधिकारं व्यवतिष्ठेरन् धर्मा इति । एवञ्च सति अधर्मकाणि ऐन्द्राग्नादीनि । तदर्थमुत्तरोऽध्यायषट्कः प्रारब्धव्य इति ॥

तत्र सप्तमेन तावदैन्द्राग्नादीनां कर्मणां धर्माः सन्तीत्युच्यते । ते चातिदेशेनेति । अतिदेशो नाम ये परत्र विहिता धर्मास्तमतीत्यान्यत्र

तेषां देशः । यथा, देवदत्तस्य भोजनविधिं कृत्वा शालिसूपमांसापूपै-र्देवदत्तो भोजयितव्य इति । तमेव विधिं यज्ञदत्तेऽतिदिशति, देव-दत्तवद् यज्ञदत्तो भोजयितव्य इति । श्लोकमपि उदाहरन्ति—

प्रकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु ।

धर्मप्रदेशो येन स्यात् सोऽतिदेश इति स्थितिः, इति ॥ स च नाम्ना वचनेन वा । तत्र नाम त्रिविधमातिदेशकं, कर्मनाम, संस्कार-नाम, यौगिकमिति । वचनं पुनर्द्विविधं, प्रत्यक्षश्रुतमानुमानिकं च । तयोरानुमानिकमुपरिष्टाद् वक्ष्यते । प्रत्यक्षश्रुतं त्विदानीमेव चिन्त्यते ॥ १२ ॥ उपसंहारः ॥ प्रयाजादिधर्माणामपूर्वप्रयुक्तताधिकरणम् ॥१॥

अस्तीषुनामैकाहः । अपरः श्येनः । तौ द्वावप्याभिचारिकौ । तत्र इषौ कांश्चिद्धर्मान् विधाय आह, समानमितरच्छ्येनेनेति । एतच्चि-न्त्यते । किमयमनुवादः, विधिः ? इति । यदि विधिस्ततोऽतिदेशः । श्येनधर्मान् इषौ अतिदिशति । अथानुवादस्ततो नेति । तत्र किं प्राप्त-म् ? । तत् सूत्रेणैवोपक्रम्यते—

समाने पूर्ववत्त्वादुत्पन्नाधिकारः स्यात् ॥ १३ ॥

समानमितरच्छ्येनेनेति । अत्रोत्पन्नाधिकारः स्यात् । अनुवाद इत्यर्थः । कुतः ? । पूर्ववत्त्वात् । अयमिषुः पूर्ववान्, ज्योतिष्टोमपूर्व-कः । ज्यौतिष्टोमिकोऽत्र विध्यन्त इत्यर्थः । अत्र चोदकेनोत्पन्ना ज्यौ-तिष्टोमिका धर्माः सन्ति । श्येनोऽपि ज्योतिष्टोमपूर्वकः । तत्रापि ते सन्ति । ये इषौ श्येने च समाना भवन्ति, तानधिकृत्य अयं वादो युज्यते । तस्मादुत्पन्नाधिकारत्वादनुवादः ॥

किञ्च । इतरदिति चाभावे नोपपद्यते । इतरशब्दश्चासन्निहिते-ऽनुपपन्नः सन्निहित एव भवति । यथा, इतर आधारो दीयताम् । इतरः कम्बलो दीयतामिति सन्निहितो दीयते, न प्रावारमात्रं कम्बल-मात्रं वा । ज्यौतिष्टोमिकाश्च सन्निहिताः । तस्मात् तेषां वादः । तेषां चेदमनुवादः । विहिता हि ते चोदकेनेति ॥ १३ ॥ पूर्व० ॥

श्येनस्येति चेत् ॥ १४ ॥

इतिचेत् पश्यसि, ज्यौतिष्टोमिकानामनुवाद इति । नैवम् । श्येन-स्य वैशेषिकाणां लोहितोष्णीषादीनां धर्माणां विधिः । कुतः । श्येन-ग्रहणसामर्थ्यात् । एवं श्येनग्रहणमर्थवद् भविष्यति, धर्मान् विशे-

षयत्। इतरथा अनर्थकं स्यात्। सर्वेषां हि एकाहाहीनसत्राणां ते समानाः। तत्र यावदुक्तं स्यात्, समानमितरदिति, तावदेव, समानमितरच्छ्येनेनेति ॥ १४ ॥ पूर्वपक्षे आशङ्का ॥

नासन्निधानात् ॥ १५ ॥

नायं श्येनवैशेषिकाणां वादो युज्यते। कस्मात्। असन्निधानात्। अयमितरशब्दः सन्निहिते भवति। न च श्येनशब्देन वैशेषिका इषौ सन्निहिताः। यत्तु, श्येनशब्दो वैशेषिको भवतीति। विधिपक्षे अवैशेषिकत्वं दोषः स्यात्। अनुवादपक्षे तु नैव कश्चिद् विधीयते, किं विशेषयिष्यति ?। ज्यौतिष्टोमिकास्तु सर्वसाधारणाः सन्तः श्येनस्यापि भवन्तीत्यनुवादो युज्यते। तस्माज्ज्यौतिष्टोमिकानामेवाऽनुवादः ॥ १५ ॥ पूर्वपक्षे आशङ्कानिरासः ॥

अपि वा यद्यपूर्वत्वादितरदधिकार्थे ज्यौतिष्टोमिकाद् विधेस्तद्वाचकं समानं स्यात् ॥ १६ ॥

अपि वेति पक्षान्तरपरिग्रहे। विधिरयं श्येनवैशेषिकाणां, ज्यौतिष्टोमिकानामनुवादः। कुतः। अपूर्वत्वात्। एवमपूर्वमर्थं विधास्यति। तथा प्रवृत्तिविशेषकरो भविष्यति। अनुवादः सन् अप्रवृत्तिविशेषकरोऽनर्थकः स्यात्। नन्वितरशब्दोऽयं सन्निहिते भवति। उच्यते। इतरदधिकार्थे, समानमितरत, समानमधिकमित्यर्थः॥ ननु सन्निहितवचनोऽयं न अधिकार्थ इति। उच्यते। न केवलमयं सन्निहितवचन एव। पूर्वोक्तसदृशमसन्निहितमपि ब्रूते। अवशिष्टं च। यदा हि वस्त्राण्यनुक्रम्य इतरशब्दः प्रयुज्यते, देवदत्ताय कम्बलो दीयतां, विष्णुमित्राय कौशेयं, यज्ञदत्ताय क्षौमम, इतरच्चैत्रायेति। तदा वस्त्रमेव प्रदीयते, न हिरण्यं रजतं वा। इह ज्यौतिष्टोमिकेभ्योऽधिकान् धर्माननुक्रम्य इतरशब्दः प्रयुक्तः। तेन अत्राप्यधिकानेव वक्तुमर्हति। तथा अधिकवचनो भवति ॥ अथ ज्यौतिष्टोमिकान् ब्रूते। तथा सन्निहितवचनः। तत्रावश्यमन्यतरद्धेयम्। यदि अधिकार्थतां हित्वा सन्निहितार्थता आश्रीयते, अनुवादमात्रमनर्थकं भवति। श्येनशब्दश्चाविवक्षितार्थः। अथ सन्निहितार्थतां हित्वा अधिकाऽर्थता गृह्यते, न कश्चिद्दोषो भवति। तस्मात् सूत्रकार आह। इतरदधिकार्थे इति। अतो ज्यौतिष्टोमिकाद्विधेरधिकाः श्येनवैशेषि-

का ये, ते इह अतिदिश्यन्ते । तद्वाचकं समानं स्यात् । समानशब्दः स्यादित्यर्थः । भवति श्येनशब्दश्च विवक्षितः ॥ १६ ॥ ॥ सिद्धान्तः ॥
समानमितरच्छ्येनेनेति श्रुत्या इषौ श्येनीयविशेषधर्मातिदेशाधिकरणम् ॥ २ ॥

चातुर्मास्यानां वैश्वदेवे आग्नेयादीनि हवींषि सार्थवादवाक्यैर्विहितानि । धर्माश्च तेषामुक्ताः । वरुणप्रघासेषु केवलानि हवींषि आम्नाय, यद्वैश्वदेविकानां ब्राह्मणं, तत्तेषामतिदिश्यते । एतद्ब्राह्मणान्येव पञ्च हवींषि, यद्ब्राह्मणानीतराणीति । तत्र किमर्थवादमात्रस्यायमतिदेशः, उत सार्थवादकस्य सविधिकस्य काण्डस्येति। कथं पुनरर्थवादमात्रस्याऽतिदेशो भवति ? । यथा, पम्पाकुलायप्रतिमाश्च वृक्षा इति। के पुनर्विधयः, के अर्थवादाः ?। त्रेधा सन्नद्धं बर्हिर्भवति, त्रेधा सन्नद्ध इध्मः । नव प्रयाजा नवानुयाजा इत्येवमादयो विधयः । वार्त्रघ्नानि वा एतानि हवींषीत्यर्थवादाः ॥ तत्रेदमुच्यते—

पञ्चसञ्चरेष्वर्थवादातिदेशः सन्निधानात् ॥ १७ ॥

पञ्च तानि हवींषि सर्वपर्वसु सञ्चरन्तीति पञ्चसञ्चराणीत्युच्यन्ते। तेषु पञ्चसञ्चरेष्वर्थवादमात्रस्यातिदेश इति।कुतः।सन्निधानात् । हविषां सन्निहिता अर्थवादाः । विधिभिरेकवाक्यसम्बद्धत्वान्न धर्मविधयः । किमतः । अत एतद्भवति, यत् पूर्वेषां ब्राह्मणमिति व्यपदेशो युज्यते । तद्धि तेषां ब्राह्मणं, येन विधीयन्ते । कोऽन्यो हविषां ब्राह्मणस्य च सम्बन्धोऽन्यत्र विधेयविधायकभावात् । अर्थवादैश्चैतानि विधीयन्ते, न धर्मविधिभिः । धर्मविधिभिस्तु यानि विधीयन्ते, न तानि हवींषि । तस्मादर्थवादानामतिदेशो, न धर्मविधीनाम् । अपिच वरुणप्रघासेष्वपि केचिद् वैश्वदेविका धर्मा विधीयन्ते । यथा अग्निं मथ्नन्ति प्रस्तुवो भवन्तीति । तेषामतिदेशेन विहितानां पुनराम्नानमनर्थकं स्यात् । यदि विधयोऽतिदिश्येरन् । तस्मादर्थवादातिदेश इति ॥ १७ ॥ पूर्व० ॥

सर्वस्य वैकशब्द्यात् ॥ १८ ॥

नैतदेवम्, अर्थवादमात्रस्यातिदेश इति, सविधिकस्य सार्थवादकस्य काण्डस्यातिदेश इति । कुतः । ऐकशब्द्यात् । समानशब्दत्वादित्यर्थः । समानोऽयं ब्राह्मणमिति शब्दो विधीनामर्थवादानां च । स

यथाऽर्थवादान् गृह्णात्येवं विधीनपि गृह्णातिचेत्, तानप्यतिदिशति । यत्तु विधीनां हविर्भिः सम्बन्धो नास्तीति । विधेयविधायकसम्बन्धो नास्ति, उपकारलक्षणः सम्बन्धो भविष्यति । क उपकारः । यदेषामङ्गानि विदधाति । अस्तिचेत् सम्बन्धो, ब्राह्मणशब्दश्रुत्या सर्वातिदेशो न्याय्य इति ॥ १८ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ १९ ॥

लिङ्गं च विधीनामतिदेशं दर्शयति । किं लिङ्गम् । वरुणप्रघासेषु त्रिंशदाहुतयो वाजिनो यजन्त्याहुतीनां सम्पत्त्यै त्रिंशत्त्वायेति वरुणप्रघासे त्रिंशतमाहुतीर्दर्शयति । यदि विधयो नातिदिश्येरन्, ता न स्युः । तस्मादतिदिश्यन्ते ॥ १९ ॥ युक्तिः ॥

विहिताम्नानान्नेति चेत् ॥ २० ॥

विहिताम्नानादिति यदुक्तं, तस्य कः परिहारः । आभाषान्तं सूत्रम् ॥ २० ॥ आ० ॥

नेतरार्थत्वात् ॥ २१ ॥

अत्रोच्यते, विध्यतिदेशेऽपि सति नाग्निमन्थनादीनामाम्नानमनर्थकम् । इतरस्य हविषोऽर्थेन भविष्यति दक्षिणवैहारिकस्य मारुत्याः । तस्मान्नैतज्ज्ञापकं विधीनामनतिदेशस्य भविष्यति ॥ २१ ॥ आ० नि० ॥ एतद्ब्राह्मणानीत्यादीनां पञ्चहविःषु सार्थवादविध्यतिदेशाधिकरणम् ॥ ३

एककपालैन्द्राग्नौ च तद्वत् ॥ २२ ॥

वैश्वदेवे एककपाल आम्नातः, द्यावापृथिवीय एककपाल इति । वरुणप्रघासेष्वपि, काय एककपाल इति । तत्रापरः, ऐन्द्राग्नो द्वादशकपालो मारुत्यामिक्षा इति । तथा साकमेधेष्वप्येककपालैन्द्राग्नावाम्नातौ । ऐन्द्राग्न एकादशकपाल इन्द्राय वृत्रघ्ने चरुर्वैश्वकर्मण एककपाल इति । तत्रेदम् आम्नातम् । एतद्‌ब्राह्मण ऐन्द्राग्नः, एतद्‌ब्राह्मण एककपालो यद्‌ब्राह्मण इतर इतरश्चेति । तत्रेदमुच्यते । एककपालैन्द्राग्नौ च तद्वत् । यद्वत् पञ्चसञ्चराणि । अत्रापि सविधिकस्य सार्थवादकस्य काण्डस्यातिदेशः । तेनैव न्यायेनेति । प्राप्तिसूत्रमेतदुत्तरचिन्तार्थम् ॥ २२ ॥ एतद्‌ब्राह्मण इत्यनेन एककपालैन्द्राग्नयोः सार्थवादविध्यतिदेशाऽधिकरणम् ॥ ४ ॥

एककपालानां वैश्वदेविकः प्रकृतिराग्रयणे सर्व-

होमापरिवृत्तिदर्शनादवभृथे च सकृद्-
द्व्यवदानस्य वचनात् ॥ २३ ॥

साकमेधे श्रूयते, एतद्ब्राह्मण एककपाल इति । तत्र चिन्त्यते । वैश्वदेविकस्यैककपालस्येदं ग्रहणम्, उत वारुणप्राघासिकस्येति । किं प्राप्तम् । वैश्वदेविकस्येति ब्रूमः । किं कारणम् । तस्य विहिता धर्माः अलङ्कृत्यअभिपूर्य्य उपांशु यष्टव्यः, आविः पृष्टः कार्य्य इत्येवमादयः । वारुणप्राघासिकस्त्वधर्मकः । यस्य विहिता धर्मास्तत्रैतद् युज्यते वक्तुं, तद्वदिदं कर्त्तव्यमिति । तस्माद् वैश्वदेविकस्य ग्रहणम् ॥ नन्वैन्द्राग्नसमुच्चारणादेककपालोऽपि वारुणप्राघासिक एव स्यात् । नावश्यमेकपर्वणोरेव समुच्चारणेन भवितव्यं, नानापर्वणोरपि समुच्चारणमविरुद्धम् । तस्माद् वैश्वदेविकस्य ग्रहणम् । इति प्राप्ते उच्यते । वारुणप्राघासिकस्यैककपालस्य ग्रहणमिति । कुतः । तत एककपालानां वैश्वदेविकः प्रकृतिः । कथं ज्ञायते । आग्रयणे सर्वहोमापरिवृत्तिदर्शनात् । आग्रयणे द्यावापृथिवीयस्यैककपालस्य सर्वहोममपर्य्यावृत्तिं च दर्शयति । यत् सर्वहुतं करोति सा त्वेका परिचक्षा, हुतो हुतः पर्य्यावर्त्तते सा द्वितीया । आज्यस्यैव द्यावापृथिव्यौ यजेतेति आज्ययागविधिपरे वाक्ये एककपालस्य सर्वहोममपर्य्यावृत्तिं च प्राप्तां दर्शयति । एतस्माद्दर्शनाद् अवभृथे च सकृद्द्व्यवदानस्य वचनाद्, अवभृथे च अवधारणं भवति । इदमेवैककपालस्य द्विरवद्यतीति । तेन ज्ञायते, नूनमन्यत्र न द्विरवदानमिति । तच्चैतत् सर्वं वैश्वदेविके एककपाले विहितम् । तस्मादेककपालानां वैश्वदेविकः प्रकृतिः । किमतः ? । साकमेधिकेऽप्येककपाले वैश्वदेविका धर्माः प्राप्तास्तेषामतिदेशोऽनर्थकः । वारुणप्राघासिकस्य ये धर्मा वैशेषिका अप्राप्तास्तेषामतिदेशोऽर्थवान् । तस्माद् वारुणप्राघासिकस्य एककपालस्येदं ग्रहणमिति । उच्यते । लिङ्गमेतत् । कुतः प्राप्तिरिति । प्राप्तिमुत्तरत्र वक्ष्यामः । स्वरसामैककपालामिक्षं चेत्यत्र । के पुनस्ते धर्माः । हिरण्मय्यः स्रुचः शमीमय्यो वेत्येवमादयः ॥ २३ ॥ साकमेधे वारुणप्राघासिकैककपालातिदेशाऽधिकरणम् ॥ ५ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये सप्तमस्याऽध्यायस्य प्रथमः पादः ॥ ७ ॥ १ ॥

अथ सप्तमस्याध्यायस्य द्वितीयः पादः ॥ ७ ॥ २ ॥

साम्नोऽभिधानशब्देन प्रवृत्तिः स्याद्यथाशिष्टम् ॥१॥

इदं श्रूयते– रथन्तरमुत्तरयोर्गायति, कवतीषु रथन्तरं गायतीत्येवमादीनि समाम्नायन्ते । तत्र चिन्ता । किमिह अतिदिश्यते इति । ननु यद् रथन्तरादिभिः शब्दैरुच्यते, तदतिदिश्यते । बाढम् । तदेव तु न ज्ञायते, किमेभिः शब्दैरुच्यते इति । ननु सिद्धमेतद् गीतिषु सामाख्या इति । तथा सिद्धस्य आक्षेपः करिष्यते । स एव तु निर्णयो भविष्यति । यदि स एव निर्णयः, किमर्थं आक्षेपः ? । दार्ढ्यार्थः । स्थूणानिखननवत् । तत्र किं प्राप्तम् । तदुच्यते । सस्तोभस्वरकालाभ्यासविकारायां हिङ्कारप्रणवप्रस्तावोद्गीथप्रतिहारोपद्रवनिधनवत्यामृचि गीतौ सामशब्दोऽभियुक्तैरुपचर्य्यते । तस्मात् संशयः । उच्यते । ननु गीतौ सत्यां भावाद् गानाख्यस्य संस्कारकर्मणो वाचका एते शब्दा इत्युक्तम् । तदेवेदमुक्तमाक्षिप्यते । नेमे संस्कारस्य वाचकाः । किं कारणम् । अकर्मकाले प्रयोगात् । अकर्मकाले साम प्रयुज्यते । न च संस्कारकर्माणि प्रोक्षणावक्षेपणपर्य्यग्निकरणादीन्यकर्मकाले प्रयुज्यन्ते । प्रयोजनाभावात् । अथ तु मन्त्रा एते, ततोऽन्वहं स्वाध्यायोऽध्येतव्य इति नियमादकर्मकाले प्रयोगो युज्यते । तस्माद् ऋचां नामानि ॥ किञ्च, संज्ञाभेदात् । संज्ञाभेदश्च भवति, रथन्तरं बृहदित्येवमादिः । स एकत्वात् संस्कारकर्मणोऽनर्थकः । एकेनैव हि तदा पर्य्याप्तम् । यथा गीतिरिति । अथ ऋचां नामानि । ततस्तासां भेदात् संज्ञापृथक्त्वं युक्तम् ॥ अपिच । यदि गानं रथन्तरं गानं च बृहत् । इदं रथन्तरमिदं बृहदिति पृथक्त्वेन संज्ञानिवेशो नोपपद्यते । ऋङ्नामत्वे तूपपद्यते ॥

किञ्च, विकारपृथक्त्वात्तु । प्रतिसाम च विकारपृथक्त्वात् । प्रतिसाम च विकारपृथक्त्वं दृश्यते । तद् एकत्वाद् गानस्यानुपपन्नम् । संस्कारभेदे हि विकारपृथक्त्वं दृष्टम् । तद् यथा, अवहन्तेस्तण्डुलीभावः, पिषेश्चूर्णनम् । न तु एकस्य तण्डुलीभावश्चूर्णनं च । अथ ऋङ्नामानि एतानि । तत ऋचां भेदाद्विकारपृथक्त्वं युज्यते । तस्माद् ऋङ्नामानीति । तत उत्तरं पठति । साम्नोऽभिधानशब्देन प्रवृत्तिः स्याद्यथाशिष्टमिति । साम्नोऽभिधानशब्देन यथाशिष्टं प्रवृत्तिः

स्यात् । यच्छिष्टं प्रवक्तृभिः शिष्येभ्यः । किञ्च शिष्टम् ? स्तोभादिविशिष्टा ऋक् साम । सा प्रवर्त्तेत । किं कारणम् । तस्या रथन्तरादि नामधेयमिति ॥ १ ॥ पूर्व० ॥

शब्दैस्त्वर्थविधित्वादर्थान्तरेऽप्रवृत्तिः स्यात् पृथग्भावात् क्रियाया ह्यभिसम्बन्धः ॥ २ ॥

तुशब्दः पक्षनिवृत्तौ । न त्वेवं स्याद्, ऋचः प्रवृत्तिरिति । कथम् । इह कवतीषु रथन्तरं गायतीति कवतीनां वा कार्य्ये अभिवत्योऽतिदिश्येरन्, कवतीनां वा उपरि आधार्य्याधेयभावेन ? । तत्र कार्य्ये तावदतिदेशो न घटते । कुतः ? । शब्दैरर्थविधित्वात् । शब्दानामर्थविधानं कार्य्यम् । न च, कवतीषु रथन्तरं गायतीति कवतीभिर्योऽर्थोऽभिधीयते तमभिवत्यः शक्नुवन्ति वक्तुम् । तस्मान्न कार्य्यातिदेशः । आधेयत्वेऽपि न सम्भवति । पृथग्भावात् । न हि शब्दः शब्दे समवैति, पृथगेवावतिष्ठते । अभि त्वा, कया न इति । क्रियाया हि गानक्रियायाः शब्देन अभिसम्बन्धो भवेद् न शब्दस्य । तस्मादाधेयत्वेनापि नातिदेशः । अतो नायमृचः प्रदेश इति ॥२॥ पूर्वपक्षनिरासः ॥

स्वार्थे वा स्यात् प्रयोजनं क्रियायास्तदङ्गभावेनोपदिश्येरन् ॥ ३ ॥

स्वार्थे वा प्रवर्त्तमाना अभिवत्यः कवतीनामङ्गभावेनोपदिश्येरन् । कथं पुनः कवतीषु गायतीत्यङ्गभावः शक्य उपदेष्टुम् ? । शक्यो यथा, येन कर्मणेर्त्सेत्तत्र जयान् जुहुयादिति । किं पुनः प्रयोजनं कवतीनामभिवत्यो निर्वपन्तीति ? । उच्यते । प्रयोजनमदृष्टं कल्प्यम् । कुतः ? । क्रियायाः । यस्मात् क्रिया श्रूयते । कवतीषु रथन्तरं गायतीति । यथा प्रयाजादीनां प्रयोजनं क्रियायाः ॥ उच्यते । अयमेवाऽस्मिन् पक्षे दोषो, यत् प्रयोजनं क्रियायाः कल्पयितव्यम् । तस्मादयमपि पक्षो दुःश्लिष्टः ॥ ३ ॥

शब्दमात्रमितिचेत् ॥ ४ ॥

इति चेत् पश्यसि, कवत्यङ्गभावेन अभिवतीनामुपदेशो दुःश्लिष्ट इति । तेन तर्हि शब्दमात्रं प्रदिश्यताम् । रथन्तरशब्दं कवतीषु प्रयुञ्जीत । कवतीः रथन्तरशब्देन अभिलपेदिति । किं कारणम् । शब्दे

उच्चरिते, तत्र तावन्मुख्या प्रतिपत्तिः । शब्दे कार्य्यस्य असम्भवात्, अर्थे कार्य्यं विज्ञायते । यथा गामानयेति । इह तु शब्दे एव कार्य्यं सम्भवति, न अर्थे । अतोऽत्र शब्दं विज्ञास्यामः ॥ ४ ॥ पूर्व० ॥

नौत्पत्तिकत्वात् ॥ ५ ॥

पूर्वस्मादेष वादः पापीयान् । कस्मात् । औत्पत्तिकत्वात् । औत्पत्तिको हि नामिनाम्नोः सम्बन्धः । यः शब्दो यस्मिन् अर्थे औत्पत्तिकेन सम्बन्धेन प्रसिद्धो, न स ततोऽन्यं प्रत्याययितुं शक्नोति । न हि गोशब्देन अश्वोऽभिधातुं शक्यते ॥ ५ ॥ पूर्व० नि० ॥

शास्त्रञ्चैवमनर्थकं स्यात् ॥ ६ ॥

एवञ्च सति अतिदेशशास्त्रमनर्थकं स्यात् । अशक्यार्थत्वात् । तस्मान्न शब्दस्यापि प्रदेशो युक्तः । वृत्तिकारस्तु मेने, गानशास्त्रमौक्थिक्यमनर्थकं स्यादिति । तस्याभिप्रायः, सत्याङ्गतौ नैतावान् प्रयासः शिष्टानामफलोऽभ्युपगन्तुं न्याय्य इति ॥ ६ ॥ युक्तिः ॥

स्वरस्येति चेत् ॥ ७ ॥

इति चेत् पश्यसि, नाम्नोऽतिदेशोऽयुक्त इति । तेन तर्हि, स्वरस्यातिदेशो भवतु । स्वरः सामशब्देन लोकेऽभिधीयते । सुसामा देवदत्त इति । सुस्वरो देवदत्त इति । स्वरो घोषो नाद इति समानाऽर्थाः । स सामशब्देनोच्यते । साम च रथन्तरम् । तस्मात् तस्याऽतिदेशः ॥ ७ ॥ पूर्व० ॥

नार्थाभावाच्छ्रुतेरसम्बन्धः ॥ ८ ॥

नैतदेवं, स्वरस्यातिदेश इति । कुतः । अर्थाभावात् । अर्थस्याऽभावात् । अर्थस्य अभिवतीस्वरस्य कवतीष्वभावात् । नन्वसन्नेव असौ अतिदेशेन भाव्यते । उच्यते । भावयितुमपि न शक्यते । न हि अभिवत्यक्षराणामभिव्यञ्जको नादः कवतीषु भावयितुं शक्यः । यदि भाव्येत, न कवत्यो भवेयुः । न चेद् भाव्यते, न भूतः । कवतीषु रथन्तरं गायतीत्येतस्याः श्रुतेः, पदान्तरेणाभिसम्बन्धो न स्यात् । तस्मान्न स्वरस्यातिदेशः ॥ ८ ॥ पूर्व० नि० ॥

स्वरस्तूत्पत्तिषु स्यान्मात्रावर्णाविभक्तत्वात् ॥ ९ ॥

तुशब्दः पक्षान्तरपरिग्रहे । यद्यभिवतीस्वरस्य कवतीषु प्रदेशो

नोपपद्यते, अनुवादो भवतु । कवतीषु रथन्तरं गायतीति । कथम् ? तदुच्यते । इह कवतीषु रथन्तरं गायतीत्यस्य वाक्यस्य द्वे वचनव्यक्ती भवतः । कवतीषु यद् रथन्तरं, तद् गायतीत्येका । रथन्तरं यत्, तत् कवतीषु गायतीत्यपरा । तयोरेषा द्वितीया, रथन्तरं यत्तत् कवतीषु गायतीति । सा स्वरस्य सामत्वे न सम्भवतीत्युक्तम् । न हि अभिवतीस्वरः कवतीषु समावेशयितुं शक्य इति । पूर्वा तु सम्भवति । कवतीषु यद् रथन्तरं, तद् गायतीति ॥ ननु साऽपि न सम्भवति । न हि कवतीषु रथन्तरमस्ति । अतः परमुच्यते । स्वरस्तूत्पत्तिषु स्यात् । स्वरस्त्वभिवतीस्वरः, कवतीनाम् उत्पत्तिषु उच्चारणेषु स्यात् । कथम्, मात्रावर्णाविभक्तत्वात् । बहवो मात्रावर्णाश्चाभिवतीनां कवतीनां च अविभक्ता अभिवतीष्वपि विद्यन्ते, कवतीष्वपि । सोऽसावभिवतीस्वरः कवतीषु साधारणवर्णसमवेतो विद्यते । तस्यानुवादोऽयं घटते । कवतीषु रथन्तरं गायतीति । तस्मात् स्वरस्यानुवादः ॥ ९ ॥ पूर्व० ॥

लिङ्गदर्शनाच्च ॥ १० ॥

लिङ्गं च दृश्यते, एतस्मिन् अर्थे । अस्ति रथन्तरमुत्तरयोरिति । किं तल्लिङ्गं भवति । एवमाह । रथन्तरमुत्तरयोर्न पश्यामीति विश्वामित्रस्तपस्तेपे, बृहदुत्तरयोर्न पश्यामीति वसिष्ठ इति । यच्च विद्यमानं न दृश्यते, तद्दर्शनाय यत्नः क्रियते । यथा घटं न पश्यामीति प्रदीपं करोति, न शशविषाणं न पश्यामीति । तस्मादस्त्युत्तरयो रथन्तरं बृहच्च । तयोरनुवाद इति ॥ १० ॥ युक्तिः ॥

अश्रुतेस्तु विकारस्योत्तरासु यथाश्रुति ॥ ११ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदेवम् । स्वरस्यानुवाद इति । कुतः । एवं सति उत्तरासु विकारो न कश्चिच्छ्रुतो भवति । तदा उत्तरा यथाश्रुताः प्रयोक्तव्याः । यथा स्वाध्यायकाले श्रुताः । तत्र रथन्तरमुत्तरयोर्गायतीत्येतदनुवादमात्रमप्रवृत्तिविशेषकरमनर्थकमेवापद्यत । अतो न स्वरस्यानुवादो युक्तः ॥ ११ ॥ पूर्व० नि० ॥

शब्दानाञ्चासामञ्जस्यम् ॥ १२ ॥

रथन्तरादीनां च सामशब्दानामसामञ्जस्यं स्यात् । रथन्तरमुत्तरयोः, बृहदुत्तरयोरिति । कथम् । तदुच्यते । अयं रथन्तरशब्दो बृह-

च्छब्दो वा स्वरस्य सामशब्दत्वे स्वरसमुदाये आनुपूर्व्यां व्यवस्थिते स्वरविशेषे प्रयुक्तः । स एकदेशे भिन्नानुपूर्वे वा असमञ्जसो भवति। तस्मान्नैतद् युक्तम् । स्वरस्य सामशब्दः । तस्य चानुवाद इति ॥

अत्राह । एवं भवता सर्वे पक्षा निरुद्धाः । ततः किमप्रवृत्तिरेव ? इति। उच्यते । ऋच एव प्रदेशो भवतु । ननूक्तं, न शक्या ऋच ऋगन्तरे प्रदेष्टुमिति । बाढं, देशलक्षणा भविष्यति । कवतीषु रथन्तरं गायतीत्युच्यते । न च शक्यते कवतीषु रथन्तरं गातुम् । तत्र देशलक्षणा भवति । कवतीदेशे इति । यथा, अग्नौ तिष्ठति, कूपे तिष्ठति इति । धर्मलक्षणा वा स्यात् । रथन्तरधर्मा वा कवतीषु रथन्तरशब्देनातिदिश्यन्ते । यथा रथन्तरे प्रस्तूयमाने पृथिवीं मनसा ध्यायेदित्येवमादयः । यथा आचार्य्ये प्रोषिते, आचार्य्यानी भवतामाचार्य्य इत्याचार्य्यशुश्रूषा आचार्य्यान्यामतिदिश्यते॥१२॥ युक्तिः॥ तथा,पूर्व०

अपि तु कर्मशब्दः स्याद्भावोऽर्थः प्रसिद्धग्रहणत्वाद्विकारो ह्यविशिष्टोऽन्यैः ॥ १३ ॥

अपि तु नैवं स्याद् ऋचः सामशब्दः । तस्याश्च प्रदेश इति । तथा देशलक्षणा धर्मलक्षणा वाऽऽश्रयणीया । अगतिश्चैषा यल्लक्षणापरिग्रहः । किन्तर्हि ? कर्मशब्दः स्यात् । रथन्तरादिर्गानाख्यस्य संस्कारकर्म्मणो वाचकः । कुतः । उक्तो न्यायो, गीतिषु सामाख्या इत्यत्र । तत्र गीतिविशिष्टायाम् ऋचि एष शब्दो दृष्टः । न चागृहीतविशेषणा विशेष्ये बुद्धिरुत्पद्यते । तस्माद् विशेषणं तावदभिधीयते । विशेषणप्रत्ययाच्च सहचरिते विशिष्टे प्रत्ययः । अतो नास्ति ऋचः शब्देन संस्पर्श इति । तेनैव न्यायेन गीतिनामधेयमिति ब्रूमः ॥ किञ्च, प्रसिद्धग्रहणत्वात् । अयं च गायतीति शब्दो गानक्रियायां प्रसिद्धः । का पुनरसौ । शब्दस्योच्चारणविशेषः । गायति गानं करोतीति । तद्ग्रहणश्च रथन्तरादिशब्दः । तद्वचन इत्यर्थः । तेन समुच्चारणाद् द्वितीयासामर्थ्याच्च । यथा, आसारितकं गायतीति, वर्द्धमानकं गायतीति ॥ ननु शब्दवचनेनापि समुच्चारणं भवति, गाथां गायति, ऋचं गायतीति । सत्यम् । विपरिणम्य तु शब्दं, गानेन ऋचं संस्करोतीति । यथानिपतितेन अर्थेन न सम्बद्ध्यते गानं करोति ऋचमिति । तस्माद् गीतिवचनः ॥ इतश्च गीतिवचनः ।

कुतः । विकारो हि अविशिष्टोऽन्यैः । विकारश्चात्र ऋग्द्रव्यस्य दृश्यते । ह्रस्वानामक्षराणां दीर्घता, दीर्घाणां च ह्रस्वत्वम् । विवृतानां संवृतत्वं, संवृतानां विवृतत्वम् । सोऽविशिष्टोऽन्यैः संस्कारकर्मभिः । यथा अवहन्तिना व्रीहीणां तण्डुलीभावः, पिषिणा तण्डुलानां पिष्टीभावः । तस्माच्छब्दानां संस्कारो गानाख्यो रथन्तरादिभिः शब्दैरुच्यते । तस्यायं प्रदेशो, रथन्तरमुत्तरयोर्गायतीत्येवमादिः॥१३॥सि०॥

अद्रव्यश्चापि दृश्यते ॥ १४ ॥

अपि च अद्रव्यं साम दृश्यते । द्रव्यशब्दश्छन्दोगैर्ऋक्षु आचरितः। अद्रव्यम् अनृचमित्यर्थः । अनृचं साम दृश्यते, प्रजापतेर्हृदयमनृचं गायतीति । प्रजापतिहृदयं नाम साम । तद् अनृचि उत्पन्नम् । यदि ऋचि सामशब्दः, कथं प्रजापतिहृदयमनृचं स्यात् । अथ गीतेः सामशब्दस्ततो विनापि ऋचा गीतिर्भवति । तत्रैतदुपपद्यते । प्रजापतेर्हृदयमनृचं गायतीति । तस्मादपि गीतिः साम ॥१४॥युक्तिः॥

ननूक्तं, संस्कारकर्मत्वेऽनर्थकोऽकर्मकाले प्रयोग इति । तत्र ब्रूमः—

तस्य च क्रिया ग्रहणार्था नानार्थेषु विरूपित्वादर्थो ह्यासामलौकिको विधानात् ॥ १५ ॥

तस्य क्रिया अकर्मकाले ग्रहणार्था शिक्षितुमभ्यसितुं च । नानाऽर्थेषु नानाभूतेषु अर्थेषु भिन्नेष्वित्यर्थः । विरूपित्वात् । आश्रयभेदाद् विविधरूपं यद् गानं भवति । तत् प्रत्यृचं शिक्षितव्यमभ्यसितव्यं च प्रयोगप्राशुभावाय । भूमिरथिकवत् । तद् यथा, भूमिरथिको भूमौ रथमालिख्य योग्यां करोति । सा तस्य योग्या प्रयोगकाले सौकर्य्यमुत्पादयति । अर्थो ह्यासां रथन्तरादिसंज्ञानां न लौकिके व्यवहारे सिद्धः । यथा अवहन्त्यादीनाम् । कुतः । विधानात् । विधीयते ह्यसौ शिष्योपाध्यायसम्बन्धेन । एवं रूपं रथन्तरं भवतीति । न लौकिको विज्ञायते । तस्मान्नपरिचोदनैषा । अकर्मकाले प्रयोगादिति ॥ १५ ॥

अथ यदुक्तं, संज्ञापृथक्त्वादिति । तत्रोच्यते—

तस्मिन् संज्ञाविशेषाः स्युर्विकारपृथक्त्वात् ॥ १६ ॥

तस्मिन्नेकस्मिन्नपि गानाख्ये संस्कारे संज्ञाविशेषा भवेयुः । कुतः विकारपृथक्त्वात् । तुल्येऽपि गाने विशेषो भवति । गानविशेषाच्च संज्ञापृथक्त्वम् । यथा, आसारितकं, वर्द्धमानकमिति । अन्यथा-

लक्षणा आसारितकगीतिः, अन्यथालक्षणा वर्द्धमानकगीतिः । एव-
मिहापि अन्यथालक्षणा रथन्तरगीतिः, अन्यथालक्षणा बृहद्गीतिः ।
तस्मात् संज्ञापृथक्त्वम् ॥ १६ ॥ आ० नि० ॥

योनिशस्याश्च तुल्यवदितराभिर्विधीयन्ते ॥ १७ ॥

योनिश्चासौ शस्या च योनिशस्या । योनिशस्याश्च ऋचः, तुल्य-
वद् इतराभिरयोनिशस्याभिर्विधीयन्ते । याम्याः शंसति, शिपिविष्ट-
वन्तीः शंसति, रथन्तरस्य योनिमनुशंसति, बृहतो योनिमनुशंसती-
ति । का तत्र तुल्यता । शंसतिशब्देनाभिधानात् । इह एतौ स्तौति-
शंसतिशब्दौ समानेऽपि स्तुत्यर्थत्वे व्यवस्थितविषयौ । प्रगीतेषु मन्त्र-
वाक्येषु स्तौतिशब्दः, अप्रगीतेषु शंसतिशब्दः । यथा प्र उ गं शंसति,
निष्केवल्यं शंसतीति । आज्यैः स्तुवते, पृष्ठैः स्तुवते इति । अतः
शंसतिशब्देन विधानादप्रगीताम् ऋचं रथन्तरस्य योनिं दर्शयति ।
यदि च गीतिः रथन्तरं, ततस्तस्य अप्रगीता ऋग् योनिः । अन्यथाऽयं
व्यपदेशो नोपपद्यते । रथन्तरस्य योनिमिति । तस्माद् गीतिषु
सामाख्या ॥ १७ ॥

अयोनौ चापि दृश्यते अतथायोनि ॥ १८ ॥

अयोनौ च साम दृश्यते । ख्याल्यां सक्तववधीयते इत्याहुर्यद्
बृहद् गायत्रीषु क्रियतेऽपि चैनां रुजति । न चास्यां सम्भवतीति ।
बृहतो बृहती योनिः । तस्य गायत्रीषु प्राप्तिर्नास्ति । यदि ऋचः साम-
शब्दः । अथ नु गीतेः । ततः सा बृहद्गीतिर्गायत्रीषु वचनात् प्राप्ता ।
तस्या अयमनुवादो घटते, यद् बृहद् गायत्रीषु क्रियते इति । अतथा-
योनि च साम दर्शयति । यादृशी यस्य योनिस्ततोऽन्यादृशे यो वै
विच्छन्दसि सामोहति स ऋचं संश्रृणाति, साम वा विलिशति,
साम संश्रृणाति, ऋचं विलिशतीति । यतरद् वर्षीयस्तस्य विलेशः ।
यतरद् वर्षीयस्तस्य संशयः । तत्र गीतौ एव साम्नि युज्यते, न ऋचि ।
ऊहतिशब्दश्च गीतावेव समर्थो, न ऋचि । ऋक् चेत्, सैव यथाम्नायं
पठ्यते । तत्र नास्त्यूहप्रसङ्गः । तस्मादपि गीतौ सामशब्दः ॥ १८ ॥
युक्तिः ॥

ऐकार्थ्ये नास्ति वैरूप्यमितिचेत् ॥ १९ ॥

यदुक्तं, तस्य क्रिया ग्रहणार्था इति । तत्र परिचोद्यते । ऐकार्थ्ये

नास्ति वैरूप्यमिति । रथन्तरगीतिर्बृहद्गीतिरर्थान्तरम् । तेन रथन्तरगीतौ गृहीतायां बृहद्गीतिरगृहीता भवतीति युक्तो रथन्तरे गृहीते बृहतः शिक्षार्थमकर्मकाले प्रयोगः । रथन्तरगीतिस्त्वेक एवार्थः । तस्य योन्यां प्रयोगे शिक्षिते पुनरुत्तरासु न शिक्षितव्यम् । तासु अकर्मकाले प्रयोगः संस्कारकर्मत्वे न युक्तो भवति । तस्मान्न संस्कारस्य सामशब्द इति स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति ॥१९॥ आ०॥

स्यादर्थान्तरेष्वनिष्पत्तेर्यथा पाके ॥ २० ॥

स्याद् वैरूप्यम् । कुत एतत् । अर्थान्तरेषु अनिष्पत्तेः । ऋगन्तरेषु आश्रयभेदात् । यथा पाके । यथा एक एव अयमर्थः पाको नाम । तस्यार्थान्तरे वैरूप्यं भवति । अन्यथालक्षण ओदनस्य पाकः, अन्यथालक्षणो गुडस्य । येन ओदनपाको गृहीतो, न असौ अशिक्षित्वा गुडं पक्तुं जानाति । तस्मात् तस्याप्यकर्मकाले प्रयोग उपपद्यते ॥ २० ॥ आ० नि० ॥

शब्दानाञ्च सामञ्जस्यम् ॥ २१ ॥

एवञ्च सामशब्दानाम् ऋक्शब्दानां च सामञ्जस्यं भवति । कवतीषु रथन्तरं गायतीति कवतीशब्दः, ऋच एव वक्ष्यति, रथन्तरशब्दश्च साम । इतरथा कवतीशब्दे वा देशलक्षणा स्यात् । रथन्तरशब्दे वा धर्मलक्षणा । तस्माद् गीतौ सामशब्द इति ॥ २१ ॥ युक्तिः ॥ रथन्तरादिशब्दस्य गानविशेषार्थताधिकरणम् ॥ १ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये सप्तमस्याध्यायस्य द्वितीयः पादः ॥७॥२॥

अथ सप्तमस्य अध्यायस्य तृतीयः पादः ॥ ७ ॥ ३ ॥

उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात् ॥ १ ॥

नाम्ना धर्म्मप्रदेशं वक्ष्याम इत्यादौ प्रतिज्ञातं सोऽयमुच्यते । कुण्डपायिनामयने श्रूयते, मासमग्निहोत्रं जुह्वतीति । तत्रैतत् समधिगतं, नैयमिकादग्निहोत्रात् कर्म्मान्तरमेतदिति । अधुना अग्निहोत्रशब्दश्चिन्त्यते । कथमयं प्रयुक्त इति, तदर्थमारभ्यते । उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यादिति । उक्तमादौ, क्रियाभिधानं कर्म्मनामधेयम्, अग्निहोत्रशब्द इति– तत्प्रख्यं चान्यशास्त्रमित्यत्र । तस्यान्यत्र श्रुतौ कौण्डपायिनामयनीये जुहोतौ विधिप्रदेशः स्याद् धर्म्मप्रदेशः । नैयमिकस्याग्निहोत्रस्य ये धर्म्मास्तेऽस्मिन्ननेन

नाम्नाऽतिदिश्येरन्। किङ्कारणम्। उच्यते। परशब्दोऽयं परत्र वृत्तः। परशब्दस्य परत्र वृत्तौ तद्वद्भावो गम्यते। स यत्र विज्ञातो भवति तत्रानूद्यते। यथा, सिंहो देवदत्त इति। यत्राविज्ञातस्तत्र विधीयते। यथा, अमी पिष्टपिण्डाः सिंहाः क्रियन्तामिति। इह चाविज्ञातोऽस्य जुहोतेरग्निहोत्रवद्भावः। तस्मात् स विधीयते। मासमग्निहोत्रं जुहोतीति, अग्निहोत्रवज्जुहोतीति। कथं पुनरसति वतिप्रत्यये वत्यर्थः शक्योऽवगन्तुमिति। उच्यते। साहचर्य्यात्। अग्निहोत्रशब्दोऽयं कर्मणा सम्बद्धस्तत्सहचरितदोहनादिधर्मवत्तां लक्षणया शक्नोति गमयितुम्। शक्नोति चेद् गमयितुम्, प्रदेष्टुमपि शक्नोति। एवमन्तरेणापि वतिं, वत्यर्थः शक्योऽवगन्तुमिति ॥ १ ॥ सि० ॥

अपूर्वे वापि भागित्वात् ॥ २ ॥

वा अपि इति विपर्य्यासेन प्रयुक्ते। अपि वा इत्यर्थः। अपि वा अपूर्वे एते उभे कर्मणी स्याताम्। न कौण्डपायिनामयनीयो जुहोतिर्नैयमिकपूर्वः। साधारणं च नामधेयमुभयोः। कुतः। भागित्वात्। अयमपि जुहोतिर्भागी एतस्य नामधेयस्य। यथैव तत्राग्निहोत्रं जुहोतीति समुच्चारणम्, एवमिहापि। तत्र तुल्ये समुच्चारणे तस्यैवैतन्नामधेयम्। नास्येत्यत्र विशेषहेतुर्नास्ति। तस्मादुभयोः साधारणं नामेति नास्ति धर्मप्रदेशः ॥ २ ॥ पूर्व० ॥

नैतद् युक्तम्। कुतः?

नाम्नस्त्वौत्पत्तिकत्वात् ॥ ३ ॥

औत्पत्तिको हि नामिनाम्नोः सम्बन्धः। यन्नाम यस्मिन् अर्थे औत्पत्तिकेन सम्बन्धेन प्रसिद्धं, तस्मिन्नेव सदा विज्ञेयं, नान्यत्र च। तथा अव्यवस्थायां शब्दार्थे विश्वासो न स्यात्। उक्तम्। अन्यायश्चानेकार्थत्वमिति। यदा च नोभयार्थस्तदा नैयमिकं तावद् आह। तत्साद्दश्यविधानार्थं चेतरत्रापि प्रयोग उपपद्यते इति नास्तीतराभिधानत्वे हेतुः। तस्माद् विधिप्रदेशः स्यात् ॥ ३ ॥ उत्तरम् ॥

अत्राह। कस्मात् पुनस्तन्नामधेयमिदमिह प्रयुक्तमित्युच्यते, न पुनरेतन्नामधेयं तत्रेति। तत आह—

प्रत्यक्षाद् गुणसंयोगात् क्रियाभिधानं स्यात्तदभावेऽप्रसिद्धं स्यात् ॥ ४ ॥

नैयमिकेऽग्निहोत्रे प्रत्यक्षो गुणसंयोगः । प्रत्यक्षविहिता धर्माः सन्ति । इत्थं दोग्धि, इत्थं श्रपयति, चतुरुन्नयति, खादिरी अग्निहोत्रसमिद्भवति, इत्थं जुहोति। एवं प्रत्यक्षाद् गुणसंयोगान्नैयमिकस्य तद् नामधेयमिह प्रयुज्यमानं दोहनादि क्रियाभिधानं स्यात् । धर्मप्रदेशकमित्यर्थः । अस्य पुनर्जुहोतेर्न केचिद् धर्माः सन्ति । तदभावे तेषां धर्माणामभावे अप्रसिद्धं स्यात् । न प्रज्ञायेत, किमर्थमयमग्निहोत्रशब्द इह प्रयुक्त इति ॥

एवं वा । प्रत्यक्षो गुणसंयोगो, नैयमिकस्य द्रव्यदेवतासंयोगः । दध्ना जुहोति, पयसा जुहोति, अग्नये च प्रजापतये च सायं जुहोतीति । एतस्मात् प्रत्यक्षाद्गुणसंयोगात् क्रियाभिधानं स्यात् । कर्मनामधेयम् । इत्थंरूपो जुहोतिरग्निहोत्राख्य इति । अथैतज्जुहोते रूपं नास्ति । तदभावेऽप्रसिद्धं स्याद्, न ज्ञायेत कीदृशं तदग्निहोत्रमिति ॥ ननु मासोऽस्य रूपं भविष्यति । न मासः कर्माङ्गं, कर्त्तृधर्मः सः । अपि च । अग्निहोत्रं तु मासे विधीयते, न मासेन अग्निहोत्रं रूप्यते । तस्मान्नैयमिकस्यैतन्नामधेयमितरत्र तद्वदतिदेश इति ॥ ४ ॥ आ०नि० ॥ अग्निहोत्रादिनाम्ना धर्मातिदेशाधिकरणम् ॥ १ ॥

किमेष एवोत्सर्गः । सर्वं कर्मनाम, अन्यत्र श्रूयमाणं धर्माणां ग्राहकमिति । एवं खलु प्राप्तम् । एवं प्राप्ते इदम् आरभ्यते—

अपि वा सत्रकर्मणि गुणार्थैषा श्रुतिः स्यात् ॥ ५ ॥

गवामयने श्रूयते, वैश्वानरो ज्योतिष्टोमः प्रायणीयम् अहर्भवतीति । अस्ति तु द्वादशाहे प्रथमम् अहः प्रायणीयं नाम । प्रायणीयोऽतिरात्रे इति । तयोर्नानात्वं तेनैव न्यायेन सिद्धम् । प्रकरणान्तरे प्रयोजनान्यत्वमिति । तत्रायं प्रायणीयशब्दः परत्रापि श्रूयमाणो न धर्माणां ग्राहकः । किन्तर्हि ? गुणार्थैषा श्रुतिः । कथम् । लक्षणया नामधेयं धर्माणां ग्राहकमुक्तम् । असति च श्रुत्यर्थे लक्षणार्थो ग्राह्यः। इह तु श्रुत्यर्थ एव सम्भवति । गुणार्थ एष शब्दः । गुणेन क्रियायोगेन।तस्मिन् कर्मणि श्रुत्यैव प्रयुज्यते । प्रयन्ति अनेनेति प्रायणीयं, प्रवर्त्ततेऽनेन सत्रमिति । वाक्यशेषश्चास्यैतमेवार्थमाह । ज्योतिरेव पुरस्ताद्दधातीति । येन ज्योतिः प्रायणीयं भवति, तेन ज्योतिः पुरस्तात् क्रियते इत्यर्थो, ज्योतिरेव पुरस्ताद् दधातीति । तस्मान्नाय-

मतिदेशः ॥ ५ ॥ प्रायणीयेति नाम्ना धर्मानतिदेशाधिकरणम् ॥ २ ॥

विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वाज्ज्यौतिष्टोमिकानि पृष्ठान्यस्ति च पृष्ठशब्दः ॥ ६ ॥

विश्वजित् सर्वपृष्ठो भवतीति श्रूयते । तत्र विचार्य्यते । किमयमनुवादः, विधिः ? इति । किं प्राप्तम् । अनुवाद इति । कुतः । यो हि असर्वपृष्ठस्तस्य सर्वपृष्ठता विधेया । यस्तु सर्वपृष्ठ एव, तस्य तया किं विहितया । अयं च सर्वपृष्ठ एव । कथम् । तत्पूर्वकत्वात् । ज्योतिष्टोमपूर्वकत्वात् । ज्यौतिष्टोमिकानि स्तोत्राणि अत्र प्राप्यन्ते । तेषु माहेन्द्रस्तोत्रादीनि चत्वारि सन्ति । तानि सर्वाणि अस्य । तैरयं सर्वपृष्ठो भवति । ननु न तानि पृष्ठानि । उच्यते । अस्ति च पृष्ठशब्दः । तेषु अस्ति पृष्ठशब्दः । सप्तदशानि पृष्ठानीति । तस्मादनुवादः ॥ ६ ॥ पूर्व० ॥

षड़हाद्वा तत्र हि चोदनाः ॥ ७ ॥

नायमनुवादः, किन्तर्हि । विधिः। अनुवादोऽप्रवृत्तिविशेषकरोऽनर्थकः स्यात् । अपि च ज्योतिष्टोमे न पृष्ठबहुत्वमस्ति, यस्यायमनुवादः स्यात् । षडहे तु तदस्ति । तत्र हि चोदनाः, पृष्ठानां रथन्तरं पृष्ठं भवतीत्येवमाद्याः । तस्मात् षाड़हिकानामतिदेशको विधिरिति ॥७॥ सि०

लिङ्गाच्च ॥ ८ ॥

लिङ्गं चैतमर्थं दर्शयति । पवमाने रथन्तरं करोत्यार्भवे बृहत् । मध्ये इतराणि । वैरूपं होतुः साम, वैराजं मैत्रावरुणस्य, रैवतं ब्राह्मणाच्छंसिनः, शाकरमच्छावाकस्येति विनिवेशपरे वाक्ये षाड़हिकानि पृष्ठानि दर्शयति ॥ ८ ॥ युक्तिः ॥

उत्पन्नाधिकारो ज्योतिष्टोमः ॥ ९ ॥

अथ यदुक्तम्, अस्ति च पृष्ठशब्द इति । तत्र ब्रूमः । न त्वेष औत्पत्तिकः पृष्ठशब्दः । उत्पन्नानां स्तोत्राणामसौ अधिकारः । यान्येतानि पृष्ठानीति । ज्ञाते च तेषां पृष्ठत्वे, तदुपपद्यते न च तत्र ज्ञातम् । कथं तर्हि अयमनुवादः । लिङ्गसमवायात् । एकं तत्र माहेन्द्रस्तोत्रमिति । षाड़हिकानां पुनः पृष्ठत्वं ज्ञातम् । कथम् । तत्र हि चोदनेत्युक्तम् । तेषां वादे, श्रौतः पृष्ठशब्दस्यार्थः परिगृहीतो भवति।

इतरथा लाक्षणिकः । तस्मात् षाड्हिकानां प्रदेश इति ॥९॥आ०नि०॥

द्वयोर्विधिरिति चेत् ॥ १० ॥

इति चेत् पश्यसि, षाड्हिकानां पृष्ठानां विधिरिति। नैतद् युक्तम् । किं कारणम् । द्विकर एवं सर्वपृष्ठशब्दोऽभ्युपगम्यते । पृष्ठानि च विदधाति । तेषां च सर्वत्वम् । अस्तु । को दोषः । असम्भव इत्याह । यदि पृष्ठशब्दः पृष्ठानि विदधाति, सर्वशब्देन न शक्यते विशेषयितुम् । अथानुवदति, तथा शक्यते । पृष्ठानि त्वविहितानि भवन्ति । तेषु असत्सु कस्येदं सर्वत्वं विधीयते । उभयक्रियायाश्च असम्भवः ॥ अथात्र बृहद्रथन्तरयोर्विकल्पेन प्राप्तयोः सामस्त्यं केवलं विधीयते, सर्वपृष्ठो भवतीति । उभे अपि बृहद्रथन्तरे भवतो, नैकमिति । ततोऽयं दोषो न भवति। तस्माद् द्वयोरधिकारः॥१०॥आ०

न व्यर्थत्वात् सर्वशब्दस्य ॥ ११ ॥

नैवमेतत् । कुतः । व्यर्थत्वात् सर्वशब्दस्य । एवं सति सर्वशब्दो व्यर्थो भवति अर्थशून्यः । अयं हि बहुविषयो द्वयोर्न युज्यते । षाड्हिकानां तु विधाने नैष दोषः । ननु च तत्रापि द्विकरः शब्दो भविष्यति । उच्यते । न भविष्यति । सर्वत्वं केवलं पृष्ठानां विधास्यति, न पृष्ठानि । ननूक्तं, पृष्ठेष्वसत्सु कस्येदं सर्वत्वं विधीयते ? इति । उच्यते । पृष्ठानां सर्वत्वं हि विहितम् । तत् सम्पादयितव्यम् । न च पृष्ठान्यऽकुर्वता तत् सम्पादयितुं शक्यते । तत्रार्थात् पृष्ठानि करिष्यति । एवं न द्व्यर्थः शब्दो भविष्यति । सर्वशब्दश्च समर्थितः । तस्मात् षाड्हिकानामतिदेश इति ॥ ११ ॥ आ० नि० ॥ सर्वपृष्ठशब्देन षट्पृष्ठानामतिदेशाधिकरणम् ॥ ३ ॥

तथावभृथः सोमात् ॥ १२ ॥

वरुणप्रघासेषु श्रूयते । वारुण्या निष्कासेन तुषैश्चावभृथं यन्तीति । तत्र सन्देहः । किं दार्शपूर्णमासिके अपां व्युत्सेके तुषनिष्कासं विधीयते, उत सौमिकादवभृथाद्धर्मातिदेश इति । किं युक्तम् । दार्शपूर्णमासिके गुणविधिः । एवं सन्निहितप्रत्ययोऽनुगृह्यते । सन्निहितो हि असौ चोदकेन प्रापितः । ननु नासौ अवभृथः । उच्यते । अस्ति तत्रावभृथशब्द इति । एष वै दर्शपूर्णमासयोरवभृथ इति । एवं प्राप्ते इदमाह ॥ तथाऽवभृथः सोमात् ॥ यथा षड्हात् पृष्ठानाम्

अतिदेशः । एवं सौमिकाद् अवभृथादिह धर्मातिदेशः । कुतः । अभिहितो न्यायः । उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यादिति ॥ १२ ॥ सि० ॥

प्रकृतेरिति चेत् ॥ १३ ॥

अथ यदुक्तं, दार्शपौर्णमासिके अवभृथे गुणविधिर्भवत्विति । तस्य कः परिहारः ? इत्याभाषान्तं सूत्रम् ॥ १३ ॥ आ० ॥

न भक्तित्वात् ॥ १४ ॥

नैतद् युक्तम् । कुतः । यतो नास्ति दर्शपूर्णमासयोरवभृथः । नन्वेष एव दर्शपूर्णमासयोरवभृथ इति श्रूयते । सत्यं श्रूयते, न त्वेवमवभृथत्वमस्य भवति । कथम् । उच्यते । एष वै दर्शपूर्णमासयोरवभृथ इत्येतस्य वाक्यस्य द्वयी वचनव्यक्तिः । निर्ज्ञातावभृथत्वस्य पदार्थस्य वा दर्शपूर्णमाससम्बन्ध उच्यते । यथा देवदत्तो यज्ञदत्तस्य पुत्र इति निर्ज्ञातपुत्रत्वस्य देवदत्तस्य यज्ञदत्तसम्बन्ध उच्यते । निर्ज्ञातसम्बन्धस्य वा अनिर्ज्ञातावभृथत्वस्य अवभृथत्वम् । यथा, अयमाम्रो यज्ञदत्तस्य पुत्र इति । निर्ज्ञातयज्ञदत्तसम्बन्धस्याम्रपुत्रत्वमुच्यते । तदस्यापां व्युत्सेकस्य दर्शपूर्णमाससम्बन्धः प्रकरणान्निर्ज्ञातो, न अवभृथत्वम् । अतोऽस्यावभृथत्वमुच्यते । न चायमवभृथः ॥ नन्वयमप्यवभृथो भवतु । नैतद् युक्तम् । अन्यायो हि अनेकार्थत्वम् । कथं तर्हि शब्दप्रयोगः । सादृश्यात् । किं सादृश्यम् । अप्सु सम्बन्धः । स एष भक्त्या प्रशंसावादोऽपां व्युत्सेकस्य, अवभृथ इवायमिति । यथा आम्रे पुत्रवादः । तस्मान्नास्ति दर्शपूर्णमासयोरवभृथः । अतो नात्र गुणविधिः ॥ १४ ॥ आ० नि० ॥

लिङ्गदर्शनाच्च ॥ १५ ॥

लिङ्गं चैतमर्थं दर्शयति । किं लिङ्गं भवति । एवमाह । नाप्सुर्दीं जुहोति, न साम गायति, न वा गमनमन्त्रं जपतीति । सौमिकावभृथधर्माणां प्रतिषेधं ब्रुवन् तद्धर्मप्राप्तिं दर्शयति । तस्मात् सौमिकाद् अवभृथाद्धर्मप्रदेश इति ॥ १५ ॥ ॥ युक्तिः ॥ अवभृथनाम्ना सौमिकधर्मातिदेशाधिकरणम् ॥ ४ ॥

द्रव्यादेशे तद्द्रव्यः श्रुतिसंयोगात् पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् ॥ १६ ॥

वारुणप्राघासिकोऽवभृथः सौमिकाद् अवभृथाद्धर्माणां ग्राहक इत्युक्तम् । तत्रेदं चिन्त्यते । किं पुरोडाशद्रव्यकोऽसौ, उत तुषनिष्कासद्रव्यक इति । कुतः । नाम्ना पुरोडाशः प्राप्यते । ननु प्रत्यक्षश्रुतं तुषनिष्कासम् । सत्यं प्रत्यक्षश्रुतं, न तु शक्यते विधातुम् । अवभृथोऽत्र विधीयते । अवभृथं यन्तीति । यदि तुषनिष्कासमपरं विधीयते, ततो वाक्यं भिद्येत । अवभृथं यन्ति । तच्च तुषनिष्कासेनेति । तुषनिष्कासश्रवणमिदानीं किमर्थम् । अनर्थकम् । सम्बन्धाभावात् ॥ एवं प्राप्ते ब्रूमः । द्रव्यादेशे तद्द्रव्यः । द्रव्यादेश एतस्मिँस्तुषनिष्कासेन अवभृथं यन्तीति । तद्द्रव्यः स्यात्, तुषनिष्कासद्रव्यः । कुतः । श्रुतिसंयोगात् । तुषनिष्कासम्प्रत्यक्षश्रुतं, पुरोडाशस्त्वानुमानिकोऽतिदेशेन प्राप्यते ॥

ननु पुरोडाशोऽपि प्रत्यक्षश्रुतो नाम्ना । यद्यपि प्रत्यक्षश्रुतः, सामान्येन तु प्राप्यते । तुषनिष्कासं तु विशेषेण । बाध्यते च सामान्यं विशेषेण । अपिच लक्षणया पुरोडाशो गम्यते, श्रुत्या तुषनिष्कासम् । श्रुतिलक्षणयोश्च श्रुतिर्ज्यायसी । तस्मात् तुषनिष्कासद्रव्यक इति । अथ यदुक्तं, न सम्बद्ध्यतेऽवभृथेन तुषनिष्कासम् । वाक्यभेदप्रसङ्गादिति । तत्र ब्रूमः । यद्यवभृथं विहाय तुषनिष्कासं विधीयते, ततो वाक्यभेदः स्यात् । तुषनिष्कासद्रव्यकोऽपूर्वोऽवभृथश्चोद्यते । तथा, सगुणकर्मविधानमविरुद्धम् । अविधीयमाने च तुषनिष्कासे तद्ग्रहणमनर्थकमेव स्यात् । तस्मात्तुषनिष्कासद्रव्यकः । पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् । यद्यत्र प्रत्यक्षश्रुतं न द्रव्यं स्यात्, ततः पुरोडाशस्तुषप्रकृतित्वात् स्यात् । अत्र तु प्रत्यक्षश्रुतं तुषनिष्कासम् । तस्मान्न पुरोडाशः ॥ १९ ॥ वारुणप्राघासिकावभृथस्य तुषनिष्कासद्रव्यकत्वाधिकरणम् ॥ ५ ॥

आतिथ्ये श्रूयते, वैष्णवो नवकपालो भवतीति । तथा राजसूये, पूर्वस्मिंस्त्रिसंयुक्ते वैष्णवस्त्रिकपाल इति । तत्र विचारः । योऽयं त्रिसंयुक्ते वैष्णवस्त्रिकपाल इति वैष्णवशब्दः, अयम् आतिथ्यधर्माणां ग्राहको, न ? इति । किं युक्तम् । ग्राहक इति । कुतः । विहितधर्मके कर्मणि दृष्टः शब्दोऽन्यस्मिन् अविहिते श्रूयमाणो ग्राहकः इत्युक्तम् । उक्तं क्रियाभिधानम् इति । तत्रायमपि विहितधर्म्मकः आतिथ्ये दृष्टः । इदानीमविहितधर्मके त्रिसंयुक्ते दृश्यते । तस्माद्

धर्म्माणां ग्राहक इति। एवं प्राप्ते ब्रूमः—

गुणविधिस्तु न गृह्णीयात् समत्वात् ॥ १७ ॥

गुणविधिरयम्, आतिथ्यस्य गुणं विष्णुदेवतासंयोगं विदधाति। स एष धर्म्मान् ग्रहीतुं न शक्नोति। कुतः। समत्वात्। समो हि अयमातिथ्ये त्रिसंयुक्ते च। यथा तत्र विष्णुदेवतां विदधाति। एवमत्रापि। श्रुत्यर्थासम्भवाच्च लक्षणया धर्म्माणां ग्राहकः कल्प्यते। इह च प्रत्यक्षश्रुत्यर्थ एव सम्भवति देवताविधिः। तस्मान्नायं ग्राहक इति ॥ १७ ॥ वैष्णवशब्दादातिथ्ये धर्मानतिदेशाधिकरणम् ॥ ६ ॥

निर्मन्थ्यादिषु चैवम् ॥ १८ ॥

पशौ अग्नीषोमीये धर्म्मवान् निर्म्मन्थ्योऽग्निराम्नातः। साध्या वै देवा इत्यारभ्य अग्नौ श्रूयते, निर्मन्थ्येनेष्टकाः पचन्तीति। तथा, दर्शपूर्णमासयोर्बर्हिराज्ये धर्मवती। पशौ श्रूयते, बर्हिषा यूपावटमवस्तृणातीति, आज्येन यूपमनक्तीति। तत्र सन्देहः। किं निर्मन्थ्यादयः शब्दा धर्माणां ग्राहकाः, न ? इति। तत्र अधिकरणातिदेशः क्रियते। निर्मन्थ्यादिषु चैवम्। यथा वैष्णवशब्दे। अत्राप्ययं यौगिको निर्मन्थ्यशब्दः, सद्योनिर्मथितमग्निमाह। तथा बर्हिराज्यमिति द्रव्यशब्दौ। ते त्रयोऽपि स्वार्थं विधाय कृतार्था भवन्ति, धर्मान् ग्रहीतुं न शक्नुवन्ति। तस्मान्न ग्राहकाः ॥ १८ ॥ निर्मन्थ्यादिशब्दैर्धर्मानतिदेशाधिकरणम् ॥ ७ ॥

चातुर्मास्येषु श्रूयते- द्वयोः प्रणयन्ति, तस्माद् द्वाभ्यामेतीति। अस्ति तु सोमे प्रणयनं धर्म्मवत्। तथा दर्शपूर्णमासयोरधर्म्मकम्। तत्र सन्देहः।किं सौमिकमेतत् प्रणयनम्,उत दार्शपौर्णमासिकमिति। तत्र सूत्रेणैवोपक्रमः—

प्रणयनन्तु सौमिकमवाच्यं हीतरत् ॥ १९ ॥

सौमिकमेतत् प्रणयनम्। किं कारणम्। अवाच्यं हीतरद् दार्शपौर्णमासिकम्। चोदकेन प्राप्तत्वात्। कथं पुनरयं प्रणयतिशब्दः, प्रणयनमात्रवचनः सन् सौमिकं प्रणयनविशेषं शक्नोति वक्तुम्। लक्षणयेति ब्रूमः। तीर्थशब्दवत्। तद् यथा तीर्थशब्दस्तीर्थमात्रवचनः सँस्तीर्थविशेषं धर्म्मसाधनं कदाचिद् ब्रूते, तीर्थयात्रां गत इति ॥ १९ ॥ पूर्व० ॥

उत्तरवेदिप्रतिषेधश्च तद्वत् ॥ २० ॥

न वैश्वदेवे उत्तरवेदिमुपवपन्ति न सुनासीरीये इति । प्राप्तिपूर्वो हि प्रतिषेधो भवति, सौमिके च प्रणयने उत्तरवेदिर्न दार्शपौर्णमासिके ॥ २० ॥ युक्तिः ॥

प्राकृतं वाऽनामत्वात् ॥ २१ ॥

प्राकृतं वा एतत् प्रणयनं, दार्शपौर्णमासिकम् । कुतः । अनामत्वात् । प्रणयनशब्दः सौमिकस्य प्रणयनस्य न नामधेयम् । नैतत् तस्य वाचकमित्यर्थः । यद्ययं तस्य वाचकः स्यात्, ततस्तदिह ब्रूयात् । इदं तु पदार्थनामधेयं, पदार्थस्य प्राङ्नयनस्य वाचकम् । तदिह शक्नोत्यग्नेः प्राचीनं नयनं वक्तुम् । तच्चेह अस्त्येव । तस्मात् तस्य वाचकः । एवं सन्निहितप्रत्ययो न बाधितो भवति ॥

अथ यदुक्तं, तीर्थशब्दवद् भविष्यतीति । अत्र ब्रूमः । तीर्थशब्दोऽपि तीर्थमात्रमेव ब्रूते । तीर्थयात्रां गत इति तु उक्त्वा कानिचित्तीर्थानि अनुक्रान्तानि । यतोऽसौ तद्विशिष्टार्थो विज्ञायते । यत्र तु केवलः प्रयुज्यते, तत्र तीर्थमात्रमेव ब्रूते । यथा, तीर्थे स्नाति तीर्थमेव हि समानानां भवतीति । अपि च सम्भवति श्रुत्यर्थे, लक्षणाऽर्थोऽग्राह्यः । सम्भवति चात्र श्रुत्यर्थः । तस्मान्न लक्षणार्थो ग्राह्य इति ॥ २१ ॥ सि० ॥

परिसङ्ख्यार्थं श्रवणं गुणार्थमर्थवादो वा ॥ २२ ॥

तत्राह । यदुक्तम्– अवाच्यं हीतरदिति । तस्य कः परिहारः । उच्यते । परिसङ्ख्यार्थं वा स्यात् । द्वयोः प्रणयन्ति, न चतुर्ष्विति । गुणार्थम् । अर्थवादार्थं वा । तस्माद् द्वाभ्यामेतीति । तत्र परिसङ्ख्यायां तावत् त्रयो दोषाः । गुणोऽपि न कश्चिद् विधीयते । परिशेषादर्थवादार्थम् । नन्वर्थवादोऽपि निष्प्रयोजनः । प्रणयनस्य प्राप्तत्वात् । अर्थवादस्य प्रयोजनमुत्तरस्मिन्नधिकरणे वक्ष्यामः । मध्यमयोर्वा गत्यर्थवादादिति ॥ २२ ॥ आ० नि० ॥ द्वयोः प्रणयन्तीत्यनेन सौमिकधर्मानतिदेशाधिकरणम् ॥ ८ ॥

प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधात् ॥ २३ ॥

द्वयोः प्रणयन्तीति श्रूयते । तत्र सन्देहः । कतरयोर्द्वयोरिति । अनियमे प्राप्ते, उच्यते । प्रथमोत्तमयोः प्रणयनम् । कुतः । उत्तर-

वेदिप्रतिषेधात्। तत्रोत्तरवेदिः प्रतिषिद्ध्यते। न वैश्वदेवे उत्तरवेदिमुपवपन्तीति, न सुनासीरीये इति। अस्मिन् प्रणयने उत्तरवेद्यामग्निनिधानं विहितम्। अतो यत्र प्रणयनं, तत्रोत्तरवेदिप्राप्तिः। प्राप्तौ च सत्यां प्रतिषेधः। प्रथमोत्तरयोश्चासौ। तस्मात् तयोः प्रणयनमिति॥ २३॥ पूर्व०॥

मध्यमयोर्वा गत्यर्थवादात्॥ २४॥

मध्यमयोर्वा पर्वणोः प्रणयनम्। कुतः। गत्यर्थवादात्। गत्यर्थवादेनैतद् द्वयोः प्रणयनमुच्यते। तस्माद् द्वाभ्यामेतीति। ऊरू संस्तुते वा एते पर्वणोः, ऊरू वा एतौ यज्ञस्य, यद् वरुणप्रघासाश्च साकमेधाश्चेति। ऊरू च गमनसाधने तत्रैवं स्तुतिसम्बन्धो विज्ञायते। ऊरू यज्ञस्य, वरुणप्रघासाश्च साकमेधाश्चेति, तयोर्द्वयोः प्रणयन्ति। तस्माद् द्वाभ्यामूरुभ्यां यज्ञः समाप्तिं याति। प्रणयनेन हि तौ बलवन्तौ भवतः। अङ्गभूयस्त्वादिति। एतत् तदर्थवादस्य प्रयोजनम्॥ २४॥ सि०॥

अथ यदुक्तम्, उत्तरवेदिप्रतिषेधादिति। तत्र ब्रूमः—

औत्तरवेदिकोऽनारभ्यवादप्रतिषेधः॥ २५॥

अनारभ्य कञ्चित् पर्वविशेषं चातुर्मास्येषूत्तरवेदिराम्नाता—उपात्र वपन्तीति। तस्यानारभ्य विधेरयं प्रतिषेधः। ननु वरुणप्राघासानां गुणवाक्यप्राप्तौ एव अयं तेषामेव अत्र इति वादः स्यात्। नैतदेवम्। प्रकरणाच्चातुर्मास्यानामेव। यदि वरुणप्रघासानां वादः स्यात्, तत्र प्रतिषेधे त्रीण्यपि पर्वाणि उत्कीर्त्तयेत्। अथोच्येत, द्वयोः पर्वणोर्वादो भवत्विति। अत्र ब्रूमः। न द्वयोः पर्वणोः प्रकरणं, चातुर्मास्यानां वा प्रकरणं, वरुणप्रघासानां वा। वरुणप्रघासानां द्वयोः प्रकरणे पर्वणोरुत्कीर्त्तनं प्रतिषेधे न स्यात्। तस्माच्चातुर्मास्यानामेव वादः। नन्वेवमपि अर्थवादेनैतज्ज्ञातं, मध्यमयोः प्रणयनमिति। किमर्थं प्राप्तस्य प्रणयनस्य पुनःश्रवणमिति। अत्र प्रयोजनं नोक्तम्। असति प्रयोजनेऽन्यस्मिन् परिसङ्ख्यार्थमेव भवति। तत्र दोषा उक्ताः। तस्माद् गुणार्थमेवैतच्छ्रवणम्। ननु नास्ति कश्चिद् गुणः?। उच्यते। गुणः श्रूयते, उत्तरवेद्यामग्निनिधानम्। तस्मात् तदर्था

पुनः श्रुतिः ॥ २५ ॥ आ० नि० ॥ द्वयोः प्रणयन्तीत्यनेन मध्यमयोर्द्वयोः प्रणयनाधिकरणम् ॥ ९ ॥

स्वरसामैककपालामिक्षञ्च लिङ्गदर्शनात् ॥ २६ ॥

गवामयने श्रूयते, अभितो दिवाकीर्त्यमहस्त्रयः स्वरसामानो भवन्तीति । तेषां विशेषधर्मा आम्नाताः । यथा, सप्तदशा भवन्ति, सन्ततयाऽतिग्राह्या गृह्यन्ते इत्येवमादयः । पुनरन्यत्र श्रूयते, पृष्ठ्यः षडहो द्वौ स्वरसामानौ इति । तथा वैश्वदेवे श्रूयते, द्यावापृथिव्य एककपाल इति । तत्र आम्नाता विशेषधर्माः, सर्वहुतं जुहोत्यपर्य्यावर्त्तयञ्जुहोतीति । पुनरपरत्र, काय एककपाल इति । तत्रैव श्रूयते । वैश्वदेव्यामिक्षा इति । तत्रापि विशेषधर्माः केचिद् आम्नाताः । पुनरन्यत्र, मैत्रावरुणी आमिक्षा इति । तत्र सन्देहः । किं स्वरसामशब्दोऽन्यत्र श्रूयमाणो गवामयनिकेभ्यः स्वरसामभ्यो धर्माणां ग्राहकः ? उत नेति । एवमेककपालामिक्षाशब्दावपि ॥

तत्र गुणविधिस्तु न गृह्णीयात् । समत्वादित्यग्रहणे प्राप्ते, इदमुच्यते । स्वरसामैककपालामिक्षञ्च धर्माणां ग्राहकम् । किं कारणम् । लिङ्गदर्शनात् । लिङ्गं तत्र तादृशं दृश्यते । येन ज्ञायते, सर्वे एते धर्माणां ग्राहका इति । स्वरसामसु तावत् पृष्ठ्यः षडहो द्वौ स्वरसामानौ इत्युक्त्वा आह । तत्र यत्तृतीयं सप्तदशमहस्तत् त्रयस्त्रिंशस्य स्थानमभिपर्य्याहरन्ति, स उत्तराणां स्तोमानामव्यवायाय त्रयाणां च सप्तदशानाम् अनूचीनताया इति । यद्येतौ स्वरसामानौ, गवामायनिकानां धर्माणां ग्राहकौ, तत्रैतावपि सप्तदशौ । तथाऽत्र त्रयः सप्तदशा अनूचीना भवन्ति । तत्रैतद्वचनं युज्यते । त्रयाणां सप्तदशानामनूचीनताया इति ॥ तथा आग्रयणे, द्यावापृथिव्यमेककपालं विधाय आह, यद् सर्वहुतं करोति, सा त्वेका परिचक्षा, हुतो हुतः पर्य्यावर्त्तते सा द्वितीया । आज्यस्यैव द्यावापृथिव्यौ यजेतेति आज्यविधिपरे वाक्ये सर्वहोममपर्य्यावृत्तिञ्च वैश्वदेविकौ धर्मौ प्राप्तौ दर्शयति ॥ तथा मैत्रावरुण्यामामिक्षायां न वाजिनेन प्रचरन्तीति वाजिनेज्यां वैश्वदेविकं धर्मं प्रतिषेधँस्ततो धर्मप्राप्तिं दर्शयति । एतेभ्यो लिङ्गेभ्य एतज्ज्ञायते, यथास्वं धर्माणां ग्राहका इति । प्रतिपत्त्यर्थकर्म वाजिनेज्यां स्विष्टकृत्तुल्यां मत्वा एतदुक्तम् । आह । लिङ्ग-

मपदिष्टम् । कुतः प्राप्तिरिति ?। उच्यते । लक्षणया प्राप्तिर्लिङ्गात्तु लक्षणापरिग्रहः ॥ २६ ॥ सि० ॥

चोदनासामान्याद्वा ॥ २७ ॥

स्वरसामत्वसामान्याद्, एककपालत्वसामान्याद्, आमिक्षासामान्याद्वा यस्य लिङ्गम्, अर्थसंयोगादित्यनेन प्राप्तिरिति ॥ २७ ॥ हेतुः ॥ स्वरसामादिशब्देन धर्मातिदेशाधिकरणम् ॥ १० ॥

क्वचिच्छ्रूयते— वासो ददाति, अनो ददातीति । तत्र विचार्यते । किं वाससोऽनसश्च क्रिया प्राप्यते, उत नेति । तत्राह । एवं तावद् नः परीक्ष्यम् । किं कर्मनिमित्तावेतौ शब्दौ, उत आकृतिनिमित्ताविति । यदि कर्मनिमित्तौ, ततः प्राप्यते । अथाकृतिनिमित्तौ, ततो न? इति । किं तावत् प्राप्तम् । कर्म्मनिमित्ताविति । कुतः। कर्मागमे तद्दर्शनात् । यदा तस्मिन् द्रव्ये दारुणि सूत्रे वा दारुकारेण तन्तुवायेन वा कर्म कृतं भवति, तदैतौ शब्दौ प्रवर्त्तेते, न प्राक्।अतो विज्ञायते, कर्मनिमित्ताविति । यदा कर्मनिमित्तौ, तदेतदारभ्यते—

कर्मजे कर्म यूपवत् ॥ २८ ॥

कर्मजे एतस्मिन् वासआदौ द्रव्ये श्रूयमाणे, कर्म प्राप्यते।कथम् । यूपवत् । यथा यूपशब्दो जोषणादिक्रियानिमित्तः । स यत्र श्रूयते, तत्र जोषणाद्याः क्रियाः प्राप्यन्ते । एवमिहापीति ॥२८॥ पूर्व०॥

रूपं वाऽशेषभूतत्वात् ॥ २९ ॥

अत्रोच्यते, नैतौ कर्मनिमित्तौ । किं कारणम् । ये नैमित्तिकाः शब्दाः, ते निमित्तमुपलभ्य प्रयुज्यन्ते । यथा दण्डी छत्रीति । इमौ त्वनुपलभ्य क्रियाम्, आकृतिमात्रे प्रयुज्येते । तस्मान्नैतौ क्रियानिमित्ताविति । अत्रोच्यते। आकृत्या क्रियामनुमाय ततः शब्दं प्रयुङ्क्ते इति । अत्र ब्रूमः । प्रत्यक्षां निमित्ततां गम्यमानामुत्सृज्य, अदृष्टायां क्रियायां निमित्तत्वकल्पनायां हेतुर्नास्तीति । यत्तूक्तं, क्रियोत्तरकालं प्रवृत्तिदर्शनादिति । अत्र ब्रूमः । प्राक् क्रियाया आकृतिरनभिव्यक्ता । सा क्रियया अभिव्यज्यते । यतः क्रियोत्तरकालं शब्दप्रयोगः । तस्मादाकृतिनिमित्तौ । यदेवं, तदा सिद्धं रूपं देयम् । कुतः । अशेषभूतत्वात् । नात्र क्रिया शेषभूता । क्रियावाचिनः शब्दस्याभावात् । यूपे तु प्रत्यक्षविहिता जोषणाद्याः क्रियाः । यूपवदिति । अतुल्योप-

न्यासः ॥२९॥ सिद्धान्तः ॥ वासो ददातीत्यादौ वासआदिशब्दाना-माकृतिनिमित्तताधिकरणम् ॥ ११ ॥

विशये लौकिकः स्यात् सर्वार्थत्वात् ॥ ३० ॥

गर्गत्रिरात्रे आज्यदोहानि सामानि प्रकृत्य श्रूयते, अग्निमुपनिधाय स्तुवते इति । अत्र विशयः । किं लौकिकोऽग्निरुपनिधेयः, उत वैदिक इति । किं प्राप्तम् । वैदिक इति । कुतः । सर्वकर्मार्थे उत्पन्नोऽसौ । यानि अहं कर्माणि करिष्ये यैश्चास्मि अधिकृत इति । अतो वैदिक उपनिधेय इति । एवं प्राप्ते उच्यते । विशये लौकिकः स्यात् । सर्वार्थत्वात् । एतस्मिन् विशये, लौकिकं वैदिकम् ? इति, लौकिकः स्यात् ॥ ३० ॥ सि० ॥

अथ यदुक्तं, वैदिकं सर्वकर्मार्थमुत्पन्नम् । तस्मात् तदुपनिधेयमिति । अत्र ब्रूमः—

न वैदिकमर्थनिर्देशात् ॥ ३१ ॥

न वैदिकमग्निद्रव्यं शास्त्रेणोत्पादितम् । तस्य शास्त्रेणैव कार्य्यं निर्दिष्टम् । यदाहवनीये जुहोतीत्यारभ्य तस्मिन् सर्वार्थे कल्प्यमाने निर्देशोऽनर्थकः स्यात् । तस्माल्लौकिकोऽग्निरुपनिधेयः । सर्वार्थत्वञ्चैषां स्वे स्वे कार्य्ये वर्त्तमानानां भविष्यति । एवमुभयमविरुद्धम् । सर्वार्थत्वं निर्देशश्चेति ॥ ३१ ॥ पूर्वपक्षनिरासः ॥

अथ धैष्ण्या अग्नयः कस्मान्नोपनिधीयन्ते ? । अत्रोच्यते—

तथोत्पत्तिरितरेषां समत्वात् ॥ ३२ ॥

इतरेषामप्यग्नीनां धैष्ण्यानां तथोत्पत्तिः, न सर्वार्थ इत्यर्थः । कुतः । समत्वात् । एतेऽपि इतरैरग्निभिः समाः । एतेषामपि निर्दिष्टं कार्य्यं, प्रागासीनो धिष्ण्यान् आघारयतीति । अतस्ते नोपनिधेया इति ॥ ३२ ॥ ॥ आ० नि० ॥ गर्गत्रिरात्रे लौकिकेऽग्नौ उपनिधाना-ऽधिकरणम् ॥ १२ ॥

संस्कृतं स्यात्तच्छब्दत्वात् ॥ ३३ ॥

एकादशिन्यां श्रूयते, उपशयो यूपो भवतीति । तत्र सन्देहः । किमेतदुपशयद्रव्यं संस्कृतं, जोषणादयः संस्कारा अत्र कर्त्तव्याः ? उत नेति । किं युक्तम् । संस्कृतं स्यात् । कर्त्तव्या अत्र जोषणादयः संस्काराः । कुतः । तच्छब्दत्वात् । अयं यूपशब्दः संस्कारनिमित्तः ।

स एषोऽसत्सु संस्कारेषु नोपपद्यते। तस्मात्ते कार्य्या इति॥३३॥पूर्वं०॥

भक्त्या वाऽयज्ञशेषत्वाद् गुणानामभिधानत्वात् ॥३४॥

न वा कर्त्तव्याः । कुतः । अयज्ञशेषत्वात् । एते संस्कारा अस्मिन् काष्ठे क्रियन्ते । एतेन द्वारेण, यजतिना सम्भत्स्यन्ते । इत्थं संस्कृते काष्ठे नियुक्तेन पशुना यजिः क्रियमाणोऽपूर्वं निर्वर्त्तयति । अस्मिंश्चोपशये न पशुर्नियुज्यते, तत्र कृताः संस्कारा अनर्थकाः स्युः । ननु वचनसामर्थ्याददृष्टार्था भविष्यन्ति । उच्यते । नात्र वचनं, यूपः कर्त्तव्य इति । वर्त्तमानापदेशोऽयम्। ननु वर्त्तमानापदेशोऽपि न घटते संस्काराणामभावे । उच्यते । भक्त्या भविष्यति । यथा, यजमानो वै यूप इति । आह । तत्र सादृश्यात् । इह पुनः कथमिति । उच्यते । गुणानामभिधानत्वात् । यूपगुणानां यूपसंस्काराणामभिधानत्वाद् यूपसंस्काराः । तत्र केचिदर्थप्राप्ताश्छेदनादयस्तूष्णीङ्कृताः सन्ति । तैरयमभिधीयते, यूप इति, अयूपः सन् । यथा स्नाता कन्या अनलङ्कृता मालागुणेनापि अलङ्कृता इति ।एवमेकदेशेनापि संस्काराणां, संस्कृत इति स्तुत्याऽभिधीयते ॥ ३४ ॥ उपशयो यूपो भवतीत्यादौ यूपशब्दस्य संस्काराप्रयोजकताधिकरणम् ॥ १३ ॥

अग्नौ श्रूयते, पृष्ठैरुपतिष्ठन्ते इति । तत्र चिन्त्यते । किं पृष्ठधर्म्माः कर्त्तव्याः, उत नेति । के पुनस्ते । सामान्यधर्म्माः– हिङ्कारादयः, विशेषधर्म्माः– रथन्तरे प्रस्तूयमाने, पृथिवीं मनसा ध्यायेद् बृहति समुद्रमित्येवमादयः । किं तावत् प्राप्तम् । तत आह । एतत् तावद् नः परीक्ष्यम् । किमयं पृष्ठशब्दः कर्म्मणो वाचकः, उत द्रव्यस्येति । ननु सिद्धमेतत् कर्म्मनामधेयं पृष्ठशब्द इति, यस्मिन् गुणोपदेशः प्रधानतोऽभिसम्बन्ध इत्यत्र । तास्वेव चोदनास्वेतदुक्तम्– सप्तदशानि पृष्ठानि, वैरूपं पृष्ठं, वैराजं पृष्ठमिति । इदानीं, पृष्ठैरुपतिष्ठन्ते इत्यस्यां चिन्त्यते । किं पुनरत्र युक्तम् । तत आह—

कर्मणः पृष्ठशब्दः स्यात् तथाभूतोपदेशात् ॥ ३५ ॥

कर्म्मणः पृष्ठशब्दः स्यात् । कुतः । तथाभुतोपदेशात् । तथाभूतः सन्नुपदेशः । यत्रायं पृष्ठशब्दः कर्म्मनाम अधिगतस्तथाभूतोऽयमपि। किमस्य तथात्वम् । पृष्ठशब्दसामान्यम् । पृष्ठशब्दस्तत्र कर्मवचनोऽधिगतः । स एवायम् । तस्मादिहापि तद्वचन एवावगन्तव्यः । विशे-

षाभावात् । यद्यन्यार्थः कल्प्येत, एकः शब्दोऽनेकार्थः स्यात् । तत्र को दोषः । शब्दे उच्चरिते संशयः स्याद्, न अर्थप्रत्ययः । तत्र व्यवहारो न सिद्ध्येत् । व्यवहारार्थश्च शब्दप्रयोगः । कारणान्तरंच प्रकरणाद्यपेक्ष्यम् । एकार्थत्वे तु निरपेक्षोऽर्थप्रत्ययः । तस्मादनेकार्थत्वमन्याय्यम् । तस्मात् कर्मनाम पृष्ठशब्दः । यदा कर्मनाम, तदा यदि तावत् तानि कर्माणीहोपदिश्यन्ते, तत्र उत्पत्तिरेषामनर्थिका । अथ मा भूदेष दोष इत्येतदुपस्थानं, तत्र विज्ञायते । तत इदं प्रकरणं बाध्येत । तस्मात् सादृश्यविधिरयम् । पृष्ठैरुपतिष्ठन्ते । पृष्ठसदृशैः कर्मभिरुपतिष्ठन्ते इति । तत्सादृश्यं च धर्मैर्भवति । तस्मात् कर्त्तव्या धर्मा इति ॥३५॥ पूर्व० ॥

अभिधानोपदेशाद्वा विप्रतिषेधाद् द्रव्येषु पृष्ठशब्दः स्यात् ॥ ३६ ॥

न चैतदेवं, कर्मणः पृष्ठशब्द इति । किन्तर्हि । द्रव्येषु पृष्ठशब्दः स्यात् । ऋग्द्रव्येषु अभित्वा शूर नो नुम इत्येवमादीनाम् ऋचां वाचकः । कुतः । अभिधानोपदेशात् । अभिधानोपदेशोऽयं पृष्ठैरुपतिष्ठन्ते इति । पृष्ठैरभिदधातीत्यर्थः । कथं पुनरयमुपस्थानवचनोऽभिधानार्थः शक्यो विज्ञातुम् । उच्यते । उपग्रहविशेषान्मन्त्रकरणे उपतिष्ठतेरात्मनेपदं भवति । मन्त्रस्त्वभिधानस्य करणं, नोपस्थानस्य । उपस्थानं शरीरेण क्रियते, मनसा वा । तस्मादभिधानार्थः । स एष विप्रतिषेधः । यदि पृष्ठशब्दः कर्मसु कल्प्यते, आत्मनेपदं बाध्यते । न हि तदा मन्त्रः करणं भवति । अथ आत्मनेपदमनुरुध्यते, उपस्थानविप्रतिषेधस्तदा अभिधानार्थता आपतति । तत्र आत्मनेपदानुरोधो न्याय्यः । पृष्ठशब्दो हि लक्षणया पृष्ठसाधनं मन्त्रं ब्रुवन् अर्थवान् । आत्मनेपदं तु मन्त्रकरणेनैवोपपद्यते । अतः पृष्ठसाधनेषु मन्त्रेषु पृष्ठशब्दः ॥ आह । नैतद् युक्तम् । उपस्थानार्थता हि श्रुत्या उपतिष्ठतेः । आत्मनेपदाल्लिङ्गादभिधानार्थता । न च लिङ्गेन श्रुतिर्बाधितव्या । उच्यते । नैवात्र श्रुतिर्बाध्यते । स्वार्थमेवोपतिष्ठतिराह समीपस्थानम् । तत्त्वभिधानाय । अभिधानं निर्वर्त्तयितुम् । अग्निसमीपे तिष्ठदिति तिष्ठतिराह आत्मनेपदात् । ततोऽविरोधः ॥ आह । एवमप्यभिधानस्य मन्त्रः करणं, नोपतिष्ठतेः । तत्रासम्बन्ध एवोपस्थानस्य मन्त्रेण । तथा, पृष्ठैरुपतिष्ठन्ते इतिसमुच्चारणमनर्थकं स्यात् । उच्य-

ते । अभिधानमभिनिर्वर्त्तयन् मन्त्र उपस्थानस्य करणं भवति । यतोऽस्य प्रयोजनं निर्वर्त्तयति । न हि निष्प्रयोजनमनुष्ठीयते । तस्माद् मन्त्रेष्वेव पृष्ठशब्दः । मन्त्रेषु चेद्, नास्ति धर्माणां प्राप्तिः । न हि मन्त्राणां प्राप्तिर्न हि मन्त्राणां धर्माः । अधर्मकास्त इति ॥ ३६ ॥ ॥ सिद्धान्तः ॥ पृष्ठैरुपतिष्ठन्ते इत्यादौ पृष्ठशब्दस्य ऋग्द्रव्यवाचिताधिकरणम् ॥ १४ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये सप्तमस्याध्यायस्य तृतीयः पादः ॥ ७ ॥ ३ ॥

अथ सप्तमस्य अध्यायस्य चतुर्थः पादः ॥ ७ ॥ ४ ॥

इतिकर्त्तव्यताविधेर्यजतेः पूर्ववत्त्वम् ॥ १ ॥

अनारभ्य किञ्चिच्छ्रूयते, सौर्य्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति । तत्रैषोऽर्थः समधिगतः । यागोऽयं चोद्यते इति । यजतिस्तु द्रव्यफलभोक्तृसंयोगादेषां कर्मसम्बन्धाद् इति । तथेदमप्युक्तं, कर्मफलयोः सम्बन्धे कर्म गुणतः फलं प्रधानत इति । प्रत्यर्थं चाभिसंयोगात् । कर्मतो हि अभिसम्बन्धः । तस्मात् कर्मोपदेशः स्याद्— इति । इदमपि चोक्तं, यजिरपूर्वं साधयति । ततश्चापूर्वात् कालान्तरे फलं भवतीति, चोदना पुनरारम्भः — इत्यत्र । एवमेतस्मिन् सति, सौर्य्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इत्यत्र सौर्य्ययागेन अपूर्वं कृत्वा ब्रह्मवर्चसं साधयेद् ब्रह्मवर्चसकाम इत्येवं विज्ञायते ॥ आह । यत्र तृतीयायुक्तो यजिस्तत्र युक्तो गुणभावाऽभ्युपगमः । यथा, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । इह त्वसत्यां तृतीयायां कथं तृतीयार्थो गम्यते इति । उच्यते । किमत्र तृतीयानिर्दिष्टेन यजिना कार्य्यम् ? यदा स्वभावसिद्धः कर्मणां फलं प्रति गुणभावः । यत्राप्यसौ श्रुतस्तत्राप्यकिञ्चित्कर एव । गतार्थत्वात् । तथा, यत्रापि द्वितीया श्रुतिः । यथाऽग्निहोत्रं जुहुयादिति । तत्रापि विभक्तिव्यत्ययो वा ईप्सितत्वस्य वाऽविवक्षा कामं वा आनर्थक्यं स्याद्, न तु कथञ्चिदपि कर्मणः प्रति गुणभावः शक्योऽपह्नोतुम् । तस्माद् यागेनापूर्वसाधनमत्रोच्यते । तत्र यागो विज्ञायते । लौकिकोऽसौ पदार्थः । तेन तु कथमपूर्वं साध्यते इत्येतद् न विज्ञायते । इह तु यागेन अपूर्वं साधयेदित्येतावदेवोक्तम् । कथं साधयेदितीतिकर्त्तव्यता नोक्ता । येषां चार्थानां ज्ञायत एवेतिकर्त्तव्यता, तेषां कर्त्तव्यत्वमात्रमुपदिश्य-

ते । यथा ओदनं पचेदिति । येषां तु न ज्ञायते, ते सह इतिकर्त्तव्यतया एवोपदिश्यन्ते । यथा दर्शपूर्णमासौ । एवं चेद् नूनं ज्ञायते, यागेन अपूर्वनिर्वृत्तौ इतिकर्त्तव्यता यस्मादुक्ता, तस्मान्न्यूनमसावस्तीति ॥ आह । यद्यस्ति लोके, ततो ज्ञायेतैव । अथ नास्त्येव, कथं शक्या ज्ञातुमिति । उच्यते । बाढमस्ति लौकिकी वैदिकी च । लौकिकी तावत् पार्वणस्थालीपाकादिषु, वैदिकी दर्शपूर्णमासादिषु । यदि तत्पूर्वा एताश्चोदनास्तदपेक्षाः सौर्य्ययागेनापूर्वं साधयेद् यथाज्ञातया इतिकर्त्तव्यतयेति । ततो युक्त इतिकर्त्तव्यताया अविधिः । न च विधीयते । अत इतिकर्त्तव्यताया अविधेर्यजतेः पूर्ववत्त्वं, विहितेतिकर्त्तव्यताकत्वमिति ॥

अथ ये आहुः— यजेत यागं कुर्य्यादिति । जुहुयाद् होमं कुर्य्यादिति । तेषां, किं नैव धर्माकाङ्क्षा भवति ? । भवतीति ब्रूमः । यद्यपि, प्रज्ञातेतिकर्त्तव्यतो यजिर्द्रव्यं देवतां प्रत्युत्सृज्यते इति । तथापि यदा फलार्थः क्रियते, तदा धर्मान् आकाङ्क्षति । न हि अधर्मकात् फलं भवति । कथं ज्ञायते । यो हि अमेध्यं द्रव्यमुच्छिष्टः शयानो वा प्रौढपादो वामेन हस्तेन वा, पादेन, यथाकथञ्चिद्देवतायै उत्सृजति, तस्य फलं न भवतीति शिष्टाः स्मरन्ति । यस्तु मेध्यं द्रव्यं शुचौ देशे प्रयतः प्राङ्मुखो दक्षिणेन हस्तेन समाहितमना मन्त्रवन्नियमवद्य देवतायै उत्सृजति, तस्य फलं भवतीति स्मरन्ति । तस्माद् यावान् यजतिः फलायाम्नायते, स सर्वो धर्मान् आकाङ्क्षति । अतस्तेषामप्यस्ति धर्माकाङ्क्षा । सत्यामाकाङ्क्षायां सन्निहितैर्धर्मैरविप्रतिषिद्धः सम्बन्धः प्रकृतौ त्वानुमानिकैः ॥ १ ॥ सौर्ये चरौ इतिकर्तव्यतावत्त्वाऽधिकरणम् ॥ १ ॥

स लौकिकः स्याद् दृष्टप्रवृत्तित्वात् ॥ २ ॥

अधुनैवं चिन्त्यते । किमनियमः । लौकिकी वैदिकी वा इति कर्त्तव्यता, उत लौकिकी एव, आहोस्विद् वैदिकीति । अत्र विशेषाभावादनियमे प्राप्ते, उच्यते । स लौकिकः स्यात् । स खलु कर्त्तव्यतोपायो लौकिकः स्यात् । कुतः ? । दृष्टप्रवृत्तित्वात् । दृष्टा हि अस्य तत्र तत्र प्रवृत्तिः । यथा पार्वणस्थालीपाके अष्टकाचरौ आग्रहायणीयकर्मणि, इत्येव यत्र यागेन अपूर्वं साध्यते, तत्र तत्रास्य प्रवृत्ति-

दृष्टा । अतोऽन्वयाद् विज्ञायते, यागस्यापूर्वं साधयतोऽयमुपाय इति । अयश्चापि यागः । तस्मादस्यापि स एवाभ्युपायः ॥ २ ॥ पूर्व० ॥

वचनात्तु ततोऽन्यत्वम् ॥ ३ ॥

आह, किमेष एवोत्सर्गः । सर्वत्र लौकिकीतिकर्त्तव्यतेति । एवं खलु प्राप्तम् । एवं प्राप्ते ब्रूमः, वचनात्तु ततोऽन्यत्वमिति । यत्र प्रत्यक्षं वचनं वैदिक्याः, तत्र न लौकिकी स्यात् । वचनसामर्थ्याद् वैदिकी एव स्यात् । यथोपसत्सु गृहमेधीये च ॥ ३ ॥ आ० नि० ॥

लिङ्गेन वा नियम्येत लिङ्गस्य तद्गुणत्वात् ॥ ४ ॥

लिङ्गेन वा इतिकर्त्तव्यता नियम्येत । कतरा । यस्या लिङ्गम् । वैदिक्याश्च लिङ्गम् । तस्माद् वैदिकी । किं पुनर्लिङ्गम् । सौर्य्ये तावच्चरौ श्रूयते, प्रयाजे कृष्णलं जुहोतीति । तथा ऐन्द्रबार्हस्पते, अर्द्धं बर्हिषो लुनाति, अर्द्धं न, स्वयन्दितमर्द्धं वेद्याङ्कुरोत्यर्द्धं न इति । तथा पितृयज्ञे न होतारं वृणीते न आर्षेयमिति । एतैर्लिङ्गैर्ज्ञायते वैदिकी इतिकर्त्तव्यतेति । कथम् । तद्गुणत्वात् । एते हि प्रयाजादयो वैदिकस्य अपूर्वस्य गुणाः । यदि च तदीयेतिकर्त्तव्यता प्रवर्त्तिता, तत एतेषु कर्मसु एते सन्ति । तत्रैतानि वचनान्युपपद्यन्ते, प्रयाजे प्रयाजे कृष्णलं जुहोतीत्येवमादीनि । तस्माद्वैदिकीइतिकर्त्तव्यता नियम्येत ॥ ४ ॥ सि० ॥

अपिवाऽन्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युः॥५॥

अपिवा नैवं स्याद्, वैदिकी इतिकर्त्तव्यतेति । यत्कारणम् एतैर्लिङ्गैर्नं शक्यते वैदिकी नियन्तुम् । कुतः । अन्यायपूर्वत्वात् । न्यायपूर्वकं हि वचनं तत्साधकं भवति । न चैतानि न्यायपूर्वाणि । न हि वैदिक्याः प्रवृत्तिर्युक्ता । निबद्धा हि सा प्रकरणादिभिः कारणैर्दर्शपूर्णमासादिषु । कथं तर्हि एतानि लिङ्गानि । उच्यते । यत्र नित्याऽनुवादवचनानि स्युः। इह तावद्, अर्द्धं बर्हिषो लुनाति अर्द्धं न इति, बर्हिर्यत्रैव भविष्यति । यत्कारणं, सतो बर्हिष उच्यते । न चेहास्ति बर्हिः । न होतारं वृणीते न आर्षेयमिति नित्यानुवादो भविष्यति ॥ ननु नित्यानुवादः सन् अनर्थको भवति । किं क्रियतां, यस्यार्थो नास्ति । प्रयाजे प्रयाजे कृष्णलं जुहोतीतिवचनं प्रयाजानां भविष्यति। कथं पुनरत्र प्रयाजाश्च कृष्णलहोमश्च शक्यो वक्तुम् । भिद्यते हि

तथा वाक्यम्। एवं तर्हि न प्रयाजान् वक्ष्यति । प्रयाजे कृष्णलहोमं विधास्यति। न चासत्सु प्रयाजेषु कृष्णलहोमः शक्यते कर्त्तुमित्यऽर्थात् प्रायाजान् करिष्यति । तस्मान्न लिङ्गेन वैदिक्या नियमः। यथोक्तेन न्यायेन लौकिकीतिकर्त्तव्यतेति ॥ ५ ॥

मिथो विप्रतिषेधाच्च गुणानां यथार्थकल्पना स्यात् ॥६॥

तत्राह। अथ कस्मान्नोभे अपि इतिकर्त्तव्यते सह प्रवर्त्तेते इति। किमेवं भविष्यति । एवं तुल्यापेक्षा कर्मणामन्यतरतो न बाधिता भवति। उच्यते। सह प्रवृत्तौ एकया चेत् कर्मनिरपेक्षं कृतं, द्वितीयस्याः प्रवृत्तिर्विप्रतिषिद्धा। अतो मिथः प्रवृत्तेर्विप्रतिषेधाद् यथार्थकल्पना स्यात्। एकस्याः प्रवृत्तिः स्यादित्यर्थः। कथमेकस्याः प्रवृत्तेर्धर्माणां यथार्थकल्पना भवति। ये धर्मा येषु कार्य्येषु प्रकृतौ उत्पन्नास्ते इहापि तेष्वेव भवन्ति । इतरथा द्वितीयस्या धर्मा अयथार्थाः भवेयुः पूर्वैर्धर्मैः । तेषां कार्य्याणां निर्वर्त्तितत्वात् । एवमेकस्याः प्रवृत्तेर्यथार्थकल्पना भवति। अतो यथार्थकल्पना स्यादित्यनेन एकस्याः प्रवृत्तिरित्युक्तं भवेत् । एकस्याः प्रवृत्तौ यथोक्तेनैव न्यायेन लौकिक्याः प्रवृत्तिरिति ॥ ६ ॥ आ० ॥

भागित्वात्तु नियम्येत गुणानामभिधानत्वात्सम्बन्धादभिधानवद् यथा धेनुः किशोरेण ॥ ७ ॥

तुशब्दः पक्षनिवृत्तौ। न त्वेवं स्यात्, लौकिकी इतिकर्त्तव्यतेति। किन्तर्हि वैदिकी नियम्येत। कुतः। भागित्वात्। वैदिकी अपि भागिनी प्रवृत्तिः। साऽपि हि अपूर्वस्य इतिकर्त्तव्यता । समाने च भागित्वे उभयोर्वैदिकी एव स्यात्। गुणानामभिधानत्वात् । गुणा एते प्रयाजादयः सौर्य्यादिषु दृश्यमाना अभिधायका भवन्त्येतस्यार्थस्य। यथा वैदिकी अत्रेतिकर्त्तव्यतेति बोधका भवन्तीत्यर्थः ॥

कस्मात् ?। सम्बन्धात्। एते हि तयेतिकर्त्तव्यतया सम्बद्धाः। अतः साहचर्य्यात् तां गमयन्ति। अभिधानवत्। यथा कौण्डपायिनामयने अग्निहोत्रमित्यभिधानं कर्मणो वाचकम् । तत् कर्म सहचरितान् धर्मानानयति। तेष्वसत्सु एतदभिधानमिह न युज्यते इति तेषां धर्माणां तत्र भावो विज्ञायते । एवम् इहाऽपि प्रयाजादीनां

दर्शनमसत्यां वैदिक्यां न युज्यते इति, तस्या अपीह भावो विज्ञास्यते। नन्वसति न्याये लिङ्गमकारणम्। सत्यमेवम्। उक्तस्तु न्यायो भागित्वादिति। यत्तु दृष्टप्रवृत्तिर्लौकिकीति। तत्र ब्रूमः। यद्यपि दृष्टप्रवृत्तिः स्यात्, तथापि वैदिकी एव नियम्येत। कथम्। यथा धेनुः किशोरेण। तद् यथा, कृष्णकिशोरा धेनुरिति। यद्यपि धेनुशब्दो गोधेन्वां दृष्टप्रवृत्तिस्तथाप्यभिधानसामान्यादश्वधेन्वामपि भागीति किशोरेण लिङ्गेन अश्वधेन्वां विज्ञायते। एवमिहापि यद्यपि लौकिकी दृष्टप्रवृत्तिः, तथापि इतिकर्त्तव्यतासामान्येन भागित्वाल्लिङ्गेन वैदिकी विज्ञेया॥ ७॥ आ० नि०॥

उत्पत्तीनां समत्वाद्वा यथाधिकारं भावः स्यात्॥८॥

अथ वा नैव लिङ्गेन नियम इति। कुतः। उत्पत्तीनां समत्वात्। धर्म्माणां प्रयाजादीनामुत्पत्तयः समाः, सर्वेषामाग्नेयाद्यङ्गभावेन, न परस्पराङ्गत्वेन। किमतः। यदि प्रयाजादीनामनुयाजादयोऽङ्गानि स्युस्ततो यत्र प्रधानं, तत्र अङ्गानीति प्रयाजदर्शनेन अनुयाजादयोऽनुमीयेरन्। यदा तु समप्रधाना एते, तदा प्रयाजदर्शनेन कामं प्रयाजा अनुमीयेरन्, प्रयाजधर्म्मा वा। न त्वनुयाजादयः। तस्माल्लिङ्गमनियामकम्। यत्तु, अभिधानवदिति। अत्र ब्रूमः। युक्तं तत्र। तत्र हि परशब्दः परत्र प्रयुक्तः सन् धर्म्मानतिदिशतीत्युक्तम्॥ अपि च, विधिरसौ। अग्निहोत्रवद्धोतव्यमिति। अयं पुनरनुवादः। तेनात्र प्रयाजादीनामेव नास्ति प्राप्तिः, कुतोऽनुयाजादीनाम्। तस्माद् विषम उपन्यासः, अभिधानवदिति। अतो यथाधिकारं भावः स्यात्। ये धर्म्मा यस्यापूर्वस्याधिकारे आम्नातास्ते तत्रैव भवेयुः॥ ८॥

एवं तर्हि, सौर्य्यं चरुं निर्वपेदित्यनेनाख्यातेन प्रधानस्य विधानोत्पत्तिः, शेषाणां च वचनं भवतु। कथं कृत्वा। न अनङ्गं प्रधानमुच्यमानं कस्मैचित् प्रयोजनाय कल्पते इति। तेन च प्रापितानामङ्गानामेतेभ्यो लिङ्गेभ्यो विशेषावधारणं भविष्यति। तत्रेदमुच्यते—

उत्पत्तिशेषवचनं च विप्रतिषिद्धमेकस्मिन्॥ ९॥

एकस्मिन् शब्दे प्रधानस्योत्पत्तिरङ्गानां च वचनं न सम्भवति। किङ्कारणम्। उत्पन्नं हि प्रधानमङ्गानपेक्षते। अपेक्षया च तानि गृह्यन्ते। तस्मान्नैतदपि युक्तम्। यदि च निर्वपेदित्यनेन शब्देन

अङ्गान्यपि विधीयेरंस्ततस्तेषामपि फलसम्बन्धः स्यात् । तथा अङ्गत्वमेव व्याहन्येत । ततोऽयमपि वादो न घटते । तस्माद् यथोक्तो लौकिक एवाभ्युपायः ॥ ९ ॥ आ० ॥

विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्त्तेत तथा हि लिङ्गदर्शनम् ॥ १० ॥

विध्यन्तो वा सौर्य्यादिकायां चोदनायां प्रवर्त्तेत, न धर्मा लौकिकाः । कः पुनरयं विध्यन्तो नाम । विधेरन्तो विध्यन्तः । अथ विधिः कः । यद् वाक्यमुपलभ्य, पुरुषः कस्मिँश्चिदर्थे प्रवर्त्तते, कुतश्चिद् वा निवर्त्तते स विधिः । विधीयते ह्यनेनार्थः । यथा लोके, देवदत्त गामभ्याज शुक्लामिति । तस्य अभ्याजेत्यादिः । इतरोऽन्तः । वेदेऽपि दर्शपूर्णमासाभ्यां यजेतेति विध्यादिः । विध्यन्तोऽपि प्रधानविधिवर्जितं कृत्स्नं पौरोड़ाशिकं ब्राह्मणम् । तेन समेतोऽयं विध्यादिर्विशिष्टापूर्वनिर्वृत्तिं प्रति पुरुषं प्रवर्त्तयति । तस्मात् सोऽस्यान्तः । तथा, सोमेन यजेतेति विध्यादिः । सौमिकमपि ब्राह्मणं विध्यन्तः । एष विध्यन्तो नाम । एतेषु च सौर्य्यादिषु विध्यादिरस्ति, विध्यन्तो नास्ति । एतेष्वपि स विध्यन्तः कल्प्येत । कथं कृत्वा । अपरिपूर्णं यद् वाक्यं, तदध्याहारेण वा पूर्य्येत, व्यवहितकल्पनया वा । तत्राध्याहाराद् व्यवहितकल्पना ज्यायसी । अध्याहारे हि अश्रुतः कल्प्येत । इतरत्र श्रुतेन सम्बन्धः । तस्माद् व्यवहितो ब्राह्मणावयवोऽस्य परिपूरकः कल्प्यते । यथा, वसन्ताय कपिञ्जलानालभते, ग्रीष्माय कलविङ्कानालभते इति । तेन वैदिकी इतिकर्त्तव्यता प्राप्यते ॥ यदि तद् ब्राह्मणमस्यान्तः कल्प्यते, तत्र न भवति । तदेतन्मयूरनृत्यमापद्यते । तद् यथा मयूरस्य नृत्यतोऽन्यदपाव्रियतेऽन्यत् संव्रियते । एवमिहापीदं संव्रियते तदपाव्रियते । नैष दोषः । प्रत्यक्षस्तस्य तत्र भावः । इह पुनरानुमानिकः । न चानुमानिकं प्रत्यक्षं बाधते । इह तर्हि न प्राप्नोति । प्रत्यक्षविरोधात् । स्यादेवं, यदि विरोधः स्यात् । न त्वस्ति विरोधः । तथापि भविष्यति, इहापि तदेतदुक्तं, विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्त्तेतेति ॥ उच्यते । प्रकृतिवदिति किम् । आह । अष्टमे प्रकृतिनियमं करिष्यति । इमनस्य प्रकृतिरिति । तदुच्यते, विध्यन्तो वा प्रकृतेरिव प्रवर्त्तेत । या या तस्य कर्मणः प्रकृतिरिति

यस्याग्नेयः प्रकृतिस्तस्याग्नेयादेव । यस्याग्नीषोमीयस्तस्याग्नीषोमीयादित्येवं सर्वत्र ॥

अथ कस्मान्न लौकिको विध्यन्तः कल्प्यते । उच्यते । लौकिकस्य विधेरभावाद् विध्यन्त एव नास्ति । कुतस्तत्कल्पनेति । आह । लौकिकी इतिकर्त्तव्यता प्राप्यतां, किं विध्यन्तकल्पनयेति । उच्यते । वैदिकी हि अत्रेतिकर्त्तव्यता, न लौकिकी । कस्मात् । तथा हि लिङ्गदर्शनं प्रयाजादि समर्थितं भवति ॥ १० ॥ आ० नि० ॥

लिङ्गहेतुत्वादलिङ्गे लौकिकं स्यात् ॥ ११ ॥

यदि लिङ्गाद् वैदिकोऽभ्युपायो भवति, तेन तर्हि अलिङ्गे लौकिकं स्यात् । यत्र कर्मणि किञ्चिल्लिङ्गं नास्ति, तत्र लौकिकं स्याद् विधानम् । यथा, ऐन्द्राग्नमेकादशकपालं निर्वपेद् यस्य सजातावीयुरिति ॥ ११ ॥ आ० ॥

लिङ्गस्य पूर्ववत्त्वाचोदनाशब्दसामान्यादेकेनापि निरूप्येत यथा स्थालीपुलाकेन ॥ १२ ॥

अत्रोच्यते । स्यादेवं, यदि लिङ्गहेतुको वैदिक उपायः स्यात् । न त्वसौ लिङ्गहेतुकः । किंहेतुकस्तु । विध्यन्तहेतुकः । विध्यन्तोऽपि न्यायपूर्वः । स च न्यायस्तुल्यः सर्वेषां कर्मणां वैकृतानां लिङ्गवतां च । कुतः । चोदनाशब्दसामान्यात् । कर्मचोदनायां शब्दः समानः । सर्वत्र विध्यादिरस्मिन्, न विध्यन्तः । तुल्यश्च अपेक्षया अन्यत्र श्रुतेन विध्यन्तेन सम्बन्धः । तदेतद् न्यायपूर्वकं लिङ्गमेकत्रापि दृश्यमानं, तुल्यन्यायानां सर्वेषां धर्मवत्तां ज्ञापयति । यथा स्थाल्यां तुल्यपाकानां पुलाकानामेकमुपमृद्यान्येषामपि सिद्धतां जानाति । तुल्यो हेतुरस्य चान्येषां च सिद्धत्वस्येति । तस्मात् सर्वत्र वैदिकी इतिकर्त्तव्यता ॥ अथ यदुक्तं, दृष्टप्रवृत्तिर्लौकिकी इतिकर्त्तव्यतेति । अत्र ब्रूमः । सामान्यतो दृष्टमेतदुपदिश्यते । सामान्यतो दृष्टं च यदव्यभिचारि, तत् प्रमाणम् । सव्यभिचारं चैतत् । दृष्टा हि गणयागादयोऽनेवमितिकर्त्तव्यताकाः । तस्माद् दृष्टप्रवृत्तित्वादित्यहेतुः ॥ यत्तु वैदिक्या भागित्वात् तत्पूर्वकाणि लिङ्गानि भविष्यन्तीति । अत्र ब्रूमः । भागित्वस्यापूर्वेतिकर्त्तव्यताकत्वं किल हेतुः । तद्भावश्च तस्याः शब्दपूर्वः । शब्देन च दर्शपूर्णमासयोरसौ विज्ञायते,

न सर्वत्रेति । तस्मान्न भागित्वम् । अतो विध्यन्तेनैवेतिकर्त्तव्यता प्राप्यते, नान्यथा । अथ कस्मादेतानि वैकृतानि वाक्यानि न्यूनान्येव नानुमन्यन्ते, किमेभिः पूरितैः ? । न्यूनानि अनर्थकानि भवन्ति । भवन्तु, को दोषः । शिष्टैरेषां सम्परिग्रहो न युज्यते । प्रमादाद् भविष्यतीति । नास्त्यऽक्षरे मात्रायां वा प्रमादः । कुत एतावति ग्रन्थे भविष्यति । कथम् । तुल्यं च साम्प्रदायिकम्— इत्युक्तम् । व्यामोहोऽपि विदुषां युगसहस्राणि बहूनि नानुवर्त्तेत । युज्यते चैषामपेक्षया पूरणम् । तस्मादूनानि नानुमन्यन्ते । अतो वैदिकी इतिकर्त्तव्यतेति सिद्धम् ॥ १२ ॥ आ० नि० ॥ सौर्ये चरौ वैदिकेतिकर्तव्यताधिकरणम् ॥ २ ॥

द्वादशाहिकमहर्गणे तत्प्रकृतित्वादैकाहिकमधिका-
ऽऽगमात्तदाख्यं स्यादेकाहवत् ॥ १३ ॥

प्रजाकामा गवामयनम् उपेयुरिति सत्रं विधाय आम्नायते । ज्योतिर्गौरायुरिति । गवामयने द्वादशाहिको विध्यन्त इति वक्ष्यति । गणेषु द्वादशाहस्येति । तत्र चोदकेन द्वादशाहिका धर्म्माः प्राप्यन्ते । एकाहानामपि यथास्वं नामभिः प्रातिस्विकाः । ये तत्र द्वादशाहिका ऐकाहिकैरविरुद्धाः, ते यथाप्राप्तं क्रियन्ते । विरुद्धेषु संशयः । किं द्वादशाहिको धर्म्मः कर्त्तव्यः, उत ऐकाहिक इति । किं प्राप्तम् । तत्र सूत्रेणैवोपक्रमः । द्वादशाहिकमहर्गणे तत्प्रकृतित्वात् । द्वादशाहप्रकृतित्वाद् विध्यन्तेनैव प्राप्यन्ते ॥ नन्वेवं नामधेयं बाध्यते । न बाधिष्यते नामधेयं ज्योतिरादि । अधिकागमाद् भविष्यति । ये ज्यौतिष्टौमिकेभ्योऽधिकाः स्तोत्रशस्त्रविकारास्तदागमात् । एकाहवत् । यथा तस्मिन्नेव ज्योतिषि एकाहे ज्योतिःशब्दोऽधिकागमाद् भवति । सत्सु ज्यौतिष्टौमिकेषु ज्योतिष्टोमेऽभावात् । अधिकधर्म्मार्थोऽयं शब्दः । न चाधिकानां द्वादशाहिकैर्विरोधोऽस्ति । तस्माद् द्वादशाहिकं धर्म्मजातं विरुद्धं कर्त्तव्यमिति ॥

अधिकागमात्तदाख्यं स्यादेकाहवदित्येतस्यापरा व्याख्या । ये द्वादशाहे अधिका ऐकाहिकेभ्यः केचिद् धर्म्मा उच्यन्ते । अभिप्लवोऽत्रहं भवति, गोरिवीतमन्वहं भवतीति । तेषामधिकानामागमात् तदाख्यं स्यात् । एतद् द्वादशाहिकमहर्ज्योतिराख्यमायुराख्यं वा ।

कथम् । एकाहवत् । यथा तस्मिन्नेवैकाहेऽयं ज्योतिरादिशब्दो ज्यौतिष्टौमिकेभ्योऽधिकेषु वैशेषिकेषु धर्मेषु आगतेषु भवति, एवमिहाऽप्यधिकागमसामान्याद् गौणो भविष्यति। यथा षाड़हिकानां पृष्ठानां भावादेकाहो विश्वजित् षड़ह इत्युक्तम् । तमेकाहं षड़ह इत्याचक्षते इति । एवमिहापि । गौणश्चेद् न प्रापकः । तस्मान्नास्ति नामधेयाद्धर्मप्राप्तिरिति ॥ १३ ॥ पूर्व० ॥

लिङ्गाच्च ॥ १४ ॥

लिङ्गाच्चैतज्ज्ञायते, यथा द्वादशाहिकं कर्त्तव्यमिति । किं लिङ्गं भवति । द्वाभ्यां लोमावद्यति द्वाभ्यां त्वचं द्वाभ्यामसृग् द्वाभ्यां मांसमिति। एवं षड् द्विकाननुक्रम्याह । यद् द्वादशोपसदो भवन्ति, आत्मानमेतन्निरवदयते इति द्वादशाहिकं धर्मं द्वादशोपसत्त्वं दर्शयति । तदुपपद्यते । द्वादशाहिकं धर्मजातं विरोधि कर्त्तव्यम् । इतरथा च ऐकाहिकं षडुपसत्त्वं स्यात् । तस्मात् पश्यामो, द्वादशाहिकं कर्त्तव्यमिति । तथेदमपरं लिङ्गम् । यस्यातिरिक्तमेकादशिन्यामालभेरन् न प्रियं भ्रातृव्यमतिरिच्येत । अथ यद् द्वौ द्वौ पशू समस्येयुः, कनीय आयुः कुर्वीरन् । यद्येते ब्राह्मणवन्तः पशव आलभन्ते न अप्रियं भ्रातृव्यमत्यतिरिच्येत न कनीय आयुः कुर्वीतेति, एकादशिन्यां विहारं द्वादशाहिकं धर्मं दर्शयति । कथम् । विहारे सति अतिरेकः पशूनामापद्यते । अतिरेकभयाच्च द्वयोर्द्वयोः समासः। एकाहधर्मप्राप्तौ विहारो न स्यात् । तत्रैतद्दर्शनं न युज्यते । तस्माद् द्वादशाहिकं कार्य्यम् ॥ १४ ॥ युक्तिः ॥

न वा क्रत्वभिधानादधिकानामशब्दत्वम् ॥ १५ ॥

न वा द्वादशाहिकं कार्य्यम् । किं तर्हि । ऐकाहिकम् । किं कारणम् । चोदकेन द्वादशाहिकं प्राप्नोति, नामधेयेन ऐकाहिकम् । नामधेयं च चोदकाद् बलीयः । कुतः । प्रत्यक्षत्वात् । प्रत्यक्षं नामधेयं, चोदकं त्वानुमानिकम् । ननु विध्यन्तोऽपि प्रत्यक्षः । सत्यं प्रकृतौ प्रत्यक्षो विध्यन्तो, विकृतौ त्वानुमानिकः । नामधेयं पुनर्विकृतावपि प्रत्यक्षम् । प्रत्यक्षं चानुमानाद् बलीयः । तस्मादैकाहिकं कार्य्यम् ॥ नन्वधिकार्थं नामधेयमित्युक्तम् । अत्रोच्यते, अधिकानामशब्दत्वम् । अधिकानां शब्दो नास्ति । इमे ज्योतिरादयः शब्दाः

कर्मनामधेयानीत्युक्तम् । अपि वा नामधेयं स्याद्, यदुत्पत्तावपूर्वम-ऽविधायकत्वादिति । यत्तु, अधिकागमात्तदाख्यं स्यादिति । तत्र ब्रूमः । वचनादधिकागमो, न नामधेयेन । यत्तु, तेष्वसत्सु शब्दस्याभावादिति । नैते कदाचिद्वायुरादिषु न सन्ति । कथं तेषामभावे शब्दस्याभावो दृष्टः । यत्तु, ज्योतिष्टोमे नास्ति ज्योतिरादिः शब्द इति । कर्मान्तरत्वात् । ज्योतिष्टोमे आयुरादिः शब्दो नास्ति, न धर्माभावात् । तस्मादैकाहिकं विरुद्धं धर्मजातं कर्त्तव्यमिति । अधिकागमात् तदाख्यं स्यात् । एकाहवदित्येतस्य द्वितीयव्याख्यापरिहारः । गौणः सन्ननुवादमात्रमनर्थकं स्यात् । तस्मात् पूर्वोक्तेन न्यायेन नामधेयं धर्माणां प्रापकमिति ॥ १५ ॥ सि० ॥

लिङ्गं सङ्घातधर्मः स्यात्तदर्थापत्तेर्द्रव्यवत् ॥ १६ ॥

अथ यल्लिङ्गमुपदिष्टं, द्वादशोपसत्त्वदर्शनं, तस्य परिहार उच्यते । लिङ्गं सङ्घातधर्मः स्यात् । लिङ्गमेतत् सङ्घातधर्मः स्यात् । द्वादशाहोऽहःसङ्घातः । स फलाय चोद्यते । द्वादशाहमृद्धिकामा उपेयुरिति । गवामयनमपि अहःसङ्घातान्तरम् । तस्मिन्नेव कार्य्ये फलसिद्धौ विधीयते । तस्य तत्कार्य्यापत्त्या द्वादशाहधर्मान् गृह्णाति, न चोदकेन । द्रव्यवत् । यथा द्रव्ये व्रीहौ धर्माः श्रुतास्ते तत्कार्य्यापन्नेषु प्रतिनिधिभूतेषु प्राप्यन्ते, न चोदकेन । तद्वत् ॥ १६ ॥ पूर्वपक्षलिङ्गनिरासे पूर्वपक्षः ॥

न वार्थधर्मत्वात् सङ्घातस्य गुणत्वात् ॥ १७ ॥

नैतद् युक्तम् । कुतः । अर्थधर्मत्वात् । अपूर्वधर्मत्वादित्यर्थः । अपूर्वधर्मो द्वादशोपसत्त्वं, न सङ्घातधर्मः । कस्मात् । सङ्घातस्य गुणत्वात् । अहानि अत्र प्रधानानि । द्वादशाहेनेति द्वादशत्वं तेषां गुणः । विशेषणमित्यर्थः । विशेष्ये एव कार्य्यं प्रतीयते, न विशेषणे । यथा राजपुरुष आनीयतामित्युक्ते पुरुष आनीयते, न राजा । यथा च, मृष्टं भुङ्क्ते देवदत्त इत्युक्ते, न शाकं सूपो वा प्रतीयते । यदेव प्रधानं तत् प्रतीयते । किमतः । अतोऽहानि फलवन्ति, न सङ्घातः । फलवतश्च धर्माः । तस्मान्न द्वादशोपसत्त्वं सङ्घातधर्मः । एवञ्चेद् न गवामयने कार्य्यापत्तितो धर्माः प्राप्यन्ते । अतोऽपरिहारोऽयम् ॥ १७ ॥ पूर्वपक्षलिङ्गनिरासे उत्तरपक्षः ॥

अर्थापत्तेर्द्रव्येषु धर्मलाभः स्यात् ॥ १८ ॥

यदुक्तं, द्रव्यवदिति । युक्तं द्रव्येषु । तत्र हि व्रीहिकार्य्यापन्ना नीवाराः कार्य्यापत्तितस्तद्धर्माँल्लभन्ते । इह पुनर्द्वादशोपसत्त्वं नैव सङ्घातधर्म इत्यपदिष्टो हेतुः । तस्माददृष्टान्तो द्रव्यवदिति ॥ १८ ॥

आह । कथन्तर्हीदं लिङ्गदर्शनम् ? । अत्रोच्यते,

प्रवृत्त्या नियतस्य लिङ्गदर्शनम् ॥ १९ ॥

गवामयने द्वादशाहिकं प्रथममहः । प्रायणीयोऽतिरात्रः । तस्य धर्मो द्वादशोपसत्त्वम् । तदुपादाने मुख्यस्यानुग्रहः । षडुपसत्त्वोपादाने जघन्यानां ज्योतिरादीनां, मुख्यस्य प्राप्तकालमनुग्रहमतिक्रमितुं किञ्चित् कार्य्यं नास्ति । अतस्तदनुग्रहार्थं द्वादशोपसत्त्वं भवति । तथा मुख्यया प्रवृत्त्या नियतस्यैतद्दर्शनं, न चोदकप्राप्त्या । यस्माच्चोदको नामधेयादबलः । वक्ष्यति च, विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् सधर्मत्वम् । मुख्यं वाऽपूर्वचोदनाल्लोकवदिति ॥ १९ ॥

अथ यद् द्वितीयं लिङ्गदर्शनमुक्तम्, एकादशिन्यां विहारदर्शनम् । तत्रोच्यते—

विहारदर्शनं विशिष्टस्यानारभ्यवादानां प्रकृत्यर्थत्वात् ॥ २० ॥

अनारभ्यैकादशिन्यां विहारः शिष्टः । तदादिप्रभवाः पशवः स्युः । तथा तानेवानूचीनान् अहरहरालभेरन्, आग्नेयमेव प्रथमेऽहनि आलभेरन्, सारस्वतीं मेषीं द्वितीये, सौम्यं बभ्रुं तृतीये, वारुणमन्ततः । अथ पुनः पर्य्यावर्त्तेष्वाग्नेयमेव प्रथमेऽहन्यालभेरन्, सारस्वतीं मेषीं द्वितीये, सौम्यं बभ्रुं तृतीये, वारुणमन्तत इति । तद् अनारभ्यवादानां प्रकृत्यर्थत्वाज्ज्योतिष्टोमं प्रविष्टम् । तत्राह्नां बहुत्वस्याभावादसम्भवादपरां प्रकृतिं द्वादशाहमागतम् । तत्रापि पुनर्ज्योतिरादीनां पर्य्यावर्त्तेषु इत्येतद् न युज्यते इति तृतीयां प्रकृतिं गवामयने प्रविष्टम् । एवमागतस्य एतद्दर्शनमिति ॥२०॥ पूर्वपक्षलिङ्गनिरासः ॥ गवामयने ऐकाहिकेतिकर्त्तव्यतानुष्ठानाधिकरणम् ॥ ३ ॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये सप्तमस्याध्यायस्य चतुर्थः पादः ॥ ७ ॥ ४ ॥ सम्पूर्णोऽयं सप्तमोऽध्यायः ॥ ७ ॥

अथ अष्टमस्य अध्यायस्य प्रथमः पादः ॥ ८ ॥ १ ॥

अथ विशेषलक्षणम् ॥ १ ॥

एवं तावत् सप्तमेन अध्यायेन सामान्यतोऽतिदेशलक्षणमुक्तम् । अविहितधर्मकेष्वैन्द्राग्न्यादिषु कर्मसु विहितधर्मकेभ्यो दर्शपूर्णमासादिभ्यो धर्मा अतिदिश्यन्ते इति । तत्र चिन्ता भवति । किमेकस्मिन् कर्मणि सर्वकर्मसु धर्मातिदेशः, उतैकस्मादिति । अविशेषात् सर्वेभ्य इति प्राप्तम् । एकेन तु निराकाङ्क्षीकृते कर्मणि द्वितीयधर्मप्राप्तौ किञ्चित् कारणं नास्ति । सत्यम् । तदेव तु न ज्ञायते । कस्मिन् कस्येति । तदर्थं विशेषलक्षणं वक्तव्यमस्मिन्नस्येति । तदिदमध्यायादौ प्रतिज्ञायते । अथ विशेषलक्षणमिति । अथेदानीं वृत्तात् सामान्यातिदेशलक्षणादनन्तरं, विशेषलक्षणं वक्ष्यामः । तदुच्यमानं यथाकालं बोद्धव्यमिति ॥ १ ॥ प्रतिज्ञाधिकरणम् ॥ १ ॥

तदेतत् सङ्क्षेपेणैवोच्यते—

यस्य लिङ्गमर्थसंयोगादभिधानवत् ॥ २ ॥

यस्य वैदिकस्य विध्यन्तस्य लिङ्गं किञ्चित्, शब्दगतम् अर्थगतं वा वैकृत्यां कर्मचोदनायां, तद्गुणवाक्ये वा दृश्यते । तत्र स विध्यन्तः स्यात् । कुतः । अर्थसंयोगात् । तस्यार्थस्य लिङ्गस्य तेन विध्यन्तविशेषणेन संयोगोऽनुभूतपूर्वः । संयोगिनोश्चान्यतरो दृश्यमान उत्तरमदृश्यमानमप्यनुमानाद् बुद्धौ सन्निधापयति । अभिधानवत् । यथाऽग्निहोत्रमित्यभिधानं कौण्डपायिने श्रूयमाणं नैयमिकाग्निहोत्रधर्मान् बुद्धौ सन्निधापयति । किमतोऽत्र । एतदतो भवति । अपूर्वं यद् वाक्यं, तत् पूरणसमर्थेन अवयवेन बुद्धौ सन्निहितेनैकवाक्यतां याति । यथा दर्शपूर्णमासाभ्यां यजेतेति विध्यादिः, कथमिति विध्यन्तापेक्षः । अग्न्यन्वाधानादिविधानकाण्डेन, पाठाद् बुद्धौ सन्निहितेन एकवाक्यतां याति । दर्शपूर्णमासाभ्यां यजेतेत्थमिति । एवं विध्यन्तापेक्षो यो वैकृतो विध्यादिः, सोऽपि वैदिकेन विध्यन्तेनानुमानाद्बुद्धौ सन्निहितेनैकवाक्यतां यास्यति । यथा सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति । तत्र कथमितिविध्यन्तापेक्षायामनेकविध्यन्तसन्निपाते असाधारणेन निर्वपति-शब्देन दार्शपौर्णमासिकविध्यन्तसंयोगिना लिङ्गेन तदीयो विध्यन्तः प्रसज्ज्यते । तत्रापि

आग्नेयाद्यनेकापूर्वविध्यन्तप्रसङ्गे, एकदेवतात्वेन वा ओषधिना वा असाधारणेन लिङ्गेनाग्नेयविध्यन्तो नियम्यते। तदेतदेवं विज्ञायते। सौर्य्यं चरुं निर्वपेद् आग्नेयवत्। आग्नावैष्णवमेकादशकपालं निर्वपेदग्नीषोमीयवत्। सर्वत्रैवम्। प्रतिपदाख्याने तु गौरवं परिहरद्भिर्वृत्तिकारैः सर्वसामान्यः शब्दः परिगृहीतः प्रकृतिवदिति। एवं यत्र सूक्ष्ममपि किञ्चित् सामान्यं, शब्दो वा अर्थो वा हविर्देवतादि तद्गुणा वा रूपादय उपलभ्येरन्, तत्र तदीयो विध्यन्तः कल्प्यः। तदेतत् संक्षेपेणात्रैव सर्वमुक्तम्। शिष्यहितार्थमुत्तरः प्रपञ्चः। श्लोकमप्युदाहरन्ति—

विस्तीर्य हि महज्ज्ञालमृषिः संक्षिप्य चाब्रवीत्।
इष्टं हि विदुषां लोके समासव्यासधारणम्, इति ॥ ॥ २ ॥ ॥

सिद्धान्तः ॥ विशेषकर्मणो धर्मातिदेशाधिकरणम् ॥ २ ॥

प्रवृत्तित्वादिष्टेः सोमे प्रवृत्तिः स्यात् ॥ ३ ॥

ज्योतिष्टोमेन स्वर्गकामो यजेतेति श्रूयते। तत्र विध्यन्तं प्रति चिन्ता। कुतोऽस्मिन् विध्यन्तः स्यादिति। तदुच्यते। प्रवृत्तित्वादिष्टेः सोमे प्रवृत्तिः स्यात्। दार्शपौर्णमासिको विध्यन्तः सोमे स्यात्। कुतः। प्रवृत्तित्वात्। दीक्षणीयादिषु इष्टिषु दार्शपौर्णमासिको विध्यन्तः प्रवृत्तः। दीक्षणीयायाम् आतिथ्यायां प्रायणीयायां पशौ च। तदनन्तरं सोमः। तत्रापि स एव प्रवृत्त्या विज्ञायते। यथा, देवदत्तो भोजयितव्यः, विष्णुमित्रो भोजयितव्यः, माठरः कौण्डिन्यो भारद्वाज इत्युत्तरेष्वपि भोजयितव्य इति प्रवृत्त्या अनुबध्यते। तस्मादैष्टिकः सोमे विध्यन्तः ॥ ३ ॥ पूर्व० ॥

लिङ्गदर्शनाच्च ॥ ४ ॥

तस्यैकशतं प्रयाजानुयाजा इति च ऐष्टिका धर्म्माः सोमे दृश्यन्ते। तस्माच्चास्मिन् ऐष्टिको विध्यन्तः ॥ ४ ॥ युक्तिः ॥

कृत्स्नविधानाद्वाऽपूर्वत्वम् ॥ ५ ॥

अपूर्वत्वमेव हि सोमे। स न कुतश्चिद् धर्मान् गृह्णाति। कुतः। कृत्स्नविधानात्। इतिकर्त्तव्यताविधेर्यजतेः पूर्ववत्त्वम् उक्तम्। विहितेतिकर्त्तव्यतश्चायम्। तस्मादपूर्वः ॥ ५ ॥ सि० ॥

स्रुगभिघारणाभावस्य च नित्यानुवादात् ॥ ६ ॥

स्रुगभिघारणस्य चाभावानुवादः सोमे भवति । घृतं वै देवावज्रं कृत्वा सोममघ्नन् स्रुचौ बाहू । तस्मात् स्रुचि सोमहविर्नासाद्यते । न सोममाज्येनाभिघारयन्तीति । तदुपपद्यते । यद्यपूर्वः सोमः, अथ दर्शपूर्णमासप्रकृतिः स्यात् । आज्येनाभिघार्य्य स्रुग्भ्यां हूयेत । तत्रैतद्दर्शनं नोपपद्यते तस्मादपूर्वः ॥ ६ ॥ युक्तिः ॥

विधिरितिचेत् ॥ ७ ॥

इतिचेत् पश्यसि, स्रुगभिघारणाभावानुवाददर्शनादपूर्वः सोम इति । अथ कस्माद्दर्शपूर्णमासप्रकृतित्वेन प्राप्तस्य स्रुगभिघारणस्य प्रतिषेधकोऽयं विधिर्न भवति ? इति स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति ॥ ७ ॥ आ० ॥

न वाक्यशेषत्वात् ॥ ८ ॥

नायं विधिः । कस्मात् । वाक्यशेषत्वात् । अन्योऽत्र विधिराम्नातः । तदाह । अंशुरंशुस्ते देव सोमाप्यायतामिति । तस्य वाक्यशेषोऽयम् । कथं ज्ञायते । तेन आकाङ्क्षितत्वात् । अवधिषुर्वा एतत् सोमं यदभिषुण्वन्ति । यदस्य स्रुचौ बाहू कुर्वन्ति । यच्चाज्यमन्तिकमकार्षुः । यदाह, अंशुरंशुस्ते देव समाप्यायतामिति । यदेवास्यादातुः क्षुरमक्षुरस्तदाप्याययन्तीति । यद्ययमपि विधिः स्याद् वाक्यम्भिद्येत । तस्मान्न विधिः ॥ ८ ॥ आ० नि० ॥

शङ्कते चानुपोषणात् ॥ ९ ॥

सोमे शङ्कते, यदनुपोष्य प्रयायाद् ग्रीवबद्धमेनममुष्मिँल्लोके नेनीयेरन्निति । दार्शपौर्णमासिके विध्यन्ते सति, नियतमुपोषणं स्यात् । तदाऽनुपोषणाशङ्का न युज्यते । तस्मादपूर्वः ॥ ९ ॥

दर्शनमैष्टिकानां स्यात् ॥ १० ॥

यच्च प्रयाजानुयाजानां दर्शनं, लिङ्गत्वेनोपदिष्टं, तस्यैकशतं प्रयाजानुयाजा इति । तद् दीक्षणीयादीनां सोमाङ्गभूतानां कर्मणां ये प्रयाजानुयाजास्तेषां समुच्चयवचनम् । किं कारणम् । सोमस्याऽपूर्वत्वात् । तेषां च तावतां, तत्र भावात् । अङ्गाङ्गमपि च तस्येति शक्यते वक्तुम् । यथा वाजपेयस्य यूप इति । तस्मादपूर्वः सोमः ॥१०॥ आ० नि० ॥ सोमे ऐष्टिकधर्मानतिदेशाधिकरणम् ॥ ३ ॥

इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ॥ ११ ॥

इष्टय उदाहरणम्, ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इत्येवमाद्याः । तत्र सन्देहः । किं दार्शपौर्णमासिको वा, सौमिको वा विध्यन्तः ? उत दार्शपौर्णमासिक एवेति । किं प्राप्तम् । अनियमः । दर्शपूर्णमासयोरपि विध्यन्तोऽस्ति सोमेऽपि । इमाश्चेष्टयो विध्यन्ताऽपेक्षाः । एकेन च विध्यन्तेन भवितव्यमित्युक्तम् । न च गृह्यतेऽन्यतरनियमे विशेषः । तस्मादनियमः ॥

एवं प्राप्ते उच्यते । इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः । हेतुर्नोक्तः प्रज्ञात इति । कः पुनरसौ । चोदनायां प्रकृतिलिङ्गसंयोगः । किं पुनस्तत् प्रकृतिलिङ्गम् । तद्धितेन देवतोपदेशः कपालवत्ता निर्वपतिशब्दाश्च, ऐन्द्राग्नमेकादशकपालं निर्वपेदिति । इतरत्रापि तथैव ऐन्द्राग्नो द्वादशकपाल इति । निर्वपतिरप्यग्निहोत्रहवण्या हवींषि निर्वपतीति । प्रकृतिलिङ्गेन च विध्यन्तविशेष उक्तः— यस्य लिङ्गमर्थसंयोगाद् इति । तस्माद् दार्शपौर्णमासिकस्तासु विध्यन्तः । तच्च दर्शयति प्रयाजे प्रयाजे कृष्णलं जुहोतीति । अलिङ्गास्वपि स्थालीपुलाकवत् सिद्धिः ॥ ११ ॥ ऐन्द्राग्नादौ ऐष्टिकधर्मातिदेशाऽधिकरणम् ॥ ४ ॥

पशौ च लिङ्गदर्शनात् ॥ १२ ॥

पशौ अग्नीषोमीये चिन्त्यते । किं दार्शपौर्णमासिको विध्यन्तः ? उत सौमिक इति । किं प्राप्तम् । तथैव पूर्वपक्षः । तत्रोत्तरमभिधीयते । पशौ च लिङ्गदर्शनात् । पशौ च दार्शपौर्णमासिक एव विध्यन्तः । कुतः । लिङ्गदर्शनात् । एकादश प्रयाजान् एकादशानुयाजानिति । तथा स्रौवमाघार्य्य जुह्वा पशुमनक्तीति । ननु लिङ्गमपदिष्टं, कुतः प्राप्तिः । चोदनासामान्यात् । किं सामान्यम् । व्यक्तचोदनत्वम् । का व्यक्तिः । द्रव्यदेवतावत्ता, अग्नीषोमीयं पशुमिति । इतरद् ऐन्द्रं पय इति । अव्यक्तचोदनस्तु सोमः ॥ १२ ॥ अग्नीषोमीयपशौ दार्शपौर्णमासिकधर्मातिदेशाधिकरणम् ॥ ५ ॥

दैक्षस्य चेतरेषु ॥ १३ ॥

इह पशुबन्धा उदाहरणम् । सवनीयो निरूढः पशुः, सौम्यादयश्च । तेषु किं दार्शपौर्णमासको विध्यन्त, उत दैक्षस्येति । दैक्ष इत्यग्नीषोमीय उच्यते । दीक्षासम्बन्धात् । किं प्राप्तम् । यथोक्तेन

न्यायेन दार्शपौर्णमासिक इति । तथा प्राप्ते उच्यते । दैक्षस्य चेतरेषु पशुषु सवनीयादिष्वग्नीषोमीयस्य विध्यन्तः । आलभतिचोदनासामान्यात्, पशुत्वचोदनासामान्याच्च । तच्च दर्शयति— वपया प्रातःसवने चरन्ति, पुरोडाशेन मध्यन्दिनेऽङ्गैस्तृतीयसवने इति वपापुरोडाशाङ्गप्रचारं दर्शयति । भेदेन च तथा कश्चिद्, औदुम्बरो यूपो भवतीति यूपं दर्शयति । तस्मादग्नीषोमीयः पशूनां प्रकृतिः ॥ १३ ॥
सवनीयादिपशौ अग्नीषोमीयधर्मातिदेशाधिकरणम् ॥ ६ ॥

ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य दर्शनात् ॥ १४ ॥

ऐकादशिनाः पशव उदाहरणम् । कृष्णशीर्षा आग्नेय इत्यारभ्य आम्नाताः । अन्येषां च आग्नेयेन वापयति, मिथुनं सारस्वत्या करोति, प्रजनयति सौम्येनेति । तेषु सन्देहः । किमग्नीषोमीयविध्यन्तः, उत सवनीयविध्यन्त इति । किं प्राप्तम् । पूर्वोक्तेन न्यायेनाऽग्नीषोमीयस्य ॥

इति प्राप्ते उच्यते । ऐकादशिनेषु सौत्यस्य । सौत्य इति सुत्याकालत्वात् सवनीयमाहुः । तदीयो विध्यन्त ऐकादशिनेषु । कुतः । द्वैरशन्यस्य दर्शनात् । अग्निष्ठा द्वे द्वे रशने आदाय द्वाभ्यां रशनाभ्यामेकैकं यूपं परिव्ययतीति । अग्नीषोमीयप्रकृतित्वे ऐकैकरशन्यं स्यात् ॥ अथ वचनमिदं कस्मान्न भवति। अग्निष्ठा द्वे द्वे रशने आदायेत्येतदत्र विधीयते । यदि रशनाद्वित्वमपि विधीयते, तदा वाक्यं भिद्यते । तस्मात् तदनूद्यते । ननु लिङ्गमपदिष्टं, कुतः प्राप्तिः । उच्यते । समाने पशुत्वे सुत्याकालता वैशेषिकं लिङ्गम् । ततः प्राप्तिः ॥
॥ १४ ॥ ऐकादशिनपशौ सवनधर्मातिदेशाधिकरणम् ॥ ७ ॥

तत्प्रवृत्तिर्गणेषु स्यात् प्रतिपशु यूपदर्शनात् ॥ १५ ॥

इह पशुगणा उदाहरणम् । वसन्ते ललामांस्त्रीन् वृषभानालभते । तथा, मैत्रं श्वेतमालभेत, वारुणं कृष्णमपां च ओषधीनां च सन्धौ अन्नकाम इति । तत्र विचार्य्यते । किमग्नीषोमीयस्य विध्यन्तः, उत ऐकादशिनानामिति । यथोक्तेन न्यायेनाग्नीषोमीयस्य ॥

एवं प्राप्ते उच्यते । तत्प्रवृत्तिर्गणेषु स्यात् । तेषामैकादशिनानां प्रवृत्तिः पशुगणेषु स्यात् । कुतः । प्रतिपशु यूपदर्शनात् । यत् त्रिषु यूपेषु आलभेत बहिर्द्धाऽस्मादिन्द्रीयं वीर्य्यं दध्यात्, भ्रातृव्यमस्य

जनयेदेकयूप आलभेतेति यूपत्रित्वं प्रतिषिध्यैकं यूपं सौत्रामण्यां विदधाति । तदुपपद्यते, यदि ऐकादशिनाविध्यन्तः । तत्र हि प्रतिपशु यूपाः । अग्नीषोमीयप्रकृतित्वे एक एव यूपः स्यात् । तत्रैतन्नोपपद्यते । तस्मादैकादशिनानां विध्यन्तः पशुगणेषु ॥ १५ ॥ पशुगणेषु ऐकादशिनधर्मातिदेशाधिकरणम् ॥ ८ ॥

अव्यक्तासु तु सोमस्य ॥ १६ ॥

इदं श्रूयते, अभिजिता यजेतेति । एवञ्जातीयका यजतयः । तेषु विध्यन्तचिन्ता । किमेषु सौमिको विध्यन्तः, उत दार्शपौर्णमासिक इति । अविशेषादनियमे प्राप्ते । उच्यते । अव्यक्तासु तु सोमस्य । का अव्यक्तता । द्रव्यदेवतस्याभावः । द्रव्यदेवतेन हि यागोऽभिव्यज्यते । एताश्चाद्रव्यदेवताश्चोदनाः । अभिजिता यजेतेति । एतासु अव्यक्तासु सौमिको विध्यन्तः स्यात् । कुतः । अव्यक्तसामान्यात् । सोमोऽप्यव्यक्तचोदनः । ज्योतिष्टोमेन यजेतेति । ननु सोमेन यजेतेत्येषा व्यक्तचोदना । तथापि देवताया अभावादव्यक्तता । तथा च, दूणाशेन यजेतेत्यव्यक्तचोदिते, दीक्षणीयादीनि सोमाङ्गानि दर्शयति दीक्षणीयायां द्वादशमानं हिरण्यं दक्षिणा । चतुर्विंशतिमानं प्रायणीयायामिति । तस्मात् तासु सौमिको विध्यन्तः ॥ १६॥ अव्यक्तयजतौ सौमिकधर्मातिदेशाधिकरणम् ॥ ९ ॥

गणेषु द्वादशाहस्य ॥ १७ ॥

इह अहर्गणा उदाहरणम्, द्विरात्रादयः शतरात्रपर्य्यन्ताः । तेषु सन्देहः । किं ज्यौतिष्टोमिको विध्यन्तः, उत द्वादशाहिक इति । पूर्वेण न्यायेन सौमिके प्राप्ते, उच्यते । गणेषु द्वादशाहिको विध्यन्त इति । कुतः । चोदनासामान्यात् । द्वादशाहेन यजेत, द्विरात्रेण यजेतेति । अहःशब्दोऽप्यहोरात्रवचनः । रात्रिशब्दोऽपि । एतच्छब्दगतं लिङ्गम् । अर्थगतमपि गणत्वम् । गण एव सङ्घातधर्मैर्गणमनुग्रहीतुं समर्थो, नैकाहः । द्वाभ्यां लोमावद्यति द्वाभ्यां मांसमिति च । एतदारभ्य द्वादशोपसत्त्वं द्वादशाहिकं धर्म्मं गवामयने दर्शयति । तस्मादहर्गणानां द्वादशाहः प्रकृतिः ॥ १७ ॥ अहर्गणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् ॥ १० ॥

गव्यस्य च तदादिषु ॥ १८ ॥

इह संवत्सरसत्राण्युदाहरणम्, आदित्यानामयनप्रभृतीनि । तेषु चिन्ता, किं द्वादशाहिको विध्यन्तः, उत गवामयनिक इति । पूर्वोक्तेन न्यायेन द्वादशाहिके प्राप्तेऽभिधीयते । गव्यस्य च तदादिषु । गव्यमिति, गवामयनं ब्रूमः । गोसम्बन्धात् । गावो वा एतत् सत्रमासत इति । तस्य विध्यन्तस्तदादिषु संवत्सरसत्रेषु स्यात् । कुतः । संवत्सरसामान्यात् । पत्नय उपगायन्तीति च महाव्रतिकं धर्म्मं संवत्सरसत्रे दर्शयति । ऋत्विज उपगायन्तीति च सहस्रसंवत्सरे ॥१८॥ संवत्सरसत्रेषु गवामयनिकधर्मातिदेशाधिकरणम् ॥ ११ ॥

निकायिनाञ्च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् ॥ १९ ॥

निकाय- इति सङ्घात औत्तराधर्य्येणावस्थित उच्यते । स एषां, ते निकायिनः । यथा साहस्राः साद्यस्काः । तेषां पूर्वस्य केचिद् धर्म्मा आम्नाताः । उत्तरे त्वधर्म्मकाः । तत्र चिन्त्यते । किं ज्योतिष्टोमस्य विध्यन्तः, उत प्रथमस्य निकायिन इति । अव्यक्तचोदनत्वाज्ज्योतिष्टोमस्य ॥ इति प्राप्ते, उच्यते । निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् । कुतः । निकायित्वसामान्यात् । साहस्राणां साहस्रसामान्यात् । साद्यस्काणां साद्यस्कधर्म्मसामान्यात् । एवं सर्वत्र पूर्वस्मिँश्च साहस्रे सहस्रं दक्षिणामाम्नायोत्तरस्मिन् दर्शयति । यावदस्य साहस्रस्योत्तरा गौः समाहिता भवति, तावदस्माल्लोकादसौ लोक इति । तथा पूर्वस्मिन् साद्यस्के साण्डस्त्रिसंवत्सरः सोमक्रयणः स्पर्द्धमानानामित्याम्नाये उत्तरस्मिन्नपि तमेव दर्शयति। स्त्री गौः सोमक्रयणी व्यावृत्ता हि एषां स्पर्द्धिता इति।तस्मात् पूर्वस्योत्तरेषु धर्म्माः ॥ १९ ॥ निकायिनामुत्तरेषु पूर्वनिकायिधर्मातिदेशाधिकरणम् ॥ १२ ॥

कर्मणस्त्वप्रवृत्तित्वात् फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वात् ॥ २० ॥

इह फलनियमकर्तृसमुदाया उदाहरणम् । फलं स्वर्गः, नियमो यावज्जीविकोऽभ्यासः, कर्त्ता स्वर्गकामः, समुदायो दर्शपूर्णमासाविति। तत्र चिन्त्यते। किं फलनियमकर्तृसमुदायानां सौर्यादिषु प्रवृत्तिः, न? इति। किं प्राप्तम्। इष्टिषु दर्शपूर्णमासयोः स्याद्-इत्यनेन न्यायेन प्रवृत्तिरिति प्राप्तम् । तथा प्राप्ते उच्यते । फलनियमकर्तृसमुदायस्याप्रवृत्तिः। कुतः। कर्मणोऽप्रवृत्तित्वात् तद्बन्धनत्वाच्च फलादीनां

कर्म्म तावन्न प्रवर्त्तते । किङ्कारणम् । विध्यन्तेन धर्म्माः प्रवर्त्तन्ते । न च कर्म्म विध्यन्तविहितं, विध्यादिविहितं तत् । तस्मान्न प्रवर्त्तते । तस्याऽप्रवृत्तित्वात् फलनियमकर्तृसमुदायस्यानन्वयोऽप्रवृत्तिरित्यर्थः । कुतः ? । तद्बन्धनत्वात् । फलं तावत् । दर्शपूर्णमासाभ्यां यजेतेति । दर्शपूर्णमाससंयुक्तं श्रुतम् । तद् यत्र दर्शपूर्णमासौ, तत्र भवितुमर्हति । न च सौर्य्यादिषु तौ स्तः । अतः स्वर्गस्यापि तत्राभावः । एवं नियमोऽपि कर्मबन्धनः । यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । स दर्शपूर्णमासाभावे कथं स्यात् । तथा कर्त्ता कर्मबन्धनः । दर्शपूर्णमासाभ्यां स्वर्गकाम इति । सोऽपि कथं तयोरसतोः स्यात् । समुदायोऽप्याग्नेयादीनाम् । तानि सौर्य्यादिषु न सन्तीति तत्समुदायः कथं तत्र भवेत् । तस्मात् तेषामप्रवृत्तिः ॥२०॥ सि०

प्रवृत्तौ चापि तादर्थ्यात् ॥ २१ ॥

अपि च धर्माणां प्रवृत्तिः कर्मार्थां, कर्मण उपकर्त्तुम् । न च फलादीनि कर्मण उपकुर्वन्ति । फलं तावत् पुरुषस्योपकरोति, न कर्मणः । उक्तं हि, फलं च पुरुषार्थत्वादिति । नियमोऽपिनकर्मधर्मः । कर्तृधर्मोऽसावित्युक्तम् । कर्त्तुर्वा श्रुतिसंयोगाद् इति । तथा कर्त्ता स्वर्गकामो, न कर्मार्थः । कर्म स्वर्गकामार्थम्, न हि स्वर्गकामः कर्मण उपदिश्यते । स्वर्गकामो यजेतेति । किं तर्हि । कर्म स्वर्गकामस्योपदिश्यते । स्वर्गकामो यजेत, नान्यत् कुर्य्यादिति । तथा समुदायो न कर्मार्थः । फलार्थोऽसौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । एवमेतेषां कर्मणोऽनुपकारकत्वात्, प्रवृत्तिरनर्थिका स्यात् । तस्मान्न प्रवर्त्तेरन् ॥ २१ ॥ युक्तिः ॥

अश्रुतित्वाच्च ॥ २२ ॥

अत्राह । यदि दर्शपूर्णमाससंयोगात् फलादीनामप्रवृत्तिः, प्रयाजादीनामपि तत्सम्बन्धादप्रवृत्तिः प्राप्ता । तान्यपि हि तत्संयुक्तानीति । उच्यते । यद्यपि तानि दर्शपूर्णमासयोः श्रुतानि, विध्यन्तेन तु सौर्य्यादिष्वप्यतिदिष्टानि । फलादीनि तु न विध्यन्तेनातिदिश्यन्ते । तेषां यदि प्रत्यक्षा प्रवर्त्तिका श्रुतिः स्यात्, ततः प्रवर्त्तेरन् । न चासावस्ति । तस्मादश्रुतित्वान्न प्रवर्त्तन्ते ॥ २२ ॥ आ० नि० ॥ फलादीनामनतिदेशाधिकरणम् ॥ १३ ॥

गुणकामेष्वाश्रितत्वात् प्रवृत्तिः स्यात् ॥ २३ ॥

इह गुणकामा उदाहरणं— गोदोहनेन प्रणयेत् पशुकामस्य, उपास्मै गायता नर इति, ग्रामकामाय प्रतिपदं कुर्य्यादित्येवमादयः। तत्र विचार्य्यते । किं गुणकामानां वैकृतेषु प्रवृत्तिः, उत नेति । ततः सूत्रेणैवोपक्रमः। गुणकामेष्वाश्रितत्वात् प्रवृत्तिःस्यात्। प्रवृत्तिर्गुणकामानाम्। कुतः। आश्रितत्वात्। गोदोहनं प्रणयनाश्रितं गोदोहनेन प्रणयेदिति । तच्च प्रणयनं प्रवर्त्तते।आश्रये च प्रवर्त्तमाने तदाश्रितमपि प्रवर्त्तते। यथापटे आकृष्यमाणे तदाश्रितं चित्रमप्याकृष्यते।यथा च चमसः प्रवर्त्तते । यथा च, खादिरं वीर्य्यकामाय यूपं कुर्य्यादिति । एवं गोदोहनमपि प्रवर्त्तेत । गोदोहने च प्रवर्त्तमाने तदाश्रितः कामोऽपि प्रवर्त्तितुमर्हति । तस्माद् गुणकामानां प्रवृत्तिः ॥ २३ ॥ पूर्व० ॥

निवृत्तिर्वा कर्मभेदात् ॥ २४ ॥

निवृत्तिर्वा गुणकामानामप्रवृत्तिः । कुतः । कर्मभेदात् । कार्य्यभेदादित्यर्थः । अन्यत् कार्य्यं गोदोहनस्य, अन्यच्चमसस्य । चमसः क्रत्वर्थो, गोदोहनं तु पुरुषार्थः । तदुक्तं— यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणाऽविभक्तत्वादित्यत्र । अक्रत्वर्थः किमर्थं प्रवर्त्तेत । क्रतूपकाराय हि तस्य प्रवृत्तिः । एवं प्रतिपदः । तस्मान्न प्रवर्त्तेरन् गुणकामाः ॥ २४ ॥ सि० ॥

यत्तूपन्यस्तं, यथा खादिरं वीर्य्यकामाय यूपं कुर्य्यादित्यत्र प्रवृत्तिरेवमत्रापीति । तत्र ब्रूमः—

अपि वाऽतद्विकारत्वात् क्रत्वर्थत्वात् प्रवृत्तिः स्यात् ॥ २५ ॥

अपि वा, एवंविधेषु प्रवृत्तिः स्यात् । कुतः । अतद्विकारत्वात् । न खादिरः क्रत्वर्थविकारः । अयमपि क्रत्वर्थ एव । तदुक्तम्— एकस्य तूभयत्वे संयोगपृथक्त्वमिति । क्रत्वर्थश्चेत् पलाशवत् प्रवर्त्तेत। तस्मिँश्च प्रवर्त्तमाने तदाश्रितः कामोऽपि प्रवर्त्तते । खादिरेण हि स सिद्ध्यति । स च खादिरोऽस्ति । तस्मात् कामं साधयिष्यति ॥ २५ ॥ पूर्वपक्षयुक्तिनिरासः ॥ ॥ गुणकामानां गोदोहनादीनामनतिदेशाऽधिकरणम् ॥ १४ ॥

एककर्मणि विकल्पोऽविभागो हि चोदनैकत्वात् ॥२६॥

सौर्य्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति श्रूयते । अस्ति तु प्रकृतावभिमर्शनद्वयं, चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्राऽमावास्यामिति । तदिह चोदकेन प्राप्यते । तत्र संशयः । किं सौर्य्यो यदा पौर्णमास्यां प्रयुज्यते तदा चतुर्होत्राऽभिम्रष्टव्यः, यदाऽमावास्यायां तदा पञ्चहोत्रा ? उतोभयत्र विकल्पः । चतुर्होत्रा वा पञ्चहोत्रा वा ? इति । किं प्राप्तम् । व्यवस्थेति । कुतः । चोदकानुग्रहात् प्रकृतौ व्यवस्था कृता । इहापि चोदको व्यवस्थां प्रापयति ॥

एवं प्राप्ते उच्यते । एकस्मिन् कर्मण्यत्र सौर्य्येविकल्पः । कुतः । अविभागो हि चोदनैकत्वात् एकैषा चोदना । सौर्य्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति । तत्राविभागो भवतु । उभावप्यभिमर्शने प्राप्येते । तयोरेकार्थत्वात् समुच्चयो न सम्भवति । तस्माद् विकल्पः । यत्तु, प्रकृतौ व्यवस्थेति । नासौ कालकृता । किं तर्हि ? समुदायकृता । न च सौर्य्ये तौ समुदायौ स्तः ॥ यद्येवमभिमर्शनमेव तर्हि न प्राप्नोति । तयोः समुदाययोरभावादिति । अत्रोच्यते । न प्राप्नोति । यदि समुदाययोरभिमर्शनमुच्येत । तयोस्त्वनभिम्रष्टव्यत्वात् समुदायिनां तदुच्यते लक्षणया । समुदायिविकारश्च सौर्य्यः । तस्मात् तत्रापि चोदकः प्रापयति तत् ॥ २६ ॥ ॥ सौर्ये चरावभिमर्शनद्वयस्य विकल्पाधिकरणम् ॥ १५ ॥

लिङ्गसाधारण्याद्विकल्पः स्यात् ॥ २७ ॥

सौर्य्ये कर्मणि दार्शपौर्णमासिको विध्यन्त इत्युक्तम्— इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिरिति । सन्ति तु तत्र कर्माणि आग्नेयादीनि । तत्र विचारः । किं यस्य कस्यचिद् दार्शपौर्णमासिकस्य कर्मणः सौर्य्ये विध्यन्तः, उताग्नेयस्येति । किं प्राप्तम् । विकल्पः । कुतः । लिङ्गसाधारण्यात् । सौर्य्ये दार्शपौर्णमासिकविध्यन्तप्राप्तौ यल्लिङ्गमुपदिष्टं, प्रयाजे प्रयाजे कृष्णलं जुहोतीति तत् साधारणं सर्वेषां विध्यन्ते सम्भवति । न च समुच्चयः तस्माद् विकल्पः ॥ २७ ॥ पूर्व० ॥

ऐकार्थ्याद्वा नियम्येत पूर्ववत्त्वाद् विकारो हि ॥२८॥

आग्नेयस्य विध्यन्तो नियम्येत । कुतः । ऐकार्थ्यात् । एकदेवतत्वादित्यर्थः । आग्नेय एकदेवत्यः । सौर्य्योऽपि । तेनैकदेवतत्वेन लिङ्गेन आग्नेयविध्यन्तो नियम्येत । पूर्ववत्वात् । पूर्ववानयं सौर्य्यः ।

पूर्वत्राभिहितं विध्यन्तमपेक्षते । विकारो हि । विकृतिरेषा । सर्वाश्च विकृतयः पूर्ववत्यः । चोदनावाक्यानामसमाप्तत्वात् । तत्र लिङ्गेन विध्यन्तनियमो भवतीत्युक्तम् । अस्ति चैकदेवतत्वं लिङ्गम् । तेनाग्नेयविध्यन्तः ॥ २८ ॥ सि० ॥

अश्रुतित्वान्नेतिचेत् ॥ २९ ॥

अत्राह । स्यादेतदेवं, यद्यत्रैकत्वं श्रूयते । न तु श्रूयते । कथम् । तद्धितेनायं निर्देशः । सौर्य्यमिति, तथा आग्नेयमिति । तत्र वचनव्यक्तिर्न ज्ञायते, किं सूर्य्यो देवता अस्य, उत सूर्य्यौ च सूर्य्याश्चेति । तथा आग्नेयेऽपि ॥ २९ ॥ आ० ॥

स्याल्लिङ्गभावात् ॥ ३० ॥

स्याद् व्यवस्थितिरेकत्वस्य । कुतः । लिङ्गभावात् । लिङ्गमत्रास्ति । किम् । वाक्यशेषे एकत्वं श्रूयते, सौर्य्ये तावदमुमेव आदित्यं स्वेन भागधेयेनोपधावति, स एवैनं ब्रह्मवर्चसङ्गमयतीति । आग्नेयेऽपि, अङ्गिरसो वा इत उत्तमाः स्वर्गमायंस्ते यज्ञवास्त्वभ्यायँस्ते पुरोडाशं कूर्मं भूत्वा प्रसर्पन्तमपश्यँस्तमब्रुवन् इन्द्राय ध्रियस्व बृहस्पतये ध्रियस्व विश्वेभ्यो देवेभ्यो ध्रियस्वेति । स तानाह न ध्रिये । तमब्रुवन् अग्नये ध्रियस्वेति । सोऽब्रवीत्, ध्रियेऽहम् । यदाग्नेयोऽष्टाकपालोऽमावास्यायां पूर्णमास्यां चाच्युतो भवति । अग्निमेव स्वेन भागधेयेन समर्द्धयतीति ॥ ३० ॥

तथा चान्यार्थदर्शनम् ॥ ३१ ॥

अनुवाक्यायामेकत्वश्रवणम्, अग्निर्मूर्द्धा दिव इत्याग्नेये, उदु त्यञ्जातवेदसमिति सौर्य्ये । ननु पुनरुक्तमेतल्लिङ्गद्वयोपदर्शनमिति । तदुच्यते । नैतत् पुनरुक्तम् । एकमत्र चोदनागतम्, एकं मन्त्रगतम् । चोदनागतं प्रापकं, मन्त्रगतं प्राप्तस्य द्योतकमिति ॥ ३१ ॥ आ० नि० ॥ सौर्ये चरावाग्नेयधर्मातिदेशाधिकरणम् ॥ १६ ॥

विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात् ॥ ३२ ॥

इदं श्रूयते, ऐन्द्रमेकादशकपालं निर्वपेदिति, आग्नेयं पय इति । तत्र सन्देहः । किं देवतासामान्यादैन्द्रपुरोडाशसान्नाय्यस्य विध्यन्तः, आग्नेये च पयसि औषधस्य, देवतासामान्यं बलवत्तरम् ? अथ हविः-

सामान्यादुत्तरत्र सान्नाय्यस्य, पूर्वत्र औषधस्य, हविःसामान्यं बलीयः ? इति ॥ किं प्राप्तम् । उच्यते । देवतासामान्यं बलीय इति । कुतः । मुख्यत्वात् । मुख्यनियन्त्रिता देवता । ऐन्द्रमाग्नेयमिति । जघन्यनियन्त्रितं हविः । तयोर्विरोधे मुख्याऽनुग्रहो न्याय्यः । मुख्यस्य अविरुद्धप्रवृत्तित्वात् । जघन्यस्य तु मुख्येन विरुद्धा प्रवृत्तिः । तस्माद्देवतासामान्यं बलीय इति प्राप्ते ब्रूमः । विप्रतिपत्तौ हविषा नियम्येत । विप्रतिपत्तौ एतस्यां हविर्देवतयोः, हविषा विध्यन्तो नियम्येत । कुतः । कर्मणस्तदुपाख्यत्वात् । कर्म देवतां प्रति द्रव्यस्योत्सर्गः । स च हविःरूपाख्यायते, उपलक्ष्यते इत्यर्थः । हविस्त्यज्यमानं दृश्यते । किमतः । अतो हविः कर्मणः प्रत्यासन्नम् । प्रत्यासत्तिश्च लिङ्गम् । ननु देवताऽपि यागेन सम्बद्धा । न तया विना यागो भवति । उच्यते । सत्यं सम्बद्धा । आराढुपकारिणी तु सा । नाऽसौ त्यज्यते । तस्माद् बहिरङ्गम् । अतो हविःसामान्यं बलीयः ॥ ३२ ॥ सि० ॥

तेन च कर्मसंयोगात् ॥ ३३ ॥

तेन च हविषा संयुज्य कर्म चोद्यते । ऐन्द्रम्, आग्नेयमिति हविःप्रधानः शब्दः । किमतः । अतो हविरत्र बुद्धौ सन्निहितं, तल्लिङ्गं भवति । यथा धूमो बुद्धिविषयतामापन्नोऽग्नेर्लिङ्गं, न विद्यमानः ॥ ॥ ३३ ॥ युक्तिः ॥

ननु देवताऽप्यत्र श्रूयते, ऐन्द्रमाग्नेयमिति । उच्यते—

गुणत्वेन देवताश्रुतिः ॥ ३४ ॥

विशेषणत्वेन देवता श्रूयते, हविर्विशेष्यत्वेन । विशेष्यं च बुद्धौ सन्निहितं भवति, न विशेषणम् । तद्धि विशेष्यं विशेष्य निवर्त्तते । कथं ज्ञायते । विशेष्यानुबन्धसंयोगात् । यथा राजपुरुषः पूज्य इत्युक्ते पुरुषः पूज्यो गम्यते, न राजा । एवमिहापि । ऐन्द्रं पय इत्युक्ते हविर्बुद्धौ सन्निधीयते, न देवता । यच्च बुद्धौ सन्निहितं, तल्लिङ्गमित्युक्तम् । तस्माद् हविःसामान्यं बलीयः । अत ऐन्द्रे पुरोडाशे आग्नेयस्य विध्यन्तः । आग्नेये च पयसि सान्नाय्यस्येति ॥

गुणत्वेन देवताश्रुतिरित्येतस्य सूत्रस्यापरा व्याख्या । इदं पदोत्तरं सूत्रम् । यदुक्तं हविःसामान्यं बलीय इति । नैतद् युक्तम्, देवतासामान्यं बलीय इति । कुतः । सर्वोऽयं प्रयासो देवताराधनार्थ एव ।

साऽस्य प्रसन्ना फलं ददाति । एवं श्रूयते । तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति । यश्चेन्द्रस्य प्रसादनोपाय इति ज्ञातः, पुनरपि इन्द्रे प्रसादयितव्ये स एवास्थेयो भवति । तस्माद्देवतासामान्यं बलीय इति ॥ अत्र ब्रूमः । स्यादेतदेवं, यदि देवतातः फलं स्यात् । यागात्तु फलं, स्वर्गकामो यजेतेति श्रूयते। यत्तु, तृप्त एवैनमिन्द्र इति । तत्रेदमुच्यते । गुणत्वेन देवताश्रुतिः । यागे गुणभूता देवता । तस्या दातृत्वं स्तुत्योच्यते । यथा, अमात्येन मे ग्रामो दत्तः, सेनापतिना मे ग्रामो दत्त इति । न च अमात्यः सेनापतिर्वा ग्रामस्य प्रभवति । राजैव प्रभवति । इतरस्मिन् गुणभूते स्तुत्या दातृत्ववादः । तस्माद् यथोक्तेनैव न्यायेन हविःसामान्यमेव बलीय इति ॥ ३४ ॥ आ० नि० ॥

हविर्देवतयोः संनिपाते हविःसामान्यस्य बलीयस्त्वाधिकरणम् ॥१७॥

हिरण्यमाज्यधर्म तेजस्त्वात् ॥ ३५ ॥

प्राजापत्यं घृते चरुं निर्वपेत्, शतकृष्णलमायुष्काम इति श्रूयते। तद् हिरण्यमाज्यधर्म्म । स्यात् । उपांशुयाजविध्यन्तस्तत्र भवेत् । कुतः । तेजस्त्वसामान्यात् । तेजस्त्वं सामान्यम् । हिरण्यमश्मनां तेजः । आज्यमपि गवां सार इत्यर्थः । अथवा हिरण्यमपि तेजस्वित्वा-दुज्ज्वलम् । आज्यमपि स्निग्धत्वादुज्ज्वलमेव । तस्मात् सामान्या-दुपांशुयाजधर्मा शतकृष्णलश्चरुः ॥ ३५ ॥ पूर्व० ॥

धर्मानुग्रहाच्च ॥ ३६ ॥

हिरण्ये च बहव आज्यधर्मा अनुगृह्यन्ते अवेक्षणादयः । औषध-धर्म्मास्तु हीयेरन् अवहन्त्यादयः । तस्मादपि आज्यधर्म्माः ॥ ३६ ॥

औषधं वा विशदत्वात् ॥ ३७ ॥

अथवा औषधस्य हिरण्ये विध्यन्तः । कुतः ? । विशदत्वात् । हिरण्यमपि विशदम्, औषधमपि विशदम्। कः पुनरनयोः सामान्य-योर्विशेषः । न खलु कश्चित् । किन्तु विशदत्वस्य कारणद्वयमुपोद्ब-लकं, तेजस्वितायास्तद्धर्म्मानुग्रह एकः ॥ ३७ ॥ सि० ॥

चरुशब्दाच्च ॥ ३८ ॥

चरुशब्दश्चात्र भवति, प्राजापत्यं चरुमिति । चरुशब्दश्च औषध-स्य वक्ता, तद् बलवद् औषधस्य लिङ्गम् ॥ ३८ ॥

तस्मिंश्च श्रपणश्रुतेः ॥ ३९ ॥

तस्मिँश्चाज्ये श्रपणं श्रूयते, घृते श्रपयतीति । किमतः । अत एतद्भवति । औषधविध्यन्तेन श्रपणं प्राप्यते । तत्र केवलमाज्यं विधायिष्यते । आज्यविध्यन्ते तु श्रपणमाज्यं च विधीयेयाताम् । तथा वाक्यम्भिद्येत ॥

तस्मिंश्च श्रपणश्रुतेरित्येतस्यापरा व्याख्या । आह । साक्षादेव इहाज्यं श्रूयते । तस्मात् तस्य विध्यन्तं इति । तत उत्तरमिदम् । तस्मिँश्च श्रपणश्रुतेः । दार्शपौर्णमासिकं श्रपणं तस्मिँश्च आज्ये श्रूयते। गुणगतं तत्सामान्यम् । हविर्गतं तु वैशद्यं, चरुशब्दश्च । तस्मात् ते बलवती ॥ ३९ ॥ युक्तिः ॥ शतकृष्णलाख्यहिरण्ये औषधधर्मातिदेशाधिकरणम् ॥ १८ ॥

मधूदके द्रवसामान्यात् पयोविकारः स्यात् ॥ ४० ॥

चित्रायामिष्टौ श्रूयते, दधि मधु घृतं धाना उदकं तण्डुलाः, तत्संसृष्टं प्राजापत्यं भवतीति । तत्र, मधूदके पयोविकारः स्यात् । कुतः । द्रवसामान्यात् । द्रवे च मधूदके पयोऽद्रवम् ॥ ४० ॥ पूर्व० ॥

आज्यं वा वर्णसामान्यात् ॥ ४१ ॥

आज्यं वा इमे विकुर्य्याताम्, उपांशुयाजस्य तयोर्विध्यन्तः स्यात्। कुतः । वर्णसामान्यात् । समानवर्णे मधूदके आज्येन ॥ ४१ ॥ सि० ॥

धर्मानुग्रहाच्च ॥ ४२ ॥

आज्यधर्म्माश्च बहवो मधूदकयोः शक्याः कर्त्तुमुत्पवनादयो, न तु पयोधर्म्मा दोहनादयः ॥ ४२ ॥ युक्तिः ॥

पूर्वस्य चाविशिष्टत्वात् ॥ ४३ ॥

यत्तु पूर्वं कारणमुक्तम् । द्रवत्वसामान्यं तदविशिष्टम् । आज्यमपि अग्निसंयोगाद् द्रवीभवति तस्मादुपांशुयाजविध्यन्तो मधूदकयोरिति ॥४३॥ मधूदके उपांशुयाजीयाऽऽज्यधर्मातिदेशाधिकरणम् ॥ ॥१९॥ इति श्रीभट्टशबरस्वामिनः कृतौ मीमांसाभाष्येऽष्टमस्याध्यायस्य प्रथमः पादः ॥ ८ ॥ १ ॥

अथ अष्टमस्य अध्यायस्य द्वितीयः पादः ॥ ८ ॥ २ ॥

वाजिने सोमपूर्वत्वं सौत्रामण्याञ्च ग्रहेषु ताच्छब्द्यात् ॥ १ ॥

चातुर्मास्येषु वाजिनेज्या श्रुता । वाजिभ्यो वाजिनमिति । सौत्रामण्यां च सुरा ग्रहाः । आश्विनं ग्रहं गृह्णाति, सारस्वतमैन्द्रमिति । तत्र संशयः । किमुभयोः सौमिको विध्यन्तः, उत दार्शपौर्णमासिक इति । तदुच्यते । वाजिने सौत्रामण्यां च ग्रहेषु सोमपूर्वत्वम् । सौमिको विध्यन्तः । कुतः । ताच्छब्द्यात् सोमशब्दत्वात् । सोमशब्दस्त्वत्र श्रूयते, सोमो वै वाजिनं सुरा सोम इति । न तावद्वाजिनं सोमो, न सुरा । न च तयोः सोमेन सादृश्यमस्ति । सादृश्याच्च परशब्दः परत्र प्रवर्त्तते । तस्मात् सादृश्यमत्र विधीयते । सादृश्यं चात्र सोमधर्मत्वकृतं शक्यं विधातुं, नान्यत् । स एष नाम्ना धर्म्मातिदेशो, न विध्यन्तेन । यथा, कौण्डपायिनामयने अग्निहोत्रे ॥ १ ॥ पूर्व० ॥

अनुवषट्काराच्च ॥ २ ॥

अनुवषट्कारं च सोमधर्मं दर्शयति, वाजिनस्याग्ने वीहीत्यनुवषट्करोति, सुराया वीहीत्यनुवषट्करोतीति ॥ २ ॥ युक्तिः ॥

समुपहूय भक्षणाच्च ॥ ३ ॥

समुपहूय भक्षणं च सोमधर्मः । तत्र दृश्यते । शेषं समं वा विभज्य समुपहूय भक्षयन्तीति ॥ ३ ॥ युक्तिः ॥

क्रयणश्रयणपुरोरुगुपयामग्रहणासादनवासोपनहनञ्च तद्वत् ॥ ४ ॥

क्रयणादींश्च सोमधर्मान् सुरायां दर्शयति, सीसेन क्लीवात्, क्रय्या कुवलसक्तुभिराश्विनं क्रीणातीति । एका पुरोरुक्,एका याज्या । उपयामगृहीतोऽस्यच्छिद्राय त्वाऽच्छिद्रेणाश्विनं ग्रहं गृह्णाति । गृहीत्वा आसादयति । त्रिरात्रं संहता वसन्ति । क्षौमे वाससी उपनद्धानि तोक्मानि शष्पाणि भवन्तीति । विधौ सति अनेकार्थानि वाक्यानि स्युः । क्रयादीन् सीसकादींश्च विदधति । तस्मादुभयोः सौमिको विध्यन्तः ॥ ४ ॥ युक्तिः ॥

हविषा वा नियम्येत तद्विकारत्वात् ॥ ५ ॥

हविःसामान्येन वा, अत्र दार्शपौर्णमासिको विध्यन्तो नियम्येत । कुतः । तद्विकारत्वात् । दार्शपौर्णमासिकस्य हविषो विकारः सुरावाजिने । औषधविकृतिः सुरा, सान्नाय्यविकृतं वाजिनम् ॥ ५ ॥ सि० ॥

प्रशंसा सोमशब्दः ॥ ६ ॥

अथ यदुक्तं, ताच्छब्द्यादिति। तत्र ब्रूमः। प्रशंसार्थोऽयं सोमशब्दो, न विध्यर्थः। विधायकस्याभावात्। सोमो वै वाजिनं, सुरा सोम इति। प्रकृष्टफलवत्त्वात् सोमस्य। तद्भावेन सुरावाजिनयोः प्रशंसा। यथा, सिंहो देवदत्त इति पुरुषस्य। तस्मान्नायं नाम्ना धर्मातिदेशः ॥ ६ ॥ पूर्वपक्षयुक्तिनिरासः ॥

वचनानीतराणि ॥ ७ ॥

इतराणि तु सीसक्रयादीनि वाचनिकानि। प्राप्तेरभावात्। अगत्या च वाक्यानामनेकार्थता, सगुणकर्मविधानेन ॥ ७ ॥ पूर्व० ॥

व्यपदेशश्च तद्वत् ॥ ८ ॥

शष्पैरेव दीक्षणीयामप्नोति। तोक्मभिः प्रायणीयां, सिंहलोमभिरातिथ्यामिति। सोमविकारत्वे प्रत्यक्षमेव दीक्षणीयादीनि प्राप्नुयुः। प्राप्तानां शष्पादिभिस्तदाप्तिवचनं नोपपद्यते ॥ ८ ॥ युक्तिः ॥

पशुपुरोडाशस्य च लिङ्गदर्शनम् ॥ ९ ॥

पशुपुरोडाशता च ग्रहाणां श्रूयते, नैतेषां पशूनां पुरोडाशा विद्यन्ते। ग्रहपुरोडाशा ह्येते पशव इति। तत्र तावदत्र ग्रहाः पुरोडाशाः। ग्रहा एव ते। यदि तु पुरोडाशधर्मकास्तत एतदुपपद्यते। तस्मात् पौरोडाशिकस्तेषु विध्यन्तः ॥ ९ ॥ लिङ्गम् ॥ ॥ ऐष्टिकसौत्रामण्योरैष्टिकधर्मातिदेशाधिकरणम् ॥ १ ॥

पशुः पुरोडाशविकारः स्याद्देवतासामान्यात् ॥ १० ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः। यो दीक्षितो, यदग्नीषोमीयं पशुमालभते इति। तत्र सन्देहः। किं पशुः पुरोडाशविकारः, उत सान्नाय्यविकार इति। किं प्राप्तम्। पशुः पुरोडाशविकारः स्यात्। कुतः। देवतासामान्यात्। अग्नीषोमीयः पशुः। पुरोडाशोऽपि तद्देवत्य एव ॥ १० ॥ पूर्व० ॥

प्रोक्षणाच्च ॥ ११ ॥

प्रोक्षणं पुरोडाशधर्मः पशौ दर्शयति। अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षामीति पशुं प्रोक्षतीति ॥ ११ ॥

पर्यग्निकरणाच्च ॥ १२ ॥

पर्य्यग्निकरणमपि पुरोडाशधर्म्मः । तदपि पशौ दृश्यते । आहवनीयादुल्मुकेन पशुं पर्य्यग्निकरोतीति । तस्मात् पुरोडाशविकारः ॥ ॥ १२ ॥ हेतुः ॥

सान्नाय्यं वा तत्प्रभवत्वात् ॥ १३ ॥

सान्नाय्यं वा पशुर्विकुर्य्यान्नपुरोडाशम् । कुतः । तत्प्रभवत्वात् । पशुतः सान्नाय्यं प्रभवति, पशुश्च । तन्मिथः प्रत्यासन्नम् । प्रत्यासत्तिश्च लिङ्गम् । हविःसामान्यं च देवतासामान्याद् बलीय इत्युक्तम् ॥ १३ ॥ सि० ॥

तस्य च पात्रदर्शनात् ॥ १४ ॥

तस्य च सान्नाय्यस्य यत् पात्रम् उखा, सा पशौ दृश्यते । यदि पशुरुखायां पचेदिति ॥ १४ ॥ युक्तिः ॥ पशौ सान्नाय्यधर्मातिदेशाऽधिकरणम् ॥ २ ॥

दध्नः स्यान्मूर्त्तिसामान्यात् ॥ १५ ॥

सान्नाय्यविकारोऽपि दध्नो विकारः स्यात् पशुः, न पयसः । कुतः । मूर्त्तिसामान्यात् । घनत्वं मूर्त्तिः ॥ १५ ॥ पूर्व० ॥

पयो वा कालसामान्यात् ॥ १६ ॥

पयो वा पशुर्विकुर्य्याद् न दधि । सद्यःकालः पशुः, पयोऽपि सद्यःकालम् । दधि तु द्व्यहकालम् । पयोऽन्तरितं, तद् बहिरङ्गम् ॥ १६ ॥ सि०

पश्वानन्तर्य्यात् ॥ १७ ॥

पशोश्च पयोऽनन्तरं, तत् प्रत्यासन्नं, न दधि ॥ १७ ॥

द्रवत्वं चाविशिष्टम् ॥ १८ ॥

द्रवत्वं पशुपयसोः समानम् । पशुरपि द्रवति, पयोऽपि । तस्मात् पयोविकारः पशुः ॥ १८ ॥ युक्तिः ॥ पशौ पयोधर्मातिदेशाऽधिकरणम् ॥ ३ ॥

आमिक्षोभयभाव्यत्वादुभयविकारः स्यात् ॥ १९ ॥

वैश्वदेवी आमिक्षा उभयोर्दधिपयसोर्विकारः स्यात् । उभयभाव्यत्वात् । उभाभ्यां हि सा भाव्यते । तन्न युज्यते, विशेषोऽस्यैव, नेतरस्येति । तस्मादुभयोः ॥ १९ ॥ पूर्व० ॥

एकं वा चोदनैकत्वात् ॥ २० ॥

एकं वा विकुर्य्याद् दधि पयो वा, नोभे। चोदनैकत्वात्। एकैषा चोदना, वैश्वदेव्यामिक्षा इति। सा एकेन विध्यन्तेन निराकाङ्क्षीक्रियते। तस्मादेकं विकुर्य्यात्॥ २०॥ सि०॥

यत्तु, न युज्यते विशेष इति। तत्रोच्यते—

दधिसङ्घातसामान्यात्॥ २१॥

संहतं दधि, आमिक्षाऽपि संहता। पयो द्रवम्। एष विशेषः। तस्माद्दध्नो विकार इति॥ २१॥ पूर्व०॥

पयो वा तत्प्रधानत्वाल्लोकवद्दध्नस्तदर्थत्वात्॥ २२॥

पयो वा आमिक्षया विक्रियते, न दधि। पयःप्रधानत्वाद्। अस्य च संसर्गस्य। किं प्राधान्यं पयसः। भूयस्त्वम्। प्रभूतं तत्र पयः, अल्पं दधि। दध्नश्च तदर्थत्वात्। दधि च तत्र पयो घनीभावयितुमुपादीयते। लोकवत्। लोकेऽपि पय एव घनीभावयितुं दधि उपादीयते। कथम्। दध्यऽभावेऽन्येनाम्लेनापि काञ्जिकादिना क्रियते। तत्रापि चामिक्षाशब्दो भवति। दधिनियमोऽम्ले हि अदृष्टार्थः। तस्मात् पय एवाम्लसंयोगेन घनीभूतमामिक्षा इत्युच्यते। पयश्चेद् आमिक्षा, पयस एव विकारो न्याय्यः॥ २२॥ सि०॥

धर्म्मानुग्रहाच्च॥ २३॥

सद्यःकालता धर्म्मः पयोविकारत्वेनानुग्रहीष्यते। वैश्वदेवस्य सद्यःकालत्वात्। दधिविकारत्वे बाध्येत। वैश्वदेवोऽपि द्व्यहकालः क्रियेत। तथा तस्य धर्मो बाध्येत। सद्योभावं च दर्शयति। जुषन्तं युज्यं पय इति। यदि दध्नो विकारः स्यात्। तथा द्व्यहकालभावे दातव्यं, न कथञ्चन पयः स्यात्। तत्रैतद्दर्शनं नोपपद्यते। तस्मात् पयोविकारश्चामिक्षा, दध्नश्चाधर्मकत्वम्॥ २३॥ युक्तिः॥ आमिक्षायां पयोधर्मातिदेशाधिकरणम्॥ ४॥

सत्रमहीनश्च द्वादशाहस्तस्योभयथा प्रवृत्तिरैककर्म्यात्॥ २४॥

द्वादशाहोऽहर्गणः, प्रायणीयोऽतिरात्रः, पृष्ठ्यः षडहः। त्रयश्छन्दोमा अविवाक्यमहः, उदयनीयोऽतिरात्र इति। स उभयसंज्ञकः, सत्रमहीनश्च। कथं ज्ञायते। अभियुक्तानामुपदेशात्। एवं ह्युपदिशन्ति। सत्रमहीनश्च द्वादशाह इति। शब्दार्थाधिगमे चाभियुक्तोप-

देशः प्रमाणम् । संज्ञाव्यवस्थया च तस्य धर्मा आम्नाताः । एको द्वौ बहवोऽपि वा अहीनेन यजेरन् । तान् दीक्षिता याजयेयुः । गृहपतिसप्तदशाः स्वयमृत्विजो ब्राह्मणाः सत्रमुपेयुरित्येवमादयः । धर्मभेदाच्च संज्ञाव्यवस्था । यथा, ब्राह्मणः, परिव्राट्, वानप्रस्थ इति । तद् दशमेऽध्याये वक्ष्यते– द्वादशाहस्य सत्रत्वमासनोपायिचोदनेन यजमानबहुत्वे सत्रशब्दाभिसंयोगात् ॥ यजतिचोदनादहीनत्वं स्वामिनांच्चास्थितपरिमाणत्वाद्, इति॥स द्विरात्रादिष्वहर्गणेषु प्रवर्त्तते इत्युक्तं–गणेषु द्वादशाहस्य इति । तत्र सन्दिह्यते । किमुभयप्रकारोऽसौ विकृतौ प्रवर्त्तते, उत व्यवस्थया, क्वचिदहीनभूतः, क्वचित् सत्रभूतः ? इति । किं प्राप्तम् । तस्योभयथा प्रवृत्तिः स्यात् । ऐककर्म्यात् । उभयविधस्तत्र प्रवर्त्तेत । कुतः । ऐककर्म्यात् । एकमिदं कर्म्म उभयविधमित्युक्तम् । न तस्य प्रवृत्तौ विशेषो गृह्यते, इहैवंविधः, इह नेति । तस्मादुभयविधः प्रवर्त्तेत । नन्वेकाचेद् विधा प्रवृत्ता, द्वितीयया कार्य्यं नास्ति । ऐककर्म्याद् विकल्पो भविष्यति । यथा आग्नेयविकारेष्वभिमर्शनस्य ॥ २४ ॥ पूर्व० ॥

अपि वा यजतिश्रुतेरहीनभूतप्रवृत्तिः स्यात् प्रकृत्या तुल्यशब्दत्वात् ॥ २५ ॥

अपि वा नैतदेवम् । सर्वत्रोभयथा प्रवृत्तिरिति । यत्र यजतिः श्रूयते, तत्राहीनभूतस्य प्रवृत्तिः । पारिशेष्यात् । यत्रासनोपायिचोदना, तत्र सत्रभूतस्य । कस्मात् । प्रकृत्या तुल्यशब्दत्वात् । प्रकृत्या हि विकृतिस्तुल्यशब्दा भवति । तस्माच्चोदनासामान्यात् प्रकृतिनियमः । अहीनभूतश्च यजतिचोदनः । द्वादशाहेन प्रजाकामो यजेतेति । सत्रभूत आसनोपायिचोदनः । द्वादशाहम् ऋद्धिकामा उपेयुः, द्वादशाहम् ऋद्धिकामा उपासीरन्निति ॥ २५ ॥ सि० ॥

द्विरात्रादीनामैकादशरात्रादहीनत्वं यजतिचोदनात् ॥ २६ ॥

अत्राह । के पुनस्तेऽहर्गणा यजतिचोदनाः, येषु अहीनभूतः प्रवर्त्तते ? के वा आसनोपायिचोदनाः, येषु सत्रभूत इति । तदुच्यते । द्विरात्रादीनामैकादशरात्रादहीनत्वम् । तत्राऽहीनभूतः प्रवर्त्तते । तेषां यजतिशब्देन चोदनात् । द्विरात्रेण यजेत इति ॥ २६ ॥

त्रयोदशरात्रादिषु सत्रभूतस्तेष्वासनोपायिचोदनात् ॥ २७ ॥

त्रयोदशरात्रम् ऋद्धिकामा उपेयुश्चतुर्दशरात्रं प्रतिष्ठाकामा उपासीरन्निति सुहृद्भूत्वा आचष्टे ॥
एवं वा। यस्माद् यजतिचोदनोऽहीनस्तस्माद्द्विरात्रादीनामपि अहीनत्वम्। तेऽपि हि यजतिचोदनाः। यस्मादासनोपायिचोदनं सत्रं, तस्मात्त्रयोदशरात्रादीनि सत्राणि । तान्यपि तच्चोदनानीति ॥२७॥ आ०नि०॥

लिङ्गाच ॥ २८ ॥

अग्निष्टोमो वै प्रजापतिः स उत्तरानेकाहानसृजत । तमेतं द्विरात्रादयोऽहर्गणा ऊचुस्त्वमस्मान् मा हासीरिति । तदेषामहीनत्वमिति द्विरात्रादीनामहीनत्वं दर्शयति ॥ २८ ॥ युक्तिः ॥ द्वादशाहे सत्राऽहीनयोर्व्यवस्थया धर्मातिदेशाधिकरणम् ॥ ५ ॥

अन्यतरतोऽतिरात्रत्वात् पञ्चदशरात्रस्याहीनत्वं कुण्डपायिनामयनस्य च तद्भूतेष्वहीनत्वस्य दर्शनात् ॥ २९ ॥

पञ्चदशरात्रं, कुण्डपायिनामयनं च उभावपि अहीनौ । कस्मात् । अन्यतरतोऽतिरात्रत्वात् । उभावपि एतौ अन्यतरतोऽतिरात्रौ तेन अहीनौ इति । पञ्चदशरात्रस्तावत्, त्रिवृदग्निष्टुदग्निष्टोमास्त्रिरात्रो दशरात्र उदनीयोऽतिरात्र इति । कुण्डपायिनामयनमपि, मासमग्निहोत्रं जुह्वतीत्यारभ्य, यावद् दशरात्रो महाव्रतमुदयनीयोऽतिरात्र इति । यश्चान्यतरतोऽतिरात्रः, सः अहीनः । कथं ज्ञायते ? । तद्भूतेषु अहीनत्वस्य दर्शनात् । तद्भूतेषु अन्यतरतोऽतिरात्रभूतेष्वहीनत्वं श्रूयते । यदन्यतरतोऽतिरात्रस्तेन अहीन इति ॥ २९ ॥ पूर्व० ॥

अहीनवचनाच ॥ ३० ॥

अहीन इति चायं पञ्चदशरात्रः प्रत्यक्षमुक्तः । यदन्यतरतोऽतिरात्रस्तेनाहीन इति । तस्मादपि अहीन इति ॥ ३० ॥ युक्तिः ॥

सत्रे वोपायिचोदनात् ॥ ३१ ॥

सत्रे वा एते, न अहीनौ । कुतः । उपायिचोदनात् । ये एव भूतिकार्य्यमिच्छन्तस्त एनं पञ्चदशरात्रमुपेयुः । कुण्डपायिनामयनेऽपि,

भूतिकामा उपेयुरिति । कः पुनरेतयोर्लिङ्गयोर्विशेषः । चोदनागतमेकं, वाक्यान्तरगतमन्यच्च । चोदनागतं यत् तदन्तरङ्गं भवति, बहिरङ्गमितरत् । अयं चापरो विशेषः । अहीनलिङ्गेन च नित्येन अहीनस्य संस्तुतिर्नोपपद्यते । उपपत्त्यैतदहीनत्वमुच्यते । यदन्यतरतोऽतिरात्रस्तेनाहीन इति । सा यदि तावदुपपत्तिः साधिका, ततोऽन्तरेणापि वचनं, सिद्धमहीनत्वम् । अथ न साधिका, उच्यमानमपि न सिद्ध्यति । तस्मान्नैतद् वचनम् । किन्तर्हि अनुवादोऽयं स्तुत्यर्थः । स्तुतिश्च, नित्येनाहीनलिङ्गेनान्यतरतोऽतिरात्रत्वेन अहीनस्य नोपपद्यते । यत्कारणं, सर्व एवाहीनोऽन्यतरतोऽतिरात्रः । सत्रस्य तूपपद्यते येन तावदयमन्यतरतोऽतिरात्रः । तेनाऽहीनः । आत्मना च सत्रम् । अत उभयात्मा विशिष्टोऽयमन्येभ्यः सत्रेभ्य इति ॥३१॥ सि० ॥

सत्रलिङ्गञ्च दर्शयति ॥ ३२ ॥

सत्रलिङ्गं च कुण्डपायिनामयने दर्शयति । गृहपतिर्गृहपतिः सुब्रह्मण्यः सुब्रह्मण्य इति । गृहपतिर्हि सत्रे आम्नातः । गृहपतिसप्तदशाः सत्रमुपेयुरिति । सत्रे च तेनार्थः क्रत्वर्थान् याजमानान् कर्तुम् । अन्येषां यजमानानां व्यावृतत्वात् । तस्मात् सत्रे एवैते इति ॥ ३२ ॥ युक्तिः ॥ पञ्चदशरात्रादिषु सत्रधर्मातिदेशाधिकरणम् ॥ ६ ॥ इति श्रीभट्टशबरस्वामिनः कृतौ मीमांसाभाष्ये अष्टमस्याध्यायस्य द्वितीयः पादः ॥ ८ ॥ २ ॥

अथ अष्टमस्य अध्यायस्य तृतीयः पादः ॥ ८ ॥ ३ ॥

हविर्गणे परमुत्तरस्य देशसामान्यात् ॥ १ ॥

इह हविर्गणा उदाहरणम् । आग्नावैष्णवमेकादशकपालं निर्वपेत्, सारस्वतं चरुम्, बार्हस्पत्यं चरुम्, अग्नये पावकाय अग्नये शुचये इत्येवमादयः । तत्र चिन्त्यते । किं शुचिदेवतस्याग्नीषोमीयविध्यन्तः, आग्नावैष्णवस्यापि आग्नेयविध्यन्तः ? उत विपर्यय इति । किं प्राप्तम् । हविर्गणे परं शुचिदेवतम् उत्तरस्याग्नीषोमीयस्य विकारः । पूर्वमप्याग्नावैष्णवं, पूर्वस्याग्नेयस्य विकारः । कुतः । देशसामान्यात् । क्रमसामान्यादित्यर्थः । इह शुचिदेवतो द्वितीयः । प्रकृतावप्यग्नीषोमीयो द्वितीयः । इतरत्रापि आग्नावैष्णवः प्रथमः ।

प्रकृतावपि आग्नेयः प्रथमः । देशसामान्येन लिङ्गेन परमुत्तरस्य, पूर्वं पूर्वस्य विकारः ॥ १ ॥ पूर्व० ॥

देवतया वा नियम्येत शब्दवत्त्वादितरस्याऽश्रुतित्वात् ॥ २ ॥

न वा देशनियमः स्यात्। किन्तर्हि । देवतया । देवतासामान्यात्। कुतः। शब्दवती देवता। आग्नावैष्णवमग्नये शुचये इति। इतरस्य देशस्य अश्रुतित्वात्। देशो न श्रूयते। किन्तर्हि । प्रचयाद् गम्यते। किमतः ?। एतदतो भवति। देवताप्रत्यय. कर्म्मचोदनाया-मनन्तरत्वान्मुख्यः । इतरस्तु पौर्वापर्य्यापेक्षया उत्पद्यते । तस्माज्जघन्यः। मुख्यानुग्रहश्च न्याय्यः । अतः शुचिदेवत्ये आग्नेयस्य विध्यन्तः । आग्नावैष्णवे च अग्नीषोमीयस्य ॥ २ ॥ सिद्धान्तः ॥ शुचिदेवते आग्नेयस्याग्नावैष्णवे च अग्नीषोमीयस्य धर्मातिदेशाऽधिकरणम् ॥ १ ॥

गणचोदनायां यस्य लिङ्गं तदावृत्तिः प्रतीयेताग्नेयवत् ॥ ३ ॥

जनकसप्तरात्रे श्रूयते, चत्वारि त्रिवृन्ति अहानि भवन्तीति। तथान्यत्र श्रूयते, नव त्रिवृन्त्यहानि भवन्तीति। तत्र सन्देहः। किं पार्ष्ठिकस्य प्रथमस्यायमभ्यासः, उत नानाह्नां द्वादशाहिकानां स्तोमविधिरिति ?। किं प्राप्तम्। गणचोदनायां यस्य लिङ्गं, तदावृत्तिः प्रतीयेताग्नेयवत् । गणचोदनायामेवंविधायां यस्य लिङ्गं पार्ष्ठिकस्य प्रथमस्याह्नस्त्रिवृत्त्वं, तस्यैवाऽऽवृत्तिः प्रतीयेत। चोदनासामान्यात्। आग्नेयवत्। तद् यथा, अग्नये पावकाय, अग्नये शुचये इति देवतैक्याच्चोदनासामान्यादाग्नेयस्य विध्यन्ताभ्यासः । एवमिहापि॥ ३ ॥ पूर्व०॥

नानाहानि वा सङ्घातत्वात् प्रवृत्तिलिङ्गेन चोदनात् ॥४॥

नानाहानि वा द्वादशाहिकानि प्रवर्त्तेरन्, न पार्ष्ठिकं प्रथममहः । कस्मात् । सङ्घातत्वात् । सङ्घात एष उच्यते, चत्वारि त्रिवृन्ति अहानीति। पृथक्त्वनिवेशिनी हि चत्वारि इति सङ्ख्या, पृथक्त्वेन अह्नां भवतीति। सन्ति च तत्र सप्तरात्रे चोदनया प्रवृत्तानि नानाहानि द्वादशाहिकानि चत्वारि। तान्यनूद्य त्रिवृत्त्वं विधातुं शक्यते, न तु

त्रिवृन्ति बहून्यहान्यनूद्य तत्र चतुःसंख्या विधीयते ॥ ४ ॥ सि० ॥

तथा चान्यार्थदर्शनम् ॥ ५ ॥

चत्वारि त्रिवृन्ति अहानि अग्निष्टोममुख्यानीति । येषामग्निष्टोमः प्रथमः, इतरेऽनग्निष्टोमाः, त एवमुक्ते प्रतीयन्ते, न ये सर्वे अग्निष्टोमाः । यथा, अयोमुख्यं पिण्डच्छेदनमित्युक्ते न सर्वायसं प्रतीयते। यदि च त्रिवृतोऽभ्यासः स्यात्, सर्वे अग्निष्टोमा भवेयुः । अग्निष्टोमो हि असौ । तस्माद् द्वादशाहिकानां चोदकप्राप्तानामह्नां त्रिवृत्ता विधीयते । एवं नव त्रिवृन्ति अहानि भवन्तीति ॥ ५ ॥ युक्तिः ॥

जनकसप्तरात्रे त्रिवृत्स्वहःसु द्वादशाहधर्मातिदेशाधिकरणम् ॥ २ ॥

कालाभ्यासेऽपि बादरिः कर्मभेदात् ॥ ६ ॥

कचित् कर्म्मविशेषे श्रूयते । षडहा भवन्ति, चत्वारो भवन्ति, पञ्चहा भवन्ति । तत्र सन्देहः । किं द्वादशाहिकानामह्नां प्रवृत्तिः, उत षडहस्येति । किं प्राप्तम् । कालाभ्यासेऽपि बादरिः । षडहकालाभ्यासेऽप्येतस्मिन् श्रूयमाणे बादरिराचार्य्यो द्वादशाहिकानामह्नां प्रवृत्तिं मन्यते स्म । कुतः । कर्म्मभेदात् । षडहशब्देनात्र अहर्मितानि षट्सौत्यानि कर्म्माण्युच्यन्ते । तेषां च षट्कानां भेदो गम्यते। चत्वारः षडहा इति पृथक्त्वनिवेशात् सङ्ख्यायाः । यद्येकस्यैव कर्मषट्कस्य पार्ष्ठिकस्याभिप्लविकस्य वा अभ्यासः कल्प्येत, ततश्चतुःषडहा इति स्यात् । अथ पुनश्चत्वारः षडहा इत्युक्ते चतुर्विंशत्यहानि प्रतीयन्ते,सा अहःसङ्घातचोदना प्रकृतिलिङ्गत्वाद् द्वादशाहिकीमहःप्रवृत्तिं गृह्णाति । तस्मान्नानाह्नां द्वादशाहिकानां प्रवृत्तिः ॥ ६ ॥ पूर्व० ॥

तदावृत्तिं तु जैमिनिरह्नामप्रत्यक्षसङ्ख्यत्वात् ॥ ७ ॥

तदावृत्तिं, पार्ष्ठिकस्यैव प्रज्ञातस्य षडहस्यावृत्तिं जैमिनिराचार्य्यो मेने । कुतः । अह्नामप्रत्यक्षसङ्ख्यत्वात् । चतुर्विंशतिरह्नामप्रत्यक्षा सङ्ख्या अनुमानाद् गम्यते । तस्याश्च षडहचतुष्टयेनैव अनुमानम् । तेन पूर्वं तावत् षडहचतुष्टयमेव प्रत्येति । तत् समाहृत्य चतुर्विंशतिसङ्ख्याम् । यथा, पूर्वं धूमं प्रतिपद्यते, पश्चादग्निम् । यश्च धूमप्रत्ययेनैव कृतार्थो भवति नासौ अग्निप्रत्ययमाद्रियते । इहाऽपि षडहप्रत्ययादेव तत्प्रवृत्तिः प्रसज्ज्यते । तया च कृतार्थः, किं चतुर्विंशतिसङ्ख्यया प्रतीतया करिष्यति । तस्मात् षडहाभ्यासः ॥

अथ यदुक्तं, पृथक्त्वनिवेशिनी सङ्ख्या आवृत्तौ बाध्येतेति । तत्र ब्रूमः । षडह इति प्रज्ञातः षडहः सन्निहितो गृह्यते । तस्य चतुःसङ्ख्यासम्बन्धः साक्षान्नास्तीत्यावृत्त्या भविष्यति । यथा, उपसदां प्रयाजानुयाजानां च । यस्यापि चतुर्विंशतिरात्रश्चत्वारः षडहा इत्येवं चोद्यते, तस्यापि दशरात्रे प्रवर्त्तमाने आवृत्त्यैव सङ्ख्यापूरणम् । भिन्नानां षडहानामभावात् । यश्चोभयोर्दोषो नासावेकं पक्षं निवर्त्तयति ॥ ७ ॥ सिद्धान्तः ॥ षट्त्रिंशद्रात्रे षडहधर्मातिदेशाधिकरणम् ॥ ३ ॥

संस्थागणेषु तदभ्यासः प्रतीयेत कृतलक्षण-ग्रहणात् ॥ ८ ॥

इह संस्थागणा उदाहरणम् । अग्निष्टोमः पञ्चोक्थ्यः, शताग्निष्टोमं भवति, शतातिरात्रं भवतीत्येवमादयः । अत्र चिन्त्यते । किं ज्योतिष्टोमस्यायमभ्यासः, उतैवंसङ्ख्यानां संस्थाविशिष्टानामह्नां वाद इति । किं प्राप्तम् । संस्थागणेषु तदभ्यासः प्रतीयेत । तस्यैव प्राकृतस्य ज्योतिष्टोमस्यायमभ्यासः । कुतः । कृतलक्षणग्रहणात् । तस्यैतत् कृतं लक्षणम् । अग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्र इति तत्संयोगेनैताः संस्था उत्पन्नाः । स ताभिः शक्यते लक्षयितुम् । तञ्च लक्षयित्वा सङ्ख्यां केवलां विधास्यति । नानाह्नां तु वादे संस्था सङ्ख्या चोभयं विधीयते । उक्थ्या संस्था भवन्तीति । ते च पञ्च भवन्तीति । तथा वाक्यम्भिद्यते । तस्माज्ज्योतिष्टोमाभ्यासः ॥ ८ ॥ पूर्व० ॥

अधिकाराद्वा प्रकृतिस्तद्विशिष्टा स्यादभिधानस्य तन्निमित्तत्वात् ॥ ९ ॥

नैतदेवं ज्योतिष्टोमाभ्यास इति । कथं तर्हि । प्रकृतिस्तद्विशिष्टा स्यात् । द्वादशाहिकानि अहानि संस्थाविशिष्टानि स्युः । कस्मात् । अधिकारात् । तान्यत्र चोदकेन अधिकृतानि । एवं चोदकानुग्रहो भविष्यति ॥ ननु प्रत्यक्षविहितो ज्योतिष्टोमोऽग्निष्टोमादिभिः शब्दैः । नेत्याह । कथम् ? । अभिधानस्य तन्निमित्तत्वात् । अग्निष्टोमाभिधानं संस्थानिमित्तं, न ज्योतिष्टोमाभिधायकम् । तत्संस्थं क्रतुं वदितुं शक्नोति, न ज्योतिष्टोममेव । यत्तु अनेकार्थमिति । नानेकार्थं भविष्यति । गणचोदनया प्राप्तानामह्नां पञ्चानां संस्थामात्रं विधास्यते । शताग्निष्टोममित्यपि समास उभयविशेषणविशिष्टं गणमाह ।

स एक एवार्थः। यथा, लोहितोष्णीषा ऋत्विजः प्रचरन्तीति । पृथक्क्-निवेशिनी चैवं सङ्ख्या अनुगृहीता भविष्यति । तस्माद् द्वादशाहिकानां नानाह्नां वादः ॥ ९ ॥ सिद्धान्तः ॥ संस्थागणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् ॥ ४ ॥

गणादुपचयस्तत्प्रकृतित्वात् ॥ १० ॥

शतोक्थ्यं भवति शतातिरात्रं भवतीति श्रूयते । तत्र द्वादशाहिकानि अहानि प्रवर्तन्ते । तानि च प्रायेणोक्थ्यसंस्थानि । द्वौ अग्निष्टोमौ शतोक्थ्यं भवतीत्युक्तेरग्निष्टोमयोरुक्थ्यस्तोत्रोपचयः प्राप्तः । शतातिरात्रं भवतीति सर्वेषु रात्रिपर्य्यायोपचयः । तत्र चिन्त्यते । किं द्वादशाहादुपचयः कर्त्तव्यः, उत ज्योतिष्टोमादिति । किं प्राप्तम् । गणादुपचयः । कुतः । तत्प्रकृतित्वात् । द्वादशाहप्रकृतय एतेऽहर्गणास्तेषु द्वादशाहिको विध्यन्तः प्राप्यते । यदि द्वादशाहादुपचयः, एवं चोदकानुग्रहो भविष्यति । तस्माद् गणादुपचयः ॥ १० ॥ पूर्व० ॥

एकाहाद्वा तेषां समत्वात् स्यात् ॥ ११ ॥

एकाहाद्वा ज्योतिष्टोमादुपचयो, न द्वादशाहात् । कस्मात् । तेषां समत्वात् । द्वादशाहिकानामह्नामितरैर्वैकृतैः समत्वं भवति । तान्यप्यन्यतः संस्थामकाङ्क्षन्ति, इमान्यपि । न च भिक्षुका भिक्षुकादाकाङ्क्षन्ति सत्यन्यस्मिन् प्रसवसमर्थेऽभिक्षुके । किमेतदुक्तं भवति । द्वादशाहे संस्थास्तोत्राण्यनाम्नातानीत्यतो यत्राम्नातानि तत आकाङ्क्षन्ति । वैकृतेष्वहःसु तानि नाम्नातानीति । तस्माद् वैकृतान्यपि अहानि यत्र विहितानि तत एवाकाङ्क्षितुमर्हन्ति । ज्योतिष्टोमे च तान्याम्नातानि । तस्माज्ज्योतिष्टोमादुपचयः ॥ ११ ॥ सिद्धान्तः ॥ शतोक्थ्यादौ ज्योतिष्टोमात् स्तोत्रोपचयाधिकरणम् ॥ ५ ॥

गायत्रीषु प्राकृतीनामवच्छेदः प्रकृत्यधिकारात् सङ्ख्यात्वादग्निष्टोमवद्व्यतिरेकात्तदाख्यत्वम् ॥ १२ ॥

उपचयश्चिन्तितः । अपचय इदानीं चिन्त्यते । इदं श्रूयते । वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति । तत्रेदं समाम्नातं, गायत्रमेतदहर्भवतीति । अत्र विचार्य्यते । किं प्राकृतीनां त्रिष्टुब्जगतीनामक्षरावलोपं कृत्वा गायत्रं तदहः कर्त्तव्यम् ? उतोत्पत्तिगायत्रीणां दाशतयीभ्य आगमं कृत्वेति । अत्र सूत्रेणैवोपक्रमः । गायत्रीषु प्राकृतीना-

अवच्छेदः। गायत्रीषु श्रूयमाणासु गायत्रमेतदर्हं भवतीति, प्राकृतीनां त्रिष्टुब्जगतीनामवच्छेदोऽक्षरावलोपः कर्त्तव्यः । कुतः । प्रकृत्यऽधिकारात् । चोदकेनात्र प्राकृत्यस्त्रिष्टुब्जगत्यः प्राप्ता अधिकृता विद्यन्ते। यद्यन्यासामृचामागमः क्रियेत, प्राकृतः प्रत्ययो बाध्येत॥ ननु प्रत्यक्षश्रुता गायत्र्यः। ताभिश्चोदकप्राप्ता इतरा बाधितव्याः। नेत्याह। कस्मात्। सङ्ख्यात्वात्। अयं गायत्रीशब्दः संख्यावाचकः। कथं ज्ञायते। अव्यतिरेकाच्चतुर्विंशतिसंख्यामेष न व्यभिचरति। न कचिच्चतुर्विंशतिसंख्यया विना दृष्टश्चतुर्विंशतिसंख्याहीनासु त्रिष्टुब्जगतीषु न कदाचिद् भवति । तस्मात् संख्याशब्दोऽयम्। संख्याशब्दश्चेदक्षरावलोपः कर्त्तव्यः। अग्निष्टोमवत् । यथा, शताग्निष्टोमं भवतीत्युक्तं द्वादशाहिकानामह्नामुक्थ्यावलोपः क्रियते। एवमिहापि ॥ १२ ॥ पूर्व० ॥

तन्नित्यवच्च पृथक्सतीषु तद्वचनम् ॥ १३ ॥

तन्नित्यवत् सङ्ख्यामात्रं ब्रुवन्तं गायत्रीशब्दं मत्वा, पृथक्सतीषु पृथग्भूतासु गायत्रीभ्यो जगतीषु अगायत्रीषु तद्वचनं भवति गायत्रीवचनं भवति । ये हि द्वे गायत्र्यौ, सा एका जगतीति । यदि संख्यायां गायत्रीशब्दस्ततो जगत्यां द्वे चतुर्विंशतिसङ्ख्ये इत्येतद्वचनमुपपद्यते। अथ ऋचः, ततो द्वे ऋचौ जगत्यां न स्त इति एतद्वचनमनुपपन्नं स्यात् । तस्मादपि सङ्ख्यायां गायत्रीशब्दः । तथेदमपरं च दर्शनम्। तिस्रोऽनुष्टुभश्चतस्रो गायत्रीः करोतीति ॥ १३ ॥

न विंशतौ दशेतिचेत् ॥ १४ ॥

अथ कश्चिद् ब्रूयाद्, न विंशतौ दशसङ्ख्याऽस्ति। न सङ्ख्या सङ्ख्यान्तरे वर्त्तते। गुणो हि सङ्ख्या। न च गुणा गुणेषु वर्त्तन्ते। एवमष्टाचत्वारिंशत्सङ्ख्यायां चतुर्विंशतिसङ्ख्या नास्ति। तस्मात् सङ्ख्यार्थेऽपि गायत्रीशब्दे एका जगती द्वे गायत्र्यौ इत्येतदनुपपन्नमेव। यश्चोभयोर्दोषो नासावेकस्य वाच्यः॥ १४ ॥ आ० ॥

ऐकसङ्ख्यमेव स्यात् ॥ १५ ॥

अत्रोच्यते। न ब्रूमः, सङ्ख्यायां सङ्ख्या वर्त्तते इति । किं तर्हि । अष्टाचत्वारिंशत्सङ्ख्यापरिच्छिन्नेष्वक्षरेषु अवयवभूते द्वे चतुर्विंशतिसङ्ख्ये, न तु द्वे ऋचौ इति। न च सङ्ख्या सङ्ख्या-

न्तरं निवर्त्तयति। यदि निवर्त्तयेद् एकसङ्ख्यमेव स्यात्। यस्य दश गावस्तस्य द्वौ पञ्चकौ गवामित्येतद्वचनं न स्यात्। भवति च तत्। तस्माद् न संख्या संख्यान्तरं निवर्त्तयति॥

एवं वा। न विंशतौ दशेति चेत्। यद्यपि संख्यायां गायत्रीशब्दः, एवमपि नाक्षरावलोपः कर्त्तव्यः। किं कारणम्। विंशतौ दश विद्यन्ते। किमतः। इदं तावदतः। येन विंशतिरुपात्ता, उपात्तास्तेन दश भवन्ति। एवं येन त्रिष्टुब्जगत्यः प्रयुक्ताः, प्रयुक्तास्तेन तदन्तर्गता गायत्र्यो भवन्ति। तस्मादविकारेण प्रयोगः। एवं चोदकाऽनुग्रहश्च भवति। गायत्रं चाहः कृतं भवति। ऐकसंख्यमेव स्यात्। अत्राह, जगत्यां त्रिष्टुभि चोपात्तायां न गायत्र्य उपात्ता भवन्ति। कथम्। साधनं परिच्छिन्दती संख्या कर्मणि अङ्गीभवति। न जगत्याः, त्रिष्टुभो वा अवयवः साधनम्। किं तर्हि। त्रिष्टुब्जगत्यः॥ अथोच्येत, गायत्रमेतदहर्भवतीतिवचनादवयव एवात्र साधनमिति। तथा सति अक्षरावलोप एव प्राप्नोति। उत्तरस्यावयवस्यानङ्गत्वात्। न च अनङ्गेऽनुपादीयमाने चोदको बाध्यते। तस्माद् यदुक्तं, यद्यपि संख्यायां गायत्रीशब्दः, एवमपि अविकारेण प्रयोग इति। एतदयुक्तम्। दर्शयति। न चोत्तरस्यां संख्यायामुपात्तायां पूर्वाः संख्या उपात्ता भवन्तीति। यदयमेका च दश च शतं च सहस्रं च परार्द्धं चेति सर्वसंख्या अनुक्रामति। यदि चोत्तरस्यां संख्यायामुपात्तायां पूर्वाः संख्या उपात्ता भवन्ति ऐकसंख्यमेव स्यात्। एकैवापरार्द्धसंख्या भवेत्। सा हि सर्वाभ्य उत्तरा। यतस्तु एकाद्या अपि अनुक्रान्ताः। अतो विज्ञायते, न उत्तरस्यां संख्यायामुपात्तायां पूर्वाः संख्या उपात्ता भवन्तीति॥ १५॥ आ० नि०॥

गुणाद्वा द्रव्यशब्दः स्यादसर्वविषयत्वात्॥ १६॥

नैतदेवं, संख्यायां गायत्रीशब्द इति। कथं तर्हि। गुणाद् द्रव्यशब्दः स्यात्। चतुर्विंशत्यक्षरयुक्तस्य द्रव्यस्य वाचकः। कस्मात्। असर्वविषयत्वात्। यदि संख्याशब्दः स्यात् सर्वस्मिंश्चतुर्विंशतिसंख्यासंख्येये वर्त्तेत गोयूथादौ। न च वर्त्तते। तस्मान्न संख्याशब्दः॥ १६॥ सि०॥

गोत्ववच्च समन्वयः॥ १७॥

यथा, गौरिति सत्यपि गमननिमित्ते सामान्यद्रव्याऽभिधाने सास्नादिमत्येव समन्वयो,नान्यत्रेति तद्वचन एव गोशब्दो विज्ञायते। एवमयमपि ऋग्वचन एव विज्ञातुं न्याय्यः ॥ १७ ॥

संख्यायाश्च शब्दवत्त्वात् ॥ १८ ॥

चतुर्विंशतिसंख्यावाचकः शब्दोऽस्ति, चतुर्विंशतिरिति । न अस्यापरेण गायत्रीशब्देन अर्थः । संज्ञाया व्यवहारार्थत्वादेकेन व्यवहारसिद्धेः ॥ १८ ॥

इतरस्याश्रुतित्वाच्च ॥ १९ ॥

इतरस्य ऋग्द्रव्यस्याश्रुतित्वाद् । अशब्दत्वादित्यर्थः । तस्याऽपि व्यवहारार्थेन संज्ञाशब्देन प्रयोजनम् । तत्रायं गायत्रीशब्दोऽर्थवान् भवति। संख्यायां निष्प्रयोजनः । तस्मादपि ऋक्शब्दो न्याय्यः अतो गायत्रीणाम् ऋचामागमः कर्त्तव्य इति ॥ १९ ॥ युक्तिः ॥

द्रव्यान्तरे निवेशादुक्थ्यलोपैर्विशिष्टं स्यात्॥ २० ॥

यदुपवर्णितम्, अग्निष्टोमवदिति । तत्र ब्रूमः । अग्निष्टोमशब्दस्य द्रव्यान्तरे कस्मिंश्चिन्निवेशो नास्ति । यथा गायत्रीशब्द ऋग्द्रव्ये । अयं हि केवलाग्निष्टोमान्ततां ब्रूते । न चोक्थ्यलोपमन्तरेण, द्वादशाहिकानामह्नामग्निष्टोमान्तता भवतीति अवश्यकार्य्य उक्थ्यलोपः । अयं पुनर्गायत्रीशब्द ऋग्द्रव्यस्य वाचक इत्युक्तम् । न च अक्षरावलोपेन तद् ऋग्द्रव्यं प्राप्यते । तस्माद्विषमोऽयमुपन्यास इति ॥ २० ॥ पूर्वपक्षयुक्तिनिरासः ॥

अशास्त्रलक्षणत्वाच्च ॥ २१ ॥

अशास्त्रलक्षणानि चोक्थस्तोत्राणि शताग्निष्टोमे, तानि शास्त्रलक्षणया अग्निष्टोमान्ततया बाध्यन्ते । इह पुनर्विपरीतं, शास्त्रलक्षणा गायत्र्यः, आनुमानिक्यस्त्रिष्टुब्जगत्यः । ता न शक्नुवन्ति गायत्रीं बाधितुम् ॥ २१ ॥ युक्तिः ॥

उत्पत्तिनामधेयत्वाद् भक्त्या पृथक्सतीषु स्यात् ॥२२॥

अथ यदुक्तं, संख्यायां गायत्रीशब्दो दृष्टः । ये हि द्वे गायत्र्यौ, सैका जगतीति । तस्य कः परिहारः । उच्यते । औत्पत्तिकमेतद् ऋचो नामधेयमित्युक्तम् । अत उत्पत्तिनामधेयत्वाद् योऽयं जगत्यवयवे चतुर्विंशत्यक्षरे पदसञ्चये प्रयोगः, स भक्त्या विज्ञेयः । न

हि एकस्य शब्दस्यानेकार्थता सत्यां गतौ न्याय्या । कया पुनर्भक्त्या ? परिमाणसामान्यात् । यत् परिमाणं द्वयोर्गायत्र्योः तदेकस्या जगत्याः । अत एतदुक्तम् । ये हि द्वे गायत्र्यौ, सा एका जगतीति । यथा, यौ द्वौ कौरवौ स एको वाहीक इति । एतच्च गायत्रीद्वयप्रशंसार्थं वचनम् । कथम् । इदं श्रूयते, द्वाभ्यां गायत्रीभ्यां वैश्यस्येति । तदेतदयुक्तमिवोच्यते । जगत्या वैश्यस्य कार्य्यम् । जागतो हि वैश्यः । तदेतद् द्वाभ्यां गायत्रीभ्यां क्रियते । जगत्यैव तत् कृतं भवति । ये हि द्वे गायत्र्यौ सा एका जगतीति । तस्मादहेतुरयं सङ्ख्यार्थत्वे गायत्रीशब्दस्य ॥ २२ ॥ पूर्वपक्षयुक्तिनिरासः ॥

वचनमितिचेत् ॥ २३ ॥

शक्यं तावत् तत्रैतद् वक्तुं, यत्रानुवादो गायत्रीशब्दः । यत्र तु विधिस्तत्र कथम् । यथा, तिस्रोऽनुष्टुभः, चतस्रो गायत्रीः करोति इति । कः पुनर्विधौ विशेषः । विधौ शब्दार्थेन व्यवहारो भवति । तिस्रोऽनुष्टुभश्चतस्रो गायत्र्यो न शक्याः कर्त्तुम् । शक्यास्तु चतस्रश्चतुर्विंशतयः । तस्मात् तत्र संख्यायां गायत्रीशब्द इति ॥२३॥ आ०

अथ ब्रूमः—

यावदुक्तम् ॥ २४ ॥

इहैवैकत्र संख्यार्थो, नान्यत्र । क्वचिद्दर्शनात् । आह । यद्येवं न सङ्ख्यावचनः, कथमिह सङ्ख्यार्थो जातः ? इति । उच्यते । लक्षणयाऽपि विधानं भवति । यथा लोके, अमी पिष्टपिण्डाः सिंहाः क्रियन्तामिति । वेदेऽपि, पृष्ठैरुपतिष्ठन्ते इति । न च तत्र सिंहशब्दः प्रतिकृतिवचनो दृष्ट इति । अन्यत्रापि प्रतिकृतिवचनो विज्ञायते । पृष्ठशब्दो वा मन्त्रवचनः । न च लक्षणया प्रयोगे अशब्दार्थः परिच्छिद्यते । यत् कारणं, स्वार्थे एव वर्त्तमानोऽर्थान्तरं लक्षयति । स्वार्थं जहद् नैव लक्षयेत् । तस्मादयमपि अहेतुः ॥ २४ ॥ आ० नि० ॥

अपूर्वे च विकल्पः स्याद्यदि संख्याविधानम् ॥ २५ ॥

अपूर्वे च दर्शपूर्णमासकर्मणि विकल्पः स्याद्, यदि संख्यायां गायत्रीशब्दः । तत्र हि श्रूयते, गायत्र्या परिदध्यादिति । एवं श्रुते आज्ुहोतायाश्चतुर्विंशत्यक्षरस्य पदसञ्चयस्य च विकल्पः स्यात् । विकल्पे पक्षे आजुहोताया बाधः । स चायुक्तः सत्यां गतौ ।

तस्मादपि नैतत् संख्याविधानम् ॥ २५ ॥ युक्तिः ॥

ऋग्गुणत्वान्नेतिचेत् ॥ २६ ॥

अत्रोच्यते। न प्रकृतौ विकल्पो भविष्यति। कुतः। ऋग्गुणत्वात्। ऋग्गुणो हि तत्र प्रयोगोऽङ्गीकृतः। ऋचस्तस्य सामिधेन्य आम्नाताः। यदि अनृचा परिदधीत, ऋग्गुणत्वं बाध्येत। तस्मात् तत्र आजुहोतयैव परिधास्यति। तथा सति गायत्र्या परिहितं भविष्यति। ऋग्गुणत्वं चोपगृहीतम् ॥ २६ ॥ आ० ॥

तथा पूर्ववति स्यात् ॥ २७ ॥

पूर्ववति अपि बृहस्पतिसवे तथा स्याद् यथा अपूर्वे। अत्रापि ऋग्गुणकः प्रयोगोऽङ्गीकृतश्चोदकेन। तत्रापि ऋक्षु उपादीयमानासु गायत्रं चैव अहः कृतं भवति। ऋग्गुणकत्वं च न बाधितम्। तस्मान्नाक्षरावलोपः ॥ २७ ॥ आ० नि० ॥

गुणावेशश्च सर्वत्र ॥ २८ ॥

तुशब्दस्य स्थाने चशब्दः। दृष्टश्च तुशब्दस्यार्थे चशब्दः। यथा, किञ्चेह भवतीति। गुणस्य चतुर्विंशतिसंख्यायाः सर्वत्रावेशः कृत्स्नायामाजुहोतायां, नावयवे। अतस्तस्यामुपादीयमानायाम् ऋग्गुणत्वं चोपगृहीतं भवति, संख्या च। बृहस्पतिसवे पुनर्या ऋचश्चोदकेन अङ्गीकृताः, तासामवयवे चतुर्विंशतिसंख्या निविष्टा। तस्मिन्नुपादीयमाने ऋग्गुणत्वमनुपात्तं भवति। प्रकृतिगायत्रीषु तूपात्तं भवति। तस्मान्न संख्याभिधाने गायत्रीशब्दे प्रकृतिगायत्रीणामागमः प्राप्नोति ॥

अपर आह। इदं तावदयं संख्यावादी प्रष्टव्यः। कस्मादक्षरगतायामेव संख्यायां भवानवस्थितो, न पुनरन्यसंख्येयगतायामपि। ग्रहगतायां चमसगतायां वा ?। यावताऽविशेषेण श्रुतं, गायत्रमेतदहर्भवतीति। एवं सति सर्वत्र गुणावेशः प्राप्नोति ॥ २८ ॥ युक्तिः ॥

निष्पन्नग्रहणान्नेतिचेत् ॥ २९ ॥

स चेद् ब्रूयाद्, यत्रायं निष्पन्नो, गायत्रीशब्दः प्रसिद्ध इत्यर्थः। तस्य ग्रहणं न्याय्यम्। अयं च अक्षरगतायामेव संख्यायां प्रसिद्धो न सर्वत्र। तस्मान्न सर्वसंख्येयगतो गृह्यते इति ॥ २९ ॥ आ० ॥

स वक्तव्यः—

तथेहापि स्यात् ॥ ३० ॥

यथा अक्षरगतायामेव संख्यायां दृष्टो, नान्यत्र । एवम् ऋक्षु एव दृष्टो, नान्यस्मिँश्चतुर्विंशत्यक्षरे गद्ये वा । यथा चाऽक्षरेष्वेव दृष्ट इति नानक्षरे विज्ञायते । एवम् ऋक्षु दृष्ट इति नानृक्षु विज्ञातुं न्याय्यः ॥ अत्राह । यद्यप्ययम् ऋक्षु गायत्रीशब्दः, एवमप्यक्षरावलोपः कार्य्यः । किङ्कारणम् । प्रकृत्युपबन्धनात् । चोदकेनात्र प्राकृत्यस्त्रिष्टुब्जगत्यः प्रापिताः । ता इमा नोज्झिता भविष्यन्ति । गायत्रीशब्दश्च सङ्ख्यासामान्यात् शक्नोति तदवयवान् वक्तुम् । एवमुभौ विधी अनुगृहीतौ भविष्यतः– प्राकृतो वैकृतश्चेति ॥ ३० ॥

अत उत्तरं पठति—

यदि वाऽविशये नियमः प्रकृत्युपबन्धाच्छरेष्वपि प्रसिद्धः स्यात् ॥ ३१ ॥

यदि अविशये अशंसयेऽपि गायत्रीषु विहितासु प्रकृत्युपबन्धनाद्गायत्र्यां गायत्रीशब्दः कल्प्यते, शरेष्वपि, शरमयं बर्हिर्भवतीति कुशेषु शरशब्दः कल्पयितव्यः । कौशमेव बर्हिः कार्य्यम् । वक्तव्यो वा विशेषः ॥ ३१ ॥ आ० नि० ॥

दृष्टः प्रयोग इतिचेत् ॥ ३२ ॥

अयं विशेषो दृष्टः । चतुर्विंशतिसंख्यायामक्षरगतायां गायत्रीशब्दस्य प्रयोगः । ये द्वे गायत्र्यौ सैका जगतीति । तेन शक्यते कल्पयितुम् ॥ ३२ ॥ आ० ॥

तथा शरेष्वपि ॥ ३३ ॥

शरशब्दस्यापि कुशेषु प्रयोगो दृश्यते, शरवणमेवेदं कुशवनमिति ॥ ३३ ॥ आ० नि० ॥

भक्त्येति चेत् ॥ ३४ ॥

अत्रोच्यते । स तत्र शरशब्दो भाक्तः प्रयुज्यते । दीर्घत्वात् पृथुपत्रत्वात् सादृश्यवादोऽसौ, शरवणमेवेदं कुशवनमिति स्वार्थे वर्त्तमानः सादृश्यं गमयति । स्वार्थं जहत् कथं गमयेत् । तस्माच्छरेष्वेव तत्र शरशब्दस्य प्रयोगो, न कुशेष्विति ॥ ३४ ॥ आ० ॥

तथेतरस्मिन् ॥ ३५ ॥

तथेतरस्मिन्नपि ये द्वे गायत्र्यौ सैका जगतीति भाक्तएव गायत्रीशब्द इत्युक्तम् । सोऽपि स्वार्थ एव वर्त्तमानस्तत्सदृशं गमयतीति ऋक्ष्वेव प्रयुक्तो, न संख्यायाम् । तस्मान्न संख्यायां गायत्रीशब्दः । अतो नाक्षरावलोपः कर्त्तव्यः ॥ ३५ ॥ आ० नि० ॥

अर्थस्य चासमाप्तत्वान्न तासामेकदेशो स्यात् ॥ ३६ ॥

अपि च त्रिष्टुब्जगतीनामेकदेशो वाक्यमपरिसमाप्तं भवति । न ह्यपरिसमाप्तेन वाक्येन अर्थः कश्चिदभिधीयते । अर्थाभिधानार्थश्च मन्त्रप्रयोगः । तत्र मन्त्रप्रयोग एव अनर्थकः स्यात् । तस्मान्न तासां त्रिष्टुब्जगतीनामेकदेशो गायत्रीशब्दः स्यात् । तस्मादुत्पत्तिगायत्रीणामेव दाशतयीभ्य आगमः कर्त्तव्य इति ॥ ३६ ॥ युक्तिः ॥ गायत्रमेतदहर्भवतीत्यादावुत्पत्तिगायत्रीणामागमाधिकरणम् ॥ ५ ॥ इति श्रीभट्टशबरस्वामिनः कृतौ मीमांसाभाष्येऽष्टमस्य अध्यायस्य तृतीयः पादः समाप्तः ॥ ८ ॥ ३ ॥

अथ अष्टमस्य अध्यायस्य चतुर्थः पादः ॥ ८ ॥ ४ ॥

दर्विहोमो यज्ञाभिधानं होमसंयोगात् ॥ १ ॥

यदेकया जुहुयात्, दर्विहोमं कुर्य्यादिति श्रूयते । अस्मिन् दर्विहोमशब्दे भवति संशयः । किं गुणविधिः, उत कर्म्मनामधेयम् ? इति । किं प्राप्तम् । दर्विहोमो यज्ञाभिधानं, कर्म्मनामधेयमित्यर्थः । कुतः । होमसंयोगात् । होमशब्दोऽत्र श्रूयते । तत्प्रधानश्चायं समासः । दर्विशब्द उपसर्जनं, होमश्च कर्म्म । अथवा जुहुयादिति कर्मोच्यते । तेन समुच्चितो यदेकया जुहुयादिति । तस्मात् कर्मनामधेयं स्थितं तावत् । ततोऽर्थान्तरं प्रक्रियते ॥ १ ॥ दर्विहोमशब्दस्य कर्मनामधेयताधिकरणम् ॥ १ ॥

स लौकिकानां स्यात् कर्त्तुस्तदाख्यत्वात् ॥ २ ॥

यदा कर्मनामधेयं, तदा चिन्त्यते, किं लौकिकानां स्मार्त्तानां कर्मणामष्टकादीनां नामधेयं दर्विहोमशब्दः?उत सर्वेषामेव लौकिकानां वैदिकानाञ्चेति । किं प्राप्तम् । स लौकिकानां स्यात् । स खलु दर्विहोमशब्दो लौकिकानां कर्मणां नामधेयं स्यात् । कुतः । कर्त्तुस्तदाख्यत्वात् । तेषां कर्त्ता, तेन दर्विहोमशब्देन समाख्यायते ।

शिनीनां दार्विहोमिको ब्राह्मणः,अम्बष्ठानां दार्विहोमिको ब्राह्मण इति । यश्च यत् करोति स तेन आख्यायते । यथा, लावकः, पावक इति । यदि चाष्टकादीनां नामधेयमेतत्, ततस्तेषां कर्मणां कर्त्ता दार्विहोमिकसमाख्यामर्हतीति । तस्माल्लौकिकानां नामधेयम् ॥२॥ पूर्व० ॥

सर्वेषां वा दर्शनाद्वास्तुहोमे ॥ ३ ॥

सर्वेषां लौकिकानां वैदिकानाञ्च नामधेयमेतत् । न लौकिकानामेव । कस्मात्। दर्शनाद् वास्तुहोमे।वास्तुहोमे हि वैदिके दर्विहोमत्वं दर्शयति । यदेकया जुहुयाद् दर्विहोमं कुर्य्यात् । पुरोऽनुवाक्यामनूच्य याज्यया जुहोति सदेवतत्वायेति ॥ ननु विपरीतमेतद्दर्शनं, यदेकया जुहुयाद् दर्विहोमं कुर्य्यात् । अदर्विहोमं सन्तमित्यापद्यते । यदि दर्विहोम एवासौ, तत एकया द्वाभ्यां च हूयमानो दर्विहोम एव भवति । तत्रैतद्दर्शनं नोपपद्यते । यदेकया जुहुयाद् दर्विहोमं कुर्य्यादिति ॥ अत्रोच्यते । यदि लौकिकानामेव नामधेयं, न वैदिकानाम् । तत एकयापि हूयमानोऽसौ नैव दर्विहोमो भवति । अलौकिकत्वात् तत्रैतद्वचनं नोपपद्यते । यदेकया जुहुयाद् दर्विहोमं कुर्य्यादिति । तस्माज्ज्ञापकमेवेदं वैदिकानां दार्विहोमत्वे । एवमपि ज्ञापकमुक्तम् । कुतः प्राप्तिः ? । उच्यते । होमशब्दस्य सामान्याभिधायित्वात् प्राप्तिः।तस्माल्लौकिकवैदिकानां नामधेयमेतत्॥३॥ सिद्धान्तः ॥ दर्विहोमशब्दस्य लौकिकवैदिकोभयकर्मनामधेयताधिकरणम् ॥ २ ॥

जुहोतिचोदनानां वा तत्संयोगात् ॥ ४ ॥

लौकिकानां वैदिकानाञ्च नामधेयं दर्विहोमशब्द इति स्थितम् । इदानीं चिन्त्यते । किं यजतिचोदनानां जुहोतिचोदनानाञ्च सर्वेषां नामधेयम्, उत जुहोतिचोदनानामेवेति । अविशेषात् सर्वेषामिति प्राप्ते, उच्यते । जुहोतीनां नामधेयं, न यजतीनाम् । कुतः । तत्संयोगात् । होमशब्दसंयोगात् । अयं होमशब्दो जुहोतेर्वाचको, न यजतेः । यजतौ लक्षणया स्यात् । तस्माज्जुहोतिनामधेयम् ॥ ४ ॥ दर्विहोमशब्दस्य होमनामधेयताधिकरणम् ॥ ३ ॥

द्रव्योपदेशाद्वा गुणाभिधानं स्यात् ॥ ५ ॥

स्थितादुत्तरमुच्यते, यदुक्तं कर्मनामधेयं दर्विहोम इति । तन्न । किं तर्हि । गुणाभिधानं स्यात् । गुणविधिरित्यर्थः । कुतः । द्रव्योप-

देशात्। द्रव्योपदेशोऽवगम्यते, दर्व्या होमो दर्विहोम इति। एवमेतौ दर्विहोमशब्दौ यथाप्रसिद्धिकल्पितौ भविष्यतः। तस्माद् गुणविधिः ॥ ५ ॥ पूर्व० ॥

न लौकिकानामाचारग्रहणत्वाच्छन्दवतां चान्यार्थविधानात् ॥ ६ ॥

नायं गुणविधिर्युज्यते। किं कारणम्। लौकिकानां तावदाचारगृहीता दर्विः। त्वग्बिलया मूलदण्डया दर्व्या जुहोतीति। सा न विधातव्या। श्रौतानामप्यन्यानि होमार्थानि पात्राण्याम्नातानि। स्रुवेण जुहोति, चमसेन जुहोतीति। तैः सह दर्वेर्विकल्पः स्यात्। स चान्याय्यः। यत्कारणं स्रुवादीनां विधायकः शब्दोऽस्ति। स्रुवेण जुहोतीति। न तु दर्वेः। तत्र हि आनुमानिको विधिशब्दः॥६॥ सि०॥

दर्शनाच्चान्यपात्रस्य ॥ ७ ॥

अन्यच्च पात्रं दर्विहोमे दृश्यते। भूतेभ्यस्त्वेत्यपूर्वां स्रुवमुद्गृह्णातीति। तस्मान्न गुणविधिः ॥ ७ ॥ युक्तिः ॥

तथाग्निहविषोः ॥ ८ ॥

अथोच्येत, अग्निहविषोः कार्य्ये दर्विर्भविष्यति। दर्वौ होमो दर्विहोमो, दर्व्या होमो दर्विहोम इति। तत्र ब्रूमः। तथाग्निहविषोरपि। यथा पात्रकार्य्ये दर्विर्न युज्यते, तथाग्निहविषोः कार्य्येऽपि। तत्राप्याहवनीय आधारत्वेन विहितः। यद् आहवनीये जुहोतीति। अन्यच्च प्रदेयत्वेन पुरोडाशादि। तस्मादग्निहविषोरपि कार्य्ये न दर्वेर्निवेशः ॥ ८ ॥ आ० नि० ॥

उक्तश्चार्थसम्बन्धः ॥ ९ ॥

उक्तं चास्माभिरग्नेः कार्य्येऽन्यद् द्रव्यमसमर्थम्। दहनपठनप्रकाशनकर्म अग्नेः। न चैतत् कार्य्यमन्यद् द्रव्यं शक्नोति कर्तुमिति। तस्मान्नाग्निकार्य्ये दर्वेरुपदेशः। अतो न गुणविधिः। कर्मनामधेयमेव दर्विहोमशब्द इति ॥ ९ ॥ युक्तिः ॥ दर्विहोमशब्दस्य गुणविधिपरत्वनिराकरणाधिकरणम् ॥ ४ ॥

दर्विहोमशब्दः कर्मनामधेयमित्युक्तम्। तत्र चिन्त्यते। किमपूर्वा दार्विहोमाः, उत कुतश्चिद्धर्मग्राहिण इति। किं प्राप्तम्। नापूर्वा इति। कुतः। इतिकर्त्तव्यताऽविधेः। अविहितेतिकर्त्तव्यताकं कर्म

विहितेतिकर्त्तव्यताकाद् धर्मान् गृह्णातीत्युक्तम्। अविहितेतिकर्त्तव्यताकाङ्क्षी । तस्मात् पूर्ववन्त इति । यद्येतदेवं, तदेतदापतति । किं पूर्वाः ? इति । अत्रोच्यते—

तस्मिन् सोमः प्रवर्त्तेताव्यक्तत्वात् ॥ १० ॥

तस्मिन् खलु दर्विहोमे सोमः प्रवर्त्तेत । सौमिको विध्यन्तः स्यात् । कुतः । अव्यक्तत्वात् । अव्यक्तचोदनः सोमः । अमी अपिच अव्यक्तचोदनाः । भिन्ने जुहोतीति । अतश्चोदनासामान्यात् सौमिको विध्यन्त इति ॥ १० ॥ पूर्व० ॥

न वा स्वाहाकारेण संयोगाद्वषट्कारस्य च निर्देशात्तन्त्रे तेन विप्रतिषेधात् ॥११॥

वाशब्दः पक्षं व्यावर्त्तयति । नात्र सौमिको विध्यन्तो न्याय्यः । किं कारणम् । स्वाहाकारेण संयोगात् । स्वाहाकारेण संयुक्ता दर्विहोमाः । पृथिव्यै स्वाहा अन्तरिक्षाय स्वाहेति । किमतः । वषट्कारस्य निर्देशात्तन्त्रे तेन च विप्रतिषेधः । तन्त्रे च सौमिके वषट्कारो निर्दिष्टः । तेनास्य विप्रतिषेधः । उभयोः प्रदानार्थत्वात् । यदि सौमिको विध्यन्तः, ततो वषट्कारेण भवितव्यम् । तत्रैतत् स्वाहाकाराम्नानमनर्थकं स्यात् । अथ विकल्पः क्रियते, तथाप्युभयोः पक्षे बाधः । अथ त्वपूर्वा दर्विहोमाः, नैषविरोधो भविष्यति।तस्मादपूर्वाः॥११॥ सि०

शब्दान्तरत्वात् ॥ १२ ॥

शब्दान्तरं च यजतिशब्दाज्जुहोतिशब्दः।यजतिचोदनश्च सोमः। दर्विहोमाः पुनर्जुहोतिचोदनाः । चोदनासामान्येन च धर्मप्राप्तिरिष्यते । तस्मादप्ययुक्ता सौमिकी धर्मप्राप्तिः । नन्वव्यक्तत्वाच्चोदनासामान्यमुक्तम् । अत्रोच्यते । सामान्येऽव्यक्तत्वे, यजतिशब्दो विशेषलिङ्गम् । तेन यजिमतीष्वव्यक्तासु धर्मनियमः । यथा समाने औषधगुणत्वे देवतैकत्वेन विशेषलिङ्गेन सौर्य्यकर्मणि आग्नेयविध्यन्त इति ॥ १२ ॥

लिङ्गदर्शनाच्च ॥ १३ ॥

लिङ्गदर्शनाच्चैतद्विज्ञायते, नात्र सौमिको विध्यन्त इति । औदुम्बरीहोमे हि स्वाहाकारं विधाय आज्यविधिपरे वाक्ये दर्शयति । घृतेन द्यावापृथिवी आपृणेत्यन्तरा श्रृणा जुहोति।आ मूलाद् भवस्था-

वयति । भूमिगते स्वाहा करोतीति । यद्यत्र सौमिको विध्यन्तः स्याद् वषट्कारस्ततो भवेद्, न स्वाहाकारः ॥ १३ ॥ हेतुः ॥

उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यं तत्राविप्रतिषिद्धा पुनः प्रवृत्तिर्लिङ्गदर्शनात् पशुवत् ॥१४॥

लिङ्गदर्शनस्य परिहार उच्यते। यदुक्तम्। औदुम्बरीहोमे सिद्धवत् स्वाहाकारस्य दर्शनान्न सौमिको विध्यन्त इति । अत्र ब्रूमः । उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यम् । तद् यथा, साप्तदश्यमनारभ्याधीतं सप्तदश सामिधेनीरन्वाहेति । अनारभ्यवादानां प्रकृत्यर्थत्वाद्दर्शपूर्णमासावगतम् । ततः प्राकरणिकेन पाञ्चदश्येन बाधितंसद् विकृत्यर्थं जातमेवमयं स्वाहाकारोऽनारभ्याधीतः । स्वाहाकारेण वषट्कारेण वा देवेभ्यो हविः प्रदीयते इति । तेनैव न्यायेन प्रकृतिं निर्विविक्षुः सोमं दर्शपूर्णमासौ च । ततस्तथैव वषट्कारेणोपरुद्धः । तद्वर्जमन्यानि प्रदानान्युपसंक्रामति । तत्र अविप्रतिषिद्धा सोमधर्म्मप्रवृत्तिः । पशुवत् । तद्यथा पशौ साप्तदश्ये श्रूयमाणे न दार्शपौर्णमासिकी तत्र प्रवृत्तिर्विप्रतिषिद्ध्यते । वाचनिकत्वात् साप्तदशस्य । एवमिहापि वाचनिकत्वात्, स्वाहाकारं प्रति लिङ्गदर्शनान्न सौमिकधर्म्मप्रवृत्तिर्विप्रतिषिद्ध्यते । पुनःशब्दश्चानर्थकः । यथा किं पुनरिदमिति ॥ १४ ॥ आ० ॥

अनुत्तरार्थो वाऽर्थवत्त्वादानर्थक्याद्धि प्राकृतस्योपरोधः स्यात् ॥ १५ ॥

यदुक्तम्, उत्तरार्थः स्वाहाकार इति । तन्न। कुतः। अनुत्तरार्थः । अर्थवत्त्वात् । प्रकृतौ एवास्यार्थवत्त्वं नारिष्टहोमेषु । पार्वणहोमयोश्च पूर्णमासाय सुराधसे स्वाहा इति । अनर्थकत्वाद्धि प्राकृतस्योपरोधः स्यात् । यदि प्रकृतौ अनर्थकः स्यात् स्वाहाकारः, ततः प्राकृतस्य वषट्कारस्य विकृतौ प्राप्तस्यानारभ्यवादेन स्यादुपरोधः, वषट्कारबाध इत्यर्थः । न त्वस्यानर्थक्यम् । तस्मान्नोत्तरार्थः । न चेदुत्तरार्थः, लिङ्गमेवैतद् भवति । असोमपूर्वत्वे दर्विहोमानां, भूमिगते स्वाहा करोतीति ॥ १५ ॥ आ० नि० ॥

न प्रकृतावपीतिचेत् ॥ १६ ॥

एवं चेत् पश्यसि, नारिष्टहोमेषु पार्वणहोमयोश्च स्वाहाकारस्य

निवेश इति । प्रकृतौ अपि नारिष्टहोमादौ नास्य निवेशो घटते । तत्रापि वषट्कार एव प्राप्नोति । स हि अविशेषेण दर्शपूर्णमासयोर्विहितः । द्व्यक्षरो वषट्कार एष वै प्रजापतिः सप्तदशो यज्ञे अन्वायत्त इति । ननु स्वाहाकारोऽपि प्रत्यक्षं पठितः । सत्यं पठितः । वषट्कारस्तु विहितः । अतश्चोदना इति । नास्य यज्ञो व्यथते प्रजापतौ यज्ञेन प्रतितिष्ठतीति स्वाहाकारं पाठेन प्राप्तं बाधते । पाठे हि आनुमानिको विधिः प्रत्यक्षेण विधिना बाध्यते । न चेत् तत्रापि निवेशः, उत्तरार्थ एव स्वाहाकारो भवति विकृत्यर्थः ॥ १६ ॥ आ० ॥

उक्तं समवाये पारदौर्बल्यम् ॥ १७ ॥

अत्राह । नैतद् युक्तं, वषट्कारेण स्वाहाकारो बाध्यते इति । कुतः । यत उक्तं श्रुत्यादीनां समवाये परस्य दुर्बलत्वम् । इह च वाक्यप्रकरणयोः सन्निपातः । प्रकरणेन वषट्कारः प्राप्नोति । नारिष्टहोमेषु तन्मन्त्रपदैरेकवाक्यत्वात् स्वाहाकारः । वाक्यं च प्रकरणाद् बलीयः ! ननु स्वाहाकारस्योपरिष्टात् प्रदानार्थो वषट्कारः प्रयोक्ष्यते । न खलु स्वाहाकारेणैव प्रदानं निर्वर्त्तितम् । कथमविहितः प्रदानार्थं स्वाहाकारः प्रदानार्थं निर्वर्त्तयिष्यति ? विहितश्च कथं स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयते ? इति ॥ ननूभयोः स्वाहाकारवषट्कारयोःप्रकृतावाम्नानादनारभ्य वादस्यानर्थक्यम् । अत उच्यते, प्रदानार्थतामनयोर्विधास्यति । तस्माच्च सोमप्रकृतयो दर्विहोमाः ॥ १७ ॥ आ० नि० ॥

तच्चोदना वेष्टेः प्रवृत्तित्वाद्विधिः स्यात् ॥ १८ ॥

वाशब्दः पक्षान्तरपरिग्रहे । तच्चोदना वा । तदित्यनेन दर्विहोमाः प्रतिनिर्दिश्यन्ते । जुहोतिचोदना ये दर्शपूर्णमासयोरङ्गकर्म्मविशेषास्ते दर्विहोमेषु प्रवर्त्तेरन् । के पुनस्ते । नारिष्टहोमाः । कस्मात् कारणात् । ते हि प्रवृत्तधर्माणः, सर्वेष्टिषु सर्वपशुबन्धेषु प्रवर्त्तमाना दृष्टाः । यस्य च यो धर्मः प्रायेण दृष्टः, स तस्यादृश्यमानोऽप्यनुमीयते । यथा यः परार्थान् प्रायेण करोति, अन्यस्मिन्नपि परार्थकरणे स एव सम्भाव्यते । तस्मात् तेषां प्रवृत्तिः ॥ १८ ॥ पूर्व० ॥

शब्दसामर्थ्याच्च ॥ १९ ॥

शब्दसामर्थ्यं च । चोदनासामान्यं दर्विहोमानां, नारिष्टहोमेऽपि

हि जुहोतिचोदना । नारिष्टाञ्जुहोति, भिन्ने जुहोतीति । चोदना-सामान्याद्धर्मप्राप्तिः ॥ १९ ॥

लिङ्गदर्शनाच्च ॥ २० ॥

लिङ्गं चैतमर्थं दर्शयति । यथा नारिष्टहोमपूर्वत्वं दर्विहोमाना-मिति । किं लिङ्गं भवति । अग्निहोत्रे श्रूयते, यदि कीटोऽवपद्येता-न्तःपरिधि निनयेदिति । तथा अग्नौ श्रूयते,अन्तर्वेदि तिष्ठन् सावित्रा-णि जुहोतीति । परिधयो वेदिश्चाङ्गप्रधानार्थत्वान्नारिष्टहोमाङ्गम् । यदि तेषां धर्माः प्रवर्त्तेरन्, तत एतद्दर्शनमुपपद्यते । तस्मात् तेषां प्रवृत्तिः ॥ २० ॥ हेतुः ॥

तत्राभावस्य हेतुत्वाद् गुणार्थे स्याददर्शनम् ॥ २१ ॥

यदेतद् गुणार्थे नारिष्टहोमार्थे दर्शनमुपदिष्टं, नारिष्टहोमानां प्रवृत्तावित्यर्थः । अदर्शनं तद्, असाधकमित्यर्थः । कुतः । तत्राभावस्य हेतुत्वात् । त्र्यम्बकेषु अप्रतिष्ठिता वै त्र्यम्बका इत्याहुः । नेध्मा बर्हिः संनह्यते,न प्रयाजा इज्यन्ते,नानुयाजा इज्यन्ते,न सामिधेनीरन्वाहेति अप्रतिष्ठितत्वं त्र्यम्बकाणां प्रतिज्ञाय तदुपपादनार्थमिध्मादीनामभावो हेतुत्वेनोपदिश्यते । यदि च नारिष्टहोमाः प्रवर्त्तेरन्, ततोऽङ्गप्रधाना-ऽर्थत्वादिध्माबर्हिषोः सामिधेनीनां च त्र्यम्बकेषु भाव एव स्यात् । तत्रायं तदभावोऽसत्त्वाद् हेतुत्वेन न युज्यते । तस्मान्नारिष्टहोमाना-मप्रवृत्तिः ॥ २१ ॥ उत्तरम् ॥

विधिरितिचेत् ॥ २२ ॥

इति चेत् पश्यसि, दर्शनमेतदिति । अथ कस्माद् विधिर्न भवति नारिष्टहोमप्रकृतित्वात् । प्राप्तानामिध्मादीनां प्रतिषेधको विधिः सन् अपूर्वमर्थं विधास्यति । अनुवादोऽप्रवृत्तिविशेषकरोऽनर्थकः स्यात् । स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति ॥ २२ ॥ आ० ॥

न वाक्यशेषत्वाद् गुणार्थे च समाधानं नाना-त्वेनोपपद्यते ॥ २३ ॥

नायं विधिर्युज्यते । किं कारणम् । अन्योऽत्र विधिराम्नातः । आदित्यं घृते चरुं निर्वपेत्, पुनरेत्य गृहेष्विति । तस्य वाक्यशेषो-ऽयम् । कथं ज्ञायते । तेन आकाङ्क्षितत्वात् । अप्रतिष्ठिता वै त्र्यम्ब-का इति दोषमनुकीर्त्य इदं श्रूयते- आदित्यं घृते चरुं निर्वपेत्

पुनरेत्य गृहेष्विति । इयं वा अदितिरियं प्रतिष्ठा यद् आदित्योऽस्यामेव प्रतितिष्ठतीति । तदेतत् तस्य दोषस्य परिहारार्थमिति विज्ञायते । अतस्तेन सहैकवाक्यतां याति । तन्मध्ये च ये इध्माद्यभाववचनास्तेऽपि तच्छेषा एव समुच्चारणान्न्याय्याः । ते यदि विधयः कल्पेरन् पृथग्वाक्यानि भवेयुः, तत्रैकवाक्यरूपं बाध्येत । व्यवहितकल्पना च स्यात् । नचैषां विधायकत्वम् । अनुवादस्वरूपत्वात् । तस्मान्न विधयः । अथ कोऽत्र विशेषो, यत् समाने लिङ्गत्वे अन्तःपरिधि दर्शनमसाधकमितरत् साधकम् ? इति । विशेषमुपरिष्टाद् वक्ष्यामः ॥ २३ ॥ आ० नि० ॥

येषां वाऽपरयोर्होमस्तेषां स्यादविरोधात् ॥ २४ ॥

येषां वा यागानामपरयोः अग्न्योर्होमः, तेषां प्रवृत्तिः स्यात् । पत्नीसंयाजानामित्यर्थः । कुतः । अविरोधात् । तत्र विरोधो नास्ति, यो नारिष्टहोमानां प्रवृत्तावुक्तः । तत्राभावस्य हेतुत्वादिति । तेषां हि इध्मा बर्हिः सामिधेन्यश्च नैवाङ्गम् । तदभावदर्शनं तत्र न विरुद्ध्यते । प्रवृत्तिधर्म्माणस्तेऽपि जुहोतिचोदनाश्च । सह पत्न्या जुहोतीति । तस्मात् तेषां प्रवृत्तिः ॥ २४ ॥ पूर्व० ॥

तत्रौषधानि चोद्यन्ते तानि स्थानेन गम्येरन् ॥ २५ ॥

नैतद् युक्तम् । किं कारणम । यतस्तत्रौषधानि चोद्यन्ते दर्विहोमे । यथा त्र्यम्बकेषु पुरोडाशः करम्भपात्राणि तण्डुला इत्येवमादीनि । तानि स्थानेन गम्येरन् । आज्यस्थानापन्नया आज्यधर्म्माः प्राप्येरन् । ते न शक्यास्तत्रानुष्ठातुम् । अनुष्ठीयमाना वा अकृतकार्य्याः स्युः । तत्र चोदको बाध्येत । तस्मान्न तेषां प्रवृत्तौ किञ्चित् प्रयोजनमस्ति । याज्यानुवाक्ये अपि मन्त्रान्तरेण निवर्त्त्येते, वषट्कारः स्वाहाकारेण ॥ २५ ॥ उत्तरम् ॥

लिङ्गाद्वा शेषहोमयोः ॥ २६ ॥

पिष्टलेप-फलीकरणहोमयोर्वा प्रवृत्तिः स्यात् । कुतः । लिङ्गात् । औषधसामान्यात् । यश्च पत्नीसंयाजानां प्रवृत्तौ दोष उक्तो धर्म्माणामानर्थक्यं, तदत्र नास्ति । तत्र औषधधर्म्मा निर्वपणादयः शक्याः कर्त्तुम् । तस्मात्तयोः प्रवृत्तिरिति ॥ २६ ॥ पूर्व० ॥

प्रतिपत्ती तु ते भवतस्तस्मादतद्विकारत्वम् ॥ २७ ॥

न त्वेतदेवम् । कुतः । यतः प्रतिपत्तिकर्म्मणी एतौ होमौ । दर्विहोमाश्च प्रधानकर्माणि । तेषां दूरतो भेदः । सामान्यतश्च धर्मप्राप्तिरिष्यते । यच्चोक्तम्, औषधधर्माः शक्यास्तत्र कर्त्तुमिति । प्रतिपत्तित्वादप्रयोजकौ एव निर्वपणादीनां धर्माणाम् । अतस्तत्प्रकृतित्वं तेनैव न्यायेन नोपपन्नम् । नापि प्रयोजनवत् । तस्मादेतदप्ययुक्तम् । एवं न कुतश्चिदपि दर्विहोमानां धर्मप्राप्तिर्युज्यते । तस्मादपूर्वः ॥ ॥ २७ ॥ उत्तरम्

सन्निपाते विरोधिनामप्रवृत्तिः प्रतीयेत विध्युत्पत्तिव्यवस्थानादर्थस्यापरिणेयत्वाद् वचनादतिदेशः स्यात् ॥ २८ ॥

अथ कस्मादुभयपक्षसाधनानामपि लिङ्गानामभावे अवृप्रत्तिरेव प्रतीयते, न पुनः प्रवृत्ति ? इति । उच्यते । सन्निपाते विरोधिनामेतेषां लिङ्गानां प्रवृत्तिः प्रत्येतुं न न्याय्या । कुतः । विध्युत्पत्तिव्यवस्थानात् । विधीनामुत्पत्तिः पाठः । स च व्यवस्थितः । केचिद्दर्शपूर्णमासयोः पठ्यन्ते, केचित् सोमे । तेषामर्थस्यापरिणेयत्वम् । यत्र पठितास्ततोऽन्यत्र परिणीयमानेषु प्रकरणं बाध्यते । तस्मादप्रवृत्तिः प्रतीयेत ॥ तत्राह । किमेष एवोत्सर्गः सर्वत्राप्राप्तिः ? इति । एवं खलु प्राप्ते, उच्यते । वचनादतिदेशः स्यात् । यथा राष्ट्रभृतामुद्वाहकर्म्मसु । असति एवंविधे वचने अपूर्वा इति । अथ ये लिङ्गे अपदिष्टे, यदि कीटोऽवपद्येत, अन्तःपरिधि निनयेत्, अन्तर्वेदि तिष्ठन् सावित्राणि जुहोतीति । तयोः कः समाधिः । उच्यते । अन्यायपूर्वत्वाल्लक्षणया वादः स विज्ञायते । अन्तःपरिधिदेशो अन्तर्वेदिदेशो इति । परिधीनां वेदेश्च तत्राभावात् । यथा रजनी मे कण्डूयति, तिलको मे स्पन्दते इति । रागाभावे तिलकाभावे च तद्देशलक्षणया भवन्ति वक्तार इति ॥ २८ ॥ आ० नि० ॥ दर्विहोमशब्दस्यापूर्वताधिकरणम् ॥ ५ ॥

इति श्रीभट्टशबरस्वामिनः कृतौ मीमांसाभाष्ये
अष्टमस्याध्यायस्य चतुर्थः पादः
सम्पूर्णः ॥ ८ ॥ ४ ॥
समाप्तश्चायमष्टमोऽध्यायः ॥ ८ ॥

अथ नवमस्याध्यायस्य प्रथमः पादः ॥ ९ ॥ १ ॥

यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् ॥ १ ॥

अष्टमेऽध्याये विशेषातिदेशलक्षणं वृत्तम् । इदानीमूहलक्षणं वर्त्तयिष्यामः । त्रिविधश्च ऊहः । मन्त्रसामः संस्कारविषयः । स इह प्राधान्येन वक्ष्यते । अन्यदपि किञ्चिदुपोद्घातेन प्रसङ्गेन च । आदितस्त्वयमर्थश्चिन्त्यते लक्षणसिद्ध्यर्थम् । अग्निहोत्रं दर्शपूर्णमासौ ज्योतिष्टोमश्चोदाहरणम्। तत्र पृथग्धर्माः समाम्नाताः। तेषु संशयः। किं ते अपूर्वप्रयुक्ताः ? उत यजिप्रयुक्ता इति । अपूर्वप्रयुक्तेषु सत्सु ऊहः सिद्ध्यति । यजिप्रयुक्तेषु तु सङ्करो धर्माणाम् । कथमिव । सर्वे हि ते यजतयः । यजातिसामान्ये यजतिशब्दवाच्ये धर्मा विधीयमानाः सर्वत्र भवितुमर्हन्ति । अपूर्वप्रयुक्तत्वे तु, तदीयविशेषे विधीयमाना अन्यस्मिन्नपि तदीयविशेषापन्ने भविष्यन्ति । तस्मात् तत्र ऊहः सिद्धो भवति ॥ नन्वेतत् सर्वं सप्तमे विचारितं, निर्णीतं च । उच्यते । पुनस्तदेव स्मार्य्यते, उत्तरचिन्ताविवक्षया । अथवा तत्र योऽर्थो नोक्तः, तद्विवक्षयेदमुच्यते । कश्चासौ । तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वादिति । एतेन चेह प्रयोजनमूहं विवक्षितः । एवं हि स सिद्ध्यति । तत्रैतन्नोक्तम् । नैतेन तत्र प्रयोजनमिति । तत्रत्या एतावती चिन्ता । किं प्रतिप्रकरणं नियता धर्माः ? उत सर्वे सर्वत्रेति । तद् अपूर्वप्रयुक्तत्वे यजिप्रयुक्तत्वे च सिद्ध्यति, न द्रव्यसंस्कारस्यापूर्वार्थत्वे । तत्त्विह सिद्धम् । तत्रापूर्वप्रयुक्तत्वसिद्धौ व्यवहारार्थमसूत्रितमुपादीयते । तस्मादपुनरुक्तम् ॥ ॥ प्रथमवर्णकम् ॥ १ ॥

अथवा, अन्यामेव चिन्तामिह वक्ष्यामः । किं यजिनिमित्ता धर्मा अपूर्वप्रयुक्ताः ? उत अपूर्वनिमित्ता अपूर्वप्रयुक्ताश्चेति । इदानीं तु, यजिप्रयुक्ताः ? अपूर्वप्रयुक्ता वा इति चिन्त्यते । किं तावत् प्राप्तम् । यजिप्रयुक्ता इति । कुतः । यजिशब्देनेतिकर्त्तव्यताया अभिसम्बन्धात् । एवं यागं कुर्य्यात् । एवं यागेन कुर्य्यादिति ॥

एवं प्राप्ते ब्रूमः । यजत्यर्थस्य यत् कार्य्यं, तत् प्रधानम् । तद्धि कर्त्तव्यतया चोद्यते । यत्र कर्त्तव्यता, तत्रैवेतिकर्त्तव्यता । अथ यदुक्तं, यजतिशब्देनाभिसंयोगो धर्माणामिति । तदुच्यते । तस्य द्रव्येषु

यजतौ च यः संस्कारः, स तत्प्रयुक्तः अपूर्वप्रयुक्तः। तदर्थत्वात्। यजतेर्द्रव्याणां च तदीयत्वेन धर्मैरभिसम्बन्धो, न स्वेनात्मना। न हि धात्वर्थस्य च धर्माणां च परस्परेण आकाङ्क्षा विद्यते। प्रत्ययार्थेन हि इतिकर्त्तव्यता आकाङ्क्ष्यते। कर्त्तव्यं कथमिति, न यजिः कीदृशः? इति। तस्माद् यत् कर्त्तव्यं, तस्यैवेतिकर्त्तव्यतया सम्बन्धः। अपूर्वं च तत्। तस्मादपूर्वप्रयुक्ता इति॥॥ द्वितीयवर्णकम् ॥२॥

एवं वा। एतेष्वेवोदाहरणेष्विति चिन्त्यते। किं यजिनिमित्ता धर्मा अपूर्वप्रयुक्ताः? उत अपूर्वं प्रयोजकं निमित्तं चेति। किं प्राप्तम्। यजिर्निमित्तम्, अपूर्वं प्रयोजकमिति। कुतः। नैकस्य प्रयोजकत्वं निमित्तभावश्चोपपद्यते। यदर्थं हि क्रियन्ते धर्मास्तत् प्रयोजकम्। यस्मिन् सति क्रियन्ते, तन्निमित्तम्। न चैकस्मिन् शब्द अपूर्वायैते, अपूर्वे च भवन्तीति शक्यं वदितुम्। अन्या हि वचनव्यक्तिरपूर्वार्थेषु, अन्या चापूर्वे सतीति। यजिनिमित्तत्वे तु शब्दोऽवकल्पते। एवं यागेन कुर्य्यादिति। यागे सति अपूर्वस्योपकारकाणि, असति अनुपकारकाणि अङ्गानीति। तस्माद् यजिर्निमित्तम्, अपूर्वं तु प्रयोजकमिति ॥ एवं प्राप्ते ब्रूमः। यज्ञकर्म प्रधानं, यजतेः कार्य्यम्। तद्धि फलवच्चोद्यते। तदीयेषु द्रव्येषु यजतौ च यः संस्कारः. सोऽपूर्वप्रयुक्तः। तदर्थास्ते इति कृत्वा क्रियन्ते, न यज्यर्थेन तेषामभिसम्बन्धः। प्रयोगवचनेनैते प्रत्ययार्थेन सम्बध्यन्ते। स हि साकाङ्क्षो, न धात्वर्थः। तस्मादपूर्वप्रयुक्ता अपूर्वनिमित्ताश्च। यदुक्तम्। अपूर्वस्य प्रयोजकत्वं निमित्तभावश्च नोपपद्यते। वचनव्यक्तिभेदादिति। तत्रोच्यते। प्रयोजकत्वं वाचनिकम्। निमित्तभावश्च नैव वचनाद्भविष्यतीति। यद्धि येन प्रयुज्यते, भवति तत् तस्य निमित्तम्। यथा, आरामपोषकस्यारामो वेतनदाने प्रयोजको निमित्तं च। आरामे सति तस्मै वेतनं दीयते। वेतनसम्बन्धो भवति आरामं रक्षितुम्। तस्माद् धर्माणामपूर्वमेव प्रयोजकं निमित्तं चेति॥ १ ॥ तृतीयवर्णकम् ॥ ३ ॥ अग्निहोत्रादिषु उक्तानां धर्माणामपूर्वप्रयुक्तत्वाधिकरणम् ॥ वर्णकान्तरद्वयसहितम् ॥ १ ॥

संस्कारे युज्यमानानां तादर्थ्यात्तत्प्रयुक्तं स्यात् ॥ २ ॥

दर्शपूर्णमासौ प्रति समामनन्ति, प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति। प्रोक्षिताभ्यां दृषदुपलाभ्यां पिनष्टीति। तत्रायमर्थः

सांशयिकः । किं प्रोक्षणं हन्तिपिषिप्रयुक्तम्, उतापूर्वप्रयुक्तमिति । किं प्राप्तम् । संस्कारे हन्तिपिष्याख्ये प्रयुज्यमानस्य प्रोक्षणस्य तत्प्रयुक्तता स्यात् । संस्कारप्रयुक्तता । संस्कारौ हि हन्तिपिषी । कुत एतत्प्रयुक्ततेति । तादर्थ्यात् । यद्धि येन कर्त्तव्यं भवति, तत् तस्य प्रयोजकम् । यदि अपूर्वमनेन क्रियते, ततोऽस्यापूर्वं प्रयोजकम् । यदि हन्तिपिषी, ततस्तौ प्रयोजकौ । प्रकरणाच्चापूर्वं कर्त्तव्यं गम्यते । वाक्याद् हन्तिपिषी । वाक्यं च प्रकरणाद् बलीय इति ॥

ननु हन्तिपिष्योः क्रियमाणमपूर्वार्थं भविष्यति । तत्र प्रकरणं च वाक्यं चोभयमप्यनुग्रहीष्यते । उच्यते । न शक्यमुभयमनुग्रहीतुम् । न प्रकरणसमाम्नायमात्रेण प्रकरणवतोऽर्थेन समाम्नातमिति गम्यते । प्रकरणसमाम्नानात् प्रकृतेनैकवाक्यता भवति । ततस्तादर्थ्यमवगम्यते । इह तु प्रत्यक्षाभ्यां हन्तिपिषिभ्यां प्रोक्षणस्यैकवाक्यता । सा प्रकृतेनैकवाक्यतां परोक्षां बाधेत । न च द्वाभ्यामपि सहैकवाक्यता स्यात् । यदा एकेनैकवाक्यता, तदा तेन निराकाङ्क्षस्य नान्येनाप्येकवाक्यता कल्प्यते । तस्मात् प्रकृतेन एकवाक्यत्वाभावान्नापूर्वार्थं प्रोक्षणम् ॥ आह । ननु हन्तिपिषी अपूर्वार्थौ । तदर्थं प्रोक्षणम् । तस्मादपूर्वस्योपकारकमिति । उच्यते । भवति प्रणाड्या उपकारकम् । न त्वपूर्वप्रयुक्तम् । द्विविधं हि अङ्गम् अङ्गस्योपकारकं भवति । किञ्चिद् अपूर्वस्यैतदङ्गं विशिष्टमित्यनेन कारणेनाङ्गेन सम्बध्यते, किञ्चिदनपेक्ष्यैवापूर्वसम्बन्धं, स्वरूपेणैव कारणेन सम्बध्यते । यद् अपूर्वसम्बन्धं कारणत्वेनोपादाय धर्मजातमङ्गविशेषेण सम्बध्यते, तद् अपूर्वप्रयुक्तं भवति । तादृशं च विकृतौ अर्थान्तरे तत्कार्य्यापन्ने ऊहितव्यं भवति । तत्र पुनः स्वरूपमङ्गस्य धर्मसम्बन्धे कारणं भवति । तत् स्वरूपप्रयुक्तम् । तत्र यद्यपि तेन धर्मवता अपूर्वं साध्यते । तत्र साध्यमानमपूर्वं न धर्मस्य प्रयोगहेतुभूतं भवति, न तत् प्रयोजकं, तस्य स्वरूपं विद्यते इति न धर्मः प्रयुज्यते । तत्र विकृतौ अर्थान्तरे तद्रूपाभावाद् ऊहो नावकल्पते । एवं सति वाक्यान्निर्णयः । यदि वाक्यमपूर्वस्य कारणतां वदति, ततोऽपूर्वप्रयुक्तम् । अथाङ्गस्य, ततोऽङ्गप्रयुक्तम् । तच्चोक्तप्रकरणादपूर्वप्रयुक्तं स्यात् । वाक्यात्तु अङ्गप्रयुक्तता इति । तस्माद् हन्तिपिषिप्रयुक्तं प्रोक्षणमिति । यत्र यत्र हन्तिपिषी प्रयुज्यन्ते, तत्र तत्रैवन्धर्मकौ भवत इति ॥ २ ॥ पूर्व० ॥

तेन त्वर्थेन यज्ञस्य संयोगाद्धर्मसम्बन्धस्तस्माद्यज्ञ-प्रयुक्तं स्यात् संस्कारस्य तदर्थत्वात् ॥ ३ ॥

तुशब्दः पक्षं व्यावर्त्तयति । न त्वेतदस्ति, हन्तिपिषिप्रयुक्तं प्रोक्षणमिति । तेन तु अर्थेन हन्तिना पिषिणा वा । यस्मादपूर्वस्य संयोगः, तस्मात् तस्य प्रोक्षणसम्बन्धः । अपूर्वसाधनविशेषकारितः प्रोक्षणसंस्कारेण सम्बन्धो, न हन्तिपिषिकारितः । कथम् । निष्प्रयोजनौ हन्तिपिषी । यदि तत्प्रयुक्तं प्रोक्षणम् । तदपि निष्प्रयोजनम् । अतो न तत्प्रयुक्तम् ॥ आह । अपूर्वस्योपकारकौ हन्तिपिषी न निष्प्रयोजनाविति । उच्यते । न प्रोक्षणस्यापूर्वस्य कश्चिदस्ति सम्बन्धः । यदि प्रोक्षणं न क्रियते, न हन्तिपिषी अपूर्वस्य साधनभावं न गच्छतः । तस्माद् यद्यपि हन्तिपिषी अपूर्वस्य उपकारकौ, तथापि ताभ्यां सम्बद्ध्यमानं प्रोक्षणमनर्थकमेव ॥

अथोच्यते, यदर्थं हन्तिपिषी उपादीयेते, तत् प्रोक्षणसम्बद्धौ शक्नुतः कर्त्तुं, नान्यथेति । उच्यते । नैवञ्जातीयकः शब्दोऽस्तीति । तत्राह । अयमेव शब्दएतमर्थमाभिवदतीति । कथम् । प्रोक्षिताभ्यामवहन्ति, प्रोक्षिताभ्यां पिनष्टीति यद् हन्तिपिषिभ्यां क्रियते, तत् प्रोक्षणसम्बद्धाभ्यामिति हन्तिपिषिकार्य्येण प्रोक्षणं सम्बद्ध्यते, न ताभ्यामिति । उच्यते । नैतदेवमं । यदि यद्हन्तिपिषिभ्यां क्रियते, तत् प्रोक्षणेन अभिसम्बद्ध्यते, सम्बन्ध एव प्रोक्षणस्य न स्यात् । तद् हि ताभ्यामभिनिर्वर्त्यते । किमपरं, तत् प्रोक्षणमभिनिर्वर्त्तयेत् । अथ प्रोक्षिताभ्यामपूर्वं क्रियते इति सम्बन्धः । न तर्हि हन्तिना पिषिणा वा । अथ तत्सम्बन्धोऽप्युच्यते इति । अनेकसम्बन्धे वाक्यम्भिद्येत । तस्माद् हन्तिपिषिभ्यां प्रोक्षणं सम्बध्यमानमप्रयोजनमिति प्रकरणादपूर्वेण सम्बद्ध्यते ॥

नन्वेवं हन्तिपिषिसम्बन्धो नावकल्प्येत । अवकल्पिष्यते इति ब्रूमः । कथम् । इह अवघातं प्रति यतमानस्य द्वयं निष्पद्यते । अवहन्तिरूपं, तण्डुलनिर्वृत्तिश्च । प्रणाड्या चापूर्वभावनाविशेषः । तण्डुलनिर्वृत्तिर्हि अपूर्वोपकारः । सोऽवहन्तिक्रियया चिकीर्षितः । तेन प्रोक्षणस्य सम्बन्धः । यद्यपि अवहन्तिरूपेण सम्बद्ध्यमाने प्रोक्षणे

श्रुत्या सम्बन्धो भवति । तथापि तत्र निष्प्रयोजनत्वाल्लक्षणैव आश्रीयते। लक्षणा हि प्रत्यक्षा । सा अदृष्टकल्पनाया ज्यायसी । न च अवहन्तिराराादुपकारकोऽपूर्वं निष्पादयति । दृष्टमुपकारं कुर्वन्नदृष्टेन सामर्थ्येन समीचीनं करोतीतिगम्यते । यद्यपि च निष्पादयेत्, तथाऽप्युपकारेण असम्बध्यमानं प्रोक्षणं केवलावहन्तिसम्बन्धेन अनर्थकमेव स्यात् । अतोऽवहन्तिलक्षितेनोपकारविशेषेणास्य सम्बन्धः । तस्मादनवहन्तिरपि यस्तत्कार्य्यापन्नस्तत्र प्रोक्षणं भवत्येव । यथा-नखनिर्भिन्ने चरणौ नखेषु । तस्मादपूर्वप्रयुक्त एवञ्जातीयको धर्म्म इति ॥ ३ ॥ सिद्धान्तः ॥ प्रोक्षणस्यापूर्वप्रयुक्तत्वाधिकरणम् ॥ २ ॥

एवं वा । अस्ति ज्योतिष्टोमः । तत्रेदं समाम्नायते । यावत्या वाचा कामयेत, तावत्या दीक्षणीयायामनुब्रूयात् ।मन्द्रं प्रायणीयायां, मन्द्रतरमातिथ्यायाम्, उपांशु उपसत्सु इति । तत्रायमर्थः सांशयिकः । किं परमापूर्वप्रयुक्ता एते धर्म्माः, उत दीक्षणीयाद्यपूर्वप्रयुक्ता इति । किं प्राप्तम् । परमापूर्वसंस्कारे दीक्षणीयाद्यपूर्वे युज्यमानस्य अस्य धर्मस्य परमापूर्वार्थत्वाद्दीक्षणीयादीनां परमापूर्वार्थतैव स्यात् । परमापूर्वं हि फलवत् । यत् कर्त्तव्यतयाऽभिसम्बद्ध्यते, तदेव धर्म्मैरभिसम्बद्ध्यते, नाङ्गापूर्वम् । निष्प्रयोजनं हि तदिति ॥

तेन त्वर्थेन यज्ञस्य संयोगाद्धर्मसम्बन्धस्तस्माद्यज्ञप्रयुक्तं स्यात् संस्कारस्य तदर्थत्वात् ॥ ३ ॥

तेन त्वर्थेन दीक्षणीयादिना, यस्मात् परमापूर्वस्य सम्बन्धः, तस्मात् परमापूर्वमेवञ्जातीयकेन धर्मेण धर्मवत् । तस्मादङ्गयज्ञप्रयुक्तमेवञ्जातीयकं धर्मजातम् । तथा श्रुतिः शब्दो भवति । इतरस्मिन् पक्षे लक्षणा स्यात् । न च प्रायणीयाद्यपूर्वं निष्प्रयोजनम् । ज्योतिष्टोमस्य हि तदुपकारकम् । न च तद् विना एवञ्जातीयकेन धर्मेण प्रायणीयाद्यपूर्वं सिद्धम् । अवहन्तिपिषिवत् ॥ यदुच्यते, विनैव धर्मेण तद् अपूर्वं भविष्यतीति । तन्न । कुतः । तदपि ह्यपूर्वं शब्दादेवावगम्यते । अस्तीति प्राक् शब्दादन्येन प्रमाणेनोपसङ्ख्यायते । एवञ्जातीयके च शब्दप्रमाणके यच्छब्द आह, तदस्माकं प्रमाणम् । शब्दश्च प्रायणीयाद्यपूर्वस्योपकारकमिमं धर्ममाह, न परमापूर्वस्य । वचनप्रामाण्यात् ॥ एवञ्चापरमापूर्वनिष्पत्तेरजरम् अविनाशि चात्र

धर्मः प्रतिष्ठितो न परमापूर्वं संक्रमिष्यति । एवमपि प्रयोजनसमर्थः । तस्मादेवञ्जातीयकं धर्मजातमङ्गापूर्वप्रयुक्तमेवेति ॥

किं भवति प्रयोजनमितरस्मिन्नितरस्मिन् वा पक्षे ? इति । उच्यते । अश्वमेधे समाम्नायते, त्रैधातवीया दीक्षणीया भवतीति । यदि परमापूर्वप्रयुक्त एवञ्जातीयको धर्मः, ततस्तस्योपकारविशेषे निबद्ध इति । तत्कार्य्यापन्नायां त्रैधातव्यायां भविष्यति । अथ आग्नावैष्णवापूर्वप्रयुक्तस्ततो नेदमाग्नावैष्णवापूर्वमिति तत्र त्रैधातव्यापूर्वं न तेन धर्मेण सम्भन्त्स्यते इति ॥ ३ ॥ सिद्धान्तः ॥ उच्चावचध्वनेः परमापूर्वप्रयुक्तताधिकरणम् ॥ २ ॥ वर्णकान्तरम् ॥

फलदेवतयोश्च ॥ ४ ॥

दर्शपूर्णमासौ स्तः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तत्र फलसम्बद्धो धर्मो देवतासम्बद्धश्च श्रूयते । फलसम्बद्धस्तावत्, अगन्म स्वः सं ज्योतिषा भूमा इति । देवतासम्बद्धोऽपि, अग्नेरुज्जितिमनूज्जेषं सोमस्य उज्जितिमनूज्जेषमित्यादिः । तत्र संशयः । किं स्वर्गसम्बद्धस्य कर्मणः स्वर्ग एव प्रयोजकः, अग्न्यादिसम्बद्धस्य अग्न्यादय एव ? उतोभयत्रापि अपूर्वं प्रयोजकमिति । यद्येवमभिसम्बन्धः क्रियते, गताः स्मः स्वर्गम् अग्न्यादीनां च उज्जितिमनूज्जेषमिति । ततः स्वर्गाग्न्यादिप्रयुक्तः । अथैवं क्रियते, आगता दर्शपूर्णमासफलं, दर्शपूर्णमासदेवताश्च उज्जितिमनूज्जेषमिति । ततोऽपूर्वप्रयुक्तः । किं प्राप्तम् । स्वर्गाग्न्यादिप्रयुक्त इति । कुतः । मन्त्राम्नानसामर्थ्यात् । यस्य मन्त्रो वाचकः, स इह वदितव्य इति गम्यते । श्रुत्या च स्वर्गाग्न्यादीनां वाचको मन्त्रः । लक्षणया दर्शपूर्णमासफलदेवतयोः । तस्माद् यत् फलदेवतमिति समधिगतं स्वर्गाग्न्यादि, तत्प्रयुक्तो धर्मः स्यादिति ॥ ४ ॥ पूर्व० ॥

न चोदनातो हि तादृगुण्यम् ॥ ५ ॥

नैतदस्ति, स्वर्गाग्न्यादिप्रयुक्त इति । चोदनातस्तादृगुण्यं स्यात् । यत् फलवच्चोद्यते, तदितिकर्त्तव्यतया अनुबध्यते । अपूर्वं च फलवत्, न स्वर्गाग्न्यादि । तदर्थं वचनं सदहष्टार्थं कल्प्येत । लक्षणया चापूर्वफलदेवतावचनेऽदृष्टोऽर्थः स्यात् । प्रोत्साहनात् । एतस्मिन् पक्षान्तरे दृष्टे सति न स्वर्गाग्न्यादिवचनस्यापूर्वस्य कल्पना न्याय्या ।

शब्दार्थस्य च फलदेवतात्वेन सम्प्रतिपन्नत्वाल्लक्षणा अदृष्टा । तस्मादपूर्वप्रयुक्त एवञ्जातीयको धर्म इति ॥ किं भवति विचारस्य प्रयोजनम् । यथा पूर्वः पक्षः । सौर्य्ये कर्मणि अविकारेण मन्त्रः प्रयोक्तव्यः। यथा तर्हि सिद्धान्तः । ऊहेन अगन्म ब्रह्मवर्चसं सूर्य्यस्य उज्जितिमनूज्जेषमिति फले पर्य्यवसितम् । देवतायामुत्तरा चिन्ता वर्त्तिष्यते ॥५॥ उत्तरम् ॥ फलदेवतासम्बद्धधर्माणामप्यपूर्वप्रयुक्तताधिकरणम् ॥३॥

देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात् ॥६॥

नैतदस्ति, अग्न्यादयोऽप्रयोजका इति । सर्वा देवताः सर्वेषां धर्माणां प्रयोजिका भवितुमर्हन्ति । कुतः । भोजनस्य तदर्थत्वात् । भोजनं हीदं देवतायाः, यागो नाम । भोज्यं द्रव्यं देवतायै प्रदीयते । सा भोक्ष्यते इति । देवतासम्प्रदानको हि अयं यागः श्रूयते । सम्प्रदानं च नाम कर्मणोऽपि ईप्सिततमादभिप्रेततरम् । तस्मान्नगुणभूता देवता, देवतां प्रति गुणभूते द्रव्यकर्मणी । अपि च यागो नाम देवतापूजा । पूजा च पूजनीयं प्रति गुणभूता लोके दृश्यते । तदेतदतिथिवद् द्रष्टव्यम् । यथा यावत्किञ्चिदतिथेः परिचरणं, सर्वं तदतिथिप्रयुक्तम् । एवमिदमपीति ॥

आह । नन्वेवं ब्रुवता, विग्रहवती देवता भुङ्क्ते चेत्यभ्युपगतं भवति । उच्यते । बाढम् । विग्रहवती देवता भुङ्क्ते च । कुतः । स्मृतेः, उपचाराद्, अन्यार्थदर्शनाच्च । एवं हि स्मरन्ति, विग्रहवती देवता इति । स्मृतिश्च नः प्रमाणम् । तथा विग्रहवतीं देवतामुपचरन्ति । यमं दण्डहस्तमालिखन्ति, कथयन्ति च । तथा वरुणं पाशहस्तम्, इन्द्रं वज्रहस्तम् । उपचारादपि स्मृतेर्द्रढिमानं कल्पयामः । तथाऽन्यार्थवचनं, विग्रहवतीं देवतां दर्शयति । जगृम्भा ते दक्षिणमिन्द्र हस्तमिति । पुरुषविग्रहस्य हि दक्षिणः सव्यश्च हस्तो भवति । तथा, इमे चिदिन्द्र रोदसी अपारे यत् संगृम्भा मघवन् काशिरित्ते इति । काशिर्मुष्टिः । सोऽपि पुरुषविग्रहस्यैवोपपद्यते । तथा, तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे । इन्द्रो वृत्राणि जिघ्नते इति, ग्रीवा उदरं बाहू इति पुरुषविग्रहदर्शनं भवति । तस्माद् विग्रहवती देवता इति भुङ्क्ते च । कथमवगम्यते । स्मृतेः, उपचाराद्, अन्यार्थदर्शनाच्च । एवं स्मरन्ति, भुङ्क्ते देवता इति । तथा चैनां भुञ्जाना-

मिवोपचरन्ति यदस्यै विविधानुपचारानुपहरन्ति । तथाचान्यार्थवचनं भुञ्जानां देवतां गमयति । अद्धीन्द्र पिब च प्रस्थितस्येति । तथा च, विश्वासनानि जठरेषु धत्ते इति, एकया प्रति घा पिबत्साकं सरांसि त्रिंशतमिति ॥ आह । न देवता भुङ्क्ते । यदि च भुञ्जीत देवतायै हविः प्रत्तं क्षीयेत । उच्यते । अन्नरसभोजिनी देवता मधुकरीवद् अवगम्यते । कथम् । देवतायै हविः प्रत्तं नीरसं भवति । तस्मादन्नरसं भुङ्क्ते देवतेति गम्यते ॥ ६ ॥ पूर्व० ॥

आर्थपत्याच्च ॥ ७ ॥

यदि कस्यचिदर्थस्य ईशाना देवता उपचर्य्यमाणा च प्रसीदेत्, ततस्तदाराधनार्थमियं देवतापूजा अभिनिर्वर्त्येत । न चैतदुभयमपि अस्तीति । तदुच्यते । अर्थपतिर्देवतेति । कथमवगम्यते । स्मृतेः, उपचाराद्, अन्यार्थदर्शनाच्च । हि स्मरन्ति । अर्थानामीष्टे देवतेति । तथा, देवग्रामो देवक्षेत्रमित्युपचारस्तामेव स्मृतिं द्रढयति । तथा अन्यार्थवचनमीशानां देवतां दर्शयति । इन्द्रो दिव इन्द्र ईशे पृथिव्याम् इन्द्रो अपामिन्द्र इत् पर्वतानाम् । इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्र इति । तथा, ईशानमस्य जगतः स्वम् ईशमीशानमिन्द्र तस्थुषे इति ॥

तथा, स्मृत्युपचाराभ्यां प्रसीदतीत्युपगच्छामः । एवं हि स्मरन्ति, प्रसीदति देवतेति । तथोपचरन्ति— प्रसन्नोऽस्य पशुपतिः, पुत्रोऽस्य जातः । प्रसन्नोऽस्य वैश्रवणो, धनमनेन लब्धमिति । तथाऽन्यार्थदर्शनं भवति । आहुतिभिरिव हुतादो देवान् प्रीणातीति । तस्मै प्रीता इषमूर्जं नियच्छन्तीति ॥ ७ ॥

ततश्च तेन सम्बन्धः ॥ ८ ॥

ततो देवतायास्तेन फलेन सम्बन्धः परिचरितुर्भवति । यो देवतामिज्यया परिचरति, तं सा फलेन सम्बध्नाति । कथमेतद् अवगम्यते । स्मृत्युपचाराभ्याम् । स्मरन्ति हि । देवता यष्टुः फलं ददातीति । तामेवोपचारेण स्मृतिं द्रढयति । पशुपतिरनेनोपचरितः, पुत्रोऽनेन लब्ध इति । तथा, अन्यार्थदर्शनमिममेवार्थं दर्शयति । स इत् जनेन स विशा स जन्मना स पुत्रैर्वा जम्भरते धना नृभिः । देवानां यः पितरमा वि वासति श्रद्धासना हविषा ब्रह्मणस्पतिमिति ।

तथा, तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति । तस्माद् हविर्दानेन गुणवचनैश्च देवता आराध्यते, सा प्रीता सती फलं प्रयच्छति। येन कर्मणा अग्निराराधितस्तस्य फलस्य ईष्टे, तत् कर्त्रे प्रयच्छति, न तत् सूर्य्यः प्रदातुमर्हति । वचनादेतद् अवगम्यते, कः किं प्रयच्छतीति । यथा अग्नौ वचनं, न तत् सूर्य्ये ॥ ८ ॥ युक्तिः ॥

अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद् गुणत्वे देवताश्रुतिः ॥ ९ ॥

अपि वेति पक्षो व्यावर्त्तते । न चैतदस्ति, यदुक्तं देवता प्रयोजिकेति । यज्ञकर्म प्रधानं स्यात् । यजतेर्जातमपूर्वम् । कुतः । शब्दपूर्वत्वात् । यद्धि फलं ददाति, तत् प्रयोजकमिदं फलं ददातीत्येतज्ज्ञानं शब्दपूर्वकं न प्रत्यक्षादिभिरवगम्यते । शब्दश्च यजतिवाच्यात् फलमाह, न देवतायाः । कथमवगम्यते ? । दर्शपूर्णमासयोः करणत्वेन निर्देशः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तथा, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । यजत्यर्थस्य हि स्वर्गकामेन समभिव्याहारो न देवतायाः ॥ ननु द्रव्यदेवताक्रियं यजत्यर्थः । सत्यमेवम् । किन्तु गुणत्वे देवताश्रुतिः । द्रव्यदेवतं हि भूतं, भावयितव्यो यजत्यर्थः । भूतभव्यसमुच्चारणे च भूतं भव्यायोपदिश्यते, तस्मान्न देवता प्रयोजिका ॥

अथ यदुक्तं, कर्मण ईप्सितादभिप्रेततरमिति । नास्याभिप्रेततामपह्नुमहे । तद्धितशब्देन चतुर्थ्या वा संयुक्तस्य देवतार्थस्य वाक्यादभिप्रेतताऽवगम्यते । फलसंयोगस्तु वाक्यादेव यजत्यर्थस्य । तस्य च श्रुत्या करणताऽवगम्यते, न देवतायाः । तत्र यद्यपि देवतार्थता यागस्य गम्यते, फलार्थताऽपि तेन न प्रतिषिध्यते । फलं च पुरुषार्थः । पुरुषार्था च नः प्रवृत्तिः । न चासौ देवतायाः । तस्मान्न देवताप्रयुक्ताः प्रवर्त्तिष्यामहे । या तु सम्प्रदानस्याभिप्रेतता सा फलवतो यजेः साधनत्वे सत्युपपद्यते ॥

यच्च, यजिर्देवतापूजा सा पूज्यमानप्रधाना लोके लक्ष्यते इति । न लोकवदिह भवितव्यम् । इह पूज्यमानपूजा प्रधानम् । यद्धि फलवत्, तत् प्रयोजकम् । तस्माद् यज्ञकर्म्म प्रयोजकम् । अपिचैतस्मिन् पक्षे विग्रहवती देवता, भुङ्क्ते चेत्यध्यवसनीयं भवति । न हि अविग्रहायै अभुञ्जानायै च दानं भोजनं वा सम्भवतीति ॥

यच्चोक्तं- स्मृत्युपचारान्यार्थदर्शनैर्विग्रहवती, भुङ्क्ते चेति। तन्न। स्मृतेर्मन्त्रार्थवादमूलत्वात्। मन्त्रेभ्यश्चार्थवादेभ्यश्च स्मृतिमूलं विज्ञानमुत्पद्यते इति प्रत्यक्षमवगम्यते। ते च मन्त्रार्थवादा नैवम्परा इत्येतद् वक्ष्यामः॥ आह। यदि नैवम्परा, न तर्हि मन्त्रार्थवादमूलं तद्विज्ञानमिति। उच्यते। ये आलोचनामात्रेण मन्त्रार्थवादान् पश्यन्ति, तेषां तत् स्मृतिमूलम्। ये पुनर्निपुणतः पश्यन्ति, तेषां तद् बाधितमपिच कस्यचित् स्मृतिमूलं भवति। तस्मात् तत एव स्मृतिः, उपचारोऽपि स्मृतिमूल एव। यत्त्वन्यार्थदर्शनमुक्तं- जगृभ्मा ते दक्षिणमिन्द्र हस्तमिति। नैतदेवम्परम्, इन्द्रस्य हस्तो विद्यते इति। यस्तस्य दक्षिणो हस्तस्तं वयं गृहीतवन्त इति। तस्माद् वाक्यादिन्द्रस्य हस्तसत्ता न प्रतीयते॥ आह। यदि त्वसौ नास्ति, वयं ते हस्तं गृहीतवन्त इत्येवं नावकल्पते इति हस्तसत्ताऽध्यवसीयते। अस्त्यसौ हस्तो, वयं यं गृहीतवन्त इति। तन्नोपपद्यते। यद्यप्यस्य हस्तो भवेत्, तथापि न तमुपगृहीतवन्त इति प्रत्यक्षमेतत्। तथाऽप्येतन्नावकल्पत एव। तत्रैतदसम्बद्धं वाऽवकल्पयितव्यं, स्तुतिर्वा। तच्च मत्पक्षेऽपि तुल्यम्॥

अथैवमुच्यते, तस्यैतद्वचनं यो गृहीतवाँस्तस्य हस्तमिति। उच्यते। नैतदध्यवसेयम्। आदिमत्तादोषो वेदस्य प्रसज्ज्येत। न च गृहीतवान् आसीदित्युच्यते। प्रमाणाभावात्। एतस्मादेव वचनादर्थात् कल्प्यते हस्तग्रहीतेति चेत्। तन्न। अयथार्थस्याप्युच्चारणं सम्भवत्येव यतः। यथा, दश दाडिमानि षडपूपा इति। यस्यापि च एष पक्षो, विग्रहवान् इन्द्र इति। तस्यापि इन्द्रशब्देन आमन्त्रणं सम्बोधनार्थं, सम्बोधनमनुवचनाय। तत्र सम्बद्ध इत्यवगते अनुवचनं न्याय्यम्। न चासौ केनचित् प्रकारेण सम्बद्ध इत्यवगम्यते। अनवगते सम्बोधनं व्यर्थम्। वचनप्रामाण्यात् सम्बुध्यते इत्येवं गम्यते इतिचेत्। उक्तम्। अदृष्टकल्पनायां हस्तादिकल्पनानुपपत्तिरिति। न चासौ सम्बुद्ध इत्यवधार्य्यते। प्रमाणाभावात्। तस्मात् सम्बोधनवचनं न सम्बोधनाय, निर्द्देशार्थमेव। अविग्रहपक्षेऽपि तन्निर्द्देशार्थमेव भविष्यति। तत्रामन्त्रितविभक्तिवचनं स्तुतये। एवमिदं देवताख्यं साधयितृतमं, यच्चेतनादिवत् सम्बुध्य साधयतीति चेतनवदिवोपचर्य्यमाणः सम्बुद्धिशब्देनामन्त्र्यते। तथा सम्बो-

धनशब्देन निर्द्दिश्योच्यते, गृहीतवन्तो वयं तव हस्तम् । त्वदाश्रया वयमित्यर्थः । अस्माभिरिन्द्रकर्म्म कर्त्तव्यमित्येतदनेन स्मार्य्यते ॥

तथा इमे द्यावापृथिव्यौ दूरे अपारे यत् संगृह्णासि मघवन्नहो ते पूजितो मुष्टिरिति सन्तमिव मुष्टिं स्तुत्यर्थेन वदति । तस्यापि भावे न प्रमाणमस्ति । नेदं वचनम्, इत् महान् काशिरस्ति । किन्तर्हि, यस्तव काशिः, स महानिति । अन्यार्थस्तव काशिरस्तीति, अन्यस्तव काशिर्महानिति । सता हि स्तुतिरुपपद्यते इतिचेत् । नैतत् । नियोगतो यस्यापि पौरुषविधिकैरङ्गैर्नास्ति संयोगः, पौरुषविधिकैरङ्गैस्तस्यापि स्तुतिर्भवति । यथा, एते वदन्ति शतवत् सहस्रवदभिक्रन्दान्ति हरितेभिरासभिः । विष्टी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित् पूर्वे हविरद्यमाशत इति । तथा, सुखं रथं युयुजे सिन्धुरश्विनमिति । तस्मान्न श्रुतिवचनादर्थापत्तिर्भवति पुरुषविधत्वे देवतायाः । तथा, तुविग्रीव इन्द्र इति नैतद् युक्तं भवति, ग्रीवावान् इन्द्र इति । किन्तर्हि, याऽस्य ग्रीवा सा महती । ग्रीवासत्त्वे नास्ति प्रमाणम् । न च ग्रीवास्तुतिरर्थापत्तिः । अपुरुषविधेऽपि स्तुत्युपपत्तेः ॥

अपि च, इन्द्रो वृत्राणि जिघ्नते इत्येताभ्यां पदाभ्यामिन्द्रशब्दः सम्बद्धो न शक्नोति तुविग्रीवादिभिः सम्बन्धं यातुम् । द्विरुच्चारणमस्य प्रसज्ज्यते । तुविग्रीवावान् इन्द्रो वेदितव्यः, वृत्राणि च इन्द्रो हन्तीति । तथा हि सति भिद्येत । अभिन्नं च वाक्यमुपलभ्यते । तदेवमवकल्पते । यदि तुविग्रीवादयोऽस्य नोपदिश्यन्ते इति स्तुत्यर्थं सङ्कीर्त्यते तुविग्रीवादिः । अन्धसो मदे ईदृशो वृत्राणि हन्ति इति । एषा तु वचनव्यक्तिः । वृत्रवधोपदेशपरमिदं वचनमिति । यदपि वचनं– बाहू ते इन्द्र रोमशौ, अक्षी ते इन्द्र पिङ्गले इति । तदपि बाह्वो रोमशत्वमक्ष्णोश्च पैङ्गल्यमाह, न बाहुसत्तामक्षिसत्तां च । यदपि अक्षिसत्तां वदतीति गम्यते । चक्षुष्मते शृण्वते ते ब्रवीमीति । तदपि न चक्षुः सम्बन्धार्थं, चक्षुष्मते ब्रवीमीति वचनसम्बन्धार्थम् । तत् सतीमिव चक्षुष्मत्तां स्तुत्यर्थमुच्चारयति । कुतः । एतद् अवगम्यते । चतुर्थीनिर्देशात् । यदि प्रातिपदिकार्थोऽध्यवसीयते, तथा वाक्यम्भिद्येत । चक्षुष्मानित्येवं च उद्दिश्येत । चक्षुष्मते ते ब्रवीमीति च । तस्मान्न किञ्चिदन्यार्थदर्शनं पुरुषविधतां देवतायामिदं ख्यापयतीति । न च इदं भोजनम् । न हि देवता भुङ्क्ते । तस्माद

भोजनस्य तदर्थत्वादिति तद् असद्वचनम् ॥

यदपि स्मृत्युपचारान्यार्थदर्शनैर्भुङ्क्ते इति । तद् अविग्रहत्वेन प्रत्युक्तम् । अपि च, भुञ्जानायै देवतायै प्रत्तं हविः क्षीयेत । न च मधुकरीवदन्नरसभोजिन्यो देवता इति प्रमाणमस्ति । मधुकरीषु प्रत्यक्षम् । न च तद्वद् देवतायाम् । तस्मान्न भुङ्क्ते देवतेति । यदुक्तं, देवतायै हविः प्रत्तं नीरसं भवतीति । नैष दोषः । वातोपहतं नीरसम्भवतीति, शीतीभूतं च । न चासौ कस्यचिदर्थस्य ईष्टे । अनीशा कथं दास्यति ? इति ॥

यदुक्तं, स्मृत्युपचारान्यार्थदर्शनैरीशाना देवतेत्यवगम्यते इति । तन्न । स्मृतेर्मन्त्रार्थवादमूलत्वादित्युक्तम् । उपचारोऽपि देवग्रामो देवक्षेत्रमिति । उपचारमात्रम् । यो यदभिप्रेतं विनियोक्तुमर्हति, तत्तस्य स्वम् । न च ग्रामं क्षेत्रं वा यथाभिप्रायं विनियुङ्क्ते देवता । तस्मान्न सम्प्रयच्छतीति । देवपरिचारकाणान्तु ततो भूतिर्भवति, देवतामुद्दिश्य यत् त्यक्तम् ॥

यदुक्तम्, अन्यार्थदर्शनमीशानां देवतां ख्यापयति, इन्द्रो दिव इन्द्र ईशे इत्येवमादीति । तत् प्रत्यक्षामनीशानां देवतामुपलभ्य अध्यवस्यामः, भाक्त एष शब्द इति । तत्राह, वचनप्रामाण्याद्देवाखेशानताऽवगम्यते, यद्देवलोका अर्थान् विनियुञ्जते, तद्देवताभिप्रायादेव इत्यध्यवस्याम इति । तन्न । प्रत्यक्षात् प्रमाणाद्देवतापरिचारकाणामभिप्राय इत्यवगम्यते । स न शक्यो बाधितुम् । येऽपि देवतामीशानां वर्णयन्ति, तेऽपि नापह्नुवते परिचारकाणामभिप्रायम् । किं चाहुः, तथा देवता करोति, यथा परिचारकाणामभिप्रायो भवतीति । न च स ईशानो भवति यः पराभिप्रायमनुरुध्यते, यस्य न स्वाभिप्रायाद् विनियोगो भवति ॥ अपि च, न चैतद्वचनम् । वर्त्तमानकालोपदेशत्वात्, प्रत्यक्षविरोधात् स्तुतिवादोऽवगम्यते । स्तुतिवादे च सम्भवति, न वचनप्रामाण्यादीशिष्यते इति गम्यते । न च देवता फलेन सम्बध्नाति, या तदर्थं परिचर्य्येत ॥ यदुक्तं, स्मृत्युपचारान्यार्थदर्शनैर्ददाति प्रसीदति चेति । तत्र स्मृत्युपचारयोरुक्तं, यदन्यार्थदर्शनं तस्मै प्रीता इषमूर्जं प्रयच्छतीति । तन्न । अन्यस्य विधेराम्नानात् । दक्षिणतः सम्परिहर्त्तव्या इत्याहेति । तथा तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति । अत्रैन्द्रस्य हविषो विधा-

नम् । तस्माद्देवता न प्रयोजिकेति ॥ ९ ॥ सि० ॥

अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीतिप्रधानत्वात् ॥ १० ॥

यदुक्तम्, अतिथिवदिति । तत् परिहर्त्तव्यम् । आतिथ्यमतिथिप्रयुक्तं स्यात् । आतिथ्ये हि तत्प्रीतिर्विधीयते । अतिथिः परिचरितव्यः । यथा प्रीयते तथा कर्त्तव्यमिति । दानं भोजनं वा कार्य्यमिति । यद्यदतिथये रोचते, तत् कर्त्तव्यम् । यत् तस्मै न रोचते, न तद् बलात्कारयितव्यमिति । इह तु कर्म्मणि अभावः प्रीतिविधानस्य । तस्माद् विषममतिथिनेति ॥ १० ॥ युक्तिनिरासः ॥ धर्म्माणामदेवताप्रयुक्तत्वाधिकरणम् ॥ ४ ॥

द्रव्यसङ्ख्याहेतुसमुदायं वा श्रुतिसंयोगात् ॥ ११ ॥

दर्शपूर्णमासयोरामनन्ति, व्रीहीन् प्रोक्षतीति । तत्रैव त्रीन् परिधीन् तिस्रः समिध इति मन्त्रम् । चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्रा अमावास्यामिति चतुर्मास्यानां द्वितीये पर्वणि वरुणप्रघासेष्वाम्नायते । शूर्पेण जुहोति तेन हि अन्नं क्रियते इति । तत्र संशयः । किंद्रव्यसंख्याहेतुसमुदायप्रयुक्ताः प्रोक्षणादयो धर्म्माः, उतापूर्वप्रयुक्ता इति । किंतावत् प्राप्तम् । द्रव्यादिप्रयुक्ताइति । इह व्रीहीन् प्रोक्षतीति प्रकरणेनापूर्वप्रयुक्तता स्याद्वाक्येन द्रव्यप्रयुक्तता । द्रव्येण हि प्रोक्षणस्य समभिव्याहारः । तस्मिन्नपि समभिव्याहारे द्रव्यगता द्वितीया विभक्तिः प्रोक्षणस्य द्रव्यप्रयुक्ततां वदति ॥ तथा, त्रीन् परिधीनिति यत् त्रिशब्दस्याभिधेयं, तदिह मन्त्राम्नानसामर्थ्याद् वदितव्यमिति गम्यते । सङ्ख्या स त्रिशब्दस्यार्थः । तस्याः श्रुतिर्वाचिका । तत्सम्बद्धे अपूर्वे लक्षणा स्यात् । यावन्तः परिधयस्तावन्तो वक्तव्या इति ॥ तथा हेतुना धर्म्मः संयुज्यते वाक्येन, शूर्पेण जुहोतीति । किं कारणम् । यतः, तेन अन्नं क्रियते । तद्धोमेन सम्बद्धव्यमन्नकरणद्रव्यं होमे विधीयते । प्रकरणादपूर्वप्रयुक्तता स्यात् । यस्मादनेन होमेन अपूर्वं क्रियते, तस्माद् एतत् शूर्पेण निर्वर्त्तयितव्यमिति । प्रकरणाद् वाक्यं बलीयः । अतः प्रकरणं बाध्येत । येन येन द्रव्येण दर्विपिठरादिनाप्यन्नं क्रियते, तेन तेन होमः कर्त्तव्य इत्येवमन्नकरणं सगुणं भवतीति ॥

ननु प्रथमे अध्याये प्रतिषिद्धा हेत्वर्थता । शूर्पस्यार्थवादोऽयमित्युक्तम् । सत्यमुक्तम् । अपूर्वप्रयुक्ततायां हि सिद्धायां नैकस्मिन् वाक्ये होमे शूर्पविधानं, हेतुविधानं चावकल्पते इत्यर्थवादः प्रकल्पते, नान्यथा । चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्रा अमावास्यामिति समुदायसमभिव्याहाराद् वाक्येन तत्प्रयुक्तता, प्रकरणसामर्थ्याल्लक्षणया अपूर्वसमभिव्याहाराद् अवगतामपूर्वप्रयुक्ततां बाधते । तस्माद् द्रव्यादिप्रयुक्ताः प्रोक्षणादयो धर्म्माः ॥ ११ ॥ पूर्व० ॥

अर्थकारिते च द्रव्येण न व्यवस्था स्यात् ॥ १२ ॥

अपूर्वप्रयुक्ते एवञ्जातीयके धर्मे सति द्रव्येण च धर्मव्यवस्था न स्यात् । पयसा मैत्रावरुणं श्रीणाति, सक्तुभिर्मथितं धानाभिर्हारियोजनं हिरण्येन शुक्रमाज्येन पात्नीवतमिति । यस्मान्मैत्रावरुणोऽपूर्वस्य, तस्मात् पयसा श्रयितव्य इति । ऐन्द्रवायवोऽप्यपूर्वस्य । सोऽपि पयसा श्रयितव्यः प्राप्नोति । एवं सर्वाणि श्रयणादीनि सर्वेषां ग्रहाणाम् । तत्र मैत्रावरुणादिग्रहणमविवक्षितं स्यात् । तस्मादपि द्रव्यादिप्रयुक्ताः प्रोक्षणादय इति ॥ १२ ॥ युक्तिः ॥

अर्थो वा स्यात् प्रयोजनमितरेषामचोदनात्तस्य च गुणभूतत्वात् ॥ १३ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न द्रव्यादिप्रयुक्ता भवेयुः । किन्तर्हि । अर्थ एषां प्रयोजनम् । अर्थ इति अपूर्वं ब्रूमः । तदर्थास्ते । तद्धि कर्त्तव्यतया श्रूयते । तदितिकर्त्तव्यतया अनुबध्यते । इतरेषां द्रव्यादीनां कर्त्तव्यतया न चोदना । किन्तर्हि । अर्थस्य गुणभूतत्वेन । अर्थं प्रति अपूर्वं प्रति गुणभूतानामेषां श्रवणम् । किमतः । यद्येवम्, अकर्त्तव्यानामितिकर्त्तव्यतया नास्ति सम्बन्ध इति ॥

ननु व्रीह्यादिसमभिव्याहारात् तर्हि सम्बन्धः । तत्र द्वितीयया व्रीहिसमुदायप्रयुक्तता गम्यते । लिङ्गवाक्याभ्यां सङ्ख्याहेतुप्रयुक्तता नेत्याह । एवं सति फलं कल्पनीयं स्यात् । तस्मादपूर्वप्रयुक्तता ॥

नन्वेवमपि सति अपूर्वोपकारः कल्पयितव्यः । सत्यं कल्पयितव्यः । प्रकृतेन तु एकवाक्यतां नीत्वा । त्वत्पक्षे त्वप्रकृतेन फलवचनेनैकवाक्यता स्यात् ॥

ननु प्रकरणं वाक्यस्य श्रुतेर्वा न बाधकम् । सत्यमबाधकम् ।

फलाभावात्तु भवदीयः पक्षो मुच्यते । तस्मिन्नानर्थक्येन अविवक्षिते प्रकरणवता प्रयोगवचनेन अपरिपन्थि प्रोक्षणादि विधायिष्यते । आह । अपूर्वसम्बन्धेऽपि तदीयैर्व्रीह्यादिभिरेष धर्म्मः प्रयुज्यते । किमेतत् । किमेवं भविष्यति ? । द्रव्यादिसम्बन्धश्चैवं हि नावज्ञातो भविष्यति । फलं च न कल्पयितव्यम् । उच्यते । नैवं शक्यम् । व्रीहीन् प्रोक्षतीति हि व्रीहिजातिर्निर्दिश्यते । व्रीहिद्रव्यलक्षणार्था वा, अपूर्वसाधनविशेषलक्षणार्था वा । अन्यतरलक्षणया कृतार्था इति, नोभयलक्षणार्था स्यात् । द्रव्यलक्षणे वा । तत्र च लक्षणैव दोषः । फलकल्पना इति कृत्वा साधनविशेषलक्षणार्था जातिरवसीयते । व्रीहिजातिलक्षितं यत् साधनं, किं तत् । यतस्तण्डुला भवन्ति, तत् प्रोक्षितव्यमिति तण्डुलनिर्वृत्तिकरता हि तत्र साधनत्वं, न द्रव्यता । एवं सङ्ख्यादिष्वपि योजयितव्यम् । तस्मादपूर्वप्रयुक्तता प्रोक्षणादीनामिति ॥ १३ ॥ सि० ॥

अपूर्वत्वाद् व्यवस्था स्यात् ॥ १४ ॥

अथ यदुक्तम्, अर्थकारिते च द्रव्येण न व्यवस्था स्यादिति । साधनविशेषलक्षणार्था जातिरित्येवं सति व्यवस्था भविष्यति । मैत्रावरुणेन यत् क्रियते, तत्र पयःश्रयणं, न तद् ऐन्द्रवायवेन । अतो न मैत्रावरुणापूर्वाद् ऐन्द्रवायवस्य धर्माः । अपूर्वो हि ऐन्द्रवायवः । तस्माद् अपूर्वत्वाद् व्यवस्था स्यादिति ॥ १४ ॥ पूर्वपक्षनिरासः ॥

तत्प्रयुक्तत्वे च धर्मस्य सर्वविषयत्वम् ॥ १५ ॥

यश्च मन्यते, द्रव्यादिप्रयुक्ताः प्रोक्षणादयो धर्मा इति । तस्य सर्वविषयता धर्मस्य प्राप्नोति । येऽपि भक्तार्था व्रीहयस्तेऽप्येवं प्रोक्षितव्याः प्राप्नुवन्ति । न चैतत् त्वयापीष्यते । तस्मादयमस्मिन् पक्षे दोष इति ॥ १५ ॥ पूर्वपक्षयुक्तिनिरासः ॥

तद्युक्तस्येतिचेत् ॥ १६ ॥

इतिचेत् पश्यसि, सर्वविषयता धर्मस्य भविष्यतीति । तद्युक्तस्य प्रकरणयुक्तस्य भविष्यति । एवं प्रकरणमनुगृह्यते । न च सर्वविषयता धर्मस्येति ॥ १६ ॥ आ० ॥

नाश्रुतित्वात् ॥ १७ ॥

नैतदेवम् । न हि श्रूयते, करणयुक्ता व्रीहयो निर्वप्तव्याः प्रोक्षित-

व्याश्चेति । ननु प्रकरणानुग्रहायैतदध्यवसानम् । नेत्याह । न हि वाक्येन बाधितं प्रकरणम् उत्सहते धर्मान् नियन्तुम् । अथापि न बाध्यते, तथापि न प्रकरणस्य विशेष्टुं सामर्थ्यमस्ति । कर्त्तव्यतया हि तत् क्रियमाणं चोद्यते इति न प्रसिद्धसम्बन्धमिव विशेषणत्वेन । तस्माच्च प्रकृतयागविशेषितानां व्रीहीणां निर्वापः प्रोक्षणं वा चोद्यते इति ॥ १७ ॥ आ० नि० ॥

अधिकारादिति चेत् ॥ १८ ॥

इति चेत् पश्यसि, न प्रकरणं विशेषकं व्रीहीणामिति । बाढम् । अधिकाराज्ज्ञास्यत्यध्वर्य्युः । इमे भक्तार्थाः, इमे कार्य्यार्थाः । तत्र कार्य्यार्थान् प्रोक्षिष्यतीति ॥ १८ ॥ आ० ॥

तुल्येषु नाधिकारः स्यादचोदितश्च सम्बन्धः पृथक्सतां यज्ञार्थेनाभिसम्बन्धस्तस्माद् यज्ञप्रयोजनम् ॥ १९ ॥

तुल्या एते व्रीहयः । ये एव भक्तार्थास्ते एव कर्मार्थाः, न पृथक् केचित् कर्मार्था नाम । ननु ये निरुप्तास्ते कर्मार्थाः । सत्यं भवेदेतत् । प्रोक्षणादिषु दोषो न स्यात् । निर्वापे तु दोषः । न तत्र केचन प्रकृता विद्यन्ते, पृथक्सतां यज्ञार्थेन निर्वापः श्रूयते । कथम् । अपरेण गार्हपत्यं प्रागीषम् अनोऽवस्थितं भवति । तस्य दक्षिणं चक्रमारुह्यानसोऽधि निर्वपतीति । तस्माद्धर्मस्य सर्वविषयत्वं प्राप्नोत्येव । पूर्वेण हेतुना अपूर्वप्रयुक्तत्वं प्रोक्षणादीनामिति ॥ १९ ॥ सिद्धान्तः ॥ प्रोक्षणादीनामपूर्वप्रयुक्तत्वाधिकरणम् ॥ ५ ॥

देशबद्धमुपांशुत्वं तेषां स्याच्छ्रुतिनिर्देशात्तस्य च तत्र भावात् ॥ २० ॥

ज्योतिष्टोमे समाम्नायते— त्सरा वा एषा यज्ञस्य, तस्माद् यत्किञ्चित् प्राचीनमग्नीषोमीयात् तेन उपांशु चरन्तीति । तदत्रैषोऽर्थः सांशयिकः । किं प्राग् अग्नीषोमीयाद् यानि कर्माणि, तत्प्रयुक्तमुपांशुत्वम्, उत परमापूर्वप्रयुक्तमिति । किं प्राप्तम् । प्रागग्नीषोमीयाद् यानि अङ्गापूर्वाणि आरादुपकारकाणि, यच्च प्रधानद्रव्यसंस्कारकं, तत्प्रयुक्तोऽयं धर्मः । योऽयं देशसम्बद्धः । कुत एतत् । श्रुतिनिर्देशा-

तु । मर्य्यादया देशलक्षिता ये पदार्थाः, ते श्रुत्या एतेन धर्मेण सम्बद्धाः । ये एतास्मिन् देशे पदार्थास्तैरुपांशु चरन्तीति ॥ ननु वाक्येनैष धर्मो विनियुक्तो, न श्रुत्या । न ब्रूमो, न वाक्येनेति । किन्तर्हि । श्रुतेनाऽस्यैकवाक्यता, न प्रकृतेन, लक्षितेन, कल्पितेन वेति । उच्यते । गृह्णीम एतदङ्गापूर्वाणामयं धर्म इति, न तु प्रधानद्रव्यस्य संस्कारकं यदपूर्वं तस्यापीति । कतमं तत् । यत् प्रधानद्रव्यसंस्कारकं पूर्वस्मिन् देशे अस्तीति । उच्यते । तस्य च तत्र भावात् । तस्यैवञ्जातीयकस्य पूर्वस्मिन् देशे भावात् । अस्ति हि सोमपरिवहणीयं नाम सूक्तम् । तस्माद् देशधर्मो भविष्यतीति । यथा प्रणीताः प्रणेष्यन् वाचं यच्छति, तां सह विष्कृता विसृजतीति । अस्मिन् देशे ये पदार्थास्तेषां धर्मो वाग्यमो, न प्रधानापूर्वस्य । एवमिदमप्युपांशुमिति ॥ २० ॥ सि० ॥

यज्ञस्य वा तत्संयोगात् ॥ २१ ॥

वाशब्दात् पक्षो विपरिवर्त्तते । नैतदस्ति । तद्देशानां धर्म्म इति । कस्य तर्हि । परमापूर्वस्येति । कुतः । तत्संयोगात् । तत्संयोगो भवति । यज्ञस्य संयोगः । त्सरा वा एषा यज्ञस्य यत् प्राचीनमग्नीषोमीयादिति, यज्ञस्य यत् प्राचीनमिति सम्बन्धो, न त्सरा वा यज्ञस्येति । कुतः । प्राचीनं विशिंषन् यज्ञस्येति शब्दो विधिपदशेषो भवति । ततः प्रवृत्तिविशेषकरो भविष्यति । इतरथा अर्थवादशेषः सन्ननर्थकः स्यात् । वादमात्रं ह्यनर्थकम् इति । प्राचीनमिति च यज्ञभागं श्रुत्या वदति । लक्षयति च तद्गतान् पदार्थान् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या स्यात् । तस्मात् प्राग्देशस्यैष धर्म्मः । तेनास्य श्रुत्या संयोगः । न प्राग्देशगतानां पदार्थानां तैरस्य लक्षणया सम्बन्धः स्यात् ॥ अथाप्यर्थवादपदशेषो यज्ञस्येति स्यात्, तथापि प्राग्देशः श्रुत्या धर्मेण सम्बद्ध्यते । प्राग्देशगताः पदार्था लक्षणयेति यज्ञप्रयुक्ततैव न्याय्या ॥ अपिच प्रत्यक्ष उपकारः परमापूर्वस्य लक्ष्यते । यत् प्राचीनमग्नीषोमीयात्, तदुपांशुत्वेन शिथिलप्रयत्नः प्रचरन्नखिन्नः सुखं बहुवृत्तान्तं सौत्यमहर्निर्वर्त्स्यति । तस्मात् परमापूर्वप्रयुक्तमुपांशुत्वमिति ॥ २१ ॥ पूर्व० ॥

अनुवादश्च तदर्थवत् ॥ २२ ॥

अनुवादश्च तद्देशपदार्थस्यैव भवति । त्सरा वा एषा यज्ञस्य यत्प्राचीनमग्नीषोमीयादिति । त्सरा नाम छद्मगतिः । यथा शकुनिग्राहकस्य शकुनिं जिघृक्षतश्छद्मना गतिर्भवति । शनैः पदन्यासो, दृष्टिप्रणिधानम्, अशब्दकरणञ्च । कथमनवबुद्धः शकुनिर्गृह्येतेति । एवमिहापि अनवबुद्धमिव ग्रहीतुं यज्ञं प्रच्छन्नगतिरुपांशुत्वं नाम । यथा शकुनिग्राहकस्य यस्मिन् देशे शनैः पदन्यासो न स तद्देशार्थः । अपितु तद्देशाभिगतस्य शकुनेरर्थेन क्रियते । एवमिहाऽपि उपांशुत्वं न तद्देशानां पदार्थानामर्थेन क्रियते, तद्देशाभिगतस्य यज्ञस्यार्थेन गम्यते । यस्तु त्सराशब्दं यज्ञविशेष्यं मन्यते, तस्य सुतरामर्थवादः परमापूर्वप्रयुक्ततां दर्शयति । यज्ञस्यैषा त्सरेति । यथा शकुनेः त्सरा, एवं यज्ञस्येति ॥ २२ ॥ पूर्वपक्षे युक्तिः ॥

प्रणीतादि तथेतिचेत् ॥ २३ ॥

इति यदुक्तं तत्परिहर्त्तव्यम् ॥ २३ ॥ आ० ॥

न यज्ञस्याश्रुतित्वात् ॥ २४ ॥

नैतदेवं, तद्देशपदार्थप्रयुक्ततैव स्याद्, न परमापूर्वप्रयुक्ततेति । नात्र पदार्थानां यज्ञभागविशेष्यता वाग्यमसम्बन्धेनावगम्यते । यज्ञस्याश्रुतित्वात् । नात्र सम्बन्धो यज्ञशब्दः श्रूयते । नन्विदानीमेवोक्तं, यज्ञं तनिष्यन्तौ अध्वर्य्युयजमानौ वाचं यच्छत इति । उच्यते । तद्देशपदार्थप्रयुक्ततायामप्येतदवकल्पते । कथम् । यज्ञं विस्तारयितुं वाचं यच्छतः । तौ वाचंयमौ सन्तौ अविक्षिप्यमाणचेतस्कौ, पदार्थेषु क्रियमाणेषु अप्रमाद्यन्तौ तथा करिष्येते, यथा, न कश्चित् पदार्थः पदार्थावयवो वा हीयते । अध्वर्य्युर्वाग्यमेन अनन्यचेतस्को न पदार्थान् प्रमादयिष्यति । यजमानश्चैवं वाग्यमेन अनन्यचेतस्कः प्रमादयिष्यन्तं तं बोधयिष्यति । अङ्गैरप्यनन्तरीयमाणैर्यज्ञो विस्तार्य्यते, न केवलैः स्वैरवयवैरङ्गैश्च विस्तारयितुं वाग्यमः शक्नोति । अस्मिन् काले क्रियमाणो न स्वेनात्मना । यज्ञसंयोगश्चात्र विस्तारसम्बद्धः । तस्मादङ्गप्रयुक्ततायामप्युपपद्यते, यदध्वर्य्युयजमानौ वाचं यच्छतः, तत् प्रजापतिभूयङ्गतौ यज्ञं तन्वाते इति दृष्टेन कारणेन, न अदृष्टेनेति वर्त्तमानकालापदेशादवगम्यते । यथा वयं वाग्यमेन तायमानं यज्ञं विघ्नस्तथेति ॥ २४ ॥ आ० नि० ॥

तद्देशानां वा सङ्घातस्याचोदितत्वात् ॥ २५ ॥

स्थितादुत्तरम् । वाशब्दात् पक्षं विपरिवर्त्तयेत् । नैतदस्ति, परमापूर्वप्रयुक्तमुपांशुत्वमिति । कथन्तर्हि । प्राचीनमग्नीषोमीयाद् ये पदार्थास्तत्प्रयुक्तम् । कुतः । सङ्घातस्याचोदितत्वात् । सङ्घात इति ग्रहयज्यभ्याससङ्घातं ब्रूमः । न तस्यायं भाग उपांशुत्वेन सम्बद्ध इति चोदना । नैवं सम्बन्धः क्रियते, यज्ञस्य यत् प्राचीनमिति । कथं तर्हि । त्सरा वा एषा यज्ञस्येति । कुतः । तस्मादितिपदेन व्यवधानात् ॥ अथापि प्राचीनेन सम्बन्धः । एवमपि न परमापूर्वप्रयुक्तम् । न हि यदित्यनेन देशोऽभिसम्बद्ध्यते । किन्तर्हि । देशगताः पदार्थाः । यदि देशोऽभिसम्बद्ध्येत, यत् प्राचीनमग्नीषोमीयादिति भवेद्, न यत्किञ्चिदिति । वीप्सायां हि एतद्भवति । वीप्सा च बहुषु भवति, नैकस्मिन् । एकश्च देशो, बहवस्तत्र पदार्थाः । तस्मात् पदार्थानामुपांशुत्वेन सम्बन्धो न तद्देशस्येति । कथं पुनर्वीप्साऽवगम्यते इति । यदित्यनेन लक्ष्यते । किमित्यज्ञानवचनम् । विशेषाश्चाज्ञाता ज्ञातुमिष्टाः प्रतीयन्ते । बहुषु च सामान्यं विशेषाश्च भवन्ति । तस्मात्तद्देशाः पदार्था वीप्सया लक्ष्यन्ते, ते च उपांशुत्वेन सम्बध्यन्ते इति ॥ ननु दीक्षणीयादिष्वन्यो धर्म उक्तः । यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात् प्रायणीयायां मन्द्रतरमातिथ्यायामुपांशूपसत्स्विति । कथं तत्रोपांशुत्वं कर्त्तुं शक्यमिति । उच्यते । स धर्मः प्रधानेषु भविष्यति । दीक्षणीयादिषु प्रधानशब्दोपबन्धत्वात् । उपांशुत्वं प्रधानवर्जितेष्वङ्गेषु निवेक्ष्यते । सामान्योपदेशात् ॥

प्रयोजनं, कुण्डपायिनामयने मासमग्निहोत्रं जुहृतीत्येवमादीनि प्रागग्नीषोमीयाद्, एषूपांशुत्वसम्बन्धो भवति । यथा पूर्वः पक्षः । यथा तर्हि सिद्धान्तः, न सम्बन्धः ॥ २५ ॥ उत्तरम् ॥ अग्निष्टोमे उपांशुत्वस्य प्राचीनपदार्थप्रयुक्तत्वाधिकरणम् ॥ ६ ॥

अग्निधर्मः प्रतीष्टकं सङ्घातात् पौर्णमासीवत् ॥ २६ ॥

अस्ति अग्निः, य एवं विद्वान् अग्निं चिनुते इति । तत्रैव समाम्नायते । हिरण्यशकलसहस्रेणाग्निं प्रोक्षति, दध्ना मधुमिश्रेणाग्निं प्रोक्षति, वेतसशाखयाऽवकाभिश्चाग्निं विकर्षति, मण्डूकेनाग्निं विकर्षति । तत्रायमर्थः सांशयिकः । प्रतीष्टकं किं विकर्षणं प्रोक्षणं च

कर्त्तव्यम् ? अथ सकृदेव कर्त्तव्यमिति । तत्रैवं तावद्विचार्य्यते । किमिष्टकासमुदायेऽग्निशब्दः, उत तद्व्यतिरिक्ते द्रव्यान्तरे इति । यदि समुदाये, ततस्तल्लक्षितानामिष्टकानामगम्यमाने विशेषे सर्वासां प्रोक्षणं विकर्षणञ्च । यदा च द्रव्यान्तरे, ततः सकृदेवेति । किं प्राप्तम् । प्रतीष्टकमिति । कुतः । समुदाये हि अग्निशब्दो वर्त्तते । कथमवगम्यते । द्रव्यान्तरस्याभावात् । द्रव्यान्तरमेवान्यद् नास्ति, कोऽग्निशब्देनाभिधीयेत ? कस्मिन्नग्निर्निधीयेतेति । कथं पुनर्नास्तीति गम्यते । द्रव्यान्तरवैलक्षण्यात् । तत्र हि द्रव्यान्तरमस्तीति गम्यते, यत्रैकस्मिन्नवयवे गृहीत्वा कृष्यमाणे कृत्स्नः कृष्यते । कोऽभिप्रायः । यद्येकोऽवयवो हस्तेन संयुक्तः कृष्यते, न द्रव्यान्तरम् । कः प्रसङ्गः । यत्तत्र द्वितीयोऽप्यवयवः कृष्येतेति । अथ द्रव्यान्तरमपि तत्र कृष्यते, तत्र द्रव्यान्तरस्य समवायिनामवयवानामपि निर्भागात् कर्षणमुपपन्नम् । न च संयुक्तसंयोगस्य द्रव्यान्तरादृते धर्म एषोऽवकल्पते । न हि अबद्धे काष्ठपूलके काष्ठे एकस्मिन्नाकृष्यमाणे काष्ठान्तराणि कृष्यन्ते । यत्र हि परस्परव्यतिषङ्गजनिता एका बुद्धिर्भवति, नावयवबुद्धिर्दृश्यते, नापि केनचिदनुमानेन अनुमीयते, तत्र द्रव्यान्तरं जातमित्युच्यते । इह तु या एवेष्टका गृहीत्वा कृष्यते, सैवागच्छति, नेष्टकान्तराणि । सन्धिश्च लक्ष्यते । तेन नावयवसंस्यूतिरस्तीति गम्यते । तस्मान्नास्ति द्रव्यान्तरम् । तत्रेष्टकाभिरग्निं चिनुते इति चयनमात्रमिष्टकाभिः कर्त्तव्यम् । न चयनमात्रेण कृतेन किञ्चिद् दृष्टमस्ति । तस्मादग्निनिधानार्थानामिष्टकानां चयनसमुदायोपलक्षितानामगम्यमाने विशेषे सर्वासामेव प्रोक्षणं विकर्षणं च कर्त्तव्यम् । पौर्णमासीवत् । यथा, य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते इति आग्नेयादय एव क्रियन्ते, नार्थान्तरं किञ्चित् । एवमिहापीति ॥ २६ ॥ पूर्व० ॥

अग्नेर्वा स्याद् द्रव्यैकत्वादितरासां तदर्थत्वात् ॥ २७ ॥

वाशब्दात् पक्षो विपरिवर्त्तते । नैतदस्ति, प्रतीष्टकं कर्त्तव्यमिति । कथन्तर्हि । सकृदेवेति । तत एतद् वर्ण्यते, द्रव्यान्तरमिष्टकाभिः क्रियते । तत्राग्निर्निधातव्यः । तत्र चाग्निशब्दो वर्त्तते इति । कथम् । परार्थेनेष्टकानां निर्देशात् । इष्टकाभिरग्निं चिनुते इति तृतीयया विभक्त्या

पारार्थ्यमिष्टकानामवगम्यते। यदि चयनमात्रमन्त्रोच्यते, तदिष्टकासंस्कारार्थमवगम्यते। तत्र द्वितीयया विभक्त्या संयोगः स्यात्। तृतीयया संयोगो बाध्येत। तस्मादिष्टकाभिरन्यत् क्रियते। तत्राग्निर्निधातव्यः। तदर्था इष्टकाश्चयनं वेति ॥ आह। नन्वेतदुक्तं, तस्याभावादयमन्यः पक्षः परिगृह्यते इति। अत्रोच्यते। नाभावः। प्रत्यक्षा तत्रैकबुद्धिः। सा बह्वीष्विष्टकासु नावकल्पते। न चावयवसन्धिर्दृश्यते पुरीषच्छन्नानाम्। तस्मात् पक्कानामसंयोगेऽप्येकबुद्धेरुत्पादादेकमिष्टकाभ्यो व्यतिरिक्तं द्रव्यमग्निनिधानार्थमस्ति। यदि वा इष्टकासंस्यूतिरप्येकबुद्धेरेवावगम्यते। यत्तु एकाकर्षणेन कृत्स्नाकर्षणमिति। सत्यं, संस्यूतौ तत्र विच्छेदः क्रियते। द्विविधानि हि द्रव्याणि, स्थावराणि जङ्गमानि च। तत्र स्थावरेषु विच्छेदो भवति। यथा,वनस्पतौ पर्णे गृहीत्वा कृष्यमाणे न कृत्स्नः कृष्यते, स्थावरत्वात्। एवमिदमपि स्थावरं हीदमग्निद्रव्यम्। तस्मात् सकृदेव प्रोक्षणं विकर्षणञ्च कर्त्तव्यमिति ॥ २७ ॥ सि० ॥

चोदनासमुदायात्तु पौर्णमास्यां तथा स्यात् ॥ २८॥

अथ यदुक्तं, य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते इति। नात्र आग्नेयादिभ्यः किञ्चिदर्थान्तरम्। तथेहापीति। उच्यते। युक्तं पौर्णमास्यां तथाभावः। चोदनासमुदायो हि तत्र कर्म। न च कर्मसाध्यं विद्यते। इह तु द्रव्यान्तरमस्तीत्युक्तम्। तस्माद्वैषम्यं पौर्णमास्येति ॥ २८ ॥ आ० नि० ॥ इष्टकासु सकृद्विकर्षणाद्यनुष्ठानाधिकरणम् ॥ ७ ॥

पत्नीसंयाजान्तत्वं सर्वेषामविशेषात् ॥ २९॥

अस्ति अहर्गणः, द्वादशाहेन प्रजाकामं याजयेदिति। तत्र श्रूयते। पत्नीसंयाजान्तानि अहानि सन्तिष्ठन्ते इति। तत्रायमर्थः सांशयिकः। किं सर्वेषामह्नां पत्नीसंयाजान्तत्वम्? उत प्रागुत्तमादिति। दशमं वर्जयित्वा सन्देहः क्रियते। तस्य हि मानसान्तता वचनेनोक्ता। किं तावत् प्राप्तम्। सर्वेषामह्नामिति। कुतः?। अविशेषात्। अविशेषेणोच्यते, पत्नीसंयाजान्तानि अहानि सन्तिष्ठन्ते इति। न च कश्चिद्विशेष आश्रीयते। तस्मात् सर्वेषामिति ॥ २९ ॥ पूर्व० ॥

लिङ्गाद्वा प्रागुत्तमात् ॥ ३० ॥

वाशब्दः पक्षव्यावृत्तौ । प्रागुत्तमादह्नः पत्नीसंयाजान्तता स्यात् । कुतः। लिङ्गात्। लिङ्गं भवति। पत्नीसंयाजान्तानि अहानि सन्तिष्ठन्ते, न बर्हिरनुप्रहरति, असंस्थितो हि तर्हि यज्ञ इति । यस्मिन्नहन्यसंस्थितो यज्ञस्तस्मिन् पत्नीसंयाजान्ततां दर्शयति । कथम् । हेत्वर्थेन असंस्था निर्दिश्यते। यस्मादिमानि असंस्थितानि अहानि, तस्मादेषु पत्नीसंयाजान्ततेति। संस्थितिश्चान्त्येऽहनि । अपिच, येषु अहःसु पत्नीसंयाजान्तता, तेषु असंस्था दृश्यते कीर्त्यमाना । तस्मादसंस्थायाः पत्नीसंयाजान्ततायाश्च सामानाधिकरण्यम् । असंस्थाञ्च प्रागुत्तमाद् दृष्ट्वा, प्रागुत्तमादेव पत्नीसंयाजान्ततामध्यवस्यामः ॥ ३० ॥ सि० ॥

अनुवादो वा दीक्षा यथा नक्तसंस्थापनस्य ॥ ३१ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति, प्रागुत्तमात् पत्नीसंयाजान्तता स्यादिति । किन्तर्हि । सर्वेषामविशेषात्।यदुक्तं, येषु पत्नीसंयाजान्तता, तेषु असंस्था दृश्यते । तस्मादसंस्थायाः प्रागुत्तमादह्नः पत्नीसंयाजान्ततां नियच्छाम इति । नैतदेवम् । न हीदं विधिमूलं दर्शनम् । नान्यप्रमाणमूलम् । अतो मृगतृष्णारूपमेतद्दर्शनम् ॥ यदप्यसंस्था हेतुरिति, तदपि न स्यात् । उक्तं हि— स्तुतिस्तु शब्दपूर्वत्वाद् इति । न च सामानाधिकरण्यमसंस्थापत्नीसंयाजान्ततयोः। पत्नीसंयाजान्तता सर्वेषामह्नां शब्देन गम्यते । असंस्था पुनर्न्यायेन प्रागुत्तमादह्नः । यदेतदसंस्थितो हि तर्हि यज्ञ इति । अर्थवाद एष पत्नीसंयाजान्ततास्तुत्यर्थः । तथाहि । असंस्थितो यज्ञश्चिरेण संस्थास्यते इत्यालोच्यते । यस्माच्चिरेण संस्थास्यते तस्मादवलुप्यतां, पत्नीसंयाजान्तानि अहानि भवन्त्विति । सन्तिष्ठमानेष्वेवाऽहःसु असंस्थावचनं पत्नीसंयाजान्तताप्रशंसार्थम् । संस्थावन्ति हि तानि अहानि । अवभृथादय एषां शेषाः पदार्थाः करिष्यन्ते । यथा दीक्षोन्मोचनवचनं नक्तसंस्थापनस्यार्थवादः । एवमेतद् द्रष्टव्यम् । वरुणपाशाभ्यां वा एषो निधीयते यो दीक्षितोऽहोरात्रे वै वरुणपाशौ यद्दिवा संस्थापयेद् अनुन्मुक्तो वरुणपाशाभ्यां स्यात् । नक्तं संस्थाप्यो वरुणपाशाभ्यामेवोन्मुच्यते आत्मनो हिंसाया इति । अनुन्मुक्तः स वरुणपाशाभ्यां, न तावद्दीक्षया मुच्यते । अवभृथो हि

दीक्षोन्मोचनार्थः । अथवा । उच्यते । वरुणपाशाभ्यामिव निर्मुच्यत इति बहवो नियमास्तदानीं विसृज्यन्ते, यानालोच्य एष वादो भवति । एवमिहापि चिरेण संस्थामालोच्य असंस्थितवचनं भवतीति ॥ ३१ ॥ आ० ॥

स्याद्वाऽनारभ्यविधानादन्ते लिङ्गविरोधात् ॥ ३२॥

वाशब्दात् पक्षो विपरिवर्त्तते । भवेद्वा प्रागुत्तमात् पत्नीसंयाजान्तता । न हि आरभ्य उत्तममहः, एष विधीयते । कथन्तर्हि । सामान्येन पत्नीसंयाजान्तानि अहानि भवन्तीति । तत्रान्ते लिङ्गविरोधो भवति । का पुनर्न्यायेन प्राप्तिरिति । पत्नीसंयाजान्तानि अहानि सन्तिष्ठन्ते इति । तेनैतदुक्तं भवति, शिष्टमवलुप्यते इति । सन्तिष्ठन्ते नानुष्ठीयन्त इति । कर्त्तुर्व्यापार एषु उपरमतीति । तेषु सहक्रियमाणेषु अहःसु अवश्यं कस्मिँश्चित् पदार्थे अवस्थाय अवश्यमपरस्य अह्नः पदार्था अनुष्ठातव्याः । तत्रानियमे प्राप्ते पत्नीसंयाजान्ते संस्थातव्यमिति नियम्यते । तस्यावस्थानस्यैतत् प्रयोजनम् कथमहरन्तरस्य पदार्थानुष्ठानेन यौगपद्यमनुगृह्येतेति । एतद्धि दृष्टमवस्थानकार्य्यम् । यस्मिन्नैतद् दृष्टं, न शक्यं कल्पयितुं तत्रादृष्टम् । तत्र न पत्नीसंयाजान्तता । तच्चान्त्यस्य प्रयोजनं न विद्यते । तस्मात् प्रागन्त्यात् पत्नीसंयाजान्ततेति न्यायेन प्राप्ते लिङ्गदर्शनम्, असंस्थितो हि तर्हि यज्ञ इति ॥ ३२ ॥ आ० नि० ॥ उत्तमान्यानामह्नां पत्नीसंयाजासंस्थाधिकरणम् ॥ ८ ॥

अभ्यासः सामिधेनीनां प्राथम्यात् स्थानधर्मः स्यात् ॥ ३३ ॥

स्तो दर्शपूर्णमासौ । तत्र सामिधेनीः प्रकृत्य उच्यते, त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाहेति । तत्रैषोऽर्थः सांशयिकः । किम् ऋग्धर्म एषः, यत्र तत्रस्था प्र वो वाजा त्रिरभ्यसितव्या ? उत स्थानधर्मः, या अन्याऽपि प्रथममुच्यते सा त्रिरभ्यसितव्या ? इति । कुतः संशयः । उभयथोपपत्तेः । यद्येवमभिसम्बन्धः क्रियते, या असौ उच्चारितानां सामिधेनीनां प्रथममुच्चारिता, सा त्रिरभ्यसितव्येति । ततः प्र वो वाजाया ऋचो धर्मः । अथैवं विज्ञायते, प्राथम्यसंयुक्तं त्रिर्ब्रूयादिति, ततो वचनस्य स्थानधर्मता ॥

किं तावत् प्राप्तम् । ऋचो धर्म इति । कुतः । प्राथम्यस्य व्यक्त्या सम्बन्धात् । व्यक्तेरभ्यासेन । कथमवगम्यते । स्त्रीलिङ्गनिर्देशात् । व्यक्तिविशेषो हि स्त्री नाम । यदि तद्विशेषणं प्राथम्यं स्यात्, ततो लिङ्गंविशेषनिर्देशोऽवकल्पते । साऽपि स्त्री अभ्यासेन सम्भन्त्स्यते । अथ प्रथममनुब्रुवता त्रिरभ्यसितव्यमिति ततो व्यक्तिविशेषो न विवक्ष्येत । तत्र स्त्रीलिङ्गविशेषनिर्देशो नोपपद्यते । अपि च वाक्यभेदः प्रसज्ज्येत । प्रथममुक्तं त्रिरभ्यसितव्यं, प्रथममुक्ता ऋक् त्रिरभ्यसितव्येति । मत्पक्षे पुनः प्राथम्यलक्षिताया ऋचो धर्म उच्यते । तत्रैकार्थविधाने न भवेद्वाक्यभेदः । अपिच श्रुत्या प्राथम्येन स्त्री सम्बध्यते । वाक्येनाभ्यासः । तस्माद् ऋग्धर्मो यत्र तत्रस्था प्र वो वाजा त्रिरभ्यसितव्येति ॥ एवं प्राप्ते ब्रूमः । योऽयं सामिधेनीनां प्रथमायास्त्रिरभ्यास उच्यते स प्रथमस्थाननिमित्तो धर्मो, न ऋचः कस्याश्चिज्जातिनिमित्तः । कुतः ? । न हि कृत्स्नेऽपि ऋग्वेदे प्रथमा नाम काचिद् ऋग् विद्यते, या त्रिरभ्यस्येत । तत्र प्राथम्यम् ऋग्लक्षणार्थं स्यात् । इतरस्मिन् पक्षे श्रुतिर्न लक्षणा । श्रुतिश्च ज्यायसी लक्षणायाः । तस्मादस्मत्पक्षः ॥ अथ यदुक्तं, स्त्रीलिङ्गसम्बन्धादस्मत्पक्ष एव श्रुतिः, वाक्यं च न भिद्यते । स्त्रीलिङ्गोपपत्तेश्चेति ॥

अत्रोच्यते । गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीत्यविशेष्यमाणायामपि व्यक्तौ यदवश्यं प्राप्तं लिङ्गं, तद् आश्रयभूतं गुणस्य भवति । अविधित्सितेऽपि तस्मिँल्लिङ्गविशेषनिर्देशोऽनुवादभूतो भवत्येव । यथा, शुक्लः पुमान्, शुक्ला स्त्री, शुक्लं नपुंसकम् । शुक्ल एकः, शुक्लौ द्वौ, शुक्ला बहव इति । शुक्लां शाटीमानयेति । यद्यपि शाट्याद्यानयनं न विधीयते, शुक्लसम्बन्धमात्रविधित्सा भवति, न तत्र लिङ्गेन विशेषणं क्रियते । तथापि अनुवादभूतः स्त्रीलिङ्गनिर्देशो भवत्येव । शुक्लामानयेति । अनुवादभूतत्वाच्च न वाक्यभेदो भविष्यति । एवञ्च सति, यद्यपि प्राथम्यस्य स्त्रीलिङ्गसम्बन्धः श्रौतस्तथापि प्राथम्यस्यैवाभ्यासेन सम्बन्धो न लिङ्गस्य । यदि लिङ्गस्यैतेन सम्बन्धोऽभिधीयते, प्राथम्यस्यानुवादता कल्प्येत । प्राथम्यसम्बन्धेऽप्यभिधीयमाने वाक्यं भिद्येत । अपि च, नैवात्र विवदितव्यम् । प्रातिपदिकविशेषणं हि स्त्रीशब्दः । स्त्रियां यत् प्रातिपदिकं वर्त्तते, ततष्टाबादय इति । न विशेषणस्य पदान्तरेण सम्बन्धो

भवति । यथा राजपुरुषो गच्छतीति । यदा तु प्राथम्यस्याभ्यासेन सम्बन्धः, तत्र प्राप्तमनूद्यते स्त्रीत्वम् । यानि सामिधेनीषु वचनानि, ऋचस्ताः । स्त्रीलिङ्गश्च ऋक्शब्दः । तत्र यत् प्रथमं वचनं, तस्याश्रय ऋक् । गुणवचनानाञ्च शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीत्यविशेषितायामप्यृचि स्त्रीलिङ्गं भविष्यतीति । यत् प्रथमवचनं, तत् त्रिराहेति । स्त्री च सा ऋक् सामिधेनी । तस्मात् त्रिः प्रथमामन्वाहेति प्राप्तस्य लिङ्गस्यानुवादः । त्रिः प्रथमामन्वाह त्रिरुत्तमां ताः पञ्चदश सम्पद्यन्ते इति पञ्चदशानां सामिधेनीनां सम्पत्तये त्रिर्वचनमुच्यमानं परिपूर्णाया ऋचो भवति, न ऋगवयवस्य । परिपूर्णा च समिन्धनवती न ऋगवयवः । तस्मात् प्राप्तानुवादो लिङ्गस्येति प्राथम्यस्य धर्मो न ऋचः ॥ ३३ ॥ सिद्धान्तः ॥ त्रिः प्रथमामन्वाहेत्यादिषु स्थानधर्मताधिकरणम् ॥ ९ ॥

इष्ट्यावृत्तौ प्रयाजवदावर्त्तेतारम्भणीया ॥ ३४ ॥

स्तो दर्शपूर्णमासौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तत्रारम्भणीया इष्टिः समाम्नाता । आग्नावैष्णवमेकादशकपालं निर्वपेत् सरस्वत्यै चरुं सरस्वते द्वादशकपालमग्नये भगिनेऽष्टाकपालं निर्वपेद् यः कामयेतान्नाद्यः स्यामिति नित्यवदेके भगिनमामनन्ति । आवृत्तिश्च दर्शपूर्णमासयोः श्रूयते । यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । तत्रेष्ट्यावृत्तौ सन्देहः । किमारम्भणीयाऽप्यावर्त्तेत, न ? इति । किं प्राप्तम् । आवर्त्तेतेति । असकृदेव कर्त्तव्येति । कुतः । एवं प्रयोगवचनोऽगृहीतो भविष्यति । प्रयाजवत् । यथाऽङ्गभूताः प्रयाजा आवर्त्तन्ते, एवमङ्गभूता आरम्भणीयाऽप्यावर्त्तेत ॥ ३४ ॥ पूर्व० ॥

सकृद्वाऽऽरम्भसंयोगादेकः पुनरारम्भो यावज्जीवप्रयोगात् ॥ ३५ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति, यदुक्तमारम्भणीया आवर्त्तेतेति । सकृदेव कर्त्तव्या । कुतः । आरम्भसंयोगात् । दर्शपूर्णमासयोरारम्भेण संयुज्यते । साधारणश्च सर्वेषां प्रयोगाणामारम्भः । कथम् । अग्नीनाधाय सर्वः सङ्कल्पयति । पर्वणि पर्वणि मया दर्शपूर्णमासौ कर्त्तव्याविति । एवञ्च अध्यवसाय दर्शपूर्णमासौ कर्त्तव्याविति, आरम्भणीया क्रियते । एष एवास्य आरम्भो यदध्यवसानं

म्भ । तच्च साधारणं सर्वेषां प्रयोगाणाम् । यावज्जीवप्रयोगात् । अथापि प्रथमं प्रवर्त्तनमारम्भस्तथापि प्रथमप्रवृत्तेन सर्वे प्रयोगाः कृता भवन्ति । तस्मात् सकृदारम्भणीया कर्त्तव्येति ॥ ३५ ॥ ॥ ॥ सिद्धान्तः ॥ यावज्जीवदर्शपूर्णमासयोरारम्भणीयेष्टेः सकृदनुष्ठानाधिकरणम् ॥ १० ॥

एवं वा —

इष्ट्यावृत्तौ प्रयाजवदावर्त्तेतारम्भणीया ॥ ३४ ॥

यस्तु प्रथमः पदार्थ आरम्भ इति, तत्रैष संशयः । किं दर्शपूर्णमासयोरारभ्यमाणयोरारम्भणीया प्रथमं पदार्थं सम्यञ्चं करोति, उत पुरुषस्यारभमाणस्य प्रथमं दर्शपूर्णमासयोः प्रवर्त्तमानस्यारम्भणीया कर्त्तारमारम्भणयोग्यं करोति ? । किं प्राप्तम् । दर्शपूर्णमासयोः प्रकरणात् तयोरारम्भे स्यात् । पुरुषसम्बन्धे फलं कल्पयितव्यम् । तस्माद्दर्शपूर्णमासारम्भे । एवञ्चेद् आरम्भभेदादिष्ट्यावृत्तौ प्रत्यारम्भं स्यात् । यथा प्रयोगावृत्तौ प्रयाजाः ॥ ३४ ॥ पूर्व० ॥

सकृद्वाऽऽरम्भसंयोगादेकः पुनरारम्भो यावज्जीवप्रयोगात् ॥ ३५ ॥

सकृद्वा भवितुमर्हति । कुतः । पुरुषारम्भसंयोगात् । पुरुषे दर्शपूर्णमासावारभमाणे विधीयते । कुतः । निर्वपेदिति हि श्रुत्या कर्त्तृसम्बन्धः क्रियते, तत्र पुरुषप्रयत्नवचनं विवक्षितस्वार्थं भवति । इतरथा पदार्थमात्रे विधित्सितं कर्त्तुः प्रयत्नवचनमविक्षितं स्यात् । प्रयोगवचनप्राप्तमेवानूद्यते । यत्तु, कर्त्तृसम्बन्धे फलं कल्पयितव्यम् । तन्न कल्पयिष्यते । कृतारम्भणीयाकः पुरुषः प्रयोगवचनेन ग्रहीष्यते । एवञ्चेदेकस्मिन्नेव आरम्भे कृतारम्भणीयाके कृते पुरुषे तत्र प्रयोगाद् यावज्जीवं प्रयोगे कृतारम्भणीयाकः पुरुषो भवति । प्रथमं दर्शपूर्णमासौ आरभमाणः कृतारम्भणीयाको जातः । द्वितीयादिष्वपि प्रयोगेषु दर्शपूर्णमासौ आरप्स्यमानः कृतारम्भणीयाको जात इति योग्य एव भविष्यति ॥ अथोच्यते, समानेऽहनि आरप्स्यमान इति भवति । न च द्वितीयादिषु प्रयोगेषु समानेऽहनि कृतारम्भणीयाकोऽसाविति । अत्रोच्यते । द्वितीयादिष्वपि प्रयोगेषु समाने एव अहनि दर्शपूर्णमासावारप्स्यमानोऽसौ कृतारम्भणीयाको जात

इति योग्य एव भविष्यति ॥ ३५ ॥ सिद्धान्तः ॥ आरम्भणीयेष्टेः पुरुषसंस्कारताधिकरणम् ॥ १० ॥

अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्तत्राऽचोदितप्राप्तश्चोदिताभिधानात् ॥ ३६ ॥

स्तो दर्शपूर्णमासौ। तत्र निर्वापमन्त्रः। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति । तत्रैषोऽर्थः सांशयिकः । किं सवित्रऽश्विपूषशब्दानां विकृतौ ऊहः, उत अनूह इति। तत एतत्तावत् परीक्ष्यते। कर्मणि समवेतमर्थमेते शब्दा अभिदधति, उतासमवेतमिति। यदि समवेतमूहिष्यन्ते । अथासमवेतम्। अविकृताः प्रयोक्ष्यन्ते। तदुभयमपि सह परीक्ष्यते। किं तावन्नः प्रतिभाति। तत्र समवेतमभिवदन्तीति। कुतः। एतद्धि मन्त्रपदानां दृष्टं प्रयोजनं, यत् समवेतमर्थं प्रकाशयन्तीति। तत्रासमवेतार्थप्रकाशने न किञ्चिदपि दृष्टं प्रयोजनम् । समवेतानान्तु प्रकाशने दृष्टमस्ति। तद्यदि समवेताभिधायिन एते शब्दास्ततः प्रयोजवन्तः। कथं पुनः समवेताभिधायिनः । यदि नाम सवित्रादयः शब्दा अग्न्यादीनां वाचका भवेयुः, यदि वा सवित्रादयो देवताविशेषा दर्शपूर्णमासयोः स्युः, तन्मन्त्रपदानामदृष्टार्थता मा भूदित्यन्यतरदध्यवसीयते। मान्त्रवर्णिको वा देवताविधिः । सवित्रादयो वा शब्दा अग्न्यादीनां वाचका भवेयुः । तस्मादर्थवत्त्वादन्यतरदध्यवसेयम् ॥ अत्राह। ननु अग्नये जुष्टमित्यत्रावयवभूताः सवित्रादयोऽग्न्यादीनां वचना अपि सन्तोऽग्न्यादिभिः प्रकाशिताया देवताया न किञ्चिदप्यधिकं कुर्य्युः। नो खल्वपि सवित्रादिवचना एव मान्त्रवर्णिकाः शक्नुवन्त्युपकर्त्तुम्। अत्रोच्यते। पृथग्वाक्यानि एतानि भविष्यन्ति। तेषां, जुष्टन्निर्वपामीति साधारणोऽनुषङ्गः । तानि वाक्यानि दर्शपूर्णमासयोर्गुणभूतानि। यद्येतद्देवत्यानि अत्र हवींषि विद्यन्ते, ततोऽवकल्पन्ते, इत्यर्थापत्त्या मान्त्रवर्णिक्यो देवता विधीयन्ते। अग्न्यादिवचनं तावत् सवित्रादीनाम् । पृथग्वाक्यानि वा अग्निवाक्येन वैकल्पिकानीति ॥ एवं प्राप्ते ब्रूमः। नैवमादीनि ऊहितव्यानीति। अचोदित ऊहो न प्राप्नोति । चोदिताभिधानान्मन्त्रस्येति। तत एतद्वर्ण्यते। असमवेताभिधायिनः सवित्रादय इति कथम् । न ह्यत्र

सवित्रादिदेवत्यं कर्म्म चोद्यते। न च अग्न्यादीनामर्थेषु सवित्रादयः शब्दाः प्रसिद्धाः ॥ अत्राह । नन्वर्थापत्त्या अन्यतरदध्यवसीयेतेत्युक्तम् । सति एतद्देवत्ये कर्म्मणि सवित्रादिवाक्यानि उपपद्यन्ते । अग्निवचनत्वे वा सति, या हविषो देवता, सा मन्त्रवचनेन प्रकाशयितव्या । सवित्रादयश्च शब्दा निर्वापवाक्ये प्रकाशनार्थाः । ते हविर्देवतां प्रकाशयन्त उपपद्यन्ते, नान्यथेति । अग्न्यादयश्च हविर्देवता इति तद्वचना इत्यध्यवसीयते। अत्रोच्यते । यदि अकल्प्यमाने आनर्थक्यमेषां स्यात्ततोऽन्यतरत् कल्प्येत । अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावो भवतीति। न त्वेवमकल्प्यमानेऽप्यानर्थक्यम् । तस्मान्न अन्यतरस्यापि कल्पने किञ्चिदस्ति प्रमाणम् । न च चोद्यन्ते एतच्छब्दिका देवताः। तत्राचोदितमप्राप्तमूहं चोदिताभिधानात् ॥ ३६ ॥ सि० ॥

अथ यदुक्तं, प्रत्यायकेन शब्देन प्रकाश्यन्तेऽत्र देवताः। तत्राऽप्यश्रुतानां प्रकाशने न किञ्चिदस्ति प्रयोजनमिति । तत् परिहर्त्तव्यम् । अत्रोच्यते—

ततश्चावचनं तेषामितरार्थं प्रयुज्यते ॥ ३७ ॥

ततश्च तेन कारणेन अश्रुतानां वचनं न क्रियते, सवित्रादिभिः शब्दैः। केन तर्हि कारणेन क्रियते । इतरार्थं प्रयुज्यते । निर्वापस्तुत्यर्थम् । देवस्य सवितुः प्रसवे देवेन सवित्रा यजमानेन प्रसूते, उदिते वा सवितरि, अश्विनोर्बाहुभ्यां परिक्रयमभिप्रेत्य यजमानयोर्दम्पत्योर्बाहुभ्याम्, अश्विनौ हि तौ अग्न्याधेये अश्वदानेन आशितवन्तौ वा तद्यज्ञफलमश्नुवाते । तद्बाहू इति स्वौ बाहू व्यपदिशति। देवताध्वर्य्वोर्वा अश्विनोरेतौ बाहू इति। पूषणन्तु यजमानमेव मन्यते पुष्णातेः । एवं सर्वे निर्वापविशेषप्रकाशनार्थाः ॥ अत्राह। कस्माद् न उत्कृष्टाः सवित्रादयः शब्दाः प्रकरणान्तरे सवितारमश्विनौ पूषणञ्चाभिवदन्ति ? । लिङ्गेन तत उत्कृष्यमाणाः प्रकरणं बाधितुमर्हन्ति। अत्रोच्यते। सवित्रादयः परविशेषणं विभक्तिश्रुत्या क्रियन्ते। प्रातिपदिकार्थस्तु अव्यतिरिक्त इति गम्यते। तत्र लिङ्गं श्रुत्या बाध्यते। लिङ्गं हिं प्रातिपदिकार्थप्रकाशनं देवतार्थमिति कृत्वा इह देवताभावाद् यत्र देवता तत्रोत्कर्षति । विभक्तिश्रुतिस्तु प्राति-

पदिकाऽर्थे पदार्थान्तरविशेषणं ज्ञापयति । नचेहास्ति पदान्तरम् । श्रुतिश्च लिङ्गाद् बलीयसी । तस्मान्नोत्कर्षः ॥ आह । यदा सवित्रादयो यजमानपराः, तदा सत्रे कथमनूह इति । उच्यते । जोषणार्थमिदं वाक्यं, नानुज्ञापनार्थम् । अजोषितस्य जोषणं कर्त्तव्यम् । तत्र दृष्टोऽर्थः । अनुज्ञापनं पूर्वं वृणानेन कृतं, तददृष्टार्थमापद्येत । अपिच । जुष्टं निर्वपामीति जोषणकरणं निर्वपामीति भावशब्देनोच्यते । सवितुः प्रसवे इत्यनुज्ञानिर्वृत्तापरविशेषणार्थं कीर्त्यते । अननुज्ञातमपि निर्वपणं शब्दार्थं कुर्य्यादेव, न त्वजोषितेन यागः श्रूयते । तस्माज्जोषणार्थत्वात् परार्थाः सवित्रादयः शब्दा नोहिष्यन्ते इति ॥ ॥३७॥आ०नि०॥ निर्वापमन्त्रे सवित्रादिशब्दानामनूहाधिकरणम्॥११॥

गुणशब्दस्तथेतिचेत् ॥ ३८ ॥

तस्मिन्नेव वाक्ये दर्शपूर्णमासयोः, अग्नये जुष्टं निर्वपामीति समाम्नायते । तत्रायमर्थः सांशयिकः । किमग्निशब्दोऽपि विकृतौ नोह्यते, सोऽपि न समवेतवचनः। उत ऊहितव्यः,समवेतवचनो हि सः ? इति। किं प्राप्तम् । एवं चेत्तत्र संशयः, सोऽपि गुणशब्दस्तथैवासमवेतवचनः कुतः । सवित्रादयोऽस्मिन् वाक्येऽसमवेतवचनाः । यद्यग्निशब्दोऽपि असमवेतवचनः, एवमवैलक्षण्यं भविष्यति । अवैलक्षण्यञ्च न्याय्यम् । यदि समानं कारणं, तेन न्यायेन अवैलक्षण्यमुच्यते । समानञ्च इह कारणं, य एषां शब्दानामर्थः, स इह प्रयोगे नास्तीति । अग्नये जुष्टं निर्वपामीत्यस्यापि योऽर्थः, स इह नास्ति । अग्नये जुष्टं निर्वपामीत्यनेन जुष्टस्य निर्वाप उच्यते । न चेह जुष्टस्य निर्वापोऽस्ति । अजुष्टं चेह निर्वप्तव्यम् । निर्वापेणैव तज्जोष्यते । तस्मान्न समवेतवचनः । तस्याप्यश्रुतार्थस्य वचनमुत्तरार्थं प्रयुज्येत निर्वापस्तुत्यर्थेनेति । तस्मादेतदपि विकृतौ नोहितव्यमिति ॥ ३८ ॥ पूर्व० ॥

न समवायात् ॥ ३९ ॥

नैतदेवम्, समवेतवचनो हि अग्नये जुष्टं निर्वपामीति । नन्वेतदुक्तं, जुष्टस्यात्र निर्वाप उच्यते । नच जुष्टं निर्वप्तव्यमिति । अत्रोच्यते । नैव जुष्टस्य निर्वाप एतेन वाक्येनोच्यते । किन्तर्हि । निर्वापेण जुष्टकरणम् । अग्नये जुष्टं करोमीति । एवं हि दृष्टार्थं भवतीति । अतोऽतुल्यकारणत्वाद् वैलक्षण्यमेव न्याय्यम् । तस्मात् समवेत-

वचनोऽग्निशब्द ऊहितव्यश्च विकृताविति ॥ ३९ ॥ सिद्धान्तः ॥ अग्नये जुष्टमिति मन्त्रे अग्निशब्दस्य विकृतावूहाधिकरणम् ॥ १२ ॥

एवं वा—

गुणशब्दस्तथेति चेत् ॥ ३८ ॥

दर्शपूर्णमासयोरामनन्ति, धान्यमसि धिनुहि देवानिति दृषदि आवपतीति ॥ तत्र धान्यशब्दं प्रति संशयः किं समवेतवचनः, न वा ? इति । किं प्राप्तम् । योऽयं गुणवचनशब्द इव लक्ष्यते धान्यशब्दः, नासौ समवेतवचनः स्यात् । धान्यशब्दो हि धान्यमभिवदति, न तु धान्यमोप्यते । सतुषे हि धान्यशब्दो वर्त्तते । तण्डुलेष्वेव ओप्यमानेषु धान्यप्रकाशनं क्रियते । तद् असमवेतस्य प्रकाशने अदृष्टं यथा स्यादिति । तस्मादविकृतिषु नोहितव्यमिति ॥ ३८ ॥ पूर्व० ॥

न समवायात् ॥ ३९ ॥

नैतदेवम् । समवेतो हि धान्यशब्दार्थः । स हि तण्डुलेषु वर्त्तते । तद्विकारत्वाल्लक्षणया । यथा काशिकेषु शालयो भुज्यन्ते, गावः पीयन्ते इति श्रुत्युपादानेऽदृष्टं कल्पयितव्यमिति लक्षणाशब्दः परिकल्प्यते । तस्मात् समवेतवचनः । विकारे च ऊहितव्य इति ॥ प्रयोजनमस्ति । शाक्यानामयनं षट्त्रिंशत्संवत्सरम् । तत्रेदं समाम्नायते । संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति, स तत्र यान् मृगान् हन्ति तेषां तरसाः सवनीयाः पुरोडाशा भवन्तीति । तत्राविकारेण धान्यमसि धिनुहि देवानिति प्रयोगः कर्त्तव्यः । यथा पूर्वः पक्षः । यथा सिद्धान्तः । ऊहः कर्त्तव्यः । मांसमसि धिनुहि देवानिति ॥ ३९ ॥ सिद्धान्तः ॥ तण्डुलावापमन्त्रे धान्यशब्दस्योहाधिकरणम् ॥ १२ ॥

चोदिते तु परार्थत्वाद्विधिवदविकारः स्यात् ॥ ४० ॥

स्तो दर्शपूर्णमासौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तत्र इडानिगदः, इडोपहूता इत्येवमादिः । तत्रेदमाम्नायते । दैव्या अध्वर्य्यव उपहूता उपहूता मनुष्या य इमं यज्ञमवान् ये च यज्ञपतिं वर्द्धानिति । तत्रायमर्थः सांशयिकः । किं बहुयजमानके यज्ञपतिशब्द ऊहितव्यः ? उताविकारेण प्रयोक्तव्य इति ॥ तत्रेदं तावत् परीक्ष्यते । किं समवेतवचनो यज्ञपतिशब्दः, उतासमवेतवचन इति । कथं समवेतवचनः । यदि यज्ञपतिवृद्धिवचनं यज्ञपतेरुपकारकं, ततः सम-

वेताभिधायी । अथैतत् स्तुत्यर्थं, ततो न समवेताभिधायी ॥ किं प्राप्तम् । ऊहितव्यः, समवेताभिधायी । कथम् । यज्ञपतिवृद्धिवचनाद् यज्ञपतयः प्रोत्सहन्ते । इडापदानपेक्षैश्च पदैर्यज्ञपतिवृद्धिरभिधीयते । तस्मान्मुख्यः प्रत्ययः । इडास्तुतौ जघन्यः । तस्मादर्थविप्रकर्षान्न इडास्तुतिः । अतो यज्ञपतिशब्द ऊहितव्यः । यस्यैव वृद्धिर्नोच्यते, स एवोत्साहसंस्कारेण संस्कृतो न स्यात् । तस्मात् सर्वे वृद्धिसंस्कारार्थं वदितव्याः । सर्वेषु वदितव्येषु बहुवचनम् ॥ एवं प्राप्ते ब्रूमः । चोदिते तु परार्थत्वाद्विधिवदविकारः स्यात् । चोदितमपि यत् समवेतं परार्थं चिकीर्ष्यते न स्वसंस्कारार्थं, तदप्यविकारेण प्रयुज्यते । तद् नोहितव्यं स्यात् । परार्थत्वात् । अत्र हि यज्ञपतिवचनं वृद्धिविशेषणार्थं, वृद्धिवचनञ्च इडास्तुत्यर्थम् । कथमवगम्यते । इडोपह्वानेनैकवाक्यत्वात् । इडाप्रकरणाच्च ।

अथ यदुक्तं— गम्यते, इडापदानपेक्षं यज्ञपतिवृद्धिवचनं तेषामुत्साहकम् । उपहूता मनुष्या ये यज्ञपतिं वर्द्धयेयुरिति । अत्रोच्यते । स यो हैवं विद्वानिडया चरतीत्यभिधाय, अथ प्रतिपद्यते इडोपहूतोपहूतेडोपास्मा इडाह्वयामि इडोपहूता इत्याह । तेनावगम्यते, यस्यैष आरम्भः स इडाया मन्त्र इति । तन्मध्यपतितश्च उपहूता मनुष्या इत्येवमादिः, यज्ञपतिं वर्द्धान् इत्यन्तः । तस्मादिडामुपह्वातुं वदितव्य इति वाक्यादवगम्यते । समर्थश्च इडोपह्वाने । यजमानन्तु प्रोत्साहयितुं वदितव्य इति नास्ति वाक्यम् । केवलं वदितुं सामर्थ्यमस्ति । न च सामर्थ्यमात्रेण वाक्यादृते विनियोगा भवन्ति । इडाप्रकरणं चैवमनुगृहीतं भविष्यतीति । इडया च सहैकवाक्यता । तस्मादियं वचनव्यक्तिः, उपहूता मनुष्या ये यज्ञपतिं वर्द्धयितुं समर्था इति । तत्र यज्ञपतिविशिष्टा वृद्धिर्वक्तव्येति । एकस्मिन्नपि यजमाने कीर्त्तिते भवति विशेषणकार्य्यम् । तस्माद् अविकारः स्याद् विधिवत् । यथा यत्र यजमानो गुणभूतो विधीयते, तत्र येनकेनचिद् यजमानेन स विधिः सिद्ध्यति । यथा, यजमानसम्मितौदुम्बरी भवति । शुक्रं यजमानोऽन्वारभते इति ॥ ४० ॥ इडोपह्वानमन्त्रे यज्ञपतिशब्दस्यानूहाधिकरणम् ॥ १३ ॥

विकारस्तत्प्रधाने स्यात् ॥ ४१ ॥

अस्ति दर्शपूर्णमासयोः सूक्तवाकः । सूक्तवाकेन प्रस्तरं प्रहरतीति । तत्रेदं समाम्नायते । अयं यजमान आयुराशास्ते इति । तत्रायमर्थः सांशयिकः । किं बहुकर्तृके विकारे यजमानशब्द ऊहितव्यः, उत नेति । किं प्राप्तम् । अविकारेण प्रयोक्तव्यः । तथा सामर्थ्यमनुगृह्यते । न चायं समवेतवचनः । परार्थेन हि अत्र यजमान आयुराशास्ते इति आयुराशासनेन यजमानस्य न कश्चिद् दृष्टोऽर्थः सञ्जन्यते। तस्माद् आयुराशासनमदृष्टार्थम् । यजमानविशिष्टा आशीरेकेनापि यजमानेन कीर्त्तितेन यथा श्रुता, तथा कृता भवति । यथा यजमानेन सम्मितौदुम्बरी भवतीति । तथैतत् । तस्मादविकारेण प्रयोक्तव्यमिति ॥ एवं प्राप्ते ब्रूमः । विकारः स्यादूहः । तत्प्रधाने यजमानप्रधाने। कथं यजमानप्राधान्यम् । एवं श्रूयते । सूक्तवाकेन प्रस्तरं प्रहरतीति। यदि सूक्तवाकः प्रस्तरप्रहरणे तत्साधनं तत्फलं वा प्रकाशयति । ततः सूक्तवाकेन प्रस्तरः प्रहृतो भवति । प्रहरणफलमायुराशासनं कल्पितम् । यजमान आयुराशास्ते, एतेन कर्मणेति यजमानेन प्रस्तरः प्रहृतो भवति । तत्र य एव यजमानः फलं प्रति प्रधानभूतो न सङ्कीर्त्यते, तेन न प्रहृतं स्यात् । तस्मात् सर्वे समवेताः सङ्कीर्त्तयितव्याः । सर्वेषु च कीर्त्यमानेषु बहुवचनं भवति । तस्मादूहो यजमानस्येति ॥ ॥ ४१ ॥ प्रहरणकरणसूक्तवाके यजमानशब्दस्यऊहाधिकरणम् ॥१४॥

असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥ ४२ ॥

अस्ति ज्योतिष्टोमः । तत्र सुब्रह्मण्यानिगदः समाम्नातः । इन्द्र आगच्छ हरिव आगच्छ मेधातिथेर्मेष इत्येवमादिः । अग्निष्टुति च श्रूयते । आग्नेयी सुब्रह्मण्या भवतीति । तत्रेन्द्रशब्दस्य स्थाने ऊहः क्रियते । अथेदानीं हरिव आगच्छ इत्येवमादिषु संशयः । ऊहितव्यं, न ? इति । किं प्राप्तम् । तद्विशिष्टं प्रतीयेत । तेन विशिष्टम् । इन्द्रपदस्थाने ऊहः । एतेन विशेषेण विशिष्टमविकृतमेव वचनं प्रतीयेत । कुतः । असंयोगात् तदर्थेषु । नैषां शब्दानां तेष्वर्थेषु संयोगः, हरिवत्तादिषु, न हरिवदादयः समवेता इन्द्रे विद्यन्ते गुणाः । प्रमाणाभावात् । अविद्यमानास्तस्योच्यन्ते । एवं श्रुत्या अर्थः प्रतिज्ञातो भवति । इतरथा लक्षणा स्यात् । न हरिवत्तादय उच्येरन् । हरिवत्तादिभिः सोऽस्य गुणो लक्ष्यते । अथासमवेतवचना मुख्यार्था एव भवि-

ष्यन्ति, आत्मीयं गुणं न लक्षयिष्यन्तीत्युच्येत । तथा अस्मत्पक्ष एव। तस्माददृष्टार्थे गुण उच्यत इति अविकारेण प्रयोगः स्यात् । तत्रैवं वचनव्यक्तिर्भवति । इन्द्र आगच्छ हरिव आगच्छ इति हरिवदादीन् अस्य गुणानारोपयति । हरिवदादिभिः सम्बद्ध्यमान इन्द्रोऽभ्युदयकारी भवति । शक्यते चाग्निरपि तैः सम्बन्धयितुम् । तस्मादविकारेण गुणानां प्रयोगः ॥ अथोच्यते, अस्मादेव सामानाधिकरण्यवचनादिन्द्रे एते गुणा विद्यन्ते इति । तन्न । अविद्यमानेष्वपि स्तुत्याऽस्य सामानाधिकरण्यवचनमुपपद्येतैव । यथा इन्द्रो बृहस्पतिर्देवदत्त इति ॥ ४२ ॥ सि० ॥

कर्माभावादेवमितिचेत् ॥ ४३ ॥

इति चेद् भवान् पश्यति, अविकारेण हरिवदादीनां वचनमिति । कर्माभावादेवं स्यात् । यद्येते गुणा इन्द्रे न भवेयुः । कर्मजास्तु एते गुणा इन्द्रस्य विद्यन्ते । हरिव आगच्छेति । पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी ताभ्यां ह्येष सर्वं हरतीति । मेधातिथेर्मेष इति मेधातिथिं हि काण्वायनं मेषो भूत्वा जहार । वृषणश्वस्य मेनका नाम दुहिता बभूव, तामिन्द्रश्चकमे । गौरावस्कन्दन् इति, गौरमृगो भूत्वा अरण्याद्राजानं सोमं पिबतीति वचनैरिमे गुणा इन्द्रस्याख्यायन्ते । तस्मात् समवेतवचना हरिवदादयः शब्दाः । तथासतीन्द्रप्रत्ययायोच्चार्य्यन्ते इति नादृष्टकल्पना भविष्यति । तत्रैवं वचनव्यक्तिः । इन्द्र आगच्छ, हरिव आगच्छ इति । हरिवत्तादिगुण एव यस्त्वं स आगच्छेति । लक्षणा च अदृष्टकल्पनाया ज्यायसी । तस्माद्धितव्या हरिवदादयः शब्दा इति ॥ ४३ ॥ आ० ॥

न परार्थत्वात् ॥ ४४ ॥

नैतदेवम् । परार्था हि हरिवदादयः शब्दा इन्द्रस्तुत्यर्थाः । स्तुतये हरिवदादिसम्बन्धोऽस्य क्रियते । तत् पुरस्तादेवोपवर्णितम् । स्तुत्यर्थश्चाग्नेरप्येतैरभिसम्बन्धः शक्यते कर्त्तुम् । यत्तूक्तं, समवेता गुणा इन्द्रस्य विद्यन्ते, पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी इत्येवमादिभिर्वचनैरवगता इति । तन्न । न हीमानि वचनानीन्द्रस्य सम्बन्धिनौ हरी विदधति । न ह्येवमभिसम्बन्धः क्रियते, यावेतौ पूर्वपक्षापरपक्षौ ताविन्द्रस्य हरी इति । तत्र हि हेतुरुपदिश्यते । ताभ्यां ह्येष सर्वं

हरतीति । न हीदं प्रसिद्धं, ताभ्यामिन्द्रः सर्वं हरतीति । सिद्धो हि हेतुर्भवति, न प्रसाध्यः । यथा तु इमौ हर्त्तारौ प्रसिद्धौ, कालेन सर्वमपक्षीयते इति, तथा नेन्द्रस्याग्नेश्च कश्चिद्विशेषः । तत्र एभिरभिधानमग्नेः प्राप्नोत्येव ॥ अथ इन्द्रस्य हर्त्तृत्वं विधीयत इत्युच्यते । तथा च वाक्यं भिद्येत । इन्द्रस्यैतौ हरी इत्येतदपि विधातव्यम् । अथैतन्न विधीयते, तथा स एव दोषः । नास्त्यग्नेरिन्द्रस्य वा विशेष इति । अथ पूर्वपक्षापरपक्षाविन्द्रस्येति विधीयते, तौ च हरी । तस्मादिन्द्रो हरिवानिति । तथा हेत्वप्रसिद्ध्यादिः स एव दोषः । न च विधीयमाने वैशब्दो भवति । प्रसिद्धवचनो ह्येष दृष्टः । न वै स्त्रैणानि सख्यानि सन्तीति यथा ॥

तथा मेधातिथेर्मेष इत्येवमादि इतिहासवचनमिव प्रतिभाति । इतिहासे च विधौ सति आदिमत्तादोषो वेदस्य प्रसज्ज्येत । अस्त्विति चेत् । तथा सति तस्याप्रामाण्यान्मेधातिथेर्हि काण्वायनस्य मेष इत्यप्रसिद्धिः । सर्वत्र च निगदविधानम् । तत्रापरस्मिन् विधीयमाने वाक्यभेदप्रसङ्गः । तस्मान्नैते गुणा इन्द्रे विद्यन्ते इति असमवेतवचनत्वादविकारेण प्रयोग इति ॥ तदेतद् न रोचयन्ते याज्ञिकाः । ऊहं कुर्वन्ति । अग्न आगच्छ रोहिताश्व बृहद्भानो धूमकेतो जातवेदो विचर्षण इति ॥ ४४ ॥ आ० नि० ॥ सुब्रह्मण्याह्वाननिगदे हरिवच्छब्दस्यानूहाधिकरणम् ॥ १५ ॥

अथेदमन्यदुदाह्रियते—

असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥ ४२ ॥

अस्ति साद्यस्क्रः । तत्रेदं समामनन्ति । साण्डस्त्रिवत्सः सोमक्रयण इति । अस्ति तु प्रकृतावेकहायनी क्रयार्था । तत्रेदमाम्नायते । इयं गौस्तया ते क्रीणामि तस्यै शृतं तस्यै शरः तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनमिति । तदिह चोदकेन प्राप्तम् । तत्र सन्देहः । किं गोशब्दस्थाने ऊहं कृत्वाऽवशिष्टानां पदानामविकारः ? उत सर्वेषामूह इति । किं प्राप्तम् । गोपदार्थविशिष्टमेवोहवचनं स्यात् । तस्यै शृतमित्येवमादीनामविकारः, असंयोगाच्छृतादिभिरर्थैः । तेषामेकहायन्याम्, एकहायनीत्वादेव । न हि एकहायनी दुग्धे, तस्यामसमवेतं वदन्ति एते । तस्मात् साण्डेऽपि अविकारेण प्रयोक्तव्या इति ॥ ४२ ॥ सि० ॥

कर्माभावादेवमिति चेत् ॥ ४३ ॥

इति चेद् एवं भवान्मन्यते, नैकहायन्यामेते समवेतान् अर्थान् अभिवदन्तीति । भवेदेतदेवं, यद्येकहायन्या इमे गुणा न भवेयुः, कालान्तरे तु तस्या उपपद्यन्ते, न तु साण्डस्य । भविष्यत्कालवचना अप्येते प्ररोचनार्था भवन्ति । तस्यै शृतं भविष्यति । तस्मान्नाविकारेण प्रयोक्तव्या इति ॥ ४३ ॥ आ० ॥

न परार्थत्वात् ॥ ४४ ॥

नैतदेवम् । अविकारेण प्रयोक्तव्या इति । असमवेतवचना ह्येते नैकहायन्यां भवन्ति । एकहायनीत्वादेव । अथोच्यते, कालान्तरे भविष्यन्तीति । साण्डेऽपि कालान्तरे भवितुमर्हन्ति । साण्डादपि हि या धेनुर्जनिष्यते, सा धोक्ष्यते इति । तस्मादविकारेण प्रयोक्तव्या इति ॥ ४४ ॥ आ०नि० ॥ तस्यै शृतमिति मन्त्रेऽनूहाधिकरणम् ॥१५॥

लिङ्गविशेषनिर्देशात् समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वात् ॥ ४५ ॥

अस्ति ज्योतिष्टोमः । तत्र पशवः समाम्नाताः । आग्नेयः पशुरग्निष्टोमे आलब्धव्य ऐन्द्राग्नः पशुरुक्थ्ये ऐन्द्रावृष्णिः षोडशिनि सारस्वती मेषी अतिरात्रे इति । अस्ति तु अग्नीषोमीयेऽध्रिगुप्रैषः । उपनयत मेध्यादुर आशासाना मेधपतिभ्यां मेन्ध इति । तत्र सन्देहः । किं सारस्वत्यां मेष्यामध्रिगुवचनं कर्त्तव्यं, न ? इति । नन्वग्नीषोमीयार्थं तत्, चोदकेनेह प्राप्तमिति । अत्रोच्यते । सर्वेषां समानो विधिरिति कृत्वा चिन्ता ॥ किं तावत् प्राप्तम् । समानविधानेष्वेषु पशुषु अप्राप्ता सारस्वती मेषी अध्रिगुवचनम् । कुतः । लिङ्गविशेषनिर्देशात् । विशिष्टलिङ्गो हि अध्रिगुवचनेन निर्दिष्टः । प्रास्मा अग्निं भरता इति पुंशब्दः । स्त्रीत्वं चास्याः । न च पुंवचनः स्त्रियमभिवदितुमलं भवति शब्दः । तस्मादध्रिगुवचनम् । अप्राप्ता सारस्वती मेषीति ॥ ४५ ॥ सि० ॥

पश्वभिधानाद्वा तद्धि चोदनाभूतं पुंविषयं पुनः पशुत्वम् ॥ ४६ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति । अप्राप्ता सारस्वती, अध्रिगुवचनमिति । तस्यामप्यध्रिगुवचनं स्यात् । कुतः । प्रकरणात् ।

समानं प्रकरणं सर्वेषां पशूनामिति कृत्वा चिन्त्यते । तेन सारस्वत्या अपि प्राप्नोतीति । लिङ्गविशेषादयुक्तं तस्यामिति यदुच्यते, तन्न । पश्वभिधानात् । अस्ति तत्र पशुत्वं सन्निहितम् । तदभिप्रेत्य, प्रास्मा अग्निं भरता पशव इति ब्रूयात् । तद्धि चोदनाभुतं, सर्वनामशब्दस्य पुंविषयत्वम् । तत् पशुशब्देनोच्यते । अस्ति च तद् मेष्याम् । तद-भिप्रेत्य पशुशब्दसमानाधिकरणं सर्वनामशब्दं समुच्चारयिष्यति । एवं प्रकरणमनुग्रहीष्यते । तस्मात् प्राप्नुयात् सारस्वती अध्रिगुवचनमिति ॥ ४६ ॥ पूर्व० ॥

विशेषो वा तदर्थनिर्देशात् ॥ ४७ ॥

वाशब्द एतं पक्षं व्यावर्त्तयति । नैतदस्ति, प्राप्नुयात् सारस्वती अध्रिगुवचनमिति । अयमन्यः पक्षः । न प्राप्नुयादिति । कुतः । विशेषो वा तदर्थनिर्देशात् । पुमर्थे ह्येष शब्दो निर्देष्टुं शक्नोति । स्त्रीलिङ्गश्चायमर्थो मेषीति । स्त्रियं पुंशब्दो न शक्नोत्यभिवदितुमिति प्रथम एव पक्षः संकीर्त्तितः । केवलं परपक्षस्यानवक्लृप्तिर्वक्तव्या । ॥ ४७ ॥ उत्तरम् ॥

पशुत्वं चैकशब्द्यात् ॥ ४८ ॥

अथ यदुक्तं, पशुत्वाभिप्रायमेतद्वचनम् । एको हि शब्दः पशुत्वस्य च पशोश्च । तेन प्रास्मै पशव इत्यभिसम्बन्धो भविष्यतीति । तत् परिहर्त्तव्यमिति ॥ ४८ ॥ आ० ॥

यथोक्तं वा सन्निधात् ॥ ४९ ॥

यथोक्तं स्यादध्रिगुवचनम् । अप्राप्ता सारस्वती । कुतः । पूर्वस्मादेव कारणाल्लिङ्गविरोधादिति । यदुक्तं, पशुशब्दसमानाधिकरणः सर्वनामशब्दः प्रयोक्ष्यते इति । तन्न । कुतः । सन्निधानात् । सन्निहितवचनो हि सर्वनामशब्दः । उच्चरितमात्रो यः पदार्थः शब्देन सन्निहितः, तेन सम्बद्ध्यते । अथ तस्मिन्नसति लिङ्गादिसर्वविशेषणविशिष्टे रूपेण सन्निहिते प्रयुज्यते । सन्निधाने न एकेन विशेषणेन विशिष्टां व्यक्तिमभिवदितुं शक्नोति । सन्निधानात्तत्रैकं सामान्यमाश्रीयते, नान्यत् किञ्चित् पशुत्वादि । तत्रोच्चार्य्यमाणे पशुशब्दे शब्देन व्यक्तेर्निष्कृष्टे पशुत्वे अस्मै पशव इति शक्यते सम्बन्धः कर्त्तुम् ।अनुच्चार्य्यमाणे तु लिङ्गविशेषवचनः प्राप्नोति । तस्मादप्राप्ता

सारस्वती अध्रिगुवचनमिति कृत्वा चिन्तयम्। अत्र प्रयोजनं न वक्तव्यम् । किमग्नीषोमीयार्थाः पशुधर्माः ? उत साधारणा इत्यस्मिन्नधिकरणे प्रयोजनाय विचारोऽयम् । यदि साधारणाः पशुधर्मास्ततः सारस्वती अध्रिगुवचनमप्राप्ता, अथाग्नीषोमीयधर्मा ततोऽस्याम् अध्रिगुवचनमूहेन प्राप्यते । न च प्रयोजनस्य प्रयोजनं वक्तव्यम् ॥ ४९ ॥ ॥ आ० नि० ॥ सारस्वत्यां मेष्यामध्रिगुवचनाभावाऽधिकरणम् ॥ १६ ॥

आम्नातादन्यदधिकारे वचनाद्विकारः स्यात् ॥५०॥

अस्ति ज्योतिष्टोमः । ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्र यज्ञायज्ञीयं प्रकृत्य आमनन्ति– न गिरा गिरेति ब्रूयात्, यद्गिरा गिरेति ब्रूयात्, आत्मानं तदुद्गातोद्गिरेदैरं कृत्वोद्गेयमिति । तत्र संशयः । किम् इरापदं गिरापदं वा कर्त्तव्यम्, अथ वा इरापदमेव ? इति । किं प्राप्तम् । यत्र अधिकारे आम्नातादन्यदुच्यते, तद्विकारभूतं स्यात् । ज्योतिष्टोमाधिकारे आम्नाताद् गिरापदादन्यदुच्यते इरापदम् । तद् विशेषे उच्यमानं सामान्येन प्राप्तं गिरापदं बाधेत ॥ ५० ॥ सि० ॥

द्वैधं वा तुल्यहेतुत्वात् सामान्याद्विकल्पः स्यात् ॥५१॥

वाशब्दः पक्षं व्यावर्त्तयति । न इरापदं नियम्येत । द्वैधं स्यात् । द्वौ प्रकारौ स्यातामित्यर्थः । कौ द्वौ प्रकारौ । इरापदवचनं, गिरापदवचनञ्च । तुल्यो हि हेतुः । गिरापदमाम्नातम् । तद्धता साम्ना ज्योतिष्टोमः साधयितव्य इत्येतदप्यवगम्यते । इरापदेन साधयितव्यमित्येतदपि । समानार्थे चैते द्वे पदे । एकमपि स्तुत्यर्थमपरमपि । तस्माद् विकल्पः स्यात् । इरापदं गिरापदं वेति ॥ ५१ ॥ पूर्व० ॥

उपदेशाच्च साम्नः ॥ ५२ ॥

अत्राह । नैतयोस्तुल्यता विद्यते । गिरापदे समाम्नानमात्रं, न कर्त्तव्यता विधीयते । इरापदे तु कर्त्तव्यता विधीयते । तन्न । कुतः । उपदेशात् साम्नः । उपदिश्यते हि साम । यज्ञायज्ञीयेन स्तुवन्तीति । गिरापदवच्च यज्ञायज्ञीयम् । तस्मिन्नुपदिश्यमाने गिरापदमप्युपदिष्टं भवति । तस्माद्विकल्प इति ॥ ५२ ॥ युक्तिः ॥

नियमो वा श्रुतिविशेषादितरत् साप्तदश्यवत् ॥ ५३ ॥

नियमो वा स्याद् इरापदस्य । कुतः । श्रुतिविशेषात् । श्रुति-

विशेषेण इरापदमुपदिष्टम् । ऐरं कृत्वेति । सामान्येन गिरापदम् । तत्कथं साम्न उच्यते ? । गिरापदस्य पाठमात्रं, न कर्त्तव्यता । न त्वन्यथा साम कृतं भवतीत्यर्थापत्त्या गिरापदस्य कर्त्तव्यता कल्प्यते । इरापदस्य पुनः श्रुत्यैव कर्त्तव्यता । तेन साम्नि सिद्धे नास्त्यऽर्थापत्तिर्गिरापदस्य । अथ यः सामान्येनोपदिष्टस्तस्य को विषयः । तदुच्यते । इतरत् साप्तदश्यवदिति । गिरापदमुपदिश्यते । तद्यथा साप्तदश्यं, तथा स्यात् । विकृतिषु साप्तदश्यं निविशते । इतरदपि विकृतीरभिनिवेष्टुमर्हतीति ॥ ५३ ॥ उत्तरम् ॥ यज्ञायज्ञीये गिराशब्दस्य स्थाने इरापदस्यैव कर्तव्यताधिकरणम् ॥ १७ ॥

अप्रगाणाच्छब्दान्यत्वे तथाभूतोपदेशः स्यात् ॥५४॥

ज्योतिष्टोमे यज्ञायज्ञीयं प्रकृत्य आमनन्ति । न गिरा गिरेति ब्रूयात्, यद् गिरा गिरेति ब्रूयात् । आत्मानमेव तदुद्गाता उद्गिरेदैरं कृत्वोद्गेयमिति । ज्योतिष्टोमे गिरापदस्य स्थाने इरापदं कर्त्तव्यमिति समधिगतम् । इदानीमिदं सन्दिह्यम् । किं प्रगीतमिरापदं कर्त्तव्यम्, उत अप्रगीतमिति । किं प्राप्तम् । गिरापदादन्यस्मिन् शब्दे श्रूयमाणे ब्रूमः । अप्रगीतमिरापदं कर्त्तव्यम् । कुतः । अप्रगाणात् । न हि तद् अप्रगीतमुपदिश्यते । सर्वं हि यद् यथाभूतमुपदिश्यते, तत् तथाभूतमुपयोक्तव्यम् ॥ ननु नैव तद् अप्रगीतमुच्चार्य्यते । तद्धितशब्देन अयं निर्देशः क्रियते । तेन स्वरविशेषः कश्चिन्निर्दिष्टो भवति। अत्रोच्यते । यद्यपि चास्ति स्वरविशेषः । अन्ये तु गीतिविकारा आईभावादयो न निर्द्दिश्यन्ते । अविकृतात् तद्धित उत्पादितः । तस्माद् अविकृतं प्रयोक्तव्यम् । अथोच्यते । तद्भूतनिर्देशोऽविवक्षित इति । उच्यते । अविवक्षायां न किञ्चित् । विवक्षायान्तु निर्देश एव कारणम् । तस्मादप्रगीतं प्रयोक्तव्यमिति ॥ ५४ ॥ पूर्व० ॥

यत्स्थाने वा तद्गीतिः स्यात् पदान्यत्वप्रधानत्वात् ॥ ५५ ॥

वाशब्दः पक्षं व्यावर्त्तयति । यस्य पदस्य स्थाने इरापदं प्रयुज्यते, तस्य पदस्य या गीतिः सा इरापदे स्यात् । कुतः । पदान्यत्वप्रधानत्वात् । पदान्यत्वप्रधानं हीदं वाक्यम् । गिरापदस्य स्थाने इरापदं भवतीति । नाप्रगीतं प्रयोक्तव्यमिति । अन्या हि वचनव्यक्तिः

इरापदस्य विशेषे विधीयमाने, अन्या इरापदे । एवं हि श्रूयते । इरापदस्य विकारं कृत्वोदूगेयमिति । तत्रानेन प्रकारेण इरापदं विधीयते, नान्यं प्रगानादिरापदस्य विकारं ब्रूयात् । न गिरापदस्येत्येतत् तद्धितेनोच्यते । नाप्रगीतस्य इरापदस्य विकारस्तद्धितशब्देनाध्यवसीयते । पश्चात्तद्धितार्थो विकारं ब्रूयादिति असावनूद्यते एव । यः प्रकृत्यर्थ इरापदस्येति, स विधीयते । तेन पदान्यत्वपरमेतद्वचनं, न गीत्यनन्वयपरम् । गीतिर्हि विकारः सामान्यान्निर्दिश्यते ॥ ५५ ॥ सि० ॥

गानसंयोगाच्च ॥ ५६ ॥

गानसंयोगो भवति, उदूगेयमा इरा चा दाक्षासा इति इरागानं दर्शयति ॥ ५६ ॥ युक्तिः ॥

वचनमिति चेत् ॥ ५७ ॥

इति चेत् पश्यसि, गानदर्शनमेतद्भवतीति । नैवं, वचनं भविष्यति, उदूगेयमा इरा चा दाक्षासा इति ॥ ५७ ॥ आ० ॥

न तत्प्रधानत्वात् ॥ ५८ ॥

नैतदेवम् । तत्प्रधानं हीदं वाक्यम् । किम्प्रधानम् । इरापदप्रधानम् । निर्देशात् । न गीतिप्रधानम् । अनिर्देशादित्युक्तम् । तथा इरापदस्यार्थवादो भवति, न गीतेः । इरामहं यजमाने ददानि इतिपदस्य चायमर्थवादो, न गीतेः । तस्मात् प्रगीतं प्रयोक्तव्यमिति ॥ किं भवति प्रयोजनं चिन्तायाः, नात्र कश्चिद्विशेषः ? अन्यस्मिन्नेतत्सदृशे प्रयोजनमस्ति, न प्रप्रेति ब्रूयात्, प्रप्रीति ब्रूयात् । यदि पूर्वः पक्षः, प्रप्रपदं वा वक्तव्यम् । प्रप्रीपदं वा । यदि सिद्धान्तः, प्रप्रीपदमेव वक्तव्यमिति ॥५८॥ आ० नि० ॥ इरापदस्य प्रगीतताधिकरणम् ॥१८॥

इति श्रीभट्टशबरस्वामिनः कृतौ मीमांसाभाष्ये नवमस्य अध्यायस्य प्रथमः पादः ॥ ९ ॥ १ ॥

अथ नवमाध्यायस्य द्वितीयः पादः ॥ ९ ॥ २ ॥

सामानि मन्त्रमेके स्मृत्युपदेशाभ्याम् ॥ १ ॥

सन्ति सामानि, रथन्तरं बृहदू वैरूपं वैराजं शाक्वरं रैवतमिति अभित्वा शूर नो नुम इत्येवमादिषु । तत्रैषोऽर्थः सन्दिह्यते । किं प्रगीता एते मन्त्राः सामानि, उत गीतयः सामानीति । ननु सिद्धं,

गीतिषु सामाख्येति । उच्यते । तत्र द्वितीयेऽध्याये मन्त्रगते भावशब्दे चोदकत्वं प्रति विचार्य्यमाणे मन्त्राभावाशङ्कायां मन्त्रसद्भावोपपादनाय, तच्चोदकेषु मन्त्राख्या इति कृते लक्षणे, अहे बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रयीविदा विदुः, ऋचो यजूंषि सामानीति ऋगादीनां विभागाय प्रसक्तानुप्रसक्तं लक्षणं गीतिषु सामाख्या इत्युक्तम्। तत्र यदि प्रगीतो मन्त्रः साम, यदि वा गीतिमात्रम् । उभयथापि ऋग्यजुषाभ्यामन्यत्सामेति सिद्धे विभागे न विवेकाय प्रयत्नः । प्रयोजनाभावात् । इह तु प्रगीते मन्त्रेऽन्यत् कर्म, गीतिमात्रेऽन्यदिति विवेकाय प्रयत्यते ॥

आह । नन्वेतदपि सिद्धं, गानकर्मणो वाचकः सामशब्द इति । उच्यते । तदेव पुनरभिधीयते, स्मरणाय, उत्तरमधिकरणं चिन्तयितुम् ॥ गीतिः सामेति स्थिते इदं चिन्त्यते । गीतिषु ऋचः प्रधानभूताः ? उत, गुणभूता इति । आह । नैव स्मरणाय पूर्वपक्षोद्धरणम् । न हि मन्त्राः सामानीत्येषोऽर्थः स्मर्त्तव्यः । अत्रोच्यते । पूर्वपक्षेऽपि सिद्धान्तस्मरणार्थमेवोपादीयते । यत् प्रगीतं मन्त्रवाक्यं तत्सामेत्येवं पूर्वपक्षं कृत्वा गीतिमात्रं सामेति स्थापितम् । तस्मिन् स्थिते अयमुत्तरो विचारः कर्त्तव्यः । गीतिषु किम् ऋचः प्रधानभूताः, उत गुणभूता इति ॥ किं प्राप्तम् । एके मन्यन्ते, प्रगीतं मन्त्रवाक्यं सामेति । कुतः । स्मृत्युपदेशाभ्याम् । एवं हि स्मरन्ति । प्रगीतं मन्त्रवाक्यं सामेति । तत्रभवन्तश्छान्दसाः । एवञ्चोपदिशन्ति शिष्येभ्यः । आह। ननु यदेव स्मरन्ति, तदेवोपदिशन्ति । नैवं सति उपदेशो हेत्वन्तरमिति । उच्यते । बाढम् । अन्यथा तर्हि उपदेशं वर्णयामः । अयमुपदेशः । अहे बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रयीविदा विदुः, ऋचो यजूंषि सामानीति । मन्त्रप्रकारः कश्चित् सामानीति मन्त्रोपदेशो भवति । तस्मादुपदेशान्मन्त्राः सामानीत्यवगच्छामः ॥ १ ॥ पूर्व० ॥

तदुक्तदोषम् ॥ २ ॥

तस्यैतस्य पक्षस्योक्तो दोषः सप्तमे । ऋचः प्रदेशो नोपपद्यते कवतीषु रथन्तरं गायतीति । देशलक्षणा धर्मलक्षणा वा प्राप्नोतीति । तस्माद्गीतयः सामानि, न प्रगीतानि मन्त्रवाक्यानीति ॥ २ ॥ सिद्धान्तः ॥ गीतीनां सामनामताधिकरणम् ॥ १ ॥

एवं वा—

सामानि मन्त्रमेके स्मृत्युपदेशाभ्याम् ॥ १ ॥

इदं सन्दिह्यते, योऽयम् ऊहो नाम, कया नश्चित्र आभुवो वा इति । किमयमप्यार्षो नित्यः, उत, चिन्तयित्वा-प्रगीतः ? । किं प्राप्तम । एतानि ऊहसामानि मन्त्रभूतानि आर्षाणि नित्यानीति एके मन्यन्ते । कुतः । स्मृत्युपदेशाभ्याम् । एवं हि स्मरन्ति । मन्त्रभूतानि आर्षाणि नित्यानीति । उपदिशन्ति च, एवंविधमेव शिष्येभ्यः ॥ आह । ननु यदेव स्मरन्ति, तदेवोपदिशन्ति । बाढम् । अयमन्य उपदेशो वर्ण्यते, ऊहश्चिकीर्षित इति ब्राह्मणमुपदिशन्ति । चिकीर्षित इति च इष्ट उच्यते । इच्छायां हि सन् विधीयते । यदि चायम् अपुरुषबुद्धिपूर्वको वेदतुल्यः, तत इष्टः । अथ पुरुषप्रणीतस्ततो न प्रमाणम् । यश्च चाचिकीर्षितो न प्रयोक्तव्यः । चिकीर्षित इति च शब्दो भवति । तस्मान्नित्य ऊह इति ॥ १ ॥ पूर्व० ॥

तदुक्तदोषम् ॥ २ ॥

तदेतदुक्तदोषं भवद्वचनम् । भवतैव हेतुं वर्णयता अस्योक्तो दोषः । ऊहश्चिकीर्षित इति । ऊहश्चिकीर्षित इत्यनित्ये एतद्भवति । यदुक्तम्, इष्टे चिकीर्षितशब्दो भवति । इच्छायां हि सन् विधीयते इति । उच्यते । सत्यम् । इष्टं कर्त्तुं यद्धि क्रियते, तत् कर्त्तुमिष्टं भवतीति । तस्माद् अनित्य ऊहः । यदुक्तं, स्मृतेर्नित्यतेति । नैषा स्मृतिः प्रमाणम् । दृष्टमूला ह्येषा । भवति हि वचनम् । कवतीषु रथन्तरं गायतीति । तस्माद् अतिदेशवचनान्न्यायेनैवं गातव्यमिति वाचनिकं प्रथमं विज्ञानम् । तत एषा स्मृतिः । तस्मादप्रमाणं, कृत्रिम ऊह इति। किं भवति प्रयोजनम् । न्यायविरुद्धमपि प्रमाणम् । यथापूर्वः पक्षः । यथा तर्हि सिद्धान्तः, न्यायविरुद्धमप्रमाणम् ॥ २ ॥ सिद्धान्तः ॥ ऊहग्रन्थस्य पौरुषेयताधिकरणम् ॥ १ ॥

कर्म वा विधिलक्षणम् ॥ ३ ॥

तान्येवोदाहरणानि । तेष्वयमर्थः समधिगतः । गीतिः सामशब्देन उच्यते इति । तत इदमिदानीं सन्दिह्यते । किं सा गीतिः, ऋचः प्रति प्रधानभूता ? उत गुणभूतेति । ननु सिद्धं— संस्कारकर्मणः सामशब्दो वाचक इति, अपि तु कर्मशब्दः स्यात् भावोऽर्थः प्रसिद्धग्रहणत्वाद् इति । उच्यते । सत्यमाक्षेपेण प्रवर्त्तते । स एव निर्णयो

भविष्यति । किं प्राप्तम् । तेनैवाधिकरणेन संस्कारकर्मेति ॥ तथा प्राप्ते ब्रूमः । प्रधानकर्म वा सामशब्देनोच्यते इति । किं कारणम् । प्रधानविधिलक्षणं हि अत्रास्ति द्वितीया विभक्तिः— रथन्तरं गायतीति । तस्मात् प्रधानकर्मेति । अपिच । कर्मकाले गानं भवति । तद् यदि द्रव्यसंस्कारार्थं, संस्कृतं द्रव्यमदृष्टेन संस्कारेण, न कर्मकाले पुनः संस्कर्तुं शक्यम् । न हि स्निग्धस्य स्नेहनं शक्यं कर्तुं, पिष्टस्य वा पेषणम् । स एषोऽग्नीनामिवाभ्युपगन्तव्यः । अकर्मकाले क्रियमाणः संस्कारो भवतीति । अस्मत्पक्षे पुनः प्रधानकर्म फलाय भविष्यति । तत्राविप्रतिषिद्धमकर्मकाले गानम् ॥ अपिच, श्रावण्यां पौर्णमास्यां व्रतान्युपाकृत्य, अर्द्धपञ्चमान् मासान् स्वाध्यायमधीयीतेति । तदेषां फलाय भविष्यति । इतरथा पुरुषाणामुपदिश्यमानं कर्मणां कल्प्येत । तस्मादपि प्रधानकर्मेति ॥ ३ ॥ पूर्व० ॥

ताद्दग्द्रव्यं वचनात् पाकयज्ञवत् ॥ ४ ॥

आह । प्रधानकर्मेत्युच्यते । न चैतत् प्रधानकर्म । न हीदं फलदम् । फलकल्पनायां चाश्रुतं कल्प्येत । तेन यागं प्रति गुणभूतम् । यदि न गुणभूतं, किमस्य द्रव्यम्, यत् प्रति प्रधानभूतमेतत् ? । तदुच्यते । ऋग्द्रव्यम् । ऋग् अस्य द्रव्यस्थानीया । यथाऽन्यस्य कर्मणो द्रव्यं साधकम्, एवमस्य ऋक् साधिका । तस्माद् ऋचं प्रति प्रधानभूतमेतत् । भूतं हि भव्यायोपदिश्यते । कथं पुनरेतद् ऋग्द्रव्यम् । वचनात् । वचनमिदं भवति । ऋचि साम गायतीति । यथा पाकयज्ञेषु तत्तद्वाचनिकं द्रव्यं भवति, लाजाः, धानाः, तण्डुलाः आज्यमिति । एवमिहापि ऋग् द्रव्यम् । वचनादिति ॥४॥ आ०निं० ॥

तत्राविप्रषिद्धो द्रव्यान्तरे व्यतिरेकः प्रदेशश्च ॥ ५ ॥

आह । या ऋगस्य वचनेनोच्यते, तद् द्रव्यमेतद् भवति । कथं द्रव्यव्यतिरेके सति द्रव्यान्तरे प्रदेशे च तदिदं साम ? इति । अत्रोच्यते । अविप्रतिषिद्धमेतत् । गीतिमात्रं हि सामेति । द्रव्यमस्य निर्वर्त्तकं वाचनिकम् । तत् सामान्यविहितं, विशेषविहितेन द्रव्यान्तरेण बाध्यते । यदत्र द्रव्यव्यतिरिक्तं गीतिमात्रं, तदेव बृहद्वा रथन्तरं वेति न दोषो भवति । तस्मात् प्रधानकर्म सामेति ॥ ५ ॥ युक्तिः ॥

शब्दार्थत्वात्तु नैवं स्यात् ॥ ६ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदेवं भवितुमर्हति, प्रधानकर्म्म सामेति । गुणकर्म्म स्यात् । कुतः । शब्दार्थत्वात् । शब्दस्योपकारकं साम प्रत्यक्षमुपलभ्यते । सान्निक्रियमाणे ऋगक्षराणि उच्चार्य्यन्ते । तस्मिन् सति नादृष्टं कल्पनीयम् ॥ ६ ॥ सि० ॥

परार्थत्वाच्च शब्दानाम् ॥ ७ ॥

परार्थाश्च शब्दाः स्तुत्यर्थाः । स्तुतिर्हि चोदिता, आज्यैः स्तुवते पृष्ठैः स्तुवते इति साम्न ऋगक्षरैरुच्चार्य्यमाणैः प्रत्यक्षा अवगम्यते । ततः स्तुत्यर्थाया ऋचः सत्याः सामार्थता परिकल्प्येत । कल्पनायाञ्च प्रमाणं नास्ति । तस्मादपि साम गुणभूतमिति ॥ ७ ॥

असम्बन्धश्च कर्मणा शब्दयोः पृथगर्थत्वात् ॥ ८ ॥

इतश्च गुणभूतं साम । कुतः । असम्बन्धश्च साम्नः स्तोत्रेण स्यात् । तस्य प्रधानभावेन स्तुतिः साम्न उपदिश्येत, न सामस्तुतेः । तत्र बृहत् पृष्ठं भवति रथन्तरं पृष्ठं भवतीति वचनं बाध्येत । रथन्तरगुणकं पृष्ठं भवतीत्येतदेवमुपादिश्यते । तद् ऋगर्थे साम्नामवकल्पते । प्रत्यक्षं हि तदा पृष्ठस्योपकारं साम करोति । यदस्य वाचकं प्रकाशयति शब्दं, तद् रथन्तरपृष्ठशब्दयोः सामानाधिकरण्यादेकार्थत्वे शक्यं विज्ञातुम् । पृथगर्थत्वे तु असम्बन्धः स्यात् । तस्माद् ऋचः साम गुणभूतमिति ॥ ८ ॥ युक्तिः ॥

संस्कारश्चाप्रकरणेऽग्निवत् स्यात् प्रयुक्तत्वात् ॥ ९ ॥

अथ यदुक्तं, कर्म्मकाले गानम् ऋचः संस्कारकमग्न्याधानमिव कल्प्येत । प्रयुक्तत्वादिति । तत् परिहर्त्तव्यम् ॥ ९ ॥ आ० ॥

अकार्य्यत्वाच्च शब्दानामप्रयोगः प्रतीयेत ॥ १० ॥

यदि हि अकर्म्मकाले गानं कृतं, कर्म्मकालं यावत् तिष्ठेद् न विनश्येत् । ततः पुनरप्रयोगः प्रतीयेत । यदि वा पुनर्न शक्येत कर्म्मकाले गानं कर्त्तुं, तथाप्यप्रयोगः स्यात् । शक्यन्ते तु प्रगीताः शब्दाः पुनः प्रयोक्तुम् । तस्मादकर्म्मकाले प्रयुक्ता असाधका इति कर्मकाले प्रयुज्येरन् । तस्मान्न दोषो भविष्यतीति ॥ १० ॥ आ०नि० ॥

आश्रितत्वाच्च ॥ ११ ॥

अपिच कर्म्मकालाश्रितं गानं दर्शयति । औदुम्बरीं स्पृष्ट्वानपाश्रित उद्गातोद्गायेदिति । सदस्यौदुम्बरी मध्यमा स्थूणा भवति ।

तां स्पृष्ट्वा इति ब्रुवन् सदसि गानं दर्शयति । तस्मान्न अकर्म्मकालमग्न्याधानवत् कल्पयितव्यमिति ॥ ११ ॥ युक्तिः ॥

प्रयुज्यत इति चेत् ॥ १२ ॥

अथ यदुक्तम्, अर्द्धपञ्चमान्मासान् अध्ययनं प्रयुज्यते, तत् फलाय भविष्यतीति । तत् परिहर्त्तव्यम् ॥ १२ ॥ आ० ॥

ग्रहणार्थं प्रयुज्येत ॥ १३ ॥

न हि फलाय भवितुमर्हति । तथाहि अदृष्टं कल्प्येत । दृश्यतेऽत्र प्रयोजनम् । यत्तावदुपाध्यायः शिष्यसन्निधावधीते, तद् ग्रहणार्थम् । यच्छिष्यस्तद् धारणार्थम् । ग्रहणधारणे प्रयोगार्थे भूमिरथिकवत्, शुष्केष्टिवद्वा । तद् यथा, भूमिरथिको भूमौ रथमालिख्य शिक्षां करोति, संग्रामे प्राशुभावो भवितेति । यथा च छात्रः शुष्केष्टीः प्रयुङ्क्ते, प्रयोगे प्राशुकर्म्मा भविताऽस्मीति । एवमेतद् द्रष्टव्यम् । तस्माद् दृष्टे सति नादृष्टायाध्ययनम् । तस्मात् संस्कारकर्म सामेति ॥ १३ ॥ आ० नि० ॥ साम्न ऋक्संस्कारकर्मताधिकरणम् ॥ २ ॥

तृचे स्याच्छ्रुतिनिर्द्देशात् ॥ १४ ॥

ज्योतिष्टोमे समाम्नायते । तस्मादेकं साम तृचे क्रियते स्तोत्रीयमिति । अत्रायमर्थः सांशयिकः । किं तिसृषु ऋक्षु व्यासज्य गानं कर्त्तव्यम् ? उत प्रतिऋचं, समाप्तं गानं कर्त्तव्यमिति । किं प्राप्तम् । व्यासज्येति । कुतः । श्रुतिनिर्द्देशात् । एवं श्रूयते । एकं साम तृचे क्रियते इति । साम्नि क्रियमाणे, निर्वृत्तौ गुणभूता त्रिसंख्या ऋग्गता श्रूयते । तत्र यद्येकस्यामृचि उपक्रम्य तस्याञ्चैतत् परिसमापयेयुः, न त्रिसंख्यया साधनमस्य क्रियमाणस्य परिच्छिन्द्युः । एकसंख्यापरिच्छिन्नं क्रियमाणं स्यात् । तत्र श्रुतिर्बाध्येत । तद् यथा, अयं घटस्त्रिषु नागदन्तकेषु स्थाप्यतामित्युक्ते व्यासज्य स्थाप्यते, न पर्य्यायेण । एवमिहापि द्रष्टव्यम् ॥ ननु पर्य्यायेऽप्येवञ्जातीयकः शब्दो भवति । यथा, त्रिषु कुलेषु देवदत्तो भुङ्क्ते इत्युक्ते न यौगपद्यमवगम्यते । पर्य्यायेणापि भुञ्जाने भवत्येष वादः । एवमिहापि पर्य्यायेण प्राप्नोतीति । अत्रोच्यते । न तत्र त्रिसंख्या भुजि प्रत्युपदिश्यते, येनैतदेवं भवति । तत्र कुलशब्देन सम्बद्ध्यते । त्रिषु कुलेषु, न द्वयोरेकस्मिन् वेति । यदा भुजिनिर्वृत्तिं प्रत्युपदिश्यते, तदा यौगपद्येनैव

भोजयितव्यः । इह तु त्रिसङ्ख्या क्रियते इत्यनेन सम्बद्ध्यते । एवं सति क्रियायां त्रिसङ्ख्या विहिता भवति । तत्र स्वपदगतस्य किञ्चिद्विधायकेन विहितं भवति । इतरथा ऋचः सङ्ख्यायाश्च सम्बन्धस्य पदान्तरगतेन शब्देन भावनोच्येत । तथा, अर्थविप्रकर्षः स्यात् । तस्मात् सामनिर्वृत्तिं प्रति त्रिसङ्ख्या उच्यते ॥ आह । ननु त्रिसङ्ख्या ऋक्शब्देनैवात्र सम्बद्ध्यते । अन्यथा असति सामर्थ्ये समास एव न स्यादिति । अत्रोच्यते । न ब्रूमो न सम्बद्ध्यते इति । सम्बद्ध्यते एव । समासश्च भवति । स तु समासशब्दः सामनिर्वृत्तावुपयुज्यते इति । तत्र त्रिशब्दस्य ऋक्शब्दस्य चार्थौ निर्वृत्तावुपदिष्टौ भवति । साम निर्वर्त्तयितव्यम् । एवं तास्तिस्र ऋचो भवन्ति, न न्यूना इति । इतरस्मिन् पक्षेऽभ्यासस्त्रिसङ्ख्यया सम्बद्ध्येत । तत्र साम क्रियते इति लक्षणा स्यात् । अभ्यासनिर्वृत्तौ सामनिर्वृत्तिशब्दो भवेत् । तस्माद् व्यासज्ज्य गानं कर्त्तव्यम् ॥ १४ ॥ पूर्व० ॥

शब्दार्थत्वाद्विकारस्य ॥ १५ ॥

इतश्च पश्यामः । तृचे व्यासज्ज्य साम गातव्यमिति । कुतः । शब्दार्थोऽयं सामसंज्ञको विकारः । ऋचो गुणभूत इत्यर्थः । स यदि व्यासज्ज्य क्रियते, बहून्यक्षराणि अविकृतानि भवन्ति । तत्रायं चोदकोऽनुग्रहीष्यते । तस्माद् व्यासज्ज्य गातव्यम् ॥ १५ ॥

दर्शयति च ॥ १६ ॥

ऋक्सामौ वाव मिथुनीसम्भवावेति । सोऽब्रवीन्न वै त्वं ममालमसि जायार्थे वेदो मम महिमेति । ते द्वे भूत्वोचतुः । सोऽब्रवीत् । न युवां ममालं स्वो जायार्थे वेदो मम महिमेति तास्तिस्रो भूत्वोचुः । मिथुनीसम्भवामेति । सोऽब्रवीत् सम्भवामेति । तस्मादेकं साम तृचे क्रियते स्तोत्रीयमिति । नैका स्तोत्रीया साम्नः सम्भवति । नापि द्वे तिस्रः सम्भवन्तीति व्यासज्ज्य गानं दर्शयति ॥ १६ ॥ युक्तिः ॥

वाक्यानां तु विभक्तत्वात् प्रतिशब्दं समाप्तिः स्यात् संस्कारस्य तदर्थत्वात् ॥ १७ ॥

तुशब्दः पक्षं व्यावर्त्तयति । वाक्यानि विभक्तानि त्रीणि एतानि । यास्तिस्र ऋचस्तत्रैकैका ऋक् कृत्स्नेन पदग्रामेण काञ्चित् स्तुतिमभिनिर्वर्त्तयति, न ऋगन्तरेण सह कञ्चिदर्थं संस्तौति । तत्र साम,

ऋचः संस्तवमभिनिर्वर्त्तयन्त्या गुणभावं गच्छत् साहाय्यं करोति । तत्र यदि व्यासज्ज्य गीयेत, न ऋचः स्तुतिमभिनिर्वर्त्तयन्त्याः साम उपकारकं स्यात् । न हि सामावयवः साम भवतीति । न च ऋक्-समुदायेन कश्चिदर्थः स्तूयते, यत्र सामसम्बद्धा स्तुतिं कुर्य्यात् । ऋक् स्तुतिं करोति, सा न सामसम्बद्धा । य ऋक्समुदायः साम-सम्बद्धः स स्तुतिं न करोति । तत्र प्रत्यृचं साम्नि परिसमाप्ते क्रियमाणे सामवता शब्देन स्तुतिः कृता भवति । सामसंस्कारस्य स्तुति-भावनार्थत्वात् प्रत्यृचं परिसमाप्तं गानं कर्त्तव्यमिति ॥ १७ ॥ सि० ॥

तथा चान्यार्थदर्शनम् ॥ १८ ॥

अन्यार्थमपि वाक्यमेतमर्थं दर्शयति । अष्टाक्षरेण प्रथमायामृचि प्रस्तौति द्व्यक्षरेणोत्तरयोरिति प्रस्तावे भेदं दर्शयति । तथाच, एका वा अस्योत्तमा स्तोत्रीया तामुद्गृह्योद्गायेदिति उद्गीथभेदं दर्शयति। तस्मादपि प्रत्यृचं गानं कर्त्तव्यमिति ॥ अर्धर्चप्रगीतेष्वपि ऋच्येव गानं कर्त्तव्यम् । अपरिपूर्णं तद्वाक्यं अर्धर्चे भवति । ऋचि तु परि-पूर्य्यत इति । पादप्रगीतेषु पाद एव गानं कर्त्तव्यमिति । पाद एव हि तत्परिपूर्णं वाक्यम् । यथा, गोष्ठे वासिष्ठ इति । एवं यावति परिपूर्णं वाक्यं, तावति साम परिसमापयितव्यम् । क्वचित् पादेऽपि पूर्णं वाक्यम् ऋच्यपि क्वचिदर्धर्चेऽपि परिपूर्णम् । यत्र यथा परिपूर्णं, तत्र तथा गातव्यमिति ॥ १८ ॥

अनवानोपदेशश्च तद्वत् ॥ १९ ॥

अनवानोपदेशश्च तद्वद् युक्तो भविष्यति । यथाऽस्माभिर्न्याय उपदिष्टः । अनवानं गायतीति । शक्यते अनवानं, प्रत्यृचं परिसमाप-यितुम् । न तु तिसृषु व्यासज्ज्य शक्यते ॥ अपि च स्वाध्यायकाले प्रत्यृचं गानं परिसमापितं, स्वाध्यायकाले चाभ्यासः, प्रयोगकाले कथं प्राशुता स्यादिति । तद्यदि प्रयोगकाले प्रत्यृचं गानं कर्त्तव्यं, ततः स्वाध्यायकाले तदभ्यासो युक्तः । तस्मादपि प्रत्यृचं गेय-मिति ॥ १९ ॥ युक्तिः ॥

अभ्यासेनेतरा श्रुतिः ॥ २० ॥

अथ यदुक्तं, तस्मादेकं साम तृचे क्रियते इति । तासु अभ्यासेन इतरा श्रुतिर्द्रष्टव्या । पर्य्यायेणेत्यर्थः । न ह्यत्र ऋक् सामनिर्वृत्त्यर्थमु-

पादीयते । तस्माद् न शक्यमिदं वक्तुम् । सामनिर्वृत्तिसाधनीभूतामृचं त्रिशब्दः परिच्छेत्स्यतीति । साम स्तोत्रस्य गुणभूतं निर्दिश्यते । रथन्तरं पृष्ठं भवति, बृहत् पृष्ठं भवतीत्येवमादि । तत्र प्रत्यृचं न्यायेन गानं प्राप्तं, न सामनिर्वृत्त्या संख्या सम्बद्ध्यते । किं तर्हि । ऋग्भिः । तत्रान्यथा नावकल्पते इति अभ्यासो लक्ष्यते । तिसृष्वभ्यसितव्यं सामेति । यथा, त्रिषु कुलेषु देवदत्तो भोजयितव्य इति । यदा त्रिसंख्या कुलैः सम्बद्ध्यते, तदाऽभ्यासो लक्ष्यते । एवमिहापि द्रष्टव्यम् । तस्मात् प्रत्यृचं परिसमाप्तं गानं कर्त्तव्यमिति ॥ २० ॥ ॥ आ० नि० ॥ तृचे प्रत्यृचं कृत्स्नसाम्नः समापनाधिकरणम् ॥ ३ ॥

तदभ्यासः समासु स्यात् ॥ २१ ॥

अस्ति ज्योतिष्टोमः । ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्रैतत् समाम्नायते । तस्मादेकं साम तृचे क्रियते स्तोत्रीयमिति । तत्रैतत् समधिगतम् । प्रत्यृचं परिसमाप्तं गेयमिति । इदमन्यत् सांशयिकम् । समासु विषमासु वा गेयम् ? उत समास्वेवेति । किं तावन्नः प्रतिभाति । नियामकस्य शास्त्रस्याभावादनियम इति ॥ एवं प्राप्ते ब्रूमः । समास्वेव गेयं, न नानाच्छन्दस्कास्विति । किमेवं भविष्यति । गीतेः संशर–विलेशौ न भविष्यतः । यदि न्यूनच्छन्दस्का ऋच उपादास्यामहे, गीतिं संश्टणीयाम । अथ अधिकच्छन्दस्काः, ततो गीतिं विलेशयाम । उभयथा चार्थं बाधेमहि । समासु तु उपादीयमानासु न किञ्चिद् दुष्यति । तस्मात् समासु गानं कर्त्तव्यमिति । अपिच त्रिशब्दोपचारः समासु युक्तो भविष्यति । समाने हि कस्मिँश्चिदाश्रीयमाणे सङ्ख्याव्यवहारो भवति ॥ २१ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ २२ ॥

लिङ्गं खल्वप्यस्मिन्नर्थे पश्यामः । स्थाल्यां सक्तवधीयते सम्भवतीत्याहुः, यद् बृहद् गायत्रीषु क्रियते ऋक्‌त्वेनान्तरुजतीति, न चास्यां सम्भवतीति विच्छन्दस्कासु दोषं ब्रुवन् समानच्छन्दस्कासु गानं दर्शयति ॥२२॥ युक्तिः ॥ समास्वेव तिसृषु ऋक्षु गानाधिकरणम् ॥४॥

नैमित्तिकं तूत्तरात्वमानन्तर्यात् प्रतीयेत ॥ २३ ॥

ज्योतिष्टोमे समामनन्ति । रथन्तरमुत्तरयोर्गायति, बृहदुत्तरयोर्गायति, कवतीषु रथन्तरं गायति, यद्योन्यां गायति, तदुत्तरयो-

गायतीति । तत्रैतत् समधिगतम् । समासु गेयमिति । अथेदानीमिदं संदिह्यते । किं योन्युत्तरयोर्वा, उत्तराग्रन्थसमधीतयोर्वा गेयम् ? उतोत्तराग्रन्थसमधीते एव उपादातव्ये इति । किं प्राप्तम् । नियमकारिणः शास्त्रस्याभावादनियम इति । एवं प्राप्ते ब्रूमः । नैमित्तिकं तूत्तरात्वमुत्तराग्रन्थसमधीतासूपपद्यते इति । कुतः । समाख्यानात् । प्रकृतत्वाच्चोत्तराग्रन्थसमधीतानाम् ॥ आह । द्वाभ्यामपि समाख्याप्रकरणाभ्यां वाक्यं बलीयस्तस्मादनियम एव प्राप्नोति । अत्रोच्यते । सर्वे हि सम्बन्धिशब्दाः पदान्तरमनपेक्षमाणा न कञ्चिदप्यर्थमाहुः । तस्मादपेक्षितं पदान्तरं, तत् प्रकृतं सन्निहितं वा । इतरथा अपरिपूर्णार्थं वाक्यमनभिधायकमेव कस्यचिदर्थस्य स्यात् । संज्ञासंज्ञिग्रहणे न पुनः पदान्तरमपेक्षते । श्रुत्यैव परिपूर्णार्थो गृह्यते । तस्मान्न सम्बन्धिशब्दोऽध्यवसानीयः । उत्तरासंज्ञैवोपादातव्येति । न हि संज्ञासु गृह्यमाणासु पदान्तरानन्तर्य्यमपेक्षितव्यं भवति ॥ २३ ॥ सि० ॥

ऐकार्थ्याच्च तदभ्यासः ॥ २४ ॥

तास्वेव चोत्तराग्रन्थसमधीतासु साम अभ्यसितव्यम् । एवमेकार्थता तृचशब्दस्य भविष्यति । एकं कञ्चित् सामान्यविशेषमाश्रित्य तृचशब्दमुपचरन्ति । एतदेवमुक्तम् । यद्विशेषे कस्मिँश्चित् संख्या भवति, इतरथा हि सर्वत्र सर्वसंख्या भवेयुः । तथाहि संव्यवहाराभावः स्यात् । तस्मात् समानच्छन्दस्कासु समानदेवताकासु च तृचशब्दोपचारादुत्तराग्रन्थसमधीता एव ग्रहीतव्या इति ॥ २४ ॥ युक्तिः ॥ उत्तरयोर्गायतीत्यत्र उत्तराग्रन्थसमधीतयोरेव ऋचोर्ग्रहणाऽधिकरणम् ॥ ५ ॥ प्रथमवर्णकम् ॥ १ ॥

एवं वा—

तदभ्यासः समासु स्यात् ॥ २१ ॥

अस्ति द्वादशाहः, द्वादशाहेन प्रजाकामं याजयेदिति । तत्र चतुर्थेऽहनि त्रैशोकं नाम साम अतिजगत्यामुत्पन्नम् । अतिजगती, विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रञ्जजनुश्च राजसे । क्रत्वा वरिस्थं वरामुरीमुतोग्रमोजिष्ठं तवसं तरस्विनम् । उत्तरे द्वे बृहत्यौ । तयोः पूर्वा, नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा । सुदीतयो वो अद्रूहोऽपि कर्णे तरस्विनः समृक्वभिः । उत्तरा, समीं

रेभासो अस्वरन्निन्द्रं सोमस्य पीतये । स्वर्पतिं यदीं वृधे । धृतव्रतो ह्योजसा समूतिभिरिति । तत्रैषोऽर्थः । सांशयिकः । किमन्ये अतिजगत्यौ उपादाय समासु गेयम् ? उत ये एव ते उत्तरे बृहत्यौ, एते एव उपादाय विषमास्वेव गातव्यमिति । किं प्राप्तम् । संशरविलेशौ मा भूतामित्यन्ये उत्पत्तिजगत्यावुपादाय एतत्साम समास्वेव अभ्यसितव्यमिति ॥ २१ ॥ पूर्व० ॥

लिङ्गदर्शनाच्च ॥ २२ ॥

लिङ्गं खल्वप्यस्मिन्नर्थे दर्शयति । अतिजगतीषु स्तुवन्तीति । किं लिङ्गम् । अतिजगतीष्विति बहुवचनम् । तस्मादन्ये अतिजगत्यौ उपादातव्ये इति ॥ २२ ॥ युक्तिः ॥

नैमित्तिकं तूत्तरात्वमानन्तर्यात् प्रतीयेत ॥ २३ ॥

नैमित्तिकं तूत्तरात्वमानन्तर्य्यादुत्तरापाठनिमित्तमानन्तर्य्ये सति प्रतीयेत । श्रुतिर्हि वाक्याद्बलीयसीति प्रकृतत्वादुत्तरे बृहत्यौ एवमनुग्रहीष्येते । तस्मान्नान्ये आदातव्ये इति ॥ २३ ॥ सि० ॥

ऐकार्थ्याच्च तदभ्यासः ॥ २४ ॥

एवञ्च समानदेवताके त्रैशोके तृच इति तृचशब्दोपचारो युक्तो भविष्यति । तस्मादपि नान्ये उपादातव्ये इति । अत्राह । अथ यदुक्तम्, अतिजगतीषु स्तुवन्तीति शब्दोपचारादतिजगतीबहुत्वं दर्शयतीति । तत् परिहर्त्तव्यम् । अत्रोच्यते । तदभ्यास एव द्रष्टव्यः । षोडश्यभ्यासः । एकविंशः षोडशी इति एकविंशतिकृत्वः षोडशिनि अभ्यस्यमाने त्रैशोकाभ्यासः । तत्र सप्तकृत्वोऽतिजगत्यामभ्यस्यमानायामतिजगतीषु स्तुवन्तीति वचनमुपपत्स्यते इति ॥ २४ ॥ युक्तिः ॥ अतिजगत्यामभ्यस्यमानायां त्रिशोकगानाधिकरणम् ॥ ५ ॥ द्वितीयवर्णकम् ॥ २ ॥

प्रागाथिकं तु ॥ २५ ॥

ज्योतिष्टोमे श्रूयते, बृहत् पृष्ठं भवति रथन्तरं पृष्ठं भवतीति । रथन्तरस्य योनिर्बृहती, अभि त्वा शूर नोनुमो दुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः । उत्तरा पङ्क्तिः, न त्वावान् अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते । अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे । बृहतो योनिर्बृहत्येव,

त्वामिद्धि हवामहे साता वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः । उत्तरा पङ्क्तिरेव, स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः । गामश्वं रथ्यमिन्द्र सङ्किर सत्रा वाजन्न जिग्युषे इति । तयोर्वैच्छन्दस्कं गानमाम्नायते, न वै बृहद्रथन्तरमेकच्छन्दो यद्येतयोः पूर्वा बृहती ककुभावुत्तरे इति ॥ तत्रायमर्थः सांशयिकः । किमन्ये उत्पत्तिककुभावागमय्य गातव्यम्, उत, याऽसौ पूर्वा बृहती, उत्तरा च पङ्क्तिस्तयोः प्रग्रथनेन तृचकर्म कृत्वा ककुभावुत्तराकारं गानं कर्त्तव्यम् ? इति । किं प्राप्तम् । उत्पत्तिककुभावागमयितव्ये इति । कुतः । एवमन्यासां ककुभामुत्पत्तिरर्थवती भविष्यति, यदि ताः ककुप्कार्य्ये प्रयुज्यन्ते ॥ आह । ननु वाचस्तोमे तासामर्थवत्ता भविष्यति । उच्यते । सत्यमर्थवत्ता तत्र भविष्यति । ककुप्कार्य्यार्थताऽपि तु गम्यते । सा नापह्नोतव्येति ॥ एवं प्राप्ते ब्रूमः । प्रागाथिकं तु । तुशब्दः पक्षं व्यावर्त्तयति । प्रागाथिकं सामगानं कर्त्तव्यमिति । याऽसौ पूर्वा बृहती, उत्तरा च पङ्क्तिस्तयोः प्रग्रथनं कर्त्तव्यम् । एवं हि स्मरन्ति । काकुभः प्रगाथ इति । आह । ननु ककुभि अनाद्यायां काकुभ इति न प्राप्नोतीति । उच्यते । तस्येदमिति, तत्र भव इति वा न दोषः ॥ २५ ॥ सि० ॥

स्वे च ॥ २६ ॥

एवञ्च स्वे च्छन्दसि गानं कृतं भवति । उत्तरापाठेन हि अत्रैषा पङ्क्तिरुपदर्शिता तृचकर्मणि । तत्र प्रकृतहानं अप्रकृतप्रक्रिया च न कृता भविष्यति । तस्मादपि तयोः प्रग्रथनं कर्त्तव्यमिति ॥ २६ ॥

प्रगाथे च ॥ २७ ॥

एवञ्चात्र प्रगाथशब्द उपपन्नो भवति । प्रकर्षं हि प्रशब्दो द्योतयति । प्रकर्षेण यत्र गानं, स प्रगाथः । कश्च प्रकर्षः । यत् किञ्चित् पुनर्गायति । तस्मादपि प्रकृतयोः प्रग्रथनं कर्त्तव्यमिति ॥ २७ ॥

लिङ्गदर्शनाव्यतिरेकाच्च ॥ २८ ॥

अव्यतिरेकेण च सर्वत्र लिङ्गं दर्शयति । कथमिदमव्यतिरेकेणेति । यत्र प्रकृतयोरेव प्रग्रथनमुपपद्यते, न प्रकृतव्यतिरेकेणेति । किं लिङ्गं भवति । एवमाह । एषा वै प्रतिष्ठिता बृहती या पुनःपदा तद्यत्पादं पुनरारभते तस्माद् वत्सो मातरमभि हिङ्करोतीति । पुनः

पादारम्भः प्रग्रथने उपपद्यते, नान्यथा । तस्माद्याऽसौ पूर्वा बृहती, उत्तरा च पङ्क्तिः, तयोः प्रग्रथनेन तृचकर्म कृत्वा ककुबुत्तराकारं गानं कर्त्तव्यमिति ॥ २८ ॥ युक्तिः ॥ बृहतीपङ्क्त्योरेव प्रग्रथनेन रथन्तरस्य गानाधिकरणम् ॥ ६ ॥ ॥ प्रथमवर्णकम् ॥ १ ॥

एवं वा—

प्रागाथिकं तु ॥ २५ ॥

अस्ति ज्योतिष्टोमः । ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्र त्रिच्छन्दा आवापो माध्यन्दिनः पवमानः पञ्चसामा, गायत्रामहीयवे गायत्रे तृचे भवतो रौरवयौधाजये बार्हते तृचे औशनसमन्त्यं त्रिष्टुप्स्विति । यदेतद् रौरवं यौधाजयञ्च द्वे सामनी, तयोः पूर्वा बृहती । पुनानः सोम धारयापो वसानो अर्षसि । आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्मयः । उत्तरा विष्टारपङ्क्तिः । दुहान ऊधर्द्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् । आपृच्छ्य धरुणं वाज्यर्षति नृभिर्धौतो विचक्षणः । तदत्र संशयः । किमन्ययोरुत्पत्ति-बृहत्योरागमं कृत्वा समासु गानं कर्त्तव्यम्, उत, याऽसौ पूर्वा बृहती, उत्तरा च विष्टारपङ्क्तिस्तयोः प्रग्रथनेन तृचकर्म कृत्वा बृहतीकारं गानं कर्त्तव्यम् ? इति ॥ किं प्राप्तम् । अन्ये बृहत्यावागमयितव्ये इति । कुतः । एवमृचामुत्पत्तिरर्थवती भविष्यतीति ॥ एवं प्राप्ते ब्रूमः । प्रागाथिकं तु तुशब्दः पक्षं व्यावर्त्तयति । प्रागाथिकं सामगानं कर्त्तव्यं, नोत्पत्तिबृहत्यावागमयितव्ये । प्रकृतयोरेव प्रग्रथनं कर्त्तव्यम् । एवं हि स्मरन्ति । बार्हतः प्रगाथ इति । उत्पत्तिबृहत्योरानीयमानयोः प्रगाथो न स्यात् । तत्र स्मृतिर्बाध्येत । तस्मात् प्रकृतयोः प्रग्रथनं कर्त्तव्यमिति॥२५॥सि०॥

स्वे च ॥ २६ ॥

एवञ्च स्वे च्छन्दसि प्रकृते गानं भविष्यति, न प्रकृतहानमप्रकृतप्रक्रिया । तस्मादपि नान्ये बृहत्यौ आगमयितव्ये इति ॥ २६ ॥

प्रगाथे च ॥ २७ ॥

एवञ्च प्रगाथशब्द उपपन्नो भविष्यति । स हि प्रकर्षे गानस्य भवति । प्रकर्षश्चेह पुनःपादे उपादीयमाने भवति । तस्मादपि नान्ये बृहत्यौ उपादातव्ये इति ॥ २७ ॥

लिङ्गदर्शनाच्च व्यतिरेकाच्च ॥ २८ ॥

अव्यतिरेकेण च लिङ्गं दर्शयति । किं लिङ्गं भवति । एवमाह, षष्टिस्त्रिष्टुभो माध्यन्दिनं सवनमिति । कथं कृत्वा लिङ्गम् । यदि प्रग्रथनेन बृहतीकारङ्गानं क्रियते, ततः सर्वस्मिन् सवने या ऋचः समाम्नातास्ताः षष्टिर्भवन्ति । इतरथा उत्पत्तिबृहत्योरानीयमानयोरभ्यधिका भवेयुः । तदिदं निर्दिश्यते, गायत्रामहीयवे गायत्रे तृचे भवतः । ताः षड्गायत्र्यः । रौरव-यौधाजये बार्हते, ता अपि षड्बृहत्यः । औशनसमन्त्यं त्रिष्टुप्सु । ता अपि तिस्रस्त्रिष्टुभः । अथ होतुः पृष्ठे बृहति रथन्तरे वा सप्तदशस्तोमे क्रियमाणे पञ्च बृहत्यो भवन्ति। द्वादश च ककुभः ॥ कथम् ? । एषा हि तत्र तत्र विष्टुतिः । पञ्चभ्यो हिङ्करोति, स तिसृभिः, स एकया स एकया । पञ्चभ्यो हिङ्करोति, स एकया, स तिसृभिः, स एकया । सप्तभ्यो हिङ्करोति स एकया, स तिसृभिः, तिसृभिरिति ॥

तत्र बृहतीभिस्तिसृभिः प्रथममेकया च ककुभा, पुनश्चैकया ककुभा। ततः पुनरेकया बृहत्या तिसृभिः ककुब्भिः, एकया च ककुभा । एवं चतस्रो बृहत्यः षट् ककुभः।ततः पुनः, एकया बृहत्या,पुनश्च तिसृभिः ककुब्भिः, पुनश्च तिसृभिः ककुब्भिरितिः । एवं पञ्च बृहत्यो द्वादश ककुभ इति । ताभिश्च बृहतीभिः सहैकादश बृहत्यो भवन्ति । ततः षण्णां गायत्रीणां चतस्रो गायत्र्यो द्वादशभिः ककुब्भिर्द्वादश बृहत्यो भवन्ति । एवं त्रयोविंशतिर्बृहत्यः । ततो वामदेव्ये सप्तदशका गायत्र्यः । पावमानीभ्यां द्वाभ्यां गायत्रीभ्यामवशिष्टाभ्यां सहैकोनविंशतिगायत्र्यो भवन्ति । ततो नौधसकालेययोरेकत्र सप्तदश बृहत्यः, एकत्र सप्तपञ्चाशता गायत्रीपादैः सह सप्तपञ्चाशद् बृहत्यः सप्तपञ्चाशत् त्रिष्टुभो भवन्ति । पावमानीभिस्त्रिष्टुब्भिः सह षष्टिस्त्रिष्टुभ इति सिद्धं भवति ॥ अथ बृहद्रथन्तरयोरुत्पत्तिककुभोरागमः क्रियते तत्र याः सवने समाम्नाताः, ताः षष्टिर्भवन्ति । ये ते द्वे सवने ककुभौ असमाम्नाते आनीयेते, तयोर्द्वादशकृत्वः प्रयोगः । तेन साष्टिः पूर्य्यते । यास्ता ऋचः सवने समाम्नातास्ता इह सवनशब्देन उच्यन्ते, न कर्म्मणि सवनशब्दप्रयोगः । तत्र हि त्रिषु सवनेषु बह्व्यस्त्रिष्टुभो भवेयुः, न षष्टिस्त्रिष्टुभो माध्यन्दिनं सवनमिति । तस्माद्याऽसौ पूर्वा बृहती उत्तरा च विष्टारपङ्क्तिस्तत्र प्रगाथं कृत्वा गा-

तव्यमिति ॥ २८ ॥ युक्तिः ॥ बृहतीविस्तारपङ्क्त्योः प्रग्रथनेन रौरवयौधाजयसाम्नोर्गानाधिकरणम् ॥ ६ ॥ द्वितीयवर्णकम् ॥ २ ॥

एवं वा—

प्रागाथिकं तु ॥ २५ ॥

पञ्चच्छन्दा आवाप आर्भवः पवमानः सप्तसामा, गायत्रसंहिते गायत्रे तृचे भवतः, श्यावाश्वान्धीगवे आनुष्टुभे, उष्णिहि सफं, ककुभि पौष्कलं, कावमन्त्यजगतीष्विति । यदेतत्, श्यावाश्वमान्धीगवञ्च द्वे सामनी, तयोः पूर्वा अनुष्टुप्, पुरोजिती वो अन्धसः सुताय मादयित्नवे । अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् । उत्तरे द्वे गायत्र्यौ, यो धारया पावकया परिप्रस्यन्दते सुतः । इन्दुरश्वो न कृत्व्यः । तं दुरोषमभी नरः सोमं विश्वस्या धिया । यज्ञं हिन्वन्ति अद्रिभिरिति । तत्रैषोऽर्थः सांशयिकः । किमन्ययोरुत्पत्त्यनुष्टुभोऽरागमं कृत्वा समासु गानं कर्त्तव्यम् ? अथ वा याऽसौ पूर्वाऽनुष्टुप्, उत्तरे च गायत्र्यौ, तयोः प्रग्रथनेन तृचकर्म्म कृत्वा अनुष्टुप्कारं गानं कर्त्तव्यम् ? इति ॥ किं प्राप्तम् । अन्ये अनुष्टुभावागमयितव्ये इति । कुत एतत् । एवं तासामुत्पत्तिरर्थवती भविष्यति । एवं प्राप्ते ब्रूमः । प्रागाथिकं तु । प्रागाथिकं गानं कर्त्तव्यम् । एवं हि स्मरन्ति । अनुष्टुभः प्रगाथ इति । प्रगाथता स्मर्य्यमाणा नापह्नोतव्या ॥२५॥सि०॥

स्वे च ॥ २६ ॥

एवं स्वे गानं भविष्यति । तत्र प्रकृतमनुग्रहीष्यते । नाप्रकृतप्रक्रिया भविष्यति ॥ २६ ॥

प्रगाथे च ॥ २७ ॥

प्रगाथशब्दश्चोपपत्स्यते पुनःपादे गीयमाने ॥ २७ ॥

लिङ्गदर्शनाव्यतिरेकाच्च ॥ २८ ॥

अव्यतिरेकेण च लिङ्गं भवति । एवमाह, चतुर्विंशतिर्जगत्यस्तृतीयसवनम्, एका ककुबिति । तन्निर्दिश्यते । पञ्चच्छन्दा आवाप आर्भवः पवमानः सप्तसामा, गायत्रसंहिते गायत्रे तृचे भवतः । ताः षड् गायत्र्यस्तिस्रो जगत्यो भवन्ति । श्यावाश्वान्धीगवे आनुष्टुभे, तयोः पूर्वा अनुष्टुप्, उत्तरे गायत्र्यौ । तत्र प्रग्रथनेन क्रियमाणे द्वयोः साम्नोः षडनुष्टुभः, ताश्चतस्रो जगत्यः, पूर्वाभिः सह सप्त । उष्णिहि

सर्फं, ककुभि पौष्कलम् । एकमपि एकस्यामृचि, अपरमध्येक-स्याम् । ते द्वे उष्णिक्ककुभौ । सैका जगती । गायत्रीपादैश्च पूर्वा-भिः सहाष्टौ जगत्यः । कावे तिस्रो जगत्यः । ताभिः सहैकादश भ-वन्ति । एकविंशं यज्ञायज्ञीयम् । तत्र पूर्वा बृहती, उत्तरा विष्टारप-ङ्क्तिः । ततः ककुभावुत्तरे कृत्वा प्रगाथः क्रियते । एकविंशे च स्तोमे क्रियमाणे सप्त बृहत्यो भवन्ति । चतुर्दश ककुभः । याः सप्त बृहत्यः, ता पञ्च जगत्यः । पूर्वाभिः सह षोडश । एकश्चात्र जगतीपादः । पूर्वेण गायत्रीपादेन सह विंशतिरक्षराणि । अथ चतुर्दशसु ककुप्सु या द्वादश ककुभः, ताः सप्त जगत्यः । पूर्वाभिः सह त्रयोविंशतिः । ये द्वे ककुभौ शिष्टे, सैका जगती गायत्रीपादश्च । पूर्वाभिः सह चतु-र्विंशतिर्जगत्यः । गायत्रीपादः पूर्वैर्विंशत्यक्षरैः सह ककुब् भवति । एवं प्रगाथे क्रियमाणे चतुर्विंशतिर्जगत्यः । एका च ककुप् । अथ प्रगाथो न क्रियते, ततः श्यावाश्वान्धीगवयोरुत्तरत्रानुष्टुभोरागमाद् यज्ञायज्ञीये उत्पत्तिककुभोरागमान्नैषा संख्या सम्पद्यते । तस्मात् प्रग्रथनेन गानं कर्त्तव्यमिति ॥ २४ ॥ युक्तिः ॥ अनुष्टुब्गायत्र्योः प्रग्रथनेन श्यावाश्वान्धीगवयोर्गानाधिकरणम् ॥६॥ तृतीवर्णकम् ॥३॥

एवं वा— गवामयने ब्रह्मसाम प्रकृत्य समामनन्ति । चतुःशत-मैन्द्रा बार्हताः प्रगाथास्त्रयस्त्रिंशतं च सतोबार्हतास्त्रिका इति । तत्र सन्देहः । किं द्वयोर्द्वयोर्ऋचोः प्रगाथं कृत्वा गातव्यम् ? उत तिसृषु ऋक्षु गातव्यमिति । किं प्राप्तम् । तिसृषु ऋक्षु इति । कुतः । एवं प्र-कृतौ श्रूयते तस्मादेकं साम तृचे क्रियते इति । तदिह चोदकेन प्राप्तम् । तस्मात्तिसृषु गातव्यमिति । एवं प्राप्ते ब्रूमः—

प्रागाथिकं तु ॥ २५ ॥

स्वे च ॥ २६ ॥

प्रगाथे च ॥ २७ ॥

द्वयोर्द्वयोर्ऋचोर्गेयम् । एवं स्वे गानं कृतं भविष्यति । कस्मिन् स्वे । प्रगाथे । कथं प्रगाथः स्वः । विहितो हि गवामयने ब्रह्मसाम प्रकृत्य । तस्माद् ब्रह्मसाम्नः स्वः प्रगाथः । प्रगाथशब्देन च वचनात् स्वः प्रगाथ इत्युच्यते ॥ २५ ॥ २६ ॥ २७ ॥ सि० ॥

लिङ्गदर्शनाद्व्यतिरेकाच्च ॥ २८ ॥

भवति हि लिङ्गदर्शनं, पञ्चसुमाः सुबार्हताः प्रगाथा आप्यन्ते इति । तच्च प्रग्रथने युज्यते, न तृचगाने । कथम् । चतुरुत्तरं हि शतं ते प्रगाथाः । तत्र बृहद्रथन्तरयोर्ज्योतिष्टोमे प्रगाथद्वयम् । नौधसकालेययोरपि । तत्रैव प्रगाथद्वयम् । इन्द्रक्रतुः प्रगाथ उत्तरस्मिन् यक्षसि भवति । त एते नवनवतिः प्रगाथाः शिष्टा अभिप्लवेषु कर्त्तव्याः । पृष्ठेषु सतोबृहत्यो विधीयन्ते । अभिप्लवानां तृतीये दिवसे सतोबृहत्यः । एवमवशिष्टानि अभिप्लवानां शतमहानि । तेषामन्त्ये सतोबृहत्यः । अन्येषु नवनवतौ दिवसेषु नवनवतिः प्रगाथाः । आप्यन्ते इति लिङ्गमप्युपपन्नं भवति । तृचे पुनर्गाने क्रियमाणे षट्षष्टिस्तृचास्त्रिषु सप्ताधिकेषु मासेषु समाप्येरन् । तदेतस्माल्लिङ्गदर्शनात् प्रगाथे गानं कर्त्तव्यमिति मन्यते ॥ आह । अथ कस्मान्न प्रथमतृचे गानं कृत्वा ततस्तस्मात् तृचादेकामृचमादायान्ये द्वे ऋचौ गृहीत्वा तृचे गानं क्रियते ? । तथा हि तृचगानप्रापी चोदकोऽनुगृहीतो भवति । लिङ्गञ्चोपपत्स्यते । पञ्चसुमाः सुबार्हताः प्रगाथा आप्यन्ते इति। उच्यते । अव्यतिरेकेण लिङ्गं दर्शयति । अन्या ऋचो भवन्ति । तदेव सामेति । तस्माद् द्वयोर्द्वयोर्ऋचोः प्रगाथं कृत्वा गानं कर्त्तव्यमिति ॥ २८ ॥ युक्तिः ॥ पादप्रग्रथनेन ब्रह्मसामगानाधिकरणम् ॥६॥ चतुर्थवर्णकम् ॥ ४ ॥

अर्थैकत्वाद् विकल्पः स्यात् ॥ २९ ॥

सामवेदे सहस्रं गीत्युपायाः । आह । के इमे गीत्युपाया नाम । उच्यते । गीतिर्नाम क्रिया । सा आभ्यन्तरप्रयत्नजनितस्वरविशेषाणामभिव्यञ्जिका । सा सामशब्दाभिलप्या । सा नियतपरिमाणे ऋचि च गीयते । तत्सम्पादनार्थं ऋक्षु अक्षरविकारो विश्लेषो विकर्षणमभ्यासो विरामः स्तोभ इत्येवमादयः सर्वे समधिगताः समाम्नायन्ते । तेषु संशयः । किं समुच्चीयन्ते, उत विकल्प्यन्ते इति । किं तावन्नः प्रतिभाति । सर्वेषां समाम्नानात् सर्वाङ्गोपसंहारित्वाच्च प्रयोगवचनस्य, समुच्चीयेरन्निति । एवं प्राप्ते ब्रूमः । अर्थैकत्वाद्विकल्पः स्यादिति । एकार्था हि गीत्युपायाः । गीतिः कथं निर्वर्त्तेतेति प्रयुज्यन्ते । तत्रान्यतरेण भिन्ना गीतौ निर्वृत्तायां नेतरे प्रयोगमर्हन्ति । तस्माद्विकल्प इति ॥ २९ ॥ गीतिसंपादकानामक्षरविकारादीनां विकल्पाधिकरणम् ॥ ७ ॥

अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात् ॥ ३० ॥

कचित्कर्मविशेषे श्रूयते, ऋचा स्तुवते साम्ना स्तुवते यदृचा स्तुवते तदसुरा अन्ववायन् यत् साम्ना स्तुवते तदसुरा नान्ववायन् य एवं विद्वान् साम्ना स्तुवीतेति । तत्रायमर्थः सांशयिकः । किमृचा वा स्तोतव्यं, साम्ना वा ? उत साम्नैवेति । किं तावत् प्राप्तम् । विकल्पः । ऋचा वा साम्ना वा । भिन्नमिदं वाक्यं दृश्यते । यदृचा स्तुवते तदसुरा अन्ववायन्निति । ऋचा स्तवे क्रियमाणेऽसुरा अन्ववगता इति । परिपूर्णमेतावति वाक्यं पश्यामः । एवमर्थमिदं सङ्कीर्त्यते । कथं नाम गम्यते ऋचा स्तोतव्यमिति । किमर्थम् । यस्मिन् कर्मविशेषे श्रूयते, तस्याङ्गं यथा स्तात् । तच्च प्रयोगसामर्थ्यात् प्रयोगवचनेन गम्यते इति ॥ नन्वसुरसङ्कीर्त्तनान्निन्दैषा । नेत्याह । न वयं निन्दितान् अनिन्दितान् वा असुरान् विद्मः । सङ्कीर्त्तनात् कर्त्तव्यतामध्यवस्यामः । एवं साम्ना स्तुवते इति पृथग्वाक्यम् । तस्माद्विकल्पः । ऋक्सामयोः स्तुत्यर्थत्वादुभयोरप्येकं कार्य्यम् । स्तुतिर्हि निर्वर्त्तयितव्येति, तदन्यतरेण सिद्ध्यतीति विकल्पः ॥ ३० ॥ पूर्व० ॥

वचनाद्विनियोगः स्यात् ॥ ३१ ॥

नैतदस्ति, विकल्प इति । साम्नो विनियोगः स्यात् । कुतः । तस्येह विनियोजकं वचनमस्ति । यदृचा स्तुवते तदसुरा अन्ववायन् । य एवं विद्वान् साम्ना स्तुवीतेति साम्ना स्तुतिः प्रशस्यते प्रत्यक्षेण प्रशंसावचनेन । इतरथा कल्प्या स्यात् । ऋचा स्तवने असुरा अनुगताः । तस्माद् ऋचा स्तोतव्यमिति । अथ साम्ना स्तवः प्रशस्यते, ततो यदृचा स्तुवते तदसुरा अन्ववायन्नितीतरप्रशंसार्था निन्दैषा न किञ्चिद् विकल्पयिष्यते इति । कथं निन्दावचनमेतदिति गम्यते । इतरस्तुतिवचनात् । तस्मात् साम्नैव स्तोतव्यमिति ॥ ३१ ॥ ॥ सिद्धान्तः ॥ ऋचा स्तुवते साम्ना स्तुवते इति विधिना साम्नैव स्तवविधानाधिकरणम् ॥ ८ ॥ प्रथमवर्णकम् ॥ १ ॥

अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात् ॥ ३० ॥

कचित् कर्मविशेषे श्रूयते । अयं सहस्रमानव इत्येतया आहवनीयमुपतिष्ठते इति । अत्रायमर्थः सांशयिकः । किमप्रगीतया उपस्थातव्यम्, उत प्रगीतयेति । किं प्राप्तम् । प्रगीतया अप्रगीतया वा ।

कुतः । अविशेषोपदेशात् । प्रगीताऽप्यसौ इयमेव ऋक् । अप्रगीताऽपीयमेव। उभयथा हि तां समामनन्ति । तस्मान्न विशेष आदर्त्तव्य इति।न चेद्विशेषः, स्तुतिपरत्वाद् ऋक्सामयोर्विकल्प इति ॥३०॥ पूर्व०॥

एवं प्राप्ते ब्रूमः—

वचनाद्विनियोगः स्यात् ॥ ३१ ॥

प्रगीतैव विनियुज्येत, नाप्रगीता । कुतः । वचनात् । किं वचनम् । अयं सहस्रमानव इत्येतया इतिप्रकृतवचनशब्दः । प्रगीता च सामवेदे प्रकृता । सा, एतया इति सम्बध्यते । नन्वप्रगीताऽपि तत्र पठ्यते । सत्यम् । प्रगाणसम्बन्धार्था तु सा । न ह्यपठितायां प्रगाणं शक्यते कर्त्तुमिति ऋक् सामार्थे । ऋचोऽध्ययनं सामार्थं गम्यते । न ह्यन्तरेण ऋचं, सामनिर्वृत्तिर्भवति । अन्तरेणापि तु साम, ऋक् निर्वर्त्यते । न ऋक् साम आकाङ्क्षते इति । तस्मादेवं सामवेदे, उपतिष्ठते वा, स्तौति वेत्युक्ते प्रगीतायामेव ऋचि सम्प्रत्ययो भवति, नाप्रगीतायाम् ॥

आह । यदि प्रगीतायां सम्प्रत्ययः प्रकरणाद्, वचनादप्रगीतायाम् । अप्रगीताऽपि हि शाखान्तरे समाम्नायते । सा प्रकरणं बाधित्वा वाक्येन गृह्येतेति । उच्यते । न वाक्येन ऋक् गृह्यते । प्रतीकग्रहणं ह्येतत् । अयं सहस्रमानव इत्येतयेति पुनः प्रकृताया ऋचो वाचको मुख्य ऋक्शब्दः । त्वत्पक्षे प्रतीकग्रहस्य लक्षणा स्यात् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या, न लक्षणा । तस्मात् प्रगीतया उपस्थातव्यमिति ॥ ३१ ॥ सिद्धान्तः ॥ अयं सहस्रमानव इत्यृचा प्रगीतयैव आहवनीयोपस्थानाधिकरणम् ॥ ८ ॥ द्वितीयवर्णकम् ॥ २ ॥

अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात् ॥३०॥

इह केचित् त्रैस्वर्य्येणाम्नायन्ते, केचिच्चातुःस्वर्य्येण । आह । ये इमे चातुःस्वर्य्येणाधीयन्ते, किं ते, उदात्तानुदात्तस्वरितेभ्योऽधिकमपरं स्वरं कुर्वन्ति ? नेत्याह । तेषामप्येते एव स्वराः, येऽन्येषाम् । किं नु कुर्वन्ति । एकं स्वरान्तरमुत्क्रम्याधीयन्ते । तत्र सन्देहः । किं समुच्चयस्त्रैस्वर्य्यादीनाम्, उत विकल्प इति । किम्प्राप्तम् । सर्वाङ्गोपसंहारित्वात् प्रयोगवचनस्य, समुच्चय इति । एवम्प्राप्ते ब्रूमः । अर्थैकत्वाद्विकल्पः स्यात् । एकोऽर्थः सर्वेषां त्रैस्वर्य्यादीनामध्ययननिर्वृत्तिः । तस्माद्विकल्पः ॥ ३० ॥ पूर्व० ॥

वचनाद्विनियोगः स्यात् ॥ ३१ ॥

वचनमिदं भवति स्मृत्यनुमितम् । तानो यज्ञकर्म्मणि इति । तस्मात्तानेन प्रयोगः कर्त्तव्यः । अथ त्रैस्वर्य्यादीनां किमर्थं समाम्नानमिति । उच्यते । अर्थाववोधनार्थं भविष्यति ॥ ३१ ॥ सिद्धान्तः ॥ अग्निर्मूर्द्धेत्यादियाज्यानुवाक्यादीनां तानेन प्रयोगाधिकरणम् ॥ ८ ॥ तृतीयवर्णकम् ॥ ३ ॥

सामप्रदेशे विकारस्तदपेक्षः स्याच्छास्त्रकृतत्वात् ॥३२॥

इदमाम्नायते, रथन्तरमुत्तरयोर्गायति, यद्योन्यां तदुत्तरयोर्गायथति, कवतीषु रथन्तरं गायति, विराट्सु वामदेव्यमिति। तत्र सन्देहः । किमुत्तरावर्णवशेन गातव्यं, किं योनिवर्णवशेन ? । कथमुत्तरावर्णवशेन गीतं भवति ? कथं वा योनिवर्णवशेनेति । उच्यते । किञ्चिदुदाहरणं गृहीत्वा व्याख्यास्यामः । यदा तावद् वृद्धं तालव्यमाई भवति इति योनौ यस्मिन् भागे आईभावः कृतस्तस्मिन्नेव भागे उत्तरासु आईभावः क्रियते । ततो योनिवर्णवशेन गीतं भवति । अथ भागान्तरे वृद्धं तालव्यं दृष्ट्वा आईभावः क्रियते, तत उत्तरावर्णवशेन गीतं भवति ॥

किं पुनरत्र कर्त्तव्यम् । योनिवर्णवशेनेति । कथम् । यावति भागे एकारस्य योनौ आईभावः कृतस्तत्र विचारयामः। किं तत्र कृतमिति । एकारो नोच्चारितः, ईकाराकारौ आगमिताविति । एवञ्चेदुत्तरास्वपि तावत्येव भागे यो वर्णः, स नोच्चारयितव्यः । ईकाराकारौ आगमयितव्याविति । एवं, यद्योन्यां तदुत्तरयोर्गीतं भवति । तस्माद्योनिवर्णवशेन गातव्यमिति । अपिचैवं गीतिर्न प्रणङ्क्ष्यति, इतरथा कचित् प्रणश्येद् यत्र महती गीतिरल्पेषु अक्षरेषु गीयते । तत्र व्यक्तं प्रणश्यति यद्युत्तराक्षरवशेन क्रियते । तस्माद्योन्यक्षरवशेन कर्त्तव्यम् ॥ अपिच क्वचिदुपरुध्यते यत्राक्रमे आईभावभाग्वर्णः । आर्षश्च कचिदुपरुद्ध्यते। यत्र प्राकृत आगमो नैव क्रियते, तत्र स्वाध्यायकाले गानेन च कर्मकालं गानमविरुद्धं कर्त्तव्यम । तस्माद्योन्यक्षरवशेन कर्त्तव्यमिति सामप्रदेशे विकार आईभावादिः । तदपेक्षो योन्यपेक्षः । एतत्, शास्त्रेण कृतं, यद्योन्यां तदुत्तरयोरिति । यावति सामभागे योनौ आईभावः कृतस्तावत्येवोत्तरासु कर्त्तव्यः ॥ ३२ ॥ पूर्वं० ॥

वर्णे तु बादरिर्यथाद्रव्यं द्रव्यव्यतिरेकात् ॥ ३३ ॥

उत्तरावर्णवशेन कर्त्तव्यं बादरिर्मन्यते स्म, न योनिभागवशेन। कुतः। योऽसौ प्रकृतौ आईभावः कृतो, नासौ आगमः। न च तत्र एकारलोपः। किं तर्हि एकारो नाम अवर्णम् इवर्णश्च। अवर्णं संवृतम्, इवर्णं विवृतम्,उभे अपि च दीर्घे। ताभ्यामसाधुभ्यां सन्ध्यक्षरं साधु जन्यते। तत्र प्रकृतौ अकारेकारौ विश्लेषितौ, नाऽपूर्वावागमितौ। गुणस्तु तयोः कश्चिदपूर्वः कृतः। सर्वत्रात्र प्रमाणं प्रत्यक्षम्। तद्यत्र, तावति भागेऽन्यो वर्णो भवति, न सन्ध्यक्षरं, तत्र संश्लेषाभावे विश्लेषो न शक्यः कर्त्तुम्। अन्यस्मिन् भागे यत्र सन्ध्यक्षरं भवति, तत्र तद्वशाद्विश्लेषः क्रियते। एवं, यद्योन्यां तदुत्तरयोः कृतं भवति। योन्यां हि संश्लिष्टयोर्विश्लेषः कृतः। इहापि संश्लिष्टयोर्विश्लेषः। इतरथा व्यतिरिक्तं कल्पितं स्यात् ॥ अथ यदुक्तं, गीतिः प्रणङ्क्ष्यतीति। न प्रणङ्क्ष्यतीति। विनामं कृत्वा अनक्षरं गायिष्यते। संश्लेषाभावाच्चाशक्यो विश्लेषः कर्त्तुम्। आर्षक्रमौ नोपरोत्स्येते ॥ ३३ ॥ सिद्धान्तः ॥ रथन्तरमुत्तरयोर्गायतीत्यादौ उत्तरावर्णवशेन गानाधिकरणम् ॥ ९ ॥

स्तोभस्यैके द्रव्यान्तरे निवृत्तिमृग्वत् ॥ ३४॥

कवतीषु रथन्तरं गायति, रथन्तरमुत्तरयोर्गायति, यद्‌योन्यां तदुत्तरयोर्गायतीति। तत्रोत्तरावर्णवशेन गातव्यमित्येतत्समधिगतम्। अथेदानीमिह सन्दिह्यते। किं स्तोभाः प्रदिश्यन्ते, न? इति। किं प्राप्तम्। न प्रदिश्यन्ते इति। कुतः। गीतिर्हि साम, न स्तोभाः। या गीतिः सा प्रदिश्यते। यद्योन्यां तदुत्तरयोर्गायतीति गायतिशब्दसम्बन्धात्। अपि च दिक्शब्दार्थैरसम्बध्यमानः स्तोभोऽनर्थकः स्यात्। तस्मादपि न प्रदिश्येत। अपिच क्वचिद् भवति वचनम्। ऐन्द्र्यामवभृथसाम गायतीति। तत्रानुपपत्तिर्भवेत्। शीतकर्मा हीन्द्रोवाक्यशेषेभ्योऽवगम्यते। तस्य तपतीत्यनेन सम्बन्धो न स्यात्। तस्मात् स्तोभस्य ऋगन्तरे निवृत्तिः। यथा ऋगक्षराणामगीतित्वान्निवृत्तिरेवं स्तोभाक्षराणामपीति ॥ ३४ ॥ पूर्व० ॥

सर्वातिदेशस्तु सामान्याल्लोकवद्विकारः स्यात् ॥ ३५ ॥

नैतदस्ति, स्तोभानां निवृत्तिरिति। सर्वातिदेशो हि भवति।

ऋक्-स्तोभ-स्वर-कालाभ्यासविशिष्टाया गीतेः सामशब्दो वाचकः। कथमवगम्यते । तत्र प्रयोगात् । यदि स्तोभा निवर्त्तेरन्, तत्कृतो विशेषो नोपसंगृहीतः स्यात् । तत्र शब्दो बाध्येत । तस्मात् स्तोभाः प्रदिश्येरन् । यत्तूक्तम्, ऋक्शब्दार्थैरसम्बद्ध्यमानाः स्तोभा अनर्थका भवेयुः । अत्र ब्रूमः । लोकवन्न अनर्थका भविष्यन्ति । तद्यथा लोके गायनैरङ्गवस्तुकानि यानि नाम प्रक्षिप्यन्ते तानि गीतिकालगणनाऽर्थानि, नार्थसम्बन्धायोच्चार्य्यन्ते । सुखं ह्यक्षरैर्गीतिकालः परिच्छिद्यते । तद्वद् इहापि कालपरिच्छेदार्थानि स्तोभाक्षराण्यनुवर्त्तेरन्निति ॥ ३५ ॥ सि० ॥

अन्वयश्चापि दर्शयति ॥ ३६ ॥

अन्वयतश्चापि स्तोभान् दर्शयति । यत्रार्चिकानि पदानि निवर्त्तन्ते, स्तोभा गेह्याश्चानुयन्तीति । स्तोभाः स्तोभा एव । गेह्याः स्वराः । तस्मादपि स्तोभाः प्रदिश्यन्ते ॥ ३६ ॥ युक्तिः ॥

निवृत्तिर्वाऽर्थलोपात् ॥ ३७ ॥

वाशब्दात् पक्षो विनिवर्त्तते । निवृत्तिः, अग्निष्टपतीत्येवञ्जातीयकानां स्तोभानाम् । शीतकर्मा हीन्द्रो वाक्यशेषे उपलभ्यते । न तेनैवञ्जातीयकाः स्तोभाः सम्बद्ध्येरन्निति । अन्वयात् सम्बद्ध्यन्ते लोकवदिति यदुक्तं, तत् परिहर्त्तव्यम् ॥ ३७ ॥ आ० ॥

अन्वयो वार्थवादः स्यात् ॥ ३८ ॥

अन्वीयुर्वा एवञ्जातीयका स्तोभाः । न हि वयमिन्द्ररूपं प्रत्यक्षमुपलभामहे । यच्च वाक्यशेषवचनं, सोऽर्थवादः ॥ ३८ ॥ आ० नि० ॥ उत्तरयोः स्तोभातिदेशाधिकरणम् ॥ १० ॥

अधिकश्च विवर्णश्च जैमिनिः स्तोभशब्दत्वात् ॥३९॥

अथ कः स्तोभो नाम । तस्य लक्षणं कर्त्तव्यम् । उच्यते । य ऋगक्षरेभ्योऽधिको, न च तैः सवर्णः स स्तोभो नाम । ईदृशे हि लौकिकाः स्तोभशब्दमुपचरन्तीति । तद्यथा देवदत्तेन सभायां परं प्रलपता बहुस्तोभं कथितमिति । यदर्थवचनेभ्योऽधिकं विवर्णञ्च, तद् आलोच्य एवंवक्तारो भवन्ति । लक्षणकर्मणः प्रयोजनं न वक्तव्यम् । लक्षणकर्मणो हि तदेव प्रयोजनं, यल्लक्षितो भविष्यतीति । किमर्थमुभयं सूत्रितम् ? नन्वन्यतरत् पर्य्याप्तम्, अधिकमिति वा विवर्ण-

मिति वेति । नेत्याह । भवति हि किञ्चिदधिकं, न विवर्णम् । यथा अभ्यासश्चाद्रिश्चाद्रिरिति । तथा किञ्चिद् विवर्णं, नाधिकम् । यथा विकारः, ओग्नाइ इति तस्मादुभयं सूत्रयितव्यमिति ॥ ३९ ॥ स्तोभलक्षणाधिकरणम् ॥ ११ ॥

धर्मस्यार्थकृतत्वाद्द्रव्यगुणविकारव्यतिक्रमप्रतिषेधे चोदनानुबन्धः समवायात् ॥ ४० ॥

वाजपेये श्रूयते । बार्हस्पत्यश्चरुं नैवारं सप्तदशशरावं निर्वपतीति । अस्ति च प्रकृतौ व्रीहिषु प्रोक्षणम् । तद्नीवारेषु भवति, न वेति संशयः । तथा, उद्गीथा वा एतर्हि याग्रवति यर्हि पृष्ठः षडहः सन्तिष्ठते, न बहु वदेन्नान्यं पृच्छेन्नान्यस्मै ब्रूयात् । संस्थिते षडहे मध्वाशयेद् घृतं वा इति मध्वशने घृताशने च षडहधर्मा भवन्ति वा, न भवन्तीति संशयः । तथा राजसूये श्रूयते, नैऋतश्चरुं नखावपूतानां परिवृत्यै ग्रहे इति । अस्ति प्रकृतौ उलूखलमुसलयोः प्रोक्षणम् । प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्तीति । तद् नखेषु भवति, न भवति? इति संशयः । तथा चातुर्मास्येषु श्रूयते । परिधौ पशुं नियुञ्जीतेति परिधौ यूपधर्माः कर्त्तव्याः, न कर्त्तव्याः ? इति संशयः । तथा, न गिरा गिरेति ब्रूयाद्यदि गिरा गिरेति यादात्मानं तदुद्गातोद्गिरेद् ऐरं कृत्वोद्गेयमिति, इरापदे गिरापदधर्मा भवन्ति ? न भवन्तीति संशयः ॥ किं तावत् प्राप्तम् । व्रीह्यादिषु उक्ता धर्म्मा, न नीवारादिषु । तस्मात्तेषु न भवेयुरिति । एवं प्राप्ते ब्रूमः । नीवारादिषु चोदनानुबन्धः स्यात् । समवैति हि तेषु स प्राकृतो धर्म्मः । प्रकृतौ तावदपूर्वप्रयुक्तोऽसौ न व्रीह्यादिप्रयुक्तः । येनापूर्वस्य विशिष्टोऽयं साधनविशेषस्तत्रैव धर्मो, न व्रीह्यादाविति समधिगतमेतत् । नीवारादयश्च व्रीह्यादिकार्यकारिण इत्यवगम्यते । नीवारस्य भावचोदना । नैवारश्चरुः कर्त्तव्य इति । स च नान्येन प्रकारेण नीवारो यागस्योपकरोति, वर्जयित्वा तण्डुलनिर्वृत्तिम् । स प्रत्यक्षेणावगम्यते, व्रीहिकार्य्ये वर्त्तते इति । तस्माद् व्रीहिधर्मा नीवारे भवेयुरिति ॥ एवं षडहेनोपासीतेति चोदनायां सत्यां यदा षडहः सन्तिष्ठते, न षडहेनोपास्यते इत्यर्थः । मधुघृताभ्यामुपासीतेति गम्यते। यस्य भावे यस्य निवृत्तिस्तत्तस्य स्थानेऽवगम्यते । षडहनिवृत्तौ मध्वशनं ब्रुवन् षडहकार्य्ये व-

द्दतीति गम्यते । तस्मात् षडहधर्मो व्रतं नियमो वा मध्वशने भवतीति । यागाभावात्तन्निमित्ता ग्रहा न प्रवर्त्तन्ते । ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोतीति ग्रहचमसाभावात् स्तोत्राभावः । स्तुतमनुशंसतीति स्तोत्राभावादस्याभावः । सवनाभावात् सवनीया न प्रवर्त्तन्ते, इत्येवमादि न प्रवर्त्तते । व्रतानि नियमाश्च प्रवर्त्तन्ते इति ॥ यच्चान्यदनर्थलुप्तं न नखावपूतानामिति । नान्यथा नखावपूता भवन्ति । यदि न तैस्तुषा विपूयन्ते, तस्मात्तुषविमोचने नखाः श्रुता इति गम्यते । अतश्चोलूखलमुसलधर्म्मैः सम्बद्ध्यन्ते इति ॥

तथा परिधिर्यूपकार्य्ये वर्त्तते इति विस्पष्टमेव वचनं, परिधौ पशुं नियुञ्जन्तीति । तस्मात्तद्धर्म्मकः परिधिः स्यादिति ॥ तथा न गिरा गिरेति ब्रूयादैरं कृत्वोद्गेयमिति नैतौ द्वावपि विधीयेते प्रतिषेध, इरापदश्च । तथा हि वाक्यं भिद्येत । न च, इरापदमप्राप्तत्वादनूद्यते । प्रतिषेधे त्वनुवादः सम्भवति । यदा इरापदं तदा व्यक्तं गिरापदं न भवतीति । एकवाक्यरूपञ्च गम्यते । यस्माद्गिरापदस्यायं दोषस्तस्मादिरापदं ब्रूयादिति । भिन्नवाक्यरूपे त्वाश्रीयमाणे भूयसी अदृष्टानुमानकल्पना स्यात् । न ह्यात्मानं गिरेदिति दोषो विधीयते । शरीरं गिरितुमसम्भवः । परमात्मन्यदोषः । वाक्यभेदस्तु स्थित एव । तस्माद् गिरापदोच्चारणमिरापदस्य तत्कार्य्यापत्तिषु दर्शनार्थं, न गिरा गिरेति कृत्वोद्गायेदिति । तस्माद्गिरापदधर्म्मा इरापदे भवेयुरिति सर्वत्र पर्य्यवसितम् । परिधौ अनन्तरा कथा वर्त्तिष्यते ॥ ४० ॥ नीवारादिषु प्रोक्षणावघातादिधर्मानुष्ठानाधिकरणम् ॥१२॥

तदुत्पत्तेस्तु निवृत्तिस्तत्कृतत्वात् स्यात् ॥ ४१ ॥

चातुर्मास्येष्वाम्नायते । मध्यमे पर्वणि परिधौ पशुं नियुञ्जन्तीति । तत्रोक्तं, यूपधर्माः परिधौ कर्त्तव्या इति । तद्विपरिवर्त्तते । ते न कर्त्तव्याः । तदुत्पत्तेः परिधेराहवनीयपरिधानार्थोत्पत्तेर्यूपधर्मा निवर्त्तेरन् । तत्कृता हि ते अपूर्वप्रयुक्तपशुबन्धनद्वारेण अपूर्वं गच्छन्ति । तत्र यद् बन्धनस्याङ्गभूतमिति श्रुतं तद् बन्धनार्थमेव द्रव्यमुत्पन्नम् । यच्चाहवनीयपरिधानार्थमुत्पन्नं, तस्मिन् पराङ्गभूते बन्धनं कृतं भवति । न तद्धर्माणां द्वारं भवितुमर्हति । न हि तत्र क्रियमाणाः पशोः कृता भवन्ति । न पाशुकस्य । अपिच सत्वक्कः परिधिरनु-

च्छ्रयश्च यूपधर्मैः परिधित्वाद् हीयेत । यूपायाज्यमानायेति च शब्द ऊह्येत । तत्रायं बाधितः स्यात् । तस्मात् परिधौ यूपधर्मा न स्युरिति ॥ ४१ ॥ पूर्व० ॥

आवेश्येरन् वार्थवत्त्वात् संस्कारस्य तदर्थत्वात् ॥४२॥

आवेश्येरन् वा यूपधर्माः परिधौ [१]बन्धनोपकारसाधने हि विधीयन्ते । यश्च परार्थो बन्धनं नयति निष्पादयति, करोत्यसौ बन्धनोपकारम् । अयञ्च संस्कारो बन्धनं निष्पादयति, तदर्थोत्पत्तिम् अतदर्थोत्पत्तिं वा नापेक्षते । तस्मात्परिधौ यूपधर्माः कर्त्तव्या इति ॥ यदुक्तम्, अनुच्छ्रयश्च सत्वक्कश्च परिधिरिति । अत्रोच्यते । ये परिधित्वाविरोधिनो यूपधर्मास्ते करिष्यन्ते, न विरुद्धा इति ॥ ४२ ॥ सि० ॥

आख्या चैवं तदावेशाद् विकृतौ स्यादपूर्वत्वात् ॥४३॥

अथ यदुक्तं, यूपायाज्यमानायेति शब्द ऊहितव्यः स्यादिति । अत्रोच्यते । नोहितव्यो भविष्यति । धर्मावेशाद् आख्या अपि यूप इति भविष्यति । धर्मनिबद्धा हि सा यथैव यूपे, तथा परिधावपि भवितुमर्हति । तस्मान्नोहिष्यते यूपशब्द इति ॥ ४३ ॥ आ० नि० ॥ परिधौ यूपधर्मानुष्ठानाधिकरणम् ॥ १३ ॥

परार्थेन त्वर्थसामान्यं संस्कारस्य तदर्थत्वात् ॥ ४४ ॥

वि वा एनं प्रजया पशुभिरर्द्धयति वर्द्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति स त्रेधा तण्डुलान् विभजेत्, ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत् । ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं ये क्षोदिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुम् । शृते चरुं दधंश्चरुमित्येवमुदाहरणम् । तत्रायमर्थः सांशयिकः । किं शृते दध्नि प्रणीता धर्माः कर्त्तव्याः ? उत न कर्त्तव्या- इति । किं प्राप्तम् । न कर्त्तव्या इति । परार्थमेतत् प्रदानार्थमिति, न प्रणीतार्थम् । दधि च तण्डुलविभागश्च एको भाग इन्द्राय प्रदात्रे दातव्यः । शृतश्च तण्डुलविभागश्च विष्णवे शिपिविष्टाय, न श्रपणार्थं दधि पयो वा विधीयते । तत्र हि सप्तमीसंयोगोऽनुवाद एव । न च प्रणीताकार्य्ये विधीयते दधि पयो वा । तस्मात् प्रणीतानां धर्मैर्न संयुज्येते । न हि प्रणीतानां दध्नश्च अर्थसामान्यं किञ्चिदस्ति । तदर्थश्चायं संस्कारः, श्रपणद्वारकः । तस्मान्न प्रणीताधर्माः पयसि दधनि

था भवेयुरिति ॥ ४४ ॥ पूर्व० ॥

क्रियेरन् वाऽर्थनिर्वृत्तेः ॥ ४५ ॥

नचैतदस्ति, प्रणीताधर्मा दधिपयसोर्न कर्त्तव्या इति । श्रपणसाधने हि ते विधीयन्ते, न श्रपणार्थमुत्पन्ने द्रव्ये, येनार्थो निवर्त्तेत तत्र ते अपूर्वप्रयुक्तत्वात् क्रियन्ते । क्रियते च दधिपयोभ्यां श्रपणम् । तस्मात् तद्धर्मैः संयोगः स्यात् ॥ ४५ ॥ सिद्धान्तः ॥ शृतादौ प्रणीताधर्मानुष्ठानाधिकरणम् ॥ १४ ॥

एकार्थत्वादविभागः स्यात् ॥ ४६ ॥

ज्योतिष्टोमे समामनन्ति, बृहत्पृष्ठं भवति रथन्तरं पृष्ठं भवतीति । व्यक्तो हि बृहद्रथन्तरयोर्विकल्पः । यस्मिन् कार्य्ये रथन्तरं प्रवर्त्तते तस्मिन्नेव कार्य्ये बृहत्पृष्ठसिद्धिद्वारेण धर्मा विहिताः । तस्माद् बृहद्धर्मा रथन्तरधर्माश्चोभयत्र कर्त्तव्या इति । बृहद्ग्रहणं रथन्तरग्रहणञ्च लक्षणाऽर्थं भविष्यति ॥ ४६ ॥ पूर्व० ॥

निर्देशाद्वा व्यवतिष्ठेरन् ॥ ४७ ॥

निर्देशाद्वा रथन्तरे रथन्तरधर्माः कर्त्तव्याः । नोच्चैर्गेयं, न च बलवद् गेयम् । रथन्तरे प्रस्तूयमाने संमीलेत् स्वर्द्दशं प्रतिवीक्षेतेत्येवमादयः । बृहद्धर्माश्च, बृहति उच्चैर्गेयं, बृहति गीयमाने समुद्रं मनसा ध्यायेदित्येवमादयः । एवं निर्देशोऽर्थवान् भविष्यति । इतरथा रथन्तरग्रहणञ्च बृहद्ग्रहणञ्च प्रदर्शनार्थं स्यात् । तथा लक्षणा भवेत् । न च श्रुतिसम्भवे लक्षणा न्याय्या । यदुच्यते, अर्थैकत्वाद् बृहद्रथन्तरयोरिति । सत्यमेकोऽर्थः पृष्ठसिद्धिः । एतदप्यस्ति । अन्यथा बृहता साध्यते पृष्ठम् । अन्यथा रथन्तरेणेति । यथा पर्वणि विभज्यमाने द्वावप्युपायौ । यथा द्वौ पुरुषौ अन्तयोर्गृहीत्वा आकर्षतः । यद्वा तीक्ष्णेन शस्त्रेण च्छेदनम् । तत्र यच्छस्त्रस्य तीक्ष्णीकरणं द्रव्यं तच्छेदनाभ्युपाये सम्बद्ध्यते, नाकर्षणाभ्युपाये तदर्थापन्नेऽपि । एवं बृहद्धर्मा रथन्तरे तदर्थापन्ने भवेयुर्वा न वेति जायते विचारणा । तत्र निर्देशसामर्थ्यादिदमवगच्छामः । अन्यथा बृहत्साधयति । अन्यथा रथन्तरमिति । प्रत्यक्षं खल्वपि अन्यदुपलभामहे । रथन्तरं शूरादिकां संस्तुतिं कुर्वत् पृष्ठं साधयति । बृहत् चित्रादिकाम् । तस्माद्रथन्तरधर्माः शूरादिकायां स्तुतौ निर्बद्धा रथन्तरे प्रस्तूयमाने भवे-

युर्न बृहति । बृहद्धर्मा अपि चित्रादिकायां स्तुतौ निबद्धा बृहति भवेयुः, न रथन्तरे । तस्माद् व्यवस्था धर्माणामिति ॥ ४७ ॥ सिद्धान्तः ॥ बृहद्रथन्तरयोर्धर्मव्यवस्थाधिकरणम् ॥ १५ ॥

अप्राकृते तद्विकाराद्विरोधाद्व्यवतिष्ठेरन् ॥ ४८ ॥

अस्ति वैश्यस्तोमः । वैश्यो वैश्यस्तोमेन यजेतेति । तत्रेदमाम्नायते । कण्वरथन्तरं पृष्ठं भवतीति । तत्रायमर्थः सांशयिकः । किं कण्वरथन्तरेऽन्यतरस्य रथन्तरस्य बृहतो वा धर्म्माः कर्त्तव्याः ? उतोभयोरपीति । किं प्राप्तम् । अन्यतरस्येति । कुतः । एवं हि उक्तम् । रथन्तरस्य राथन्तरा भवन्ति । बृहतो बृहद्धर्मा इति निर्देशसामर्थ्यादिति । तद्विशेषेऽनुच्यमाने यावदुक्तं तावत् प्राप्तमिति । तस्मादन्यतरस्य धर्माः कर्त्तव्या इत्येवं प्राप्ते ब्रूमः । अप्राकृते कण्वरथन्तरे तद्विकाराद् यस्मात् कण्वरथन्तरमुभयोः कार्य्ये वर्त्तते, तस्मादुभयधर्माँल्लभेत । न हि विकृतौ निर्देशोऽस्ति यथा प्रकृतौ । अर्थापत्तित इह भवन्ति । चोदकेन कण्वरथन्तरमुभयोरर्थापन्नम् । तस्मादुभयधर्माँल्लभेत । ये तु विरुद्धा धर्माः, तद्यथा उच्चैर्गेयं बलवद्गेयमित्येवजातीयका विरोधाद् व्यवतिष्ठेरन् । अविरुद्धेषु समुच्चयः ॥ ४८ ॥ कण्वरथन्तरे बृहद्रथन्तरधर्मसमुच्चयाधिकरणम् ॥ १६ ॥

उभयसाम्नि चैवमेकार्थात्त्वे ॥ ४९ ॥

सन्ति उभयसामानः क्रतवः । संसव उभे कुर्य्यात् गोसव उभे कुर्य्यात् । अपवितावपि एकाहे उभे बृहद्रथन्तरे कुर्य्यादिति श्रूयते । सन्ति तु प्रकृतौ बृहद्धर्मा रथन्तरधर्माश्च । ते इह चोदकेन प्राप्यन्ते तत्र संशयः । किमुभयसाम्नि उभयधर्माः कर्त्तव्याः ? अथवा इहापि तथैव व्यवतिष्ठेरन्निति । किं प्राप्तम् । उभयसाम्नि चैवं स्यात् । यथा कण्वरथन्तरे । उभे हि अत्र सामनी पृष्ठकार्य्ये वर्त्तेते, नैकैकम् । तस्मान्नैकैकधर्माँल्लभेत । उभे हि अत्र संहते, उभे धर्मैः संयुज्येयाताम् । उभे हि ते संहते, एकार्थापन्ने पृष्ठकार्य्ये वर्त्तेते इति ॥४९॥ पूर्व०

स्वार्थत्वाद्वा व्यवस्था स्यात् प्रकृतिवत् ॥ ५० ॥

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति बृहद्रथन्तरयोः संहतयोरुभये धर्माः कर्त्तव्या इति । रथन्तरे रथन्तरधर्मा बृहति बृहद्धर्माः । कुतः ? । स्वार्थत्वाद् धर्माणाम् । रथन्तरधर्मा रथन्तरार्थाः,

बृहद्धर्मा बृहदर्थाः। साम्नोऽप्येते धर्माः, न पृष्ठस्य। तच्च साम प्रयुज्यते रथन्तरं बृहद्वा। रथन्तरे प्रयुज्यमाने तद्धर्माः प्रयोक्तव्याः। बृहत्यपि प्रयुज्यमाने बृहद्धर्माः। सामप्रयुक्ता एवैते धर्माः। साम्नापि हि दृष्ट-मदृष्टञ्च क्रियते। तस्मात् सामापि धर्मप्रयोजने समर्थम्। अतो व्यवस्था धर्माणां प्रकृतिवत्। यथा प्रकृते रथन्तरे प्रयुज्यमाने तदङ्गं प्रयुज्यते। बृहति तदङ्गम्। एवमिहापीति॥ ५०॥ सिद्धान्तः॥ द्विसामके बृहद्रथन्तरधर्मयोर्व्यवस्थाधिकरणम्॥ १७॥

पार्वणहोमयोस्त्वप्रवृत्तिः समुदायार्थसंयोगा-त्तदभीज्या हि॥ ५१॥

स्तो दर्शपूर्णमासौ। तत्रेदं समामनन्ति। स्रुवेण पार्वणौ जुहोतीति। सौर्य्यादिषु वैकृतेषु कर्मसु भवति सन्देहः। किं तेषु पार्वणहोमौ कर्त्तव्यौ, न वा? इति। तत इदं तावत् परीक्ष्यम्। किं कालाभीज्या पार्वणहोमौ, उत समुदायाभीज्या? इति। कालाभीज्यायां तयोः प्रवृत्तिः। समुदायाभीज्यायामप्रवृत्तिः। कुतः संशयः। उभयत्र प्रसिद्धेः। उभयत्र हि पर्वशब्दो लोके प्रसिद्धः काले समुदाये च आ हिमवत आ च कुमारीभ्यः। किं तावत् प्राप्तम्। कालाभीज्या इति। ततः कालगता प्रसिद्धिर्व्यपदिश्यते॥ एवं प्राप्ते ब्रूमः। पार्वणयोर्वैकृतेषु कर्मसु अप्रवृत्तिः। कुतः। समुदायार्थसंयोगात्। ततः समुदाये प्रसिद्धिर्व्यपदिश्यते। काले प्रसिद्धिं परिहरिष्याम इति। अतः समुदायवाचित्वात् पर्वशब्दस्य समुदायस्याभियष्टव्यत्वाद् वैकृतेष्वप्रवृत्तिरिति॥ ५१॥ सि०॥

कालस्येति चेत्॥ ५२॥

इति चेत् पश्यसि, कालस्य पर्वशब्दो वाचकः। तस्मात् कालाऽभीज्येति। तत् परिहर्त्तव्यम्। आभासान्तं सूत्रं परेण विशेष्यते॥ ५२॥ आ०॥

नाप्रकरणत्वात्॥ ५३॥

नास्ति कालस्य प्रकरणम्, अस्ति तु समुदायस्य। तस्मात् प्रकरणेन विशेषेण समुदायवाची गृह्यते, न कालवाची। अत्राह। न प्रकरणेन शक्यते पर्वशब्दस्य कालवाचितां बाधितुम्। दुर्बलं हि लिङ्गात् प्रकरणम्। उच्यते। नायमुभयत्र पर्वशब्दो वर्त्तते। यदि

कालवचनस्तत्सम्बन्धात् समुदाये गम्यते । यदि वा समुदाये, यदि वा समुदायवचनस्तत्सम्बन्धात् काले । अन्यतरवचनो युक्तो, नोभयवचनः । तत्र समुदायवचने कल्प्यमाने प्रकरणमनुगृहीतं भवति ॥ अपि च, पृणातेः पर्वशब्दः । पृणातिश्च दाने प्रसिद्धः । दानानि च समुदायाः । तस्मात् समुदायाभीज्या । एवं शब्दावयवप्रसिद्धिरनुगृहीता भवतीति । तस्माद्वैकृतेषु पार्वणयोरप्रवृत्तिः ॥ ५३ ॥ आ० नि० ॥

मन्त्रवर्णाच्च ॥ ५४ ॥

मन्त्रवर्णाच्च फलवदनुवादो भविष्यति । ऋषभं वाजिनं वयं पूर्णमासं यजामहे । अमावास्या सुभगा सुशेवा इति च । तस्मादपि समुदायाभीज्येति ॥ ५४ ॥ युक्तिः ॥

तदभावेऽग्निवदिति चेत् ॥ ५५ ॥

नैतदस्ति, यदुक्तं वैकृतेष्वप्रवृत्तिरिति । तदभावेऽपि यद्यपि समुदायवचनोऽयम् । न च वैकृतेष्वयमस्ति समुदायः । तथापि पार्वणहोमौ भवेतामेव । कुतः । अन्या एवंशब्दिका देवता भविष्यन्ति । समुदायो वाऽसन्निहितोऽपि यक्ष्यते, सौर्य्याद्युपकारार्थेन । यथा, अग्निमग्न आवह इति सन्निहितोऽसन्निहितो वा अग्निर्यागार्थेनावाह्यते । एवमिहापीति ॥ ५५ ॥ आ० ॥

नाधिकारिकत्वात् ॥ ५६ ॥

नैतदेवम् । आधिकारिकं हीदं वचनम् । अधिकारे भवं, यस्याधिकारस्तस्य गुणं विदधातीति । आग्नेयादीनाञ्चाधिकारः । ते चाऽत्र देवताः । तेषां होमो देवतार्थः । एवं यत्र सा देवता नास्ति, तत्र तदर्थो होमो न करिष्यते । तस्मात् पार्वणहोमयोर्वैकृतेभ्यो निवृत्तिः ॥५६॥ आ० नि० ॥ सौर्यादिषु पार्वणहोमाद्यननुष्ठानाधिकरणम् ॥ १८ ॥

उभयोरविशेषात् ॥ ५७ ॥

इदमिदानीं संदिह्यते । किमुभौ होमौ पौर्णमास्याममावास्यायाञ्च ? उत पौर्णमासीहोमः पौर्णमास्याम्, अमावास्याहोमोऽमावास्यायामिति । किं प्राप्तम् । उभावप्युभयत्र । कुतः । उभयोर्हि प्रकरणे उभावप्याम्नातौ । तस्मादुभयत्र भवितुमर्हतः ॥ ५७ ॥ पूर्व० ॥

यदभीज्या वा तद्विषयौ ॥ ५८ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति, उभयमुभयत्रेति । यदभीज्या, स तत्र भवेत् । तस्य हि स उपकारकः । अनुपकारक इतरस्य । न चानुपकारकः कर्त्तव्यः । समुदायप्रधानावत्र होमावित्युक्तम् । तस्माद्यदभीज्या, तद्विषयौ भवेतामिति ॥ ५८ ॥ सिद्धान्तः ॥ दर्शपौर्णमासयोर्होमद्वयस्य व्यवस्थाधिकरणम् ॥ १९ ॥

प्रयाजेऽपीति चेत् ॥ ५९ ॥

दर्शपूर्णमासयोः प्रयाजा आम्नाताः, समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति । तत्र संशयः क्रियते । किं समिधो यजतीत्यादिशब्दैः समिदादयो देवताविशेषा विधीयन्ते, एतान् समिदादीन् यजतीति । किं वा न प्रकृतैः समिदादिभिः सम्बन्ध उपादीयते, एवंशब्दिका देवता न प्रकृतौ उपदिश्यन्ते इति ॥ किं तावत् प्राप्तम् । प्रकृतानां समिदादीनां यागो विधीयते । समिदादयश्च देवता वाक्यसम्बन्धादिति । एवं प्रकृतैः समिदादिभिः सम्बन्धे क्रियमाणे प्रकरणानुग्रहो भविष्यति । तस्मात् प्रयाजेऽपि प्रकृता देवता भवितुमर्हतीति । देवता प्राधान्यञ्च यथा पार्वणहोमे इति ॥ ५९ ॥ आ० नि० ॥

नाचोदितत्वात् ॥ ६० ॥

नैतदेवम् । नात्र समिदादयश्चोद्यन्ते देवतात्वेन । कुतः । द्वितीयानिर्देशात् । तद्धितनिर्देशेन वा देवता चोद्यते, चतुर्थ्यन्तनिर्देशेन वा । तत्र हि तादर्थ्यं गम्यते । तादर्थ्ये च सति देवता भवति । न देवता नाम जात्या काचित् । सैव कस्यचिद् रूपस्य देवता, सैव नान्यस्य । यस्य यां प्रति तादर्थ्यं, सा तस्य देवता । द्वितीया हीप्सिततमे कारके भवति । तत्र न द्रव्यस्य तादर्थ्यं गम्यते । तस्मान्न द्वितीयान्तेन देवताविधानम् ॥ अत्राह । तादर्थ्यं कल्पयिष्यामः । यथा विष्णुं यजति वरुणं यजतीति । अत्र न विष्णुर्वरुणो वा यागः । नाऽपि यागादर्थान्तरं यागस्य कारकं यदीप्सितं, तद् द्वितीययाऽभिधीयते । तेन तत्र कल्प्यते तादर्थ्यम् । शब्दान्तरेण वा विहितं गम्यते । इह तु न शब्दान्तरविहितम् । न चैवं शक्यं परिकल्पयितुम् । न च यागस्य कारकत्वेन सम्भवति । समिदादिशब्दकत्वात्तु यजीनां समिदादयः शब्दा वाचका उपपद्यन्ते । क्रियायां चेप्सितायामिष्यते द्वितीया । यथा पाकं पचतीति । तस्मात् समिधो यजतीत्ययमर्थः,

सामिद्यजिः कर्त्तव्य इति । यदा च यजिं प्रति अनुष्ठानं चोद्यते, तदा यजिरुपदिष्टो भवति । यदि पुनरत्र देवता उपदिश्येत, उपदिष्टे यजौ देवतोपदिश्येत । तत्रोपदिष्टोपदेशो वाक्यं भिद्येत । तस्मान्न देवतोपदेशः । यदा न देवतोपदेशस्तदा मान्त्रवर्णिको देवताविधिः । तदा चोपादेयत्वादेवंशब्दिका देवताश्चोद्यन्ते । तस्मान्मान्त्रवर्णिको देवताविधिः ॥ ६० ॥ सिद्धान्तः ॥ सामिदादीनां यागनामधेयताधिकरणम्॥२०॥इत्याचार्य्यशबरस्वामिकृते मीमांसाभाष्ये नवमस्याध्यायस्य द्वितीयः पादः ॥ ९ ॥ २ ॥

अथ नवमेऽध्याये तृतीयः पादः ॥ ९ ॥ ३ ॥

प्रकृतौ यथोत्पत्तिवचनमर्थानां तथोत्तरस्यां ततौ तत्प्रकृतित्वादर्थे चाकार्य्यत्वात् ॥ १ ॥

वैकृतानि कर्म्माणि उदाहरणम्। सौर्य्यं चरुं निर्वपेद् ब्रह्मवर्च्चसकाम इति । ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इति । चित्रया यजेत पशुकाम इति । वैश्वदेवीं साग्रहणीं निर्वपेद् ग्रामकाम इति। अस्ति तु प्रकृतौ निर्वापमन्त्रः। अग्नये जुष्टं निर्वपामीति। तथा इन्द्राय मरुत्वते, नैवारमेकादशकपालं निर्वपेदिति । अस्ति तु प्रकृतौ व्रीहिलिङ्गो मन्त्रः । स्योनन्ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति । तच्चैतच्च विकृतौ चोदकप्राप्तं सन्दिह्यते । किम् अविकारेण प्रयोक्तव्यम्, उतोहेनेति ॥ किं प्राप्तम् । अविकारेणेति । तथा, आर्षमनुगृह्यते । यत् प्रकृतौ कर्त्तव्यं, तद्विकृताविति । प्रकृतौ चाग्निव्रीहिशब्दौ प्रयुक्तौ । तस्माद्विकृतावपि तावेव प्रयोक्तव्याविति ॥ एवं प्राप्ते ब्रूमः । सत्यं प्रकृतौ यथा उत्पत्तिवचनमर्थानां कृतं मन्त्रे, तथोत्तरस्यामपि ततौ विकृतौ तेनैव मन्त्रेण वचनं कर्त्तव्यम् । तत्प्रकृतित्वात् ॥ तथा प्राप्ते इदमुच्यते । नैतदेवम् । अर्थे चाकार्यत्वाद् इति । एतावदर्थौ अग्निव्रीहिशब्दौ सूर्य्यं नीवारश्च नाभिदध्याताम् । चशब्दोऽत्र तुशब्दस्यार्थे । मन्त्राणां चार्थवचनं कार्य्यं, न स्वरूपम् । स्वरूपे ह्यदृष्टं कल्पयितव्यम् । अर्थवचनेन दृष्ट उपकारः । तस्माद् ऊहितव्यौ इति ॥ १ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ २ ॥

लिङ्गं खल्वपि अस्मिन्नर्थे भवति । न माता वर्द्धते न पिता न भ्राता न सखा इति । प्रत्यक्षं, भ्रातरं सखायञ्च वर्द्धमानं पश्यामः । अतो नार्थवृद्धिप्रतिषेधसंवादोऽयम् । शब्दवृद्धिप्रतिषेधस्तु । न भ्रातृशब्दो वर्द्धते, न सखिशब्द इति । का च तयोर्वृद्धिः । वर्णान्तरोपजननं सा । एकस्मिन् भ्रातेति, द्वयोर्भ्रातराविति । एतदुक्तं भवति । न भ्रातृशब्द ऊह्यते, न सखिशब्दश्चेति । अतोऽवगम्यते, अन्ये ऊह्यन्ते इति । यथा, न भवन्तः समाजं गच्छन्ति, न भवन्तः प्रेक्षका भवन्तीत्युक्ते नूनमन्ये गच्छन्तीति गम्यते । एवमिहापि, न भ्राता ऊह्यते, न सखा इत्युक्ते नूनमन्ये ऊह्यन्ते इति लिङ्गदर्शनम् । स्थितं तावद् अपर्य्यवसितमेव, अन्तरा चिन्तान्तरं वर्त्तिष्यते ॥२॥ युक्तिः ॥ विकृतौ मन्त्रगतव्रीह्याद्दिशब्दानामूहाधिकरणम् ॥ १ ॥

जातिनैमित्तिकं यथास्थानम् ॥ ३ ॥

इदमामनन्ति । मौद्गं चरुं निर्वपेत् श्रियै श्रीकाम इति । तत्रेदं विधीयते । पौण्डरीकाणि बर्हींषि भवन्तीति । अस्ति प्रकृतौ मन्त्रः । स्तृणीत बर्हिः परिधत्त वेदिं जयामि मा हिंसीरमुपाशयाना दर्भैः स्तृणीत हरितैः सुपर्णैः निष्का इमे यजमानस्य ब्रध्न इति । इह चोदकेन प्राप्तः । अत्र दर्भैरिति जातिशब्दः । हरितैरिति नैमित्तिको गुणशब्दः । तत्र संशयः । किं जातिशब्द ऊहितव्यः, नैमित्तिकः अविकारेण प्रयोक्तव्यः ? उतोभावपि यथास्थानमूहितव्यौ ? जातिशब्दः स्तरणे, नैमित्तिकः स्तरणसाधने द्रव्ये इति । तत एवं तावत् परीक्ष्यम् । किमयं हरितशब्दो हरितगुणविवक्षया प्रयुज्यते, उत स्तरणद्रव्यगुणाभिधित्सयेति । कश्चात्र विशेषः । यदि दर्भाणां हरितगुणसम्बन्धो वक्तव्यः, व्यक्तमसावदृष्टोऽर्थः । तदा पुण्डरीकाणामपि अदृष्टायैव हरितसम्बन्धो वचनीयो भवतीत्यविकारेण प्रयोक्तव्यः । अथ स्तरणद्रव्यगुणविवक्षया प्रयुज्यते, तत्र पुण्डरीकाणामपि स्वगुणो वक्तव्यो भविष्यति । तदेतद् द्वयमपि हरितशब्दादवगम्यते । किन्तु विवक्षितमिति संशयः ॥ किं तावत् प्राप्तम् । अविकारेण प्रयोक्तव्य इति । तत एतत्तावच्चिन्त्यते । हरितगुणविवक्षया प्रयुज्यते इति । कुतः । हरितशब्दस्य मन्त्रे भावात् । न हि यो यो द्रव्यगुणः सोऽवश्यवचनीयो भवति । यस्य यस्य तु वाचको मन्त्रे शब्दो-

ऽस्ति, स गुणो वक्तव्य इति गम्यते । हरितगुणस्य वाचको मन्त्रोऽस्ति । तस्माद् हरितगुणो वक्तव्य इति ॥

ननु स एव स्तरणद्रव्यगुणस्य वाचकः । नेत्याह । न ह्यसौ स्तरणद्रव्यगुण इत्यनेन कारणेन हरितशब्देनोच्यते । कथं तर्हि । हरितत्वयोगाद् हरितशब्देनोच्यते । स एव हारित्यं श्रुत्या अभिदधाति, लक्षणया स्तरणद्रव्यगुणम् । श्रुतिश्च लक्षणाया ज्यायसी । तस्माद्धरितगुणविवक्षया प्रयुज्यते, विकृतौ न ऊहितव्य इति ॥ एवं प्राप्ते ब्रूमः । जातिशब्दो नैमित्तिकश्च उभावप्यूहितव्यौ । तत एतद्वर्ण्यते । स्तरणद्रव्यस्य गुणविवक्षया प्रयुज्यते इति । यद्यपि हारित्यं श्रुत्या हरितशब्दोऽभिवदति, तथापि हरितगुणवचनमनर्थकम् । अदृष्टं हि तत्र कल्पनीयं स्यात् । तच्चाशक्यं दृष्टे सम्भवति । स्तरणद्रव्यगुणन्तु लक्षणयाऽभिवदति । तद्वचने अदृष्टं प्रयोजनं स्तरणद्रव्यप्रत्यायनम् । एवञ्चेदिहापि स्तरणद्रव्यस्य पुण्डरीकस्य गुणः प्रत्याययितव्यः । तस्मात्तद्वाचक ऊहितव्यो रक्तशब्द इति ॥ ३ ॥ सि० ॥

तत एव अन्तरागर्भिणीन्यायो भवतीत्यन्यथा सूत्रं वर्ण्यते—

लिङ्गदर्शनाच्च ॥ २ ॥

जातिनैमित्तिकं यथास्थानम् ॥ ३ ॥

इति । इतश्च पश्यामो विकृतावूहः कर्त्तव्य इति । कुतः । लिङ्गं दृश्यते । किं लिङ्गं भवति । एवमाह । विश्वेषां देवानामुस्राणां छागानां वपानां मेदसोऽनुब्रूहीति । जातिशब्दानामूहितानां समुच्चारणं भवति । तन्मन्त्राणामर्थवचनपक्षे एव कल्प्यते । ऊहे क्रियमाणे अनर्थपरत्वे अग्निच्छागशब्दावेव प्रयुज्येयाताम् । तत्रामीषामक्रियाऽर्थानां वचनमनर्थकमेव स्यात् । न चात्रैते शब्दा विधीयन्ते, विधायकस्याभावात् । ननु प्रयोगवचनेन विधायिष्यन्ते । एवं तर्हि अदृष्टाऽर्थतादोषः । तस्मादस्ति ऊह इति ॥ २ ॥ युक्तिः ॥ ३ ॥ सिद्धान्तः ॥

अविकारमेके नार्षत्वात् ॥ ४ ॥

एके पुनराचार्य्या अविकारमनुमन्यन्ते । अस्मिन्नर्थे लिङ्गं वक्ष्यति । तस्येयं प्राप्तिः क्रियते । यदि हि ऊह्येत, आर्षश्चोदको बाध्येत । तस्मादनूह इति ॥ ४ ॥ पूर्व० ॥

लिङ्गदर्शनाच्च ॥ ५ ॥

लिङ्गमस्मिन्नर्थे दृश्यते । आग्नेये वैकृते पशौ आम्नायते । अग्नये छागस्य वपायाया मेदसोऽनुब्रूहीति । ऊहपक्षे न विधातव्यं स्यात् । विधीयते तु । तस्मादनूह इति । अपिचेदमपरं लिङ्गमग्नीषोमीये पशौ श्रूयते । यद्येकं यूपमुस्पृशेत्, एष ते वायो इति ब्रूयात् । यदि द्वौ, एतौ ते वायू इति । यदि बहून्, एते ते वायव इति । यद्यूहो भवेद् एतदपि प्राप्तत्वान्न विधातव्यं स्यात् । विधीयते तु । तस्माद-प्यनूह इति ॥ ५ ॥ युक्तिः ॥

विकारो वा तदुक्तहेतुः ॥ ६ ॥

वाशब्देन पक्षो व्यावर्त्यते । यदुक्तमविकार इति । तन्न । ऊहः स्यात् । अस्मिन्नर्थे पूर्वोक्तो हेतुः । अर्थे चाकार्य्यत्वादिति । मन्त्रार्थं ह्यनुरुध्यते चोदको, न मन्त्राक्षराणि । अर्थपराणि हि तानि, न स्व-रूपप्रधानानि । तस्मादूहः स्यात् पूर्वेणैव हेतुना । केवलं लिङ्गपरि-हारो वक्तव्यः ॥ ६ ॥ उत्तरम् ॥

लिङ्गं मन्त्राचिकीर्षार्थम् ॥ ७ ॥

यल्लिङ्गमुक्तम्, अग्नये छागस्य वपाया मेदसोऽनुब्रूहीति । त-न्मन्त्राचिकीर्षया विधीयते । इतरथा ऊहितत्वादमन्त्रः स्यात् । तस्मा-त् पुनर्वचनम् ॥ ७ ॥ आ० नि० ॥

नियमो वोभयभागित्वात् ॥ ८ ॥

यल्लिङ्गमुक्तम्, एष ते वायो इति । तत् परिह्रियते । यदि हि एतन्नो च्येत, यदि द्वावुपस्पृशेत्, यदि बहून्, सर्वे इमे मन्त्रा एकयूपे भवे-युः । उभयमपि मा प्रकृतौ भूदितिनियमः क्रियते । यदि द्वावुपस्पृशे-त्, एतौ ते वायू इति ब्रूयात्, यदि बहून्, एते ते वायव इति ब्रूयात् तस्मादेतदप्यलिङ्गमिति ॥ ८ ॥ आ० नि० ॥ पौण्डरीकेषु हविःषु स्तरणमन्त्रस्योहाधिकरणम् ॥ २ ॥

लौकिके दोषसंयोगादपवृक्ते हि चोद्यते निमित्तेन प्रकृतौ स्यादभागित्वात् ॥ ९ ॥

अस्ति ज्योतिष्टोमः । तत्राग्नीषोमीये पशौ आम्नायते । यदि एकं यूपमुपस्पृशेदेष ते वायो इति ब्रूयाद्यदि द्वावेतौ ते वायू इति, यदि बहून् एते ते वायव इति । तत्रैषोऽर्थः सांशयिकः । लौकिके वैदिके च यूपोपस्पर्शने प्रायश्चित्तम् ? उत वैदिके, अथ वा लौकिके इति ।

किं प्राप्तम् । लौकिके वैदिके वाऽनियम इति । कथम् ? । विशेषानाश्रयणात् । न हि विशेष आश्रीयते लौकिके वैदिके वेति, तस्मादनियम इति । वैदिके वा । तथाहि अस्य मन्त्रस्य समीपगतेन प्रयोजनाभिसम्बन्धो भविष्यति । इतरथा दूरगतेनाप्रकृतेन परोक्षः सम्बन्धः स्यात् । तस्माद् वैदिके यूपोपस्पर्शने इदं प्रायश्चित्तमिति ॥ एवं प्राप्ते ब्रूमः । लौकिके उपस्पर्शने भवितुमर्हति, न वैदिके । कुतः । एवं दोषसंयुक्तं हि श्रूयते इदं प्रायश्चित्तम् । यूपो वै यज्ञस्य दुरिष्टमामुञ्चते, यद्यूपमुपस्पृशेद्यज्ञस्य दुरिष्टमामुञ्चते तस्माद्यूपो नोपस्पृश्य इत्यभिधाय, यद्येकं यूममुपस्पृशेदिति समाम्नायते । तस्माद्यत्र दोषस्तत्र प्रायश्चित्तमिति । लौकिके च दोषो, न वैदिके । वैदिके हि अञ्जनमुपच्छ्रयणं च कर्त्तव्यमुक्तम् । न तत् कर्त्तव्यं सद् अकर्त्तव्यं भविष्यति । सावकाशश्चोपस्पर्शनप्रतिषेधवचनं लौकिके अविरुद्धं भविष्यति ॥

अपि च अपवृक्ते कर्मणि चोद्यते निमित्तेन । कथम् यूपो वै यज्ञस्य दुरिष्टमामुञ्चते इति । यत् किल यज्ञे दुरिष्टं तद्यूप आमुञ्चते, यत् सुकृतं तद्यजमान इति । सर्वमिदं प्रशंसार्थं, न विधिपदान्तरेण सम्बद्ध्यते । इष्टशब्द एवैको विधिपदैः सम्बन्धमुपैति । प्रशंसापदैरपि सम्बध्यमान इह सन्निहितो भवति । सन्निहितत्वाच्च पदान्तरैः सम्बद्ध्यते । यथा दण्डो मनोहरो रमणीयश्च प्रहर शीघ्रमिति रमणीयमनोहर-सम्बन्धेऽपि सति सन्निहितत्वात् प्रहर शीघ्रमित्येतैः पदैः सम्बद्ध्यते । एवमिष्टशब्दोऽपि सन्निहितत्वात् सम्बध्यते । इष्टे यदि यूपमुपस्पृशेदेषते वायो इत्येवमादि ब्रूयादिति । सोऽयमिष्ट इत्यपवर्गस्य वक्ता शब्दः । अपवृक्ते चेदुपस्पर्शनं मन्त्रस्य निमित्तं, व्यक्तं न वैदिकम् । तस्माल्लौकिके यूपोपस्पर्शने प्रायश्चित्तं, न प्रकृतौ वैदिके अभागित्वात् प्रतिषेधस्यापवर्गस्य च वैदिके न सम्भवतीति ॥ ९ ॥ अग्नीषोमीयपशौ लौकिकयूपस्पर्शप्रायश्चित्ताधिकरणम् ॥ ३ ॥

अन्यायस्त्वविकारेणादृष्टप्रतिघातित्वादविशेषाच्च तेनास्य ॥ १० ॥

अस्ति पशुरग्नीषोमीयः । यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्र पाशैकत्वाभिधायी मन्त्रः । अदितिः पाशं प्रमुमोक्

त्पमिति । तथा पाशबहुत्वाभिधायी, अदितिः पाशान् प्रमुमोक्त्वेतानिति। प्रकृतौ तयोः समुच्चयं वक्ष्यति। अस्ति द्विपशुर्विकृतिः। मैत्रं श्वेतमालभेत वारुणं कृष्णमपां चौषधीनां च सन्धावन्नकाम इति। तत्र चोदकेन पाशाभिधायिनौ मन्त्रौ प्राप्तौ। तयोः संशयः। किं बहुवचनान्तोऽविकारेण प्रवर्त्तते एकवचनान्तस्य निवृत्तिः ? उत बहुवचनान्तो निवर्त्तते, एकवचनान्त ऊहितव्यः ? उत उभयोरपि प्रवृत्तिरभिधानविप्रतिपत्तिश्च ? उतैकवचनान्त ऊहितव्यो, बहुवचनान्तोऽपि निवर्त्तेत ?॥ किं प्राप्तम्। अन्यायस्त्वविकारेण। अन्यायनिगदो बहुवचनान्तोऽविकारेण प्रवर्त्तते । एकवचनान्तो निवर्त्तितुमर्हति। कुतः। नास्यैकस्मिन् पाशे प्रवर्त्तमानस्य दृष्टः प्रतिघातः । यथैवैकस्मिन् पाशे प्रवर्त्तते, तथा द्वयोरपि प्रवर्त्तितुमर्हति । नासौ एकस्य वाचकः, न द्वयोः । एवमार्षश्चोदकाऽनुगृहीतो भविष्यति। इतरथा हि ऊह्यमाने यथाप्रकृति मन्त्रो न कृतः स्यात् । न द्वयोः पाशयोः, एकस्मिंश्च पाशे कश्चिद् विशेषोऽस्ति । तस्माद् अविकारेण बहुवचनान्तः प्रयुज्यते, एकवचनान्तस्य निवृत्तिरिति ॥ १० ॥

विकारो वा तदर्थत्वात् ॥ ११ ॥

वाशब्दः पक्षं व्यावर्त्तयति । विकारो वा स्यात्। एकवचनान्त ऊहेन प्रवर्त्तते,बहुवचनान्तनिवृत्तिरिति। कुतः। तदर्थत्वात्। यौ पाशौ विकृतौ वक्तव्यौ, तौ च प्रयोगवचनानुग्रहाद् यौगपद्येन, न पर्य्यायेण । तत्र न गम्यते विशेषः। पाशशब्दे उच्चरिते कस्य पाशस्याऽभिधानं, कस्य नेति। अविशेषाद् द्वयोरपि पाशयोः। तत्र तयोः कर्मत्वाभिसम्बन्धं द्वितीयाद्विवचनमेव शक्नोति वदितुं, नान्यत्। तस्माद् द्विवचनमूह्येत।बहुवचनमेकवचनं च निवर्त्तितुमर्हत इति॥११॥

अपि त्वन्यायसम्बन्धात् प्रकृतिवत् परेष्वपि यथार्थं स्यात् ॥ १२ ॥

अपि त्विति पक्षो व्यावर्त्यते, न बहुवचनं निवर्त्येत। यथा प्रकृतौ बहुवचनान्तमेकवचनान्तं च प्रवृत्तम् । अन्यायसम्बन्धाद् बहुवचनान्तम्। एवं विकृतावपि एकवचनान्तं, द्विवचनान्तमूह्येत। अन्यायसम्बन्धाच्च बहुवचनान्तं प्रवर्त्तेत। यदि प्रकृतौ प्रातिपदिकार्थमात्रं पक्षे प्रकाशितं, विकृतावपि तत् पक्षे प्रकाशयितव्यम्। अथ

बहुवचनान्तेनैकत्वमुक्तम्, इहापि बहुवचनान्तेन द्वित्वं वक्तव्यम् । तस्माद्भिधानविप्रतिपत्तिः कर्त्तव्या इति ॥ १२ ॥ पूर्व० ॥

यथार्थं त्वन्यायस्याचोदितत्वात् ॥ १३ ॥

तुशब्दस्तमपि पक्षं व्यावर्त्तयति । नाभिधानविप्रतिपत्तिः कर्त्तव्येति । किं तर्हि । यथार्थं द्विवचनमूहितव्यं, बहुवचनमेकवचनं च निवर्त्तेयाताम् । तद्धि द्विपाशाभिधायिनः पाशशब्दात् परं बहुवचनमेकवचनं वा न शक्नोति कर्मसम्बन्धं वदितुम् । लोको हि शब्दाऽर्थावगमे प्रमाणम् । नच लोके द्वयोरर्थयोर्बहुवचनान्त एकवचनान्तो वा प्रवर्त्तमानो दृश्यते । तस्मादूहेन द्वयोः पाशयोर्बहुवचनान्त एकवचनान्तो वा प्रयोक्तव्यः ॥ १३ ॥ सि० ॥

कथं प्रकृतौ एकस्मिन् पाशे बहुवचनान्त इति चेत्—

छन्दसि तु यथादृष्टम् ॥ १४ ॥

यावद्दर्शनं प्रामाण्यमभ्युपगन्तव्यम् । छन्दसि न दर्शनमतिक्रमितव्यम् । यो हि दर्शनमतिक्रम्यान्यदपि कल्पयेत्, न तेन छान्दसं कृतं स्यात्, न लौकिकं, नापि लक्षणसिद्धम् । यदुक्तं, चोदकेनाभिधानविप्रतिपत्तिश्चोद्यते इति । नैतदेवम् । अन्यायस्याचोदितत्वात् । न हि चोदकोऽन्याय्यामभिधानविप्रतिपत्तिमभिप्रापयति । किं कारणम् । प्रकृतावेकत्वात् । पाशस्य प्रकृतत्वाच्च बहुवचनान्तस्य प्रत्यक्षाऽभिधानविप्रतिपत्तिः । केयमभिधानविप्रतिपत्तिर्नाम । यदन्यथाऽभिधानम्, अन्यथा अभिधेयम् । न च प्रकृतौ एकस्मिन् बहुवचनान्तं प्रयुक्तमभिधानविप्रतिपत्तिं कर्त्तुम् । किं तर्हि । यत् तेन शक्यते, तत् कर्त्तुम् । किञ्चानेन शक्यते ? । अस्य सिद्धे प्रयोगेऽर्थमन्विच्छन्तो, यदवगम्यते तदर्थः शब्द इत्यवधारयामः । अस्माच्च पाशद्रव्यस्य मोचनेन सम्बन्धोऽवगम्यते, तदर्थता शब्दस्य भवितुमर्हति । न एकत्वेन बहुत्वेन वा प्रयोजनम् । इह तु विकृतौ पाशस्य च पाशस्य च यौगपद्येन मोचनेन सम्बन्धो वदितव्यः । बहुवचनञ्च द्वयोः पाशयोरन्याय्यम् । तस्याभिधाने इह पुनर्न प्रयोगः । किन्तु प्रयोग एव चिन्त्यते । कः शब्दः प्रयोक्तव्य इति । तत्र प्रयोगेऽस्मदायत्ते किमित्यवाचकं प्रयोक्ष्यामहे विद्यमाने वाचके । न चायं द्वयोश्छन्दसि दृष्टो बहुवचनान्तः । सोऽयं मन्त्रः प्रयुज्यमानोऽपभ्रंश एव स्यान्न

छान्दसः । न च बहुवचनं द्वित्वप्रत्ययार्थं लभ्यते लौकिके वैदिके च । न चाभिधित्सिते द्वित्वे द्वयोर्बहुवचनं भवति । तद्यथा देवदत्तयज्ञदत्ताभ्यां कर्त्तव्यमिति देवदत्तयज्ञदत्तशब्दद्वयादेव द्वित्वं प्राप्तं, न विभक्त्या विधित्स्यते । तथापि द्विवचनमेव भवति, न बहुवचनम् । तस्माद् विकृतावूहितव्यमिति ॥ १४ ॥ आ० नि० ॥ द्विपशुयागे पाशमन्त्रयोरेकवचनान्तबहुवचनान्तपदयोर्द्विवचनान्तेनोहाधिकरणम् ॥ ४ ॥

विप्रतिपत्तौ विकल्पः स्यात् समत्वाद् गुणे त्वन्यायकल्पनैकदेशत्वात् ॥ १५ ॥

अस्ति पशुरग्नीषोमीयः । यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्र पाशैकत्वाभिधायी पाशबहुत्वाभिधायी च मन्त्रौ समाम्नातौ । तयोः किमेकत्वाभिधायी प्रकरणे निविशते, बहुत्वाभिधायी प्रकरणादुत्कृष्यते ? उत उभावपि प्रकरणमभिनिविशेते इति । किं प्राप्तम् । बहुत्वाभिधायी उत्कष्टव्य इति । कुतः ? बहूनां हि स पाशानां मोचकः । न च प्रकरणे बहवः पाशाः सन्ति । तस्मात् प्रकरणे असम्बध्यमानो यत्र बहवः पाशास्तत्र नीयेत । यथा, युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्य्यादिति । एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्यः प्रतिपदं कुर्य्यादिति प्रतिपद्विधानमुत्कृष्यते । यथा च पौष्णसावित्र—सारस्वत—द्यावापृथिवीयाद्यनुमन्त्रणानि उत्कृष्यन्ते, एवं पाशबहुत्वाभिधाय्यपीति ॥ एवं प्राप्ते ब्रूमः। विप्रतिपत्तौ एतस्यां का विप्रतिपत्तिः । यत् प्रकृतावेकः पाशः, पाशबहुत्वाभिधायी च मन्त्रः । एतस्यां विप्रतिपत्तौ किं मन्त्र उत्कृष्यते, न ? इति । उच्यते । नोत्कष्टव्यः । ननु प्रकृतौ अन्यो मन्त्रः ? । उच्यते । तेन सह विकल्पो भविष्यति । कुतः । पाशप्रातिपदिकार्थस्य प्रकृतौ विद्यमानत्वादुत्कर्षो न न्याय्यः । ननु बहुपाशवचन एष मन्त्रः । प्रकृतौ त्वेकः पाशः । तस्मात् तत्र न सम्भवतीति । उच्यते। बहूनप्यसौ पाशान् वदन् बहुत्वाधिष्ठानं द्रव्यं प्रकाशयत्येव । यदि न प्रकाशयेद्, न पाशविशिष्टं बहुत्वं गम्येत । प्रकाशयति चेत् तावता नः प्रयोजनम् । तस्य हि उन्मोचनं क्रियते, न बहुत्वस्य, पाशाकृतेर्वा । तस्मात् तस्य प्रकाशनं कर्त्तव्यम् । तत् प्रातिपदिकेन करिष्यते,

नोत्कृष्यते । अस्त्येव ह्येकवचनान्तं प्रातिपदिकम् । तत्तस्य प्रकाशनं करिष्यति इति । अत्रोच्यते । न हीदं तस्मादन्यत् । यद्येकवचनान्तं प्रातिपदिकं न उत्कृष्यते प्रकरणादित्युच्यते, सिद्धस्तर्ह्यनुत्कर्षस्तदेवेदमिति ॥ ननु बहुवचनस्य बहुपाशकप्रयोगेऽर्थवत्ता । तस्मादुत्क्रष्टव्यम् । तदुत्कृष्यमाणमेकदेशत्वात् प्रातिपदिकमुत्कर्षतीति । उच्यते। गुणे त्वन्यायकल्पना स्यादिति, न प्रधाने । गुणश्च विभक्त्यर्थः। प्रधानं प्रातिपदिकार्थः । प्रातिपदिकार्थविशेषो विभक्त्याऽभिधीयते । सति प्रातिपदिकार्थे विभक्त्यर्थेन भवितव्यम् । न च विकृतौ प्रातिपदिकमस्ति । अनारभ्याप्यभिहितं प्रकृतिं प्रविशति । किमङ्ग पुनः प्रकृतावेवाभिहितम् । तस्माद्यत्र प्रातिपदिकार्थस्तत्र विभक्त्यर्थो भविष्यति ॥

ननु विकृतावपि चोदकेन प्राप्तं प्रातिपदिकं, प्रातिपदिकार्थश्चोच्यते । बाढम् । विप्रकृष्टस्तु चोदकः । बहुवचनसमर्थकं प्रातिपदिकं चोदको नोत्कक्ष्यति । तस्मात् प्रातिपदिकमेकदेशत्वाद् बहुवचनमाकक्ष्यतीति । न च प्रकृतौ अनर्थकमेव बहुवचनं,पाशाकृतिकस्य हि तदुन्मोचने कर्म्मसम्बन्धं करोति । तस्माद् गुणे बहुवचने अन्यायकल्पना, न प्रधाने प्रातिपदिकार्थे इति । किं पुनरन्याय्यम् । यद् बहुत्वं गम्यमानमविवक्षितमित्युच्यते । तत् कल्प्यतां, न तु प्रकृतौ प्रातिपदिकस्य प्रातिपदिकार्थाभिधानमन्याय्यं कल्पयितव्यम् । अस्य हि गुणस्यावाच्यमेव वैकृतं बहुत्वं सन्निधानाभावात् । तस्मात् प्रकृतौ बहुवचनान्तस्यापि निवेश इति ॥ १५ ॥ सि० ॥

प्रकरणविशेषाच्च ॥ १६ ॥

प्रकरणविशेषाच्चैतदध्यवसीयते, प्रातिपदिकं बहुवचनमाकर्षति, न प्रातिपदिकं बहुवचनेनोत्कृष्यते इति । प्रकृतौ प्रातिपदिकार्थो विद्यते अग्नीषोमीये पशौ बहुवचनार्थो विकृतिषु । तस्मादपि बहुवचनान्तस्य प्रकृतौ निवेश इति ॥ १६ ॥ युक्तिः ॥

उत्कर्षो वा द्वियज्ञवदिति यदुक्तं, तत् परिहर्त्तव्यम् ॥

अर्थाभावात्तु नैवं स्याद् गुणमात्रमितरत् ॥ १७ ॥

युक्तं यत् प्रतिपद्विधानमुत्कृष्यते, नास्ति प्रकृतौ यजमानद्वित्वं यजमानबहुत्वं वा । तत्र न भवेद्विषय एतयोः प्रतिपदोः । इह तु

गुणमात्रं नास्ति बहुत्वम् । अन्यत्तु बहुवचनस्य प्रयोजनं, मुचिना सम्बन्धः। नचानेकप्रयोजनमन्यतमेन प्रयोजनेन न प्रयुज्यते। न हि उल्का प्रकाशनेनाप्रयुज्यमाना भस्मना न प्रयुज्यते । तस्माद् विषमं प्रतिपद्भ्यामिदमिति ॥ १७ ॥ आ० नि० ॥

द्यावोस्तथेतिचेत् ॥ १८ ॥

अथ यदुक्तं, द्यावापृथिवीयादीनामनुमन्त्रणानां यथा उत्कर्षस्तथाऽस्येति। तत् परिहर्त्तव्यम् ॥ १८ ॥ आ० ॥

नोत्पत्तिशब्दत्वात् ॥ १९ ॥

नैतदनुमन्त्रणेन तुल्यम् । न हि दर्शपूर्णमासयोर्द्यावापृथिव्यादीनामुत्पत्तौ शब्दोऽस्ति। अस्ति त्विह पाशस्योत्पत्तौ शब्दः। तस्माद् विषममनुमन्त्रणेनेति ॥ १९ ॥ आ० नि० ॥ अग्नीषोमीयपशौ पाशैकत्वपाशबहुत्वाभिधायिमन्त्रयोर्विकल्पाधिकरणम् ॥ ५ ॥

अपूर्वे त्वविकारोऽप्रदेशात् प्रतीयेत ॥ २० ॥

दर्शपूर्णमासयोरामनन्ति, प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः संमृड्ढि पत्नीं सन्नह्य आज्येनोदेहीति । तत्र, पत्नीं सन्नह्येति चिन्त्यते। अस्ति हि यजमान एकपत्नीको बहुपत्नीकश्च। तत्र सर्वस्य प्रयोगमधिकृत्य पत्नीशब्द उच्चरतीति एतत्पाशाधिकरणेनैव निर्णीतम्। इदन्तु सन्दिह्यते । किं द्विपत्नीके बहुपत्नीके च प्रयोगे ऊहितव्यः पत्नीशब्दः ? उत नेति। किं प्राप्तम् । अभिधानार्थत्वान्मन्त्राणामूहितव्य इति ॥ एवं प्राप्ते ब्रूमः। अपूर्वे तु अप्रकृतिपूर्वके कर्मणि अविकारेण प्रयुज्येत। कुतः। ईकारान्तं हीदं पत्नीमात्रस्य वाचकम् । तत्र द्विपत्नीके बहुपत्नीके च प्रयोगे पत्नीशब्दे उपादीयमाने द्विवचनं बहुवचनं च सामर्थ्यात् प्राप्नोति सन्नहनसम्बन्धं कर्त्तुम्। समाम्नानसामर्थ्यात्तु एकवचनेन क्रियते। नचात्र द्वित्वं बहुत्वं वा विवक्ष्यते। लक्षणत्वेन हि पत्नीशब्दस्य श्रवणात्। न चैकपत्नीकात् प्रयोगाद् द्विपत्नीके प्रयोगेऽतिदेशो भवति। यथा तत्र सङ्ख्या उक्ता तद्वदिहापीति। तस्मादविकारेण पत्नीशब्दस्य प्रयोगः । अथापि कथञ्चिदेकत्वं विवक्ष्येत, तथापि द्विपत्नीके प्रयोगे सम्प्रतिपत्त्यभावादेकवचनार्थमेकवचनम्। तदनेकपत्नीके प्रयोगे अविरुद्धमित्यविकारेण प्रयुज्यते इति ॥ २० ॥ दर्शपूर्णमासयोर्द्विपत्नीके प्रयोगे पत्नीं सन्नह्ये-

ति मन्त्रस्यानूहाधिकरणम् ॥ ६ ॥

विकृतौ चापि तद्वचनात् ॥ २१ ॥

अथेदानीं विकृतौ पत्नीशब्दश्चिन्त्यते । किं द्विपत्नीके बहुपत्नीके च प्रयोगे ऊहितव्यो, न? इति । द्विवाची बहुवाची वा पत्नीशब्दो द्विवचनं बहुवचनञ्चोपाददानः प्रकृतौ समाम्नानेन बाधित इह समाम्नानाभावादुपादातुमर्हतीति ॥ एवं प्राप्ते ब्रूमः । विकृतावपि अविकारेण प्रयोक्तव्य इति । कुतः । तद्वचनात् । यत् प्रकृतौ तद् विकृतौ कर्त्तव्यमिति तद्वचनम् । प्रकृतौ चैकत्वमविवक्षितमिहापि द्वित्वं बहुत्वमेकत्वञ्च न विवक्षितव्यमिति । तस्मादविकारः । अथवा तदेव विवक्षितम् । तदनेकपत्नीकेऽपि अविरुद्धमित्यविकार एवावसीयते ॥ २१ ॥ द्विपत्नीके विकृतियागेऽपि, पत्नीं सन्नह्येति मन्त्रस्यानूहाऽधिकरणम् ॥ ७ ॥

अध्रिगुः सवनीयेषु तद्वत् समानविधानाश्चेत्॥२२॥

अस्ति सोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्राध्रिगौ इदं समाम्नायते । प्रास्मा अग्निं भरतस्तृणीत बर्हिरन्वेनं माता मन्यतामनु पिताऽनु भ्राता इत्येवमादि । यदा तु अग्नीषोमीयाः सवनीयाश्चसमानविधानाः, तदेदं विचार्य्यते । किमध्रिगौ प्रास्मै इत्येवमादि पदमूहितव्यम्? उत नेति । किं प्राप्तम् । ततोऽतिदेशः क्रियते । अध्रिगौ तद्वदिति । तत्र यः पत्न्यधिकरणे पूर्वपक्षः स इह पूर्वपक्षः । यः सिद्धान्तः स इह सिद्धान्तः । ऊह इति पूर्वपक्षः । अविकार इति सिद्धान्तः ॥ २२ ॥ सवनीयपशूनामग्नीषोमीयसमानविधानत्वे, प्रास्मै अस्मिन्निति मन्त्रे अनूहाधिकरणम् ॥ ८ ॥

प्रतिनिधौ चाविकारात् ॥ २३ ॥

अस्ति प्रतिनिधिः श्रुते द्रव्येऽपचरति । आगमो वा चोदनार्थाविशेषादिति । स च सदृशः सामान्यं तच्चिकीर्षेति । तद् यदा व्रीहिषु अपचरत्सु नीवारा उपादीयन्ते प्रतिनिधित्वेन, तदा व्रीहिमन्त्रो यः समाम्नातः, स्योनं ते सदनं कृणोमि । घृतस्य धारया सुशेवं कल्पयामि तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेधसुमनस्यमान इति । तं प्रति सन्देहः । किं नीवारेषु व्रीहिशब्दस्य ऊहेन प्र-

योगः ? उताविकारेणेति। किं प्राप्तम्। अविकारेण व्रीहिशब्दः प्रयुज्यमानः कार्य्यवतो नीवारान् न शक्नोति प्रकाशयितुमिति तेषु प्रकाशयितव्येषु नीवारशब्दः प्रयोक्तव्यो भवति। तस्माद् ऊहः कर्त्तव्य इति॥ एवं प्राप्ते ब्रूमः। प्रतिनिधौ च अविकारात् प्रतिनिधौ चेति ऊहो न कर्त्तव्य इत्यनुकृष्यते। किमेवं भविष्यति। एवमविकारो भविष्यति। तत्रार्थमनुग्रहीष्यते। तस्मादनूहः॥ २३॥ सि०॥

अनाम्नानादशब्दत्वमभावाच्चेतरस्य स्यात्॥ २४॥

न चैतदस्ति अनूह इति। एवमनूहो भवेत्। यदि तस्मिन् मन्त्रे व्रीहिशब्दो नाम्नातः स्याद्, अभावाच्चेतरस्य यदि नेदं नीवाराख्यं स्यात्। न चेदमुभमयमस्ति। तस्मादभिधानसिद्धये ऊहितव्यो नीवारशब्द इति॥ २४॥ सा०॥

तादर्थ्याद्वा तदाख्यं स्यात् संस्कारैरविशिष्टत्वात्॥ २५॥

वाशब्दः पक्षं व्यावर्त्तयति। नैतदस्ति। ऊह इति। अविकारेण प्रयोगः। कुतः। तादर्थ्यात्। तादर्थ्यं व्रीह्यर्थता नीवाराणाम्। ये व्रीहिप्रोक्षणादयः संस्काराः क्रियन्ते। संस्कारैरविशिष्टश्चास्य व्रीहिशब्दो यथा धान्येषु व्रीहिलक्षितेषु भवति, एवमेतेष्वपि नीवारेषु। तस्मादविकारेण प्रयोक्तव्य इति॥ २५॥ आ० नि०॥

उक्तश्च तत्त्वमस्य॥ २६॥

कथं पुनर्ज्ञायते, यो यो व्रीहिगतो विशेषः स नीवारेष्विति ?। उक्तश्च तत्त्वमस्य। उक्तोऽस्य विशेषस्य तद्भावः षष्ठेऽध्याये, सामान्यं तच्चिकीर्षा इति। तस्मादप्यविकारः॥ २६॥ युक्तिः॥ नीवाराणां व्रीहिप्रतिनिधित्वे मन्त्रे व्रीहिशब्दस्यानूहाधिकरणम्॥ ९॥

संसर्गिषु चार्थस्यास्थितपरिमाणत्वात्॥२७॥

सन्त्याध्रिगुप्रैषे संसर्गिणोऽर्थाः। तद्यथा चक्षुः प्राण इत्येवमादयः। सूर्य्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादिति। द्विपश्वादिषु पशुगणेषु किमूहितव्यः ? उत, नेत्युच्यते। नन्वन्यायनिगदत्वादेवायं नोहितव्यः। द्वयोश्चक्षुषोरेकवचनान्तो यतः श्रूयते। उच्यते। नायमध्रिगौ अधिष्ठानयोः सूर्य्यगमनमाह। न हि अधिष्ठाने सूर्य्यं गच्छतः। तेजोरश्मिवचनस्त्वयम्। एकश्च तत्तेजः। तस्मान्नायमन्याय-

निगदः । द्विपश्वादिषु च वैकृतेषु प्रयोगेषु मैत्रं श्वेतमालभेत वारुणं कृष्णमपां चौषधीनां च सन्धावन्नकाम इत्येवमादिषु पशुभेदात्तेजसो भेदे गम्यमाने ऊहः स्यादिति प्राप्नोति । नन्वेकस्मिन्नपि पशावधिष्ठानभेदेन भिन्ने एव तेजसी । नेत्युच्यते । सूर्य्यमस्य चक्षुर्गमयतादिति । यत् पशोस्तेजस्तद् हि विवक्षितम् । नाधिष्ठानभेदः । पश्वन्तरेषु पशुतेजोभेदादूह इति ॥ एवं प्राप्ते ब्रूमः । संसर्गिषु चाऽर्थस्यास्थितपरिमाणत्वात् । संसर्गिषु अर्थेषु यद्यपि पशुभेदस्तथापि रश्मीनां संसर्ग एवैकीभूतास्तेषां रश्मयः । यथैव पानीयस्य तैलस्य घृतस्य वा स्तत्का नानादेशेषु भिन्नाः समानदेशे एकीभूता भवन्ति तद्वद्रश्मयः।तस्मादेकवचनान्तस्तेषां वाचक इत्यनूहः स्यात्॥२७॥सि०

लिङ्गदर्शनाच्च ॥ २८ ॥

लिङ्गं खल्वपि भवति, यथा संसर्गिणो नोह्यन्ते इति । न माता वर्द्धते न मज्जा न नाभिः प्राणो हि स इति प्राणस्य सिद्धमनूहं हेतुत्वेनोपदिशति । तस्मात् संसर्गिणो नोह्यन्ते इति ॥ २८ ॥ युक्तिः ॥ द्विपशुयागे सूर्यं चक्षुर्गमयतादिति मन्त्राणामनूहाधिकरणम् ॥ १० ॥

एकधेत्येकसंयोगादभ्यासेनाभिधानं स्यात् ॥ २९ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयो यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्राध्रिगुप्रैषे समाम्नायते । एकधाऽस्य त्वचमाच्छ्यतादिति । तद्विकृतौ द्विपश्वादिषु सन्दिह्यते । किमभ्यसितव्यः ? उताविकारेण प्रयोक्तव्य इति । किं प्राप्तम् । एकधेत्ययमभ्यसितव्यः। कुतः । एकसंयोगादेकस्त्वचः प्रकार आच्छ्यता कर्त्तव्य इति । तत्र द्वयोर्बह्वीषु वा त्वक्षु उत्कृत्यमानासु नैकः प्रकारो भवति । पर्य्यायेण हि तां पशुभ्योऽपाच्छ्यन्ति । एकस्यां त्वचि अपाच्छ्यमानायामेकेन प्रकारेणापाच्छ्येयुस्तस्मादसर्वविषयो भवति अविकृतः शब्दः प्रयुज्यमानस्तस्मादभ्यसितव्य इति ॥ २९ ॥ सि० ॥

अविकारो वा बहूनामेककर्मवत् ॥ ३० ॥

वाशब्दात् पक्षो विपरिवर्त्तते । नैतदस्ति । अभ्यसितव्य इति । अविकारेण प्रयोक्तव्य इति । कुतः । ऐकध्यवचन एष शब्दः । एकीकुरु एषां त्वच इति ॥

किं तत्र ऐक्यम्, एककालोपदेशो वा, एकदेशोपदेशो वा ? ।

बहूनामेककर्मवत् । यथा बहूनामेककाले कर्माणि भवन्ति, एकधा गाः पाययतीति । एवमिहापि ऐकध्यं त्वचः कुर्वीति । बहूनां तु एकीकरणं शक्यते कर्त्तुं, नैकस्यास्त्वचः । तस्माद्बह्वीषु त्वक्षु एकीकरणमेकधाशब्दो वदतीत्यवसेयम् ॥ ३० ॥ पूर्वं० ॥

सकृत्त्वं त्वैकध्यं स्यादेकत्वात्त्वचोऽनभिप्रेतं तत्प्रकृतित्वात् परेष्वभ्यासेन विवृद्धावभिधानं स्यात् ॥३१॥

तुशब्दः पक्षं व्यावर्त्तयति । नाविकारः । अभ्यसितव्यः शब्द इति । एककाले कर्मण्यभिधीयमाने सहत्वं त्वचामभिहितं भवति । तत्प्रकृतावेकस्यां त्वचि असम्भवादनभिप्रेतं तत्प्रकृतित्वादुत्तरासां ततीनां परेषु वर्द्धमानेषु पशुषु अभ्यासेन अभिधानं स्यात् ॥ ३१ ॥ उत्तरम् ॥ द्विपशुयागे अध्रिगुप्रैषे एकधेत्यस्य शब्दस्याभ्यासाऽधिकरणम् ॥ ११ ॥

मेधपतित्वं स्वामिदेवतस्य समवायात् सर्वत्र च प्रयुक्तत्वात् तस्य चान्यायनिगदत्वात् सर्वत्रैवाविकारः स्यात् ॥ ३२ ॥

अस्ति ज्योतिष्टोमेऽग्नीषोमीये पशावध्रिगुप्रैषे मेधपतिशब्द एकवन्निगदः । परेषां शाखिनां द्विवन्निगदः । तं प्रति संशयो भवति । द्विपश्वादिषु पशुगणेषु किमविकारेण इतरश्चेतरश्च प्रयोक्तव्यः? उत स्वामिपर ऊहः कर्त्तव्यः, उत देवतापर इति । किं प्राप्तम् । अविकारः । कुतः । मेधपतित्वं स्वामिदेवतस्य, स्वामी मेधपतिर्देवता च । स्वामिना पशुर्देवताभ्यां दत्तः सङ्कल्पितः। मेधपतये स्वामिनेऽप्यसौ भवति । तस्य कार्य्यं करिष्यतीति । देवताभ्यामपि ताभ्यामुत्सृज्यते इति । त्रयाणामपि हि तं मेधं प्रति आधिपत्येन समवायोऽस्ति । सर्वत्र च आधिपत्ये पतिशब्दः प्रयुक्त आ हिमवतः, आ च कुमारीभ्यः । स एष त्रयाणामेकवचनान्तो वाचको द्विवचनान्तश्च । यथा प्रकृतावविवक्षितैकत्वोऽविवक्षितद्वित्वश्च सम्बन्धमात्रनिबन्धनः। एवं सर्वासु विकृतिषु । तस्मान्न विक्रियेत ॥ ३२ ॥

अपि वा द्विसमवायोऽर्थान्यत्वे यथासंख्यं प्रयोगः स्यात् ॥ ३३ ॥

अपि वा नैतदेवम् । तयोरिह समवायः, एकवन्निगदस्य, द्विवन्निगदस्य च । तयोरेकवन्निगदः स्वामिनि प्रयोक्ष्यते, येषां समाम्नातः । येषां द्विवन्निगदः समाम्नातस्तेषां सदेवते वक्ष्यति । तस्माद्विकृतौ बह्वीषु देवतासु द्विवन्निगद ऊहेन प्रवर्त्तिष्यते । यजमानेष्वेकवन्निगद ऊहिष्यते । एवं यथासंख्यं प्रयोगो भविष्यति ॥ ३३ ॥

स्वामिनो वैकशब्द्यादुत्कर्षो देवतायां स्यात्
पत्न्यां द्वितीयशब्दः स्यात् ॥ ३४ ॥

वाशब्दः पक्षं व्यावर्त्तयति । स्वामिदेवतयोरुभयोर्वाचक इति । नैतदेवम् । एक एव मेधपतिशब्दः । यस्माद् द्विवचनं, यस्माद् एकवचनं, स एव न स्वामिदेवतयोर्वाचको भविष्यति । नन्वेकोऽपि मेधपतिरपरोऽपि प्रतीयते । कथमवाचक इत्युच्यते । यदा स्वामिनस्तदा मेधपतये यो मेधस्तं मेध्यादुर उपनयतेति सम्बन्धः । यदा देवतावचनस्तदा मेधपतये उपनयत मेध्यादुर इति सम्बन्धः । स एव सकृदुच्चरित उभाभ्यां पदाभ्यां न सम्बन्धुमुत्सहते । वचनव्यक्तिभेदाद् वाक्यभेदः प्रसज्यते । तस्मात् स्वामिनो वाचक इति अध्यवसीयते ॥ अथ किमर्थं न देवतावचनः कल्प्यते । तथा हि कल्प्यमाने एकवन्निगदे उत्कृष्येत एकदेवत्यः क्रतुः । तत्र प्रकरणं बाध्येत । यजमानवचने पुनः कल्प्यमाने न द्विन्निगद उत्कृष्येत । तत्रैव यजमानयोर्दम्पत्योर्वाचको भविष्यति । तस्मात् प्रकरणानुग्रहाय स्वामिवचनः कल्प्यते । स्वामिपरस्योहो भविष्यतीति ॥ ३४ ॥ पूर्व० ॥

देवता तु तदाशीष्ट्वात् सम्प्राप्तत्वात् स्वामिन्यनर्थिका स्यात् ॥ ३५ ॥

तुशब्दः पक्षं व्यावर्त्तयति । न स्वामिवचनो देवतापरो भविष्यति । कुतः । तदाशीष्ट्वात् । आशासाना मेधपतये मेधमिति देवताभ्यां हविराशास्यते । मेधपतिभ्यां मेधमाशासाना उपनयत ताभ्यामिति । यजमानं प्रत्याशासानानुकीर्त्तनमनर्थकम्, अकर्त्तव्यञ्च । स प्राप्त एव स्वामिनं, मेधः किमर्थमाशास्यते । न च तेन नित्यमेव स्वामिसम्बद्धेन प्रयोजनम् । याग एव हि न संवर्त्तेत । तस्माद्देवतावचनो मेधपतिशब्द इति ॥ ३५ ॥

उत्सर्गाच्च भक्त्या तस्मिन् पतित्वं स्यात् ॥ ३६ ॥

उत्सृष्टश्च यजमानेन नायं ममेति । केवलं परकीयो रक्ष्यते । कालेन देवतया सम्भन्त्स्यते इति । कः पुनरस्य देवतया सम्बन्धः । यत्तामुद्दिश्य परिग्रहोऽस्य त्यज्यते । स च यागात् प्राकृतः । तस्माद् यागात् परार्थं द्रव्यं नात्मीयं परित्यज्य आस्ते । आत्मप्रधानं यत्तदात्मीयं, न यं प्रति आत्मा गुणभूतस्ताद्दशेषु भक्त्या पतित्वं भवति । तस्माद् देवतयोरेव तत्र मुख्यं मेधपतित्वं, भाक्तं स्वामिन इति ॥ ३६ ॥ युक्तिः ॥

उत्कृष्येतैकसंयुक्तो द्विदेवते सम्भवात् ॥ ३७ ॥

इति यदुक्तं, तत् परिहर्त्तव्यम् ॥ ३७ ॥ आ० ॥

एकस्तु समवायात्तस्य तल्लक्षणत्वात् ॥ ३८ ॥

अत्रोच्यते । यौ हि तौ द्वावग्नीषोमौ तयोर्गणे मेधपतिशब्दः । स चात्र देवतासमवेतस्तस्मिन् कर्मणि एकस्मै गणाय मेध उपनयत इत्युच्यते । तस्मादेकवचनान्तो गणवाची मेधपतिशब्दो नोत्कृष्यते इति ॥ ३८ ॥

संसर्गित्वाच्च तस्मात्तेन विकल्पः स्यात् ॥ ३९ ॥

अयं चान्यः परिहारः । संसर्गी अयमर्थो देवता नाम । द्वौ अर्थौ संसृष्टौ कदाचिदेका देवता भवति । यदि द्वयाय परिकल्पितं किञ्चिद् द्रव्यं, तत्र द्वयं देवता भवति । द्वावर्थौ संसृष्टौ एकतां यातः । तस्मादेकवचनान्तोऽपि प्रकरणमभिनिविशते पूर्वेण च सह विकल्पेत इति ॥ ३९ ॥ आ० नि० ॥

एकत्वेऽपि गुणानपायात् ॥ ४० ॥

अन्वारुह्य वचनमिदम् । मा तावद् भूदिहैकत्वमर्थः । तथापि प्रकरणमनुप्रविशेतैव एकवचनान्तः । प्रातिपदिकं हि तस्य विद्यमानाऽर्थम् । एकवचनञ्चोपनयनसम्बन्धार्थम् । एकत्वं वा अविवक्षितम् । तस्मान्न प्रकरणादुत्कृष्येतेति । अथोच्यते, एकत्वविशिष्टस्य विभक्तिः सम्बन्धं ब्रवीतीति । तथाप्यस्मत्पक्ष उपपद्यतेतराम् । सर्वोऽपि ह्येकत्वसम्बद्ध इति । अथ सम्बन्धं करोति एकत्वञ्च ब्रवीतीति । न तेने विशिनष्टि अविवक्षितत्वादविरुद्धं भविष्यतीति । अथोच्यते । अविवक्षितेऽपि वचने एकत्वसम्बन्धे एकवचनं भवति, नान्यत्रेति । तथा

मेधपतिगतमेकत्वमस्य भविष्यति । ततः सोऽनुवदिष्यते । तस्माद्दोष इति ॥ ४० ॥ युक्तिः ॥ द्विपश्वादिपशुविकृतौ मेधपतिशब्दस्य देवतानुसारेणोहाधिकरणम् ॥ १२ ॥

नियमो बहुदेवते विकारः स्यात् ॥ ४१ ॥

अस्ति बहुदेवत्यः पशुः । स एतान् पशूनादित्येभ्यः कामाय आलभते इति । तथा वैश्वदेवं धूम्रमालभेतेति । अस्ति तु प्रकृतौ अग्नीषोमीये द्विवन्निगद एकवन्निगदश्च मेधपतिशब्दश्चोदकप्राप्तः सन्दिह्यते । किं द्विवन्निगद ऊहितव्यः । एकवन्निगदो निवर्त्तेत ? उत उभावपि परस्परेण विकल्पमानौ निविशेयातामिति । किं तावत् प्राप्तम् । द्विवन्निगदः समवेताभिधायित्वादूहितव्यः । एकवन्निगदोऽशक्नुवन्नभिधातुमित्येतावता दर्शनेन निवर्त्तते एष नियमः । आह । ननु प्रकृतौ द्वित्वस्याविवक्षितत्वादविकारेण प्रयोगः प्राप्नोतीति । उच्यते । अविशेषकमत्र द्वित्वं,नतु तत्र समवेतं न गम्यते । न च गम्यमानं निष्प्रयोजनम् । अन्यसंख्यापरिच्छेदेन पुनः संख्येयमुपस्थापयति । तदस्य दृष्टमेव प्रयोजनम् । तस्माद् बहुष्वप्यूहो भवतीति ॥४१॥ पूर्व०॥

विकल्पो वा प्रकृतिवत् ॥ ४२ ॥

यदुक्तं द्विवचनान्त ऊहितव्य इति । तद् गृह्णीम । यत्त्वेकवचनान्तो निवर्त्तेतेति । तन्न । एकवचनान्तोऽपि प्रकृतिवदिह द्विवचनान्तेन विकल्पितुमर्हति । उक्तं हि गणाभिप्रायं तत् प्रकृतौ । संसर्गित्वाद्वा देवतानामिति । तद्वदिहापि गणाभिप्रायात् संसर्गित्वाद्वा देवतानां विकल्पेन निवेक्ष्यते इति ॥ ४२ ॥ सिद्धान्तः ॥ बहुदेवपशौ अपि एकवचनान्तमेधपतिशब्दस्य विकल्पाधिकरणम् ॥ १३ ॥

अर्थान्तरे विकारः स्याद्देवतापृथक्त्वादेकाभिसमवायात् स्यात् ॥ ४३ ॥

अस्त्येकादशिनी, प्रैषाग्नेयेन वापयति मिथुनं सारस्वत्या करोति रेतः सौम्येन दधाति प्रजनयति पौष्णेनेत्येवमादि । अस्ति च प्रकृतौ अग्निगुप्रैषे एकवन्निगदो द्विवन्निगदश्च मेधपतिशब्दः । तस्येह चोदकप्राप्तिश्चिन्त्यते । द्विवन्निगद ऊहितव्य एव । अथैकवन्निगदः किम् अविकारेण प्रवर्त्तेत, उत निवर्त्तेत ? । किं प्राप्तम् । विकल्पो वा प्रकृतिवदिति । एवं प्राप्ते ब्रूमः । विकार एवैकादशिन्यां, न विकल्पः ।

तत एकवचनान्तेन निवर्त्तितव्यम् । कुतः । देवतापृथक्त्वात् । पृथगत्र देवता । अन्यस्य पशोरन्या देवता, अन्यस्यान्येत्येवं, नात्र गणो देवतात्वेन । तदभावात् संसर्गित्वमपि नास्ति । प्रकृतौ च एतद्द्वयं कारणम् । एकवचनान्तस्य निवेशे न तदभावादिहास्ति प्रवृत्तिः । यच्चोक्तम्, एकत्वेऽपि गुणानपायादिति । परपक्षमन्वारुह्य तद्वचनं, न स्वपक्षः । तस्माददोष इति ॥ ४३ ॥ एकादशिन्यामेकवचनान्तमेधपतिशब्दस्योहाधिकरणम् ॥ १४ ॥ इत्याचार्य्यशबरस्वामिनः कृतौ मीमांसाभाष्ये नवमस्य अध्यायस्य तृतीयः पादः ॥ ९ ॥ ३ ॥

अथ नवमाध्यायस्य चतुर्थः पादः ॥ ९ ॥ ४ ॥

षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृतित्वाद्गुणस्य प्रविभक्तत्वादविकारे हि तासामकार्त्स्न्येना-ऽभिसम्बन्धो विकारान्न समासः स्याद-ऽसंयोगाच्च सर्वाभिः ॥ १ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः; यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्राध्रिगुप्रैषे इदमाम्नायते— षड्विंशतिरस्य वङ्क्रय इति । तच्चोदकेन द्विपश्वादीन् पशुगणान् सम्प्राप्तम् । मैत्रं श्वेतमालभते वारुणं कृष्णमपाञ्चौषधीनाञ्च सन्धावन्नकाम इत्येवमादिषु । अयमर्थः सांशयिकः । किं षड्विंशतिशब्दोऽभ्यसितव्यः ? किमविकारेण प्रयोक्तव्यः, किं वचनमात्रमूहितव्यम् ? अथ अस्य पदाभ्यासः ? उत समस्य वचनमिति । किं प्राप्तम् । षड्विंशतिशब्दोऽभ्यसितव्यः । द्विपश्वादिषु पशुगणेषु प्रकृतावेकस्य पशोः षड्विंशतिर्वङ्क्रय उक्ताः । इह स गुणः प्रविभक्तः । पशौ पशौ षड्विंशतिर्वङ्क्रयः । तत्र यदि अविकारेण प्रयुज्येत, न कृत्स्ना वङ्क्रीरभिवदेत् । अथ समस्य वचनं क्रियते, तथा षड्विंशतिशब्दो निवर्त्तेत । तत्रार्षं बाधितं स्यात् । न च सर्वाभिर्वङ्क्रिभिः पशोः सम्बन्धोऽस्ति । पशुद्वयस्य ताभिः सम्बन्धः । न च पशुद्वयं पशुः ॥ ननु पशोः कार्य्ये यः पशोः स्थाने, स वाङ्क्राभिः सम्बन्धयितव्यः । तथा हि प्रकृतौ वचनं कृतं, समस्ताभिर्वङ्क्रिभिः पशुद्वयस्य सम्बन्धे कृते एकैकस्य षड्विंशत्या सम्बन्धः प्रत्यायितः स्यात् । अत्रोच्यते ।

नैवम् । प्रकृतौ साक्षात् षड्विंशत्या पशुसम्बन्धः । इह परसंख्यया सम्बन्धे क्रियमाणे परोक्षयाऽवयवसंख्यया सम्बन्ध आनुमानिकः स्यात् । न च नियोगतः षड्विंशत्या एकैकस्य सम्बन्धः प्रत्यायितः स्यात् । पञ्चविंशतिरेकस्य सप्तविंशतिरेकस्येदृशमपि तत्र गम्यते । न चैवं प्रकृतावभिधानं कृतम् । तस्मादभ्यसितव्य इति ॥१॥ पूर्व० ॥

अभ्यासेऽपि तथेति चेत् ॥ २ ॥

इतिचेद् भवान् पश्यति,समासवचने अप्राकृतः. शब्द उच्चारितो भवतीति । अभ्यासेऽपि अनभ्यस्तं प्रकृतौ वचनम् । इह साभ्यासमप्राकृतं स्यात् ॥ २ ॥ आ० ॥

न गुणादर्थकृतत्वाच्च ॥ ३ ॥

नैष दोषः । गुण एव शब्दस्याभ्यासो नाम । स मत्पक्षे अप्राकृतः। त्वत्पक्षे पुनः शब्द एव । अङ्गगुणाविरोधे च तादर्थ्यादित्युक्तम् । अर्थाच्च मयैतदश्रुतमुपादीयते, प्रविभक्तं गुणं वक्तुम् । यच्च श्रुतचिकीर्षयाऽश्रुतं क्रियते, इष्यते एव तदस्माभिः । तस्माददोषः ॥ ॥ ३ ॥ आ० नि० ॥

समासेऽपि तथेतिचेत् ॥ ४ ॥

इतिचेत् पश्यसि, अभ्यासवचने चोदकोऽनुगृहीतो भविष्यति । कार्त्स्न्येन वङ्क्रयो वक्ष्यन्ते इति । समासेऽपि चोदकानुग्रहः । कार्त्स्न्येन वङ्क्रीणामभिधानाद् । अपिच समासवचने यौगपद्यवचनात् प्रयोगवचनोऽनुगृहीतो भविष्यति । तस्मात् समभ्यसितव्या वङ्क्रय इति ॥ ४ ॥ आ० ॥

नासम्भवात् ॥ ५ ॥

नैतदेवम् । मम चोदकोऽनुगृहीतः षड्विंशतिशब्दप्रयोगात् । तव प्रयोगवचनः समस्य वचनात् । न च सम्भवति चोदके प्रयोगवचनं प्रत्यादत्तव्यम । बलीयान् हि चोदकः । स हि धर्म्माणामुत्पादकः प्रापकश्च । प्रयोगवचनः प्राप्तानामुपसङ्ग्राहकः । स उत्तरकालेऽर्थविप्रकर्षाद् दुर्बलः । तस्मादभ्यसितव्यं वचनमिति ॥५॥ आ० नि० ॥

स्वाभिश्च वचनं प्रकृतौ तथेह स्यात् ॥ ६ ॥

स्वाभिश्च वङ्क्रिभिः पशुरुपलक्षितः प्रकृतौ । इहापि तथैवोपलक्षयितव्यः । सोऽभ्यासवचने शक्यते । समासवचने हि परसंख्या

समुदायस्योक्ता भवति,न स्वाभिः पशव उपलक्षिता भवन्ति। तस्मादसदेतत् ॥ ६ ॥ युक्तिः ॥

वङ्क्रीणान्तु प्रधानत्वात् समासेनाभिधानं स्यात् प्राधान्यमध्रिगोस्तदर्थत्वात् ॥ ७ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदेवम् । अभ्यसितव्यः षड्विंशतिशब्द इति। किं तर्हि । समस्य वदितव्या वङ्क्रय इति। कुतः ?। तत्र वङ्क्रीणां प्रधानत्वात्। प्राधान्यं हि तासाम् । प्रकृतौ षड्विंशतिरेता वङ्क्रय इति अभिसम्बन्धः। तत्रेप्सितः षड्विंशतिरस्येति वङ्क्रयो गणिताः । न ताभिर्गणिताभिः पशुरुपलक्षितः । किं कारणम् । वङ्क्रीभिर्गणिताभिर्दृष्टं प्रयोजनं, कृत्स्नं पार्श्वमुद्धरिष्यते इति। न तु वङ्क्रीभिर्गणिताभिः पशावुपलक्ष्यमाणे किञ्चिद् दृष्टमभ्यधिकं भवति । तस्मान्न पशुसम्बन्धो विवक्षितः । एवं प्राधान्यं वङ्क्रीणाम्। अध्रिगोर्वङ्क्र्यर्थत्वान्न तस्य सङ्ख्यापशुसम्बन्धः प्रयोजनम् । तस्मात् समस्य वचनं कर्त्तव्यम् । एतावत्त्वं प्रकृतौ उक्तमिति विकृतौ एतावत्त्वेव वक्तव्येति । तस्मात् समस्यवचनं कर्त्तव्यमिति ॥ ७ ॥ उत्तरम् ॥

तासाञ्च कृत्स्नवचनात् ॥ ८ ॥

तासाञ्च वङ्क्रीणामिदं कात्स्न्यर्मुच्यते,न पशूनाम्। ता अनुष्ठ्योच्चयावयतादिति। षड्विंशतिवङ्क्रयस्ताः प्रयत्नेन उद्धर्त्तव्या इति। इतरथा षड्विंशतिरस्य वङ्क्रयस्तं प्रयत्नेन किञ्चित् कुर्यादित्येवमभिसम्बन्धो भवेत् । यद्धि लक्ष्यते, तद्धिकार्य्यसम्बन्धार्थं प्रतिनिर्दिश्यते। तदिह षड्विंशतिरस्य वङ्क्रयस्ता इति वङ्क्रीणां प्रतिनिर्देशः कार्य्यार्थः। तस्मात्तासां प्राधान्यमिति ॥ ८ ॥ युक्तिः ॥

अपि त्वऽसन्निपातित्वात् पत्नीवदाम्नातेनाऽभिधानं स्यात् ॥ ९ ॥

अपित्विति पक्षव्यावृत्तिः। नैतदेवं, समसितव्या वङ्क्रय इति। किं तर्हि। अविकृतः षड्विंशतिशब्दः प्रयोक्तव्यः। कुतः। असन्निपातित्वात्। असन्निपाती ह्यध्रिगुः, न करणत्वेन निर्दिश्यते। यदि हि करणत्वेन निर्दिश्येत, ततोऽनेन प्रकाशितं कर्त्तव्यं, न ध्यानेनेति

मन्त्रान्तेन कर्मसन्निपातः स्यात् । तत्राशक्यमविकृतेन यौगपद्यं कर्त्तुमिति विक्रियेत, अभ्यस्येत वा । अथ पुनरेतदकरणं, क्रियमाणानुवादिनयनकालमध्रिगुवचनमनेकस्मिन् पशौ चोदकेनात्र निपतितम् । तत्रैषां स्वसङ्ख्यावतीर्वङ्क्रीरभिवदितुमशक्यं विप्रतिपत्तिरूपं तत् । तस्मान्न तद्वङ्क्रीणामियत्ता वदितव्या । किं तर्हि । षड्विंशतिसङ्ख्यायाः सम्बन्धः कर्त्तव्यः । यथा द्विपत्नीके बहुपत्नीके वा प्रयोगे पत्नीशब्द एकवचनान्तो न सङ्ख्यया पत्नीः परिच्छिनत्ति । किं तर्हि । एकत्वेन सम्बध्नाति । एवमिहापि । तस्मादविकारेण प्रयोगः । एवमविकारे आर्षमनुग्रहीष्यते इति ॥ ९ ॥ पूर्व० ॥

विकारस्तु प्रदेशत्वाद् यजमानवत् ॥ १० ॥

तुशब्दात् पक्षो विपरिवर्त्तते । नाविकारः । ऊहः कर्त्तव्य इति । यद्यत्संख्येषु आहत्य तत्संख्योच्चार्य्यते, तत्र वचनप्रामाण्याद् विप्रतिपन्नसङ्ख्याकस्य शब्दस्य प्रयुज्यमानस्य अदृष्टोऽर्थोऽभ्युपगम्यते । यथा प्रकृतौ पत्नीशब्दस्य, न तु इहाहत्य षड्विंशतिशब्दोऽनेकस्मिन् पशौ प्रयुज्यते । किन्तु चोदकेनेह प्राकृतवचनं प्राप्यते । तत्र यद् न्याय्यं तच्चोदकः प्रापयिष्यति, नाहत्य षड्विंशतिशब्दम् । किं तद् न्याय्यम् । यत् प्रकृतौ विवक्षितम् । प्रकृतौ च वङ्क्रीणामियत्ता कथिता । तस्मादिह सा प्रदिश्यते ॥ नन्वेतदुक्तं नाध्रिगोः करणत्वेन निर्देश इति । यदा च न करणं, तदा कथमयं वङ्क्रीयत्तावचनः । श्रुत्या षड्विंशतिसङ्ख्यावचन एव भवितुमर्हतीति । उच्यते । यद्यपि नास्य तृतीयया निर्देशः, तथापि प्रयोगवचनेनोपगृहीतः साधको भवन् कमन्यं दृष्टमुपकारं करिष्यति, अन्यतोऽवदानप्रकाशनात् । अत्रोच्यते । नास्यावदानैरभिसम्बन्धः प्रकृतियागप्रयोगवचनो यागेन सम्बध्नाति । तत्र च हविष्कङ्कीर्त्तनं दृष्टं प्रयोजनम् । षड्विंशतिशब्दोऽपि तत्स्तुतये भविष्यतीति । नैतदेवमिति ब्रूमः । प्रकरणाद् यागमात्रेण अभिसम्बन्धे सति ऋत्विजां प्रैष इति गम्यते । लिङ्गात्तु शमितृप्रैषमेनमध्यवस्यामः । तथारूपाणि ह्यत्र वाक्यानि, दैव्याः शमितार उपहृता मनुष्या आरभध्वमिति । तथा षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठयोच्च्यावयतादिति । तस्माद् वङ्क्रीयत्तावचन एष, न षड्विंशतिसङ्ख्यावचनः । यथा यजमानपदे एकयजमानवाचिनि स्वसङ्ख्या-

मात्रैकवचनमिति कृत्वा द्वियजमानके च प्रयोगे स्वसङ्ख्यावचनप्रदेशाद् ऊहः क्रियते । एवमिहापीति ॥ १० ॥ उत्तरम् ॥

अपूर्वत्वात्तथा पत्न्याम् ॥ ११ ॥

यदुक्तं पत्नीवदिति । युक्तं पत्न्यां न तत्रैकपत्नीके यजमाने पत्नीशब्दः समाम्नातः । द्विपत्नीके बहुपत्नीके च प्रदेशाद् भवति । यथा एकस्याः पत्न्याः स्वसङ्ख्यावचनः । एवं द्वयोर्बहूनां च स्वसङ्ख्यावचन इति । तस्माद्वैषम्यं पत्न्याम् ॥ ११ ॥ युक्तिः ॥

अनाम्नातस्त्वविकारात् संख्यासु सर्वगामित्वात् ॥१२॥

तुशब्दोऽन्यं पक्षमवतारयति, न समस्य-वचनं सङ्ख्योहः स्यादिति । यथा समाम्नातं षड्विंशतिप्रातिपदिकं प्रयोक्तव्यम् । एवमविकारे आर्षानुग्रहो भविष्यति । प्रविभक्तं गुणमभिवदितुं वचनमूहिष्यते । षड्विंशती एतयोर्वङ्क्रय इति । ननु षड्विंशती इत्यभिधाने वङ्क्रीणां प्रथमा न प्राप्नोति । उच्यते । यदा षड्विंशतिगुणः प्राधान्येन विवक्षितो भवति, तद्विशेषणार्थं सङ्ख्येयमुच्चार्य्यते । तदा प्रथमान्तेनापि लक्षणया सङ्ख्या विशेष्यते । यथा,इन्द्राग्नी देवते इति। यदा दिवेरैश्वर्य्यकर्मणोऽर्थो गुणो विवक्षितो भवति,तदैकवचनान्तमेव इन्द्राग्नी इति शब्दो लक्षणया विशिनष्टि । तथा च प्रयोगो दृश्यते । पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः पञ्चपञ्चाशतः पञ्चदशा पञ्चपञ्चाशतः सप्तदशा पञ्चपञ्चाशत एकविंशा इति सङ्ख्यावचनः शब्दस्त्रिवृत इत्यनेन लक्षणया विशेष्यते। यथा,देवदत्तयज्ञदत्तविष्णुमित्राः पर्षदिति। एवं षड्विंशती वङ्क्रय इति । एवमविकारं च भविष्यति। वङ्क्रिगामी च षड्विंशतिशब्दो भविष्यतीति ॥१२॥पूर्व०

सङ्ख्या त्वेवं प्रधानं स्याद्वङ्क्रयः पुनः प्रधानम्॥ १३ ॥

सत्यमुपपद्यत एव वचनं, षड्विंशती वङ्क्रय इति । संख्याप्रधानस्त्वेवं निर्देशः कृतो भवति । षड्विंशतिगुणः प्राधान्येन विवक्षितः । तद्विशेषणत्वेन वङ्क्रीणामुच्चारणम् । वङ्क्रयः पुनः प्रकृतौ प्रधानं, न सङ्ख्या।तदुक्तं,प्राधान्यमाध्रिगोस्तदर्थत्वात्।तासाञ्च कृत्स्नवचनादिति । तदेवं न प्रकृतिवदभिधानं कृतं भवेत् । तत्र चोदक एव बाध्येत । तस्मात् समसितव्यमेव वचनमिति ॥ १३ ॥ उत्तरम् ॥

अनाम्नातवचनमवचनेन हि वङ्क्रीणां स्यान्निर्देशः॥१४॥

न खल्वप्यस्मिन् पक्षे सर्वमेवाम्नातमुच्यते, अनाम्नातवचनमपि प्रतीयते इति षड्विंशती षड्विंशतय इति । अथ द्विवचनं बहुवचनं वा अनार्षं, तथा न क्रियते, न तासां वङ्क्रीणां कात्स्न्येंनाभिधानं स्यात् ॥ १४ ॥ युक्तिः ॥

अभ्यासो वाऽविकारात् ॥ १५ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न समासवचनम् । अभ्यासः स्यात् । एवमविकारो भविष्यति । तत्रार्षचोदकावनुग्रहीष्येते । सर्वं समाम्नातं कृतं भविष्यति । केवलमस्यशब्दोऽभ्यसिष्यते । कृत्स्नाश्च वङ्क्रयोऽभिहिता भविष्यन्ति ॥ १५ ॥ पूर्व० ॥

पशुस्त्वेवं प्रधानं स्यादभ्यासस्य तन्निमित्तत्वात् तस्मात् समासशब्दः स्यात् ॥ १६ ॥

तुशब्देनावधार्य्यते । नैतदेवं, समस्य-वचनमेवेति । कथम् ? । एवं सति पशुः प्राधान्येनात्र निर्दिष्टः स्यात् । पशोः पशोः षड्विंशतिः षड्विंशतिर्वङ्क्रयो न कश्चिद् अषड्विंशतिवङ्क्रिः पशुरिति पशोः सङ्ख्यासम्बन्धेऽभिधित्सिते एवं वचनं भवति । न च पशुसङ्ख्यासम्बन्धः प्रकृतौ विवक्षित इत्युक्तम् । इयत्ता वङ्क्रीणां प्रकृतौ वक्तव्या । इहापि सैव चोदकेन प्रदिश्यते । तेन नाभ्यासः । स हि पशुनिमित्तकः । तस्मात् समस्य-वचनं वङ्क्रीणां कर्त्तव्यमिति ॥१६॥ सि० ॥ षड्विंशतिरस्य वङ्क्रय इत्यादौ समस्योहाधिकरणम् ॥ १ ॥

अश्वस्य चतुस्त्रिंशत्तस्य वचनाद्वैशेषिकम् ॥ १७ ॥

अस्त्यश्वमेधः । तत्र सवनीयः पशुः, अश्वस्तूपरगोमृगौ च । अस्ति तु प्रकृतौ अग्नीषोमीये षड्विंशतिरस्य वङ्क्रय इति वचनम् । तदिह चोदकेन प्राप्तम् । तत्राश्वस्य चतुस्त्रिंशद्वङ्क्रयः । तूपरगोमृगयोः षड्विंशतिः । अस्ति तु ऋक् समाम्नाता । चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति । अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्याविशस्ता इति । तदिदं सन्दिह्यते । किमश्वस्य वैशेषिकमिदं वचनं कर्त्तव्यं, तूपरगोमृगयोः समासेन ? उत सर्वेषामेव समासवचनम् । किं प्राप्तम् । अश्वस्य चतुस्त्रिंशद्वङ्क्रयस्तस्य वैशेषिकमिदं वचनं कर्त्तव्यम् । कस्मात् । वचनात् । एवं चतुस्त्रिंशद्वाजिनो देवबन्धोरित्येतद् वचनमर्थवदिति । इतरथा एतद्

वचनमनर्थकं स्यात् । तस्माद्वैशेषिकमश्वस्येति ॥ १७ ॥ चतुस्त्रिंशद्वाजिन इत्यनेन आश्वमेधिकसवनीयाश्वस्य चतुस्त्रिंशद्वङ्क्रिरूपविशेषवचनाधिकरणम् ॥ २ ॥

तत् प्रतिषिद्ध्य प्रकृतिर्नियुज्यते सा चतुस्त्रिंशद्वाच्यत्वात् ॥ १८ ॥

तत् प्रतिषिद्ध्य प्रकृतिर्नियुज्यते, प्रकृतौ यत् कृतं वचनं तत् कर्त्तव्यमिति । कथम् । न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादिति, सा नियुज्यमाना चतुस्त्रिंशद्वाच्यत्वाद् वारयति शब्दम् । तस्मात् प्रतिषिद्धत्वाद्वैशेषिकं वचनं न कर्त्तव्यं, सामासिकं वचनं कर्त्तव्यम् ॥ ननु षड्विंशतिरित्येव ब्रूयादिति वचनात् प्रतिषिद्धेऽपि वैशेषिकमेव वचनं कर्त्तव्यमिति।नेत्युच्यते, न ह्ययं षड्विंशतिशब्दो विधीयते । किं तर्हि । यथाप्राप्तिवचनमनूद्यते। कथमवगम्यते । एवकारकरणात् । यथाप्राप्ते एवकारकरणम् । न च षड्विंशतिशब्दः प्राप्तः । षड्विंशतिसङ्ख्याभिधानं प्रकृतौ कृतमिहापि तदेव प्राप्तम् । षड्विंशतिशब्देन तत् प्रकृतौ लक्षितमिहापि षड्विंशतिशब्दस्तल्लक्षणार्थमेवोच्चारितः । षड्विंशतिसङ्ख्यापरेऽनेकोऽर्थो विधीयते । चतुस्त्रिंशत्प्रतिषेधः । षड्विंशतिसंख्यावचनश्च । तत्र वाक्यं भिद्येत । भिद्यमाने एकवाक्यरूपं बाध्येत । किं तत् । साकाङ्क्षत्वम् । न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादिति । एतद्धि वचनं चतुस्त्रिंशद्वचनाभावे प्राप्तमेव सत् कर्त्तव्यतया प्रतिषेधं प्रशंसितुमुच्चार्यते । तदेवमेकवाक्यतामापद्यते । सैकवाक्यता संख्यापरे बाधिता स्यात् । अनेकार्थविधानञ्चान्याय्यम् एकार्थविधाने सम्भवति । भूयसी हि तत्रादृष्टकल्पना स्यात् । तस्माद्यथाप्राप्तवचनं कर्त्तव्यमिति ॥ १८ ॥ सि० ॥

ऋग्वा स्यादाम्नातत्वादविकल्पश्च न्याय्यः ॥ १९ ॥

आम्नाता हि ऋक् प्रतिषिद्धा च ।तस्मादश्वस्य वैशेषिकं वचनं स्यात् । तथा च अविकल्पो भविष्यति । अविकल्पश्च न्याय्यः । विकल्पे विरुद्धं वचनमन्योन्येन भवति । भवतीति चेद्, न प्रतिषेधः । नेति चेद्, न विधिः । तस्माद्वैशेषिकं वचनं कर्त्तव्यम ॥ १९ ॥ पूर्व० ॥

तस्यां तु वचनादैरवत् पदविकारः स्यात् ॥ २० ॥

अथ यदुक्तम्, ऋक् तत्र प्रतिषिद्ध्यते इति । नैतदेवम् । तस्यां वचनात् पदविकारः स्यात् । वचनं हि भवति, न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादिति । तत्र चतुस्त्रिंशत्पदं श्रुत्या प्रतिषिद्ध्यते । ऋग् लक्षणया प्रतिषिद्ध्यते । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या । तस्माद्वैशेषिकं वचनं कर्त्तव्यमिति ॥ २० ॥ आ० नि० ॥

सर्वप्रतिषेधो वाऽसंयोगात् पदेन स्यात् ॥ २१ ॥

सर्वस्या एव वा ऋचः प्रतिषेधोऽयं, न चतुस्त्रिंशत्पदस्य । कस्मात् । पदेन असंयोगात् । चतुस्त्रिंशत्पदेन ऋचः संयोगो न स्याद्, विना तस्मात् पदात् । नैव ऋक्शेषो वङ्क्रिगणनं कुर्य्यात् ॥ अथ षड्विंशतिपदेन सम्बद्ध्येत, तथापि नाश्ववङ्क्रीसंख्यां ब्रूयात् । तत्र दृष्टोऽर्थो नावकल्पेत । ऊनश्च वाक्यमर्थं न साधयेत् । ऊने च वाक्ये दोषश्रवणात् । मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति । चतुस्त्रिंशत्पदं चेह अनर्थकं स्यात् । तस्मात् समस्य वचनं कर्त्तव्यम् । ऋचश्च विध्यन्तरेण विहितत्वाद्वैशेषिकं वचनमिति ॥२१॥ उत्तरम् ॥ आश्वमेधिकसवनीयाश्वस्य, न चतुस्त्रिंशदिति ब्रूयादित्यनेन समस्ताया एव ऋचो निषेधाधिकरणम् ॥ ३ ॥

वनिष्टुसन्निधानादुरूकेण वपाभिधानम् ॥ २२ ॥

ज्योतिष्टोमे अग्नीषोमीये पशौ अध्रिगौ वचनं, वनिष्टुमस्य मा राविष्टोरूकं मन्यमाना इति । तत्रोरूकशब्दं प्रति विचारः । किं वनिष्टुमस्य मा राविष्टोलूकसदृशं मन्यमानाः ? उत उरूकं वपां मन्यमाना वनिष्टुं मा राविष्टेति । किं प्राप्तम् । वनिष्टुमुलूकं मन्यमाना इति । कथमुरूकशब्द उलूकवचनः ? । रलयोः समानवृत्तित्वात् । पर्य्यङ्कः पल्यङ्कः, रोमाणि लोमानि, अङ्गुरिः अङ्गुलिः । उलूकसदृशत्वाच्च वनिष्टोः, वपायाश्चाप्रसिद्धेः ॥ एवं प्राप्ते ब्रूमः । उरूकशब्देन वपाभिधानं स्यात् । वपां मन्यमाना वनिष्टुं मा राविष्टेत्येषा बुद्धिः क्रियमाणा दृष्टार्था । भवति हि वनिष्टुसन्निधानाद् व्यामोहेन वनिष्टोर्लवनप्रसङ्गः । तं च निवर्त्तयन्नेष शब्दो दृष्टप्रयोजनो भवति । न हि वनिष्टुर्न लवितव्य एव । वपोद्धरणकाले वपां मन्यमानैर्न लवितव्यः । इतरस्मिन् पक्षे वनिष्टुं मा राविष्टेति लवितव्ये वनिष्टौ अन-

र्थकः प्रतिषेधः । उलूकसदृशवचनश्चअदृष्टार्थम् । कथं पुनर्वपायामप्रयुक्तो वपां प्रत्याययिष्यति उरूकशब्दः ? इति । उच्यते । अवयवप्रसिद्ध्या उरुशब्दस्तावद्विस्तीर्णवचनो दृष्टः । तद्यथा उरु राजाङ्गणम्, उरु तैलिकाङ्गणमिति । तथा, उरुं हि राजा वरुणश्चकार सूर्य्याय पन्था मन्वंत वा उ इति । तथा उरु विष्णो विक्रमस्व इति । इहाऽपि स विस्तीर्णवचन एव । तथा कशशब्दो मेदासि प्रसिद्धः । यथा, कशवाहिनो रथाः । मेदोवाहिन इति गम्यते । तस्यैकदेशः कशब्दः समुदायप्रत्ययमादधाति । मेदस्विनी तस्य वपा, न विस्तीर्णं मेदो मन्यमानेन तत्सन्निकृष्टो वनिष्टुर्लवितव्य इति वपावचनता सिद्धा भवति । किं भवति प्रयोजनम् । वनिष्टुवचनपक्षे उपमानस्य उरूकशब्दस्य अनूहः । वपावचनपक्षे उरुशब्द ऊहितव्यः कशब्दश्चेति उरूणी के,उरूणि कानि। अथ वा उरूके,उरूकानि,यदि समासाभिप्रायः ॥ २२ ॥ अग्नीषोमीयपशावुरुकशब्देन वपाभिधानाधिकरणम् ॥ ४ ॥

प्रशसाऽस्याभिधानम् ॥ २३ ॥

तस्मिन्नेवाध्रिगावाम्नायते, प्रशसा बाहू इति । तत्र सन्देहः । किं प्रशसा बाहू कृणुतात्, प्रशसेति तृतीयान्तः । प्रशसा बाहू ग्रहीतव्याविति ? उत प्रशसेति द्विवचनम्, आकारे विभक्तेः कृते प्रशस्तौ बाहू कर्त्तव्याविति ? । किं प्राप्तम् । प्रशसाऽस्याभिधानम् । असौ हि शासशब्दः प्रसिद्धः । तथाहि तमनुवदति । दश प्रयाजानिष्ट्वाह शासमाहरति । असिं वै शासमाचक्षते इति । अनर्थिका च बाह्वोः स्तुतिः । स्तुतौ बाहू किमप्यदृष्टं कुरुत इति मान्त्रवर्णिकं तयोर्देवतात्वं कल्पितं स्यात् । तच्चायुक्तमन्यस्मिन् पक्षे सति । तथा शौनःशेफे भवति दर्शनम् । अतस्त्वामग्नि शासहस्तं शासेन विशसनत्वान्न द्रष्टुमुत्सहे इति । तस्मादसिना प्रशसेति गम्यते ॥ २३ ॥ पूर्व० ॥

बाहुप्रशंसा वा ॥ २४ ॥

अथ वा बाहुप्रशंसैषा । प्रशसा बाहू कृणुतात् प्रशस्तौ बाहूच्छेत्तव्याविति । तथा प्रशसाशब्दस्य दृष्टार्थता भविष्यतीति । कार्त्स्न्येन हि बाह्वोः प्रशस्तता । कृत्स्नौ बाहू उद्धरतेत्यर्थः । कृत्स्नौ च बाहू उद्धर्त्तव्याविति । इतरस्मिन् पक्षे स्वधितिना विशसनं क्रियते, असेश्च वाचकः शब्द उच्चार्य्यते । यदि वा मान्त्रवर्णिकं द्रव्यं विधीयते

असिना बाहू छेत्तव्यौ इति । तच्चायुक्तं विधिविहिते स्वधितौ सति। न च न प्रशस्तौ बाहू । ताभ्यां पशुर्हि गच्छति । अवजम्य च शमी- करीरे भक्षयति । तस्माद् बाहुप्रशंसा । किं भवति प्रयोजनम्। अश्वमेधे शतं राजता हरितत्सरवोऽस्यः । तत्रासिपर ऊहो भवति। यथा पूर्वः पक्षः । यथा तर्हि सिद्धान्तः, तथा बाहुपरेणोहेन भवित- व्यम् २ ॥४ ॥ सिद्धान्तः ॥ अध्रिगौ प्रशसा बहू इत्यत्र प्रशसाशब्द- स्य प्रशंसापरत्वाधिकरणम् ॥ ५ ॥

श्येनशलाकश्यपकवषस्त्रेकपर्णष्वाकृतिवचनं प्रसिद्धसन्निधानात् ॥ २५ ॥

अस्मिन्नेवाध्रिगाविदमाम्नायते, श्येनमस्य वक्षः कृणुतात्, शला दोषणी कश्यपेवांसौ कवषोरू स्त्रेकपर्णाष्ठीवन्त इति । एषु संशयः । किमाकृतिवचनमेषु भवति । उत कार्त्स्न्योंद्धरणमिति । किं प्राप्तम् । प्रसिद्धसन्निधानादाकृतिवचनम् । इह प्रसिद्धस्य सन्निधौ यदभिधी- यते, किञ्चिदिदं कर्त्तव्यमिति तत्राकृतिवचनं गम्यते । यथा, अमी पिष्टपिण्डाः सिंहाः क्रियन्तामिति, अर्जुनबदरा मेखलाः क्रियन्ता- मिति सिंहाकृतिवचनं मेखलाकृतिवचनञ्च गम्यते । एवं श्येनाकृति वक्षः कर्त्तव्यं, शलाकृती दोषणी, कश्यपाकृती अंसौ, कवषाकृती ऊरू, करवीरपर्णाकृती अष्ठीवन्ताविति ॥ २५ ॥

कार्त्स्न्यं वा स्यात्तथाभावात् ॥ २६ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति, आकृतिवचन इति । किन्तर्हि । कृत्स्नोद्धरणं विवक्षितम् । कृत्स्नानि उद्धृतानि एतानि एतदाकृतिकानि भवन्ति । यथा श्येनाद्याकृतिकानि भवन्ति तथैतानि कुरुत, कृत्स्नानि उद्धरतेत्ययमर्थोऽवगम्यते । लक्षणयेदं चोद्यमानं दृष्टार्थं भवति । कृत्स्नोद्धृतैर्हि तैः प्रयोजनम् । तथाहि तदाकृतिका- नामवत्तं भवति । इतरथाऽतदाकृतिकानामवद्यात । तस्माद् कार्त्स्न्यं- मवगम्यत इति ॥ २६ ॥ सि० ॥

अध्रिगोश्च तदर्थत्वात् ॥ २७ ॥

अध्रिगुश्चाङ्गानामुद्धरणार्थः । अङ्गानां कार्त्स्न्येनोद्धरणं कथं स्या- दित्येवमर्थः । कथम् । एवं हि भवति वचनम् । गात्रं गात्रमस्यानूनं कृणुतादिति । तस्मादपि श्येनादिभिः कृत्स्नोद्धरणं गम्यत इति ।

प्रयोजनं पक्षोक्तम् ॥ २७ ॥ युक्तिः ॥ अग्निर्गौ श्येनमस्य वक्ष इत्यादौ श्येनादिशब्दानां कार्त्स्न्यवचनाधिकरणम् ॥ ६ ॥

प्रासङ्गिके प्रायश्चित्तं न विद्यते परार्थत्वात्तदर्थे हि विधीयते ॥ २८ ॥

अस्ति अग्निहोत्रम् । य एवं विद्वानग्निहोत्रं जुहोतीति । तत्रेदमाम्नायते । अग्नये ज्योतिष्मतेऽष्टाकपालं निर्वपद् यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायादिति । यदि तु दर्शार्थेन पौर्णमासार्थेन वा अग्निरुद्धृतोऽहुतेऽग्निहोत्रे उद्वायात्, किं ज्योतिष्मती कर्त्तव्या, न ? इति । किं प्राप्तम् । कर्त्तव्येति । कुतः । उपसम्प्राप्तं हि निमित्तम् । भवितव्यं नैमित्तिकेनेति । अग्निरसौ उद्धृतोऽहुतेऽग्निहोत्रे उद्वातः । एतावच्च निमित्तं ज्योतिष्मत्याः । तस्मात् सा कर्त्तव्येति । न चात्र शब्दोऽस्ति अग्निहोत्रार्थमुद्धृते उद्वाते कार्य्येति तस्मादपि कर्त्तव्या ॥ एवं प्राप्ते ब्रूमः, प्रासङ्गिके एवंलक्षणकेऽग्नावनुगते प्रायश्चित्तं न कर्त्तव्यम् । परार्थं हि तदुद्धरणं कृतम् । दर्शपूर्णमासार्थम् । अग्निहोत्रार्थे चोद्धृते व्यापन्ने तदाम्नातम् । तस्मान्न कर्त्तव्यम् । आह । ननूक्तं, नास्त्यत्र शब्दः, अग्निहोत्रार्थमुद्धृतेऽनुगते प्रायश्चित्तमिति । अत्रोच्यते । यद्यपि नास्त्येवञ्जातीयकः शब्दः, तथाप्यग्निहोत्रार्थमेवोद्धृतेऽनुगते प्रायश्चित्तं गम्यते । कथम् । अग्निहोत्रप्रकरणे एतदाम्नातमिति, अग्निहोत्रप्रकरणे आम्नानात्तस्योपकारकमिति गम्यते । नाग्निहोत्रविशिष्टमुद्धरणम् । स्वार्थे हि सर्वं क्रियते, न परविशेषणार्थेन । अत्रोच्यते । अग्निसम्बद्धमेतत् प्रायश्चित्तमुच्यते, नोद्वानसम्बन्धम् । किमतो यद्येवम् । यद्युद्वानसम्बद्धं भवेद्, उद्वानस्याऽनङ्गत्वान्नैतदुद्वानार्थमिति गम्यते । प्रकृते नाग्निहोत्रेण प्रयोजनेन सम्बद्ध्यते । अग्निसम्बन्धे पुनर्गुणत्वादग्नेस्तेनैव प्रायश्चित्तस्य प्रयोजनसम्बन्धः । तत्रैवमुद्धृतो व्यापन्नो भवति । यदि स प्रयोजनं नाभिनिर्वर्त्तयति । तत्राग्निहोत्रार्थस्योद्धरणस्याग्निहोत्रनिर्वृत्तिः प्रयोजनम् । दर्शपूर्णमासार्थस्य दर्शपूर्णमासनिर्वृत्तिः । उद्धृतश्चानुगतं स्वस्मै प्रयोजनायायोग्यं प्रायश्चित्तेन योग्यं क्रियते । तच्च योग्यं कुर्वन् प्रायश्चित्तमग्निहोत्रस्योपकरोति । यस्तूद्धृतो दर्शपूर्णमासप्रयोजनः, तं योग्यं कुर्वन्नग्निहोत्रस्योपकुर्य्यात् । यस्त्वग्निहोत्रार्थमुद्धृतः, तं योग्यं कु-

वेन्नग्निहोत्रायोपकरोति । तस्मादग्निहोत्रार्थमुद्धृते प्रायश्चित्तम् । कथं पुनर्ज्ञायते । अग्निना प्रायश्चित्तस्य सम्बन्धो, नोद्वानेनेति । अग्निविशिष्टेन उद्वानेन सम्बन्ध इति श्रुत्या गम्यते । उद्वानपरीतेनाऽग्निनेति वाक्येन । श्रुतेर्वाक्याद्बलीयस्त्वादुद्वानसम्बन्धः प्राप्नोतीति । उच्यते । उद्वानसम्बन्धस्यापरिहार्य्यत्वाद् यस्योद्वायादित्यविवक्षितमेव प्राप्नोति । अदृष्टार्थत्वान्न अनाकाङ्क्षितेन सम्बन्धः । तदुद्वानपरीतेऽग्नौ प्रायश्चित्तेन सम्बद्ध्यमाने व्यापत्तौ सत्यामाकाङ्क्षितेन सम्बन्धो, दृष्टार्थता च । तस्मादुद्वानपरीतोऽग्निः प्रायश्चित्तेन सम्बद्ध्यत इति । दर्शपूर्णमासार्थमुद्धृतो यत्रानुगच्छति तत्राग्निहोत्रस्य परकीयोऽग्निर्व्यापन्नः । परकीयश्चोद्धरणमिति तत्र प्रायश्चित्तं न स्यात् । अपि च लिङ्गं भवति । किमिति । यस्याग्निरुद्धृतोऽग्निहोत्र इत्यनुवादः । विधौ हि एतस्मिन् सति वाक्यभेदप्रसङ्गः । यद्याग्निहोत्रप्रयोजनमुद्धरणं, ततोऽकृतप्रयोजनमिति विवक्षायाम् अहुतेऽग्निहोत्रे इति वचनमनुवदितुमुपपद्यते । तस्मादपि अग्निहोत्रप्रयोजने उद्धृतेऽनुगते प्रायश्चित्तं भवितुमर्हतीति । किन्तर्हि तदा कर्त्तव्यम् । अविशेषविहितमग्नेरुपशमे प्रसज्ज्यादिति ॥ २८ ॥ दर्शार्थोद्धृताग्निलोपे प्रायश्चित्तरूपज्योतिष्मत्या अननुष्ठानाधिकरणम् ॥७॥

धारणे च परार्थत्वात् ॥ २९ ॥

इदमाम्नायते, धार्यो गतश्रिय आहवनीय इति अस्यानुगमे प्रायश्चित्तम् । अग्नये ज्योतिष्मतेऽष्टाकपालं निर्वपेद्यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायादिति । तत्रैषोऽर्थः सांशयिकः । यदा धार्य्योऽग्निरनुगच्छति, तदाकिमिदं प्रायश्चित्तं कर्त्तव्यं, न ?। किं प्राप्तम् । कर्त्तव्यमिति । उपसम्प्राप्तं, हि निमित्तम् । एतावदिह निमित्तम् । अग्निरग्निहोत्रार्थमुद्धृतः कृतप्रयोजन उद्वातीति । तच्चेह सर्वं प्राप्तम् । तस्मात् कर्त्तव्यं प्रायश्चित्तमिति । ननु सर्वकर्म्मार्थमेतद्, न केवलायाग्निहोत्राय । उच्यते । यदि सर्वकर्म्मार्थं,समुदायार्थं तद्, न केवलस्यार्थेन भवतीत्युच्यते । यत्तु एकैकस्मै इत्येवं सर्वार्थं तत्, सर्वेभ्योऽपि प्रयुक्तमग्निहोत्राय प्रयुक्तं भवति । न चेदं सर्वकर्म्मसमुदायार्थम् समुदायस्याचोदितत्वात् साधनानि प्रत्याकाङ्क्षाभावः। एकैकं तत्र कर्मोद्धरणमाकाङ्क्षति । तस्मात् सर्वार्थमपि सदग्निहोत्रार्थं

भवति । एवञ्चेद् अनुगमनप्रायश्चित्तं प्राप्नोतीति । यथा पर्युक्षणं परिसमूहनं तृणापचय इत्येवमादयः पदार्था धार्य्येऽग्नावहन्यहनि क्रियन्ते, एवं प्रायश्चित्तमपि क्रियेत ॥ एवं प्राप्ते ब्रूमः । धारणे च गतश्रियोऽनुगमने इदं प्रायश्चित्तं न कर्त्तव्यम् । कुतः । परार्थत्वात् । न हि तदाऽग्निहोत्रार्थमुद्धरणं यस्मिन् काले भवत्यसौ गतश्रीः । तत्रान्यार्थमुद्धृतोऽग्निः सर्वार्थं धार्य्यते । उद्धरणं तु तद् एकस्मै एव प्रयोजनाय । धारणं तु सर्वकर्म्मार्थम् । न च धारणेऽग्निहोत्रार्थेऽनुगमने प्रायश्चित्तं विहितम् । किं तर्हि । उद्धरणे । परकीयं चात्रोद्धरणं, परार्थमुद्धरणम् । यदर्थमुद्धरणं तदर्थमुद्धृतेऽपि तत् प्रायश्चित्तम् । तस्मान्न तत्रेदं प्रायश्चित्तमिति ॥ २९ ॥ सि० ॥

क्रियार्थत्वादितरेषु कर्म स्यात् ॥ ३० ॥

अथ यदुक्तं, परिसमूहनं पर्य्युक्षणमित्येवमादयः पदार्था धार्य्येऽपि क्रियन्ते । एवं प्रायश्चित्तमपीति । अत्रोच्यते । युक्तं तत् । परिसमूहनादीनि क्रियन्ते । चोदितानि हि तानि । संस्कारार्थत्वेन शक्यानि च, अकृतप्रयोजनानि च । उद्धरणं तु कृतप्रयोजनत्वान्निवृत्तम् । नियतदेशकालत्वाच्चाशक्यम् । तस्मादिदमतुल्यं प्रायश्चित्तेन ॥ ३० ॥ आ० नि० ॥ धार्योद्धाने प्रायश्चित्तरूपज्योतिष्मत्यननुष्ठानाऽधिकरणम् ॥ ८ ॥

न तूत्पन्ने यस्य चोदनाऽप्राप्तकालत्वात् ॥ ३१ ॥

अस्त्यग्निहोत्रे उद्धरणमन्त्रः, वाचा त्वा होत्रा प्राणेन उद्गात्रा इत्येवमादिः । तत्रायमर्थः सांशयिकः । यद्दर्शपूर्णमासार्थेनोद्धरणं क्रियते, किं तत्रैष मन्त्रः कर्त्तव्यो, न ? इति ॥ किं प्राप्तम् । दर्शपूर्णमासार्थमप्युद्धृतेऽग्नौ अग्निहोत्रं हूयत एव । तत्र चेन्मन्त्रो न क्रियते, अमन्त्रोद्धृतेऽग्निहोत्रं प्रवर्त्तते । तस्मान्मन्त्रेण तदुद्धरणं कर्त्तव्यम् । अथोच्येत, कालाभावे विगुणत्वादुद्धरणं नाग्निहोत्रस्येति । तन्न । कालमात्रं हि अपगतम् । उद्धरणं तु विगुणमप्यग्निहोत्रस्य भविष्यतीति । एवञ्चेत् समन्त्रकं कर्त्तव्यमिति ॥ एवं प्राप्ते ब्रूमः । परार्थमुत्पन्नेऽग्नौ यस्याग्निहोत्रं प्रवर्त्तते । चोदनेति कर्म ब्रूमः । न तत्र मन्त्रः कर्त्तव्य इति । न तदग्निहोत्रस्योद्धरणम् । अतः परकीये उद्धरणे न कर्त्तव्यमिति । उच्यते । ननूक्तं, विगुणमुद्धरणमग्निहोत्र-

स्यैव भविष्यति, न गुणाभावे प्रधानाभावोऽपीति । अत्रोच्यते । न गुणः कालः । निमित्तमसौ भवतीत्येतदुक्तम् । अतो निमित्ताभावे क्रियमाणमश्रुतं कृतं भवति । तस्मान्न तदुद्धरणमग्निहोत्रस्येति । न चेदुद्धरणमग्निहोत्रस्य, तस्मादत्र मन्त्रो न कर्त्तव्यः । कृतोऽपि ह्यऽसावनर्थक इति ॥३१॥ दर्शार्थस्योद्धरणस्यामन्त्रकत्वाधिकरणम्॥९॥

प्रदानदर्शनं श्रपणे तद्धर्मभोजनार्थत्वात् संसर्गाच्च मधूदकवत् ॥ ३२ ॥

ज्योतिष्टोमे समाम्नायते, आदित्यः प्रायणीयः पयसि चरुरिति तत्र सन्देहः । किं प्रदानार्थाः पयोधर्माः पयसि कर्त्तव्याः, उत नेति । यदि प्रदानार्थमेतत् पयः, ततः कर्त्तव्याः । अथ श्रपणार्थं, न कर्त्तव्याः । कथं संशयः । सप्तमीनिर्देशाच्छ्रपणार्थं पय इति गम्यते । देवतासम्बद्धस्य तु चरोरधिकरणे पयसि, श्रूयमाणे वाक्यभेदाशङ्का । अतः संशयः ॥ किं तावत् प्राप्तम् । प्रदानार्थमिति । कथम् । आदित्यश्चरुर्भवति । स च पयसीत्येवमनेकार्थावधाने वाक्यं भिद्यते । द्वावपि चेहार्थौ, अतो वाक्यादवगम्येते । यद्यन्यतरद्देवतयोर्विधीयते तदाऽन्यतरदविधीयमानं गम्यते । अतो न वाक्यभेदः । यथा च न वाक्यभेदस्तथा आश्रयितव्यम् । तत्राधिकरणसम्बन्धे विधीयमाने देवतासम्बन्धावगतिर्नावकल्पते, प्रमाणान्तरेणाप्राप्तत्वात् । देवतासम्बन्धे तु विधीयमाने हि ये निर्दिश्येते चरुपयसी, तयोर्निर्देशसामर्थ्याद्वाक्येन संसृष्टं गम्यते । तच्च देवतया सम्बद्ध्यते । तत्रार्थात् पयआधारश्चरुर्भवति ॥ आह । वाक्येन द्वे चरुपयसी गम्येते । न तयोः संसर्गः । उच्यते । यदा द्वे गम्येते, तदा प्रयोगवचनेन यौगपद्यमेतयोर्गम्यते । तत्रार्थात् संसर्गः । एकत्वाच्च वाक्यस्य समुच्चयः । तेनात्र निर्देश एव विवक्षितो, नाधिकरणसम्बन्धो गम्यमानोऽपि विधीयते । एवं तु निर्देशः क्रियते । संसृष्टे चरुपयसी कथं गम्येयातामिति । तत्र चरुसंसृष्टं पयश्चरौ त्यज्यमाने नियतं त्यज्यते । तदस्य प्रदानदर्शनं भवति । पयसा श्रयमाणस्य तस्य प्रदानं कथं स्यादिति सप्तमी निर्दिश्यते । तस्माद् भोजनार्थं यागार्थमेतत् पयः । भोजनमिति सारूप्याद् यागमाह । तस्माच्च पयः प्रदानार्थं पयोधर्मैः सम्बद्ध्यते ॥ आह । न त्यागमात्रं यागः । देवतामुद्दिश्य यस्त्यागः

स यागो भवति । उच्यते । अयमन्यदिर्ति देवताम् उद्दिश्य त्यागः क्रियते इति ॥ आह । न पयसोऽदितिर्देवता । न ह्युद्देशमात्रेण देवता भवति । या यस्य श्रूयते सा तस्य देवतेति । चरोश्चैषा श्रूयते, न पयसः । उच्यते । उभयस्य निर्देशात् । उभयेन देवता सम्बद्ध्यते । संसृष्टेन मधूदकवत् । यथा दधि मधु घृतं धाना उदकं, तत् संसृष्टं प्राजापत्यमिति भवति । एवमेवेदं द्रष्टव्यम् । यद्यपि सप्तमीनिर्दिष्टं, सप्तम्यर्थस्याविधित्सितत्वान्निर्देशमात्रस्य विवक्षितत्वात् । यथौदने दधि दत्वा अभ्यवहर्त्तव्यमिति ओदनस्य निर्देशमात्रं विवक्ष्यते, नाऽधिकरणत्वम् । एवमिहापि द्रष्टव्यम् । तस्मात् प्रदानार्थं पयः । प्रदानार्थाश्च पयोधर्माः कर्त्तव्या इति ॥ ३२ ॥ पूर्व० ॥

संस्कारप्रतिषेधश्च तद्वत् ॥ ३३ ॥

एवञ्च कृत्वा प्रदेयसंस्काराणां केषाञ्चित् प्रतिषेध उपपन्नो भवति । अयजुषा वत्सानपाकरोति, अपवित्रवति गां दोहयतीति प्राप्ते हि प्रतिषेधो न्याय्य इति ॥ ३३ ॥

तत्प्रतिषेधे च तथाभूतस्य वर्जनात् ॥ ३४ ॥

तत्प्रतिषेधे पयःप्रतिषेधे तथाभूतमपि लोके वर्ज्यते । पयसा सिक्तं, पयः श्रृतञ्च । नचैष श्रयणार्थस्य द्रव्यस्य धर्मः । यथा श्रयणार्थं पानीयम् । तत्प्रतिषेधे तैले पीते पानीयं न पातव्यमिति विलेप्यं यवागूश्च पीयते । न च तथाभूतस्य वर्जनात् पयो लोके एवं भवति । भोजनार्थं हि तत् । यथा हि लोके पयः, तद्वदिहापि भवितुमर्हतीति सामान्यतो दृष्टं व्यपदिष्टम् ॥ ३४ ॥ युक्तिः ॥

अधर्मत्वमप्रदानात् प्रणीतार्थे विधानादतुल्यत्वादसंसर्गः ॥ ३५ ॥

अधर्मत्वं तु पयसः । नास्य प्रदेयपयोधर्मा भवेयुरित्यर्थः । कुतः अप्रदानात् । न हीदं प्रदीयते । ननु चरौ प्रदीयमाने प्रदायिष्यत इत्येवमर्थं पयसि श्रयणमुच्यते । नेत्याह । श्रृतश्चरुः कथं स्यादित्येवमर्थं हि तज्ज्ञायते । श्रृतैस्तण्डुलैः प्रयोजनमस्ति । न ह्यन्यथा चरुर्भवतीति । न तु प्रत्तेन पयसा नैतद्दातव्यं श्रूयते । कथम् । प्रणीतार्थे विधानात् । ननु वाक्यभेद एवं भवतीति परिहापित एष पक्षः । संसृष्टमत्र हविर्भवतीत्युक्तम् । उच्यते । अतुल्यत्वादसंसर्गः । अतुल्ये

चरुपयसी । प्रत्यक्षतोऽधिकरणत्वेन पयः श्रूयते । प्रदेयत्वेन चरुः । पयसो यद्वाक्येन प्रदेयत्वं गम्यते, तदधिकरणश्रुत्या बाध्यते । यत्तु वाक्यभेदप्रसङ्ग इति । तन्न । न हि पयसि चरुरिति सम्बन्धो भविष्यति । कथन्तर्हि । पयसि आदित्य इति । उभावादित्यशब्देन सम्भन्त्स्येते । आदित्यः पयसि, आदित्यश्चरुरिति उभौ चरुपयःशब्दौ आदित्यप्रधानावित्येकं वाक्यं भविष्यति, न वाक्यभेदप्रसङ्गः । पय-आधार आदित्यो भविष्यति । तस्मान्न पयसि प्रदेयधर्मा भवितुमर्हन्ति ॥ ३५ ॥ सि० ॥

परो नित्यानुवादः स्यात् ॥ ३६ ॥

अथ यल्लिङ्गमुक्तम्, अयजुषा वत्सानपाकरोति, अपवित्रवति गां दोहयतीति । नैतत् । एवं सति अस्यार्थस्य साधकं भवति । किन्तर्हि । एतन्नित्यानुवादकम् । नित्यमेतमर्थं सन्तमनुवदति । नैवाप्रदेयत्वाद् यजुषा वत्सा अपाक्रियन्ते । न पवित्रवति गौर्दुह्यते । ननु नित्यानुवादोऽनर्थकः । उच्यते । न वयं प्रयोजनवत्तामप्रयोजनवत्तां वा विचारयामः । किमेतस्माद्वाक्याद्गम्यते ? इति परीक्षामहे । अस्माच्च वाक्यादिदं गम्यते, न यजुषा वत्सा अपाक्रियन्ते, न पवित्रवति गौर्दुह्यते इति । तच्चास्य अप्रदेयत्वादप्राप्तं यजुः पवित्रं चेति ॥ ३६ ॥

विहितप्रतिषेधो वा ॥ ३७ ॥

अथवा, विहितस्यैव प्रतिषेधो द्रष्टव्यः । विहितं केषाञ्चिद्, यजुषा वत्सानपाकरोति, पवित्रवति गां दोग्धीति । तस्य प्रतिषेधोऽर्थवानेव भवतीति ॥ ३७ ॥ आ० नि० ॥

वर्जने गुणभावित्वात्तदुक्तप्रतिषेधात् स्यात् कारणात् केवलाशनम् ॥ ३८ ॥

अथ यदुक्तं, पयःप्रतिषेधे पयसा सिक्तं पयसा संसृष्टं च वर्ज्यते इति । तत्र ब्रूमः । युक्तं हि लोके यत्संसृष्टस्य वर्जनं, तदेव हि तत्र प्रतिषिद्ध्यते । नित्यं ह्युपसर्जनीभूतं भोजने पयः प्रचरति । यच्च प्रचरति, तत्प्रतिषेधोऽर्थवान् यद् न प्रचरति, तस्य ह्यप्रसङ्गात् प्रतिषेधोऽनर्थकः । ननु केवलमपि लोके पय उपभुज्यते । उच्यते । कारणात् केवलाशनं, व्रतमौषधं वा यस्य स केवलमुपयुङ्क्ते । न त्वेतत् प्रचुरम् । तस्मात् प्रायेण गुणभूतत्वात् पयसः, पयोयुक्तमेव

न भक्षयितव्यमित्येवमर्थः पयःप्रतिषेध उच्यते ॥ ३८ ॥ आ० नि० ॥

व्रतधर्माच्च लेपवत् ॥ ३९ ॥

अथ कस्मान्नायमन्यः परिहार उच्यते । व्रतवदेतद् द्रष्टव्यमिति । यथा ब्रह्मचारिणा मांसं न भक्षयितव्यमित्युक्ते दर्विगतमपि लेपं वर्जयन्ति एवमिहापि पयो न पातव्यमित्युक्ते पयसा सिक्तं पयसा संसृष्टं वर्जयिष्यन्तीति ॥ ३९ ॥ आ० ॥

रसप्रतिषेधो वा पुरुषधर्मत्वात् ॥ ४० ॥

न वा एष परिहारः । परिहारान्तरनिवृत्त्यर्थो वाशब्दः । कुतः । पुरुषधर्मत्वाद् व्रतस्य । अदृष्टार्थं ब्रह्मचारिणो मांसाभक्षणम् । तत्र तावदपि यो भक्षयति, यावति मांसरसमात्रं विदितं भवति, तस्यापि दोषो, न श्लेष्मप्रकोपादि किञ्चिद् दृष्टमपेक्षते । नतु पयःप्रतिषेधे तथा । तस्मात् पूर्व एव परिहार इति ॥ ४० ॥ आ० नि० ॥ प्रायणीयचरौ प्रदानधर्माणामननुष्ठानाधिकरणम् ॥ १० ॥

अभ्युदये दोहापनयः स्वधर्मा स्यात् प्रवृत्तत्वात् ॥४१॥

इदं समाम्नायते, वि वा एन प्रजया पशुभिर्र्द्धयति वर्द्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेद्ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति । शृते चरुं दधंश्चरुमित्येतदुदाहरणम् । तत्रैषोऽर्थः सांशयिकः । किं शृते दधनि च इज्यार्थाः पयोधर्माः कर्त्तव्याः? उत नेति । किं प्राप्तम् । न कर्त्तव्या इति । कुतः । अप्रदानार्थत्वात् । प्रणीतार्थं विधानादतुल्यत्वाच्च चरुणा न संसर्ग इति ॥ एवं प्राप्ते ब्रूमः । अभ्युदये निमित्ते योऽयं दोहो देवताया अपनीतः. स स्वधर्मा स्यात् । इज्यार्थाश्च तत्र पयोदधिधर्माः कर्त्तव्याः । कुतः । इज्यार्थमेव हि तत् पयो दधि च प्रवृत्तम् । यतश्चेज्यार्थम्, अतोऽस्येज्यार्थाः प्रवृत्ता एव धर्माः । तद्धर्माणां प्रवृत्तावस्ति कारणं, निवृत्तौ नास्ति ॥ ननु प्रणीतार्थं दधिपयसी विधीयेते । नेत्याह । वाक्यं हि तदा भिद्येत । चरौ देवतार्थे, चर्वर्थयोश्च दधिपयसोः । आह । ननु चरोरपि देवतासम्बन्धो दधिपयसोरपि तथा, न भविष्यति वाक्यभेद इति । नैवं शक्यम् । विभागः कर्त्तव्य इति । पूर्ववाक्यं वृत्तम् । त्रेधा तण्डुलान्

विभजेदिति । तदनन्तरं विभागविशेषपरमिदं भवति वाक्यम् । ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं, येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति । अत्राविशेषाद्दधिपयसोरपि विभागो वक्तव्यः। यदि च दधिपयसी विभक्तव्ये सति प्रणीतार्थे अभ्युच्चयेयातां, ततो भिद्येत वाक्यम् । अतो नैतयोः प्रणीतार्थे विधानम् । अविधीयमाने च सप्तम्यर्थे प्रातिपदिकार्थौ देवतया सम्भन्त्स्येते । वाक्यसामर्थ्यात् उभे च दधिपयसी देवतया सम्भन्त्स्येते चरुणा सह । दधनि चरुरेको भाग इन्द्राय प्रदात्रे भवतीति । यथा विभज्यमानेषु नानाद्रव्येषु उच्येत । रुक्मपात्र्यां समाहार्य्या मणयः । एको भागो देवदत्तस्य । रजतपात्र्यां सुवर्णं निहितम् । अपरो भागो विष्णुमित्रस्येति सह पात्रीभ्यां द्वौ भागौ गम्येते । विभागविशेषपरत्वाद्वाक्यस्य । पात्र्योश्च विभक्तत्वादनुवादश्च सप्तम्यर्थो गम्यते । एवमिहापि विभागपरत्वादेव वाक्यस्यास्य, विभक्तत्वाच्च दधिपयसोरेको भाग इति गम्यते । अर्थप्राप्तत्वाच्च सप्तम्यर्थोऽनुवादो भविष्यति । तस्मात् प्रदानार्थे दधिपयसी । प्रदानार्थाश्च दधिपयसोर्धर्माः कर्त्तव्याः ॥ ४१ ॥

शृतोपदेशाच्च ॥ ४२ ॥

इतश्च प्रदानार्थे दध्नि पयसि च इज्यार्था धर्माः कर्त्तव्या इति । कुतः । सिद्धवच्छृतोपदेशो भवति । शृते चरुं दधंश्चरुमिति । स सत्सु धर्मेषूपपद्यते । इतरथा श्रयणं न क्रियेतेति । तत्र सिद्धवच्छृतोपदेशो नावकल्पेत । तस्मादपि पश्याम इज्यार्था दधिपयसोर्धर्माः कर्त्तव्या इति ॥ ४२ ॥ युक्तिः ॥ अभ्युदयेष्टौ दधिशृतयोः प्रदेयधर्माऽनुष्ठानाधिकरणम् ॥ ११ ॥

अपनयो वार्थान्तरे विधानाच्चरुपयोवत् ॥ ४३ ॥

अस्ति पशुकामेष्टिः,यः पशुकामः स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्य्यात् । ये क्षोदिष्ठास्तानग्नये सनिमतेऽष्टाकपालं निर्वपेद्, ये मध्यमास्तान् विष्णवे शिपिविष्टाय शृते चरुं, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुमिति । शृते चरुं, दधंश्चरुमित्येतदुदाहरणम् । अत्र सन्देहः। किं शृते दधनि चेज्यार्था दधिपयोधर्माः कर्त्तव्याः ? उत नेति । किं प्राप्तम् । पूर्वेणाधिकरणेन कर्त्तव्या इति । समाना हि श्रुतिर्भवतीति । सिद्धवच्च शृतोपदेशः सत्सु प्रदानार्थेषु धर्मेषूप-

पद्यते॥ एवं प्राप्ते ब्रूमः । अपनयो वा धर्माणां भवेत् । अर्थान्तरे ह्येतत्पयो विधीयते । दधि च श्रयणार्थे, न प्रदानार्थे । सप्तमीसंयोगाच्चरुपयोवत् । यथा प्रायणीये चरौ पयसि प्रदेयधर्मा न क्रियन्ते सप्तमीसंयोगात् । एवमिहापि ॥ ४३ ॥ सि० ॥

लक्षणार्था शृतश्रुतिः ॥ ४४ ॥

अथ यदुक्तं सिद्धवच्छृतोपदेशो भवतीति । नैष दोषः । श्रयणेन द्रव्यं लक्षयिष्यति । अर्थप्राप्तं हि चरौ श्रयणं, तत्सम्बद्धं लक्ष्यते । श्रयणवति द्रव्ये चरुरिति । तस्मात् प्रदेयधर्म्मा न भवेयुरिति ॥४४॥ आ०नि०॥पशुकामेष्टौ दधिशृतयोः प्रदेयधर्मानुनुष्ठानाधिकरणम्॥१२॥

श्रयणानां त्वपूर्वत्वात् प्रदानार्थे विधानं स्यात् ॥ ४५ ॥

ज्योतिष्टोमे श्रूयते, पयसा मैत्रावरुणं श्रीणाति सक्तुभिर्मन्थिनं धानाभिर्हारियोजनं हिरण्येन शुक्रमाज्येन पात्नीवतम् । तत्र संशयः । किं श्रयणानां प्रदेयधर्मा भवन्ति ? उत नेति । कुतः संशयः । यदि प्रदेयानि श्रयणानि, तत एषु प्रदेयधर्मा भवन्ति, अथ न प्रदेयानि, न भवन्तीति । किं प्राप्तम् । प्रदेयानि प्रदेयधर्मैः सम्बद्धेरन्निति । श्रयणाद्धि द्रव्यं जायते । पयोमिश्रश्च सोमो भवति । संमिश्रे च हूयमाने पयोऽपि होमेन सम्बद्ध्यते । यदि पयोमिश्रश्च सोमो भवति, तत्र सोमस्य पयसा मिश्रमानस्य न कञ्चिदुपकारं पश्यामः । यागे तु उपकारो भवति निर्वृत्तिर्नाम। यदि होमेन सम्भन्त्स्यत इति मिश्रणाभिप्रायः । तत उपकारकं मिश्रणं दृष्टेनोपकारेण । श्रुतो हि गुणवान् यागः प्रत्यक्षः पयसा निर्वर्त्स्यत इति । सोमोपकारः कल्प्यः स्यात् । तस्मात् पयसा सोमो मिश्र्यते । स मिश्रितः प्रयोगवचनेन कथं सम्बद्ध्यत इति । न च प्राकृतं मिश्रणं केनचिद्द्रव्येण प्राप्तम् । यत्रेदं द्रव्यान्तरं पयो विधीयते इति । अपूर्वत्वात् सोमस्य । तस्मात् प्रदानार्थस्य पयसो विधानं स्यात् । प्रदेयपयोधर्माश्चात्र कर्त्तव्या इति ॥ ४५ ॥ पूर्व० ॥

गुणो वा श्रयणार्थत्वात् ॥ ४६ ॥

वा-शब्दः पक्षं व्यावर्त्तयति । गुणभूतं पयः स्यात् सोमस्य, न प्रदेयद्रव्यम् । प्रदेयत्वेनाश्रवणात् । सोमार्थेन च श्रुतत्वात् ॥४६॥ सि०

अनिर्देशाच्च ॥ ४७ ॥

न होमे प्रयोगवचनेन वा अस्य सम्बन्धः । अनिर्देशः परार्थत्वात् । न च प्रत्यक्षेणापि पयस्त्यागे यागनिर्वृत्तिः पयसा । प्रत्यक्षदेवतासम्बद्धो हि त्यागो यागः । न चात्र पयसो देवतासम्बन्धः । मैत्रावरुणं ग्रहं गृह्णातीति वचनं, न मैत्रावरुणं पय इति । तस्माद् दृष्टोपकाराभावाद् अदृष्टः सोममिश्रणे सोमसंस्कारोऽभ्युपगम्यते । तस्मान्न प्रदेयधर्म्मैः सम्बद्ध्यत इति ॥ ४७ ॥

श्रुतेश्च तत्प्रधानत्वात् ॥ ४८ ॥

इतश्च सोमार्थं पयः । कुतः । श्रुतिर्हि सोमप्रधाना भवति । द्वितीयाविभक्तिः श्रूयते । तस्माच्छ्रयणेन सोम एवेप्स्यत इति ॥४८॥

अर्थवादश्च तदर्थवत् ॥ ४९ ॥

अर्थवादश्च श्रयणस्य सोमार्थस्य भवति । स मित्रोऽब्रवीत् पयसैव मे सोमं श्रीणन्निति । न हि भवति पयो मे दध्युरिति । कथं तर्हि । सोमं पयसा संस्कुर्य्युरिति । तस्मादपि सोमार्थं श्रयणम्॥४९॥

संस्कारं प्रति भावाच्च तस्मादप्यप्रधानं स्यात् ॥ ५० ॥

संस्कारं प्रति श्रयणवचनं भवति । यत्र संस्काराः श्रूयन्ते तत्रेदं श्रूयते । पयसा मैत्रावरुणं श्रीणातीत्येवमादि । तस्मात् संस्कारप्राये श्रवणादयमपि संस्कार एवेति गम्यते । भवति हि प्रायोवृत्त्या तद्बुद्धिः । यथाऽन्यप्राये लिखितोऽन्य इति गम्यते । तस्मात प्रदेयधर्म्मैर्न सम्बद्ध्यत इति ॥ ५० ॥ युक्तिः ॥ ज्योतिष्टोमे श्रयणानां प्रदेयधर्मानन्नुष्ठानाधिकरणम् ॥ १३ ॥

पर्य्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत् ॥ ५१ ॥

अश्वमेधे समामनन्ति, ईशानाय परस्वत आलभेतेति । तत्प्रकृत्य श्रूयते, पर्य्यग्निकृतान् आरण्यानुत्सृजन्तीति । संशयः । किमारण्यानामालम्भ उत्सर्गार्थ एव, द्रव्योत्सर्गश्च, अथ किं कर्मशेषप्रतिषेधः । पर्य्यग्निकरणान्तैः संस्कृता उत्स्रष्टव्याः ? इति । किं प्राप्तम् । द्रव्योत्सर्गोऽयम्, आलम्भश्च उत्सर्गार्थ एवेति । कुतः । एवमुत्सर्गमप्राप्तं विदधत् तस्य सत्तां ब्रुवन् श्रुत्या वक्ष्यति । इतरथा उत्सर्गं प्राप्तमनुवदेत् । वाक्यार्थस्य प्रतिषेधस्य सत्तां ब्रूयात् प्रत्ययः । श्रुतिश्च वाक्याद् बलीयसी । एवञ्च सति देवतासम्बन्धो ग्रहणे । ईशान-

मुद्दिश्य परस्वन्त आलब्धव्याः । पर्य्यग्निकरणं कृत्वा त्यक्तव्या इति । उपधानवत् । यथा, एतत् खलु साक्षादन्नं य एष चरुर्य एनं चरुमुपदधातीत्युपधानार्थमेव चरोरुपादानम् । एवमिहाप्युत्सर्गार्थं एवालम्भो भविष्यति ॥ ५१ ॥ पूर्व० ॥

शेषप्रतिषेधो वाऽर्थाभावादिडान्तवत् ॥ ५२ ॥

कर्मशेषप्रतिषेधो वाऽस्मिन् वाक्य उच्यते । कुतः ? । अर्थाभावात् । ईशानाय परस्वत आलभेतेत्यस्य वाक्यस्य न कश्चिदर्थो भवेद् यद्युत्सर्गार्थं आलम्भः स्यात् । कथम् । आलम्भकाल एवाध्वर्युर्जानीयाद्, नेमे ईशानाय दास्यन्त इति । तस्यैवं जानतो नैवं सङ्कल्पो भवति, ईशानाय दातुं ग्रहीतव्या इति । अशक्यार्थत्वादनर्थकमिदं वाक्यं भवति । स एष सङ्कल्प एवमवकल्पते, यदीशानाय दातव्याः। तस्मादालम्भवचनेन शब्देन दानमेव विधीयते इति गम्यते । यदा च दानं विधीयते, तदा पर्य्यग्निकृतानुत्सृजन्तीत्युत्सर्गमनूद्य, एवमुत्सृजन्तीति विशेषविधानार्थं भवति शास्त्रम् । कथं पुनरत्र विशेषो विधीयते, किं कालः पर्य्यग्निकरणे । एतस्मिन् काल उत्सृजन्तीति । नेत्याह । नात्र कालवचनः शब्दः श्रूयते । काले च विधीयमाने कालान्तरं प्रतिषिद्ध्यते न अङ्गान्तराणि । अथ किं पर्य्यग्निकरणवदुत्स्रष्टव्यमिति ? । तदपि नास्ति । न ह्यत्र पर्य्यग्निकरणभावना कीर्त्यते । तस्याञ्च सत्यां पर्य्यग्निकरणात् प्राञ्चः पराञ्चश्चार्थाः सर्वे प्रतिषिद्ध्येरन् । कथं तर्हि । निर्वृत्ते पर्य्यग्निकरणे उत्स्रष्टव्य इति । किमेतस्यामवस्थायामिति । नेत्याह । चोदकादेवैतत् प्राप्तम् । एतदवस्थः पशुरुत्सर्जनीय इति । अवस्थान्तरप्रतिषेधस्य च नायं शब्दो वाचकः । चोदकप्राप्ते हि काले उत्सृज्यमाने कृतपर्य्यग्निकरण एवासौ भवति । यदि तु अवस्थायाः प्रतिषेधः स्यात्, पर्य्यग्निकरणादूर्ध्वमुत्सर्गात् प्राक् पदार्थाः प्रतिषिद्ध्येरन्, न पराञ्चः । कस्तर्ह्यर्थः । पर्य्यग्निकरणे कृते यादृशो भवति तादृशस्त्याज्य इति । ननु चोदकेनैव तदङ्गोऽसौ प्राप्तः । उच्यते । पुनरस्यैतदङ्गवत्ता श्रूयते, अङ्गान्तरपरिसङ्ख्यार्थम् । एतैरेव अङ्गैरङ्गवानुत्स्रष्टव्यः । एवं चोदकप्राप्तानि परिसङ्ख्यायन्ते, नान्यानि अङ्गानि भवन्तीति । कथमेष शब्द एवं परिसङ्ख्यातुं शक्नोतीतिचेत् । शक्नोतीति ब्रूमः । कथम् ? । प्रत्यक्षेण

वाक्येन तैरङ्गैर्निराकाङ्क्षीकृते प्रधाने शेषैरङ्गैः सह चोदकेन परीक्षा सती एकवाक्यता न भविष्यतीति । तस्मात् कर्मशेषप्रतिषेध इति ॥ ५२ ॥ सि० ॥

पूर्ववत्त्वाच्च शब्दस्य संस्थापयतीति चाप्रवृत्ते नोपपद्यते ॥ ५३ ॥

पूर्ववांश्च भवति शब्दो यागप्रवृत्तिपूर्वकः । आज्येन शेषं संस्थापयतीति । यदि याग एव प्रारब्धस्ततः संस्थापयतीति समाप्तिसादृश्यादुपपद्यते । यागस्य हीदं यागान्तरं समाप्त्या सदृशम् । यदि हि पूर्वो न यागः प्रवृत्तः स्यादुत्सर्गमात्रं,न तस्य यागः समाप्त्या सदृशः। तत्र संस्थापयतीति नोपपद्यते । तस्मादपि शेषकर्मप्रतिषेधः ॥ ५३ ॥

प्रवृत्तेर्यज्ञहेतुत्वात् प्रतिषेधे संस्काराणामकर्म स्यात्तत्कारितत्वाद्यथा प्रयाजप्रतिषेधे ग्रहणमाज्यस्य ॥ ५४ ॥

इदं प्रयोजनसूत्रम् । यदि द्रव्योत्सर्गो विधीयते ततः संस्काराणामकर्म स्यात् । कुतः । संस्कारप्रवृत्तेर्यज्ञहेतुत्वात् । तत्प्रतिषेधे यज्ञाभावे किमिति संस्काराः क्रियेरन् । यज्ञकारिता हि ते । यथा प्रयाजाभावे तदर्थमाज्यं न गृह्यते, ग्रहणमाज्यस्य न क्रियते । अप्रयाजास्ता अननुयाजा इति यत्र श्रूयते तत्र प्रयाजाभावे तदर्थमाज्यं न गृह्यते । एवमिहापि संस्कारा न कर्त्तव्या इति ॥ ५४ ॥ युक्तिः ॥

क्रिया वा स्यादवच्छेदादकर्म सर्वहानं स्यात् ॥५५॥

यदा तु कर्म्मशेषप्रतिषेधपक्षस्तदापि किं न कर्त्तव्याः संस्काराः ? इति । नैतदेवम् । क्रिया स्यादवच्छेदपक्षे । यागो हि तदा भवति । तस्मात् सर्वे यागपदार्थाः कर्त्तव्याः । यदि न यागो भवेत् ततोऽकर्म । संस्काराणां सर्वहानं स्यात् । यागस्तु तदा भवति । तस्मात् कर्मशेषप्रतिषेधपक्षे सर्वं कर्त्तव्यमिति ॥ ५५ ॥ आ० नि० ॥ अश्वमेधे, ईशानाय परस्वत इत्यनेन यागान्तरविधानाधिकरणम् ॥ १४ ॥

आज्यसंस्थाप्रतिनिधिः स्याद् द्रव्योत्सर्गात् ॥ ५६ ॥

पर्य्यग्निकृतं पात्नीवतमुत्सृजतीति प्रकृत्य श्रूयते । आज्येन शेषं संस्थापयतीति । तत्र सन्देहः । किमाज्यं पूर्वस्मिन् प्रतिनिधीभूत-

म ? अथ वा आज्यद्रव्यकं पूर्वस्मात् कर्म्मान्तरं विधीयते ? इति । किं प्राप्तम् । प्रतिनिधिरिति । कुतः । पात्नीवतमितिद्रव्यमुच्यते । उत्सृजतीति तत्रैवोत्सर्गः श्रूयते । शेषमित्युपयुक्तेतरद् विद्यमानं गम्यते । तद् आज्येन संस्थापयतीति पशोः कार्य्ये आज्यं श्रुतं भवतीति । ननु पूर्वकर्म्म परिसमाप्तमित्युक्तम् । अत्रोच्यते । द्रव्योत्सर्गवचने प्रत्यक्षे, शेषशब्दे वाऽपरिहृते पुनरसमाप्तं पूर्वकर्मेत्याशङ्क्यते । तस्मात् प्रतिनिधीयते आज्यमित्याशङ्कामहे । संस्थापयतीति चापूर्वे नोपपद्यते ॥ ५६ ॥ पूर्व० ॥

इतश्चाशङ्कामहे—

समाप्तिवचनात् ॥ ५७ ॥

समाप्तिवचनमिदं भवति, संस्थापयतीति । तेन मन्यामहे । यत् पूर्वं पशुना आरब्धं तदुत्सृष्टे पशावाज्येन परिसमाप्यते इति । अपूर्वस्यात्र कर्मण उच्यमानस्यारम्भ एव वक्तव्यो भवति । यतस्त्वनभिधायारम्भं परिसमाप्तिरेवोच्यते । ततोऽवगच्छामः, पूर्वस्यैव परिसमाप्तिर्नापूर्वकर्म्म चोद्यत इति ॥ ५७ ॥ युक्तिः ॥

चोदना वा कर्मोत्सर्गादन्यैः स्यादविशिष्टत्वात्॥ ५८॥

कर्मान्तरचोदना वा । कुतः । पूर्वस्य कर्म्मणः परिसमाप्तत्वात् । ननूक्तं द्रव्योत्सर्गे शेषवचने वाऽपरिहृते पूर्वकर्मणोऽसमाप्तिराशङ्किता भवति । अत्रोच्यते । इदं द्वयमपि परिह्रियते । संस्थापयतीति प्रकृतेन पात्नीवतशब्देन सम्बद्ध्यते । तत्रायमर्थः । पात्नीवतं संस्थापयतीति । स एष यागो विधीयते । संपूर्वश्च स्थापयतिः प्रयुज्यते । अवश्यं कश्चिद् धातुः पूर्वो भावनावचनस्य प्रयोक्तव्य इति तत्राविरुद्धो भावनायामुच्यमानायामर्थप्राप्तः संस्थापयतिरालभतिरिव प्रयुज्यते । शेषशब्दश्चैवं सादृश्यात् प्रयुज्यते । द्रव्योत्सर्गश्चाऽविरुद्ध एव यागे उच्यमाने । तस्माद् यथाऽन्ये निर्वपत्यादयः कर्मान्तरविधाने भवन्ति, एवं तैरविशिष्टत्वात् संस्थापयतिरपि भवितुमर्हतीति ॥ ५८ ॥ सि० ॥

अनिज्याञ्च वनस्पतेः प्रसिद्धां तेन दर्शयति ॥ ५९॥

प्रसिद्धां वनस्पतेरनिज्याम्। अत एव पठति । कथम् । यत् त्वष्टारञ्च वनस्पतिमावाहयस्यथ वैनौ यक्ष्यसि त्वाष्ट्रो नवमो प्रयाजेज्या

वानस्पत्या दशम्यत्रैवैताविष्टौ विद्यादित्यङ्गान्तरेणाऽनुग्रहं ब्रुवन् वनस्पतीज्याया अभावं दर्शयति । शेषपरिसमाप्तौ सत्यां वनस्पतिं जुहोतीति । अथ परिसमाप्तं पूर्वं कर्म, ततो लुप्ता स्यात् । तत्राऽभावदर्शनमुपपद्यते । तस्मात् पूर्वकर्म परिसमाप्तम् । इदमपि कर्मान्तरमिति ॥ ५९ ॥ युक्तिः ॥

संस्था तद्देवतत्वात् स्यात् ॥ ६० ॥

अथ यदुक्तं, संस्थापयतीति च अपूर्वे नोपपद्यते इति । तत् परिहर्त्तव्यम् । अत्रोच्यते । असंस्थायां संस्थावचनमेतत् । तदपि पूर्वं पात्नीवतमिति समानदेवत्वात् समाप्तिसादृश्यं ज्ञायते । तत्र तत्पात्नीवतमारब्धमिह परिसमाप्तमिति । स एष सादृश्यात् संस्थापयतीति शब्दोऽवकल्पत इति ॥ ६० ॥ आ० नि० ॥ आज्येन शेषं संस्थापयतीत्यनेन कर्मान्तरविधानाधिकरणम् ॥ १५ ॥

इति श्रीभट्टशबरस्वामिनः कृतौ मीमांसाभाष्ये नवमस्य
अध्यायस्य चतुर्थः पादः ॥ ९ ॥ ४ ॥
सम्पूर्णश्चाध्यायः ॥ ९ ॥

श्रीहरिः ।

मीमांसादर्शनम् ।

श्रीशबरस्वामिविरचितभाष्यसहितम् ।

दशमाप्रभृति-द्वादशाध्यायपर्यन्तम् । १०-१२ ।

पं० रत्नगोपालभट्टेन संशोधितम् ।

चौखम्भासंस्कृतपुस्तकालयाऽध्यक्ष-
हरिदासात्मजहरिकृष्णदासगुप्तेन
स्वकीये विद्याविलास यन्त्रे
संमुद्रितम् ।

—:o:—

MÎMÂNSÂDARŜANA,

With the commentary of Sabara swami.

TEN TO TWELVE CHAPTERS.

Edited by

Pandita Ratna Gopâla Bhatta.

PRINTED AT THE VIDYÂ VILÂSA PRESS,
BY HARIKRISHNA DÂSA GUPTA.
BENARES CITY.
1910.

श्रीहरिः ।

मी॰ांसादर्शनाधिकरणसूची ॥ अ० १० । ११ । १२ ॥

अ० १० । पा० ४ ॥

अथ दशमेऽध्याये प्रथमः पादः ॥ १० ॥ १ ॥

विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् ॥ १ ॥

ऊहो वृत्तः । बाधाभ्युच्चयमिदानीं वर्त्तयिष्यामः । बाधो नाम यदेवेदमिति निश्चितं विज्ञानं, कारणान्तरेण मिथ्येति कथ्यते । तथाऽभ्युच्चयो यदिदमिह भवतीति विज्ञायते । अपरमपि भवतीति विज्ञानम् । तत्रायमर्थः प्रथमं परीक्ष्यते । किं सर्वं प्राकृतं विकृतौ कर्त्तव्यम् ? उत किञ्चिद् बाध्यत इति । किं तावत् प्राप्तम् । विधेः प्राकृतस्य प्रकरणान्तरे विकृतौ यतो भवत्यविशेषेणातिदेशः । अतो यच्च यावच्च प्राकृतं धर्मजातं तत्सर्वं विकृतौ कर्त्तव्यं, यदप्यर्थलुप्तम् । कुतः । वचनेन हीदं सर्वं प्राप्यते । न च वचनस्यातिभारोऽस्ति प्रापयतः । कथं वचनमिति गम्यते । सर्वास्वेव वैकृतीषु देशनासु प्राकृतं धर्मजातमपेक्ष्यते वाक्यशेषत्वेन । तद्यथैव प्राकृत्यां देशनायामनुषज्ज्यते, एवं वैकृत्यामपि । न कश्चिद्विशेषोऽस्ति । तत्र यथा कृष्णलानां पाकोऽप्राकृतार्थोऽपि वचनप्रामाण्यात् क्रियते, एवमवहन्त्यादि अप्राकृतार्थमपि सर्वं कर्त्तव्यमिति ॥ १ ॥ पूर्व० ॥

अपि वाभिधानसंस्कारद्रव्यमर्थे क्रियेत तादर्थ्यात् ॥ २ ॥

अपिवेति पक्षव्यावृत्तिः । नैतदस्ति । सर्वं प्राकृतं विकृतौ कर्त्तव्यमिति । क्वचिदभिधानसंस्कारद्रव्यं निवर्त्तितुमर्हति यल्लुप्तार्थम् । कुत एतत् । अभिधानसंस्कारद्रव्यं हि प्रयोजने सति क्रियते, नाऽप्रयोजनम् । अन्यस्मै प्रयोजनाय तदाम्नायते, न स्वार्थम् ॥ ननु चोक्तं लुप्तार्थमपि क्रियते वचनप्रामाण्याद्यथा कृष्णले पाकः । नेत्याह । नास्ति लुप्तार्थस्य देशकं वचनम् । न वैकृतं कर्म प्राकृतैरङ्गपदार्थैः सहैकवाक्यतां याति । नैवं विज्ञायते, यागेन फलं कुर्य्यात् । कथम् । प्राकृतैरङ्गैरिति । कथन्तर्हि । यथा प्राकृतेन यागेन फलं साधितमभूत् तथेति । कुत एतत् । यागगतो हि व्यापारविशेषस्तेनापेक्ष्यते, न व्यापारमात्रम् । यागगतश्च व्यापारः प्राकृते यागे प्रयोगवचनेन

कल्पितः, सङ्गृहीतश्च विद्यते । स शक्योऽपेक्षितुम् । स चाकाङ्क्षितो निराकाङ्क्षश्च शक्नोति कर्त्तुमिति । अङ्गेष्वनपेक्ष्यमाणेषु न यागगतो विकृतौ व्यापारविशेषः कल्प्यः स्यात् । इतरथा लक्षणा स्यात् । यथा, दण्डेन युद्ध्यते इति वचने न दण्डिरूपं शब्देनाभिहितम् । यदि तु तेन लक्षितेन प्रयोजनं स्यात्, शक्यते तेन लक्षयितुम् । एवमिहाप्यङ्गवत्त्वं यागगतो विशेषो नाङ्गेष्वपेक्ष्यमाणेषु शब्दाभिहितो भवति । लक्षणया तु कल्प्यते । लक्षणायाञ्च शब्दो बाध्येत । अथ शब्दो मा बाधीति यागगतो विशेषो नैवापेक्ष्येत, अङ्गान्येवापेक्ष्येरन् । ततः, कथमिति इतिकर्त्तव्यताविशेषं प्रति वैकृतस्य कर्मणश्चोदकशब्दो निवृत्ताकाङ्क्ष एवावतिष्ठेत । अङ्गैरपि चापरेतिकर्त्तव्यताऽऽकाङ्क्ष्येत । गम्यमाना च प्राकृतयागेतिकर्त्तव्यता उत्सृज्येत । प्राकृतानाश्चाङ्गानां प्रकरणेऽर्थवतां दुर्लभो वैकृतेन कर्मणा एकवाक्यभावोऽभ्युपगम्येत । सर्वं चैतदन्याय्यम् । तस्मादेवमभिसम्बन्धः क्रियते । यथा प्राकृतेन यागेन फलं साध्यते, तथैवैतेनापीति ॥ किमतो यद्येवम् । एतदतो भवति । प्राकृतान्यङ्गानि यस्मै प्रयोजनाय प्रकृतौ भवन्ति, नासति तस्मिन् प्रयोजने विकृतौ चोदितानि भवन्ति । तस्माल्लुप्तप्राकृतप्रयोजनं न चोदकश्चोदयतीति ॥ २ ॥ सि० ॥

तेषामप्रत्यक्षविशिष्टत्वात् ॥ ३ ॥

अथ यदुक्तं, यथा कृष्णलेषु लुप्तप्राकृतप्रयोजनोऽपि पाको वचनप्रामाण्यात् क्रियते, एवमन्यदपि क्रियेतेति । तन्न । न हि कृष्णलेषु पाकश्चोदकेन प्राप्नोति । प्रत्यक्षं हि तत्र वचनम् । घृते श्रपयतीति । न तत् प्राकृतप्रयोजनं पाकमाह । तत्र वचनप्रामाण्याददृष्टार्थः पाकः । यदि च तत्र प्रत्यक्षवचनं नाभविष्यत्, तेषामप्रत्यक्षविशिष्टत्वात् पाकोऽपि नाभविष्यदेव । तस्मादनुपवर्णनं पाकवदिति ।

किं भवति प्रयोजनम् ? कतरद्वा वैकृतमुदाह्रियते ? इति । क्वचिच्छ्रूयते, स्वयंदितं बर्हिर्भवतीति । तत्र प्राकृतं द्रव्यं निवर्त्तते । स्वयंकृता वेदिर्भवतीति उद्धनन–खनन–परिलेखनानि निवर्त्तन्ते । स्वयंशीर्णा शाखा भवतीति असिद्रव्यं निवर्त्तते । मन्त्राश्चैतेषु निवर्त्तन्ते ॥ ३ ॥ आ० नि० ॥ विकृतौ लुप्तार्थानां प्राकृतानां बाधाधिकरणम् ॥ १ ॥ प्रथमवर्णकम् ॥ १ ॥

एवं वा—

विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् ॥ १ ॥

इति। अस्ति प्राजापत्यश्चरुः। प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुष्काम इति। तत्रैतद्विशिष्टमुदाहरणमङ्गीकृत्य एतदेव सर्वं चिन्त्यते। किं कृष्णलेष्ववहन्ति कर्त्तव्यः? न? इति। विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यादिति पूर्वः पक्षः, कर्त्तव्यः। यथा तेषामेव पाक इति ॥ १ ॥ पूर्व० ॥

अपिवाऽभिधानसंस्कारद्रव्यम् ॥ २ ॥

इति सिद्धान्तो, न कर्त्तव्य इति ॥ २ ॥ सिद्धान्तः ॥

तेषामप्रत्यक्षविशिष्टत्वात् ॥ ३ ॥

इत्युपवर्णनापरिहारः ॥ ३ ॥ आ० नि० ॥ कृष्णलेऽवहन्तिबाधाऽधिकरणम् ॥ १ ॥ द्वितीयवर्णकम् ॥ २ ॥

एवं वा। वैश्वदेवं चरुं निर्वपेद् भ्रातृव्यवाँस्तं बर्हिःषदं कृत्वा शम्यया स्फयेन व्यूहेदिदमहममुं चामुं च व्यूहामीति यं द्विष्यात् तं ध्यायेत्। यदधोऽवमृद्येत यच्च स्फय आश्लिष्येत् तद्विष्णव उरुक्रमायावद्येदिति। तत्र संशयः। किं विष्णुरुरुक्रम आवाहयितव्यः? उत नेति। किं प्राप्तम्?।

विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् ॥ १ ॥

आवाहयितव्यः। ननु स्फये कदाचिन्न वा आश्लिष्येदपि, न वा अधोऽवमृद्येत। तत्रावाहनं कृतमनर्थकं स्यात्। न च वचनबलादाश्लेषयितव्यमवमर्दयितव्यं वा। न ह्युपादेयत्वेनाश्लिष्टमवमृदितं वा श्रूयते। न च विष्णोरुरुक्रमस्य यागोऽर्थकर्म। किन्तर्हि, आश्लेषणनाऽवमर्दनेन च लक्षितमनेन प्रकारेण आहवनीये प्रतिपाद्यते। तथा हि दृष्टमपनयने तस्य प्रयोजनं भवति स्फयादिसंशोधनम्। इतरथा हि यागाददृष्टं कल्प्येत। ननु यागाददृष्टमवश्यं कल्पनीयम्। द्रव्यप्रतिपादनद्वारं तत् ॥ अत्रोच्यते। लुप्तार्थमपि कर्त्तव्यम्। यथा कृष्णले चरौ पाकः। अपि च कदाचिदाश्लिष्येत, अधश्चावमृद्येत। तत्रान्तरिते आवाहने वैगुण्यमापद्येत। तत्राप्रमाद्यद्भिरावाहयितव्या देवता, यदि स्फय आश्लेक्ष्यते अधश्चावमर्दिष्यते। न आवाहनमङ्गम् अन्तरा ईष्यते। स्वकाले हि आवाहनेन देवता स्मर्यमाणा साध्वी

भवतीति, न स्वकालोत्तरकाले । तत्र हि अर्थप्राप्तममन्त्रकं स्मरणम् । अथ स्फ्यो नोपश्लेक्ष्यते, न वा अधोऽवमर्दिष्यते तदा कृतेऽप्यावाहने न किञ्चिद् दुष्यति । नैवं मन्तव्यम् । यथा राजा अमात्यो वा ब्राह्मणो वा परिचरितुं निमन्त्रित आहूतोऽपरिचर्य्यमाणो विमानितमात्मानं मन्यमानोऽपचरिष्यतीत्याशङ्क्यते । एवं देवताऽपीति, न तत्र देवता आहूयते। आहूता सती हविरुपयोक्ष्यते, तप्स्यति च। तृप्ता प्रसत्स्यति । प्रसन्ना सती फलेन संयोक्ष्यतीति। तदेतन्नवमे सिद्धम् । तस्मान्न दोष आवाहितायामनिज्यमानायाम् ॥ १ ॥ पूर्व० ॥

अपि वाभिधानसंस्कारद्रव्यमर्थे क्रियेत तादर्थ्यात् ॥२॥

अपि वेति पक्षव्यावृत्तिः । एषोऽभिधानसंस्कारो निवर्त्तते। कुतः । अभिधानसंस्कारो द्रव्यं वा सति प्रयोजने क्रियते, नान्यथा । तद् वर्णितम् । यदप्युक्तम् । कदाचित् श्लिष्येत अवमृद्येत वा। तत्रावाहनं नान्तरा ईष्यते इति । नैष दोषः । अन्तरितमेतदनन्तरितेनैव तुल्यम् । यदा आवाहनस्य कालो, न तदा उरुक्रमयागस्य निमित्तमापतितम् । आपतिते हि निमित्ते तस्य प्रयोगो भविष्यति । न ह्यनाश्लिष्टम् अनवमृदितं वा तत्र प्रतिपादयितव्यम् । न चारब्धे प्रयोगे कृतमुपकारकं भवति । तस्माद् विष्णुरुरुक्रमो नावाहयितव्य इति ॥ २ ॥ सि० ॥

तेषामप्रत्यक्षविशिष्टत्वात् ॥ ३ ॥

इत्युपवर्णनापरिहार उक्तः ॥ ३ ॥ आ० नि० ॥ वैश्वदेवे चरौ विष्णोरावाहनबाधाधिकरणम् ॥ १ ॥ तृतीयवर्णकम् ॥ ३ ॥

इष्टिरारम्भसंयोगादङ्गभूतान्निवर्त्तेतारम्भस्य प्रधानसंयोगात् ॥ ४ ॥

अस्ति ज्योतिष्टोमो, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्र दर्शपूर्णमासप्रकृतिकानि कर्म्माणि दीक्षणीयादीनि आग्नावैष्णवमेकादशकपालं निर्वपेदित्येवमादीनि । अस्ति तु प्रकृतौ आरम्भणीयेष्टिः। आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारभमाणः सरस्वत्यै चरुं सरस्वते द्वादशकपालमग्नये भगिने अष्टाकपालं निर्वपेद् यः कामयेत भगयन्नादः स्यामिति। नित्यवदेके भगिनमामनन्ति । तत्र सन्देहः । किं दीक्षणीयादिषु आरम्भणीया कर्त्तव्या ? उत नेति । किं

प्राप्तम् । सर्वं प्राकृतं विकृतौ कर्त्तव्यम् । विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यादिति ॥ एवं प्राप्ते ब्रूमः । इष्टिरारम्भणीया ज्योतिष्टोमाङ्गभूताद् दर्शपूर्णमासप्रकृतिकाद्दीक्षणीयादेः कर्मराशेर्निवर्त्तेत । किं कारणम् । योऽत्रारम्भः स ज्योतिष्टोमस्य, न दीक्षणीयादेः । कुतः । आरम्भो हि प्रथमः पदार्थः स्यात् । प्रथमं वा पुरुषस्य प्रवर्त्तनम् । यदि प्रथमः पदार्थः, स ऋत्विगानमनं देवयजनजोषणं वा । तदिह ज्योतिष्टोमस्याङ्गं क्रतोरर्थेन कृतं स दीक्षणीयादीनामर्थं साधयति, न पुनस्तेषां कर्त्तव्यम् । लुप्तमेव तत् । तस्मिन् लुप्ते आरम्भे तत्सिद्ध्यर्थो धर्म आरम्भणीयाख्यो लुप्येत । अथ प्रथमप्रवर्त्तनम् आरम्भः । औदासीन्याद् व्यावृत्तिः । पुरुषस्य व्यापृतता । तदा ज्योतिष्टोमं साङ्गं कर्त्तुमसावौदासीन्याद् व्यावृत्तो ज्यौतिष्टोमिकेन प्रथमेन पदार्थेन । स ततः प्रभृति आ साङ्गज्योतिष्टोमसमाप्तेर्व्यापृत एव न पुनरुदासीनो भवति । यतो व्यावृत्तो भवति । साङ्गज्योतिष्टोमारम्भेणैव प्रवृत्तो दीक्षणीयादिष्वति लुप्यत एवैषामारम्भः । तस्मिन् लुप्ते आरम्भणीया पदार्थं आरम्भसिद्ध्यर्थो लुप्येत ॥ नन्वङ्गभूतस्य दीक्षणीयादेरन्य आरम्भो जातः । नेत्याह । ऋत्विगानमनं देवयजनजोषणादि वा प्रथमं वा पुरुषस्य प्रवर्त्तनमारम्भः । प्रथमश्च प्रवृत्तोऽसौ ज्योतिष्टोमार्थमेव । अथायमन्यः प्रथमः पदार्थो दीक्षणीयादेर्जात इत्युच्यते । तथापि न तस्यारम्भणीया प्रकृतावुक्तेति तस्मादङ्गभूतात् पदार्थादारम्भणीया निवर्त्तेत । अपि च दीक्षणीययैव ज्योतिष्टोमे आरम्भार्थः सिद्ध्यति । एवं हि श्रूयते । आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणोऽग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञञ्चारभते अग्निः प्रथमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवताश्चैव यज्ञञ्चोभयतः परिगृह्याऽवरुन्धे इति ॥ ४ ॥ दीक्षणीयादिषु आरम्भणीयाबाधाधिकरणम् ॥ २ ॥

प्रधानाच्चान्यसंयुक्तात् सर्वारम्भान्निवर्त्तेतानङ्गत्वात् ॥ ५ ॥

अस्ति राजसूयः, राजसूयेन स्वाराज्यकामो यजेतेति । तत्रेष्टिपशुसोमदर्विहोमाः प्रधानभूताः । ऐष्टिकेष्वनुमत्यादिषु संशयः । किम् आरम्भणीया कर्त्तव्या, न ? इति । किं प्राप्तम् । कर्त्तव्या । विधेः कारणान्तरेऽतिदेशात् सर्वकर्म स्यादिति ॥

एवं प्राप्ते ब्रूमः । प्रधानाच्च अपरप्रधानसंयुक्तान्निवर्त्तितुमर्हति । कुतः । सर्वारम्भार्थेन तत्र ज्योतिष्टोमः समाम्नायते । अग्निष्टोमं प्रथममाहरतीति । स प्राकृतानां प्रधानानामेकैकस्य तन्त्रेण समाम्नातो भवितुमर्हति । एकैकस्य ह्यत्र प्रधानस्य तन्त्रेण साधारणं प्रकरणम् । तेनानुमत्यादीनाम् आरम्भार्थे सिद्धे, नारम्भणीया भवितुमर्हतीति ॥ ५ ॥ अनुयज्ञादिषु आरम्भणीयाबाधाधिकरणम् ॥३॥

तस्यां तु स्यात् प्रयाजवत् ॥ ६ ॥

अस्त्यारम्भणीया इष्टिः, आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारभमाणः, सरस्वत्यै चरुं, सरस्वते द्वादशकपालम्, अग्नये भगिनेऽष्टाकपालं यः कामयेत भग्यन्नादः स्यामिति नित्यवदेके भगिनमामनन्ति । तत्रैषोऽर्थः सांशयिकः । किमारम्भणीयायामारम्भणीया कर्त्तव्या, उत नेति । किं प्राप्तम् । तस्यां तु स्यात् प्रयाजवत् । संशयनिवृत्त्यर्थं तुशब्दः । न खलु संशयोऽस्ति । आरम्भणीयायामारम्भणीया भवितुमर्हति । कुतः । विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यादिति । यथा प्रयाजा एवमारम्भणीयापीति । आह । ननु तस्या अप्यर्थे अन्या आरम्भणीया, तस्या अप्यर्थे अन्या आरम्भणीया, तस्या अप्यर्थेऽन्येत्येवमारम्भणीया न व्यवतिष्ठेत । व्यवस्थितेन च शास्त्रार्थेन भवितव्यम् । अत्रोच्यते । सर्वास्वेव अनवस्थासु सामर्थ्येन व्यवस्था भविष्यति ॥ ६ ॥ पूर्व० ॥

न वाऽङ्गभूतत्वात् ॥ ७ ॥

न वेति पक्षः प्रतिषिध्यते । न स्यादारम्भणीयायामारम्भणीयेति। कुतः । अङ्गभूता हि सा दर्शपूर्णमासयोः । अङ्गभूतस्य च प्रधानारम्भेणैव सिद्धिरित्युक्तम् ॥ आरम्भणीयाप्रवृत्तेन दर्शपूर्णमासौ कर्त्तव्यौ । अतः प्रकृतिवदारम्भणीयापि आरम्भणीयाप्रवृत्तेन कर्त्तव्येति । तस्मात् किल आरम्भणीयायामारम्भणीया स्यात् । तच्च नैवम् । अकृत्वाप्यन्यामारम्भणीयामारम्भणीयां कुर्वन्नारम्भणीयाप्रवृत्त एव करोतीति गम्यते । तस्मान्नारम्भणीयायामारम्भणीया स्यात् । अपि च जलबुद्बुदवद् अव्यवस्था आरम्भणीयायां वाक्येन गम्यमाना सामर्थ्येन बाध्येत । अस्मत्पक्षे नाऽव्यवस्था, न बाधः । तस्मान्नारम्भणीयायामारम्भणीया इति ॥ ७ ॥ सि० ॥

एकवाक्यत्वाच्च ॥ ८ ॥

इतश्च पश्यामः, एवमेवेति । कुतः । एकं हीदं वाक्यं यदा आरम्भणीयां विदधाति, तदा नासौ दर्शपूर्णमासयोर्विहिता । तामविहितामिव दर्शपूर्णमासयोर्विदध्यात् । विहितामिव चारम्भणीयायामतिदिशेत् । नैतत् कर्त्तुमलंभवति सकृदुच्चरितम् । तस्मादप्यारम्भणीयायामारम्भणीया नास्ति ॥ ८ ॥ युक्तिः ॥ आरम्भणीयायाम् आरम्भणीयाबाधाधिकरणम् ॥ ४ ॥

कर्म च द्रव्यसंयोगार्थमर्थाभावान्निवर्त्तेत तादर्थ्यं श्रुतिसंयोगात् ॥ ९ ॥

तस्मिन्नेव ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्रेदमाम्नायते । यूपमच्छेष्यता होतव्यम् । न हि दीक्षितस्याग्नौ जुहोति । आज्यं चारणिं चादाय यूपस्यान्तिके अग्निं मथित्वा यूपाहुतिं जुहोतीति । साद्यस्क्रे श्रूयते । खलेवाली यूपो भवतीति । तत्रैषोऽर्थः सांशयिकः । किं साद्यस्क्रे खलेवाल्यां यूपाहुतिः कर्त्तव्या, न ? इति । किं प्राप्तम् । कर्त्तव्या । विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यादिति ॥ एवं प्राप्ते ब्रूमः । कर्म चैतद् द्रव्यसंयोगार्थं यूप एवमादिभिः संस्कारैर्भविष्यतीति क्रियते । यूपं प्राप्तुमेष्यत एतच्छ्रूयते । तेनास्य संस्कारस्य श्रुतिसंयोगेन यूपार्थता । अच्छशब्दो हि आप्तुमित्यर्थे वर्त्तते । न चात्र यूपेन प्रयोजनम् । अयूपे हि खलेवाल्यां पशुर्बध्यते । तस्मात् तत्र यूपकरणार्था यूपाहुत्यादयः संस्कारा अर्थलोपान्निवर्त्तितुमर्हन्तीति । तस्मान्नास्ति खलेवाल्यां यूपाहुतिरिति ॥ ९ ॥ खलेवाल्यां यूपाहुतिबाधाऽधिकरणम् ॥ ५ ॥

स्थाणौ तु देशमात्रत्वादनिवृत्तिः प्रतीयेत ॥ १० ॥

तस्मिन्नेवाग्नीषोमीये पशौ श्रूयते, स्थाणौ स्थाण्वाहुतिं जुहोतीति । ततः साद्यस्क्रेऽयमर्थः सांशयिको भवति । किं साद्यस्क्रे स्थाण्वाहुतिः कर्त्तव्या, न ? इति । तत्र एतत्तावन्नः परीक्ष्यम् । किमारादुपकारकं कर्म स्थाण्वाहुतिः, उत यूपसंस्कार इति । यद्यारादुपकारकं कर्म तदा कर्त्तव्या । अथ यूपसंस्कारो निवर्त्तेतेति । कथमारादुपकारकं कर्म स्यात्, कथं वा यूपसंस्कार इति । यद्येवमभि-

संबन्धः क्रियते, यूपमच्छेष्यता स्थाण्वाहुतिः कर्त्तव्येति, ततो यूपसंस्कारः । अथ यूपमच्छेष्यतेति प्रकृतेन न सम्बद्ध्येत, तदा आरादुपकारकं कर्मेति । किं तावत् प्राप्तम् । आरादुपकारकं कर्मेति । एतद्विज्ञातं कर्मणां प्रयोजनम् । भूतं हि तावद् भव्यार्थमिति ॥

अपि च निवृत्तप्रयोजनेन स्थाणुना सम्बद्ध्यमाना आहुतिः किमिव यूपस्य उपकरिष्यति । सम्बद्धं हि क्रियमाणं सम्बन्धिनि उपकुर्यात् । व्यावृत्तो हि यूपात् स्थाणुः । अपिच तन्त्रमेकादशिन्यां यूपाहुतिर्भविष्यति, यद्यारादुपकारकं कर्म स्यात् । तथा हि नाश्रुतोऽभ्यासः कल्पयिष्यते । अपिच अविशिष्टेन वाक्येन स्थाणौ स्थाण्वाहुतिः श्रूयते । सा च प्रकरणेन यूपव्रश्चनस्थाणुविशेषे कल्प्येत । तस्मादारादुपकारकं कर्म स्थाण्वाहुतिः साद्यस्के च कर्त्तव्या चोदकानुग्रहार्थेति । एवं प्राप्तम् ॥ १० ॥ पूर्व० ॥

एवं प्राप्ते ब्रूमः—

अपि वा शेषभूतत्वात् तत्संस्कारः प्रतीयेत ॥ ११ ॥

अपि वेति पक्षव्यावृत्तिः । यूपसंस्कारः प्रतीयेत । कुतः । प्रकरणविशेषाद् यूपमच्छेष्यतः स्थाण्वाहुतिर्विधीयत इति गम्यते । यो हि मन्यते अविशिष्टेन वाक्येन स्थाणुदेशमात्रे विधीयत इति, फलं तस्य कल्पनीयं भवति । योऽपि मन्यते प्रकरणादारादुपकारकमग्नीषोमीयस्य भवतीति, तस्यापि प्रकरणसामान्यं प्रकरणविशेषेण बाध्येत । कर्मशेषभूतश्च यूपः प्रयोजनवत्त्वात् । तेन सम्बद्ध्यमाना अदृष्टार्थापि आरादुपकारिका सती कल्प्यप्रयोजना स्यात् । अतः प्रसिद्धिर्न्यायेन बाध्येत । यथा अश्वकर्ण इति । निवृत्तप्रयोजने चापि स्थाणौ यूपाद् व्यावृत्ते च यूपीयोऽसाविति कृत्वा तत्र क्रियमाणा यूपाहुतिर्यूपसम्बद्धा कृता भवतीति तदा व्रश्चने क्रियते । यथा शिरसा धारितायाः स्रजः शिरसोऽवतारितायाः देवदत्तीया असाविति कृत्वा शुचिदेशनिधानादिः संस्कार एषितव्यो भवति । एवं स्थाण्वाहुतिरपि एकादशिन्यां चान्तिकदेशस्याविवक्षितत्वात् तन्त्रं यूपाहुतिर्भविष्यत्येव । तस्मात् संस्कारपक्ष एव ज्यायान् ॥ ११ ॥ सि० ॥

समाख्यानञ्च तद्वत् ॥ १२ ॥

स्थाण्वाहुतिरिति च समाख्यानं स्थाणुप्रधानाया इवाहुतेर्भवती-

ति । कथं षष्ठीसमासोऽयम् । कर्म्मणि षष्ठी । ईप्सिततमञ्च कर्म । सप्तमीसमासो लक्षणापेत इति कृत्वा नादर्त्तव्यो भवति ॥ १२ ॥

मन्त्रवर्णश्च तद्वत् ॥ १३ ॥

इतश्च पश्यामः संस्कारकर्मेति । यतो मन्त्रवर्णोऽपि तद्वद् भवति । अतस्त्वं देववनस्पते शतवल्शो विरोह इति । यस्त्वं मया वृक्णः, सोऽत आव्रश्चनाद् बहुप्रकारो विरोहेति यूपमिवाद्रियमाणो मन्त्रवर्णो भवति । तस्मादपि संस्कारकर्म खलेवाल्यां न कर्त्तव्यमिति ॥ १३ ॥ युक्तिः ॥ साद्यस्क्रे स्थाण्वाहुतिबाधाधिकरणम् ॥ ६ ॥

प्रयाजे च तन्न्यायत्वात् ॥ १४ ॥

दर्शपूर्णमासयोराम्नायते उत्तमः प्रयाजः । स्वाहाकारं यजतीति। तत्र संशयः । किम् उत्तमः प्रयाज आरादुपकारकं कर्म ? उत संस्कारकर्म इति । तत एतत् तावत् परीक्ष्यते । किम् ? आज्यभागादिषु या देवता यष्टव्यास्ता एवात्र देवताः ? उत अन्यास्ताभ्यो देवताभ्य इति । कथमन्या देवताः ? कथं वा प्रकृताः स्युरिति । यदि स्वाहाकारं यजतीति देवताविधानं, ततोऽन्या प्रकृताभ्यो देवता । अथ ये यजामहे, स्वाहाग्निमिति निगदेन मान्त्रवर्णिको देवताविधिस्ततः प्रकृता देवता इति ॥ किं प्राप्तम् । आरादुपकारकं कर्मेति । तदेतद् वर्ण्यते । अन्या देवता स्वाहाकारं यजतीत्यनेन विधीयते । एवं वचनप्राप्ता भविष्यति । इतरथा मान्त्रवर्णिकी कल्पयितव्या भवेत् । नन्वन्या अग्न्यादिशब्दैर्न शक्यते वदितुम् । तत्रायं ये यजामहे स्वाहाग्निमिति मन्त्रवर्णोऽपि विप्रतिषिद्ध्येत । अत्रोच्यते । नैतद्विप्रतिषिद्धम् । अनेकस्याप्येकः शब्दो भवति वाचकः । तद्यथा मातेति मातरमपि वदति, मातारमपि । माता च परमं दैवतं, समा च पुत्रेष्वित्येतैरुपबद्ध्यमानो जननीवचनोऽवगम्यते । माता समः क्षिप्रश्चेत्येभिरप्यनुबद्ध्यमानो धान्यस्य मातुर्वाचकः । एवं मन्त्रेऽप्यग्न्यादयः स्वाहाकारदेवताके यागे प्रयुज्यमानास्तद्वाचिनोऽवगम्येरन् । तथा सति प्रज्ञातं यागस्य कार्य्यमनुगृहीतम्, आरादुपक्रिया । तस्मादारादुपकारकं कर्म्म उत्तमः प्रयाज इति ॥ एवं प्राप्ते ब्रूमः । प्रयाजे च तन्न्यायत्वाद् उक्तमधस्तात् स्थाण्वाहुतिः संस्कारकर्मेति इहापि चशब्देनान्वादिश्यते, उत्तमः प्रयाजः संस्कारकर्मेति । तत

एतत्तावद्वर्णयन्ति । या आज्यभागादिषु देवता यष्टव्यास्ता एव इह देवता इति । कुतः । स्वाहाकारस्य देवतासंयोगाभावात् । तद्धितेन वा देवतासंयोगो विज्ञायते, चतुर्थ्यन्तेन वा । न चेह तद्धितो न चतुर्थी। अतो न देवताविधिः । यागसामानाधिकरण्यं च द्वितीयया गम्यते । तस्माद् यागवचनः स्वाहाकारशब्दो यथा समिदादय इति ॥ आह । यदि द्वितीयया संयोगात् तं यागवचनं मन्यसे, आरादुपकारकस्तर्हि यागः । ईप्सिततमे हि द्वितीयाविभक्तिर्भवतीति । अत्रोच्यते । एवमेव प्राप्ते वदामः । तन्न्यायत्वादिति । स एव न्याय इह, यः स्थाण्वाहुतौ । अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत इति । शेषभूताश्चाज्यभागादिष्वग्न्यादयः । तदर्थो यागः सन् प्रयोजनवान् भवति । इतरस्मिन् पक्षे यागो निष्प्रयोजनः स्यात् । तदर्थं देवताऽभिधानमपि निष्प्रयोजनं स्यात् । सत्यां च देवतासंस्कारशङ्कायां यागप्रयोजनं कल्पयितुं न शक्यते । तथाऽग्न्यादीनां सम्भवति स्वार्थे अदृष्टा स्वाहाकारवचनता न शक्या कल्पयितुम् । तस्माद् देवतासंस्कारार्थमुत्तमः प्रयाजः । देवतास्मरणसंस्कारद्वारं चादृष्टमपि तस्माद् यागाद् भवतीति ॥ १४ ॥

लिङ्गदर्शनाच्च ॥ १५ ॥

लिङ्गमप्यस्मिन्नर्थे भवति । किं लिङ्गम् । संप्रतिपन्नदेवताकश्चातुर्मास्येपूत्तमप्रयाजस्य निगदो दृश्यते । स्वाहाग्निं स्वाहा सोमं स्वाहा सवितारं स्वाहा सरस्वतीं स्वाहा पूषणमित्येवँल्लक्षणकः । स देवतासंस्कारपक्षेऽवकल्पते । इतरस्मिन्नदृष्टार्थः स्यात् । तस्मादपि देवतासंस्कार उत्तमः प्रयाजः स्यात् । प्रयोजनं विप्रतिपन्नदेवताकेषु सौर्यादिकर्मसु प्राकृतानि देवतापदानि न निवर्त्तन्ते पूर्वपक्षे । सिद्धान्ते तु निवर्त्तन्ते ॥ १५ ॥ हेतुः ॥ उत्तमप्रयाजस्य संस्कारकर्मताऽधिकरणम् ॥ ७ ॥

तथाज्यभागाग्निरपीतिचेत् ॥ १६ ॥

दर्शपूर्णमासौ स्तो, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तत्रेदमाम्नायते । आज्यभागौ यजतीति । इदं चापरं श्रूयते । तौ होचतुः किमावयोस्ततः स्यादिति । यस्यै कस्यैचिद्देवतायै हविर्निर्वपँस्तद्धां पुरस्तादाज्यस्य यजन्निति तस्माद्यस्यै कस्यैचिद्देवतायै हविर्निर्वपन्ति

ते पुरस्तादाज्यभागावग्नीषोमाभ्यां यजन्ति तौ न सौम्येऽध्वरे न पशौ इति। तत्रैतत् सन्दिह्यते। यदाज्यभागयोरग्नीषोमाविज्येते, किं तत्राऽग्नियोगो देवतासंस्कारार्थं उत आरादुपकारक इति। किं प्राप्तम्। इति चेत् सन्देहं पश्यसि, तथा आज्यभागाग्निरपि स्याद् यथोत्तमः प्रयाजः। अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेतेति ॥ १६ ॥ पूर्व०॥

व्यपदेशाद्देवतान्तरम् ॥ १७ ॥

न चैतदस्ति। देवतासंस्कार आज्यभागयोरिति, किन्तर्हि, आरादुपक्रिया। कुतः। व्यपदेशाद् अवगम्यते। प्रधानाग्नेर्देवतान्तरमिह इज्यत इति। कोऽसौ व्यपदेशः। अग्निमग्न आवह सोममावह अग्निमावह इति। कथमस्मिन्नावाहने एतावत्यश्च देवता इज्येरन्निति। एवमावाहनेन देवतासु अव्यामोहार्थं परिगण्यमानासु द्विरग्निशब्देन परिगणनं कृतम्। तद्देवतान्तरेऽवकल्पते। इतरथा हि सङ्ख्यावृद्ध्या व्यामुह्येत। गणनं चोभयोरपि पक्षयोस्तुल्यम्। अपि च त्वत्पक्षे सोमव्यवधानाद् गणने क्रमो बाध्येत। अपि च असकृद्वचनं शब्देनाऽनुबद्ध्यमानमन्यामिव व्यपदिशति। यथा ब्राह्मण आगतो वृषल आगतो ब्राह्मण अगत इति द्वयोरिव ब्राह्मणयोर्भवति गणनावादः। एवमिहापि द्वयोरिव अग्न्योर्भवति वादः ॥ १७ ॥ सि० ॥

स एष व्यपदेशो भवति लिङ्गं, प्राप्तिस्तु वक्तव्या। सोच्यते—

समत्वाच्च ॥ १८ ॥

इयं प्राप्तिः। समोऽत्र देवतया यागः। देवतापि श्रुता प्रधानयागे। यागोऽपि वाक्यान्तरे। आज्यभागौ यजतीति। तदिहोभयोर्यागदेवतयोः प्रयोजनवतोर्देवताया यागार्थता न्याय्या। प्रज्ञातं ह्यारादुपकारकत्वं यागस्येति। न हि देवतां विना यागो भवति। तेन स देवतामाकाङ्क्षति, न तु प्रधानदेवता यागान्तरमाकाङ्क्षति। यच्च येनाकाङ्क्ष्यते तत् तदर्थं भवति। तस्माद् देवता यागार्था। अपिच आरादुपकारकैः कर्मभिः साम्यं भवति। कथम्। अभीषू वा एतौ यज्ञस्य यदाघारौ चक्षुषी वा एतौ यदाज्यभागौ यत् प्रयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्यस्य अभिभूत्यै इति ॥ १८ ॥ हेतुः ॥ अग्नियागस्यारादुपकारकताधिकरणम् ॥ ८ ॥

पशावपीतिचेत् ॥ १९ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । आ सोमं वहन्त्यग्निना प्रतितिष्ठन्ति तौ सम्भवन्तौ यजमानमभिसम्भवतो वरुणपाशाभ्यां वा एषोऽभिधीयते यो दीक्षितो यदग्नीषोमीयं पशुमालभते वरुणपाशाभ्यामेव मुच्यते इति । तत्रेदं समामनन्ति । अग्नीषोमीयस्य वपया प्रचर्य्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपति । तत्र सन्देहः । किं पशुपुरोडाशयाग आरादुपकारकः ? उत देवतासंस्कारार्थ इति । किं तावत् प्राप्तम् । ततः प्रयाजाधिकरणे पराजितोऽपि हेतुः केनचिदपरेण विशेषेण पुनरनुप्राण्यत इति पुनरुपदिश्यते, पशावपीति चेत् । इति चेत् पश्यसि, किम् आरादुपकारको, देवतासंस्कारः ? इति । पशावप्यारादुपकारकः स्यात् । एतद्धि कर्मणां प्रसिद्धं कार्यम् । अग्निषोमीयमिति च गुणभूतदेवताकस्तद्धितशब्दो भवति । पशावपि तद्धित एव शब्दो वाक्यशेषेण बलवता ज्वलनवचनो व्यपदिश्यते, न नियोगतस्तद्वचनः पशुपुरोडाशे । अतः प्रसिद्धेरारादुपकारकत्वम् ॥ १९ ॥ पूर्व० ॥

न तद्भूतवचनात् ॥ २० ॥

नेति प्रतिषेधकः शब्दः । आ सोमं वहन्ति अग्निना प्रतितिष्ठन्तीत्यर्थवादवचन एषः । यद्यर्थवादवचनादन्या पशौ देवता, अन्या पुरोडाशयागे इति गम्यते । अर्थवादवचनादेव सैवेत्यवगन्तव्या । एवं ह्याह । यद्देवत्यः पशुस्तद्देवत्यः पशुपुरोडाश इति । तस्मादर्थवादसाम्ये देवतासंस्कार इति गम्यते ॥ २० ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ २१ ॥

इतश्च पश्यामः संस्कारकर्म पशुपुरोडाश इति । कुतः ? । लिङ्गमप्येतमर्थं दर्शयति । इन्द्राय वज्रिणे वृषभमालभेतेत्यस्य पशोः पुरोडाशस्य क्रमे सम्प्रतिपन्नदेवताकं याज्यानुवाक्याद्वयं समाम्नातम् । इन्द्रं स्तुहि वज्रिणं स्तोमपृष्ठं स्तुहि शूरं वज्रिणं सुप्रतीतिमिति च तत् संस्कारपक्षेऽवकल्पते, नान्यथा । तस्मात् पशुदेवतासंस्कारार्थः पुरोडाशयाग इति ॥ २१ ॥ हेतुः ॥

गुणो वा स्यात् कपालवद् गुणभूतविकाराच्च ॥२२॥

विशेषविवक्षया पुनस्तमेव हेतुं व्यपदिशति । वाशब्देन पक्षं व्यावर्त्तयति । गुणः स्याद् देवता । एवमारादुपकारकत्वप्रसिद्धिरनु-

ग्रहीष्यते। अनेकगुणभावश्च कपालवद्भविष्यति। यथा कपालं श्रयणेऽपि तुषोपवपनेऽपि। एवमग्नीषोमावप्यभिन्नौ पशुयागे पुरोडाशयागे च गुणभूतौ भविष्यतः। एवञ्चसति दार्शपौर्णमासिकयोरग्नीषोमयोर्गुणभावेन यागे द्वारभूतयोः कर्म आम्नातम्। इह गुणभूतयोरेवाविरोधेन भविष्यति, इतरथा प्रधानभूतयोरन्यकार्ययोर्न प्राप्नुयात्। दृश्यते चानिरुक्तः स्विष्टकृदिति। तस्मादप्यारादुपक्रिया। अपिच सौत्रामण्यामाश्विनसारस्वतसुत्रामदेवताकेषु पशुषु ऐन्द्रावरुणसावित्राः पुरोडाशाः पशुप्रकरणान्नोत्कृष्यन्ते। संस्कारपक्षे उत्कृष्येरन्। छिद्रापिधानार्थतायाश्च उक्तमर्थवादत्वम्। तस्मादप्यारादुपक्रिया॥ २२॥ पूर्वं०॥

अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत स्वाहाकारवदङ्गानामर्थसंयोगात्॥ २३॥

अपि वेति पक्षव्यावृत्तिः। न आरादुपकारकं कर्म्म। तत्संस्कारः प्रतीयेत, देवतासंस्कार इति। कुतः। शेषभूतत्वाद् देवतायाः प्रयोजनवत्त्वम्। तस्माद्यथा स्वाहाकारयजिर्निष्प्रयोजन इति देवतासंस्कारः प्रतीयते, एवमिहापि। अङ्गानामर्थसंयोगात्। अर्थेन प्रयोजनेन संयोग इह गम्यते वाक्येन। तेन न आरादुपकारकम्। आरादुपकारकेभ्यः सामवायिकानि अङ्गानि वरीयांसि भवन्तीति। यदुक्तम्। गुणभूतदेवताकेन तद्धितशब्देन निर्देश इति। प्रधानभूतदेवताकेनाप्येवञ्जातीयकेन शब्देन सम्बन्धे विधीयमाने निर्देशो भवति। अपिच, दृष्टकार्य्यमदृष्टाद् बलीयः। तस्मात् संस्कारकर्मेति॥ २३॥ उत्तरम्॥

व्यृद्धवचनञ्च विप्रतिपत्तौ तदर्थत्वात्॥ २४॥

इतश्च संस्कारकर्मेति। सौत्रामण्यां पशुपुरोडाशदेवताविप्रतिपत्तौ व्यृद्धवचनं देवतासंस्कारे एवावकल्पते। यद्वै सौत्रामण्यां व्यृद्धं तदस्याः समृद्धं यदन्यदेवत्याः पशुपुरोडाशा भवन्ति, अन्यदेवत्याः पशव इति॥ २४॥ युक्तिः॥

गुणेऽपीतिचेत॥ २५॥

एवञ्चेत पश्यसि, संस्कारपक्षे व्यृद्धवचनमवकल्पत इति। तन्न। संस्कारपक्षेऽपि व्यृद्धवचनं नावकल्पते। न हि तत्र किञ्चिद् व्यृद्धं,

विप्रतिपन्नदेवताकैरेव पुरोडाशैस्तत्कर्म्म समृद्धतरं भवति । एवं ह्याह । यद् अन्यदेवत्याः पुरोडाशा भवन्ति, अन्यदेवत्याः पशव इति, तदस्यां समृद्धं भवतीति । यश्चोभयोः पक्षयोर्दोषः, न तमेकश्चोद्यो भवति । यथैव हि संस्कारपक्षे व्यृद्धवचनमर्थवाद एवमितरस्मिन्नपि पक्षेऽर्थवादो भविष्यति ॥ २५ ॥ आ० ॥

नासंहानात् कपालवत् ॥ २६ ॥

नैतदेवं, भवदीये पक्षे न किञ्चिदपि हीनम् । यथैवैकेन कपालेन तुषेषु उप्यमानेषु अन्येषां कपालानां न किञ्चिद्धीयते । एवमन्यया देवतया पशुपुरोडाशयागे निर्वर्त्यमाने न किञ्चित् पशुदेवतायां हीयते । तत्राव्यृद्धे एव व्यृद्धवचनं भवति । मदीये तु पक्षे देवताप्रकाशनमङ्गभूतं हीयते । अन्यदेतदुच्यते । यद् व्यृद्धमपि समृद्धं भवतीति । अहीने तु व्यृद्धशब्दे उच्चरिते न शब्दार्थो गृहीत इति ॥ ॥ २६ ॥ आ० नि० ॥

ग्रहाणाञ्च सम्प्रतिपत्तौ तद्वचनं तदर्थत्वात् ॥ २७ ॥

इतश्च संस्कारकर्मेति । सौत्रामण्यां सम्प्रतिपन्नदेवताकेषु ग्रहेषु तद्वचनं भवति । पुरोडाशवचनम् । नैतेषां पशूनां पुरोडाशा विद्यन्ते । ग्रहपुरोडाशा ह्येते पशव इति । न तावन्न विद्यन्ते । विप्रतिपन्नदेवताकैस्तु संस्काराभावमालोच्य एवमुच्यते । ग्रहा एषां पुरोडाशाः, ग्रहपुरोडाशा ह्येते इति । किं तेषां पुरोडाशैः सामान्यम् । यदेते देवतासंस्कारार्थाः । यदि पुरोडाशा अपि देवतासंस्कारार्था एवमेतदवकल्पते । तस्मात् संस्कारपक्ष एव श्रेयान् ॥ २७ ॥

ग्रहाभावे च तद्वचनम् ॥ २८ ॥

एवं श्रूयते, नैतस्य पशोर्ग्रहं गृह्णन्ति पुरोडाशवानेष पशुरिति । पशुपुरोडाशवत्ताहेतुकं ग्रहाभावं ब्रुवन् ग्रहपुरोडाशयोरेकार्थतां दर्शयति । तत्र ग्रहस्य देवतासंस्कारार्थता विज्ञाता, यदि पुरोडाशोऽपि देवतासंस्कारार्थ एवमेतदवकल्पते ॥ २८ ॥

देवतायाश्च हेतुत्वं प्रसिद्धं तेन दर्शयति ॥ २९ ॥

इतश्च पश्यामः संस्कारकर्मेति । एवं ह्याम्नायते, अग्निभ्यः कामेभ्यः पशव आलभ्यन्ते, कामा वा अग्नय आग्नेयाः पुरोडाशा भवन्ति, आग्नेया हि पशव इति । पशुदेवताहेतुकान् पुरोडाशान् ब्रुवन्

देवतासंस्कारार्थतां पुरोडाशानां दर्शयति ॥ २९ ॥ युक्तिः ॥

अविरुद्धोपपत्तिरर्थापत्तेः शृतवद् गुणभूतविकारः स्यात् ॥ ३० ॥

अथ यदुक्तं, गुणभूतयोर्धर्मः प्रधानभूतयोरग्नीषोमयोर्न स्यादिति । उच्यते । अविरुद्धा प्रधानभूतयोरप्यग्नीषोमयोर्धर्माणामुपपत्तिः । कुतः । अर्थापत्तेः । प्रधानभूतावपि प्राकृतं कार्य्यं यागनिर्वृत्तिं कुर्वाणौ द्वारभूताविति धर्मैर्योक्ष्येते शृतवत् । यथा शृते चरुं, दधंश्चरुमिति प्रदानार्थे दधिशृते प्रणीताकार्य्यं कुर्वाते इति धर्मैर्युज्येते । न च दोषो भवति ॥ ३० ॥

स द्व्यर्थः स्यादुभयोः श्रुतिभूतत्वाद् विप्रतिपत्तौ तादर्थ्याद्विकारत्वमुक्तं तस्यार्थवादत्वम् ॥ ३१ ॥

अथ यदुक्तम्, ऐन्द्रवारुणसावित्राणां पुरोडाशानां सौत्रामणीप्रकरणादुत्कर्षः प्राप्नोति । तत्रेदमुच्यते । स द्व्यर्थो यागो देवतासंस्कारार्थश्छिद्रापिधानार्थश्च । उभयोरर्थयोः श्रुतिभूतत्वात् । अतो विप्रतिपन्नदेवताकेषु छिद्रापिधानार्थतया प्रकरणादुत्कर्षो न भविष्यति । तत्प्रकरणगत एवायं विकारो भविष्यति । तस्याप्युक्तम् ॥ ३१ ॥

अर्थवादत्वमिति यदुक्तं, तत्रेदमुच्यते—

विप्रतिपत्तौ तासामाख्याविकारः स्यात् ॥ ३२ ॥

एवं तर्हि अनेन प्रकारेण प्रकरणादनुत्कर्षः । देवतासंस्कारस्तावत् प्रकरणादुत्कर्षेण न शक्यते बाधितुम् । तत्र सौत्रामण्यां सम्प्रतिपन्नदेवताका एव चोदकेन पुरोडाशाः प्राप्ताः । तत्रेन्द्रादयः शब्दाः पशुदेवतानामेव वाचकाः । कथम् । एकदेशा हि तेषामिमे वर्णान्तरसहिता उच्चारिता इति गम्यते । शक्नुवन्ति ह्येकदेशाः समुदायिनः समुदायं प्रत्याय्य समुदायार्थान् गमयितुम् । यथा गाव्यादयः । यथा च सरस्वतीदेवताके निगदे, सरस्वति देवनिदो निवर्हय प्रजां विश्वस्य बृसयस्य मायिन इति । बृसयशब्दो बृहच्छब्दार्थं गमयति । किमर्थं पुनरेवं कल्प्यते ? । यतो देवतान्तराणि पशुदेवतासंस्कारार्थेषु यागेषु प्रत्याय्यमानानि अनर्थकानि भवेयुः । तस्मात् पशुदेवतानामाख्याविकाराः पुरोडाशदेवताशब्दा इति ॥३२॥आ०नि०

अभ्यासो वा प्रयाजवदेकदेशोऽन्यदेवत्यः ॥ ३३ ॥

संस्कारपक्षे एव, वाशब्दो युक्तिं व्यावर्त्तयति । न पक्षे, न वा आख्याविकारः । संस्कारपक्षेऽन्यथानुपपद्यमाने आख्याविकारा भवन्ति । अनाख्याविकारेष्वपि संस्कारपक्षोऽवकल्पत एव । कथम् । अभ्यास एव पुरोडाशयागस्य भविष्यति । तत्र हि चोदकेन पशुदेवता च प्राप्नोति पुरोडाशश्च । पशुदेवताया अन्यद् द्रव्यं विधीयते ग्रहः । पुरोडाशस्यान्या देवता । यागस्त्वविकृत एव तिष्ठति । स पशुदेवतासम्बद्धश्चैव कर्त्तव्यो ग्रहसम्बद्धश्च । तदुभयमप्यनभ्यस्ते यागे न सम्भवतीत्यर्थादभ्यस्यते यागः । तस्य एकदेशोऽन्यदेवत्यः प्रयाजवत् । तद्यथा, पशौ पञ्चानां प्रयाजानां चोदकेन प्राप्तानामेकदेशसङ्ख्या विधीयते । सा चान्तरेणाभ्यासं नावकल्पत इत्यभ्यस्यन्ते प्रयाजाः । तेषामभ्यस्यमानानामेकदेशे अन्या देवता दुरउषासा इत्येवमादयः । एवमिहाप्यभ्यासः पुरोडाशयागस्य । तस्मादनुत्कर्षः संस्कारपक्षेऽपीति ॥३३॥ युक्तिः॥ पशुपुरोडाशयागस्य देवतासंस्कारकताधिकरणम् ॥ ९ ॥

चरुर्हविर्विकारः स्यादिज्यासंयोगात् ॥ ३४ ॥

चरुः श्रूयते । सौर्य्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति । सौर्य्यं आग्नेयविकार इत्येतत्समधिगतम् । सामान्याद्वा नियम्येत पूर्ववत्त्वाद्विकारो हि इति । तत्रैषोऽर्थः सांशयिकः । किं चरुः कपालविकारः,हविर्विकारः ? इति। यदा हविर्विकारस्तदा किं स्थाल्या हविर्विक्रियते ? उत ओदनेनेति । किं तावत् प्राप्तम् । हविर्विकारः स्यादिति । कुतः । इज्यासंयोगात् । तद्धितार्थो विधीयते चरोः । सौर्य्यं चरुं निर्वपेदिति । एवमिज्यार्थश्चरुः । तस्माद्धविर्विकार इति ॥ ३४ ॥ सि० ॥

प्रसिद्धग्रहणत्वाच्च ॥ ३५ ॥

एवं स्थिते विशेष उच्यते । हविर्विकारः । प्रसिद्धग्रहणत्वाच्च स्थाल्या हविर्विकारः क्रियते । प्रसिद्धस्य ग्रहणं न्याय्यम् । प्रसिद्धश्च स्थाल्यां चरुशब्दः, आ हिमवतः, आ च कुमारीभ्यः प्रयुज्यमानो दृष्टः । तस्मात् स्थाल्या हविर्विक्रियते इति ॥ ३५ ॥ पूर्व० ॥

ओदनो वान्नसंयोगात् ॥ ३६ ॥

ओदनेऽपि चरुशब्दः प्रयुज्यते । तत्रौदनस्यैव ग्रहणं न्याय्यं, न स्थाल्याः । कुतः । अदनीयसंयोगात् । अदनीयेन हि द्रव्येण देवतायागमाचरन्ति शिष्टाः, नानदनीयेन । तत्रभवतामाचारात् । तेषां स्मृतिरनुमीयते, स्मृतेः श्रुतिः । तस्मादोदनेन हविर्विक्रियते इति ॥ ॥ ३६ ॥ उत्तरम् ॥

न द्व्यर्थत्वात् ॥ ३७ ॥

न ओदनस्य वाचकश्चरुशब्दः । कुतः । द्व्यर्थ एवं स भवेत् । स्थाल्यां हि स प्रसिद्धः समधिगतः । तस्मादोदने लक्षणाशब्दस्तत्संयोगादित्येवं मन्तव्यम् । अन्याय्यो ह्येवञ्जातीयकेष्वनेकार्थभावः । तस्मात् स्थाल्या हविर्विक्रियते इति । यदुक्तम् । अदनीयेन शिष्टा देवतायागमाचरन्तीति ध्रुवमेषां स्मृतिरिति । उच्यते । अनुमानमेतत् प्रत्यक्षेण वचनेन बाध्यते । वचनादवगम्यते स्थाल्या यागः कर्त्तव्य इति । कथम् । तस्यां हि चरुशब्दः प्रसिद्धः । न असौ आचारानुरोधेन लक्षणाशब्दः कल्पनीयः । कल्प्यमाने वा आचारेण शब्दो बाध्येत । न चैतन्न्याय्यम् । शब्दानुरोधेन हि व्यामोहादाचार इति कल्पयितुं न्याय्यम् । यथा शूलैश्च मासरेण चावभृथमभ्यवयन्तीति । प्राजापत्यं चरुं निर्वपेत् शतकृष्णलमायुष्काम इति च ॥ ३७ ॥ आ० ॥

कपालविकारो वा विशयेऽर्थोपपत्तिभ्याम् ॥ ३८ ॥

हविर्विकारपक्षो न सिद्ध्यति । स्थाल्या विकारे स्मृतिहेतुराचाराच्छ्रुतिराशङ्क्यते । ओदनेन विकारे स्थालीसंयोगाल्लक्षणाशब्द आशङ्क्यः । अस्ति चान्या गतिः । कपालविकारो भवेदिति । तस्माद्वाशब्देन पक्षं व्यावर्त्य कपालविकारश्चरुरिति ब्रूमः । कपालविकारोऽप्यर्थः सूर्य्यस्य । तेन सौर्य्य इति शक्यते व्यपदेष्टुम् । उपपत्तिश्चास्ति । शक्यते स्थाल्यां श्रपयितुम् । तस्माद्धविर्विकारपक्षे संशये कपालविकार आश्रयणीयः ॥ ३८ ॥ पूर्व० ॥

गुणमुख्यविशेषाच्च ॥ ३९ ॥

अस्ति च गुणमुख्ययोर्विशेषः । गुणो बाधितव्यो न्याय्यो, न मुख्यः । तदुक्तम्, अङ्गगुणविरोधे च तादर्थ्याद् इति ॥ ३९ ॥

तच्छ्रुतौ चान्यहविष्ट्वात् ॥ ४० ॥

चरुश्रुतौ चान्यद्धविर्दर्शयति । प्राजापत्यं घृते चरुं निर्वपेच्छत-कृष्णलमायुष्काम इति । शतकृष्णलानि हविः । चरुरेषां सम्बन्धी । चत्वारि चत्वारि कृष्णलान्यवद्यतीति कृष्णलानां हविष्ट्वम् ॥ ४० ॥

लिङ्गदर्शनाच्च ॥ ४१ ॥

एवं हि आह । मारुतं चरुं निर्वपेत् पृश्नीनां दुग्धे प्रैयङ्गवं ग्राम-काम इति । मृण्मयो हि चरुर्न प्रियङ्गुविकारः । तस्माद् अन्यद्धविः । चरुरपि कपालविकार इति ॥ ४१ ॥ युक्तिः ॥

ओदनो वा प्रयुक्तत्वात् ॥ ४२ ॥

हविर्विकार एवात्र चरुस्तद्धितसंयोगादवगम्यते । सौर्य्यश्चरुः कर्त्तव्य इति । यदि पुरोडाश उत्सृज्येत, चरुरुत्सृष्टव्योऽवगम्यमानो बाध्येत । सूर्यसम्बद्धो हि चरुः कर्त्तव्यः । तस्मिन्नशक्ये सौर्य्यस-म्बद्धः क्रियेत, न शक्ये । यदा च हविर्विक्रियते; तदा ओदनेन । ओदने हि चरुशब्दः प्रसिद्धः, आ हिमवतः, आ च कुमारीभ्यः । तत्र अदनीयसंयोगो युक्तो भविष्यति ॥

यत्तु, द्व्यर्थत्वमन्याय्यमिति । अन्याय्यमेव द्व्यर्थत्वम् । तत्र कुत एतत् स्थालीसंयोगेन ओदने भविष्यतीति, न पुनरोदनसंयोगात् स्थाल्यां स्यात् । स्मरन्ति च पाके चरुशब्दम् । अनवस्रावितान्त-रूष्मपक्वो विशदसिद्ध ओदनश्चरुरिति । तदुक्तं, न पक्तिनामत्वाद् इति । आचाराच्च स्मृतिर्बलीयसी । तस्मादोदने चरुशब्दः । ओदनेन हविर्विक्रियत इति । तत्रायमप्यर्थोऽनदनीयेन यागो भविष्यतीति । अपि च सूर्य्यस्यान्यद्द्रव्यं नैवास्ति येन चरुः सम्बद्ध्येत । चोदकप्राप्तः पुरोडाश इति चेत् । नैतदेवम् । कर्म्मचोदनायां हि निष्पन्नायां चोदको भवति।प्राक् चरुशब्दवचनान्न यजतिचोदना । द्रव्यदेवता-सम्बन्धो हि यज्यर्थः । तेन चोदनाविधिशेषश्चरुशब्दो न पुरोडाश-विशेषणं भवति । जघन्यत्वाच्चोदकस्येति ॥ ४२ ॥ आ० ॥ तथा, पूर्व० नि० ॥

अपूर्वव्यपदेशाच्च ॥ ४३ ॥

इतश्च पश्यामः, ओदनेन हविर्विक्रियत इति । कुतः । अपूर्वव्य-पदेशो भवति । एवं ह्याह । पुरोडाशेन वै देवा अस्मिँल्लोक आर्ध्नुं-वंश्चरुणामुष्मिँल्लोके इति । पुरोडाशेन आर्ध्नोति चरुणामुष्मिन्निति ।

यदि स्थाल्यां चरुशब्दः कपालविकारश्चरुः। ततो यस्मिन्नेव पक्षे पुरोडाशस्तस्मिन्नेव पक्षे चरुः। पुरोडाशेन वै देवा अस्मिँल्लोके आर्ध्नुवन्निति चरुणा अस्मिँल्लोक इति गम्यते। तत्र चरुणामुष्मिन्नित्यन्यवद् व्यपदेशो नावकल्पते। तस्मादप्योदनेन हविर्विक्रियत इति ॥ ४३ ॥

तथा च लिङ्गदर्शनम् ॥ ४४ ॥

एवञ्च कृत्वा लिङ्गदर्शनमप्युपपन्नं भविष्यति। कथम्?। आदित्यः प्रायणीयश्चरुः, आदित्य उदयनीय इति। तत्रैतच्छ्रूयते। आज्यस्यैव चरुमभिपूर्य्य चतुर आज्यभागान् यजति। पथ्यां स्वस्तिमिष्ट्वाग्नीषोमौ यजति। अग्नीषोमाविष्ट्वा सवितारं यजति। अदितिमोदनेनेति। चतुर्षु आज्यभागेषु विधिः। अदितेरादित्यश्चरुरिति प्राप्तत्वादनुवादः। तत्र चरुमोदनशब्देन ब्रुवन् ओदनेन हविर्विक्रियत इति दर्शयति। तथा इदमपरं लिङ्गं भवति। यदि तण्डुलो विद्यते आमं तद्धविः स्यादिति। तण्डुले हविःशब्दं ब्रुवन्नोदनेन हविर्विक्रियत इति दर्शयति ॥ ४४ ॥ युक्तिः ॥ सौर्यं चरुं निर्वपेदित्यत्र चरुशब्दस्यौदनवाचिताधिकरणम् ॥ १० ॥

स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात् ॥ ४५ ॥

अस्ति चरुः, सौर्य्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति। अत्रैषोऽर्थः समधिगतः। ओदनेन हविर्विक्रियत इति। स इदानीमोदनः क पक्तव्यः? इति भवति संशयः। किं तावत् प्राप्तम्। न नियमः स्यात्, कपालेष्वेवेति। अर्थप्राप्ते यस्मिन् कस्मिँश्चिद् द्रव्ये पच्येत। यदि हि कपालं चोदकेन प्राप्येत, कपालवच्चोदकेन सङ्ख्यापि प्राप्येत। न हि प्रकृतौ कपालेषु श्रपयितव्यमित्येव चोदना। किं तर्हि। अष्टाकपालो भवतीति सङ्ख्यायां प्राप्यमाणायामष्टाकपलतास्य चोदिता भवति, नान्यथा। न चैवं सङ्ख्या प्राप्यते। न हि बहुषु कपालेषु पुरोडाशवदोदनः पक्तुं शक्यः। केवले च कपाले प्राप्यमाणे यासावष्टाकपालता चोदिता सा नैव प्राप्येत। अतो यस्मिन् कस्मिँश्चिद् अर्थप्राप्ते द्रव्ये पक्तव्यश्चरुरिति ॥ एवं प्राप्ते ब्रूमः। स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात्। स एष चरुः कपाल एवं स्यात्। एवं प्रकृतिवच्छब्दोऽनुगृहीतो भवति। न चान्यत् किञ्चिद् द्रव्य-

माम्नायते । तस्मान्नियमः ॥ ४५ ॥ पूर्व० ॥

सङ्ख्या चापि कपालवदिति यदुक्तं, तत् परिहर्त्तव्यम् ॥

एकस्मिन् वा विप्रतिषेधात् ॥ ४६ ॥

यदि बहुषु कपालेषु न शक्यते चरुः पक्तुं, विप्रतिषेधादेकस्मिन् पक्तव्यः । यदेतदुच्यते, अष्टाकपालो भवतीत्येतदुक्तं भवति—अष्टसु कपालेषु श्रपयितव्य इति । तन्न । यदि अष्टत्वं विरोधान्न प्राप्यते, तत् कपालमविरोधात् प्राप्येत ॥ ४६ ॥ आ० नि० ॥

न वार्थान्तरसंयोगादपूपे पाकसंयुक्तं धारणार्थे चरौ भवति तत्रार्थात् पात्रलाभः स्यादनियमोऽविशेषात् ॥ ४७ ॥

न वा कपालेषु पक्तव्यः । कुतः । अर्थान्तरसंयोगात् । अपूपपाके यत् कपालमुपादीयते, तद्गतेनोष्मणाऽपूपस्य निर्वर्त्तकः पाको यथा स्यादिति । तत्र कपालं चरोरुपादीयमानं उदकधारणार्थं यदूष्मणा उदकगतेन ओदनपाको निर्वर्त्त्यते, स ओदनपाको न कपालगतेन ऊष्मणा निर्वर्त्तते । तत्रोदकधारणार्थं कपालमुपादीयमानं न प्राकृतकार्य्यं स्यादिति चोदको नैवानुगृह्यते । तस्माद् अर्थात् पात्रलाभः स्यादिति तद्, अविशेषाद् न नियम्येत, किं तदिति ॥ ४७ ॥ पूर्व०

चरौ वा लिङ्गदर्शनात् ॥ ४८ ॥

स्थाल्यां वा श्रपणं क्रियेत । लिङ्गं हि भवति । यासु स्थालीषु सोमाः स्युस्ते चरवः स्युरिति । सोमस्थालीषु चरुं पक्तव्यं ब्रुवन् विशेषेण स्थालीं चरुस्थापनार्थां दर्शयति ॥ आह, दर्शनमिदं व्यपदिश्यते प्राप्तिरुच्यतामिति । अत्रोच्यते । स्थाल्यां स चरुसंज्ञकः पाको निर्वर्त्यते, न कटाहे कपाले वा । तस्मात् स्थाल्यां चरुः पक्तव्य इति । किं भवति प्रयोजनं, यदि कपालविकारश्चरुर्यदि वा ओदनेन हविर्विक्रियते ? इति । यदि कपालविकारः, तस्मिन् पेषणमनर्थलोपात् कर्त्तव्यम् । अथ ओदनेन हविर्विक्रियते, अक्रिया पेषणस्य अपूपहेतुत्वात् । पिण्डार्थत्वाच्च संयवनं पूर्वपक्षे कर्त्तव्यं, न सिद्धान्ते । संवपनमप्येवम् । सन्तापनञ्च अधस्ताच्छ्रपणार्थं पूर्वपक्षे कर्त्तव्यं, न सिद्धान्ते । उपधानञ्चैवमेव । पृथुश्लक्ष्णे च पूर्वपक्षे कर्त्तव्ये, न

सिद्धान्ते । अध्यूहश्चाङ्गाराणां पूर्वपक्षे कर्त्तव्यो, न सिद्धान्ते । उपरिपाकार्थत्वात् । अवज्वलनमप्येवमेव । व्युदूधृत्यासादनं पूर्वपक्षे अर्थात् कर्त्तव्यम् । अर्थो नास्तीति न सिद्धान्ते । अर्थात् कृतं हि व्युदूधृत्यासादनं, न शब्दप्राप्तम् । अर्थाच्च कृतं न चोदकः प्रापयति ॥ ॥ ४८ ॥ सिद्धान्तः ॥ सौर्यचरोः स्थाल्यामेव पाकाधिकरणम् ॥ ११ ॥

एवं वा, पृथगधिकरणानि पेषणादीनि । अस्ति चरुः । सौर्य्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति । ओदनेन हविर्विक्रियते, इत्येतत् समधिगतम् । तत्रैतत् संदिह्यते । किं चरौ पेषणं कर्त्तव्यं, न ? इति । किं प्राप्तम् ।

तस्मिन् पेषणमनर्थलोपात् स्यात् ॥ ४९ ॥

शक्यते हि तण्डुलेषु पेषणं कर्त्तुम् ॥ ४९ ॥ पूर्व० ॥

अक्रिया वा अपूपहेतुत्वात् ॥ ५० ॥

यद्यपि शक्यते, तथापि न क्रियते । अपूपः पेषणेन विना न निर्वर्त्तते, ओदनस्तु विनैव पेषणेन भवति । कामं पेषणेन व्याहन्यते । पिष्टकं यवागूर्वा स्यात् खलिर्वा । तस्माच्चरोः पेषणं निवर्त्तेत ॥ ५० ॥ सिद्धान्तः ॥ सौर्यचरौ पेषणाभावाधिकरणम् ॥ १२ ॥

पिण्डार्थत्वाच्च संयवनम् ॥ ५१ ॥

चरुरेवोदाहरणम् । प्रकृतौ श्रूयते, प्रणीताभिर्हवींषि संयौतीति । तदिह चरौ संयवनं कर्त्तव्यं, न ? इति । कर्त्तव्यम् । शक्यते हि कर्त्तुमिति ॥ एवं प्राप्ते ब्रूमः, शक्यमपि न क्रियते, पिण्डार्थं हि तत् । पिण्डेन च अपूपस्य प्रयोजनं, न चरोः ॥ ५१ ॥ सौर्यचरौ संयवनाभावाधिकरणम् ॥ १३ ॥

संवपनञ्च तादर्थ्यात् ॥ ५२ ॥

सौर्य एव चरुरुदाहरणम् । प्रकृतौ श्रूयते, सवितृप्रसूत इत्येवैनं देवताभिः संवपतीति । इह चरौ सन्देहः । संवपनं कर्त्तव्यं, न ? इति । किं प्राप्तम् । शक्यत्वाच्चोदकानुग्रहाय कर्त्तव्यमिति । एवं प्राप्ते ब्रूमः । संयवितुं हि तत् प्रकृतौ क्रियते, न चरोः संवप्तव्येन प्रयोजनम् ॥ ५२ ॥ सौर्यचरौ संवपनाभावाधिकरणम् ॥ १४ ॥

सन्तापनमधःश्रपणात् ॥ ५३ ॥

चरावेव च सन्देहः । प्रकृतौ सन्तापनं कपालानामस्ति, वसूनां

रुद्राणामादित्यानां भृगूणामङ्गिरसां धर्म्मस्य तपसा तप्यध्वमिति । चरौ सन्तापनं कर्त्तव्यं, न ? इति सन्देहः । प्रकृतिवद्वचनात् कर्त्तव्यमिति प्राप्तम् । अधःपाकार्थं हि तत् । तस्मान्न चरौ चोदकः प्रापयति ॥ ५३ ॥ सौर्यचरौ संतापनाभावाधिकरणम् ॥ १५ ॥

उपधानञ्च तादर्थ्यात् ॥ ५४ ॥

चरावेव कपालोपधानं प्रति सन्देहः । कर्त्तव्यं ? न ? इति । प्रकृतिवद्वचनात् प्राप्तम् । अधःपाकार्थत्वान्निवर्त्तते इति ॥ ५४ ॥ सौर्यचरावुपधानाभावाधिकरणम् ॥ १६ ॥

पृथुश्लक्ष्णे वानपूपत्वात् ॥ ५५ ॥

पृथुश्लक्ष्णे च प्रति चरोरेव सन्देहः । प्रकृतौ श्रूयते, उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयति । सं ते तन्वा तनूः सृज्यतामिति त्रिभिः परिमार्ष्टि । तदुभयं चरौ कर्त्तव्यं, न ? इति । चोदकानुग्रहाय कर्त्तव्यमिति प्राप्ते । अनपूपत्वात् तद् निवर्त्तते ॥ ५५ ॥ सौर्यचरौ पृथुश्लक्ष्णाभावाधिकरणम् ॥ १७ ॥

अभ्यूहश्चोपरिपाकार्थत्वात् ॥ ५६ ॥

प्रकृतौ श्रूयते, वेदेन भस्मनाङ्गारान् अभ्यूहतीति । तत् सौर्ये चरौ कर्त्तव्यं, न ? इति सन्देहः । प्रकृतिवद्वचनात् कर्त्तव्यमिति प्राप्ते ब्रूमः । उपरिपाकार्थं हि तत् पुरोडाशस्यावकल्पते, न चरोरिति निवर्त्तते ॥ ५६ ॥ सौर्यचरावभ्यूहाभावाधिकरणम् ॥ १८ ॥

तथाऽवज्वलनम् ॥ ५७ ॥

दर्शपूर्णमासयोः श्रूयते, दर्भपिञ्जूलैरज्वलयतीति । सौर्ये चरौ सन्देहः । किं तत् कर्त्तव्यं, न ? इति । किं प्राप्तम् । प्रकृतिवद्वचनात् कर्त्तव्यम् । उपरिपाकार्थत्वान्निवर्त्तते इति ॥ ५७ ॥ सौर्यचरावज्वलनाभावाधिकरणम् ॥ १९ ॥

व्युद्धृत्यासादनञ्च प्रकृतावश्रुतित्वात् ॥ ५८ ॥

प्रकृतौ श्रूयते, अन्तर्वेद्यां हवींष्यासादयतीति । तत् प्रकृतौ कपालेभ्यो व्युद्धृत्यासादनं क्रियते । सौर्ये चरौ सन्देहः । किं स्थाल्या व्युत्थाप्य चरुरासादयितव्यः ? उत व्युत्थानंनकर्त्तव्यमिति । प्रकृतौ कृतत्वाच्चरावपि कर्त्तव्यमिति प्राप्तम् । तदुच्यते । व्युद्धृ-

स्थासादनञ्च प्रकृतावश्रुतित्वात् । प्रकृतौ न श्रूयते । कपालेभ्यो व्युद्धृत्यासादयितव्यः पुरोडाश इति । अर्थात् स व्युद्ध्रियते । यच्चार्थात् कृतं न स चोदनार्थः । तस्माच्चरौ व्युद्धरणं न कर्त्तव्यम् । अपि चोद्धरणे क्रियमाणे कपित्थवत् परिशोष्य उद्ध्रियेत । तत्र पात्रभेदः स्यात् । तस्माद् व्युद्धृत्यासादनं चरौ न कर्त्तव्यमिति ॥ ५८ ॥ सौर्यचरौ व्युद्धृत्यासादनाभावाधिकरणम् ॥ २० ॥

इति भट्टश्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये दशमस्य अध्यायस्य प्रथमः पादः ॥ १० ॥ १ ॥

अथ दशमे अध्याये द्वितीयः पादः ॥ १० ॥ २ ॥

कृष्णलेष्वर्थलोपादपाकः स्यात् ॥ १ ॥

प्राजापत्यं चरुं निर्वपेद् घृते शतकृष्णलमायुष्काम इति । तत्र सन्देहः । किं चोदकेन पाकः प्राप्यते कर्त्तव्यश्च । उत न प्राप्यते, न कर्त्तव्यः ? इति । किं तावत् प्राप्तम् । कृष्णलेषु पाको न स्यात् । प्रकृतौ हि पुरोडाशार्थः पाकः । इहान्तरेणपि पाकं, कृष्णलानि कृष्णलान्येव भवन्ति । तस्माच्च प्राप्यते । अतो न कर्त्तव्य इति॥१॥पूर्व०

स्याद्वा प्रत्यक्षशिष्टत्वात् प्रदानवत् ॥ २ ॥

स्याद्वा पाकः । चोदकेन तु न प्राप्यते । प्रत्यक्षन्तु अस्य शासनं, घृते श्रपयतीति । प्राकृतस्य कार्यस्यार्थे न भवति, वचनप्रामाण्याद्दृष्टार्थो भवति । यथा तेषामेवानदनीयानां प्रत्यक्षशासनात् प्रदानम् । एवं पाकोऽपीति ॥ २ ॥ सिद्धान्तः ॥ कृष्णले चरौ पाकाऽनुष्ठानाधिकरणम् ॥ १ ॥

उपस्तरणाभिघारणयोरमृतार्थत्वादकर्म स्यात् ॥ ३ ॥

कृष्णलचरावेव सन्देहः । ये प्रकृतावुपस्तरणाभिघारणे, यदुपस्तृणात्यभिघारयत्यमृताहुतिमेवैनां करोतीति । ते उपस्तरणाभिघारणे कृष्णलचरौ कर्त्तव्ये, न ? इति एष संशयः । किं प्राप्तम् । उपस्तरणाभिघारणयोर्न क्रिया । कुतः । अमृतार्थत्वात् । अमृतार्थत्वेन हि ते क्रियेते । यदुपस्तृणात्यभिघारयति अमृताहुतिमेवैनां करोतीति अमृतेनोपमिमानः स्वादुभावार्थतां तयोर्दर्शयति । न च कृष्णलेषु स्वादुभावः सम्भवति । तस्माद् अक्रियेति ॥ ३ ॥ सि० ॥

क्रियेत वार्थवादत्वात्तयोः संसर्गहेतुत्वात् ॥ ४ ॥

क्रियेत वा उपस्तरणमभिघारणञ्च । विधेः प्रकारान्तरेऽतिदेशात् सर्वकर्म स्यादिति । यदुक्तं, स्वादुत्वार्थे ते क्रियेते इति । न स्वादुतार्थः प्रकृतौ श्रुतः । स्वादुः कर्त्तव्य इति । तस्मादर्थवादः । अमृताहुतिमेवैनां करोतीति । संसर्गमात्रमाज्यस्य क्रियते हविषश्च । तच्च कृष्णलेष्वपि शक्यं कर्त्तुम् । तस्मादनिवृत्तिः ॥ ४ ॥ पूर्व० ॥

अकर्म वा चतुर्भिराप्तिवचनात् सह पूर्णं पुनश्चतुरवत्तम् ॥ ५ ॥

वाशब्दः पक्षं व्यावर्त्तयति । अक्रिया तयोरिति । कुतः । चतुर्भिराप्तिवचनात् । चत्वारिकृष्णलान्यवद्यतीति । कोऽभिप्रायः । चत्वारि कृष्णलानि चत्वारि अवदानानि । एकैकं कृष्णलम्, एकैकस्यावदानस्य स्थाने । तेनोपस्तरणाभिघारणयोर्निवृत्तिः । तथा चाप्तिवचनं भवति । चत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याप्त्यै इति । अविद्यमानस्यार्थान्तरेणानुग्रहो भवति । तस्मान्निवृत्तिरेतयोः । सह पुनरुपस्तरणाभिघारणाभ्यां पूर्णं चतुरवत्तमेव स्यात् । तत्राप्तिवचनं व्याहन्येत ॥ ॥ ५ ॥ उत्तरम् ॥

क्रिया वा मुख्यावदानपरिमाणात् सामान्यात् तद्गुणत्वम् ॥ ६ ॥

क्रिया वा तयोश्चोदकानुग्रहाय । मुख्यावदानस्य हि प्रकृतौ परिमाणमुक्तम् । अङ्गुष्ठपर्वमात्रं देवतानामवद्यतीति । इहापि कृष्णलशब्दः परिमाणवचनः श्रूयते । स चतुःसङ्ख्ययाऽनुबद्ध्यते, चत्वारि कृष्णलान्यवद्यतीति । न यानि चत्वारि अवदानानि तानि कृष्णलपरिमाणानि भवन्तीति । हिरण्यपरिमाणवचन एष कृष्णलशब्दो नाज्यस्य परिमाणं वदितुमुत्सहते । तच्च परिमाणं न द्रव्यं निवर्त्तयति । न हि द्रव्यकार्येषु गुणो वर्त्तितुमर्हति । परिमाणं यत् प्राकृतं तस्य कार्ये वर्त्तमानं तन्निवर्त्तयेत् । यथा, इदं दधि घृतं शाकम् इमे शालयः, देवदत्तो भोज्यतां देवदत्तवद् यज्ञदत्तस्तैलेनेति । तैलं हि भोजने स्नेहनेनोपकरोति, तत् स्नेहनार्थं प्राकृतं निवर्त्तयितुमर्हति घृतं, न शाकं दधि च ओदनं वा । एवमिहापि परिमाणं मुख्यावदानं परि-

मिमीते, न द्रव्यं निवर्त्तयेत् । प्रकरणात्तु मुख्यपरिमाणं स्याद्, न उपस्तरणाभिघारणयोः तस्मात्तयोरनिवृत्तिरिति ॥ ६ ॥ पूर्व० ॥

तेषां चैकावदानत्वात् ॥ ७ ॥

चतुर्णां चैकावदानतां दर्शयति । चत्वारि कृष्णलान्येकमवदानमिति । इतरथा चत्वारि अवदानानि अभविष्यन् । तत्रैकावदानवचनमुपरोत्स्यते । तस्मादप्यनिवृत्तिरिति ॥ ७ ॥ युक्तिः ॥

आप्तिः संख्यासमानत्वात् ॥ ८ ॥

अथ यदुक्तम्, आप्तिवचनं भवतीति, चतुःसङ्ख्यासंस्तुतिरेषा । एवं चतुःसङ्ख्याया माहात्म्यं यदेकस्मिन्नवदाने चत्वारि अवदानानि भवन्तीति । यथा, यद्वैश्वदेवः प्रातःसवने गृह्यते, प्रातःसवने वा एतद्वैश्वदेवयज्ञं संस्थापयतीति वैश्वदेवसंस्तुतिर्न अन्यसवननिवृत्तिः । एवमिहापि चतुःसङ्ख्यासंस्तवो, नोपस्तरणाभिघारणयोर्निवृत्तिरिति ॥ ८ ॥ परिहारः ॥

सतोस्त्वाप्तिवचनं व्यर्थम् ॥ ९ ॥

तुशब्द एनं चतुःसङ्ख्यासंस्तवं व्यावर्त्तयति । न हि विद्यमानयोरुपस्तरणाभिघारणयोस्तदाप्तिवचनेन कश्चित् संस्तवोऽस्ति । यद्यऽविद्यमानमापयतीत्युच्यते, ततो गुणवानित्युक्तो भवति । तत्र संस्तूयते । अथ विद्यमानमापयतीति अनर्थको भवतीत्युक्तं भवति, न संस्तवः । तस्माद्विद्यमानयोरुपस्तरणाभिघारणयोराप्तिवचनं व्यर्थमेव । अन्यः परिहारो वक्तव्यः ॥ ९ ॥

विकल्पस्त्वेकावदानत्वात् ॥ १० ॥

तुशब्द आप्तिवचनान्निवृत्तिरुपस्तरणाभिघारणयोरित्येतन्निवर्त्तयति । यथा भवान् ब्रूते, आप्तिवचनाल्लिङ्गान्निवृत्तिरेतयोरिति, एवमेकावदानवचनाल्लिङ्गादनिवृत्तिरेतयोरिति लिङ्गविकल्पः । लिङ्गविकल्पाच्च नैकान्ततो निवृत्तिमाप्तिवचनं कर्त्तुमर्हति ॥१०॥ परिहारः॥

सर्वविकारे त्वभ्यासानर्थक्यं हविषो हीतरस्य स्यादपि वा स्विष्टकृतः स्यादितरस्यान्याय्यत्वात् ॥ ११ ॥

तुशब्द आप्तिवचनं बाधते । आप्तिवचने बाधिते सति चतुर्षु कृष्णलेषु सर्वावदानविकारेष्वभ्यासोऽनर्थकः स्यात् । चत्वारि

चत्वारि कृष्णलान्यवद्यति समृद्ध्यै इति। अस्मत्पक्षे पुनरितरद्धविर्द्वितीयमवदानमपेक्ष्याभ्यासोऽवकल्पिष्यते । अथ मतम्, एतन्ममापि स्विष्टकृतमपेक्ष्याभ्यासे भवतीति । तन्नैवम् । इतरस्य स्विष्टकृतोऽपेक्षणमन्याय्यम् । प्रकरणात् प्रधानमभिसम्बद्ध्यते वचनेन । न च स्विष्टकृतः प्रकरणम् । चोदकेन हि स प्राप्यते । तस्मात् त्वत्पक्षेऽभ्यासोऽनर्थक एव । उपस्तरणाभिघारणे कर्त्तव्ये एव ॥ ११ ॥ परिहारनिरासः ॥

अकर्म वा संसर्गार्थनिवृत्तित्वात् तस्मादाप्तिसमर्थत्वम् ॥ १२ ॥

अक्रिया उपस्तरणाभिघारणयोः। कुतः। संसर्गः स्रुचि पुरोडाशचूर्णानां सूक्ष्माणां मा भूदिति । उपस्तरणेन स्रुक् स्निग्धीक्रियते, अभिघारणेन हविः स्रुचि असंयुक्तं कृत्स्नं यथा अग्नौ पतेदिति । न तु विशदस्य कृष्णलस्य स्रुचि संयोगो भवति, यन्निमित्तमुपस्तरणमभिघारणञ्च स्नेहनार्थं सुवर्णस्य क्रियेत । तस्मात् प्राकृतस्य प्रयोजनस्य निवृत्तत्वात् कृष्णलेषु उपस्तरणाभिघारणे निवर्त्तितुमर्हतः । एवञ्चाप्तिवचनमुपपन्नं भविष्यति । चत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याप्त्यै इति ॥ १२ ॥ पूर्वपक्षोत्तरपक्षौ ॥ कृष्णले उपस्तरणाऽभिघारणयोरभावाधिकरणम् ॥ २ ॥

भक्षाणान्तु प्रीत्यर्थत्वादकर्म स्यात् ॥ १३ ॥

शतकृष्णलश्चरुरुदाहरणम् । सन्ति प्रकृतौ भक्षाः, इडाप्राशित्रचतुर्द्धाकरणशंयुवाककालाः । तेषु संशयः । कृष्णलचरौ ते भक्षाः कर्त्तव्याः ? उत न ? । किं प्राप्तम् । न कर्त्तव्याः । प्रीत्यर्थं हि प्रकृतौ ते कृताः, सामर्थ्यं जनयिष्यन्तीति । न तु हिरण्यं प्रीतिमुत्पादयति भक्ष्यमाणम् । अतो न कर्त्तव्याः ॥ १३ ॥ पूर्व० ॥

स्याद्वा निर्द्धानदर्शनात् ॥ १४ ॥

स्याद्वा हिरण्यस्य भक्षः । भक्षणविशेषदर्शनात् । निरवधयन्तो भक्षयन्ति चुक्षुषाकारं भक्षयन्तीति प्राप्ते भक्षे केवलं भक्षोपायं विधास्यति शब्द इति । इतरथा भक्षोपायं भक्षणञ्च विकृतौ विदध्यात् । तत्र वाक्यं भिद्येत । तस्माच्चोदकेन प्राप्यते भक्ष इति ॥ १४ ॥ सि० ॥

वचनं वाज्यभक्षस्य प्रकृतौ स्यादभागित्वात् ॥१५॥

न त्वेतदस्ति, प्राप्यन्ते भक्षा इति । अर्थलोपादेषां निवृत्तिः । यत्तु, भक्षणे विशेषवचनं भवतीति । वचनादेतदाज्यस्य भविष्यति । निरवधयन्तो भक्षयन्त्याज्यमिति, चुक्षुषाकारं भक्षयन्त्याज्यमिति । निर्द्धानं चुक्षुषाकारं चार्थप्राप्तं भक्ष्यमाणस्यानूद्यत इति न वाक्यभेदः ॥ १५ ॥ आ० ॥

वचनं वा हिरण्यस्य प्रदानवदाज्यस्य गुणभूतत्वात् ॥ १६ ॥

सत्यम् । वचनमेतद्धिरण्यस्य, न त्वाज्यस्य । कुतः । भक्षयन्तीत्येतावच्छ्रूयते । नेदं वा तद्वा इति । तत्र यन्निर्दिष्टं प्रकृतं, तस्य तेन सम्बन्धो भवतीति । हिरण्यं चात्र निर्दिश्यते, नाज्यम् । कथम् । प्राजापत्यं चरुं निर्वपेद्घृते शतकृष्णलमिति शतकृष्णलश्चरुरत्र कार्यसम्बन्धार्थमुच्यते । तद्विशेषणार्थेन घृतं, नस्वनिर्देशार्थेन । तस्माच्चरुरेवं शब्दान्तरैः सम्बद्ध्यते, न घृतम् । तद्यथा एष दण्ड इष्टकाकूटे तिष्ठति प्रहरानेनेति; दण्डेनेति गम्यते, नेष्टकाकूटेनेति । एवमिहापि चरुभक्षणवचनेन सम्बद्ध्यते, न घृतम् । तस्माच्चरोर्भक्षणं प्रदानवत् । यथा तेषामेव कृष्णलानाम् अनदनीयानां प्रदानं क्रियते, एवमत्राऽपि द्रष्टव्यमिति ॥ १६ ॥ ॥ आ० नि० ॥ कृष्णलचरौ भक्षसद्भावाऽधिकरणम् ॥ ३ ॥

एकधोपहारे सहत्वं ब्रह्मभक्षाणां प्रकृतौ विहृतत्वात् ॥ १७ ॥

तत्रैव श्रूयते, एकधा ब्रह्मणे परिहरतीति । तत्र सन्देहः । किमेतत् सहत्वम् ? उत सकृत्त्वमिति । किं प्राप्तम् । सकृत्त्वं वा, सहत्वं वा, अनियम इति । कुतः । एकप्रकारवचन एकधेति शब्दः । सकृत्त्वमप्येकः प्रकारः, सहत्वमपि । तद्यथा, यः सकृद् गाः प्रापयति स एकधा प्रापयतीत्युच्यते । योऽपि सह प्रापयति सोऽप्येकधा प्रापयतीति । तस्मात् सकृत्त्वं सहत्वं वा कर्त्तव्यमिति ॥ एवं प्राप्ते ब्रूमः । एकधा ब्रह्मणे परिहरतीति । सहेति गम्यते । एवं ब्रह्मभक्षस्याब्रह्मभक्षस्यापि परिहारः कृतो भविष्यति । इतरस्मिन् पक्षे कस्यचिद् ब्रह्मभक्षस्य परिहारो न क्रियेत । तत्र प्राकृतः प्रयोगवचनो बाध्येत ।

विहृताश्चामी भक्षाः प्रकृतौ । ते इह चोदकेन विहृता एव प्राप्ताः । तत्र सहत्ववचनं एकधाशब्दोऽवकल्पते । ननु वाचनिक इह भक्षोऽप्राकृतः, न प्राकृता विहृताः प्राप्तुमर्हन्तीति । उच्यते । पुरुषसंस्कारार्थत्वेन न प्राप्नुवन्ति, द्रव्यसंस्कारार्थत्वेन तु प्राप्नुवन्तीति । यदि प्राप्नुवन्ति, किमर्थं तर्हि वचनम् ? इति । भक्षोपायविधानार्थम् । ननु निर्धानं चुक्षुषाकरणं वाऽर्थप्राप्तम् । अर्थप्राप्तत्वादनुवादः । उच्यते । न नियमेन प्राप्यते । नियमार्थश्च विधीयते इति ॥ १७ ॥ कृष्णलचरौ एकधा ब्रह्मणे चरतीत्यनेन सहपरिहारविधानाधिकरणम् ॥ ४ ॥

सर्वत्वं च तेषामधिकारात् स्यात् ॥ १८ ॥

कृष्णलचरुरेवोदाहरणम् । तत्र श्रूयते । सर्वं ब्रह्मणे परिहरतीति । तत्र सन्देहः । किं ब्रह्मभक्षाणामेवैष परिहारः, उत पुरुषेभ्यः शेषापनय इति । कथं ब्रह्मभक्षाणां परिहारः ? कथं वा शेषापनय इति । यदि ब्रह्मणे परिहरतीत्यनूद्य सर्वमिति विधीयते, ब्रह्मणे सर्वमिति वानूद्य परिहरतीति विधीयते, ततो ब्रह्मभक्षाणां परिहारः । अथ सर्वमिति लक्षयित्वा ब्रह्मणे परिहरतीति विधीयते, परिहरतीति वा लक्षयित्वा सर्वं-ब्रह्मणे इति । ततः शेषापनयः । किं प्राप्तम् । सर्वत्वं ब्रह्मभक्षाणां स्यात् । कुतः । ब्रह्मणे परिहरतीति प्राप्तमेव न विधीयते । सर्वपरिहारस्तु अप्राप्तः । तस्य विधानं भवितुमर्हति ॥

अथ वा अस्त्येव ब्रह्मणे सर्वो भागः । तत्र कस्यचिद्भागस्यप रिहारः प्राप्तः, कस्यचिन्न प्राप्तः । यस्य च न प्राप्तस्तस्य परिहारो विधीयते । तस्मादधिकृतानां ब्रह्मभक्षाणामेष वाद इति ॥ १८ ॥ पूर्व० ॥

पुरुषापनयो वा तेषामवाच्यत्वात् ॥ १९ ॥

वाशब्दः पक्षं व्यावर्त्तयति । पुरुषापनयः स्यात् । यद्येवमुच्येत । यद् ब्रह्मणे परिहरति, तत् सर्वमिति । सर्वमेव हि तद्विधानमनर्थकं स्यात् । अथ यद् ब्रह्मणे, तत् सर्वं परिहरतीति । विशेष्यस्यानिर्देशाद् न ब्रह्मशब्दो विशेषणम् । अथ यद् ब्रह्मणे, सर्वं तत् परिहरतीति । एवमपि विशेष्यो नैव निर्दिष्टः स्यात् । यत् सर्वं तत् परिहरतीति । नैवं वचनमर्हति । सर्वं हि सर्वम् । ततश्च विशेषयितव्यम् । तस्मात् सर्वं ब्रह्मणे परिहरतीति ब्रह्मसम्बन्धः सर्वस्य विधीयते चरोः । एवं न किञ्चिदनर्थकम् । तस्मात् पुरुषेभ्यः शेषापनय इति ॥ १९ ॥ सि०

कृष्णलचरौ ब्रह्मणे सर्वभक्षभागार्पणाधिकरणम् ॥ ५ ॥

पुरुषापनयात् स्वकालत्वम् ॥ २० ॥

तत्रैव सन्देहः। समधिगते शेषापनये किमेकस्मिन् काले सर्वे भक्षा भक्षयितव्याः, उत स्वस्मिन् स्वस्मिन् काले ? इति। किं प्राप्तम्। भक्षयितुं तत्परिहरणं क्रियते। अतो यद् भक्षणाय परिहृतं तदनन्तरं भक्षयितव्यमेव ॥ एवं प्राप्ते ब्रूमः, पुरुषापनयात् स्वकालत्वमिति। पुरुषापनयं कृत्वा कृतार्थः शब्दः स्वकालतां भक्षणानां न निवारयति। तस्माद्यथाकालमेव भक्षयितव्या इति ॥ २० ॥ ॥ भक्षभागानां स्वस्वकाले ब्रह्मणा भक्षणाधिकरणम् ॥ ६ ॥

एकार्थत्वादविभागः स्यात् ॥ २१ ॥

तत्रेदं चिन्त्यते। प्रकृतौ व्यादेश आम्नातः। इदं ब्रह्मण इदं होतुरिदमध्वर्य्योरिदमग्नीध इति। स इह कर्त्तव्यो ? न कर्त्तव्य इति संशयः। चोदकप्राप्त्या कर्त्तव्य इति यस्य बुद्धिः स्यात्, तस्य निवृत्त्यर्थं सूत्रम्। प्रकृतौ बहूनां सम्बन्धः कर्त्तव्यः। स विभागमन्तरेण सिद्ध्यतीति विभागो बहुसम्बन्धाय क्रियते। इह तु सर्वं ब्रह्मणे परिहरतीत्येकस्मै सर्वश्चरुः। तत्र विभागेन न प्रयोजनम्। क्रियमाणोऽपि न प्राकृतार्थः स्यात्। अदृष्टार्थमेव क्रियेत। तस्मात् कृष्णलचरौ न व्यादेश इति ॥२१॥ ब्रह्मभक्षे चतुर्धाकरणादीनामभावाधिकरणम् ७

ऋत्विग्दानं धर्ममात्रार्थं स्याद्ददातिसामर्थ्यात् ॥२२॥

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेतेति। तत्रेदं समामनन्ति, गौश्च अश्वश्च अश्वतरश्च गर्दभाश्च अजाश्च अवयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा। इदं चापरं श्रूयते। ऋत्विग्भ्यो दक्षिणां ददातीति। तत्र संशयः। किं दानं धर्ममात्रम् ? उत ऋत्विगानमनमिति। किं प्राप्तम्। ऋत्विग्दानं धर्ममात्रं स्यात् तस्य हि कर्त्तव्यता श्रूयते। ददातिकर्त्तव्यता अस्माच्छब्दाद् गम्यते। ऋत्विगानमनं कर्त्तव्यं वाक्याद्गम्यते। श्रुतिश्च वाक्याद् बलीयसी। लोकेऽपि अदृष्टार्थतैव ददातेर्गम्यते इति सामर्थ्यादेव नानमनादि। अपि च कर्मानुरूपमपि दाक्षिण्यं क्वचिच्छ्रूयते। त्रैधातव्यायां सहस्रमृतपेये सोमचमसः। अपि च यत्रोच्चनीचपणीपणः क्रियते स परिक्रयो भवति, न यत्र नियतपरिमाणं दान-

म् । तस्माद्धर्ममात्रं दानम् । अपि च नियमवन्मन्त्रवच्च क्रियते । तददृष्टार्थत्वेनावकल्पते । क्वचिच्च श्रूयते । दण्डः, उपानहौ, शुष्का इतिः, सा हि दाक्षिणा इति । को हि दण्डेनानमेत् ? । तस्माद् धर्ममात्रं दानमिति ॥ २२ ॥ पूर्व० ॥

परिक्रयार्थं वा कर्मसंयोगाल्लोकवत् ॥ २३ ॥

परिक्रयार्थं वा दानम् । कुतः । कर्मसंयोगात् । कर्मसंयुक्तेभ्यः श्रूयते । ऋत्विग्भ्यो दक्षिणां ददातीति । तत्र दृष्टं प्रयोजनमुत्सृज्य न शक्यमदृष्टं कल्पयितुम् । यदपि नियमाददृष्टं, तदपि दृष्टद्वारमेव । अनेन नियतेन नियतगुणकेन दानेनानम्यमाना ऋत्विजोऽभ्युदयकारिणो भवन्ति । कथम् । आनमने गुणभूतस्त्यागश्चोद्यते, न प्रधानभूतः । वाक्यार्थश्चावश्यं ग्रहीतव्यः । इतरथा ऋत्विग्भ्य इत्येतदेव पदमनर्थकं स्यात् । अगृह्यमाणे सुतरां श्रुतिर्बाध्येत । यच्च, न कर्मानुरूपं दाक्षिण्यमिति । नैतावताऽदृष्टोऽर्थः सन्नपह्नूयेत । नियमाद् दृष्टद्वारमदृष्टमित्युक्तमेव । वचनप्रामाण्याच्च दण्डोऽवगम्यते । अपि च भवति तत्र या च यावती चानमनमात्रा। लोकेऽपि हि काष्ठवाहप्रभृतिभ्यो यद्दीयते, तदसङ्कीर्तितेऽपि परिक्रये आनमनार्थमेव भवति । तस्मात् परिक्रयार्थं दक्षिणादानमिति ॥ २३ ॥ सि० ॥

दक्षिणायुक्तवचनाच्च ॥ २४ ॥

दक्षिणायुक्तवचनाच्च लिङ्गात् परिक्रयार्थं दानमिति पश्यामः । दक्षिणायुक्ता वहन्ति ऋत्विज इति ॥ २४ ॥

न चान्येनानम्येत परिक्रयात् कर्मणः परार्थत्वात् ॥ २५ ॥

इतश्च परिक्रयार्थं दानमिति । कुतः । नान्तरेण परिक्रयं, परार्थे परः प्रवर्त्तते । ननु सामादयोऽपि प्रवर्त्तनोपायाः । न ब्रूमो, न प्रवर्त्तनोपाया इति । किन्तर्हि । परिक्रयः प्रत्यक्षमाम्नात इति । अतस्तेनैव परिक्रेतव्या, नान्येनेति ॥ २५ ॥

परिक्रीतवचनाच्च ॥ २६ ॥

परिक्रीतवचनं भवति, तेनायमर्थो द्योत्यते । दीक्षितमदीक्षिता दक्षिणापरिक्रीता ऋत्विजो याजयन्तीति । तस्मादपि परिक्रयार्थं दानमिति ॥ २६ ॥

सन्निबन्ध्येव भृतिवचनात् ॥ २७ ॥

सन्निबन्निप्राप्तं सन्निबन्ध्यं याच्ञाप्राप्तमित्यर्थः । तस्मिन् भृतिवचनं भवति । यज्ञो वै देवतानां न समभवत्, तं भृत्या समभावयन् । यद् भृतिं वनुते, यज्ञस्य भृत्यै द्वादशरात्रीर्दीक्षितो भृतिं वन्वीतेति । यज्ञार्थं यद् भिक्षितं ऋत्विजः परिक्रेतुम, अन्यच्च यज्ञार्थं साधयितुं, तस्मिन्नेव भृतिवचनम् । भृतिश्च कर्मकरेभ्य आनत्यर्थं यद्दीयते । तस्मादपि परिक्रयार्थम् ऋत्विग्भ्यो दानमिति ॥ २७ ॥

नैष्कर्तृकेण संस्तवाच्च ॥ २८ ॥

नैष्कर्तृकेण च संस्तवो भवति । यथा वै दारुहारो नैष्कर्तृको निष्कर्त्तनभूतः कर्म्मयोगे वर्त्तते, एवं वा एते यज्ञस्य ऋत्विज इति । नैष्कर्तृको दारुहारः । यथाऽसौ, एवमृत्विज इति ब्रुवन् परिक्रयार्थं दानं दर्शयति ॥ २८ ॥ युक्तिः ॥ ज्योतिष्टोमे ऋत्विग्दानस्यानत्यर्थता-ऽधिकरणम् ॥ ८ ॥

शेषभक्षाश्च तद्वत् ॥ २९ ॥

सन्ति शेषभक्षा ज्योतिष्टोमे दर्शपूर्णमासयोश्च । यथा वषट्कार-निमित्ता होमाभिषवनिमित्ताश्च । तथा इडाप्राशित्रचतुर्द्धाकरण-शंयुवाककालाः । तेषु संशयः । किं ते परिक्रयार्थाः ? उत न इति । किं प्राप्तम् । शेषभक्षाश्च तद्वद् भवितुमर्हन्ति, यद्वद् दक्षिणादानम् । प्रीतिं हि करोति भक्षणं, प्रीतया चानमन्ति । तस्मात् परिक्रयार्थाः शेषभक्षा इति ॥ २९ ॥ पूर्व० ॥

संस्कारो वा द्रव्यस्य परार्थत्वात् ॥ ३० ॥

वाशब्दः पक्षं व्यावर्त्तयति, न परिक्रयार्थं भक्षणम् । द्रव्यसं-स्कारार्थमिति । कुतः । यज्ञार्थेन हि द्रव्यमुत्पन्नं प्रयोजनवत् । यदि तस्य संस्कारार्थं भक्षणं, ततस्तदपि प्रयोजनवत् । दक्षिणार्द्धो-न्मध्याच्चावद्यतीत्येवमादि चैकदेशवचनं प्रकृतशेषापेक्षं भवति, न द्रव्यस्योत्पादकम् । तस्माद् द्रव्यस्य भक्षणमुच्यते, न भक्षणार्थं द्रव्यमुपादीयते । प्रकृतस्य च भक्षणम् । तस्मात् संस्कारार्थमिति गम्यते ॥ ३० ॥ सि० ॥

शेषे च समत्वात् ॥ ३१ ॥

अपि च यच्छेषं द्रव्यं, तद् देवतायै सङ्कल्पितं यजमानेन न

स्वयमुपयोक्तव्यमिति । तस्मान्न तस्योपयोक्तुम् ऋत्विज ईशते, नो खल्वपि यजमानः । स्वाम्यमत्र यजमानस्य ऋत्विग्भिः । परिक्रीणानश्च स्वीकुर्य्याद् द्रव्यम् । तत्रास्य देवतार्थः सङ्कल्प एव नावकल्पते । तस्मादपि न परिक्रयार्थं भक्षणमिति ॥ ३१ ॥

स्वामिनि च दर्शनात् तत्सामान्यादितरेषां तथात्वम् ॥ ३२ ॥

स्वामिनि च भक्षणं दृश्यते । यजमानपञ्चमाः समुपहूता इडां भक्षयन्तीति । यजमानस्य असंशयम् अपरिक्रयः । तत्सामान्यादितरेषामपि न परिक्रयः । कथम् । एवं सति नैव विज्ञायते, इडाभक्षणेन यजमानपञ्चमाः परिक्रीयन्त इति । किं तत् सामान्यम् । द्वितीया विभक्तिः । तस्मादपि न परिक्रयार्थं भक्षणमिति ॥ ३२ ॥

तथा चान्यार्थदर्शनम् ॥ ३३ ॥

एवमन्यार्थदर्शनमिदमुपपन्नं भवति । कुण्डपायिनामयने अत्सरुकैश्चमसैः सोमान् भक्षयन्तीति प्राप्ते भक्षे विशेषः श्रूयते– अत्सरुकैरिति । एवं सत्रेषु भक्षणं दृश्यते । तत्परिक्रयार्थत्वे नावकल्पते । तस्मादपि न परिक्रियार्थं भक्षणमिति ॥ ३३ ॥ युक्तिः ॥ ज्योतिष्टोमे भक्षस्य प्रतिपत्त्यर्थताधिकरणम् ॥ ९ ॥

वरणमृत्विजामानमनार्थत्वात् सत्रे न स्यात् स्वकर्मत्वात् ॥ ३४ ॥

सन्ति द्वादशाहप्रभृतीनि सत्राणि, द्वादशाहमृद्धिकामा उपेयुरित्येवमादीनि । अस्ति च प्रकृतौ ज्योतिष्टोमे वरणम् । अग्निर्मे होता स मे होता होतस्त्वं मे होतासीति होतारमित्येवमादीति । तत् सत्रेषु सन्दिह्यते । किं कर्त्तव्यं, न ? इति । तत एतत् तावन्नः परीक्ष्यम् । किं प्रकृतौ धर्ममात्रं वरणम्, उत परिक्रियार्थमिति । यदि धर्ममात्रं, प्रकृतौ सत्रेषु कर्त्तव्यम् । अथ परिक्रियार्थं, न कर्त्तव्यमिति । किं प्राप्तम् । मन्त्रवन्नियमवच्चेति कृत्वा धर्ममात्रम् । तस्मात् सत्रेषु कर्त्तव्यमिति ॥ एवं प्राप्ते ब्रूमः । वरणमृत्विजां सत्रेषु न स्यात् । न कर्त्तव्यमिति । स्वार्थं हि तेषां कर्म । न च कश्चिदात्मानं वृणीते । प्रकृतौ चानमनाऽर्थं वरणं दृष्टप्रयोजनमिति न शक्यमदृष्टं कल्पयितुम् । तस्मात् सत्रेषु

वरणं न स्यादिति ॥ ३४ ॥ सत्रे ऋत्विग्वरणाभावाधिकरणम् ॥१०॥

परिक्रयश्च तादर्थ्यात् ॥ ३५ ॥

परिक्रयश्च प्रकृतौ ज्योतिष्टोमे आम्नातः। गौश्च अश्वश्च अश्वतर-श्च गर्दभश्च अजाश्च अवयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा इति। तद्दाक्षिण्यं सत्रे चोदकेन प्राप्तं किं कर्त्तव्यं निवृत्तं वा इति संशयः। किं प्राप्तम्। कर्त्तव्यः परिक्रयश्चोदकानु-ग्रहाय। अपि च तत्र गवादयः प्रतिषिध्यन्ते, न ह्यत्र गौर्दीयते, न वासो न हिरण्यमिति। तत् सति परिक्रयेऽवकल्पते। एवं प्राप्ते ब्रूमः, परिक्रयश्च तादर्थ्यादिति। परिक्रयश्च न कर्त्तव्यः। उक्तमधस्ताद् वरणं सत्रेषु न कर्त्तव्यमिति। परिक्रयश्चेति च-शब्देनान्वादेशः क्रियते, न कर्त्तव्यः परिक्रयः। कुतः। आत्मार्थत्वात्। न कश्चिद् आत्मानं परिक्रीणीते इति ॥ ३५ ॥

प्रतिषेधश्च कर्मवत् ॥ ३६ ॥

प्राप्तौ सत्यां प्रतिषेधोऽवकल्पते इति यदुक्तं, तत् परिहर्त्त-व्यम् ॥ ३६ ॥ आ० ॥

स्याद्वा प्रासर्पिकस्य धर्ममात्रत्वात् ॥ ३७ ॥

प्रतिषेध उपपद्यत इत्यर्थः। कस्य। प्रासर्पिकस्य दानस्येति। धर्ममात्रं हि तत् सत्रेषु चोदकप्राप्तं, तन्निवर्त्तते। तस्मादुपपन्नः प्र-तिषेध इति ॥ ३७ ॥ पूर्व० ॥

न दक्षिणाशब्दात् तस्मान्नित्यानुवादः स्यात् ॥३८॥

नायं प्रासर्पिकस्य प्रतिषेधः। दक्षिणा-शब्दात्। दक्षिणाशब्दो ह्यत्र भवति। अदक्षिणानि सत्राण्याहुः। न हि अत्र गौर्दीयते, न वासो न हिरण्यमिति। दक्षिणाशब्दश्च परिक्रयाऽर्थो भवति। तत्र हि श्रूयते। गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा इति। ऋत्विग्दानं दक्षिणा, न प्रासर्पिकम्। तस्यैवासौ प्रतिषेधो, न प्रासर्पिकस्य। तस्मान्नित्यप्राप्तस्यैवानुवादोऽसौ न सत्रेषु दक्षिणा इति ॥ ३८ ॥ सिद्धान्तः ॥ सत्रे परिक्रयाभावाधिकरणम् ॥ ११ ॥

उदवसानीयः सत्रधर्मा स्यात् तदङ्गत्वात्तत्र दानं धर्ममात्रं स्यात् ॥ ३९ ॥

अस्ति उदवसानीयः । सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्निति । तत्रैषोऽर्थः सांशयिकः । दक्षिणादानं धर्म्ममात्रम्? उत परिक्रयार्थमिति । तथा इदमपरं द्वैतम् । किं सत्राऽङ्गमुदवसानीयः, न ? इति । यदि सत्राङ्गं, धर्ममात्रं दानम् । अथ न सत्राङ्गं, परिक्रयार्थमिति । किं प्राप्तम् । सत्राङ्गमिति । कुतः । सत्रप्रकरणात् । सत्रं परिसमाप्य कर्त्तव्यमिति श्रूयते । सत्रप्रकरणात् सत्रं लक्षयित्वेति गम्यते । उदवसानीयश्च सत्रस्य विधीयते इति । सत्रस्य च फलार्थत्वान्नोदवसानीयार्थता गम्यते । न च सत्रोदवसानकाले उदवसानीयः । लक्षणा हि तथा स्यात् । अनङ्गत्वे च फलं कल्पयितव्यम् । तस्मादानन्तर्य्यादेकवाक्यतासम्बन्धाच्च सत्राऽङ्गमुदवसानीयः । सत्रं यथोक्तं परिसमाप्य न सन्तोष्टव्यम् । न तावत् कृत्वा कृतिता मन्तव्या । इदमपरं तस्याङ्गं कर्त्तव्यमुदवसानीय इत्येवमभिसम्बन्धः क्रियते । यथा अग्निं चित्वा सौत्रामण्या यजेत, वाजपेयेनेष्ट्वा बृहस्पतिसवनेन यजेतेति । तस्मात् सत्राङ्गम् । एवञ्चेत् साङ्गस्य सत्रस्य स्वयंकर्तृकत्वाद् धर्ममात्रं तत्र दानम् । सत्रधर्मा उदवसानीय इति ॥ ३९ ॥ पूर्व० ॥

न त्वेतत्प्रकृतित्वाद्विभक्तचोदितत्वाच्च ॥ ४० ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदेवं, धर्ममात्रमत्र दानमिति । किं तर्हि । परिक्रयार्थमिति । कुतः । नैतत् सत्राङ्गम् । विभक्तचोदितत्वात् । नैतद् बृहस्पतिसवेन सौत्रामण्या च तुल्यम् । तत्रैवं श्रूयते । यथोक्ताङ्गं कृत्वा नैव सन्तोष्टव्यमिदमपरं तस्य कर्त्तव्यमिति । इह पुनः सत्रमुत्सृज्य उदवसानीयः कर्त्तव्य इति । सत्रादुदवसाय उत्थायेत्यर्थः । तत्रान्योऽर्थः क्त्वाशब्दस्य । यथोदितं निर्वर्त्त्य न प्रहातव्यम् । उत्पूर्वस्य अवपूर्वस्य स्यतेः प्रहायेत्यर्थः । प्रहाणे इह क्त्वाशब्दस्तत्र पुनरनुष्ठानानन्तर्य्ये । तस्माद् विभक्तचोदितत्वान्न सत्राङ्गं, न च सत्रप्रकृतिकम् । तस्मादत्र दानं परिक्रयार्थमिति ॥ ४० ॥ सिद्धान्तः ॥ उदवसानीयस्य सत्रानङ्गतया तत्र दानस्य परिक्रयार्थताऽधिकरणम् ॥ १२ ॥

तेषां तु वचनाद् द्वियज्ञवत् सहप्रयोगः स्यात् ॥ ४१ ॥

इदमेवोदाहरणं, सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन

सहस्रदक्षिणेन यजेरन्निति । तत्रैषोऽर्थः समधिगतः । न सत्राङ्गं पृष्ठशमनीय इति । अथेदानीमिदं सन्दिह्यते । किं संहत्य तैस्तत् कर्त्तव्यम् ? उत एकैकेनेति । किं प्राप्तम् । संहत्य इति । कुतः । उपादेयत्वेन यागे चोद्यमानस्य बहुत्वस्य श्रवणात् । स चेदेकेन क्रियेत, बहुत्वसंयुक्तः प्रयोगो न स्याद् द्वियज्ञवत् । यथा, एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति । यद्यपि राजपुरोहितौ लक्षणत्वेन श्रूयेते, एवमपि यजेयातामिति याग उपादेयत्वेन । यागे च एतत् कर्तृद्वित्वं श्रूयते, यजेयातामिति । तद्वत् पृष्ठशमनीयेन यजेरन्निति । तस्मात् संहत्य पृष्ठशमनीयं प्रयुञ्जीरन्निति ॥ ४१ ॥ पूर्व० ॥

एवं स्थितं तावदपर्य्यवसितम् । अन्तराचिन्तान्तरस्य सूत्रं तावद्वर्णयिष्यामः—

तत्रान्यानृत्विजो वृणीरन् ॥ ४२ ॥

अस्मिन्नेवोदाहरणे एषोऽर्थः सांशयिकः । किं त एव सत्रिण ऋत्विजः ? उतान्ये वा वरीतव्या इति । किं प्राप्तम् । त एव । कुतः । समानकर्तृकता हि गम्यते । उदवसाय यजेरन्निति । य एव उदवसातारस्त एव यष्टार इति भवति प्रत्ययः । यथैव वचनप्रामाण्याच्चोदकप्राप्तामेककर्तृकतां बाधित्वा बहुकर्तृकता भवति, एवं चोदकप्राप्तानन्यानृत्विजो बाधित्वा वचनप्रामाण्यात् त एव भवितुमर्हन्तीति ॥ एवं प्राप्ते ब्रूमः । तत्रान्यानृत्विजो वृणीरन्निति । न हि पृष्ठशमनीये ये सत्रादुदवसातारस्ते कर्त्तारो विधीयन्ते । न तेषामुपादेयत्वेन चोदनेत्युक्तम् । न चाविहितमङ्गं भवति । न चानङ्गे हीने विगुणता काचिद् भवति । सन्ति च चोदकप्राप्ता अन्ये ऋत्विजः । अपि चात्र यावतिं कर्त्रभिप्रायं क्रियाफलं, तावति त एव कर्त्तारः तदेतदुपग्रहविशेषादवगम्यते । न च ऋत्विजः प्रति यागस्य कर्त्रभिप्रायं क्रियाफलम् । तस्मान्नार्त्विज्ये त एव कर्त्तारः । प्रधानयागे तावत्कर्तॄन् अवगच्छामः । ऋत्विजः पुनरन्ये वरीतव्या इति ॥ ॥ ४२ ॥ उदवसानीये सत्रिभ्योऽन्येषाम् ऋत्विक्त्वाधिकरणम् ॥१३॥ अन्तराचिन्ता ॥

एकैकशस्त्वविप्रतिषेधात् प्रकृतेश्चैकसंयोगात्॥४३॥

स्थितादुत्तरम् । तुशब्दः पक्षं व्यावर्त्तयति । न पृष्ठशमनीयं संह-

स्य प्रयुञ्जीरन् । किं तर्हि । एकैकशः । कुतः । अविप्रतिषेधात् । उदवसानेन हि पुरुषा लक्ष्यन्ते । ये सत्रादुदवस्यन्तीति । तत्र चैकोऽप्युदवसाता भवति । ये चोदवसानलक्षितास्तेषां याग इत्येकैकस्याऽपि यागो विहितो भवति । न च केनचित् प्रतिषिद्ध्यते । तस्मादेकैकोऽपि यजेत । ननु बहूनां प्रयोग उच्यते । तेनैकैकस्य न भवति । नैष दोषः । एकैकस्यापि न वार्यते । तेन चोदकसामर्थ्यादेकैकश एव यजेतेति ॥ आह । बहुसंयुक्तः प्रयोग एकैकेन न शक्यते कर्त्तुमिति । एवमपि न दोषः । नात्र बहुवचनं विधीयते । ये सत्रादुदवसातारस्तेषामेव यागः । ते च बहवः । तेषां बहूनामत्र प्राप्तानामयमनुवादः । एकैकश्येनापि च ते उदवसातारः । तस्मात्तेषां तथैव यागो भविष्यति, यथैवोदवसाने तेषामसंहतानां बहुवचनम्, एवं यागेऽपि असंहतानामेव भविष्यति ॥ अत्रोच्यते । न बहुवचनमनुवादः । अप्राप्तत्वात् । न हि बहुवचनं यागे प्राप्तं, यदनूद्येत । नन्विदानीमेवोक्तमुदवसातॄणां यागः । ते च बहव इति । उच्यते । बहुत्वं तेषामुदवसाने, न यागे । ननु वाक्यसामर्थ्याद्यागेऽपि भविष्यति । नेत्याह । परिपूर्णं हि पदं पदान्तरमाकाङ्क्षति । ततो वाक्यं भवति । अयञ्च यागः । प्रागेव बहुवचनेन सम्बन्धः । न तस्यामवस्थायां वाक्येनोदवसातारः प्राप्ताः । उपादत्ते तु तदा बहुत्वम् । ततो बहुवचनसंयुक्तः पदान्तरगतान् उदवसातॄनपेक्षते । तस्माद् बहुत्वसंयुक्तः प्रयोगः कर्त्तव्यः । यथा द्वियज्ञे सत्रेषु चेति ॥ आह । नैतदेवम् । यत्र केनचित्प्रकारेणाऽनुवादः सम्भवति तत्रानुवादो वा स्याद्, विधिर्वेति । यद्यप्यपूर्वत्वादन्यत्र विधिर्ज्यायाननुवादात् । तथाप्यत्रानुवाद एव बहुत्वस्य भवितुमर्हति । तथा हि यागसम्बन्धो बहूनां न कृतो भवति । तत्र दृष्टमेव प्रयोजनं, इतरस्मिन् पक्षे बहुत्वस्य यागसम्बन्धे अदृष्टं कल्पनीयं स्यात् । तस्मादनुवाद इति ॥ आह । द्वियज्ञेऽपि तर्ह्येवमेव प्राप्नोति सत्रेषु चेति । अत्रोच्यते । अस्त्यत्र विशेषः । उदवसाय यजेरन्निति । राजपुरोहितौ यजेयाताम्, ऋद्धिकामाः सत्रमासीरन्निति । यत्र क्त्वान्तः शब्दो भवति तत्र द्वौ प्रयोगौ गम्येते । समानाश्च कर्त्तारः श्रवणादेव । तत्रोत्तरप्रयोगवचनेन केवलो धात्वर्थो विधीयते । तदाश्रयः प्रयोगः, कर्त्तारश्च । तद्गता च सङ्ख्या । एवं सर्वमेतत् । धात्वर्थे विधीयमाने प्राप्तमेवानूद्यते । द्वियज्ञे सत्रेषु च

धात्वर्थो विधीयते, प्रयोगोऽपि, कर्त्तारः, तद्गता च सङ्ख्येति सर्वमेव तत्राप्राप्तम्। न हि राजपुरोहितावित्येष शक्नोति प्रयोगं वदितुम्। तत्र च कर्तृत्वं तद्गताञ्च सङ्ख्याम्। तथा ऋद्धिकामा इति। तस्मादेवञ्जातीयकेषु संख्या उपादेयत्वेन श्रूयते। अतो द्वियज्ञादिषु नानुवादस्तेषु बहुत्वसंयुक्तः प्रयोगः कर्त्तव्यः। इह तु न तथा। तस्मादेकैकः पृष्ठशमनीयेन यजेतेति ॥ ४३ ॥ सिद्धान्तः ॥ उद्वसानीयस्य ऋत्विजामेकैकेनानुष्ठानाधिकरणम् ॥ १४ ॥

कामेष्टौ च दानशब्दात् ॥ ४४ ॥

अस्ति सारस्वते सत्रे कामेष्टिः, प्लाक्षं प्रस्रवणं प्राप्याग्नये कामायाष्टाकपालं पुरोडाशं निर्वपति तस्यामश्वां पुरुषीं च धेनुके दत्वा प्रति यमुनामवभृथमभ्यवयन्तीति। तत्र संशयः। किं परिक्रयार्थं दानम्? उत धर्ममात्रमिति। पृष्ठशमनीये च सत्रस्यानङ्गभूते परिक्रयार्थं दानमित्युक्तम्। अथेदानीमङ्गभूतायां कामेष्टौ चिन्त्यते। तत्र किं तावत् प्राप्तम्। यथा पृष्ठशमनीये परिक्रयार्थम्, एवमिहापीति चशब्देनान्वादिश्यते। कुतः। दानशब्दात्। दानशब्दो भवति। तस्यामश्वां पुरुषीं च धेनुके दत्वा इति। दानशब्दः कर्मकरेषु सत्सु परिक्रयार्थं इत्युक्तम् ॥ न चैतत्सत्रम्। सत्रस्याङ्गभूतमेतत्। प्रकरणाच्च सत्रस्य स्वयङ्कर्तृकता, नाङ्गानाम्। तच्चोदकप्राप्तैर्ऋत्विग्भिः सगुणं सत् सत्रस्योपकारकं भवति। अन्यैर्ऋत्विग्भिर्विना विगुणं सत्रस्य नोपकुर्य्यात्। तस्मादत्र दानं परिक्रयार्थमिति ॥४४॥ पूर्व० ॥

वचनं वा सत्रत्वात् ॥ ४५ ॥

वाशब्दात् पक्षो व्यावर्त्त्यते। नात्र परिक्रयार्थं दानं धर्ममात्रमिति। कुतः। सत्रत्वात्। सत्रे हि आनतिर्निवृत्ता। आह। नैतत् सत्रं, सत्राङ्गमित्युक्तम्। उच्यते। न सत्रम्। सत्राङ्गं तु सत्रमध्यपतितम्। सत्रस्य च साङ्गस्य स्वयं कर्तृकता। तस्यां क्रियमाणायां सिद्धा अस्या इष्टेः कर्त्तारः। तत्र आनत्या न प्रयोजनम्। श्रूयमाणं तु दानं धर्ममात्रं भवितुमर्हतीति ॥ ४५ ॥ सिद्धान्तः ॥ कामेष्टौ दानस्यादृष्टार्थताधिकरणम् ॥ १५ ॥

छेध्ये चाचोदनाद्दक्षिणापनयः स्यात् ॥ ४६ ॥

दर्शपूर्णमासयोरिदमाम्नायते, यदि पत्नीः संयाजयन् कपाल-

मभिजुहुयाद् वैश्वानरं द्वादशकपालं निर्वपेत् । तस्यैकहायनी गौर्दक्षिणा । तं स द्वेष्याय दद्यादिति । तत्र संशयः । किं परिक्रयार्थमेकहायनस्य दानम् ? उत धर्ममात्रमिति । किं प्राप्तम् । दक्षिणाशब्दात् परिक्रयार्थमिति । परिक्रयार्थे हि दक्षिणाशब्दो भवति । एवं प्राप्ते ब्रूमः । द्वेष्यं च धर्ममात्रं दानमिति चशब्देन अन्वादिश्यते । कुतः । अचोदनाद् द्वेष्यस्य ऋत्विजः । न हि द्वेष्य ऋत्विग् भवति । ऋत्विगाचार्य्यौ नातिचरितव्यौ इति । यदा परिक्रेतव्येनैव कर्त्रा प्रयोजनं नास्ति, तदा किं दक्षिणाशब्दः करिष्यति । अपि च परिक्रयार्थे सति दक्षिणाशब्दः स्यात् । चोदकप्राप्तोऽन्वाहार्य्योऽपनीयेत, तत्र चोदको बाध्येत । तस्माद्धर्ममात्रमेकहायनस्य दानमनृत्विजे दातव्यमिति ॥ ॥ ४६ ॥ दर्शपूर्णमासयोर्द्वेष्याय दानस्यादृष्टार्थताधिकरणम् ॥ १६ ॥

अस्थियज्ञोऽविप्रतिषेधादितरेषां स्याद्विप्रतिषेधादस्थ्नाम् ॥ ४७ ॥

इदमाम्नायते, यदि सन्दीक्षितानां प्रमीयेत तं दग्ध्वा कृष्णाजिने अस्थीन्युपनह्य योऽस्य नेदिष्ठस्तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरन् । ततः संवत्सरे अस्थीनि याजयेदिति । योऽयं संवत्सरे यज्ञः, स सन्दिह्यते किमस्थ्नामुत जीवताम् ? इति । किं तावत् प्राप्तम् । सामानाधिकरण्यादस्थ्नामिति । किं सामानाधिकरण्यम् । याजयतेरस्थीनि कर्मभूतानि ॥

मन्वस्थीन्यचेतनानि न शक्नुवन्ति स्वयं तन्त्रयितुं, कथं तानि क्रियायां कर्त्तॄणि भवेयुः ? इति । उच्यते । प्रयोज्यता तेषां श्रूयते । ततोऽन्ये प्रयोजयितारः । ते एतानि क्रियां कारयिष्यन्तीति ॥ आह । न हि अकुर्वति कारयतीति भवति । कर्त्तुर्हि प्रयोजको हेतुः । न चैतानि कार्त्स्न्येन क्रियामुपसंहर्त्तुं शक्नुवन्तीति । उच्यते । वचनप्रामाण्याद् यावद् यजमानं कारयितुं शक्यन्ते तावत् कारयिष्यन्ते, औदुम्बरीसम्मानं शुक्रान्वारम्भणमित्येवमादीनि ॥ आह । प्रधानमेव न शक्नुवन्ति, नाङ्गानि कुर्वन्ति याजमानानि भवन्तीति । अत्रोच्यते । वचनसामर्थ्यात् तच्छवद्द्रव्यं ऋत्विजः प्रतिग्रहीष्यन्ति तद्दक्षिणास्तत्परिक्रीताः । तत् त्यक्ष्यन्ति । ईदृशो द्रव्यत्यागो वाचनिको भविष्यतीति । आह । एवं वर्ण्यमाने याजयितॄणामेव कर्तृत्वमुपदिष्टं

भवति, नास्थ्नामिति । उच्यते । अष्टृणामेवैतेन प्रकारेण कर्तृत्वमुपदिश्यते । न ह्यकर्त्तरि कारयतीति भवति । हेतुकर्तृत्वं चास्थ्नां यागे सति प्राप्तमेवानूद्यते । यथा, ग्रामकामं संयाजयेदिति ग्रामकामो यजेतेति विधीयते । हेतुत्वं च प्राप्तानुवादमात्रम् । तच्च दर्शयति, स्तोत्रे अस्थिकुम्भमुपदधातीति । अस्थ्नामेव यजमानत्वं दृश्यते । तस्माद् अस्थ्नां यज्ञो न जीवताम् ॥ इति प्राप्ते ब्रूमः । अस्थियज्ञ इतरेषां जीवतां स्यात् । तेषामविप्रतिषिद्धो यज्ञः । अस्थ्नां विप्रतिषिद्ध्यते । त्यागो नाम मनसा क्रियते, न चास्थ्नामस्ति मनः । यदुक्तम्, ऋत्विजः शवद्रव्यं दक्षिणां प्रतिगृह्य तत्परिक्रीतास्त्यागं कुर्वन्तीति । ईदृशो वाचनिकस्त्यागो भवतीति । नैतदेवम् । न हि यजेतेत्युक्ते अशक्नुवत्सु वचनप्रामाण्यादन्यो यज्यर्थो भवति । यागं कुर्वीतेति हि तद्वचनं, नान्यो यज्यर्थ इति । न च वचनप्रामाण्यादेतद्भवति, यच्छवद्रव्यं तद् गृह्यते । न हि तद् अस्थिभिर्दत्तं भवति । न चासति दाने परिक्रयः । न च गौणोऽर्थो विधिशब्दादवगम्यते । अन्येन हि प्रमाणेन परिच्छिन्नेऽर्थे गौणः शब्दः सम्बद्ध्यते । यथा, गौरनुबन्ध्य इति गोजातिविशिष्टः पशुरनुबद्ध्यते, न वाहीकः । गौरयं वाहीक इति तु संवादे वाहीके गौणः शब्दः प्रवर्त्तते । तस्मान्न त्यागविधाने अन्यो यज्यर्थः स्यात् । न चास्थ्नां द्रव्यं स्वं सम्भवति, यद् ऋत्विजो गृहीत्वा वयमनेन परिक्रीता इति मन्येरन् । तस्मान्न कथञ्चन अस्थीनि यष्टॄणि भवन्ति । अतो न विवक्षितं सामानाधिकरण्यमिति ॥

आह । सम्बद्धवचनादनर्थकं तर्हीदं वाक्यम् । नेति ब्रूमः । न हि गम्यमाने अर्थे अनर्थकं भवति । ततः संवत्सरे याजयेदित्येतावतो वाक्यात् कश्चिदर्थोऽवगम्यते, स इह विवक्षितः । अस्थीनि याजयेदित्येष सम्बन्धो न विधीयते । आह । किमस्थीनीति प्रमादपाठः ? । न च प्रमादपाठ इति ब्रूमः । न हि स एवाप्रमादपाठो यो विधानार्थो मुख्यार्थश्च । अनुवदन्नप्यर्थं लक्षणयापि ब्रुवन् वाक्ये समवायं गच्छति । न च प्रमादपाठो भवति । तत्र, अस्थीनीत्येष शब्दो विदधत् स्वमर्थं मुख्यया वृत्त्या ब्रुवन् वाक्ये न समवैति । अनुवदंस्तु लक्षणया समवेष्यति । ततः संवत्सरे याजयेदिति जीवतः प्रकृतान् वक्ष्यति । तत्रास्थिशब्दो वर्त्तिष्यते लक्षणया । ततः संवत्सरेऽस्थिमतो याजयेदिति । के तेऽस्थिमन्तः ? । ये तेन सह यष्टुं प्रक्रान्ताः । तस्माद्

यस्य तानि अस्थीनि तैरस्थिभिः स शक्यते लक्षयितुम्। तस्माज्जीवतां यज्ञ इति ॥ ४७ ॥ सि० ॥

यावदुक्तमुपयोगः स्यात् ॥ ४८ ॥

अथ यदुक्तमस्थ्नां याजमानं दर्शयति, स्तोत्रेऽस्थिकुम्भमुपदधातीति। नैतद् याजमानम् । न हि अस्थीनि यजन्ते इत्युक्तम् । अतो वचनप्रामाण्यादेतत् कर्म याजमानसरूपं भवति। यावति वचनं तावत्येव तद् भवितुमर्हति, न तत् सर्वं याजमानं शक्नोति लक्षयितुम्। तस्माज्जीवतामेव यज्ञ इति । ४८ ॥ आ० नि० ॥ जीवतामस्थियज्ञाधिकरणम् ॥ १७ ॥

यदि तु वचनात्तेषां जपसंस्कारमर्थलुप्तं सेष्टि तदर्थत्वात् ॥ ४९ ॥

इह जपसंस्कारमिष्टिश्च चिन्त्यते। तत्र सूत्रेतरार्द्धेन जपसंस्कारं चिन्त्यते, शेषेणापीष्टिः। जपाः यत्र जपतीति चोदनाः, संस्काराः केशश्मश्रु वपतीत्येवमादयः। किमस्थ्नां जपसंस्कारं कर्त्तव्यं, न? इति संशयः । ननु नैवास्थ्नां यज्ञो जीवतामसावित्युक्तम् । अत्रोच्यते । कृत्वा चिन्तैषा । अस्थ्नामिति कृत्वा चिन्त्यते । अनेन प्रकारेण पूर्वाधिकरणस्य प्रयोजनं विचार्यते । यदि अस्थ्नां यज्ञः स्यात्, किं जपसंस्कारं क्रियते, न ? इति ।

किं तावत् प्राप्तम्। विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यादित्यनेन न्यायेन कर्त्तव्यमिति ॥ एवं प्राप्ते ब्रूमः । यदि तु वचनात्तेषामस्थ्नां यज्ञः स्यात्। तेषां जपसंस्कारं लुप्तार्थं निवर्त्तेत। न तैः शक्यं जपितुं, नापि केशश्मश्रु वप्तुम । अशक्यश्च चोदको न प्रापयति। अत्र सूत्रोत्तरार्द्धं, सेष्टिं तदर्थत्वादिति । दीक्षणीया इष्टिः कर्त्तव्या, न ? इति विचारः । किं प्राप्तम् । चोदकानुग्रहाय कर्त्तव्या ॥ एवं प्राप्ते ब्रूमः। सहेष्ट्या जपसंस्कारं न कर्त्तव्यम्, इष्टिर्लुप्येतेति। कुतः। तदर्थ्या हि सा। यजमानो दीक्षा ग्रहीष्यतीति। दीक्षां च व्रतानि। नियमाश्च मानसं कर्म्म। न चैषां मनोऽस्ति दीक्षाग्रहणार्था चेष्टिः संयोगाज्ज्ञायते । आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इति । तस्मादिष्टिरपि निवर्त्तेतेति। क्रत्वर्थं तु क्रियेत गुणभूतत्वात् ॥ ४९ ॥ अस्थियज्ञे अस्थ्नां जपाद्यननुष्ठानाधिकरणम् ॥ १८ ॥

अस्थियज्ञे एवेदं सन्दिह्यते । यजमानेन सम्मितौदुम्बरी भवति। तथा शुक्रं यजमानोऽन्वारभते इति । अस्थ्नां यागे सति किमेवञ्जातीयकं कर्त्तव्यं, न ? इति । किं प्राप्तम् । अचेतनानामस्थ्नां सर्वक्रियासु स्वातन्त्र्यं नास्ति। तस्मादौदुम्बरीसम्माने शुक्रान्वारम्भणे च नास्थीनि कर्तॄणि भवेयुरिति ॥ एवं प्राप्ते ब्रूमः । क्रत्वर्थन्तु क्रियेत । गुणभूतत्वात् यत् क्रत्वर्थमेवञ्जातीयकं तत् क्रियेत । गुणभूतत्वात् । गुणभूतस्तत्र यजमानः । यजमानपरिमाणसम्मितया औदुम्बर्या प्रयोजनम् । यजमानान्वारब्धेन च शुक्रेण अचेतनेनैव च परिमीयते। शुक्रश्चान्वारभ्यते । तस्मादेवञ्जातीयकं कर्त्तव्यमिति ॥ ४९ ॥ ॥ औदुम्बरीमानशुक्रस्पर्शानुष्ठानाधिकरणम् ॥ १९ ॥ क्रत्वाचिन्ता ॥

काम्यानि तु न विद्यन्ते कामाज्ञानाद् यथेतरस्यानुच्यमानानि ॥ ५० ॥

अस्ति ज्योतिष्टोमः । तत्र श्रूयते । यदि कामयते वर्षेत् पर्जन्य इति, नीचैः सदो मिनुयादित्येवमादि । तदिह चोदकेन प्राप्तं काम्यं कर्त्तव्यं, न ? इति सन्दिह्यते । चोदकानुग्रहाय कर्त्तव्यमिति ॥ नन्वस्थीनि न किञ्चित् कामयन्ते । यजमानकामनिमित्तकाश्चैवञ्जातीयाः पदार्थाः । अत्रोच्यते । नात्र यजमानेन कामयमानेन प्रयोजनम् । एषोऽत्रार्थो, नीचैः सदसि मीयमाने वृष्टिर्भवति । तद्यदि वृष्ट्या प्रयोजनं, नीचैः सदो मातव्यं, वृष्टिः प्रयोजनवती भविष्यतीति ॥ एवं प्राप्ते ब्रूमः । काम्यान्येवञ्जातीयकानि न कर्त्तव्यानि । कुतः । यदि यजमानो वृष्टिं कामयेत नीचैः सदसि मीयमाने वृष्टिर्भवति । यजमानफलदं हि उपग्रहविशेषात् साङ्गं कर्म, नान्येषां कामयितॄणां दातुमर्हतीति । न च वृष्टिर्यजमानस्य फलमिति विज्ञायते । यथेतरस्य जीवतो यजमानस्य विद्यमानेऽपि कामोऽनुच्यमानो न भवति । किमङ्ग पुनरस्थ्नां, येषां काम एव नास्ति । तस्मात् काम्यानि न कर्त्तव्यानीति ॥ ५० ॥ अस्थियज्ञे अस्थ्नां काम्यकर्माद्यननुष्ठानाधिकरणम् ॥ २० ॥ क्रत्वा चिन्ता ॥

ईहार्थाश्चाभावात् सूक्तवाकवत् ॥ ५१ ॥

सन्ति अस्थियज्ञे दर्शपूर्णमासप्रकृतिकानि चोदकप्राप्तानि प्रायणीयादीनि, तेषु चोदकप्राप्तः सूक्तवाकः । तत्रेमानि, अयं यजमान

आयुराशास्ते सुप्रजास्त्वमाशास्ते विश्वं प्रियमाशास्ते यदनेन हविषाऽऽशास्ते तदश्यात् तद्ध्यात् तदस्मै देवा रासन्तामिति । किमिमानि कर्त्तव्यानि, न कर्त्तव्यानि ? इत्येषोऽर्थः सन्दिह्यते । किं तावत् प्राप्तम् । ईहार्था ये कामाः सूक्तवाके श्रूयन्ते, तेऽपि न स्युः । किं कारणम् । अभावात् कामयितुः । न हि अस्थीनि कामयन्ते इत्येतदुक्तम् । तस्मान्न कर्त्तव्यानि । सूक्तवाके इति सूत्रयितव्ये, सूक्तवाकवदिति सूत्रितम् ॥

कथमेवं वर्ण्यते इति । उच्यते । ईहार्थाः सूक्तवाकार्हाः । अर्हे वतिर्द्रष्टव्यः । यथा छन्दो व्यतिक्रमाद्यूढे भक्षपदमानपरिधिकपालम् । मन्त्राणां यथोत्पत्तिवचनमूहवत् स्यादिति । तस्मान्न सूत्रोपालम्भः ॥ ५१ ॥

स्युर्वा अर्थवादत्वात् ॥ ५२ ॥

न चैतदस्ति, यदुक्तं भवता अस्थ्नामीहार्थाः कामा न कर्त्तव्या इति । स्युर्वा अर्थवादत्वात् । स्युर्वा एते कामाः । कस्मात् । अर्थवादत्वात् । अर्थवादा एते आयुराशास्ते सुप्रजास्त्वमाशास्ते इति । नैते विधयः, अर्थवादा एते । अर्थवादत्वाच्च तेषां क्रियां चोदकः प्रापयति । एवं चोदकानुग्रहो भवति । तस्मात् पश्यामः । ईहार्थाः कामाः कर्त्तव्या इति ॥ ५२ ॥ पूर्व० ॥

नेच्छाऽभिधानात् तदभावादितरस्मिन् ॥ ५३ ॥

न चैतदस्ति, यदुक्तं भवता ईहार्थाः कामाः कर्त्तव्या इति । कस्मात् । इच्छाभिधानात् । इच्छाभिधाना एते कामाः । आयुराशास्ते दिव्यं धामाशास्ते सुप्रजास्त्वमाशास्ते इतीच्छायामुत्पन्नायां प्रयुज्यन्ते । य एतान् कामान् इच्छेत् । स चेह यजमानो नास्ति । अचेतनावन्ति एतानि अस्थीनि । अस्थ्नामिच्छा न विद्यते । तदभावाद् अस्थ्नामिच्छाया अभावाद्, इतरस्मिन् जीवति एते कामा भविष्यन्ति, नास्थिषु । तस्मात् पश्यामोऽस्थ्नामीहार्थाः कामा न कर्त्तव्या इति ॥ ननु एतेऽर्थवादा इत्युक्ताः । अत्रोच्यते । नैते अर्थवादाः । विधय एते । एवञ्चेत् परिहृतमेतद् भवति । तस्माद् यदुक्तं भवता, अस्थ्नामीहार्थाः कामाः कर्त्तव्या इति । नैतदेवम् । न कर्त्तव्याः । नेच्छाभिधानात् तदभावादितरस्मिन् ॥ ५३ ॥ सिद्धान्तः ॥ अस्थियज्ञे अस्थ्नां सूक्तवाकगताशासनाननुष्ठानाधिकरणम् ॥ २१ ॥

स्युर्वा होतृकामाः ॥ ५४ ॥

द्वादशाहप्रभृतीनि सत्राणि उदाहरणम् । तानि प्रकृत्य श्रूयते । ततः संवत्सरे अस्थीनि याजयेदिति । चोदकप्राप्तानि दीक्षाप्रभृतीनि कर्माणि श्रूयन्ते । सन्ति च प्रकृतौ होतृकामाः । यं कामयेत अपशुमान् स्यादिति, परार्चीं तस्यैडामुपह्वयेत, अपशुमानेव भवति यं कामयते प्रमायुकः स्यादिति, तस्योच्चैस्तरां वषट् कुर्य्यात् । यं कामयेत पापीयान् स्यादिति नीचैस्तरां तस्य याज्यया वषट्कुर्य्यात् । यं कामयेत वर्षीयान् स्यादिति उच्चैस्तरां तस्य याज्यया वषट्कुर्यादिति । एवं तत्र संशयः क्रियते । किमस्थ्नां होतृकामाः कर्त्तव्याः ? अथ वा न कर्त्तव्या इति । ननु जीवतां यज्ञ इत्युक्तम् ॥ अत्रोच्यते । अस्थ्नां यज्ञ इत्येवं कृत्वा चिन्ता प्रवर्त्तते । तत्र सूत्रेणैवोपक्रमः क्रियते । स्युर्होतृकामाः । एतेऽस्थ्नां कर्त्तव्याः स्युः । कस्मात् । चोदकः प्रापयति । एवं चोदकानुग्रहो भविष्यति । तस्मात् पश्यामो होतृकामाः कर्त्तव्या इति ॥ ५४ ॥ पूर्व० ॥

न तदाशीष्ट्वात् ॥५५ ॥

न चैतदस्ति, यदुक्तं भवता होतृकामाः कर्त्तव्या इति । न कर्त्तव्याः । कस्मात् । तदाशीष्ट्वात् । तदाशीरेषा भवति । यजमानाशीरेषा । यां वै काञ्चन यज्ञे ऋत्विज आशिषमाशासते सा सर्वा यजमानस्येति यजमानविषयतामाशिषो दर्शयति । स चेह यजमानो नास्ति । अचेतनानि अस्थीनि । अस्थ्नां कामयितुं सामर्थ्यं नास्ति । अर्थी समर्थश्चाधिक्रियते इत्युक्तम् । कर्त्तुर्वा श्रुतिसंयोगाद् विधिः कार्त्स्न्येन गम्येतेति । तस्मात् पश्यामोऽस्थ्नां होतृकामा न कर्त्तव्या इति । क्षीणा कृत्वा चिन्ता । प्रयोजनं नोच्यते । न तदाशीष्ट्वात् ॥५५॥ सिद्धान्तः ॥ अस्थियज्ञे होतृकामाभावाधिकरणम् ॥ २२ ॥

सर्वस्वारस्य दिष्टगतौ समापनं न विद्यते कर्मणो जीवसंयोगात् ॥ ५६ ॥

अस्ति सर्वस्वारः क्रतुः शुनःकर्णोऽग्निष्टोमः । मरणकामो ह्येतेन यजेत, यः कामयेतानामयः स्वर्गं लोकमियामिति । तत्र संशयः । किं दिष्टगते यजमाने तदन्तं कर्म उत्स्रष्टव्यम् ? उत परिसमापयितव्यमिति । किं तावत् प्राप्तम् । सर्वस्वारे दिष्टगतौ यजमानस्य सत्यां

तदन्तं कर्म उत्स्रष्टव्यम् । कर्मणो जीवसंयोगात् । जीवता हि शक्यं, नाजीवता । तस्मादिदमर्थादापद्यते, सर्वस्वारेण दिष्टगत्यन्तं यजेतेति ॥ ५६ ॥ पूर्व० ॥

स्याद्वोभयोः प्रत्यक्षशिष्टत्वात् ॥ ५७ ॥

स्याद्वा तस्य परिसमाप्तिः । उभयं हि प्रत्यक्षशिष्टम् । क्रतुः, परिसमाप्तिश्च । मरणकामो हि एतेन यजेतेत्यारभ्य परिसमापयितव्यमित्याख्यातार्थः । तेन समाप्तिराख्यातेनैवोक्ता भवति । अपि चेदमाम्नायते । आर्भवे प्रस्तूयमाने औदुम्बरीं परितोऽहतेन वाससा परिवेष्ट्य ब्राह्मणाः परिसमापयत मे यज्ञमिति सम्प्रेष्याग्निं विशतीति । यदि प्रैषमात्रं स्यात्, अदृष्टार्थं भवेत् । तस्मात् सम्प्रेषणद्वारलक्षणया परिसमाप्तिरेव विधीयते । यथा, यदि सोममपहरेयुः विधावतेच्छतेति ब्रूयादिति । अथ यदुक्तं, जीवन् कर्त्ता भवति, न मृत इति । नेत्युच्यते, जीवता वचनं प्रोक्तम् । आरब्धं परिसमापयतेति । अतस्तत्कृतैवासौ परिसमाप्तिः ॥ अत्राह । यदासौ प्रयुक्तवांस्तदा तावत् परिसमाप्तिस्तेन न कृता । यदा परिसमाप्तिस्तदासौ नास्ति । कः परिसमाप्तेः कर्त्ता ? इति । अत्रोच्यते । मुक्तसंशयेनैतत् तुल्यम् । यद्भवान् मुक्तसंशयं जीवन्तं कर्त्तारं मन्यते । तेनैतत् तुल्यम् । योऽपि परिसमापयतेति प्रेष्य परिसमाप्तिकाले जीवति, तस्यापि जीवनं परिसमापनकालेऽनुपकारकं, पूर्वप्रैषादेवास्य कर्तृत्वमुपपद्यते इति । स च पूर्वप्रैषो जीवतोऽजीवतश्च तुल्यः । तस्माज्जीवन्निव अयमपि कर्त्तेति । अथोच्येत । जीवतः सत्त्वात् कर्तृत्वमुपपद्यते इति । एतदपि तुल्यमेव । जीवतोऽपि पुरुषः कर्त्ता, न शरीरम् । स च पतितेऽपि शरीरे पुरुषोऽस्ति । तस्मात् स एव परिसमाप्तौ कर्त्तेति । अथोच्येत । याजमानासम्भवादशक्यं हि दिष्टगतौ उत्तरं तन्त्रं कर्त्तुम् । अतस्तच्चोदको न प्रापयतीति । नैतदेवम् । याजमानवर्ज्जं प्रापयिष्यति सः । तस्माददोषः । अथ वा, प्रत्यक्षमेव परिसमाप्तेर्वचनं, ब्राह्मणाः संस्थापयत मे यज्ञमिति । तत्सामर्थ्यादेव याजमानं भविष्यति ॥५७॥ सिद्धान्तः ॥ यजमानस्य दिष्टगतावपि सर्वस्वारस्य समापनाधिकरणम् ॥ २३ ॥

गते कर्मास्थियज्ञवत् ॥ ५८ ॥

अस्ति सर्वस्वारः क्रतुः शुनःकर्णोऽग्निष्टोमः। मरणकामो हि एतेन यजेत, यः कामयेत अनामयः स्वर्गं लोकमियामिति। तत्र दिष्टगतौ यजमानस्य सत्यां किं कर्त्तव्यम्, ? इति प्रश्नः। भवति चादर्शयित्वापि द्वौ पक्षौ, प्रश्नेनोपक्रमः। पक्षद्वयेऽपि प्रतिभाति भवति संशयः। सर्वाप्रसिद्धावपि भवति। यथा को नामायं पर्वतः ? का नामेयं नदी ? किमिदं फलम्? इति। तदभिधीयते। गते कर्म, अस्थियज्ञवत्। दिष्टां गतिं गते यजमाने अस्थियज्ञवत् कर्म भविष्यति। यथा अस्थियज्ञे क्रत्वर्थं क्रियते, नान्यद् अस्थिभिः। एवं दिष्टामपि गतिं गते क्रत्वर्थं शवेन कारयितव्यं, नान्यत्। यथा, शुक्रं यजमानोऽन्वारभते, यजमानेन सम्मिता औदुम्बरी भवतीति॥५८॥ यजमानस्य दिष्टगतौ सर्वस्वारस्य शुक्रस्पर्शादियोग्याङ्गाद्यनुष्ठानाधिकरणम्॥२४॥

जीवत्यवचनमायुराशिषस्तदर्थत्वात्॥५९॥

सर्वस्वारे एव जीवति यजमाने भवत्येव संशयः। आशास्ते यजमान इति किमायुराशीर्वक्तव्या ? उत नेति। किं प्राप्तम्। जीवति अवचनमायुराशिषः। कुतः। तदर्थत्वात्। यत्रायुराशास्ते यजमानस्तत्र प्रस्तरं प्रयच्छत। एवङ्कामो यजमान इत्यावेदयितव्यं भवति। तद् यजमानः कथं प्राप्नुयादिति। स चायमत्र यजमानो विपरीतकामो, मरणकामः। तस्मादायुराशीस्तत्र न वक्तव्या॥५९॥ पूर्व०॥

वचनं वा भागित्वात् प्राग् यथोक्तात्॥६०॥

उच्यते। वक्तव्या आयुराशीः। भागी हि आयुराशीर्वादः। आर्भवे प्रस्तूयमाने यजमानस्य दिष्टा गतिः प्रार्थयितव्या भवति। प्रागार्भवकालादायुराशास्ते यजमानः। आर्भवकालं यावज्जीव्यासमिति। चोदकश्चैवमनुग्रहीष्यते। तस्मादत्रापि आयुराशीर्वक्तव्येति॥६०॥ सिद्धान्तः॥ सर्वस्वारे यजमानस्य दिष्टगतावपि आयुराशंसनाधिकरणम्॥२५॥

क्रिया स्याद्धर्ममात्राणाम्॥६१॥

अस्ति द्वादशाहः। द्वादशाहमृद्धिकामा उपेयुरिति। अस्ति तत्र चोदकप्राप्तं धर्ममात्रं किञ्चित्। यथा ऋतुयाज्या, वरणम्, आत्रेयहिरण्यदानञ्च। तत्र संशयः। किं धर्ममात्रं कार्यं, न ? इति। किं प्राप्तम्। स्वयङ्कर्तृकत्वात् सत्रस्य, वरणं दानञ्च निवर्त्तते इत्यु-

क्तम् । न चान्यद्वचनमस्ति, कर्त्तव्यमिति । यावानेव श्रुतस्योत्सर्गे दोषस्तावान् अश्रुतकल्पनायाम् । तस्मान्न कर्त्तव्यमिति ॥ एवं प्राप्ते ब्रूमः । क्रिया स्याद्धर्ममात्राणाम् । यद्धि वरणं दानं वा, न भवत्यानत्यर्थं, तत् स्वयङ्कर्तृकेऽपि न विरोधमुपैति । तस्माच्चोदकानुग्रहाय क्रिया स्यादिति॥६१॥द्वादशाहे ऋतुयाज्याद्यनुष्ठानाधिकरणम् ॥२६॥

गुणलोपे च मुख्यस्य ॥ ६२ ॥

सन्ति अग्न्याधाने पवमानेष्टयः । योऽग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेत् । अग्नये पावकायाग्नये शुचये इति । तत्र चोदकेन प्राप्तमग्निहोत्रहवण्या हवींषि निर्वपेदिति । तत्र तावदग्निहोत्रस्य कालः । तस्मादग्निहोत्रहवणी नास्ति पवमानेष्टिषु । तदऽभावे किं निर्वापोऽपि न कर्त्तव्यः ? उत कर्त्तव्य इति । किं प्राप्तम् । यथाश्रुतोऽसौ न शक्यते कर्त्तुम् । न चायथाश्रुतेन कृतेन किञ्चिदस्ति प्रयोजनम् । तस्माद्विगुणत्वान्न कर्त्तव्य इति ॥

एवं प्राप्ते ब्रूमः । गुणलोपे च मुख्यस्य क्रिया स्यादिति । गुणोऽग्निहोत्रहवणी । प्रधानं निर्वापः । यदि निर्वापो न सम्भवेत्, ततस्तदसम्भवादग्निहोत्रहवण्यपि न सम्भवतीति निवर्त्तेत । न तु गुणलोपे मुख्यं न सम्भवतीति । तस्मान्निर्वापः कर्त्तव्यः । अग्निहोत्रहवणीसाधनता च तस्य न सम्भवतीति निवर्त्तते ॥ ६२ ॥ पवमानेष्टौ निर्वापानुष्ठानाधिकरणम् ॥ २७ ॥

मुष्टिलोपात्तु संख्यालोपस्तद्गुणत्वात् स्यात् ॥ ६३ ॥

अस्ति वाजपेयः । शरदि वाजपेयेन स्वाराज्यकामो यजेतेति । तत्र श्रूयते । नैवारः सप्तदशशरावः क्षीरे चरुर्भवतीति । अस्ति तु प्रकृतौ सङ्ख्या मुष्टयश्च । चतुरो मुष्टीन्निर्वपतीति । उभयं चोदकेन प्राप्तम् । तत्र संशयः । किं सङ्ख्यानुग्रहो मुष्टिलोपः, उत मुष्ट्यनुग्रहः सङ्ख्यालोपः? अथवा किं संख्यालोपः? अथवा किं सङ्ख्याया मुष्टीनाञ्च लोपः?। अथवा अन्यतरलोपः ? इति । किं प्राप्तम् । अन्यतरलोप इति यदि वा मुष्टिषु, यदि वा सङ्ख्यायाम् । कुतः। नियमकारिणः शब्दस्याऽभावादनियम इति॥एवं प्राप्ते ब्रूमः । मुष्टिलोपः स्यात्, सङ्ख्यानुग्रहश्चेति । कुतः । मुख्यत्वात् सङ्ख्यायाः । पूर्वं हि सङ्ख्या निपतति। सा पूर्वमेवावगम्यते, न तदवगमकाले सङ्ख्याविज्ञानस्य परिपन्थि

क्किञ्चिद्विज्ञानमस्ति । तस्मिन्निष्प्रतिद्वन्द्वे सङ्ख्याविज्ञाने प्राप्ते मुष्टिविज्ञानमापतति । तत् सङ्ख्याविज्ञानपरिपन्थितां नाचरितुमर्हति । तस्माज्जघन्यत्वान्मुष्टीनां लोपः । मुख्यार्थत्वात् सङ्ख्यानुग्रहः । तदुक्तं, मुख्यं वा पूर्वचोदनाल्लोकवद् इति ॥ एवं प्राप्ते ब्रूमः । मुष्टिलोपेन सङ्ख्या लोपमर्हतीति । कुतः । तद्गुणत्वात् । मुष्टिगुणो हि सङ्ख्या श्रूयते । चतुरो मुष्टीरिति । चतुःसङ्ख्याविशिष्टा मुष्टयः कथं भवेयुरिति सङ्ख्या उच्चार्य्यते, न स्वार्थे । तस्मात् सङ्ख्या पूर्वनिर्दिष्टा अनिर्दिष्टेव । सा हि परविशेषणार्थमेवोच्चार्य्यते । तेन नैव तस्या अनुग्रहः कार्यः । मुष्टिलोपे सति तदधिकरणा सङ्ख्या अधिकरणाऽभावान्निवर्त्तते । अन्याधिकरणायां क्रियमाणायां न प्रकृतिवत् कृता स्यात् । सङ्ख्यालोपे पुनर्मुष्टयो निर्वापाधिकरणाः श्रूयमाणा अधिकरणानिवृत्त्या न निवर्त्स्यन्ति । तस्मान्मुष्टिगुणत्वात् सङ्ख्या निवर्त्तेत, न मुष्टयः । तदुक्तम् । गुणविरोधे च तादर्थ्यादिति ॥ ६३ ॥ पूर्व० ॥

न निर्वापशेषत्वात् ॥ ६४ ॥

नैतदेवम् । न सङ्ख्या मुष्टिषु श्रूयते । यदि मुष्टिषु श्रूयेत, तद्गुणत्वान्निवर्त्तेत । क्व तर्हि श्रूयते । निर्वापे । कथम् । नैवमभिसम्बन्धः क्रियते, चतुरो मुष्टीरिति । कथं तर्हि, चतुरो निर्वपतीति । मुष्टिगुणः सङ्ख्यागुणश्च निर्वापो निर्दिश्यते । क्रियासम्बन्धे हि द्वितीया विभक्तिर्भवति । कथम् । कारकविभक्तिर्हि सा । कारकं क्रियाया एव भवति, न द्रव्यस्य । अतश्चतुःसङ्ख्या श्रुत्या अवगता निर्वापस्य, वाक्येन मुष्टीनाम् । वाक्याच्च श्रुतिर्बलीयसी । तस्मान्मुख्यानुग्रहान्मुष्टिलोप एवेति ॥ ६४ ॥ सि० ॥

संख्या तु चोदनां प्रति सामान्यात् तद्विकारः संयोगाच्च परं मुष्टेः ॥ ६५ ॥

तुशब्द एतं पक्षं व्यावर्त्तयति । न सङ्ख्यानुग्रहो मुष्टिलोप इति । किं तर्हि । सङ्ख्यया सङ्ख्या निवर्त्तते, शरावैश्च मुष्टयः । कथम् । सामान्यात् । निर्वापसाधनं द्रव्यं प्रकृतौ मुष्टयः । तासां परिच्छेदिका चतुःसङ्ख्या, इह सप्तदशसङ्ख्याकः शरावद्रव्यकश्चरुर्भवतीति श्रूयते । तत्र मापनार्थं मुष्टिद्रव्यं मापनार्थैः शरावैर्निवर्त्यते । तत्परिच्छेदनार्था चतुःसङ्ख्या परिच्छेदार्थया सप्तदशसङ्ख्यया निवर्त्यते ।

तद्यथा इदं दधि घृतं शाकमिमे शालयः, देवदत्तो भोजयितव्यः, देवदत्तवद् यज्ञदत्तस्तैलेनेति भोजने यद् घृतेन शक्यते कर्त्तुं तत् तैलेन क्रियते । तस्माद् यद्यपि न श्रूयते तैलेन स्नेहयितव्यमिति, तथापि समानकार्यत्वात् तैलं घृतस्य विनिवर्त्तकं भवति । एवं सङ्ख्यापरिच्छेदं कुर्वती परिच्छेदिकाया एव सङ्ख्याया निवर्त्तिका भवितुमर्हति । एवं च शरावद्रव्यं मुष्टेर्निवर्त्तकं संयोगात् । तस्मात् प्राकृती सङ्ख्या प्राकृतं च द्रव्यं निवर्त्तते ॥ ६५ ॥ पूर्व० ॥

न चोदनाभिसम्बन्धात् प्राकृतौ संस्कारयोगात् ॥६६॥

नैतदेवम् । चोदनेति यागं ब्रूमः । यागसम्बद्धा हि सप्तदशसङ्ख्या शरावद्रव्यञ्च । प्रकृतौ निर्वापसंस्कारसम्बद्धा चतुःसङ्ख्या मुष्टिद्रव्यञ्च । न चान्यत्र क्रियमाणं समानकार्यमप्यन्यत्र निवर्त्तकं भवति । यस्य हि प्रत्यक्षश्रुतेन चोदकप्राप्तस्य कार्यमभिनिर्वर्त्यते, तेन च यागे क्रियमाणे निर्वापकार्यं निवर्त्यते । तस्मान्निर्वापप्राप्तं किञ्चिदपि अनेन न निवर्त्यत इति । विरोधात्तु चतुर्भिर्मुष्टिभिर्निरूप्यमाणं द्रव्यं न सप्तदशशरावं भवति । तस्माद्विरोधाद् अन्यतरं निवर्त्यते द्रव्यं संख्या वा । तत्र चतुःसङ्ख्यानुग्रहान्मुष्टिलोपो न्याय्यतर इति ॥ ६६ ॥ सिद्धान्तः ॥ वाजपेये मुष्टिलोपाधिकरणम् ॥ २८ ॥

औत्पत्तिके तु द्रव्यतो विकारः स्यादकार्यत्वात् ॥६७॥

क्वचिच्छ्रूयते, द्यावापृथिव्यां धेनुमालभेत मारुतं वत्समैन्द्रम् ऋषभमिति । तदत्र संशयः । किमजाधेनुवत्सर्षभाः? उत गाव इति । किं प्राप्तम् । चोदकानुग्रहाय अजा इति । गुणनिमित्तास्ते शब्दाः । स गुणश्चोदकेन प्राप्ते द्रव्ये आवेशयितव्यः । ननु गवि गुणमाहुस्ते शब्दाः । सत्यं गवि आहुः । न तु गौरत्र प्रत्यक्षेण वचनेन, चोदकेन वा । स एष गुणवचनो यद्यपि श्रुत्या गोऽधिष्ठानं गुणं वदति, वाक्येन आलम्भद्रव्यमास्कन्दति । तथापि गोद्रव्यस्याभावाद् आलभतिवाक्यमेव गृह्यते, न श्रुतिः ॥ अपि च धानवयोवचना एते शब्दाः । गुणाश्चामूर्त्तत्वाद् न क्रियया सम्बद्ध्यन्ते । द्रव्येणैषां सम्बन्धो भवति । चोदकप्राप्तश्च द्रव्यम् । तेनैषां सामानाधिकरण्यम् । यथा अवी द्वे धेनू ददाति, तस्य पुरुषी धेनुर्दक्षिणा । तथा अजर्षभस्य अजिनमवस्तृणातीति । धानवयोवचनः शब्दस्तदेकवाक्यगतेनैव द्रव्येण

सम्बद्ध्यते । एवमिहापि चोदकप्राप्तेन द्रव्येण सम्भन्त्स्यत इति । तस्मादजा धेनुवत्सऋषभा इति ॥

एवं प्राप्ते ब्रूमः । औत्पत्तिके एतस्मिन्नुत्परस्यैव जातिविशिष्टे गुणशब्दे द्रव्यतो विकारः स्यात् । द्रव्यमपि विकुर्य्याद्, न गुणमात्रम् । यदेतज्जातिविशिष्टं धानं वयश्च, न तद् अजपशुषु शक्यं कर्त्तुम् । गोपशुष्वेव तद् भवति । नन्वत्र यदपि स्याच्छक्यमावेशयितुं, तद् आवेशयिष्यते । यन्न शक्यं, तत् प्रमादिष्यते । यथा अजा धेनुवत्सर्षभा इति । उच्यते । विस्पष्टस्तत्र अजशब्देन धेन्वादीनामेकवाक्यभावः । इह चोदकेन अजद्रव्यम् । चोदकश्च विरोधे सति नाजद्रव्यं प्रापयति । न च धेन्वादीनां द्रव्येण सम्बन्धः । कारकविभक्तिरेषा आलम्भेन सम्बन्धं करोति । गवि सा च श्रुतिः । द्रव्यसम्बन्धो वाक्येन स्यात् । तच्च दुर्बलं श्रुतेः । तस्मिंश्च जातिविशिष्टे गुणे आलम्भसंयुक्ते सति न शक्यमजाद्रव्येण भवितुम् । न च चोदकापेक्षया प्रत्यक्षा जातिरुत्स्रष्टुं शक्यते । तस्माद् गावो धेन्वादयो भविष्यन्तीति ॥ ६७ ॥ धेनुमालभेतेत्यादिश्रुतौ धेन्वादिशब्दानां गोवाचिताधिकरणम् ॥ २९ ॥

नैमित्तिके तु कार्यत्वात् प्रकृतेः स्यात्तदापत्तेः ॥ ६८ ॥

इदमामनन्ति, वायव्यं श्वेतमालभेत भूतिकाम इति । अत्र संशयः । किमिहापि नाजः पशुः कर्त्तव्यः ? उत अजः पशुरिति । उच्यते । औत्पत्तिकोऽयं श्वेतगुणसम्बन्धे श्वेतशब्दः । अतो यः कश्चिच्छ्वेतगुणसम्बद्धः, स आलभ्यः । न हि श्वेतशब्दः प्रत्यक्षः सन् कुतश्चिच्छ्वेतद्रव्याच्चोदकेन निवर्त्तयितव्यः । तस्मादजो गौरन्यो वा श्वेत आलब्धव्य इति ॥ एवं प्राप्ते ब्रूमः । नैमित्तिके एतस्मिञ्छ्वेतगुणनिमित्तके द्रव्ये श्वेतशब्दे सति गुणमात्रं विक्रियते । न ह्यत्र जातिविशिष्टं द्रव्यं प्रतीयते । यदेवालम्भसाधनभूतं तदेव परिच्छेत्तव्यम्, इत्येतद्वाक्यादवगम्यते । यच्चास्य चोदकप्राप्तं द्रव्यं साधनमविरुद्ध्यमानं श्रुत्या प्राप्नोति, तदयं श्वेतशब्दः परिच्छेत्स्यति । नन्वजादन्यान्यपि द्रव्याणि परिच्छेत्तुमयं शक्नोति । न ब्रूमो- न शक्नोति । न तेन परिच्छिन्नेन प्रयोजनमस्ति । तस्मात् प्रत्यक्षोऽपि श्वेतशब्दश्छागमेव परिच्छिन्द्यान्नान्यं पशुमिति ॥ ६८ ॥ वायव्यं श्वेतमालभेतेत्यनेन अजस्यैवालम्भनाधिकरणम् ॥ ३० ॥

विप्रतिषेधे तद्वचनात् प्राकृतगुणलोपः स्यात् तेन च कर्मसंयोगात् ॥ ६९ ॥

साद्यस्क्रे श्रूयते, खलेवाली यूपो भवतीति । तत्र सन्देहः। किं खादिरश्चोदकेन प्राप्यते, स खलेवाली कर्त्तव्यः ? अथ न प्राप्यते, खादिरी अखादिरी वा खलेवाली स्याद् ? इति। तथा चित्रायां श्रूयते। दधि मधु घृतमापो धानास्तण्डुलास्तत्संसृष्टं प्राजापत्यं भवतीति। तत्रापि सन्देहः। किं व्रीहयश्चोदकेन प्राप्यन्ते, व्रैहास्तण्डुलाः कर्त्तव्याः ? उत न प्राप्यन्ते, व्रैहा अव्रैहा वा तण्डुला उपादातव्याः ? इति ॥ किं तावत् प्राप्तम्। खादिरादिः खलेवाली कर्त्तव्या, व्रैहास्तण्डुलाः कर्त्तव्याः। चोदकेन खादिरादयो व्रीहयश्च प्राप्नुवन्ति। एवं चोदकानुग्रहो भविष्यति । तेषां प्राप्तानां खलेवालीत्वं विधीयते । यो यूपः स खलेवाली कर्त्तव्य इति । शक्यते हि यूपः खलेवाली कर्त्तुं, न खलेवाली केनचित् प्रकारेण यूपो भवति। खादिरादीनां हि काष्ठानां संस्कारैर्यूपः क्रियते छेदनादिभिः, न त्वन्येषाम्। तत्र यूपो भवतीति यूपकार्ये भवतीत्युक्तं स्यात् । तथा लक्षणाशब्दो भवेत्। व्रीहीणामपि तण्डुलाश्चोदकेन प्राप्ता एव। तेषां तद्भूतानां पिष्टभावं प्रत्याख्याय देवतासम्बन्धः क्रियते। तस्मात् खादिरादयः खलेवालीत्वमापादयितव्याः। व्रीहयश्च तण्डुलभावमापादयितव्या इति ॥

एवं प्राप्ते ब्रूमः। विप्रतिषेधे एतस्मिन् प्राकृतस्य गुणस्य लोपः स्यात्। कथं विप्रतिषेधः। तद्वचनात् । खलेवाल्या यूपता विधीयते, न यूपस्य खलवालीता । तथा अव्यवहितेन भवतिना सम्बन्धात् प्रत्यक्षं वाक्यम् । इतरथा व्यवहितेन परोक्षं स्यात्। खलेवालीशब्दश्च यः खले वारणे प्रवर्त्तते तस्य वाचकः। तथाभूतश्च यूपकार्ये विनियुज्यते। या खलेवाली स यूप इति । शक्यते च यूपकार्ये विनियोक्तुम् । यत्तु यूपशब्दः कार्यलक्षणार्थ इति। व्यवधानाल्लक्षणापि ज्यायसी । प्रत्यक्षं हि लक्षणायां, परोक्षं व्यवधाने वाक्यम्। तस्माद् यज्जातीयस्य वृक्षस्य खलवाली कृता, तज्जातीयस्य यूपकार्ये विनियोक्तव्या। नैनां चोदको विशेषेऽवस्थापयितुं शक्नोति। प्रत्यक्षा हि श्रुतिः। तथा चोदकेन बाधिता स्यात्। तस्मान्न खादिरादिनियम इति ॥ ६९ ॥ साद्यस्क्रे चित्रायां च खलेवाल्यास्तण्डुलस्य

ध यथाक्रमं खादिरत्वव्रैहत्वानियमाधिकरणम् ॥ ३१ ॥

परेषां प्रतिषेधः स्यात् ॥ ७० ॥

खलेवाल्यामेव संशयः । किं तक्षणं जोषणमुच्छ्रयणमित्येवमादयः पदार्थाः कर्त्तव्याः, न ? इति । किं प्राप्तम् । चोदकानुग्रहाय कर्त्तव्या इति ॥ एवं प्राप्ते ब्रूमः, परेषां प्रतिषेधः स्यादिति । तथाभूतस्य हि यूपकार्ये विनियोगे कृते कृतः शास्त्रार्थो भवति । कृते शास्त्रार्थे स अपरस्मै गुणाय यतितव्यम् । अपिच तक्षणादीनि यूपकारणानि । न चात्र यूपे योजनम् । अयूपो हि यूपकार्य्ये विनियोजयितव्यः । तस्मात् तक्षणादयो न कर्त्तव्या इति ॥ ७० ॥ सि० ॥

प्रतिषेधाच्च ॥ ७१ ॥

इतश्च न कर्त्तव्याः । विप्रतिषेधः कृतो भवेत्, क्रियमाणेषु तस्याः खलेवाल्याः । यत् काष्ठं खले वारणप्रवृत्तं, सा खलेवाली । तादृश्येवोपादातव्या । तक्षणे क्रियमाणे सा विनश्येत्, द्रव्यान्तरं जायेत । यद् न खले वारणे प्रवृत्तम् । जोषणं तु भ्रष्टावसरमेव । जोषितं तद् अन्यार्थेनैव । वृक्षाणां हि जोषणं, न तु विकारस्य । उच्छ्रयणं चोच्छ्रिताया अशक्यमेव । तस्मात्तक्षणादयो न कर्त्तव्या इति ॥ ७१ ॥ हेतुः ॥ खलेवाल्यां तक्षणाद्यननुष्ठानाधिकरणम् ॥ ३२ ॥

अर्थाभावे संस्कारत्वं स्यात् ॥ ७२ ॥

खलेवाल्यामेव सन्देहः । किं मैत्रावरुणदण्डेन भूमेः समक्रिया, अद्भिरवसेचनं, बलवदवधानमञ्जनमित्येवमादयः पदार्थाः कर्त्तव्याः, उत न ? इति । किं प्राप्तम् । न कर्त्तव्या इति । परेषां प्रतिषेधः स्यादित्युक्तम् । यादृशः खले वारणे वर्त्तते, तादृश एव यूपकार्ये विनियोक्तव्यः अयूपः । यूपार्थाश्च चोदकप्राप्ताः संस्कारास्तस्मिन्निवर्त्तेरन्निति

एवं प्राप्ते ब्रूमः । अर्थाभावे कार्याभावे यदि खले वाल्यास्तैः संस्कारैः कार्यं न भवति, ततो यूपत्वमेव तेषां निमित्तं स्यात्, खलेवाल्यां न भवेयुः । इह पुनर्भूमेः समक्रियया अद्भिरवसेचनेन बलवदवधानेन च कार्यमस्ति दार्ढ्यम् । शिथिला हि सा खले वारणे न भवति । न च खलेवालीत्वमुपघ्नन्ति । तस्मात् कर्त्तव्याः । अञ्जनमपि अनुपघातकं चोदकप्राप्तं, क्रियमाणमधिकाय गुणाय स्यान्न दोषाय । तस्मात् तदपि कर्त्तव्यमिति ॥ ७२ ॥ खलेवाल्यां पर्यूहणादि-

संस्काराणामनुष्ठानाधिकरणम् ॥ ३३ ॥

अर्थेन च विपर्यासे तादर्थ्यात्तत्त्वमेव स्यात् ॥ ७३ ॥

अस्ति महापितृयज्ञः, सोमाय पितृमते षट्कपालं पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थमिति। धाना इत्यत्र सन्देहः। किं धानासु हन्तिः कर्त्तव्यः ? उत नेति। किं प्राप्तम्। न कर्त्तव्य इति। कुतः। विघातात्। क्रियमाणे हन्तौ धानात्वं विहन्येत, सक्तवो हि भवेयुः। तस्मान्न कर्त्तव्या इति॥

एवं प्राप्ते ब्रूमः। उक्तमविघातकमधिकाय गुणाय कर्त्तव्यम्, अञ्जनवदिति। आह। अञ्जनमविघातकं, हन्तिस्तु धानात्वं विहन्तीति। अत्रोच्यते। यथा न विघातकं भवति, तथा करिष्यते। विपर्य्यसिष्यते तथा, न विहनिष्यते। विपर्यासे क्रममात्रं न कृतं भवति, पदार्थस्तु न निवर्त्तते। तदुक्तं, गुणलोपे च मुख्यक्रिया भवतीति। तस्मात् पूर्वं हन्तिं कृत्वा पाकः कार्यः। तत्र हि हन्तिः पाकार्थो भविष्यति, न धानात्वं विहनिष्यते इति ॥ ७३ ॥ महापितृयज्ञे धानासु अवघातानुष्ठानाधिकरणम् ॥ ३४ ॥ इति भट्टश्रीशबरस्वामिविरचिते मीमांसाभाष्ये दशमाध्यायस्य द्वितीयः पादः ॥ १० ॥ २ ॥

अथ दशमे अध्याये तृतीयः पादः ॥ १० ॥ ३ ॥

विकृतौ शब्दवत्त्वात् प्रधानस्य गुणानामधिकोत्पत्तिः सन्निधानात् ॥ १ ॥

अस्ति सोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति। तत्रेदं समाम्नायते। एकादश प्रयाजान् यजत्येकादशानुयजान् यजतीति। तथा चातुर्मास्यानि चातुर्मास्यैः स्वर्गकामो यजेतेति। तत्राप्याम्नायते, नव प्रयाजान् यजति नवानुयाजानिति। तथा वायव्यं श्वेतमालभेत भूतिकाम इति। तत्राप्याम्नायते। हिरण्यगर्भः समवर्त्तताग्रे इत्याघारमाघारयति। तथा अवभृथे श्रूयते, अप्सु तृणां प्रास्याघारमाघारयतीति। तदेतेषु संशयः। किं प्राकृतेतिकर्त्तव्यता न प्राप्यते, अप्राप्तायां कर्मान्तराण्येतानि चोद्यन्ते ? अथ वा प्राप्यते, प्राप्तायां गुणविधयः ? इति। किं प्राप्तम्। न प्राप्यते इति। विकृतौ तस्यां तस्यां शब्दवद् प्रधानं नाङ्गानि।

तस्मादग्नीषोमीयादिषु गुणकर्मणामधिकानामुत्पत्तिः । यजति, आघारमाघारयतीति च कर्मान्तराण्येतानि विधीयन्ते । तथा हि श्रुतिरनुगृहीता भवति । तैरेव च तानि साङ्गानि जायन्ते । तस्मात् प्राकृती इतिकर्त्तव्यता न प्राप्यते । सन्निहिता हि सा प्रकृतौ, न प्रकृतिं सन्निहितामतिक्रमिष्यतीति ॥ १ ॥ पूर्व० ॥

प्रकृतिवत्तस्य चानुपरोधः ॥ २ ॥

एवञ्च नोपरोधो भविष्यति । क्व उपरोधः । प्रकृतिवदिति कल्पना । स चोदकशब्दो न दूरे सतीमिमामनेकवाक्यव्यवहितां प्रकृतिमपेक्षिष्यते । तस्मात् कर्मान्तराणि चोद्यन्ते । प्रयाजयागान् करोति, नय करोति, आघारं करोति, हिरण्यगर्भः समवर्त्तताग्रे इति करोतीति ॥ २ ॥ युक्तिः ॥

चोदनाप्रभुत्वाच्च ॥ ३ ॥

इदं परिचोदनोत्तरं सूत्रम् । नन्वेषां कर्म चोदयितुं सामर्थ्यं नास्ति । कथमिति । नैतस्माद्वाक्यादिदमवगम्यते, यागं करोतीति । कथं तर्हि । यागे एकादशसङ्ख्यां करोतीति । यागे गुणवत्तां भावयतीति गुणशब्दश्रवणात् । यागसत्तायां भाव्यमानायां गुणशब्दश्रवणमनर्थकं स्यात् । तस्माद् गुणविधिस्वरूपा एते शब्दा इति ॥ अत्रोच्यते । अस्त्येतेषां चोदनाप्रभुत्वे सामर्थ्यम् । प्रभवन्त्येते कर्म चोदयितुम् । कुतः । आख्यातशब्दा ह्येते । आख्यातशब्दाश्च कर्मणश्चोदकाः समधिगताः भावार्थाः कर्मशब्दाः, इति । त एते सगुणं कर्म चोदयिष्यन्ति । यागः कर्त्तव्यः, एकादशसङ्ख्या चेत्येवं सर्वत्र । तस्मात् कर्मणश्चोदका एते शब्दाः । इतिकर्त्तव्यता न प्राप्नोतीति ॥ ३ ॥ आ० नि० ॥

प्रधानं त्वङ्गसंयुक्तं तथाभूतमपूर्वं स्यात् तस्य विध्युपलक्षणात् सर्वो हि पूर्ववान् विधिरविशेषात् प्रवर्त्तितः ॥ ४ ॥

न त्वेतदस्ति, इतिकर्त्तव्यता न प्राप्यते कर्मान्तराणीति । प्रधानं प्राकृतमङ्गसंयुक्तं तथाभूतमपूर्वमपि वैकृतं स्यात् । उक्तमेतद्विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्त्तते तथाहि लिङ्गदर्शनम् इति । तस्य प्राकृतस्य कर्मणो विधिर्वैकृतेषु कर्मसु केषुचिदुपलक्ष्यते । त-

स्मात् सर्वो वैकृतो विधिः पूर्ववान् प्रकृतिपूर्वकः । अविशेषात् प्रवर्त्तितश्चोदकादवगम्यते । तस्मादिहापि प्राकृती इतिकर्त्तव्यता प्राप्यते । यदुच्यते, प्रयाजादिभिर्निराकाङ्क्षत्वात् प्राकृती इतिकर्त्तव्यता न प्राप्यते इति । स्यादेतदेवं, यदि यागो विधीयते । यागे हि विधीयमाने एकादश, नव, हिरण्यगर्भः समवर्त्तताग्रे इत्येतानि पदान्यनर्थकानि भवेयुः । न च शक्यते वदितुमेकादशादीनि अनूद्यन्ते इति । अपूर्वाणि हि तानि अवश्यं विधातव्यानि । तानि च वाक्येन यागे । अथ यागो विधीयते, यागे च सङ्ख्या, तथा वाक्यं भिद्येत । तस्माद् इतिकर्त्तव्यतायां प्राप्तायां गुणविधय एते इति ॥ ४ ॥ सि० ॥

न चाङ्गविधिरनङ्गे स्यात् ॥ ५ ॥

इतश्च गुणविधय इति । न ह्यनङ्गे कर्मणि अङ्गस्य विशेषविधिः स्यात् । भवति च विशेषविधिः । आश्ववालः प्रस्तर इति । न हि असति प्रस्तरे प्रस्तरविशेषः शिष्येत । यथा यस्य नास्ति पुत्रो, न तस्य पुत्रस्य क्रीडनकानि क्रियन्ते । एवमिहापि प्रस्तरस्याश्ववालता न विधीयेत । तस्माद् गुणविधय इति ॥ ५ ॥

कर्मणश्चैकशब्द्यात् सन्निधाने विधेराख्यासंयोगो गुणेन तद्विकारः स्याच्छब्दस्य विधिगामित्वाद् गुणस्य चोपदेश्यत्वात् ॥ ६ ॥

अयं त्वपरो विशेषः, प्रधानकर्मणो गुणकर्मणश्चैकशब्द्यात् । प्रयोगवचनेन हि एकेन शब्देनाङ्गप्रधानान्युच्यन्ते । तस्मात् प्रधानवचने सन्निहितानि अङ्गानि । तेषु सन्निहितेषु गुणविधेर्नाम गृहीत्वा अभिसम्बन्धो भवति । यः प्रयाजसंज्ञको यागः, तत्र गुण इति । एवं सर्वत्र यागे गुणेन तद्विकारः स्यात् । संख्यया मन्त्रेण च संख्यान्तरं मन्त्रान्तरञ्च विक्रियेत । प्रयाजादिविधिगामी हि शब्दः । गुणश्चोपदेष्टव्यः । नानर्थकं पुनर्वचनम् । तस्माद् इतिकर्त्तव्यता प्राप्यते । प्राप्तायां गुणविधय इति ॥ ६ ॥

अकार्यत्वाच्च नाम्नः ॥ ७ ॥

न च शक्यते वदितुं, नामनामिसम्बन्धोऽयं विधीयते इति । अन्या हि वचनव्यक्तिः शब्दार्थसम्बन्धे विधीयमाने भवति । एकादश यागान् करोति । ते च प्रयाजानुयाजसंज्ञका भवन्तीति । वाक्यं हि

अस्यां वचनव्यक्तौ सिध्येत । अथ पुनरेषां प्रसिद्धनामकानामुच्चारणं गुणविधानार्थं, तस्मादपि इतिकर्त्तव्यता प्राप्यते, गुणविधयश्चैते इति ॥ ७ ॥ युक्तिः ॥

तुल्या च प्रभुता गुणे ॥ ८ ॥

इदं पदेभ्यः कश्चिदुत्तरं सूत्रम् । कानि तानि पदानि ? यदुक्तं, प्रयाजानुयाजा असन्निहिताः, न शक्यते तेषां गुणो विधातुमिति । तत् परिहर्त्तव्यम् ॥ अत्रोच्यते । तुल्या ह्येषा प्रभुता गुणान् प्रति चोदकस्य, प्राकृतान् गुणान् इह प्रापयिष्यति । ते च प्राप्ता गुणविधानपरे वाक्ये इह सङ्कीर्त्यन्ते । यद्वा उत्पाद्य प्रापयिष्यति । ते गुणवचनेन सम्भन्त्स्यन्ते इति । तत्रोत्पन्नानां प्राप्तिर्लघीयसी । प्राकृतान् प्राप्य कृतार्थः शब्दो नापूर्वान् उत्पादयितुं शक्नोति । इदमधुनातनवचनमुत्पादकमिति चेत् । नैतदेवम् । गुणसम्बन्धार्थमेव तद् । गुणवचनस्य श्रवणात् । तस्मादपि प्राप्तेषु गुणविधय इति ॥ अथ यदुक्तम्, आख्यातशब्दा एते कर्मणो विधायकाः । भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत इति । तुल्या एषां प्रभुता आख्यातशब्दानाम् । ये हि शक्नुवन्ति गुणवचनसहिता गुणं कर्म च विधातुं, शक्नुवन्तितरां ते केवलं गुणं विधातुम् । यो हि पाषाणान् भक्षयति, ईषत्करास्तस्य मुद्गशष्कुलय इति । तस्मादपि गुणविधय इति॥८॥

सर्वमेवं प्रधानमिति चेत् ॥ ९ ॥

इति चेत् पश्यसि, आख्यातशब्दोऽयं गुणं विधास्यतीति । एवं सति सर्वं प्रधानम् । आख्यातशब्दवाच्यत्वादिति ॥ ९ ॥ आ० नि०॥

तथाभूतेन संयोगाद्यथार्थविधयः स्युः ॥ १० ॥

न हि आख्यातशब्दाभिधानेन प्रधानभूतो गुणभूतो वा अर्थो भवति । यः स्वभावतो गुणभूतोऽर्थः, नासौ आख्याताभिधानेन प्रधाने भूतो भवति । तथाभूतेन संयोगे सतिआख्यातशब्दभूतेन यथार्थविधयो भवेयुः । यत् प्रधानं तत् प्रधानमेव, यद् गुणभूतं तद् गुणभूतमेवेति ॥ १० ॥ आशङ्कानिरासे युक्तिः ॥

विधित्वं चाविशिष्टमेवं प्राकृतानां वैकृतैः कर्मणा योगात्तस्मात् सर्वं प्रधानार्थम् ॥ ११ ॥

इतश्च पश्यामो गुणविधय इति । कुतः । विधित्वं चाविशिष्टम् ।

प्राकृतानां वैकृतैरर्थवादकर्म्मणा योगो न विशिष्यते। अग्निं स्विष्टकृतं यजति यज्ञस्य प्रतिष्ठित्यै इति । प्रकृतौ य एव, स एव विकृतावर्थवादो भवति । अग्निं स्विष्टकृतं यजति यज्ञमेव प्रतिष्ठापयतीति । तथा चक्षुषी वा एते यज्ञस्य यदाज्यभागौ इति प्रकृतौ, आज्यभागौ यजति चक्षुषी एव नान्तरेति इति विकृतौ । तस्मात् सर्वमेवञ्जातीयकं प्रधानार्थं, विकृतौ गुणभूतमिति ॥ ११ ॥

समत्वाच्च तदुत्पत्तेः संस्कारैरधिकारः स्यात् ॥ १२ ॥

इतश्च पश्यामो न सर्वं प्रधानं, प्रधानार्थमपि किञ्चिदस्तीति । समा हि उत्पत्तिक्रमता प्रयाजानुयाजानाम् । येनैव क्रमेण प्रकृतौ प्रयाजानुयाजानां संस्काराणामधिकारस्तेनैव क्रमेण विकृतौ दृश्यते। कथम् । प्रजापतिर्यज्ञमसृजत स आज्यं पुरस्तादसृजत पशुं मध्यतः पृषदाज्यं पश्चादिति । तस्मादाज्येन पुरस्तात् प्रयाजा वर्त्तन्ते पशुना मध्यतः पृषदाज्येन पश्चादनुयाजा वर्त्तन्ते इति प्रयाजानुयाजानां स्वक्रमाणां दर्शनं प्रधानार्थत्वे सति उपपद्यते, न प्रधानत्वे। तस्मान्न सर्वं प्रधानं, प्रधानार्थमपि किञ्चिदस्तीति ॥ १२ ॥ युक्तिः ॥ पश्वादौ सामिधन्यादिप्राकृतेतिकर्तव्यताऽनुष्ठानाधिकरणम् ॥ १ ॥

हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात् ॥ १३ ॥

अस्ति वायव्यः पशुः, वायव्यं श्वेतमालभेत भूतिकाम इति । तत्र श्रूयते । हिरण्यगर्भः समवर्त्तताग्रे इत्याघारमाघारयतीति । तत्रायमर्थः समधिगतः । प्राप्ते एवाघारे गुणविधिरयमिति । इदन्तु चिन्त्यते । किं पूर्वस्मिन्नाघारे गुणविधिः? उत, उत्तरस्मिन्निति । किं प्राप्तम् । हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात् । पूर्वस्य आघारस्य गुणविधिरयम् । कुतः । मन्त्रलिङ्गात् । एवं मन्त्रार्थो भवति । हिरण्यगर्भः समवर्त्तताग्रे इत्याघारमाघारयतीत्यत्र मन्त्रे इदमस्ति वचनं, भूतस्य जातः पतिरेक आसीदिति । एक इति च प्रजापतेरभिधानमिति । स हि प्रजोत्पत्तिसम्भवात् प्राक्, प्रजोत्पत्तेरेकसङ्ख्यायुक्त इति गम्यते। स एष मन्त्रः प्रजापतिमभिवदितुं शक्नोति। प्राजापत्यश्च पूर्व आघारः। तत्रायं समर्थः कार्यं निर्वर्त्तयितुं, नोत्तरस्मिन् । अतः पूर्वस्य गुणविधिरिति ॥ १३ ॥ पूर्व० ॥

प्रकृत्यनुपरोधाच्च ॥ १४ ॥

प्रकृतिवदिति चोदकस्यानुपरोधो भविष्यति । उत्तरस्य आघारस्य मन्त्रानपनयात् । इतरथा अपनीयेत, ऊर्ध्वोऽध्वर इति मन्त्रः । तस्मादपि पूर्वस्य गुणविधिरिति ॥ १४ ॥ युक्तिः ॥

उत्तरस्य वा मन्त्रार्थित्वात् ॥ १५ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न पूर्वस्य गुणविधिरिति । किं तर्हि । उत्तरस्य गुणो विधीयते । तस्य मन्त्रेणार्थो, न पूर्वस्य । कथम् । एवमाम्नायते । हिरण्यगर्भः समवर्त्तताग्रे इत्याघारयतीति । कोऽर्थः । आघारे एतामृचमुच्चारयतीति । सा उच्चारिता विशिष्टं श्रौतं विज्ञानमङ्गभूतं करोति । कस्मै देवाय हविषा विधेम इति । एकस्मै देवायेत्यर्थः । एकारलोपेन एतच्छब्दविज्ञानाद् एतदर्थप्रत्ययो भवति, एकस्मै देवाय हविर्दातव्यमिति । न च पूर्वस्मिन्नाघारे श्रौतं विज्ञानमङ्गभूतमस्ति । तत्र कल्पयितव्यं स्यात् । श्रौतं विज्ञानमङ्गभूतं भवतीति । तच्च हिरण्यगर्भः समवर्त्तताग्रे इत्येतेन कर्त्तव्यमिति । कल्पनायां न प्रमाणमस्ति । इदं हि वाक्यं मन्त्रकार्यविशेषस्य विधायकं, न मन्त्रकार्यसामान्यस्य नियामकम् । सामान्यं मन्त्रकार्यं पाक्षिकम् । तस्मिन् पाक्षिके मन्त्रकार्ये विशेषविधानमिति चेत् । आनर्थक्यम्, अस्मत्पक्षपरिग्रहश्च, उपदेशस्य चार्थवत्त्वम् । जौहवाघाराविषयत्वात् । तस्मादुत्तरस्य गुणविधिरिति ॥

यदुक्तं, प्रजापतिवचनोऽयं मन्त्र इन्द्रमभिवदितुं न शक्तो भविष्यतीति । नैतदेवम् । यथा हि प्रजापतिरेक इति संस्तुतः प्रजापतिशब्दत्वात् । एकोऽसौ प्राक् प्रजोत्पत्तेरिति प्रजापतिरेक आसीदित्युच्यते।एवमिन्द्रोऽपि, ऐश्वर्य्यवचनत्वादिन्द्रशब्दस्य, सर्वमुत्पादयितुमयम् अजमिति संस्तूयते। क ईंस्तवत् कः पृणात् को यजाते यदुग्रमिन्मघवा विश्वहावेत् । पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः (ऋ० ६ म० ४७ सू०) इति । तथा, क उ नु ते महिमनः समस्यास्मत् पूर्व ऋषयोऽन्तमायुः । यन्मातरञ्च पितरञ्च साकमयजनयथाः स्तन्वा स्वायाः (ऋ० १० म० ५४ सू०) इति । क ईंस्तवत् कः पृणात् को यजाते इति । ऐन्द्रे सूक्ते वचनादैन्द्री ऋक् । क एनं शक्नोति स्तोतुं, को वाऽस्मै ददाति, को वा यजतीति सर्वत्राऽनवक्लृप्तिः । अयमेव सर्वमिदं करोति । यथा गच्छन् कश्चित् पूर्व-

पादमपरं करोति, अपरञ्च पूर्वम् । एवमयमिदं सर्वं करोतीति । अयं चेत् सर्वं करोतीति, प्राक् करणादेकः । तथा, क उ नु ते महिमनः समस्य इति, कोऽस्य सकलस्य महिम्नः अस्मत्पूर्वेऽप्यृषयोऽन्तं प्राप्तुं शक्नुवन्ति, यन्मातापितरावपि स्वस्माच्छरीराज्जनयसीति मातापितृभ्यामपि पूर्वः, किमुत अन्यस्माज्जनादिति सिद्धमेकत्वमस्येति । सोऽपि प्राक् सर्वोत्पत्तेः, एक एव । अत इन्द्राभिधायिन्येषा ऋक्, तस्मादविरोधः ॥ १५ ॥ सि० ॥

विध्यतिदेशात्तच्छ्रुतौ विकारः स्यात् गुणानामुपदेश्यत्वात् ॥ १६ ॥

गुणविधिरयमुपदिश्यते, आघारश्रुतौ । स तन्मन्त्रस्य विकारः स्यात् । उपदेश्यो हि मन्त्रविशेषोऽत्र उत्तरस्मिन्नाघारे, यच्छ्रौतं मन्त्रविशेषविज्ञानम्, ऊर्ध्वोऽध्वरो दिविस्पृशमह्रुतो यज्ञो यज्ञपतेरिन्द्रावान् बृहद्भावी हि मधोर्घृतस्य स्वाहा इति । तदङ्गभूतमुपकारकस्य विज्ञानस्य साधनमिति इन्द्राय हविर्दातव्यम् । इह तु हिरण्यगर्भ इति विज्ञानं श्रौतं, श्रौतस्य प्राकृतस्य विज्ञानस्य कार्यं विधातुमर्हति सामर्थ्यात् । इदं दधि घृतं शाकमिमे शालयः, देवदत्तो भोजयितव्यः । देवदत्तवद् यज्ञदत्तस्तैलेनेति भोजने तैलमुपकारकं श्रूयमाणं, यस्य प्राकृतस्य कार्यमभिनिर्वर्त्तयितुं शक्नोति, तस्य कार्य्यें विनियुज्यते घृतस्य । सामान्यं हि अस्य स्नेहनसामर्थ्यं घृतेनेति । इहाऽपि मन्त्र उच्चार्यमाणः प्राकृते श्रौतविज्ञाने विशेषमुत्पादयति । तच्चोत्तरस्मिन्नङ्गभूतं तदर्थविज्ञानस्य साधकं, न पूर्वस्मिन् । तस्मादुत्तरस्य गुणविधिरिति ॥ १६ ॥

पूर्वस्मिँश्चामन्त्रत्वदर्शनात् ॥ १७ ॥

पूर्वस्मिंश्चाघारे अमन्त्रत्वमेव दर्शयति, स्वाहेति करोति, मन्त्रञ्च न आहेति । तस्मादप्युत्तरस्य गुणविधिरिति ॥ १७ ॥

युक्तिः ॥ वायव्यपशौ हिरण्यगर्भ इत्यादिमन्त्रस्योत्तरस्मिन्नाघारे गुणत्वाधिकरणम् ॥ २ ॥

संस्कारे तु क्रियान्तरं तस्य विधायकत्वात् ॥ १८ ॥

सन्ति चातुर्मास्याः सोमाः । तत्र श्रूयते, उत्करे वाजिनमासादयन्ति, परिधौ पशुं नियुञ्जन्तीति । तत्रैषोऽर्थः सांशयिकः । किमेत-

दासादनान्तरं नियोजनान्तरञ्च ? उत प्राकृतयोरासादननियोजनयोर्गुणविधिः, इतरश्चेतरश्चेति । तत्रैतत्तावन्नः परीक्ष्यम् । किं धर्ममात्रमासादनं नियोजनञ्च, उत दृष्टकार्य्यमिति । यदि धर्ममात्रं, ततः क्रियान्तरम् । अथ दृष्टकार्यं, ततो गुणविधिरिति । तत उभयं सन्दिग्धमित्युभयं संहत्य परीक्ष्यते । किं धर्ममात्रमितरश्चेतरश्च क्रियान्तरम्, उत दृष्टकार्ये गुणविधिः ? इति ॥ किं प्राप्तम् । तुङ्गत्वात् तीक्ष्णाग्रत्वाच्चोत्करस्य दृष्टं कार्यमासादनं न शक्यं कर्त्तुम् । तथोपशयत्वात् परिधेर्दृष्टकार्यकं नियोजनमशक्यं कर्त्तुम् । तस्माद् धर्ममात्रम् । यथा सौत्रामणीप्रकरणे, ब्राह्मणस्य मूर्द्धनि आसादयतीति धर्ममात्रमासादनम् । एवमिहापि धर्ममात्रं चेत् क्रियान्तरम् । तथा च सति आसादानं नियोजनञ्च विधायिष्यते । तत्र श्रुत्या विहितं भविष्यति । इतरथा वाक्यं विधायकं स्यात् । अपि च अस्मत्पक्षे आसादननियोजने गुणविधिलक्षणार्थे न भविष्यतः । भवत्पक्षे तु गुणविधिं लक्षयेयाताम् । तस्मात् क्रियान्तरम् इतरदितरच्च । तस्य विधायकत्वात् स्वपदगतस्य भावप्रत्ययस्य पदोत्तरस्य न यथा आघारे गुणविधिस्तथाऽस्मिन् संस्कारे आसादननियोजनाख्ये ॥१८॥ पूर्व० ॥

प्रकृत्यनुपरोधाच्च ॥ १९ ॥

एवञ्च प्राकृतस्य धर्मस्य प्रापकश्चोदको नोपरोत्स्यते । वेद्यां हवींष्यासादयति, यूपे पशुं नियुञ्जन्तीति । तस्मादपि क्रियान्तरमिति ॥ १९ ॥ युक्तिः ॥

विधेस्तु तत्र भावात् सन्देहे यस्य शब्दस्तदर्थः स्यात् ॥ २० ॥

तुशब्दः पक्षं व्यावर्त्तयति । नासादनान्तरं नियोजनान्तरं चेति । किं तर्हि । प्राकृतयोरासादननियोजनयोर्गुणविधिः । तत्रैतद्वर्ण्यते । दृष्टकार्यके आसादननियोजने इति । कुतः । कार्यस्य दृष्टत्वात् । आसादनं समीपानयनम् । तस्य होमनिर्वृत्तिर्दृष्टं प्रयोजनम् । नियोजनस्यापि पश्वनपगमः । एवं चेत्, तस्माद् गुणविधिरितरश्च इतरश्च । कुतः । विधेरासादननियोजनविधेस्तत्र दृष्टत्वात्, चोदकेन तत्र प्राप्तत्वात् । संदेहे, तत्र गुणविधिः कर्मान्तरमिति । न कर्मान्तरविधानं युक्तम् । अज्ञातस्य हि ज्ञापनं विधिः । ज्ञाते च चोदकेन

आसादननियोजने । तस्माद् यस्य गुणस्य चोदकः शब्दस्तदर्थतया उच्चारणं स्यात् । तस्माद् गुणविधिरिति । अथ यदुक्तं, श्रुतिरेवं विधायिका, त्वत्पक्षे तु वाक्यमिति । उच्यते । यद्यपि वाक्यं, तथापि अल्पीयसी अदृष्टानुमानकल्पना भविष्यतीति । यावता केवलस्य गुणस्य विधीयमानस्य, न गुणस्य कर्मसहितस्येति ॥ २० ॥ सि० ॥

संस्कारसामर्थ्याद्गुणसंयोगाच्च ॥ २१ ॥

अथ यदुक्तं, तीक्ष्णाग्रत्वादुत्करस्य, उपशयत्वाच्च परिधेः, दृष्टकार्ये आसादननियोजने न शक्येते कर्त्तुमिति । अत्रोच्यते । यथा शक्येते उत्करे च परिधौ च आसादननियोजने कर्त्तुं, तथा करिष्यते । पृथ्वग्रमुत्करं करिष्यामः । महान्तञ्च परिधिम् । अतः पृथ्वग्रतया स्थविम्ना च गुणेन संयोगादासदननियोजनसंस्कारसामर्थ्यं भविष्यति । तस्मान्न कर्मान्तरमिति ॥ २१ ॥ आ० नि० ॥

विप्रतिषेधात् क्रियाप्रकरणे स्यात् ॥ २२ ॥

अथ यदुक्तं, यथा सौत्रामणीप्रकरणे धर्ममात्रमासादनम्, एवमिहापीति । तत्परिहर्त्तव्यम् । अत्रोच्यते । सौत्रामणीप्रकरणे विप्रतिषेधान्न शक्यं दृष्टकार्यकमासादनं कर्त्तुम् । तस्मात् क्रियामात्रमदृष्टकार्यकं सौत्रामणीप्रकरणे स्यात्, न त्विह दृष्टकार्यकमशक्यम् । तस्माद् गुणविधिः ॥ २२ ॥ युक्तिनिरासः ॥ चातुर्मास्येषु सोमेष्वासादननियोजनयोः प्राकृतगुणविधित्वाधिकरणम् ॥ ३ ॥

षड्भिर्दीक्षयतीति तासां मन्त्रविकारः श्रुतिसंयोगात् ॥ २३ ॥

अस्ति अग्निः, य एवं विद्वानग्निं चिनुते इति । तत्र दीक्षाहुतयः प्राकृत्यो वैकृत्यश्च । आकूतिमग्निं प्रयुजं स्वाहा, मनो मेधामग्निं प्रयुजं स्वाहा, चित्तं विज्ञातमग्निं प्रयुजं स्वाहा, वाचो विधृतिमग्निं प्रयुजं स्वाहा, प्रजापतये मनवे स्वाहा, अग्नये वैश्वानराय स्वाहा, विश्वे देवस्य नेतुर्मर्त्तो वृणीत सख्यम् । विश्वे राय इषुध्यसि द्युम्नंवृणीत पुष्यसे स्वाहा इति प्राकृत्यः । तथा वैकृत्यः आकूत्यै प्रयुजेऽग्नये स्वाहा, मेधायै मनसेऽग्नये स्वाहा, दीक्षायै तपसेऽग्नये स्वाहा, सरस्वत्यै पूष्णेऽग्नये स्वाहा, आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा विधातु स्वाहा, विश्वे देवस्य नेतुर्मर्त्तो वृ-

प्रशंसा सोमशब्दः ॥ ६ ॥

अथ यदुक्तं, ताच्छब्द्यादिति । तत्र ब्रूमः । प्रशंसार्थोऽयं सोमशब्दो, न विध्यर्थः । विधायकस्याभावात् । सोमो वै वाजिनं, सुरा सोम इति । प्रकृष्टफलवत्त्वात् सोमस्य । तद्भावेन सुरावाजिनयोः प्रशंसा । यथा, सिंहो देवदत्त इति पुरुषस्य । तस्मान्नायं नाम्ना धर्मोऽतिदेशः ॥ ६ ॥ पूर्वपक्षयुक्तिनिरासः ॥

वचनानीतराणि ॥ ७ ॥

इतराणि तु सीसक्रयादीनि वाचनिकानि । प्राप्तेरभावात् । अगत्या च वाक्यानामनेकार्थता, सगुणकर्मविधानेन ॥ ७ ॥ पूर्व० ॥

व्यपदेशश्च तद्वत् ॥ ८ ॥

शष्पैरेव दीक्षणीयामाप्नोति । तोक्मभिः प्रायणीयां, सिंहलोमभिरातिथ्यामिति । सोमविकारत्वे प्रत्यक्षमेव दीक्षणीयादीनि प्राप्नुयुः । आप्तानां शष्पादिभिस्तदाप्तिवचनं नोपपद्यते ॥ ८ ॥ युक्तिः ॥

पशुपुरोडाशस्य च लिङ्गदर्शनम् ॥ ९ ॥

पशुपुरोडाशता च ग्रहाणां श्रूयते, नैतेषां पशूनां पुरोडाशा विद्यन्ते । ग्रहपुरोडाशा ह्येते पशव इति । तत्र तावदत्र ग्रहाः पुरोडाशाः । ग्रहा एव ते । यदि तु पुरोडाशधर्मकास्ततं एतदुपपद्यते । तस्मात् पौरोडाशिकस्तेषु विध्यन्तः ॥ ९ ॥ लिङ्गम् ॥ ॥ ऐष्टिकसौत्रामण्योरैष्टिकधर्मातिदेशाधिकरणम् ॥ १ ॥

पशुः पुरोडाशविकारः स्याद्देवतासामान्यात् ॥ १० ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । यो दीक्षितो, यदग्नीषोमीयं पशुमालभते इति । तत्र सन्देहः । किं पशुः पुरोडाशविकारः, उत साान्नाय्यविकार इति । किं प्राप्तम् । पशुः पुरोडाशविकारः स्यात् । कुतः । देवतासामान्यात् । अग्नीषोमीयः पशुः । पुरोडाशोऽपि तद्देवत्य एव ॥ १० ॥ पूर्व० ॥

प्रोक्षणाच्च ॥ ११ ॥

प्रोक्षणं पुरोडाशधर्मः पशौ दर्शयति । अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षामीति पशुं प्रोक्षतीति ॥ ११ ॥

पर्यग्निकरणाच्च ॥ १२ ॥

होमश्चेदापतितस्ततो वैकृताश्च साधका इत्यध्यवसेयम् । दीक्षणे हि ते वैकृताः श्रूयन्ते । षड्भिर्दीक्षयतीति । होमप्रयोगवचनस्तु प्रदानार्थान् स्वाहाकारान्तान् सामर्थ्येन सन्निहितान् गृह्णाति । उभये च प्राकृता वैकृताश्च सन्निहिताः । तस्मान्न विनिगमनायां हेतुरस्ति। इमान् सङ्गृह्णाति, इमान्नेति । न च प्रधानावृत्तिरिह दोषो भवतीत्युक्तमेव । तस्मात् प्राकृतानां मन्त्राणामहानम् । अपि च अन्यायश्च कृतेऽभ्यासः । सकृद्वैकृता मन्त्राः पठ्यन्ते । तैर्दीक्षितः सम्पादयितव्य इति । सकृत्सम्पादिते तैर्दीक्षिते कृतेऽर्थे पुनरभ्यासो न न्याय्यः । तस्मादपि प्राकृतानामहानमिति ॥ २६ ॥ आ० नि० ॥

पौर्वापर्यञ्चाभ्यासे नोपपद्यते नैमित्तिकत्वात् ॥ २७॥

अपि च पूर्वापरशब्दौ भवतः । षट् पूर्वाञ्जुहोति षडुत्तराञ्जुहोतीति । न च वैकृतानां केवलानामभ्यस्यमानानां पूर्वापरता उपपद्यते । नैमित्तिकत्वात् । पूर्वनिमित्तो हि उत्तरशब्दः, उत्तरनिमित्तश्च पूर्वशब्दः । तस्मादपि प्राकृतानामहानमिति ॥ २७ ॥

तत्पृथक्त्वञ्च दर्शयति ॥ २८ ॥

इतश्च पश्यामो— न निवृत्तिः, समुच्चय इति । कुतः । तासामाहुतीनां पृथक्त्वं दर्शयति । उभयीर्जुहोति आग्निकीश्चाध्वरिकीश्चेति । यद्युभयेषां मन्त्राणां समुच्चयस्ततस्तेषामाग्निकत्वात् आध्वरिकत्वाच्च भवत्येष निर्देशः । इतरथा सर्वा एवाग्निक्यो भवेयुः । तत्र पृथक्त्वं नोपपद्येत। भवति च पृथक्त्वम् । तस्मादनिवृत्तिः,समुच्चय इति ॥२८॥

न चाविशेषाद् व्यपदेशः स्यात् ॥ २९ ॥

इतश्चानिवृत्तिः, समुच्चय इति । कुतः । व्यपदेशात् । व्यपदेशो भवति । अध्वरस्य पूर्वमथाग्नेरुपाग्नि ह्येतत्कर्म यदग्निकर्म इति । पूर्वमध्वरस्य अथाग्नेरिति व्यपदेशः समुच्चयेऽवकल्पते, नासति विशेषे । तस्मात् समुच्चय इति ॥ २९ ॥ युक्तिः ॥ अग्निचयने प्राकृतवैकृतोभयदीक्षाहुतीनामनुष्ठानाधिकरणम् ॥ ४ ॥

अग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्यसंयोगात् ॥ ३० ॥

अस्ति पुनराधानं निमित्ते श्रूयते । भाग्ययशःश्रीकामानां पुनरादधीत । योऽग्नीनाधाय भाग्यज्यानिं पुत्रज्यानिं वा जीयेत स पुनरा-

दधीतेति । तत्र श्रूयते । पुनरुत्स्यूतं वासो दक्षिणा पुनरुत्सृष्टोऽनड्वानिति । तथा, आधाने दक्षिणा—एका देया षड् देया द्वादश देयाश्चतुर्विंशतिर्देयाः शतं देयं सहस्रं देयमपरिमितं देयमिति । तत्र संशयः । किं पुनराधानेऽग्न्याधानदक्षिणानामनिवृत्तिः, समुच्चयः । अथाग्न्याधेयदक्षिणानां निवृत्तिः ? इति । किं प्राप्तम् । अग्न्याधेयस्य नैमित्तिके पुनराधेये दक्षिणादानमधिकं स्यात् । प्राकृतीनामनिवृत्तिः समुच्चय इति । कुतः । एकस्मिन् वाक्ये उभय्यो दृश्यन्ते । उभयीर्ददाति, अग्न्याधेयिकीश्च पुनराधेयिकीश्चेति । तस्मादनिवृत्तिः, समुच्चय इति ॥ ३० ॥ पूर्व० ॥

शिष्टत्वाच्चेतरासां यथास्थानम् ॥ ३१ ॥

इदं पदोत्तरं सूत्रम् । कथं चोदकप्राप्तस्य प्रत्यक्षश्रुतस्य समुच्चयो भविष्यति ? अत्रोच्यते । शिष्टत्वादितरासां, प्राकृतीनां वचनप्रामाण्याद् यथास्थानं समुच्चयो भविष्यतीति । प्रत्यक्षं हीदमनुशासनम् । आग्न्याधेयिकीर्दत्वा पुनराधेयिकीर्ददातीति । तस्मान्न बाधः प्राकृतीनां, समुच्चय इति ॥ ३१ ॥ युक्तिः ॥

विकारस्त्वप्रकरणे हि काम्यानि ॥ ३२ ॥

तुशब्दः पक्षं व्यावर्त्तयति, न तु समुच्चयो विकार इति । कुतः । काम्यं ह्येतत् पुनराधेयं श्रूयते । तद् असति प्राकृते प्रकरणे आम्नानमवकल्पते, न सति । यत्तत्रोच्यते वैकृतं, तत् प्राकृतं बाधत इत्यर्थः । काम्यो वा नैमित्तिको वा अर्थो नित्यमर्थं विकृत्य निविशते । यथा अक्ष्यामये मुद्गौदनभोजनं निवातशय्या चेति नित्यं शय्यासनं भोजनञ्च विकरोति । प्रत्यक्षं हि वैकृतम् । आनुमानिकञ्च प्राकृतम् । तस्माद् वैकृतेन बाध्यते । अथ यदुक्तं, वचनप्रामाण्यात् प्राकृत्यो भविष्यन्तीति । अत्रोच्यते । ता उभयीर्ददातीति नात्र विधिविभक्तिरस्ति । वर्त्तमानापदेशोऽयम् । प्रमाणान्तरमादायापि अयमर्थः प्रापितः । उभयीर्दक्षिणा ददाति, अग्न्याधेयिकीः पौनराधेयिकीश्च । अग्न्याधेये अग्न्याधेयिकीः, पुनराधेये पौनराधेयिकीः । तदेतद् भूतानुवादमात्रम् । तस्मात् प्राकृतीनां निवृत्तिरिति ॥ ३२ ॥ सि० ॥

शङ्कते च निवृत्तेरुभयत्वं हि श्रूयते ॥ ३३ ॥

इतश्च प्राकृतीनां निवृत्तिः । कुतः । निवृत्त्याशङ्कादर्शनात् शङ्कते

हि निवृत्तिरिति गम्यते । कथम् । उभयत्वं हि श्रूयते । यद् वैकृतीर्द दाति दक्षिणा उभय्योऽपि तेन दक्षिणाः प्रत्ता भवन्ति । ननु उभय्योऽपि प्रदीयन्ते, यत उभय्योऽपि प्रत्ता भवन्तीत्याह । अग्न्याधेयिकी हि अग्न्याधेये, पुनराधेयिक्यः पुनराधेये । तस्मात् प्राकृतीनां निवृत्तिरिति ॥ ३३ ॥ युक्तिः ॥ पुनराधानेऽग्न्याधानदक्षिणानां निवृत्त्यऽधिकरणम् ॥ ५ ॥

वासो वत्सश्च सामान्यात् ॥ ३४ ॥

आग्रयणं भवति, हुतादाय यजमानस्यापराभवाय नवानामैन्द्राग्नः पुराणानामाग्नेयः सौम्यः श्यामाको वैश्वदेवः पयसि चरुः द्यावापृथिवीय एककपाल इति । तत्र श्रूयते । वासो दक्षिणा वत्सः प्रथमजो दक्षिणा इति । अस्ति तु प्रकृतौ अन्वाहार्य्यो दक्षिणेति । स इह चोदकेन प्राप्यते । तदत्र संशयः । किं वासो वत्समन्वाहार्य्यस्य निवर्त्तकम् ? उतानिवर्त्तकमिति । किं प्राप्तम् ? । चोदकानुग्रहाद् विरोधाभावाच्चानिवर्त्तकमिति ॥ एवं प्राप्ते ब्रूमः । वासो वत्सश्च सामान्यात् । उक्तमधस्तात् । आधानदक्षिणानां पुनराधेये निवृत्तिरिति । च-शब्देनान्वादेशः क्रियते । अन्वाहार्य्यस्य निवृत्तिः । कुतः । कार्यसामान्यात् । दक्षिणाकार्ये अन्वाहार्य्यः प्रकृतौ । इह वासो वत्सं तस्मिन् कार्ये । दक्षिणाशब्दश्रवणात् । तस्मान्न समुच्चयो, निवृत्तिरिति । प्राप्तिर्वा उत्तरविवक्षया क्रियते इति ॥ ३४ ॥ आग्रयणे वासोवत्साभ्यामन्वाहार्यस्य निवृत्त्यधिकरणम् ॥ ६ ॥

अर्थापत्तेस्तद्धर्म्मा स्यान्निमित्ताख्याभिसंयोगात् ॥ ३५ ॥

तत्रैव वाससि वत्से च संशयः । अन्वाहार्य्यधर्म्माः कर्त्तव्याः ? उत न ? इति । किं प्राप्तम् । न तावद् न्याय उच्यते । कर्त्तव्या इति । तेनाकर्त्तव्या इति मन्यामहे इति ॥

एवं प्राप्ते ब्रूमः । अर्थापत्तेस्तद्धर्म्मा वत्सः स्यात् । तद्धर्म्मकञ्च वासः साधनविशेषनिबन्धना हि ते धर्माः, नान्वाहार्य्यनिबन्धनाः । तस्माद् अन्यस्मिन्नपि तत्कार्यापन्ने भवितुमर्हन्तीति । कथं पुनर्वासो वत्सं तत्कार्यापन्नम् ? इति । निमित्ततयाऽऽख्याय परिक्रयेण दक्षिणेति तयाऽभिसंयोगो भवति । वासो दक्षिणा वत्सः प्रथमजो दक्षिणा इति । तस्माद्वासोवत्सावन्वाहार्य्यधर्मकौ स्यातामिति ॥ ३५ ॥

आग्रयणे वासोवत्सयोरन्वाहार्यधर्मानुष्ठानाधिकरणम् ॥ ७ ॥

दाने पाकोऽर्थलक्षणः ॥ ३६ ॥

तत्रैव, वत्सः प्रथमजो दक्षिणा इति। तत्रैतत् समधिगतं, अन्वाहार्य्यधर्माः कर्त्तव्या इति । तदत्र संशयः । किं वत्से पाकः कर्त्तव्यः, उत न ? इति। किं प्राप्तम् । चोदकानुग्रहाच्छक्यत्वाच्च कर्त्तव्य इति॥ एवं प्राप्ते ब्रूमः । वत्सस्य दाने पाको न कर्त्तव्यः । अपक्वो हि वत्सो वत्स एव । वत्सश्च श्रूयते, न मांसम् । परिक्रयाय च श्रूयते, न पुरुषसंस्काराय । तस्माच्चोदकः पाकं न प्रापयति । तद्यदि पाकः क्रियेत, अश्रुतः प्राणिवध आचारविरुद्धोऽनुष्ठीयेत । तस्मात् पाको न कार्यः ॥ ३६ ॥ आग्रयणे वत्से पाकाभावाधिकरणम् ॥ ८ ॥

पाकस्य चान्नकारितत्वात् ॥ ३७ ॥

तत्रैव श्रूयते, वासो दक्षिणा इति । तत्रायमर्थः समधिगतः । अन्वाहार्यधर्माः कर्त्तव्या इति । अथ पाकः कर्त्तव्यः, न ? इति संशयः । अर्थापत्तेः कर्त्तव्य इति प्राप्ते ब्रूमः । न कर्त्तव्यः । अन्नकारितत्वादिति । अन्नकारितो हि पाकः । न च वासोऽन्नम् । न तत्र पाकः शक्यते कर्त्तुम् । तस्मात् तत्र पाको न कर्त्तव्य इति ॥ ३७ ॥ आग्रयणे वाससि पाकाभावाधिकरणम् ॥ ९ ॥

तथाभिघारणस्य ॥ ३८ ॥

आग्रयणे श्रूयते, वासो दक्षिणा वत्सः प्रथमजो दक्षिणा इति । तत्रायमर्थः समधिगतः । अन्वाहार्यधर्मा वाससि वत्से च कर्त्तव्या इति । अथायमर्थः सांशयिकः, किमभिघारणं कर्त्तव्यं, न ? इति । किं तावत् प्राप्तम् । अर्थापत्तेः कर्त्तव्यमिति ॥ एवं प्राप्ते ब्रूमः । तथाऽभिघारणस्य । किम् । अक्रियेति, अभिघारणं हि अन्वाहार्ये स्वादिम्ने क्रियते । स्वादिमा हि ओदनस्य परिक्रये उपकरोति । न च वाससि वत्से च स्वादिम्ना प्रयोजनम् । तस्मात् तत्राभिघारणं न स्यादिति ॥ ३८ ॥ आग्रयणे वासोवत्सयोरभिघारणाभावाधिकरणम् ॥ १० ॥

द्रव्यविधिसन्निधौ सङ्ख्या तेषां गुणत्वात् स्यात् ॥३९॥

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्रैवाम्नायते, गौश्चाश्वश्च अश्वतरश्च गर्दभश्च अजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा इति । तत्र संशयः । किमे-

कैकस्य गवादेर्द्रव्यस्य द्वादशशतम्, उतैकस्य द्रव्यस्य। यदा एकस्य, तदा किमनियमो यस्य कस्यचित् ? उत माषाणाम् । अथ वा सर्वसम्पादनी इयं सङ्ख्या ? उतैकजातीयस्य । यदा एकजातीयस्य, तदा किमनियमः, यस्य कस्यचित् ? उत पशूनाम्। यदा पशूनां, तदा किमनियमः, येषांकेषाञ्चित् ? उत गवामिति । एते पक्षा भविष्यन्तीति। किं तावत् प्राप्तम्। द्रव्याणां विधीयमानानां सन्निधौ । केषां द्रव्याणाम्। गवादीनाम्। क विधीयमानानाम् ? । दक्षिणासंबन्धे संख्या समाम्नाता । तस्य द्वादशशतं दक्षिणा इति । तेषां गवादीनामेकैकस्य सङ्ख्या स्यात् । कुतः ? । गुणतः सङ्ख्या विधीयते, गवादीनि प्रधानतः । कथम् । नैवमभिसम्बन्धः क्रियते, द्वादशशतं स्यादिति। कथं तर्हि द्वादशशतं तस्येति। एवं तस्य ग्रहणमर्थवद् भवति। इतरथा तद् अनर्थकं चानुवादो वा स्यात्। एकवचनमपि प्रकृतापेक्षं लक्षणया अनूद्येत। प्रधानसन्निधौ च गुणः शिष्यमाणः प्रतिप्रधानं भिद्येतेति। अस्ति चैतया सङ्ख्यया प्रयोजनम् । गवादीनि द्रव्याणि तत्संख्यानि कर्तव्यानि । तत्र न गम्यते विशेषः। किमेतत्सङ्ख्यं कर्त्तव्यं, किं न ? इति । यदेव द्रव्यं नैतत्सङ्ख्यं स्यात्, तत् प्रतिश्रुति बाधेत । तस्मादेकैकमेतया सम्बद्धव्यमिति ॥ ३९ ॥

समत्वात्तु गुणानामेकस्य श्रुतिसंयोगात् ॥ ४० ॥

तुशब्दः पक्षं व्यावर्त्तयति। तस्य तस्य द्वादशतमिति, नैतदेवमेकस्य कस्यचिद् द्वादशशतं स्यात्। कुतः । समत्वाद् गुणानाम्। गवादयोऽपि हि दक्षिणासम्बद्धाः, सङ्ख्यापि। न गवादीनां सङ्ख्या विधीयते । दक्षिणा तु सङ्ख्याविशिष्टा चोद्यते, न गवादयः॥ कुतः । सङ्ख्याया दाक्षिण्येन अनभिसम्बन्धे सति अनियतसङ्ख्यानां गवादीनां दक्षिणासम्बन्धेनानर्थक्यमेव सङ्ख्यायाः स्यात्। सङ्ख्येयसामानाधिकरण्याच्च तच्छब्दस्य बहुवचनं प्रसज्ज्येत । गवादिषु तस्य द्वादशशतमिति चैकवचनं न स्यात् । तस्माद् यस्य कस्यचित् परिक्रयसाधनस्य द्रव्यस्यैतस्यां सङ्ख्यायां कृतायामेतत्सङ्ख्यः परिक्रयः कृतो भवति । तस्मादेकस्य सङ्ख्या, नैकैकस्य । एवमेकवचनश्रवणं युक्तरूपं भविष्यति ॥ ननु लक्षणत्वात् तस्य शब्दस्याविवक्षितं वचनम् । उच्यते । अविवक्षितेऽपि वचने या

सङ्ख्यानूद्यते, तेन वचनेन भवितव्यम्। यथा लक्षणत्वेनाप्युच्यमाने ब्राह्मणजातीयो न हन्तव्य इति न द्विवचनान्तेन निर्देशो भवति– ब्राह्मणौ न हन्तव्यौ इति। आह। जात्याख्यायामेकस्मिन् बहुवचनं भवति। बहुषु वा एकवचनं भवति, न त्वेकस्मिन् बहुषु च द्विवचनं भवति। तेनात्र बहुवचनान्तेन निर्देशः, एकवचनान्तेन वा बहुषु निर्देशो भवति। अत्रोच्यते। जात्याख्यायामेतदेवं भवति। न च तच्छब्देन जातिरभिधीयते। सन्निहितव्यक्तिवचन एष भवति। तस्मादेकस्य कस्यचित्सङ्ख्या इति ॥ ४० ॥

यस्य वा सन्निधाने स्याद्वाक्यतो ह्यभिसम्बन्धः ॥ ४१ ॥

इदं पदोत्तरं सूत्रम्। यदा एकस्य सङ्ख्यासम्बन्धः, तदा अनियमः। यः कश्चिद्, विशेषाश्रवणादिति ॥ एवं प्राप्ते ब्रूमः। यस्य वा सन्निधाने स्यात्। यस्य शब्दस्य सन्निधाने सङ्ख्याशब्द उच्चरितः, सोऽर्थः सङ्ख्याविशिष्टः प्रतीयेत। अनन्तरमुच्चरितेन हि सहैकवाक्यता भवति। कुतः। अनन्तरसम्बद्धं हि विशेषणं विज्ञानं विशेष्टुं शक्नोति, न हि व्यवहितम्। व्यवहिताश्च गवादयो माषैः। वाक्यञ्च प्रकरणाद् बलीयः। तस्मान्माषाः सङ्ख्यया सम्बध्येरन्निति ॥४१॥

असंयुक्ता तु तुल्यवदितराभिर्विधीयन्ते तस्मात् सर्वाधिकारः स्यात् ॥ ४२ ॥

तुशब्दः पक्षं व्यावर्त्तयति। माषाः सङ्ख्यायुक्ता इति। नैतदेवम्। सर्वव्यापिनी सङ्ख्या स्यात्। सर्वैर्गवादिभिः सम्पाद्येत। असंयुक्ता केवलैर्माषैः सङ्ख्या। तुल्यवदितराभिर्द्रव्यश्रुतिभिर्माषाः श्रूयन्ते। कथम्। तिलाश्च माषाश्चेति च-शब्देन तिलैः सहिता माषा इति गम्यते। गवादिभिः सहितानां सङ्ख्यासम्बन्धः। च-शब्दश्रुतिरर्थान्तरसम्बन्धमेषामाह। च-शब्दश्रवणस्यैतत्सामर्थ्यम्। यस्माच्च-शब्दः पर उच्चार्यते। तस्यार्थान्तरसम्बन्धं श्रुत्यैवाह, न वाक्येन। यदि हि वाक्येन स्यात्, पुरस्तादप्युच्चार्यमाण एतमर्थं कुर्य्यात्। सङ्ख्या तु वाक्येन सम्बद्ध्यते। यदि च पूर्वं न चार्थोऽवकल्पेत, च-शब्दश्रवणमनर्थकं स्यात्। न हि असावुत्तरकाले सम्बद्ध्यते, सङ्ख्यासम्बन्धे अभिनिर्वृत्ते। तस्य द्वादशशतं चेति अन्य एवावगम्येत।

द्वादशशतमन्यच्च किञ्चिदिति । न च तदन्यत् किञ्चिदुच्चार्य्यते । तस्मात् पूर्वं च-योगः, पश्चात् सङ्ख्यासम्बन्धः । समर्थतराणि समानविभक्तीनि, दुर्बलो विविभक्तिः ॥

अपि च समानविभक्तीनि समर्थतराणि । तेषां हि आशुतरा आवृत्तिः । विलम्बिता विविभक्तीनाम् । स्वार्थे समानविभक्तीनि समर्थतराणि प्रथमान्तानि भवन्ति । परपदार्थे षष्ठ्यन्तो विशिनष्टि । तस्मात् समुच्चितानि वा इतरेतरयुक्तानि वा सङ्ख्येयानि सङ्ख्यया सम्बद्ध्यन्ते । समाहारो वैषां सङ्ख्यया युक्तः । तस्मात् सर्वैः संख्या सम्पादयितव्या । किमेवं भविष्यति । सङ्ख्यासम्बन्धे न कश्चिद्वर्ज्जितो भविष्यति । विनिगमनायां हेत्वभावे यमेव सङ्ख्यासम्बन्धो वर्जयेत्, तत्रैव प्रत्ययो बाध्येत । तस्माद्गवादिराशिः सङ्ख्ययैतया सम्बद्ध्येतेति ॥ ४२ ॥

असंयोगाद्विधिश्रुतावेकजाताधिकारः स्याच्छ्रुत्याकोपात् क्रतोः ॥ ४३ ॥

नैतदस्ति, सर्वसम्पादनीया सङ्ख्या इति । असंयोगाद्विधिश्रुतौ सर्वसम्पादने सम्बन्धो नास्ति । न श्रूयते, गवादिराशेः सङ्ख्या भवतीति । न गवादिराशिः शब्देन निर्द्दिश्यते, यः सर्वनाम्ना प्रतिनिर्द्दिश्येत । गवादयस्तु शब्देनोक्ताः । तेन ते सर्वनाम्ना प्रतिनिर्देशमर्हन्ति, न चात्र गवादीनां प्राधान्यमित्युक्तम् । दाक्षिण्येन हि सङ्ख्या सम्बध्यत इति संख्याविशेषणं सर्वनामशब्दः सङ्ख्यां विशेष्टुमुपादीयते । तत्रैकवचनं विवक्षितमेव । तत्रैषां नानाजातीयानां निर्द्दिष्टानामन्यतमदेकं प्रतिनिर्देशेन सङ्ख्याविशेषणमुपादीयते । तस्मान्नानाजातीयानां निर्द्दिष्टानामेकं स्यात् । स एकजातीय एव भवति । तस्माद्, एकजाताऽधिकारः इति सूत्रितम् । किमेवं भविष्यति । एवमेकश्रुतिर्न कोपिता भविष्यति । इतरथा वाक्येन द्रव्यस्य भवन्ती प्रवृत्तिविशेषमकुर्वती नाप्रवृत्तिविशेषकरा प्रकरणवशेन क्रतोः कल्पिता भविष्यति । तस्य क्रतोर्द्वादशशतं दक्षिणा इति । तस्माद् एकजातीयस्य द्वादशशतं दक्षिणा इति ॥४३॥ सि० ॥

शब्दार्थश्चापि लोकवत् ॥ ४४ ॥

अपि च लोकवदेतद् द्रष्टव्यम् । लोके हि निर्विशेषिते सङ्ख्या-

शब्दे उच्चरिते, एकजातीये प्रत्ययो भवति। कुतः ?। अन्यथा व्यवहारानुपपत्तेः। असति एकस्मिन् जातिविशेषे, सर्वत्रान्यैः सह परार्द्धसङ्ख्या निविष्टा । परार्द्धस्य चावान्तरसङ्ख्याभिः संव्यवहारः क्रियते । येषामेकेन केनचित् सम्बन्धस्तेषां तमेकं सम्बन्धिनमपेक्ष्य सङ्ख्या निविशते। स तत्रैकः सम्बन्धी वक्तव्यः। प्रकृतो वा ग्रहीतव्यः। अर्थाद्वा य आपद्येत, स उपादेयः। इह च प्रकृता नानाजातीयाः। तेषामन्यतमः सङ्ख्यया सम्बद्धः स्यादिति। यथा, शतमाभ्यां दीयतामिति एकजातीयानां शतं, न भिन्नजातीयानाम्। यथा द्रव्यं गुणः कर्मावयव इत्येवमादीनाम् ॥ ४४ ॥ युक्तिः ॥ ज्योतिष्टोमे गवामेव द्वादशशतस्य दक्षिणात्वाधिकरणम् ॥ ११ ॥

सा पशूनामुत्पत्तितो विभागात् ॥ ४५ ॥

एकजातीयस्य सङ्ख्येत्येतत्समधिगतम् । सा पशूनाम् ? उत माषाणामिति अनियमे प्राप्ते उच्यते। पशूनामिति। कुतः। उत्पत्तितो विभागात्। औत्पत्तिकेन विभागेन पशवः संव्यवहारेषु सङ्ख्यायन्ते। पञ्चभिरश्वैः क्रीतः, पञ्चभिर्गोभिः क्रीत इति। न व्रीह्यादीनामौत्पत्तिकेन विभागेन संव्यवहारेषु संख्या सङ्कीर्त्यते। निगदाऽभिप्राया मानाभिप्राया वा भवति । न हि भवति, पञ्चभिर्माषैः क्रीत इति। पञ्चभिर्माषाणामाढकैर्द्रोणैर्वा कुडवैर्वा खारीभिर्वेति भवति। तत्र आढकादिभिरनुच्चार्यमाणैः साकाङ्क्षमेव वाक्यमपरिपूर्णमप्रमाणमर्थस्य कस्य चित् ॥ अथ माषाणामपि औत्पत्तिकेन विभागेन कस्मादिह परिक्रयो न क्रियते ? इति। अत्रोच्यते। मूलस्य सतः परिक्रये विशेष उच्यते, द्वादशशतं दक्षिणा इति । न च द्वादशशतं व्रीह्यादिबीजानां, भृतित्वेन ऋत्विजामवकल्पते। त्रिभिः प्रकारैर्भृतिर्भवति–व्यापारतः, फलतो, वचनत इति। व्यापारस्तावन्न माषबीजानां द्वादशशतं भृतिः । कर्म कुर्वाणा हि कर्मकराः पादिकमप्यहर्लभन्ते। फलानुरूप्यं नैव ज्ञायते। वचनं तु भृतौ सत्यां परिमाणविशेषपरं भवति। यत्र हि पादिकमप्यहर्न लभ्यते, न सा दक्षिणा भवति। न हि सा तस्मिन् कर्मणि दक्षं करोति। स्नेहाद्वा अन्येन वा प्रकारेण कृत्स्नमहः कर्म कुर्य्याद्, न व्रीहीणां द्वादशशतेन प्रोत्साहितः ॥ आह। यः कश्चित् कस्याश्चिदवस्थायां व्रीहीणां द्वादशशतेन प्रोत्साह्यते, तस्य किं सा दक्षिणा भवेत् ?। नेति ब्रूमः । दक्षकरणी

हि दक्षिणा । दक्षश्च बलम् । या न आशितम्भवं करोति, नासौ बलकरणी । तस्माद् या न आशितम्भवा, नासौ दक्षिणा । आशितम्भवाया आधिक्यं वचनस्य विषयः ॥ आह । व्रीहिबीजानामपि द्वादशशतं याश्च यावतीं बलमात्रां करोति । अत्रोच्यते । आपेक्षिकमिदं बलं नाम । स एव हि पुरुषः कञ्चित् प्रति बलीयान्, कञ्चित् प्रति अबलः । तत्र यावदाशितम्भवं नास्ति, तावद् अबलता । बलवत्तरो हि आशितेन भवतीति आशितम्भवादूर्ध्वं बलकरणम् । तस्मादाशितम्भवं यद् द्रव्यं, सा भृतिः, सा दक्षिणा । ततोऽधिकं दक्षिणात्वे सिद्धे वचनप्रामाण्याद् भवति । विकृतौ ऋतपेये वचनप्रामाण्यादल्पबलकरणमपि दक्षिणायाः स्थाने विधीयते सोमचमसः । स आश्रयात् सिद्ध्यति । पशवस्तु सर्वे मुख्यबलकरणे समर्थाः । तेषु सत्सु न व्रीह्यादिबीजानि सङ्ख्यया सम्भन्त्स्यन्ते इति ॥ ४५ ॥ सि० ॥

अनियमोऽविशेषात् ॥ ४६ ॥

यदा पशूनां द्वादशशतं, तदा अनियमो गवादीनां, अन्यतमस्य कस्यचिद् द्वादशशतम् । एवमनियमे लाघवं भविष्यति । प्रयोगप्राशुभावश्च । तत्राधिकारशास्त्रं महाविषयं भविष्यतीति ॥४६॥ पूर्व०

भागित्वाद्वा गवां स्यात् ॥ ४७ ॥

वाशब्दोऽनियमं व्यावर्त्तयति । गवां द्वादशशतं स्यात् । कुतः ? । भागित्वात् । भागवत्यो हि गावो महाभागाः । महति उपकारे वर्त्तन्ते इत्यर्थः । एवमृत्विजामुपकारभूयस्त्वं भविष्यति । ऋत्विजाश्च उपकारः कर्त्तव्यः । महत्तमे हि ते उपकारे वर्त्तन्ते, उपकुर्वतां चोपकर्त्तव्यमिति सदाचारः । एवं सदाचारोऽनुगृहीतो भविष्यति । यदि महाभागानां भूयसी सङ्ख्या दीयते । गावश्च महाभागाः । तस्मात् तासां द्वादशशतम् । अश्वा उपकारकतरा भवेयुः । यद्येषां दानप्रतिग्रहविक्रया न प्रतिषिद्ध्येरन् । न केसरिणो ददाति, नोभयतोदतः प्रतिगृह्णातीति श्रुतिः । स्मर्यते च, नाश्वं विक्रीणीते इति । तस्माद् द्वादशशतं गवां स्यात् ॥ ४७ ॥ सि० ॥

प्रत्ययात् ॥ ४८ ॥

अतश्च गवां सङ्ख्या । कुतः ? । प्रत्ययात् । सङ्ख्यासम्पादनार्थमुपादीयमानेषु प्रकृतेषु अन्येन उपायेन स्मर्य्यमाणेषु पूर्वं गावः

प्रतीयन्ते । अतस्ताः सङ्ख्यया सम्बद्ध्यन्ते । न च तत्र विरोधः कश्चिदस्ति । गोषु सम्बद्धासु न पुनरश्वादयः सम्बद्ध्यन्ते । एकजातीयो हि सम्बद्धव्यः । स च सम्बद्ध इति । तस्माद् गवां सङ्ख्या ॥ ४८ ॥

लिङ्गदर्शनाच्च ॥ ४९ ॥

लिङ्गं खलु एतमर्थं दर्शयति । किं लिङ्गं भवति । एवमाह, सहस्रं दक्षिणा । सहस्रं स्तोत्रीया यावदस्य साहस्रस्य उत्तराधरा गौर्गवि प्रतिष्ठिता तावदस्माल्लोकादसौ लोक इति गाः प्राप्ता दर्शयति । तथा तां वा एतां शवलीं समामनन्ति । इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतिरदिति सरस्वति महि विश्रुति, एता ते अघ्न्ये नामानि देवेभ्यो मा सुकृतं कृतादिति गवामेतानि नामानि । सहस्रतमीश्च दक्षिणामेवमाह । एतानि ते नामानि इति । यदि सा गौः, एवमेतदवकल्पते । तस्मादपि गवां सङ्ख्या इति ॥४९॥ युक्तिः ॥ तस्य द्वादशशतं दक्षिणा इत्यनेन पशुगवसंख्याभिधानाधिकरणम् ॥ १२ ॥

तत्र दानं विभागेन प्रदानानां पृथक्त्वात् ॥ ५० ॥

ज्योतिष्टोमे गवादयो दक्षिणा । तत्रैषोऽर्थः समधिगतः । गवां सङ्ख्या इति । अथेदानीमिदं सन्दिह्यते । किं यस्य यावान् भाग आभजति, स्वयमेव यजमानेन विभज्य तस्य तावान् कल्पयितव्यः, उत परिषदेव विभज्यत इति । किं प्राप्तम् । अनियमो विभज्याविभज्य वा दातव्यम् । एतावद्धि श्रूयते, दातव्यमिति । न, विभज्याविभज्य वेति । तस्मादनियम इति ॥ एवं प्राप्ते ब्रूमः । विभज्य दातव्यमिति । दातव्यस्यैव तद्रूपं, यत् स्वत्वपरित्यागेन परस्वत्वापादनम् । तच्च यजमानेन स्वयं कर्त्तव्यम् । तस्मात् स्वयं प्रयोगे स्यादिति । यो यस्यांश आभजति, स तस्मै अनिर्दिष्टो न शक्यते तेन सम्बन्धयितुम् । तेन यस्तं निर्दिशति स दानमभिनिर्वर्त्तयति । यजमानेन च दानं निर्वर्त्तयितव्यम् । तस्माद् यजमानो विभज्य निर्दिशेत्, प्रदानानां पृथक्त्वात् । असति विभागे न शक्यः स्वेन भागेन सम्बन्धः कर्त्तुम् । तस्माद्विभज्य दक्षिणा दातव्येति ॥ ५० ॥ सि० ॥

परिक्रयाच्च लोकवत् ॥ ५१ ॥

अस्ति च परिक्रयार्थं दानं, न धर्ममात्रम् । परिक्रयार्थश्च भर्त्रा भृत्येन सह पणितव्यम् । यदि च परिषदं प्रत्युच्येत, परिषच्च वि-

भजेत, न स्वामिना सह अपणिष्यत। तत्र परिक्रय एव नाभविष्यत्। यथा लोके काष्ठवाहप्रभृतिभ्यो यद्दीयते, तत्र काष्ठवाहाः स्वामिना सह पणन्ते। तेभ्यः स्वामी विभज्य निर्दिशति, इदं तुभ्यमिदं तुभ्यमिति। तद्वदिहापि द्रष्टव्यम्। तस्माद्विभज्य दक्षिणा दातव्येति॥५१

विभागञ्चापि दर्शयति ॥ ५२ ॥

अपि च दर्शयति विभागं, यद् विभागाभिधायिनं मन्त्रमामनन्ति। तुथो वो विश्ववेदा विभजतु इति। कृष्णाजिनेन विन्नास्य दक्षिणां ददातीति। तथा अग्नीधेऽग्रे ददाति, अग्निमुखानेव पितॄन् प्रीणाति। ब्रह्मणे ददाति प्रस्तृतेभ्यो ददाति प्रसृत्यै। होत्रे ददाति। नेष्ट्रे ददाति। हविर्द्धाने आसीनेभ्य अध्वर्युभ्यो ददाति। उद्गातृभ्यो ददाति। अन्तःसदसि आसीनेभ्यो यथाश्रद्धं प्रासर्पकेभ्यो ददातीति। एवं विभागदर्शनमुपपद्यते। तस्माद्विभज्य दातव्यमिति ॥ ५२॥ युक्तिः॥ विभज्य गोदक्षिणाया दानाधिकरणम् ॥ १३ ॥

समं स्यादश्रुतित्वात् ॥ ५३ ॥

ज्योतिष्टोमे समाम्नायते, गौश्चाश्वश्च अश्वतरश्चेति। तत्रायमर्थः समधिगतः। विभज्य दातव्यमिति। इदमिदानीं सांशयिकम्। किं समो विभागः, उत कर्मकृतं वैषम्यम्। उत शब्दकृतम् ? इति। किं प्राप्तम्। समो भागः स्याद् अश्रुतित्वाद् विशेषस्य। यत्र विशेषो न श्रूयते, तत्र समो विभागो भवितुमर्हति। कथमिव ! एकस्मै सर्वं दातव्यं प्राप्नोति। यद्यपरस्मै दातव्यं न भवति। तत्र यावति एकस्मै दीयमाने नान्यः संविभज्यते, तावत् तस्मै एकस्मै न दातव्यम्। अविशिष्टं दातव्यम्। एवमेकैकस्मै। तस्माद्विशेषाश्रवणात् समं देयमिति ॥ ५३ ॥

अपि वा कर्मवैषम्यात् ॥ ५४ ॥

अपि वेति पक्षव्यावृत्तिः। न समं स्यात्। कर्मकृतं वैषम्यं भवेत्। यो बहु कर्म करोति, तस्मै बह्वी भृतिर्दीयते। तस्मात् कर्मानुरूप्येण वैषम्यमिति ॥ ५४ ॥ पूर्व० ॥

अतुल्याः स्युः परिक्रये विषमाख्या विधिश्रुतौ परिक्रयान्न कर्मण्युपपद्यते दर्शनाद्विशेषस्य तथाभ्युदये ॥ ५५ ॥

न चैतदस्ति, कर्मकृतं वैषम्यमिति । किं तर्हि । उपकारकृतम् । स उपकारः श्रुत्या विज्ञायते । तस्माच्छ्रुतिकृतं वैषम्यम् । तेन अतुल्याः परिक्रये भवेयुः । विषमा हि एषामाख्या । केचिदर्द्धिनः, केचित् तृतीयिनः, केचित् पादिनः । येषामर्द्धं ते अर्द्धिनः । कथं च तेषामर्द्धं भवति ? । यदि तेभ्यः अर्द्धं दीयते । एवं तृतीयिनः, पादिन इति च दीक्षा विधिश्रुतौ समाख्यायन्ते । सा परिक्रयात् कर्मकृते वैषम्ये नोपपद्यते । क पुनरयं विशेषो दृश्यते । अभ्युदये । अभ्युदय इति अभ्युदयफलम् । ऋद्धिफलं द्वादशाहं ब्रूमः । अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं, ततो होतारम् । ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्द्धिनो दीक्षयति । ब्रह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः । ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति । अग्नीधं ब्रह्मणः, प्रतिहर्त्तारमुद्गातुः, अच्छावाकं होतुः । ततस्तम् उन्नेता दीक्षयित्वा पादिनो दीक्षयति । पोतारं ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः । ततस्तमन्यो दीक्षयति ब्रह्मचारी वा आचार्यप्रेषित इति । अर्द्धिनस्तृतीयिनः, पादिन इति द्वादशाहे अनुवादः । यदि प्रकृतौ यथासमाख्यममीषामिमे भागास्ततो द्वादशाहे दर्शनमुपपद्यते । तस्मादर्द्धादिभिः समाख्यानात् समाख्याश्रुतिकृतं वैषम्यं भवितुमर्हतीति ॥५५॥ सिद्धान्तः ॥ ज्योतिष्टोमे समाख्याऽनुसारेण दक्षिणाविभागाधिकरणम् ॥ १४ ॥

तस्य धेनुरिति गवास्प्रकृतौ विभक्तचोदितत्वात् सामान्यात्तद्विकारः स्याद्यथेष्टिर्गुणशब्देन ॥ ५६ ॥

इदमामनन्ति, अथैष भूर्वैश्वदेवास्त्रिवृदेव सर्वस्तस्य विश्ववत्यस्तोत्रीया धेनुर्दक्षिणा इति । अत्र सन्देहः । किं धेनुर्गवां निवर्त्तिका, उत कृत्स्नाया दक्षिणाया इति । तत्रेदं तावत् परीक्ष्यम् । किं प्रकृतौ विभक्तं दाक्षिण्यम्, उत समस्तमिति । तत इदं तच्च संहत्याधिकरणं क्रियते । किं प्रकृतौ विभक्तं दाक्षिण्यं, धेनुर्गवां निवर्त्तिका ? उत अविभक्तं, कृत्स्नाया दक्षिणाया निवर्त्तिका ? इति किं प्राप्तम् । तस्य धेनुरिति श्रूयमाणे ब्रूमः । धेनुर्गवां निवर्त्तिका इति ॥

तत एतत्तावद् विचार्यते । प्रकृतौ विभक्तं दाक्षिण्यमिति । किमिदं विभक्तमिति । गवादीनामेकैकं द्रव्यं दक्षिणा इति । कथम् ।

गौश्च अश्वश्च अश्वतरश्च दक्षिणा इति प्रकृतौ गवादिभिर्दक्षिणाशब्दः प्रत्येकं परिसमाप्यते। निर्दिष्टा हि गवादयो, न तेषां समुदायः। चशब्दः समुच्चयार्थो भवति, न तु समुच्चयस्य निर्देशकः। परपदविशेषणार्थं तु समुच्चयमुपादत्ते। यदि हि निर्दिशत्, क्रियागुणैः समुच्चयः सम्बद्ध्येत। समुच्चयः शोभनः, समुच्चयो द्रष्टव्य इति यथा भवति; एवं, च शोभनः, च द्रष्टव्य इति वा भविष्यति। तथा यथेह समुच्चेययोः षष्ठी भवति, धवखदिरयोः समुच्चय इति। एवं धवः खदिरश्चेत्यत्रापि अभविष्यत्। न तु भवति। तस्मान्न चशब्दः समुच्चयं निर्दिशति। श्रुत्या निर्दिष्टेन च एकवाक्यता न्याय्या, न गवादिलक्षितेन समुदायेन। तस्माद् गौर्दक्षिणा, अश्वो दक्षिणेत्येवं सम्बन्धः। लक्षयित्वा हि गवादींस्तेषां दक्षिणात्वं विधीयते। तच्च गुणभूतं प्रतिप्रधानं भिद्येत। चशब्दश्चैवं समर्थितो, भविष्यति गौर्दक्षिणा अश्वश्च दक्षिणा इति। न गौरश्वादिसहितो गवादीनां वा समाहार इति॥ यदि विभक्तं दाक्षिण्यं, तदा प्राप्ता गौर्दाक्षिण्ये। पुनर्विशेषाऽर्थमुच्चार्यते, धेनुर्दक्षिणा इति। याऽसौ गौर्दक्षिणा सा धेनुरिति अन्यासां दक्षिणानामविकारेण, यथाप्रकृतिभावेन चोदकानुग्रहो भविष्यति। शब्देनैव गवि एष गुण उच्यते धेनुत्वं नाम। गौरेव हि धेनुर्नान्या। यथेष्टिर्गुणशब्देन, सौर्यं निर्वपेदिति सूर्यसम्बन्धं कुर्यात्। द्रव्यस्येति विवक्षिते निर्वपणाश्रय एव प्रयोगः शब्देन निर्दिश्यते इति। सनिर्वपणकात् प्रयोगादनेन निर्वपणशब्देन ऐष्टिको विध्यन्तो नियम्यते। एवमिहापि गोर्गुणवचनेन धेनुशब्देन गोदक्षिणाविकारः क्रियते, नान्या दक्षिणा विक्रियते इति॥ ५६॥ पूर्व०॥

सर्वस्य वा क्रतुसंयोगादेकत्वं दक्षिणार्थस्य गुणानां कार्यैकत्वादर्थे विकृतौ श्रुतिभूतं स्यात् तस्मात् समवायाद्धि कर्मभिः॥ ५७॥

वाशब्दः पक्षं व्यावर्त्तयति। सर्वस्य क्रतुदाक्षिण्यस्य निवर्त्तिका धेनुरिति प्रतिज्ञायते। तत्रैतद्वर्ण्यते समस्तं दाक्षिण्यमिति। किमिदं समस्तं दाक्षिण्यम्? इति। न प्रतिद्रव्यं दक्षिणाशब्दः सम्बद्ध्यते, गौर्दक्षिणा, अश्वो दक्षिणा, अश्वतरो दक्षिणा इति। कथं तर्हि गवादयो दक्षिणेति। न हि गवादीनुद्दिश्य, दक्षिणासम्बन्धो वि-

धीयते । ये गवादयस्ते दक्षिणा इति । तथा हि दक्षिणाशब्दो गवादीन् दक्षिणासम्बन्धविधानार्थं यौगपद्येन अन्तर्गतसम्बन्धमभिवदन् बहुवचनान्तः स्यात् । गवादयो दक्षिणा इति । यथा अग्नीषोमौ देवते प्राणापानौ अभिसमभवतामिति । गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति । कथं तर्हि, दक्षिणामुद्दिश्य गवादयो विधीयन्ते । का दक्षिणा । गवादय इति । दक्षिणा नाम दक्षतेरुत्साहकर्मणः । दक्षिणा उत्साहिका इति । एकः स गुणः । स च प्राधान्येन विवक्षितः । तद्विशेषणत्वेन गवादयः । गुणवचनानाञ्च शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति, न द्रव्यवचनानामाश्रितगुणवशेन । यथा विश्वे देवा देवता इति । का पुनर्दक्षिणा । गौश्च अश्वश्च अश्वतरश्चेति दक्षिणाशब्दो दाने सम्बद्ध्यते । ऋत्विग्भ्यो ददातीति, न गवादयः । एको हि दक्षिणानामर्थः । ऋत्विजामानमनम् । सकृच्च आनतास्ते भवन्ति, भूय आनमनेन अर्थो नास्ति, गवादीनामपि गुणानामेकं कार्यं दक्षिणात्वम्॥यदा समस्तं दाक्षिण्यं, तदा विकृतौ भुवि तस्मिन् प्राकृते अर्थे धेनुः श्रुतिभूता । सा च प्राकृतं कार्यमभिनिर्वर्त्तयति । क्रतुसंयोगेन हि श्रूयते तस्य क्रतोर्धेनुर्दक्षिणा इति । तस्मिन्निर्वृत्ते सर्वं चोदकप्राप्तमानुमानिकं निवर्त्तते । तया समवायाद्धि कर्मभिर्ऋत्विजः सम्बद्ध्यन्ते श्रुतिभूतया ॥अपि च चशब्दश्रुत्या ससहायं गोद्रव्यमिति प्रतीयते । दक्षिणासम्बन्धोऽस्य वाक्येन । श्रुतिश्च वाक्याद् बलीयसी । तस्मात् पूर्वं चयोगः, पश्चात् दक्षिणासम्बन्धःइतरेतरयुक्ता दक्षिणात्वेन सम्बद्ध्यन्ते गवादयोऽर्थाः। तस्मात् कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तिका धेनुरिति ॥५७॥ सि० ॥

चोदनानामनाश्रयाल्लिङ्गेन नियमः स्यात् ॥ ५८ ॥

यदुक्तं, यथेष्टिर्गुणशब्देनेति । अत्रोच्यते, आग्नेयोपांशुयाजाग्नीषोमीयानां प्राकृतानां सौर्य्यार्यमणप्राजापत्यनैर्ऋतीनां चोदनानां न किञ्चिद् एकं कार्य्यं, यद्वैकृती चोदना आश्रयेत् । तत्र वक्ष्यते,एकस्य कर्मणो वैकृतं कर्म विध्यन्तं गृह्णातीति । तत्र कस्य ग्रहीष्यति ? इति सन्देहे युक्तो लिङ्गेन नियमः । इह तु अदिष्टो हेतुः । गवादीनामेकं कार्य्यं दक्षिणात्वम्, । तस्मिंश्च धेनुः श्रुतिभूता चोदकप्राप्तान् निवर्त्तयितुमर्हतीति ॥ ५८ ॥ आ० नि० ॥ भूनामैकाहे, तस्य धेनुरित्यनेन कृत्स्नक्रतुदक्षिणाबाधाधिकरणम् ॥ १५ ॥

एका पञ्चेति धेनुवत् ॥ ५९ ॥

यस्य सोममपहरेयुरेकां गां दक्षिणां दद्यादभिदग्धे पञ्च गा इति। अत्र सन्देहः । एका पञ्च च गावः श्रूयमाणाः किं कृत्स्नस्य क्रतु-दाक्षिण्यस्य निवार्त्तिकाः ? उत गवामिति । किं प्राप्तम् । एका पञ्चेति धेनुवत् । यथा धेनुः कृत्स्नस्य निवर्त्तिका, एवमेका पञ्च च भवेयुः । दक्षिणासम्बन्धो हि तासां प्रत्यक्षः श्रूयते । तेन ताः प्राकृतीनां कार्यमभिनिर्वर्त्तयन्ति, प्राकृत्यश्च आनुमानिक्यो निवर्त्तन्त इति ॥ ५९ ॥ पूर्व० ॥

इदं तावदपर्य्यवसितं तिष्ठतु । अथाधिकरणान्तरं प्रस्तूयते—

त्रिवत्सश्च ॥ ६० ॥

अस्ति साद्यस्के साण्डस्त्रिवत्सः सोमक्रयणः स्पर्द्धमानानामिति । सन्ति क्रयार्थानि द्रव्याणि चोदकप्राप्तानि । अजया क्रीणाति, हिरण्येन क्रीणाति, ऋषभेण क्रीणाति, अश्वशफेन क्रीणाति, वाससा क्रीणाति इत्येवमादीनि । तत्र संशयः । किं त्रिवत्स ऋषभस्य निवर्त्तकः ? अथ वा सर्वेषां क्रयार्थानां द्रव्याणामिति । किं प्राप्तम् । ऋषभस्य निवर्त्तक इति । कुतः । पुङ्गवत्वात् । पुङ्गवत्वेन सामान्येन, पुङ्गवोऽसौ विधीयते । कुतः पुङ्गवत्वम् ? । साण्डश्रवणात् । तस्माद् ऋषभस्य निवर्त्तक इति ॥ एवं प्राप्ते ब्रूमः ॥ त्रिवत्सश्च ॥ किम् ? । कृत्स्नस्य क्रयार्थस्य निवर्त्तक इति । प्रत्यक्षः स क्रीणातिना सम्बद्ध्यते, तेन चोदकप्राप्तं निवर्त्तयति । तस्मात् कृत्स्नस्य क्रयार्थस्य निवर्त्तक इति ॥ ६० ॥

तथा च लिङ्गदर्शनम् ॥ ६१ ॥

एवञ्च कृत्वा लिङ्गं दर्शयति । किं लिङ्गं भवति ? । एवमाह । अपरस्मिन् साद्यस्के स्त्री गौः सोमक्रयणी व्यावृत्ता ह्येषां स्पर्द्धा इति । यदि सर्वस्य क्रयार्थस्य निवर्त्तिका स्त्री गौः, ततः सैव एकाकिनी केन सह स्पर्द्धिष्यते ? इति । इतरथा सर्वस्यानिवर्त्तिकायां सङ्घस्य स्पर्द्धा भवेत् । तत्रास्यां वर्त्तमानायां स्पर्द्धायां व्यावृत्ता ह्येषां स्पर्द्धा इति नोपपद्यते । तस्मात् सर्वस्य निवार्त्तिकेति । त्रिवत्सोऽपि तत्समानश्रुतिः । सोऽपि च सर्वस्य निवर्त्तक इति ॥

एवं वा, यदि त्रिवत्सः सर्वेषां निवर्त्तकस्तदा तमपबाधमाना

साद्यस्क्रान्तरे स्त्रीगवी श्रूयमाणा केवला स्यात्। तत्र व्यावृत्ता ह्येषां स्पर्द्धा इति दर्शनमुपपद्यते। इतरथा हि केवलस्य ऋषभस्यापबाधितारं त्रिवत्सं निवर्त्तयन्ती सङ्घमध्यपतिता स्पर्द्धेताऽपि। तत्र व्यावृत्ता ह्येषां स्पर्द्धा इति वचनं नावकल्पते। अतः कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तकस्त्रिवत्स इति ॥ ६१ ॥ युक्तिः ॥ साद्यस्के त्रिवत्सेन सर्वेषां क्रयार्थानां बाधाधिकरणम् ॥ १६ ॥

तत्र एवमन्तरागर्भिणीन्यायो भवतीति अन्यथा सूत्रं वर्ण्यते। इतश्च एका पञ्च च कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तिका त्रिवत्सश्च। तथा च लिङ्गदर्शनम्। एवमेतत्समानश्रुतिस्त्रिवत्सोऽपि सर्वस्य निवर्त्तकः प्राप्नोति। तदैतद्दर्शनमुपपत्स्यते।व्यावृत्ता ह्येषां स्पर्द्धा इति॥

एके तु श्रुतिभूतत्वात् सङ्ख्यया गवां लिङ्गविशेषेण ॥ ६२ ॥

स्थितादुत्तरम्। यदुक्तम्, एका पञ्च च कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तिकेति। एतन्न। एके तु अर्था निवर्त्तन्ते, एके गावो निवर्त्तन्ते, अश्वादयो न निवर्त्तन्ते। एका देया पञ्च देया इति य एष नियमः, स गोविषयः। कुतः। गोविशिष्टया सङ्ख्यया सम्बन्धात्। यदेतद् एकां ददाति पञ्च ददातीति। नैवमभिसम्बन्धः क्रियते। एकां दक्षिणां ददातीति। कथं तर्हि एकां गामिति। गोसङ्ख्यासम्बन्धो हि मुख्यत्वाद् बलीयान्॥

अपिच गोशब्देन सह संख्यायाः प्रत्यक्षः सम्बन्धः। गोशब्दव्यवधानात् परोक्षो दक्षिणाशब्देन। गोशब्दश्चैवं मुख्यार्थो भवति। इतरथा लक्षणा स्यात्। एकां गामश्वादि चेति। तेन गवां लिङ्गविशेषेण सङ्ख्या गोषु निविशते। एवञ्च सर्वेषामनिवृत्तावश्वादीनां यथा प्रकृतिभावे चोदकानुग्रहो भविष्यति। तस्मादेका पञ्च च गवां निवर्त्तिका इति ॥ ६२ ॥ सिद्धान्तः ॥ यस्य सोममपहरेयुरित्यादौ, एकां गामित्यादिना गोगतसंख्याबाधाधिकरणम् ॥ १७ ॥

प्राकाशौ तथेति चेत् ॥ ६३ ॥

अश्वमेधे श्रूयते, हिरण्मयौ प्राकाशावध्वर्य्यवे ददातीति। तत्रैषोऽर्थः सांशयिकः। किं प्राकाशौ कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तकौ? उताध्वर्युभागस्य निवर्त्तकाविति। कुतः संशयः। इह प्राकाशा-

वित्येष यदि ददातिना सम्बद्ध्यते, ततः कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तकः । अथाध्वर्युणा, तदा अध्वर्युभागस्य । किं प्राप्तम् । कृत्स्नस्येति । तत्र एतद्वर्ण्यते, प्राकाशाविति शब्दो ददातिना सम्बद्ध्यत इति । कुतः । एवं ददातिसम्बन्धविधाने श्रुतिरनुगृहीता । अध्वर्युणा सम्बन्धे वाक्यम् । अपि च प्राकाशाविति द्वितीया कारकविभक्तिः सामर्थ्यादेवाख्यातेन सम्बद्ध्यते, न नाम्ना । तस्माद् ददातिना सम्बन्धः । अध्वर्युसम्बन्धे चाध्वर्युशब्दात् षष्ठी अभविष्यत् । तस्मादपि ददातिना सम्बन्धः । ददातिं लक्षयित्वा प्राकाशौ विधीयेते । तत्र न शक्यो ददातिरध्वर्युणा विशेष्टुम् । वाक्यं हि तदा भिद्येत । अपि च विशेषणे सत्यपि यदि ददातिरविशिष्टः पदान्तरेण सम्बद्ध्यते, अविशिष्ट एव कार्ये प्राप्नोति । प्रयुज्यमानमपि हि विशेषणमशक्तं न विशेष्यं विशिनष्टि । तस्माद् योऽध्वरं युनक्ति, सोऽध्वर्य्युरिहाभिप्रेतः । अतः कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तकौ प्राकाशाविति ॥ ६३॥पूर्व०॥

अपि त्ववयवार्थत्वाद् विभक्तप्रकृतित्वाद्
गुणेदन्ताविकारः स्यात् ॥ ६४ ॥

अपि त्विति पक्षव्यावृत्तिः । दक्षिणावयवकार्यार्थौ प्राकाशौ, न कृत्स्नदक्षिणाकार्यार्थौ । विभक्ता हि तेषां भागा अध्वर्य्वादीनाम् । अयमध्वर्योर्भागः, इमे अन्येषामिति । तस्माद् गुणेदन्ताविकारः स्यात् । किमिदं गुणेदन्ताविकार इति । गुणस्य इदन्ता गुणेदन्ता । इदम्भाव इदन्ता । गुणेदन्ताया विकारो गुणेदन्ताविकारः । अध्वर्योर्भागस्य निवर्त्तकौ प्राकाशौ । कथमिव । एकमिदं हि वाक्यम् । हिरण्मयौ प्राकाशौ इति । नेयं प्रथमा, नापि दक्षिणाशब्देन सम्बन्धो, येन दक्षिणाकार्ये वर्त्तेयाताम् । का तर्ह्येषा । द्वितीया, ददातिनैव सम्बद्ध्यते । तदेकं वाक्यं, हिरण्मयौ प्राकाशावध्वर्यवे ददातीति । अध्वर्युसम्प्रदानकेन ददातिना एतयोः सम्बन्धः । तस्मात्तत्राध्वर्युददातिभागं निवर्त्तयतः । यद्वा सर्वविशेषणविशिष्टो ददातिरपूर्वो विधीयते । दृष्टार्थत्वादध्वर्योरन्यान् आनत्यर्थान् प्रत्याख्यास्यति ॥

अथ यदुक्तं, प्राकाशयोर्ददातिसम्बन्धो विधीयत इति । तथा हि श्रुतिरनुगृहीता भविष्यतीति । नासौ वाक्यानपेक्षिणी श्रुतिः । असति ददातिना आनन्तर्ये नावकल्पते । यदप्युच्यते, कारकविभक्ति-

राख्यातेन सम्बन्धयोग्या इति । योग्यत्वं दर्शनेन बाध्यते । दृश्यते त्वानन्तर्यं प्राकाशयोरध्वर्युशब्देन । यदप्युक्तं, तत्सम्बन्धे षष्ठी अभविष्यदिति । सत्यं प्राप्नोति षष्ठी, न तु तदभावे सम्बन्धो नास्ति अध्वर्य्युणा । गम्यते हि स वाक्येन । आह । चतुर्थीश्रुतिरत्र या, सा वाक्यमपबाधिष्यते इति । न अविधीयमाना बाधितुमुत्सहते । कथं तर्हि अविधित्सिते सम्प्रदाने श्रूयते ? इति । सामर्थ्यप्राप्तस्यानुवादेनेति । तस्माददोषः । उक्तं वा सर्वविशेषणविशिष्टं दानं विधीयत इति । एवमन्येषामनिवृत्तौ यथाप्रकृतिभावे चोदकानुग्रहो भविष्यति । तस्मादध्वर्युभागस्य निवर्त्तकौ प्राकाशाविति ॥ ६४ ॥ सिद्धान्तः॥अश्वमेधे प्राकाशावित्यनेनाध्वर्युभागबाधाधिकरणम्॥१८॥

धेनुवच्चाश्वदक्षिणा, स ब्रह्मण इति पुरुषापनयो यथा हिरण्यस्य ॥ ६५ ॥

अस्ति उपहव्यः, उपहव्यो अनिरुक्तस्तेनाभिशस्यमानं याजयेत् । अग्निष्टोमो यज्ञः पञ्चदशस्तोमो रथन्तरसामाश्वः श्वेतो दक्षिणा । उपहव्यो निरुक्तः । तेनाभिशस्यमानं याजयेत् । उक्थ्यो यज्ञः सप्तदशस्तोमो बृहत्पृष्ठः अश्वः श्यावो रुक्मललाटो दक्षिणा । तत्र श्रूयते, स ह्यनिरुक्तः स ब्रह्मणे देय इति । तत्र सन्देहः । किमश्वो ब्रह्मभागस्य निवर्त्तकः ? उत कृत्स्नस्य क्रतुदाक्षिण्यस्येति । किं प्राप्तम् । ब्रह्मभागस्य निवर्त्तक इति । कुतः । कर्तृसम्बन्धाद् अवयवाऽर्थत्वाद् विभक्तप्रकृतित्वाच्च गुणेदन्ताविकारः स्यात् । स्रग्वत् । यथा, स्रजमुद्गात्रे ददातीति उद्गातृभागस्य निवर्त्तिका स्रक्, न कृत्स्नस्य क्रतुदाक्षिण्यस्य । एवमिहापीति ॥ एवं प्राप्ते ब्रूमः । धेनुवद् अश्वदक्षिणा स्यात्, कृत्स्नस्य निवर्त्तिका इति। कुतः । दक्षिणाशब्दसम्बन्धात् । अश्वः श्यावो रुक्मललाटो दक्षिणा इति प्रत्यक्षश्रुतेनाश्वेन आनमनं कर्त्तव्यम् । एवञ्चेद् आनुमानिकं निवर्त्तितुमर्हति । ननु कर्तृसम्बन्धोऽस्य श्रूयते, स ह्यनिरुक्तः स ब्रह्मणे देय इति । उच्यते । एकेन वाक्येन देशकप्राप्तानां निर्वृत्तिः । द्वितीयेन वाक्येन विनिवृत्तौ सत्यां पुरुषापनयः क्रियते । यथा, हिरण्यस्य सर्वं ब्रह्मणे परिहरतीति । तस्मात् कृत्स्नस्य निवर्त्तकोऽश्व इति ॥६५॥सि०

एके तु कर्तृसंयोगात् स्रग्वत्तस्य लिङ्गविशेषेण ॥ ६६॥

अथ यदुक्तम्- एके अर्था निवर्त्तन्ते, कर्तृसंयोगाल्लिङ्गविशेषेण स्रग्वदिति । तत् परिहर्त्तव्यम् ॥ ६६ ॥ आ० ॥

अपि वा तदधिकाराद्धिरण्यवद्विकारः स्यात् ॥ ६७ ॥

अपि वेति पक्षव्यावृत्तिः । तदधिकाराद्दक्षिणाधिकाराद्दक्षिणाशब्देन दक्षिणामधिकृत्याश्वसम्बन्धः कृतः । तस्मात् कृत्स्नदक्षिणाविकारोऽश्वः । अतो हिरण्यवदेव भवति, न स्रग्वत् ॥६७॥ आ० नि० उपहव्ये अश्वेन कृत्स्नक्रतुदाक्षिण्यस्य बाधाधिकरणम् ॥ १९ ॥

तथा च सोमचमसः ॥ ६८ ॥

ऋतपेये श्रूयते, औदुम्बरः सोमचमसो दक्षिणा स प्रियाय सगोत्राय ब्रह्मणे देय इति । तत्र सन्देहः । किं ब्रह्मभागस्य निवर्त्तकः सोमचमसः, उत कृत्स्नस्य क्रतुदाक्षिण्यस्य ? । किं प्राप्तम् । तथा सोमचमसः स्यात् । यथा स्रग् उद्गात्रे तद्भागस्य निवार्त्तिका, उद्गातृसंयोगात् । एवं ब्रह्मसंयोगाद् ब्रह्मभागस्य निवर्त्तकः सोमचमसः ॥ ६८ ॥ पूर्व० ॥

सर्वविकारो वा क्रत्वर्थे प्रतिषेधात् पशूनाम् ॥६९॥

वाशब्दः पक्षं व्यावर्त्तयति, न ब्रह्मभागस्य निवर्त्तकः । किं तर्हि कृत्स्नस्य क्रतुदाक्षिण्यस्य । कथमवगम्यते । पशुप्रतिषेधानुवादात् । एवमाम्नायते, ऋतं वै सोमोऽनृतं पशवो यत् पशून् दद्यात् सोऽनृतं कुर्यात् । औदुम्बरः सोमचमसो दक्षिणा इति । पशुदानमपोह्य सोमचमसो विधीयते । यः पशून् दद्यात् तस्यैष दोषो भवेत् । एतस्मान्न पशवो दातव्या इति वक्तव्ये तमेवार्थमुक्तं मन्यमानः । सोमचमसो दक्षिणा इत्याह । सोमचमसदानेन पशवो न दीयन्त इति गम्यते । तदेवं कृत्स्नस्य निवर्त्तकोऽवकल्पते । ब्रह्मदानस्य निवर्त्तके सति अन्येभ्यः पशवो दीयेरन् । तस्मात् कृत्स्नस्य निवर्त्तक इति ॥ ६९ ॥ सि० ॥

ब्रह्मदानेऽविशिष्टमिति चेत् ॥ ७० ॥

इति चेत् पश्यसि पशुदानविप्रतिषेधात् कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तक इति । ब्रह्मदानेऽप्येतदवकल्पते । ब्रह्मणे सोमचमसो देयः । यः पशून् दद्यात् स ब्रह्मणे इति गम्यते । तस्मान्न नियोगतः कृत्स्नस्यैव क्रतुदाक्षिण्यस्य निवर्त्तके पशुप्रतिषेधानुवादोऽवकल्पते ।

ब्रह्मणे दानेऽपि तदुपपद्यते इति ॥ ७० ॥ आ० ॥

उत्सर्गस्य क्रत्वर्थत्वात् प्रतिषिद्धस्य कर्म स्यान्न च गौणः प्रयोजनमर्थः स दक्षिणानां स्यात् ॥ ७१ ॥

न चैतदस्ति, ब्रह्मभागस्य निवर्त्तकः सोमचमस इति। कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तकः स्यात् । अस्य सोमचमसस्य य उत्सर्गः, स क्रत्वर्थः स्यात्।दक्षिणाशब्देन हि सम्बद्ध्यते, सोमचमसो दक्षिणा इति। न च प्रकृतावेकैको गवादिर्दक्षिणा । उक्तमेवेदं, गवादीनां समुदाये दक्षिणाशब्द इति । तदेवं सोमचमसदानेन प्रतिषिद्धेषु पशुषु यदि ब्रह्मदानेऽप्येतदविशिष्टमिति कृत्वा अन्येभ्यः पशवो दीयेरन् प्रतिषिद्धं क्रियेत । यो हि ब्रह्मभागो न सा दक्षिणा । दक्षिणावयवो हि सः । दक्षिणावयवे दक्षिणाशब्दो निविशमानो गौणः स्यात्। न च विद्यमाने मुख्ये गौण उपादीयते। सोमचमसस्य हि प्रयोजनं दक्षिणानिवृत्तिः। सर्वेषाम् ऋत्विजाम् आनमनं प्रयोजनं दक्षिणानां न ब्रह्मदानम् । तस्मात् कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तकः सोमचमस इति ॥ ७१ ॥ आ० नि० ॥

यदि तु ब्रह्मणस्तदूनं तद्विकारः स्यात् ॥ ७२ ॥

सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ॥ ७३ ॥

प्रयोजनसूत्रद्वयमिदम् । यदि तु ब्रह्मभागस्य निवर्त्तकः सोमचमसः, ततो ब्रह्मभागोना सा दक्षिणा। एतेन विकारेण अन्या दीयेरन् यथा पूर्वः पक्षः। यथा तर्हि सिद्धान्तः, तथा सर्वं निवर्त्तते। तस्मिन् निवर्त्तिते, ततः पुरुषापनयः क्रियते । स ब्रह्मणे देय इति । तासां दक्षिणानां क्रतुप्रधानत्वं भवति। सर्वर्त्विगानमनेन हि क्रतुः सिद्ध्यति, न ब्रह्मानत्या केवलया। सोमचसेन च सा सर्वानतिः कृतेति नान्यत् किञ्चन दीयेत। एतत्प्रयोजनं भवत्येव पक्षोक्तं यथोपवर्णितमिति ॥ ७२ ॥ ७३ ॥ ऋतपेये सोमचमसेन कृत्स्नक्रतुदाक्षिण्यबाधाधिकरणम् ॥ २० ॥ प्रथमवर्णकम् ॥ १ ॥

एवं वा—

यदि तु ब्रह्मणस्तदूनं तद्विकारः स्यात् ॥ ७२ ॥

ऋतपेये श्रूयते, औदुम्बरः सोमचमसो दक्षिणा। स प्रियाय

सगोत्राय ब्रह्मणे देय इति। तत्रैषोऽर्थः सांशयिकः । किं ब्रह्मभागेनोनं दातव्यम् ? उत सोमचमस एव केवलो दातव्य इति । ननु सोमचमसो दक्षिणेत्येष सम्बन्ध इत्युक्तम् । तत्रोच्यते । सोमचमसो ब्रह्मण इत्येष सम्बन्ध इति कृत्वा चिन्ता। यद्येवं, ब्रह्मणः सोमचमस इति सम्बन्धो विवक्षितः, सोमचमसेन ब्रह्मभागो निवर्त्तितोऽवशिष्टं दातव्यं तदूनो विकारः स्यादिति ॥ ७२ ॥ पूर्व० ॥

सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ॥ ७३ ॥

सर्वं वा सोमचमसेन निवर्त्येत । कुतः । सोमचमसो दक्षिणा इत्येष सम्बन्धः प्रत्यक्षः । तेन निवर्त्तिते सर्वस्मिन् दाक्षिण्ये पुरुषापनय एव क्रियते। तासां क्रतुप्रधानत्वात्। दक्षिणानां सोमचमसो यः क्रतुदक्षिणा, स सर्वं क्रतुदाक्षिण्यं निवर्त्तयतीति ॥ ७३ ॥ सिद्धान्तः ॥ सोमचमसेन कृत्स्नदक्षिणापुरुषान्तरयोर्बाधाधिकरणम् ॥२०॥ वर्णकान्तरम् ॥

यजुर्युक्ते त्वध्वर्योर्दक्षिणा विकारः स्यात् ॥ ७४ ॥

अस्ति वाजपेयः । तत्रेदं समाम्नायते, यजुर्युक्तं रथमध्वर्य्यवे ददातीति। तत्रायमर्थः सांशयिकः । किं यजुर्युक्तोऽध्वर्य्योर्भागस्य निवर्त्तकः ? किं भागे नियम इति। किं प्राप्तम्। यजुर्युक्ते दक्षिणा तु अध्वर्योर्विकारः स्यात्। तुशब्दः संशयव्यावृत्त्यर्थः । न खलु संशयोऽस्ति। यजुर्युक्तं रथमध्वर्यवे ददाति, नान्यदिति गम्यते। स रथोऽध्वर्युभागं निवर्त्य कृतार्थोऽवशिष्टानां चोदकप्राप्तानां निवृत्तिं न शक्नोति कर्त्तुम्। नैवमभिसम्बन्धः क्रियते। यजुर्युक्तं रथं वाजपेये ददातीति। येन क्रतुसंयोगो गम्यते । कुतः। प्रकृतो हि वाजपेयः। अध्वर्युः पुनर्वाक्येन श्रूयते। वाक्यं पुनः प्रकरणाद् बलीयः। तस्मादध्वर्युभागस्य निवर्त्तको रथ इति ॥ ७४ ॥

अपि वा श्रुतिभूतत्वात् सर्वासां तस्य भागो नियम्यते ॥ ७५ ॥

अपि वेति पक्षव्यावृत्तिः। श्रुतिभूता हि सर्वे रथाः सामान्येन वचनेन। सप्त सप्तदशकानि ददातीति । सप्तदश रथाः, सप्तदश निष्काः सप्तदश दास्यः, सप्तदश च युग्मानि, सप्तदश गवां शतानि, यवसो वयस्यश्च सप्तदश इति । तेनाविशेषेण सप्तदश रथाः

सर्वेषां प्राप्ता विभक्तव्याः । तत्र न ज्ञायते कस्य को रथः ?, तत्राध्वर्योर्यजुर्युक्तः पक्षे प्राप्तः स नियम्यते । यजुर्युक्तमध्वर्यवे ददाति, न अन्यं, न चान्यस्मै । एवम् ऋग्भिर्युक्तं होत्रे, नान्यं, न चान्यस्मै । सामभिर्युक्तमुद्गात्रे ददाति, नान्यं, न चान्यस्मै । तत्र पक्षे विधानार्थं यजुर्युक्तग्रहणं, न अध्वर्य्योर्भागं निवर्त्तयितुमुत्सहते । तस्याऽनिवृत्तौ चोदकानुग्रहो भविष्यति । तस्मादध्वर्य्योर्भागे रथो नियम्यते, न तद्भागं निवर्त्तयतीति ॥ ७५ ॥ वाजपेये रथस्य भागनियामकताधिकरणम् ॥ २१ ॥ ॥ इति श्रीभट्टशबरस्वामिविरचिते मीमांसाभाष्ये दशमाध्यायस्य तृतीयः पादः ॥ १० ॥ ३ ॥

अथ दशमाध्याये चतुर्थः पादः ॥ १० ॥ ४ ॥

प्रकृतिलिङ्गासंयोगात् कर्मसंस्कारं विकृतावधिकं स्यात् ॥ १ ॥

अस्ति अग्निः, य एवं विद्वानग्निं चिनुते इति । तत्र नक्षत्रेष्टिः । अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत् । सोऽनु जुहोति । अग्नये स्वाहा, कृत्तिकाभ्यः स्वाहा, अम्बायै स्वाहा, नियतये स्वाहा, अभ्रपत्यै स्वाहा, निवर्गपत्यै स्वाहा, निपुणिकायै स्वाहा इति । सन्ति तु प्रकृतौ नारिष्टहोमाः । नारिष्टान् होमाञ्जुहोतीति । तत्र संशयः । किं नारिष्टहोमानां निवृत्तिः, अथवाऽनिवृत्तिः, समुच्चयः ? इति । तथा श्येने श्रूयते, लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्तीति । अस्ति प्रकृतौ, निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत् कुरुते इति । तदिह चोदकेन प्राप्तम् । तत्र संशयः । किमुपवीतस्य निवृत्तिः ? उतानिवृत्तिः, समुच्चयः ? इति । तथा पृष्ठ्ये षडहे श्रूयते । मध्वाशयेद् घृतं वेति । अस्ति तु प्रकृतौ, पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येति । तदिह चोदकेन प्राप्तम् । तत्र संशयः । किं तस्य निवृत्तिः ? उतानिवृत्तिः समुच्चयः ? इति ॥ किं प्राप्तम् । तस्य निवृत्तिरिति । प्रत्यक्षश्रुता उपहोमादयश्चोदकप्राप्तानामानुमानिकानां निवर्त्तका इति । अपि च प्रकृतिलिङ्गसंयोगो भवति, जुहोति, निवीताः, प्रचरन्ति, आशा-

येदिति । यथा, शरमयं बर्हिर्भवतीति शराः कुशान्निवर्त्तयन्ति ॥

एवं प्राप्ते ब्रूमः, अनिवृत्तिः, समुच्चय इति । कुतः । प्रकृतिलिङ्गाऽसंयोगात् । प्रकृतेन लिङ्गेन कार्येण संयोग एषामुपहोमादीनां नास्ति । स हि प्रत्यक्षदर्शनेन वा भवति । यथा नैवारश्चरुरिति । अभावे विधानेन वा भवति । यथा, जुहूषा वा एतर्हि वाग्भवति यर्हि पृष्ठ्यः षडहः सन्तिष्ठते । न बहु वदेन्नान्यं पृच्छेन्नान्यस्मै प्रब्रूयाद् मधु आशयेद् घृतं वा इति । विकारेण वा । यथा, नैर्ऋतश्चरुर्नखावपूतानामिति । स्वशब्देन वा भवति । यथा, परिधौ पशुं नियुञ्जीतेति । प्रतिषेधेन वा भवति । यथा, न गिरा गिरेति ब्रूयात् । यो गिरा गिरेति ब्रूयादात्मानं तदुद्गाता गिरेदैरं कृत्वोद्गेयमिति । अन्येन वा, येनावगम्यते प्राकृते कार्यमभिनिर्वर्त्तयतीति । तदिह न किञ्चिदप्यस्ति । न चैतावता निवृत्तिः । इदं प्रत्यक्षश्रुतम्, इदं चोदकेन प्राप्तमिति । प्रकृतिलिङ्गसंयोगे निवृत्तिर्भवति, नान्यथा ॥

नन्विदानीमेवोक्तम् । भवतीह प्रकृतिलिङ्गसंयोगः जुहोति, निवीताः, प्रचरन्ति, आशयेदिति । उच्यते । प्रकृतानां जुहोत्यादीनां जुहोत्याद्यन्तराणि इमानि विधीयन्ते । तत्र तावज्जुहोतिरदृष्टार्थः । कथमसौ गम्येत प्राकृतस्यार्थे वर्त्तत इति । तथा, उपवीतमदृष्टार्थं, कथं तस्य कार्ये निवीतं वर्त्तेत इति गम्यते । तथा व्रतं वृत्त्यर्थम् । मध्वशनं घृताशनञ्च तस्मिन्नर्थे वर्त्तेत इत्येतन्न ज्ञायत एव । तस्मान्नास्ति प्रकृतिलिङ्गसंयोगः ॥ अथोच्यते, नैवोपहोमा जुहोत्यन्तरं, प्रकृते होमे मन्त्रो विधीयते इति । तच्च न । विधायकस्याभावात् । सोऽनु जुहोतीति परिसमाप्ते वाक्ये केवलस्य मन्त्रस्याम्नानं, नास्ति वचनम् । एवं जुहोतीति । भिन्नान्येतानि वाक्यानि । सोऽनु जुहोतीति विधिवाक्यम् । अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा इत्येवमादीनि मन्त्रवाक्यानि । तस्मान्न मन्त्रविधानार्थं जुहोतेः पुनःश्रवणम् । होमविधानार्थे श्रुतिर्विधायिका भवति, मन्त्रविधाने वाक्यम् । तस्मादपि न मन्त्रविधानम् । अतः समुच्चयः । उभयमपि प्रमाणेन प्राप्तम् । प्रत्यक्षश्रवणं प्रमाणं, चोदकोऽपि प्रमाणम् । नानाकार्यत्वाच्चैतयोर्विरोधः । तस्माद्यथा, प्रयाजादीन्न बाधन्ते, एवं नारिष्टहोमानपि न बाधेरन् । अत एवञ्जातीयकं कर्मसंस्कारं विकृतावबाधकं स्यादिति ॥ १ ॥ सि० ॥

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत
प्रकृतिसन्निधानात् ॥ २ ॥

अथ यदुक्तं, शरमयं बर्हिर्भवतीति यथा शराः कुशान् निवर्त्तयन्ति, एवमिहापीति। अत्रोच्यते। युक्तं शरमये। भवति हि तत्र प्रकृतिलिङ्गेन संयोगः। बर्हिःशब्देन, एवंविशिष्टं वा बर्हिर्भवति। शरा वा बर्हिषः कार्ये वर्त्तन्त इति। इह तु प्रकृतिलिङ्गासंयोगः। तस्माद्विषमं बर्हिषेति ॥ २ ॥ आ० नि० ॥ अग्न्यादौ नारिष्टहोमादिभिर्नक्षत्रेष्ट्यादीनां समुच्चयाधिकरणम् ॥ १ ॥

एवं वा—

प्रकृतिलिङ्गासंयोगात् कर्मसंस्कारं विकृतावधिकं स्यात् ॥ १ ॥

इदमाम्नायते, सोमारौद्रं चरुं निर्वपेत् कृष्णानां व्रीहीणामभिचरन् इति। तत्रेदं श्रूयते। शरमयं बर्हिर्भवतीति। तत्र संशयः। किं कौशं निवर्त्तते, न? इति। किं प्राप्तम्। उभयस्य प्रमाणावगतत्वात् समुच्चयः ॥ १ ॥

एवं प्राप्ते ब्रूमः—

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत
प्रकृतिसन्निधानात् ॥ २ ॥

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत इति। अस्ति हि तत्र प्रकृतिलिङ्गेन बर्हिःशब्देन संयोगः। तस्मात् प्राकृतस्य निवृत्तिरिति ॥ २ ॥ ॥ सिद्धान्ताशङ्कानिरासौ ॥ शरमयबर्हिषा कौशबर्हिर्बाधाधिकरणम् ॥ १ ॥ प्रथमवर्णकम् ॥ १ ॥

एवं वा—

प्रकृतिलिङ्गासंयोगात् कर्मसंस्कारं
विकृतावधिकं स्यात् ॥ १ ॥

अस्ति वाजपेयः। शरदि वाजपेयेन स्वाराज्यकामो यजेतेति। तत्र श्रूयते। रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति। दुन्दुभिघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोतीति। अस्ति च प्रकृतौ, उपावर्त्तध्वमिति दर्भाभ्यां स्तोत्रमुपाकरोतीति। तदिह चोदकेन प्राप्तम्। तत्र संशयः। किं रथघोषेण दुन्दुभिघोषेण यो नादः स मन्त्रस्य निवर्त्तकः, यद्

द्रव्यं तद् दर्भयोः ? उतोभयमुभयस्य निवर्त्तकमिति । किं प्राप्तम् । शब्दत्वेन सामान्येन नादो मन्त्रस्य निवर्त्तकः, द्रव्यत्वेन द्रव्यं दर्भयोः । ननु तत्पुरुषनिर्देशोऽयम् तेन परार्थेन रथस्य घोषविशेषणत्वेनोच्चारणं, न स्वकार्येण निर्देशः ॥ अत्रोच्यते । द्वन्द्वनिर्देशोऽपि ईदृशो भवति । तत्रायमप्यर्थः, न रथः परार्थ उच्चरिष्यते । श्रुतिर्हि तथा हीयेत, लक्षणा च स्यात् । चोदनालिङ्गसंयोगश्च बाध्येत । तस्माद् घोषो मन्त्रस्य निवर्त्तको द्रव्यं दर्भयोरिति ॥ १ ॥

एवं प्राप्ते ब्रूमः—

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसन्निधानात् ॥ २ ॥

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत, उभयस्य चोदनालिङ्गसंयोगो नैककस्य । रथघोषेणेति श्रूयते, न रथेन घोषेण चेति । रथविशिष्टो घोषो लक्षणं स्तोत्रोपाकरणस्य । प्रकृतौ दर्भौ लक्षणं, मन्त्रश्च । ननु इदानीमेवोक्तं द्वन्द्वनिर्देशो भविष्यतीति । नैतदेवं, द्विवचनं हि तथा स्यात् । एकवचनेन च निर्देशः । तेनैको लक्षणं, स च घोषः । तेन हि समभिव्याहारस्तृतीयायाः । ननु समुदायेन समभिव्याहारो भविष्यति । न हि समुदायस्य । अशब्दार्थत्वात् । अथ समुदायो निर्दिश्येत, ततोऽभ्युपगतमुभयस्य निवर्त्तकमिति । ननु मन्त्रो वाचक एव उपावर्त्तध्वमिति । नेत्युच्यते । उपावर्त्तनमात्रस्याऽभिधायको मन्त्रः । न चोपावर्त्तनमात्रं स्तोत्रोपाकरणम् । अथाप्यभिधानं स्यात्, तथापि तस्य निवर्त्तकः । लक्षणेनोपाकर्त्तव्यमिति प्रत्यक्षा श्रुतिः । अभिधानेनोपाकर्त्तव्यमिति चोदकः । श्रुतिश्च चोदकाद् बलीयसी । तस्मादुभयस्य निवर्त्तको रथघोषो दुन्दुभिघोषश्चेति ! किं भविष्यति प्रयोजनम् । यदि रथो न घोषविशेषणम्, अरथविशिष्टोऽपि घोषस्तत्रोपाकरणं लक्षयेदिति॥२॥सिद्धान्ताशङ्कानिरासौ ॥ वाजपेये रथघोषदुन्दुभिघोषाभ्यां दर्भमन्त्रयोरुभयोरेव बाधाऽधिकरणम् ॥ २ ॥ द्वितीयवर्णकम् ॥ २ ॥

सर्वत्र तु ग्रहाम्नानमधिकं स्यात् प्रकृतिवत् ॥ ३ ॥

बृहस्पतिसवे श्रूयते । बार्हस्पत्यं ग्रहं गृह्णाति, विषुवत्यर्कं ग्रहं गृह्णातीति । महाव्रते शुक्रग्रहं गृह्णातीति । अश्वमेधे सौवर्णराज-

ताभ्यां महिमानौ ग्रहौ गृह्णातीति । सन्ति तु प्रकृतौ ऐन्द्रवायवादयो ग्रहाः । त इह चोदकेन प्राप्ताः । तत्र संशयः । वैकृतैस्ते निवर्त्त्यन्ते, उतानिवृत्तिः, समुच्चयः ? इति । किं प्राप्तम् । प्रत्यक्षश्रुता वैकृताश्चोदकप्राप्तान् प्राकृतान् निवर्त्तयितुमर्हन्ति । अस्ति हि तेषां प्रकृतिलिङ्गेन ग्रहशब्देन संयोग इति ॥ एवं प्राप्ते ब्रूमः । तत्र तत्र सर्वत्र ग्रहाख्यानमधिकं भवितुमर्हति । प्राकृतस्यानिवृत्तिरिति । कुतः । उभयेषां प्रमाणावगतत्वात् । चोदकोऽपि प्रमाणं, प्रत्यक्षश्रवणमपि । ग्रहशब्दः प्रकृतिलिङ्गमितिचेत् । नैवम् । यदि ग्रहशब्दमुच्चार्य्य गुणो विधीयते, ततः प्राकृता एव ग्रहा गुणविकृता भवेयुः । अथ ग्रहसम्बन्धेनाऽग्रहो विधीयते, ततो ग्रहकार्ये वर्त्तते इति प्राकृतं निवर्त्तयेत् । यथा, खलेवाली यूप इति । अन्यः पुनरेष ग्रहशब्दो ग्रहणवचनः । अर्कं नाम ग्रहं गृह्णाति, महिमानौ नाम ग्रहौ गृह्णातीति । अत्रापूर्वा ग्रहणक्रिया विधीयते । तस्मान्न ग्रहशब्दश्चोदनालिङ्गमेकार्थानां हि विकल्पो वा बाधो वा भवति । न चैषां वैकृतैरेकार्थता ॥ ननु यागनिवृत्त्यर्थाः सर्वे, तेनैषामेकार्थतेति । उच्यते । यागं प्रति संहत्यकारिण एते, न निरपेक्ष एकैक एषां साधकः । न ह्येषां पृथक्त्वेन यागसम्बन्धः, अर्केण यजेत, शुक्रेण यजेतेति । कथन्तर्हि । प्रयोगवचन एषां ग्राहकः । स च सन्निहितानाम् । न च सन्निधाने विशेषोऽस्ति । तस्मात् सर्वेषां प्राकृतानां वैकृतानाञ्च संग्राहकः प्रकृतिवत् । यथा प्रकृतौ ऐन्द्रवायवग्रहणं चोदितं, मैत्रावरुणग्रहणं पुनश्चोद्यते । विभागश्चादृष्टार्थः संस्कारो देवतोद्देशश्च । अदृष्टत्वात् कार्यस्य, न ज्ञायते पूर्वं उत्तरस्य कार्ये भवतीति । प्रयोगवचनग्रहणाच्च समुच्चयो, न केवलं मैत्रावरुणादिभिः सह अप्रकरणाधीताभ्यामंश्वदाभ्यामपि । एवं विकृतावपि समुच्चयो भवितुमर्हति ॥ आह । ननु ग्रहं सङ्कीर्त्य गुणो विधीयते, अश्वमेधे सौवर्णराजताभ्यामिति । अत्रोच्यते । न तौ प्राकृतौ ग्रहौ संज्ञा वोत्पत्तिसंयोगादिति ग्रहकर्मणी भिद्येते ॥ आह । इह तर्हि बार्हस्पत्यं गृह्णातीति देवताविधानार्थं स्यात् । उच्यते । ग्रहे विधीयमाने श्रुतिरनुगृहीता । देवतायां वाक्यम् । श्रुतिश्च वाक्याद् बलीयसी ॥

आह । आग्नेयवत् । यथा अग्निष्टुति आग्नेया ग्रहा भवन्तीति देवताविधानं भवति, एवमेकवचनान्तेनापि । तस्याविवक्षितत्वात् । यथा ग्रहं सम्मार्ष्टीति सर्वग्रहाणां सम्मार्गोऽभिधीयते, एवमिहापि

सर्वग्रहाणां देवता विधीयते । अत्रोच्यते । उक्तमेतच्छ्रुतेर्बलीयस्त्वादिति । आग्नेया ग्रहा भवन्तीति तु वाक्यमविरुद्धं श्रुत्या । न हि तत्राग्नेयं ग्रहं गृह्णातीति । आग्नेयसत्ता तत्र वाक्येन श्रुत्यविरुद्धेन चोद्यमाना युक्तैवेति । तस्मात् प्राकृतेभ्यो व्यतिरिक्तो बार्हस्पत्यः समुच्चीयते । यथा प्रकृतौ अंशुं गृह्णाति,अदाभ्यं गृह्णातीति अप्राकरणिकौ प्राकरणिकैः समुच्चीयेते, एवमिहापि वैकृताः समुच्चीयेरन्निति ॥३॥ सि०

अधिकैश्चैकवाक्यत्वात् ॥ ४ ॥

इतश्च पश्यामः समुच्चय इति । कुतः । निःसन्दिग्धैश्च अधिकैः सुराग्रहैरेकवाक्यत्वं भवति । कथम् । सप्तदश एते ग्रहा गृह्यन्ते उभये प्राजापत्याः सोमग्रहाः सुराग्रहाश्च । अत्र व्यक्तमधिकाः सुराग्रहाः । तेषु गृह्यन्ते इति ग्रहणं चोद्यते, नानूद्यते । सकृदुच्चरितो गृह्यन्ते–इति शब्दः सोमग्रहैरपि सम्बद्ध्यते । तस्माच्चोदनान्तरं ग्रहाणामनेन असन्दिग्धेन अन्यदप्येवमेवावगम्यते ॥ ४ ॥ युक्तिः ॥

लिङ्गदर्शनाच्च ॥ ५ ॥

लिङ्गमप्येतमर्थं दर्शयति । किम् । विरण्यो वा एष यज्ञक्रतुर्यद् वाजपेयः । अतीव ह्यग्निष्टोमं क्रामत्युक्थ्यमति षोडशिनं नातिरात्रमाप्नोतीति । विरण्यशब्दो विस्तीर्णे भवति । यथा, विरण्यानि अरण्यानि, विस्तीर्णानीति गम्यते । यदि समुच्चयः । एवं विस्तीर्णता, बाधायां नोपपद्यते । तस्मादपि समुच्चय इति ॥ ५ ॥ हेतुः ॥ बृहस्पतिसवादौ बार्हस्पत्यग्रहादिभिः प्राकृतेन्द्रवायवादिग्रहाणां समुच्चयाधिकरणम् ॥ ३ ॥

प्राजापत्येषु चाम्नानात् ॥ ६ ॥

अस्ति वाजपेयः,वाजपेयेन स्वाराज्यकामो यजेतेति । तत्र प्राजापत्याः पशवः, सप्तदश प्राजापत्यान् पशूनालभते इति । सन्ति तु प्रकृतौ क्रतुपशवः । ते इह चोदकेन प्राप्ताः । तत्र संशयः । किं ते प्राजापत्यैः क्रतुपशवो बाध्यन्ते, उत समुच्चीयन्ते इति । किं प्राप्तम् । प्रत्यक्षाः प्राजापत्याश्चोदकप्राप्तान् क्रतुपशून् बाधेरन्निति ॥ एवं प्राप्ते ब्रूमः । प्राजापत्येषु च समुच्चयः स्यात् । चशब्दोऽन्वाचयार्थः । आम्नायन्ते हि क्रतुपशवः । ब्रह्मवादिनो वदन्ति, नाग्निष्टोमो नोक्थ्यो न षोडशी नातिरात्र इति । अथ कस्माद् वाजपेयेन सर्वे यज्ञक्रतवो-

ऽवरुद्ध्यन्ते,पशुभिरिति ब्रूयात्। यदाग्नेयं पशुमालभतेऽग्निष्टोमे तेनावरुन्धे ऐन्द्राग्नेनोक्थ्यम्, ऐन्द्रेण षोडशिनं, सारस्वत्याऽतिरात्रं मारुत्या बृहत्स्तोत्रमेतावन्तो वै यज्ञक्रतवस्तान् पशुभिरेवावरुन्धे इति समुच्चयं दर्शयति। ननु दर्शनमिदमुपादिश्यते, कोऽत्र न्यायः? इति। उच्यते। प्रकृतिलिङ्गासंयोगः। ननु पशुशब्दः प्रकृतिलिङ्गम्। नेत्याह। नात्र पशुमनूद्य देवता विधीयते,सङ्ख्याश्रवणात्। सङ्ख्यादेवताश्रवणात् कर्मान्तरं चेदमुक्तम्। पृथक्त्वनिवेशात् सङ्ख्यया कर्मभेदः स्यादिति। अतो ग्रहाणामिव समुच्चयो भवितुमर्हतीति ॥ ६ ॥
वाजपेये प्राजापत्यपशुभिः क्रतुपशूनां समुच्चयाधिकरणम् ॥ ४ ॥

आमने लिङ्गदर्शनात् ॥ ७ ॥

अस्ति साङ्ग्रहणीष्टिः, वैश्वदेवीं साङ्ग्रहणीं निर्वपेद् ग्रामकाम इति। तत्र श्रूयते। आमनमस्या देवा इति तिस्र आहुतीर्जुहोतीति। सन्ति तु प्रकृतौ त्रयोऽनुयाजाः, तेऽत्र चोदकेन प्राप्ताः। तत्र संशयः किमामनहोमैरनुयाजा निवर्त्तन्ते, उत तैः समुच्चीयन्ते इति। किं प्राप्तम्। प्रत्यक्षश्रुतैरामनहोमैरानुमानिका अनुयाजा निवर्त्येरन्। अपि च त्रित्वं प्रकृतिलिङ्गयोगो भवति ॥ एवं प्राप्ते ब्रूमः। आमने समुच्चयः स्यात्। कुतः। लिङ्गदर्शनात्। लिङ्गं हि इममर्थं दर्शयति। किं लिङ्गम्। बहिरात्मा वै प्रयाजानुयाजा आत्मा देवता यत् प्रयाजाऽनुयाजानां पुरस्ताद्वा उपरिष्टाद्वा जुहुयाद्बहिरात्मानं सजातानामादधीत, अथ यन्मध्यतो जुहोति मध्यत एव सजातानामात्मानं धत्ते इति अनुयाजानाम् अनिवृत्तिं दर्शयति। आह। ननु त्रित्वं प्रकृतिलिङ्गसंयोगः। नेत्याह। न हि सङ्ख्यामात्रमनूद्य शक्यते गुणो विधातुम्। न हि कस्यचित् काचित् सङ्ख्या न भवति। तस्मान्न सङ्ख्या प्रकृतिलिङ्गसंयोगः। लिङ्गदर्शनं त्विदमपदिष्टं, प्राप्तिरत्र वक्तव्येति। उच्यते। आहुतीर्जुहोतीति श्रुत्या आहुतिसत्ता, वाक्येन मन्त्रविधानं, त्रिसङ्ख्या चानुवादत्वेनावकल्पते। सङ्ख्यामन्त्रवन्ति तु यागान्तराणि विधीयन्ते। तेषां चोभयप्रमाणावगतत्वात् समुच्चयो न्याय्य इति ॥ ७ ॥ सांग्रहणीष्टौ आमनहोमैरनुयाजानां समुच्चयाऽधिकरणम् ॥ ५ ॥

उपगेषु शरवत् स्यात् प्रकृतिलिङ्गसंयोगात् ॥ ८ ॥

महाव्रते श्रूयते, पत्न्य उपगायन्ति, पिच्छोलाभिरुपगायन्ति, काण्डवीणादिभिरुपगायन्ति, आपाटलिकाभिरुपगायन्तीति। अस्ति तु प्रकृतौ ऋत्विज उपगायन्तीति । तदिह चोदकेन प्राप्यते। तत्रायमर्थः सांशयिको भवति। किं पत्नीभिः, उपगायन्तीति ऋत्विज उपगायन्तो निवर्त्यन्ते, उत न निवर्त्यन्ते ? इति। तत्रैतत् तावच्चिन्त्यते । किं गानोपगानमेतत्, उत वादित्रोपगानम् ? इति। तत्रापि द्वैतं, किं गानस्योपगानं गानोपगानम् । उत गानमेवोपगानं गानोपगानम् ? इति। किं तावत् प्राप्तम्। प्राकृतं निवर्त्यते इति। तत इदं वर्ण्यते। गानस्योपगानमिति । पत्न्यो गायतां गानमुपचिन्वन्ति इति, गानं प्राप्तमेव प्राकृतम् । उपचय उपसर्गार्थो विधीयते। तस्माद् गानस्योपगानमिति ॥

अथ वा गानमेवोपगानं, गानशब्दो हि शारीर्य्यां गीतौ प्रसिद्धः। तस्माद् गानमेतदुपगानं, गानस्य वोपगानमिति। यदा एतयोरन्यतरं, तदा ऋत्विक्कार्य्ये पत्न्यो वर्त्तन्ते। अतः प्रकृतिलिङ्गसंयोगात् प्रत्यक्षश्रुतेन चोदकप्राप्तं निवर्त्यते शरवत् । यथा शरमयं बर्हिर्भवतीति शराः प्रत्यक्षश्रुताश्चोदकप्राप्तान् दर्भान् निवर्त्तयन्ति, एवमिहापीति ॥ ८ ॥ पूर्व० ॥

आनर्थक्यात् त्वधिकं स्यात् ॥ ९ ॥

तुशब्दः पक्षं व्यावर्त्तयति, न निवृत्तिरिति । समुच्चयः स्यात् । तत एतच्चिन्त्यते । वादित्रस्यैतदुपगानम् । अस्ति ह्यत्र वादित्रम्। दिक्षु दुन्दुभयो नदन्तीत्येवमादि । तस्योपगानं वादित्रस्योपगानम् । कथम्। प्रत्ययेन हि श्रुत्या धात्वर्थस्य सत्ता उच्यते। विप्रकृष्टा उपसर्गार्थस्य सत्ता अर्थविप्रकर्षाद् दुर्बला भवति। तस्मादुपसर्गाऽर्थसत्ताविधानं धात्वर्थसत्ताविधानेन बाध्यते ॥

अथ वा वादित्रमिदमुपगानम्। एवं ह्याह । पत्न्य उपगायन्ति काण्डवीणादिभिरुपगायन्तीति। काण्डवीणादिभिर्वादित्रमुपगानं भवति, भवति च तन्त्रीगाने गानशब्दः । तस्माद् वादित्रमुपगानम्। तत्र यद्येवं वादित्रस्योपगानं, यदि वा वादित्रमुपगानम् । उभयथा प्राकृतादर्थान्तरे भवति। तस्मात् समुच्चयः। कुतः। आनर्थक्यात्। एवं चोदकानर्थक्यं न भविष्यति । चोदकोऽनुग्रहीष्यतीत्यर्थः। तस्मात् समुच्चय इति ॥ ९ ॥ सिद्धान्तः ॥ महाव्रते ऋत्विगुपगानस्य

पत्न्युपगानेन समुच्चयाधिकरणम् ॥ ६ ॥

संस्कारे चान्यसंयोगात् ॥ १० ॥

अस्ति अञ्जनाभ्यञ्जनो नाम एकोनपञ्चाशद्रात्रः । तत्रेदं समाम्नायते । गौग्गुलवेन प्रातःसवने समञ्जते अभि वाञ्जते पैलुदारवेण माध्यन्दिने सवने सौगन्धिकेन तृतीयसवने इति । अस्ति तु प्रकृतौ नवनीतेनाभ्यञ्जनम् । तदिह चोदकेन प्राप्तम् । तत्र संशयः । किं तद् वैकृतेन बाध्यते, उत नेति । किं प्राप्तम् । प्रत्यक्षश्रुतत्वाद्, वैकृतेषु अञ्जते अभि वाञ्जते इति च, प्रकृतिलिङ्गसंयोगाद्बाध्यते इति । आह । ननु सुत्याकालमञ्जनमभ्यञ्जनञ्च सत्रे, दीक्षाकाले नवनीतेनाभ्यञ्जनं प्रकृतौ, अन्यकालत्वात् प्रयोजनान्तरे वर्त्तते इति बाधो न स्यात् । उच्यते । प्रयाजवदन्यकालमपि तत्कार्य्यमेव द्रष्टव्यम् । कालमात्रमन्यत्, पदार्थस्तु स एव । यथा तिष्ठन्तं पशुं प्रयजन्तीति तिष्ठति पशौ प्रयाजा वर्त्तमानाः प्राकृतकार्य्यका एव भवन्ति, एवमिहापि द्रष्टव्यम् ॥ एवं प्राप्ते ब्रूमः ॥ संस्कारे अञ्जनेऽभ्यञ्जने च प्राकृतेन सह समुच्चयः स्यात् । कुतः । अन्यसंयोगात् । अन्यकालमिदं कार्य्यान्तरे वर्त्तते, एवं चोदकोऽनुग्रहीष्यते । तस्मात्समुच्चय इति ॥१०॥सि०

प्रयाजवदिति चेत् ॥ ११ ॥

इति यदुक्तं तत्परिहर्त्तव्यम् ॥ ११ ॥ आ० ॥

नार्थान्यत्वात् ॥ १२ ॥

न च प्रयाजवद् भवितुमर्हतीति । कुतः । अर्थान्यत्वात् । स्नेहनार्थमादौ नवनीतं सुखप्रचाराय । प्रवृत्ते कार्य्ये सुत्याकालं गौग्गुलवेनाभ्यञ्जनं विरूक्षीकरणार्थं प्रत्यक्षं कार्य्यान्तरं वर्त्तत इति, न प्राकृतं निवर्त्तयितुमर्हति ॥ १२ ॥ आ०नि०॥ अञ्जनाभ्यञ्जने नवनीताभ्यञ्जनस्य गौग्गुलवाभ्यञ्जनादिभिः समुच्चयाधिकरणम् ॥ ७ ॥

आच्छादने त्वैकार्थ्यात् प्राकृतस्य विकारः स्यात् ॥ १३ ॥

महाव्रते श्रूयते, तार्प्यं यजमानः परिधत्ते दर्भमयं पत्नी इति । अस्ति तु प्रकृतौ, अहतवासः परिधत्ते इति । तदिह चोदकेन प्राप्तम् । तत्र संशयः । किम् अहतस्य वाससो निवृत्तिः, न ? इति । किं प्राप्तम् । आच्छादने तु प्राकृतस्य विकारः स्यात् । कुतः । ऐकार्थ्यात् ।

एको ह्यर्थः प्राकृतस्य वैकृतस्य च कौपीनमाच्छादयितुं, प्रकृतौ विकृतौ च प्रच्छादनं क्रियते । तस्मात् प्रत्यक्षश्रुतेन चोदकप्राप्तं निवर्त्तेत ॥ १३ ॥ पूर्व० ॥

अधिकं वान्यार्थत्वात् ॥ १४ ॥

वाशब्दः पक्षं व्यावर्त्तयति । अधिकमिदं प्राकृताद्वाससो भवितुमर्हतीति । कुतः । तद् हि निवर्त्तकं भवति, यदनिवर्र्त्य न शक्नोति निवेष्टुम् । यत्तु अनिवर्र्त्यापि शक्नोति भवितुं, न तद् निवर्त्तयति । तद् हि निवर्त्तयदप्रतिषेधकं सच्चोदकं प्राप्तं बाधेत । ननु कौपीनप्रच्छादने परिधत्ते इति भवति, नान्यकार्य्यके । उच्यते । नैतदेवम् । उपरिवाससोऽपि कार्य्ये परिधत्ते इति भवति । तद्यथा, कम्बलं परिधत्ते, रौरवं परिधत्ते इति । सर्वतो धत्ते परिधत्ते इति अवयवप्रसिद्ध्या भवति । तस्मादहतस्य वाससो न निवृत्तिः, समुच्चय इति ॥ १४ ॥ सि० ॥

समुच्चयश्च दर्शयति ॥ १५ ॥

समुच्चयश्च वासःशब्देन बहुवचनान्तेन दर्शयति, वासांसि वाराही चोपानहौ विमुञ्चतीति,कृष्णविषाणया वासांसि विभ्रंसयति, ततोऽध्वर्युः परिधत्ते इति । तस्मादपि पश्यामः, अनिवृत्तिः समुच्चय इति ॥ १५ ॥ युक्तिः ॥ महाव्रते अहतवाससस्तार्प्यादिभिः समुच्चयाऽधिकरणम् ॥ ८ ॥

सामस्वर्थान्तरश्रुतेरविकारः प्रतीयेत ॥ १६ ॥

महाव्रते श्रूयते, श्लोकेन पुरस्तात् सदसः स्तुवते अनुश्लोकेन पश्चात् सदसः क्रौञ्चेन चात्वालमवेक्ष्यमाण इति । सन्ति तु प्राकृतानि सामानि इह चोदकेन प्राप्तानि । तत्र संशयः । किं प्राकृतानां साम्नां निवृत्तिः, उत अनिवृत्तिः, समुच्चयः ? इति । किं प्राप्तम् । स्तुवते इति प्रकृतिलिङ्गसंयोगे प्रत्यक्षश्रुते चोदकप्राप्तानि सामानि निवर्त्यन्ते इति । यथा, कौत्सं भवति, काण्वं भवति, वसिष्ठस्य जनित्रे भवतः, शुद्धाशुद्धीये भवतः, भर्गयशसी भवतः । क्रौञ्चानि भवन्तीति श्रुतेषु चोदकप्राप्तानि निवर्त्यन्ते, एवमिहापि द्रष्टव्यम्॥ एवं प्राप्ते ब्रूमः।सामसु श्लोकेन पुरस्तात् स्तुवते इत्येवमादि श्रूयमाणेषु प्राकृतानामविकारः प्रतीयेत।कुतः । अर्थान्तरश्रुतेः। अर्थान्तरेण हि सम्बन्धः

श्रूयते,पुरस्तात् सदसः स्तुवते इत्येवमादिषु। यच्च पदं केनचित्पदेन सम्बद्ध्यते विशेषणत्वेन, न तत् पदान्तरेण सहसम्बन्धमर्हति सकृदुच्चरितम्। यथा, भार्य्या राज्ञः, पुरुषो देवदत्तस्येति भार्य्याविशेषणत्वेनोच्चार्य्यमाणो राज्ञ इति शब्दो न पुनः पुरुषशब्देन सम्बद्ध्यत इति। एवं, पुरस्तात् सदसः स्तुवते इत्यनेन सम्बद्ध्यमानो न पुनः श्लोकेन स्तुवते इति सम्बन्धमर्हति॥

यदि स्तुतौ देशसत्ता विधीयते, श्लोकेन चेति अनूद्येत, तत उपपद्येत एकं वाक्यमिति। यदा तु पुनर्देशसत्ता विहिता तदा परिपूर्णं वाक्यं, श्लोकेन चेत्येतदपि विधातव्यम्, तदा पुनर्विधिप्रत्ययो हृदयमानेतव्यः। हृदयमानेतुमुच्चारयितव्यः। न चोच्चारितः। तस्मादनुच्चारितो वा कल्पयितव्यः, उच्चारणं वा कल्पयितव्यम्। कल्पनायाञ्च शब्दो बाध्येत। तस्मान्नैवम्। कथं तर्हि? देशसामविशिष्टा स्तुतिः श्रुत्या विधीयते। न चैकेन केनचित् सम्बन्धे विहिते, परिपूर्णे वाक्ये पुनरपरं वाक्यं कल्पयितव्यं भवति। उभयविशेषणविशिष्टा हि स्तुतिः श्रुत्या यदा विहिता तदा परिपूर्णं वाक्यम्। न तदा पुनरपरेण केनचित् सम्बन्धः कल्पयितव्यो भवति, यदर्थं किञ्चिद् द्विरुच्चार्य्येत। तस्मात् स्तुत्यन्तरमिदं विधीयते, न प्राकृतं निवर्त्त्यते, समुच्चय इति॥ १६॥

अर्थे त्वश्रूयमाणे शेषत्वात् प्राकृतस्य विकारः स्यात्॥ १७॥

अथ यदुपवर्णितं, यथा कौत्सं भवति, काण्वं भवति, वशिष्ठस्य जनित्रे भवत इत्येवमादिभिरिव प्राकृतानां निवृत्तिरिति। तत् परिहर्त्तव्यम्। अत्रोच्यते, युक्तमत्र यत् प्राकृतं निवर्त्त्यते। अत्र हि अर्थान्तरं न श्रूयते, प्राकृतस्यैव शेषः श्रूयते। तस्मात् तत्र वैकृतेन प्रत्यक्षश्रुतेन प्राकृतस्य निवृत्तिरिति। इह तु अर्थान्तरश्रवणाद् वाक्यभेदप्रसङ्गादनिवृत्तिरित्युक्तम्॥१७॥ युक्तिः॥ महाव्रते रथन्तरादिसाम्नां श्लोकादिसामभिः समुच्चयाधिकरणम्॥ ९॥ प्रथमवर्णकम्॥ १॥

एवं वा– क्वचिच्छ्रूयते, कौत्सं भवति, काण्वं भवति, वशिष्ठस्य जनित्रे भवतः, शुद्धाशुद्धीये भवतः, भर्गयशसी भवतः, क्रौञ्चानि भवन्तीति। सन्ति तु प्रकृतौ सामानि तत्र चोदकेन प्राप्ता-

नि । किं तानि निवर्त्यन्ते, न ? इत्येषोऽर्थः सन्दिह्यते । किं प्राप्तम् । अनिवृत्तिः, समुच्चय इति । कुतः । साममात्रं विधीयते, न स्तुवते इति प्रकृतिलिङ्गसंयोगोऽस्ति । तस्मादाधिकमिति ॥

एवं प्राप्ते ब्रूमः–

अर्थे त्वश्रूयमाणे शेषत्वात् प्राकृतस्य विकारः स्यात् ॥ १७ ॥

तुशब्दः पक्षं व्यावर्त्तयति, अश्रूयमाणेऽप्यर्थे प्राकृतस्य विकारः स्यात् । शेषभूतं हि प्रकृतौ साम । इदमपि साम श्रूयते । तत् सामत्वेन सामान्येन साम्नः कार्ये भवितुमर्हति । तद्यथा– दधि घृतं शाकं शालयः, देवदत्तो भोजयितव्यः, देवदत्तवद् यज्ञदत्तस्तैलेनेति । यद्यपि तैलेन स्नेहयितव्य इति न श्रूयते, तथापि स्नेहने एव तैलं भवति । तत्समर्थत्वात् । एवं यद्यपि साम्ना ऋक् संस्कर्त्तव्येति न श्रूयते, एवमपि तत्समर्थत्वात् साम ऋक्संस्कारे एव भवितुमर्हति ॥ १७ ॥ विकृतिविशेषे प्राकृतसाम्नां कौत्सादिभिर्बाधाधिकरणम् ॥ ९ ॥ द्वितीयवर्णकम् ॥ २ ॥

सर्वेषामविशेषात् ॥ १८ ॥

काचिच्छ्रूयते– कौत्सं भवति, काण्वं भवति, वशिष्ठस्य जनित्रे भवतः, शुद्धाशुद्धीये भवतः, भर्गयशसी भवतः, क्रौञ्चानि भवन्तीति । सन्ति तु प्राकृतानि सामानि । तत्र चोदकेन प्राप्तानि तानि प्राकृतानां निवर्त्तकानीत्येतत् समधिगतम् । अथैषोऽर्थः सन्दिह्यते । किं सर्वाणि सर्वेषां निवर्त्तकानि, अथ किमेकमेकस्य, द्वे द्वयोः, बहूनि बहूनामिति । किं तावत् प्राप्तम् । सर्वाणि सर्वेषामिति । कुतः । विशेषाभावात् । न हि विशेषः कश्चिदस्ति येनावगम्यते, इदमस्य निवर्त्तकं, नान्यस्येति । तस्मात् सर्वं सर्वस्य निवर्त्तकमिति ॥ १८ ॥ पूर्व० ॥

एकस्य वा श्रुतिसामर्थ्यात् प्रकृतेश्चाविकारात् ॥ १९ ॥

न चैतदस्ति, सर्वाणि सर्वेषां निवर्त्तकानीति । एकमेकस्य, द्वे द्वयोः, बहूनि बहूनामिति । कुतः । श्रुतिसामर्थ्यात् । कौत्सं भवति काण्वं भवतीति एकैकस्य निवृत्तिं कृत्वा श्रुतिः समर्था अर्थवतीति । एवं वशिष्ठस्य जनित्रे भवतः, शुद्धाशुद्धीये भवतो, भर्गयशसी भवत इति द्वयोर्निवृत्तौ कृतायां श्रुतिसामर्थ्यमनुगृहीतं भवति । तथा

क्रौञ्चानि भवन्तीति त्रिभिस्त्रीणि निवर्त्य कृतसामर्थ्या श्रुतिर्भवति । यद्येकस्मिन् श्रुते एकमेव निवर्त्यते, ततो यावत्येत्र असौ अङ्गीकृता प्राकृती सामसङ्ख्या तावत्येव भवति, एवं सर्वत्र । किमेवं भविष्यति ? । प्रकृतेरविकारः प्राकृतानामवशिष्टानां साम्नां ग्रहणं भविष्यति । तत्र चोदकोऽनुग्रहीष्यते । तस्मादेकम् एकस्य निवर्त्तकं, द्वे द्वयोः, बहूनि बहूनामिति ॥ १९ ॥ सिद्धान्तः ॥ कौत्सादिभिर्यथावस्थया एकादिबाधाधिकरणम् ॥ १० ॥

स्तोमविवृद्धौ त्वधिकं स्यादविवृद्धौ द्रव्यविकारः स्यादितरस्याश्रुतित्वाच्च ॥ २० ॥

सन्ति विवृद्धस्तोमका अविवृद्धस्तोमकाश्च क्रतवः । एकविंशेनातिरात्रेण प्रजाकामं याजयेत् त्रिणवेनौजस्कामं, त्रयस्त्रिंशेन प्रतिष्ठाकाममिति । तथा द्वात्रिंशाः पवमाना अभिषेचनीयस्य । तत्र नव राजसामानि, एकादश राजसामानि, बलौधश्रवसे वशिष्ठस्य जनिजनित्रे च साकम्प्रवेदनान्याहुः । शुद्धाशुद्धीये च संश्रवोपपदे चोभे। तथा रथहविर्धाने पुनःस्तोमस्य यज्ञस्य, तथा अपचितिवत्यः पुनःस्तोमस्य यज्ञस्य ॥

पुनःस्तोमस्य सवनं मध्यमं द्वादशं स्मृतम् ।
कार्य्यौ नवदशस्तोमावभितः सवने उभे, इति ॥

तदत्र क्वचित् प्राकृती स्तोत्रसङ्ख्या विवृद्धा, क्वचिद्धीना । तत्र सन्देहः । किं विकृतौ विवृद्धौ हानौ च प्राकृतानां साम्नां निवृत्तिः ? उत हानौ निवृत्तिः, विवृद्धावनिवृत्तिरिति । किं प्राप्तम् । उभयत्र निवृत्तिः । प्रत्यक्षश्रुतेन हि चोदकप्राप्तं निवर्त्यते । साम्नां चोत्पत्तिरर्थवती भविष्यति अपूर्वेषु क्रियमाणेष्विति ॥ एवं प्राप्ते ब्रूमः । स्तोमविवृद्धौ अनिवृत्तिराधिक्यं स्यात् । कुतः ॥ आगमेन हि साम्नां सङ्ख्यापूरणं वक्ष्यते । आगमेन वा स्यादभ्यासस्याश्रुतित्वाद् इति । एवं चोदकानुग्रहो भविष्यति । अविवृद्धौ तु प्राकृतं निवर्त्येत । यावता निवृत्तेन सा सङ्ख्या पूर्यते, तावत् प्राकृतं बाधितव्यम् । अन्यत् प्राकृतमेव स्यात् । कुतः । इतरस्य अश्रुतित्वात् । इतरं न श्रूयते, आगमः कर्त्तव्य इति । सङ्ख्यामात्रं श्रूयते । तस्मादविवृद्धस्तोमकेषु अनिवृत्तिः । हीनस्तोमकेषु यावदर्थं निवर्त्तयितव्यम् । अथ यदुक्तं,

साम्नामुत्पत्तिरर्थवती भविष्यतीति । उच्यते । बाध्यताम् आर्षं चोदकेन, गुणमात्रमविशिष्टार्षम् । गुणश्चोदक, इति ॥ २० ॥ विवृद्धाऽविवृद्धस्तोमकक्रतुषु यथाक्रमं प्राकृतसामबाधाधिकरणम् ॥ ११ ॥

पवमाने स्यातां तस्मिन्नावापोद्वापदर्शनात् ॥ २१ ॥

इह विवृद्धस्तोमका अविवृद्धस्तोमकाश्च क्रतव उदाहरणम् । त एव ये पूर्वस्मिन्नधिकरणे उदाहृताः । तत्रैषोऽर्थः समधिगतः । विवृद्धस्तोमकेष्वनिवृत्तिरविवृद्धस्तोमकेषु निवृत्तिरिति । अथेदानीमिदं सन्दिह्यते । किं यस्मिन् कस्मिँश्चिदावापौ यतः कुतश्चिदुद्वापः ? उत पवमानेष्वेवावापोद्वापाविति । किं प्राप्तम् । अविशेषादनियम इति ॥ एवं प्राप्ते ब्रूमः । पवमाने आवापोद्वापौ स्यातामिति । कुतः । अस्मिन्नेव हि तौ दृश्येते, त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहती अनुष्टुप् । अत्र ह्येवावपन्ति, अत एवोद्वपन्तीति ॥ २१ ॥

ननु दर्शनमिदं, प्राप्तिरुच्यताम् । उच्यते—

वचनानि त्वपूर्वत्वात् ॥ २२ ॥

असति न्याये वचनान्येव एतानि कल्प्यन्ते । तस्मात् पवमान एवापोद्वापस्थानमिति ॥ २२ ॥ पवमान एव विवृद्धाविवृद्धस्तोमकक्रतूनां सामावापोद्वापाधिकरणम् ॥ १२ ॥

विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना ॥ २३ ॥

तौ दर्शपूर्णमासौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति । तत्रेदमाम्नायते । यदाग्नेयोऽष्टाकपालो अमावास्यायां पौर्णमास्यां चाच्युतो भवतीति । सन्ति चाग्नेरभिधानानि, अग्निः शुचिः पावकः धूमकेतुः कृशानुर्वैश्वानरः शाण्डिल्य इत्येवमादीनि । तत्र सन्देहः । वाचिषु निगमेषु किं येन केनाचिदग्नेः शब्देनाभिधानं कर्त्तव्यम् ? उत विधिशब्देनाग्निशब्देनेति । किं प्राप्तम् ॥ येन केनचिदिति । कुतः । अग्न्यर्थनिर्देशात् । अग्न्यर्थेन पुरोडाशः संबद्धव्यः । अग्न्यर्था देवता कर्त्तव्या, त्यागकाले उद्देष्टव्या । सा येन शब्देन शक्यते उद्देष्टुं, तेनोद्देशनीया । सा एषां शब्दानामन्यतमेन शक्या उद्देष्टुम् । तस्माद् येन केनचिद् वाचिषु निगमेषूद्देशः कर्त्तव्य इति ॥ एवं प्राप्ते ब्रूमः । विधिशब्देनैव अग्निशब्देनोद्देष्टव्या, नान्येन

शुच्यादिना इति । कुतः । तेन चोदना, तेन विधिशब्देनास्य हविषः सम्बन्धश्चोदना भवति । कथमिव ? । आग्नेयः कर्त्तव्य इत्यग्निरस्य देवता कर्त्तव्येत्यर्थः ॥

का पुनरियं देवता नाम ? । एकं तावन्मतं, या एता इतिहासपुराणेष्वग्न्याद्याः सङ्कीर्त्यन्ते नाकसदस्ता देवता इति ॥ उच्यते । तासु देवतासु अहरादीनां शार्दूलादीनां वा न संग्रहः । स्मर्यते च कालवाचिनां देवतात्वं, कालेभ्यो भवति, मासो देवता संवत्सरो देवता इति ॥

अपरं मतं, येषु देवताशब्दो मन्त्रब्राह्मणे श्रूयते, अग्निर्देवता वातो देवता सूर्य्यो देवता चन्द्रमा देवता इत्येवमादिषु, तेऽत्र देवताशब्देनोच्यन्ते इति ॥ तत्राप्यहरादीनामनुपसंग्रह एव । किञ्च सामान्यवचनस्य शब्दस्य लौकिके व्यवहारे अभावादर्थस्याप्रसिद्धिः स्यात् । तस्मात् सूक्तभाजो हविर्भाजश्च देवताः । काः सूक्तभाजः ? । इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमा मनीषया । भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयन्तव (ऋ० १९।४म०) इति । हविर्भाजः, आग्नेयमष्टाकपालं निर्वपेत्, अग्नीषोमीयमेकादशकपालमिति । आह । यदि हविर्भाजो देवताः कपालानामपि देवतात्वं प्राप्नोति । तान्यपि हविर्भाञ्जि । एवं तर्हि सा हविर्भाग् देवता, यां प्रति तादर्थ्ये हविषः । सूक्तस्याप्येवमेव । अत्र हि देवताशब्दः स्मर्यते । अग्निदेवत्यं सूक्तम्, अग्निदेवत्यं हविरिति । तथा अतिथिदेवत्यं पितृदेवत्यमिति । एवं मूर्त्तानाममूर्त्तानां चेतनानामचेतनानां श्रुत्या कञ्चिदर्थं प्रति तादर्थ्येन सङ्कल्पनीयानां देवतात्वं भविष्यति । सामान्यवचनत्वं चोपपत्स्यते ॥ किमतः ? । यद्येवं, यस्या वाचकं शब्दमुद्दिश्य स्मृत्वा वा हविस्त्यक्ष्यामीति सङ्कल्पः क्रियते, सा देवता भवति तत्र ॥

नन्वेवं सति सुतरां येन केनचिदग्नेः शब्देन निर्देशः करणीयः । अत्रोच्यते । भवेदेतदेवं, यद्यग्निशब्दोऽर्थप्रत्यायनार्थमुच्चार्येत । अर्थोऽपि हविःसम्बन्धार्थं प्रत्याय्येत । न त्वत्राग्निशब्दोऽर्थप्रत्यायनार्थमुच्चार्य्यते । यत्र ह्यर्थे कार्यमासाद्यते, तत्र शब्दोऽर्थप्रत्यायनार्थो भवति, यत्रार्थे न प्रयोजनम् । यत्र पुनः शब्द एव कार्यं, तत्र कार्यसम्बन्धार्थः शब्द एव प्रत्यापयितव्यः देवतायाश्च यज्ञसाधनभावो न

रूपेण भवति । केन तर्हि । सम्बन्धिना शब्देन । यथा अध्वर्यु-र्हस्ताभ्यामुपकरोति, एवं देवता शब्देनोपकरोति । यथा होतुः पाणी द्विर्लेपेनोपस्तृणातीति पाणिसम्बन्धेऽपि होतैवोपकरोति, एवं सम्बन्धिना शब्देन उपकुर्वती देवता उपकारिणी गम्यते । देवतायामप्युपकारिण्यां चोदितायां शब्दस्यैव यज्ञ समवायः । तस्मान्न शब्दोऽर्थप्रत्यायनार्थमुच्चारितः । स चार्थः पुनः शब्दं प्रत्याययेदिति लक्षितलक्षणा हि तथा स्यात् । किं तर्हि । शब्द एव हविषा सम्बद्ध्यते । तत्सम्बन्धादर्थोऽपि देवता भविष्यति । यस्य हि शब्दो हविषा तादर्थ्येन सम्बद्ध्यते, सा देवता । शब्दे कार्यस्यासम्भवादर्थे कार्यं विज्ञायते । इह तु शब्द एव कार्यं सम्भवति । तस्मान्नार्थप्रत्ययनार्थः शब्द इति । तदुक्तं वृत्तिकारेण । न वा शब्दपूर्वको ह्यर्थसम्प्रत्ययस्तस्मादर्थनिष्पत्तिरिति । एवं चेदग्निशब्देन हविषः सम्बन्धो, नास्ति प्रसङ्गः शुच्यादीनां शब्दानामिति । तस्मान्मन्त्रत्वे विधिशब्द उपादातव्य इति ॥ उच्यते । नन्वेवं शब्द एव देवता प्राप्नोति। अत्रोच्यते । नैतदस्माभिः परिहर्त्तव्यम् । न हीदमुच्यमानमस्मत्पक्षं बाधते, सुतरां शुच्यादीनामप्रसङ्ग इति ॥ २३ ॥

शेषाणां चोदनैकत्वात्तस्मात्सर्वत्र श्रूयते ॥ २४ ॥

इतश्च विधिशब्देन वाचिषु वचनं कर्त्तव्यम् । कुतः । शेषाणां मन्त्राणामेकः शब्दः । य एवासौ विधिशब्दः, स एव सर्वत्र श्रूयते अपाट्कारे उज्जित्यां स्वाहाकारे च । अपाळग्नेः प्रिया धामानि अपाट् सोमस्य प्रिया धामानि अपाळिन्द्रस्य प्रिया धामानि इति अपाट्कारे । अग्नेरुज्जितिमनूज्जेषं सोमस्योज्जितिमनूज्जेषमित्युज्जित्याम् । स्वाहाऽग्निं स्वाहा सोममित्येवमादि स्वाहाकारे । एवञ्च नित्यवच्छ्रूयमाणा अपाक्षिका भविष्यन्ति, यथाऽस्माभिर्न्यायोऽपदिष्टः । तस्माद् विधिशब्दस्य मन्त्रत्वे भावः स्यादिति ॥ २४ ॥ युक्तिः ॥ यागादौ विधिशब्देनैव देवताभिधानाधिकरणम् ॥ १३ ॥

तथोत्तरस्यां ततौ तत्प्रकृतित्वात् ॥ २५ ॥

अस्ति चरुः, सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति । सन्ति सूर्यस्याभिधानानि । सूर्य आदित्यो भास्करः सविता दिवाकर इति तत्र किं वाचिषु निगमेषु येन केनचिच्छब्देनाभिधानं कर्त्तव्यम्, उत

विधिशब्देन सूर्यशब्देनेति। किं प्राप्तम्। अग्निशब्दसंयुक्तास्ते प्रकृतौ निगमा इह चोदकेन प्राप्ताः, न सूर्यशब्देनेति। सूर्यशब्दो हि चरौ, न ऊर्ज्जित्यादिषु। ते यथार्थं विपरिणमयितव्याः। सूर्यार्थश्च तेषु सङ्कीर्त्तयितव्यः। स च येन केनचित् सूर्यवाचिना शब्देन सङ्कीर्त्यते। तस्मादनियमः। ये च प्रकृतावग्निशब्दसंयुक्ता निगमास्ते इह उदाहरणं, न असंयुक्ताः॥ एवं प्राप्ते ब्रूमः। तथोत्तरस्यां ततौ तत्प्रकृतित्वादिति। यथा प्रकृतौ, तथा उत्तरस्यां ततौ विकृतौ कर्त्तव्याः। तत्प्रकृतित्वात् तेषाम्। चोदकानुग्रहाय प्रकृतौ च विधिशब्दाभिप्रायोऽग्निशब्दः प्रयुक्तो, नाग्न्यभिधानपरः। इहापि तत्प्रकृतित्वाद् विधिशब्दाभिप्रायेणैव निगमाः प्रयोक्तव्याः। न चायं चरुणा सूर्यशब्दस्य सम्बन्धः। किं तर्हि। प्रयोगेण। सौर्यं निर्वर्त्तयेदिति प्रयोगेण सम्बन्धो, न सौर्यश्चरुरिति। कारकविभक्तिर्हि द्वितीया। सा आख्यातेन सम्बद्ध्यते। तस्मात्तत्रापि सूर्यशब्देन संयुक्ताः कर्त्तव्या इति॥२५॥

अतिदेशस्थलेऽपि विधिशब्देनैव देवताऽभिधानाधिकरणम्॥ १४॥

प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात्॥ २६॥

अस्ति आधानं, य एवं विद्वानग्निमाधत्त इति। तत्र पवमानहवींषि श्रूयन्ते। अग्नये पवमानायाष्टाकपालं निर्वपेत्, अग्नये पावकायाग्नये शुचये इति। तत्र संशयः क्रियते। किं सगुणमग्नेरभिधानं कर्त्तव्यम्, उत निर्गुणमिति। किं प्राप्तम्। प्राकृतस्य निर्गुणस्य सगुणेनाभिधानं कर्त्तव्यमिति॥ २६॥ सि०॥

अविकारो वा अर्थशब्दानपायात् स्याद् द्रव्यवत्॥ २७॥

अविकारो वा स्याद्, निर्गुणमभिधानम्। कुतः। अर्थशब्दानपायात्। एवं शब्दोऽर्थश्चानपेतो भवति। य एव असौ अग्निः, स एव पवमानः, पावकः शुचिश्च। या देवता निर्देष्टव्या, सा निर्दिष्टैव भवति। असत्यपि गुणवचने, द्रव्यवत्। यथा, सा वा एषा सर्वदेवत्या यदजावशा, वायव्यामालभेत भूतिकाम इति। अजावशाशब्देन चोदिते कर्मणि छागाशब्देन वाचिषु निगमा भवन्ति। अर्थः शब्दोऽनपेत इति कृत्वा। एवमिहापि द्रष्टव्यम्। तस्मान्निर्गुणेन अभिधानं कर्त्तव्यमिति॥ २७॥ पूर्व०॥

तथारम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशास्त्रमनर्थकं स्यात् ॥ २८ ॥

अथ वा, चोदितेन, सगुणेनाभिधीयेत । कुतः । आरम्भासमवायात् । न हि आरम्भेण देवता कर्मणि समवैति, न स्वेन रूपेण देवतायाः कर्मणि साधनभाव इत्युक्तम् । यदि हि रूपेण समवेयात्, तथा सति अग्निशब्देन पवमानोऽपि प्रत्याय्यते इति गुणाभिधानं न क्रियेत । कथं तर्हि साधनभावः । श्रुतिसमवायित्वाद् देवतार्थस्य । देवताशब्दस्य च हविषश्च सम्बन्धः साक्षादुच्यते । यस्य शब्दस्य सम्बन्धः, स शब्दो वदितव्यः । एवमसौ सम्बन्धः कृतो भवति । यदि च गुणाभिधानं न क्रियते, गुणशासनमनर्थकं स्यात् । एवमर्थं हि तत्र शब्द उच्चार्यते, कथमसौ कर्मणि सम्बद्ध्येत इति । तत्र यदि गुणो न सम्बध्नीयात्, गुणवचनवैयर्थ्यं स्यात् । तस्मात् सगुणेनाभिधानं कर्त्तव्यमिति ॥ २८ ॥ उत्तरम् ॥

द्रव्येष्वारम्भगामित्वादर्थे विकारः सामर्थ्यात् ॥ २९ ॥

अथ यदुक्तं द्रव्यवदिति, सा वा एषा सर्वदेवत्या यदजावशा, वायव्यामालभेत भूतिकाम इति । अजावशाशब्देन चोदिते कर्मणि छागाशब्देन निगमा वाचिषु भवन्तीति यदुक्तं, तत् परिहर्त्तव्यम् । अत्रोच्यते । युक्तं द्रव्येष्वारम्भसमवायः । रूपेण समवायं गच्छति द्रव्यम् । तत्र छागाशब्देन या असौ आलब्धा यदि वशा यद्यवशा, तत्र साऽभिधीयत इति गम्यते । तस्मादर्थे साधने सति अविकारेऽप्यर्थे वचनसामर्थ्यमुपपद्यत इति विना गुणवचनेन, अभिधानं स्याच्चोदकानुग्रहाय । इह श्रुतिसमवायित्वादवश्यं चोदकप्राप्तस्य विकारः कर्त्तव्य इति ॥ २९ ॥ आधानेऽग्नेः सगुणेनाभिधानाधिकरणम् ॥ १५ ॥

बुधन्वान् पवमानवद्विशेषनिर्देशात् ॥ ३० ॥

अस्ति आधानं, य एवं विद्वानग्निमाधत्ते इति । तत्र पवमानेष्टयः । अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाऽग्नये शुचये इति । तत्राज्यभागौ प्रकृत्य श्रूयते, बुधन्वान् आग्नेयः कार्यः, पावकवान् सौम्य इति । तत्रायमर्थः सांशयिकः । किं स-

गुणमग्नेरभिधानं कर्त्तव्यम्,उत निर्गुणमिति॥ तत्रैवं तावत् परीक्ष्यते किं देवतानिर्देशोऽयं ? मन्त्रनिर्देशः ? इति । देवतानिर्देशे सति सगुणमभिधानं, मन्त्रनिर्देशे निर्गुणमिति। किं तावत् प्राप्तम् । सगुणमभिधानमिति । तत्रैतद्वर्ण्यते, देवतानिर्देश इति। कुतः । रूपत एव मन्त्राणां प्राप्तत्वाद् विधानमनर्थकं देवता पुनर्न प्राप्नोति । तस्या विधानमर्थवद् भवति।बुधन्वान् आग्नेयः कर्त्तव्य इति देवतया बुधन्वद्गुणयुक्ता भवति बुधन्वान् आग्नेयः । तस्मात् सगुणमभिधानम् । यथा पावमानेष्टिषु अग्निः पवमान इति । एवमत्रापि अग्निर्बुधन्वानिति विशेषनिर्देशोऽर्थवान् भविष्यति । तस्मात् सगुणमभिधानमिति ॥ ३० ॥ पूर्व० ॥

मन्त्रविशेषनिर्देशान्न देवताविकारः स्यात् ॥ ३१ ॥

न चैतदेवं, सगुणमभिधानमिति । निर्गुणं कर्त्तव्यम् । तत्रैतद् वर्णयन्ति, मन्त्रविशेषनिर्देशोऽयमिति ।कुतः । मन्त्रविशेषरूपोऽयं शब्दः।आग्नेयो यो विशिष्टाग्निविशिष्टः स बुधन्वान् कर्त्तव्यो, नाग्निः। अथाग्निर्बुधन्वान् क्रियते,तत्र बुधन्वानग्निर्देवता स्यात्।तत्राग्नेय इति सापेक्षे तद्धितनिर्देशो न स्यात् । न हि सविशेषणानां वृत्तिर्भवति । न खल्वपि वृत्तस्य विशेषणं प्रयुज्यते। तस्मान्नाग्नेर्विशेषणं बुधन्वत्ता। कस्तर्हि बुधन्वत्तया विशेष्यते । आग्नेयः । तस्य बुधो मन्त्रः, तेनाऽसौ बुधन्वान् भवति यागः।अग्निं स्तोमेन बोधय समिधानो अमर्त्यमिति । अथ वा मन्त्र एवाभिसम्बद्ध्यते, बुधन्वान् आग्नेय इति ॥

अथ यदुक्तं, रूपादेव मन्त्रः प्राप्नोति, न विधातव्य इति। उच्यते यः कश्चिदग्न्यभिधानो मन्त्रः प्राप्नोति । तन्निषेधार्थमिदमुच्यते । बुधन्वान् कर्त्तव्यः, अग्निं स्तोमेन बोधयेति । एवं चेद् न देवताविशेषणम् । तस्मान्निर्गुणमभिधानं देवतायाः कर्त्तव्यम् । एवं चोदकाऽनुग्रहो भविष्यति ॥ ३१ ॥ सिद्धान्तः ॥ आधानाज्ययोरग्नेर्निर्गुणनाऽभिधानाधिकरणम् ॥ १६ ॥

विधिनिगमभेदात् प्रकृतौ तत्प्रकृतित्वाद्विकृतावपि भेदः स्यात् ॥ ३२ ॥

अस्ति ज्योतिष्टोमः । तत्र श्रूयते, गौरनुबन्ध्योऽजोऽग्नीषोमीय इति। सन्ति तु गोरभिधानानि– उस्रा उस्रिया अही मही अदितिरिला

इति। तत्र संशयः। किं निगमेषु केनचिदेव शब्देन गोरभिधानं कर्त्तव्यम् ? अथ वा विधिशब्देन कर्त्तव्यमिति ॥ तथा पृषदाज्येन वनस्पतिं यजतीति । सन्ति वनस्पतेरभिधानानि, वृक्षः पादपो द्रुमो नग इति। तत्र संशयः। किं निगमेषु केनचिदेव शब्देन वनस्पतेरभिधानं कर्त्तव्यम् ? अथ वा विधिशब्देनेति। किं प्राप्तम्। केनचिदेवेति। कुतः। विधिनिगमभेदात् प्रकृतौ, विधिनिगमभेदः कृतः। यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति विधौ। मन्त्रे, छागस्य वपाया मेदसोऽनुब्रूहीति । इहापि चोदकेन यत् प्राकृतं, तत् प्राप्यते । विधिनिगमभेदश्च प्रकृतावस्ति । तस्मात् स प्राप्यते छागशब्दः । प्रकृतौ कृतः स न शक्यते गवि कर्त्तुम् । विधिनिगमभेदस्तु शक्यते। तस्मादु उस्रादीनामन्यतमेन वाचिषु वचनं कर्त्तव्यम् ॥ तथा, अग्निं स्विष्टकृतं यजतीति विधौ निगमेऽपि, प्रीहि देवमुशतो यविष्ठ विद्वन् ऋतूः ऋतुपते यजेह। ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्या यजिष्ठ इति । विधिनिगमभेदः प्रकृतौ कृतः। स्विष्टकृद्विकारश्च वनस्पतिरिति सङ्कर्षे वक्ष्यते । तस्मात् तत्रापि विधिनिगमभेदः कर्त्तव्यः। अतो येन केनचिद् वनस्पत्यभिधानेन निर्देशः कर्त्तव्यः। तत्प्रकृतित्वादिति ॥ ३२ ॥ पूर्व० ॥

यथोक्तं वा विप्रतिपत्तेर्न चोदना ॥ ३३ ॥

यथोक्तेन वा शब्देन वचनं कर्त्तव्यं, गोरुस्राशब्देन। स हि तत्राम्नातः। उस्रायै वपायै मेदसोऽनुब्रूहीति। आह। मन्त्राम्नानमेतद्, न वचनमस्ति। अनेन कर्त्तव्यमिति । वचनं पुनश्चोदको विधिभिन्नेन वक्तव्यमिति। नैतदेवम्। न विप्रतिपत्तिं चोदकः प्रापयति। न हि यत् प्रकृतावस्ति तद्विकृतौ कर्त्तव्यमिति केनचित् प्राप्यते । किन्तु यत् प्रकृतौ चिकीर्षितं शब्देनाभिहितं, न अर्थात् प्राप्तं, तत् चोदकः प्रापयति। न च प्रकृतौ विधिनिगमभेदो विवक्षितः। छागस्य वपायै मेदसोऽनुब्रूहीत्येतद्वक्तव्यमिति विधीयते । तत्रार्थाद् विधिनिगमभेदो जातः । छागशब्दविधानं श्रुत्या गम्यते । विधिनिगमभेदो लक्षणया। श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या, न लक्षणा। तस्मान्न येनकेनचिदभिधानम्।आम्नानसामर्थ्यादुस्राशब्देन। तथा पृषदाज्ये देवतायां यो विधिशब्द उक्तः, तेन वचनं कर्त्तव्यम् । विधिनिगम-

विप्रतिपत्तिर्न चोद्यते । तस्माद् वनस्पतिशब्देन निर्देशः कर्त्तव्य इति ॥३३॥ सिद्धान्तः ॥ गवानुबन्धनपृषदाज्यहोमयोर्विधिशब्दाभ्यामेव उस्रावनस्पतिशब्दाभ्यामभिधानाधिकरणम् ॥ १७ ॥

स्विष्टकृद्देवतान्यत्वे तच्छब्दत्वान्निवर्त्तेत ॥ ३४ ॥

अस्ति अवभृथः, वारुणेनैककपालेनावभृथं यन्तीति । तत्रेदमाम्नायते, अग्नीवरुणौ स्विष्टकृतौ यजतीति । तत्रायमर्थः सांशयिकः । किं निगमेऽस्विष्टकृच्छब्दकं वचनं कर्त्तव्यम् ? उत सस्विष्टकृच्छब्दकमिति । तत्रैवं तावत् परीक्ष्यते । किं सांविज्ञायिकः स्विष्टकृच्छब्दः ? उत स्विष्टं करोतीति एतेन गुणेन प्रवृत्त इति गौणो न रूढः ? इति । यदि रूढः, अस्विष्टकृच्छब्दकं वचनं कर्त्तव्यम् । अथ व्युत्पाद्यते, ततः सस्विष्टकृच्छब्दकम् । किं प्राप्तम् । सांविज्ञायिकः, न व्युत्पाद्यते इति । कुतः । न तावत् स्विष्टं कृतवान् । अथ च तस्मिन्नेव काले स्विष्टकृदित्युच्यते, स्विष्टकृतं यजतीति । न ह्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ भवतः । अग्निरेव स्विष्टकृच्छब्देनोच्यते । तयोर्यः स्विष्टं कृतवान् । यदा सांविज्ञायिकः, तदा अस्विष्टकृच्छब्दकं वचनं कर्त्तव्यम् । कुतः । अग्नेर्हि देवताया असौ वाचको, नाग्नीवरुणयोः । विकृतौ अग्नेर्देवताया अभावादग्नीवरुणाभ्यां निवर्त्तेत । तस्मादस्विष्टकृच्छब्दकं वचनं कर्त्तव्यमिति ॥ ३४ ॥ पूर्व० ॥

संयोगो वा अर्थापत्तेरभिधानस्य कर्मजत्वात् ॥ ३५ ॥

न चैतदस्ति, अस्विष्टकृच्छब्दकं वचनं कर्त्तव्यमिति । किं तर्हि सस्विष्टकृच्छब्दकं वचनं कर्त्तव्यम् ? इति । तत एतद् वर्ण्यते । गौणमिदमभिधानमिति । स्विष्टकरणात् स्विष्टकृद् इति गम्यते । गम्यमानं न न्याय्यम् अविवक्षितं कल्पयितुम् । क्रियानिमित्तत्वमवयवशब्देभ्यो गम्यते । समुदायस्य चाग्नौ अप्रयोगाल्लोकेऽन्यभिधानत्वं नाध्यवसीयते । तस्मान्न सांविज्ञायिकः । एवं चेत् सस्विष्टकृच्छब्दकं वचनं कर्त्तव्यम् । अर्थापत्तेः । अग्नेरर्थे अग्नीवरुणौ श्रूयेते । अग्नीवरुणौ स्विष्टकृतौ यजतीति । क्रियासंयोगित्वाच्च शक्नोति स्विष्टकृच्छब्दोऽग्निवरुणौ वक्तुम् । तस्मात् सस्विष्टकृच्छब्दकं वचनं कर्त्तव्यमिति । अथ यदुक्तं—स्विष्टंकृतवतिचैष शब्दो, न चाग्निः स्विष्टं कृतवानिति । अत्र ब्रूमः मत्पक्षे भूतकालता हीयेत,

त्वत्पक्षे सा च सोपपदश्च धात्वर्थः। अपि च ततः पूर्वान् यागानपेक्ष्य स्विष्टं कृतवानग्निः ॥ ३५ ॥ सिद्धान्तः ॥ अवभृथे अग्नीवरुणयोः सस्विष्टकृच्छब्देनाभिधानाधिकरणम् ॥ १८ ॥

सगुणस्य गुणलोपे निगमेषु यावदुक्तं स्यात् ॥ ३६ ॥

अस्ति सोमे पशुरग्नीषोमीयः। तत्र श्रूयते। अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपतीति। तत्र स्विष्टकृति गुणलोपः श्रूयते। अग्निं यजतीति। तदत्र संशयः। किं याग एव स्विष्टकृतो गुणलोपः,अवशिष्टेषु निगमेषु यथा प्रकृतिभाव? उत सर्वत्रैव गुणलोप इति। किं प्राप्तम्। स्विष्टकृतोऽग्नेः सगुणस्य गुणलोपे श्रूयमाणे ब्रूमः।यत्रैवोच्यते, गुणलोपस्तत्रैव स्यात्।यागे चोच्यते, अग्निं यजतीति। यागे गुणलोपे उच्यमाने यदि सर्वनिगमेषु गुणलोपोऽध्यवसीयेत, अश्रुतं कल्प्येत। यावांश्च श्रुतस्योत्सर्गे दोषः, तावान् अश्रुतकल्पनायाम्। तस्माद् याग एव लोपः स्याद्, न सर्वेषु निगमेष्विति ॥ ३६ ॥ पूर्व० ॥

सर्वस्य वैककर्म्यात् ॥ ३७ ॥

सर्वस्य वा निगमस्थस्यापि स्विष्टकृतोऽग्निशब्दस्य गुणो लुप्येत। कुतः। ऐककर्म्यात्। नैष स्विष्टकृद्यागे एव गुणो लुप्येत, किं तर्हि यागप्रयोगे। कथम्। अग्निं यजतीति प्रयोगवचन एष शब्दः, सर्वस्मिन् स्विष्टकृद्यागप्रयोगे लुप्येत, अन्येऽपि हि स्विष्टकृन्निगदाः स्विष्टकृद्याग एव। तस्मात् सर्वत्र लोप इति ॥ ३७ ॥ सिद्धान्तः ॥ अग्नीषोमीयपशौ सर्वत्रैव प्रयोगे निर्गुणेनाग्निशब्देनाग्नेरभिधानाऽधिकरणम् ॥ १९ ॥

स्विष्टकृदावापिकोऽनुयाजे स्यात् प्रयोजनवदङ्गानामर्थसंयोगात् ॥ ३८ ॥

स्तो दर्शपूर्णमासौ। तत्र स्विष्टकृत्। अनुयाजेष्वग्निं स्विष्टकृतं यजतीति। तत्र सन्देहः। किं स्विष्टकृद्यागोऽनुयाजेष्वारादुपकारकः, उत संस्कारक इति। किं प्राप्तम्। आरादुपकारक इति। कुतः। एतद्धि कर्मणां प्रसिद्धं कार्यं, यद् आरादुपक्रिया। तथा हि भूतस्य भव्यार्थता भविष्यति, श्रुत्या च विधानम्। इतरथा भव्यस्य भूतार्थता स्याद्, वाक्येन च विधानम्। तस्मादारादुपक्रियेति ॥ एवं

प्राप्ते ब्रूमः। स्विष्टकृदावापिकः स्याद्, न बाह्यः। किमिदम् आवापिक इति। आज्यभागस्विष्टकृतौ अन्तरा आवापः स्थानम्। तत्र भव आवापिकः। बहिरावापादनुयाजस्तान्त्रिकः। या तु स्विष्टकृद्देवता तत्र, सैवासौ प्रधानदेवता आवापिकी। तस्मादावापिक इत्युच्यते। यदा चैवं, तदा संस्कारकर्म स्यात्। तथा प्रयोजनवद् भवति, प्रयोजनवतोऽग्नेरुपकरोतीति। अपि च द्विविधानि अङ्गानि। आरादुपकारकाणि, सामवायिकानि च। आरादुपकारकेभ्यः सामवायिकानि गरीयांसि। तत्र हि साक्षाद्वाक्यम्। आरादुपकारकेषु प्रकृतेन परोक्षेणैकवाक्यता स्यात्। तस्मात् संस्कारकर्मेति ॥ ३८ ॥ अनुयाजेषु स्विष्टकृद्यागस्य संस्कारकर्मताधिकरणम् ॥ २० ॥

अन्वाहेति च शस्त्रवत् कर्म स्याचोदनान्तरात् ॥३९॥

दर्शपूर्णमासयोः श्रूयते, याज्यामन्वाह पुरोनुवाक्यामन्वाह इति। तत्र संशयः। किं याज्यापुरोऽनुवाक्यानुवचनं प्रधानकर्म? उत संस्कारकर्म? इति। किं प्राप्तम्?। अन्वाहेति प्रधानकर्म स्यात्। कुतः?। चोदनान्तरात्। यदि संस्कारकर्म ततोऽस्वरूपादेव तयोर्वचनं प्राप्नोति। पुनरन्वाहेति वचनमनर्थकम्। प्रधानकर्मत्वे तु वक्तव्यम्। न ह्यन्यथा तस्य कर्त्तव्यता गम्यत इति। अतः श्रुत्या कर्त्तव्यतावगमात् प्रधानकर्मेति। शस्त्रवत्। यथा स्तोत्रशस्त्रे स्तौति शंसतीति कर्त्तव्यतावगमात् प्रधानकर्मणी। एषमिहापि द्रष्टव्यम् ॥३९॥ पूर्व० ॥

संस्कारो वा चोदितस्य शब्दवचनार्थत्वात् ॥ ४० ॥

संस्कारकर्म वा स्यात्। कुतः। चोदितस्य अर्थस्य यः शब्दः, स तद्वचनार्थो भवति। स तस्य दृष्टोऽर्थः। तस्मिन् सति अदृष्टकल्पनायां हेतुर्नास्ति। तस्मात् संस्कारमेति। अवाच्यत्वान्नेति चेदिति यदुक्तं, तत् परिहर्त्तव्यम् ॥ ४० ॥ सि० ॥

स्याद्गुणार्थत्वात् ॥ ४१ ॥

स्याद् उपपद्येत अन्वाहेति वचनम्। कुतः। गुणार्थत्वात्। तिष्ठन् याज्यामन्वाह, आसीनः पुरोनुवाक्यामन्वाहेति स्थानासनगुणाऽर्थं पुनर्वचनमुपपद्यते। तस्मात् संस्कारकर्मणी याज्यापुरोऽनुवाक्ये इति ॥ ४१ ॥ आ० नि० ॥ दर्शपूर्णमासयोर्याज्यापुरोऽनुवाक्ययोः सं-

स्काराकर्मताधिकरणम् ॥ २१ ॥

मनोतायां तु वचनादविकारः स्यात् ॥ ४२ ॥

अस्ति वायव्यः पशुः, वायव्यं श्वेतमालभेत भूतिकाम इति। अस्ति तु प्रकृतावग्नीषोमीये पशौ मनोतामन्त्रः । त्वं ह्यग्ने प्रथमो मनोता अस्याधियो अभवोदस्महोता इति । स इह चोदकेन प्राप्यते। तत्र सन्देहः। किं यथादेवतमूहितव्यो मनोतामन्त्रः, अथ वा अविकारेण प्रयोक्तव्य इति। उच्यते। ननु प्रकृतावन्यायनिगदोऽयम्। अग्नीषोमौ हि प्रकृतौ देवता, अयमप्याग्नेयः । असमवेताभिधानाद् अविकारेण प्रयोक्तव्यः। अत्रोच्यते सत्यमग्नीषोमौ देवता प्रकृतौ, तौ तु अग्निश्च सोमश्च। तत्राग्निरदेवता, न त्वसमवेतः। अग्निप्रत्ययेन या अत्र देवता सा प्रतीयते । अयमिह वायुर्देवताकार्ये श्रूयते। स देवताकार्ये श्रूयमाणोऽग्निकार्यमपि करोति देवताप्रत्ययम्। तस्मात्तदर्थापत्तेस्तद्धर्मा स्यात् (१० । ३ । ३५ सू०)। तस्माद् यथादेवतं मनोतामन्त्रः प्रयोक्तव्य इति ॥ एवं प्राप्ते ब्रूमः। मनोतायां तु वचनादविकारः स्यादिति। वचनमिदं भवति । यद्यप्यन्यदेवत्यः पशुः। आग्नेय्येव मनोता कार्या इति । किमिव वचनं न कुर्य्यात्। नास्ति वचनस्यातिभारः। तस्मादविकारेण मनोतामन्त्रः प्रयोक्तव्य इति ॥ ॥ ४२ ॥ मनोतायामूहाभावाधिकरणम् ॥ २२ ॥

पृष्ठार्थेऽन्यद्रथन्तरात् तद्योनिपर्वत्वात् स्यादृचां प्रविभक्तत्वात् ॥ ४३ ॥

अस्ति वैश्यस्तोमः, वैश्यो वैश्यस्तोमेन यजेतेति । तत्र श्रूयते, कण्वरथन्तरं भवतीति । उभयविकारः कण्वरथन्तरमित्युक्तम् । अप्राकृते तद्विकाराद् विरोधाद् व्यवतिष्ठेरन्निति । तत्र संशयः। किं रथन्तरयोनौ बृहद्योनौ वा अनियमेन कण्वरथन्तरं गेयम् ? उत रथन्तरयोनौ, अथ वा स्वयोनौ ? इति । किं प्राप्तम्। चोदकेन अनियमः। लाघवं हि तथा भवति। ततः प्रयोगप्राशुभावः ॥ एवं प्राप्ते ब्रूमः। पृष्ठार्थे यदेतद् अन्यद् रथन्तरात् कण्वरथन्तरं श्रूयते, तद् रथन्तरयोनौ स्यात्। ज्योतिष्टोमपूर्वको हि वैश्यस्तोमः। ज्योतिष्टोमे रथन्तरयोनौ पृष्ठं कृतम् । ननु बृहद्योनावपि तत्र कृतम्। नैवम्। ऋचां प्रविभक्तत्वाद् ऋचां प्रविभाग इह गम्यते। यथा रथन्तरयोनि-

भवतीति । कुतः । कण्वरथन्तरे रथन्तरशब्दः श्रूयते । तेन गम्यते रथन्तरविशेषः कण्वरथन्तरमिति । अर्थान्तरे कण्वरथन्तरशब्दो भवेद्, यदि रथन्तरधर्मा न भवेयुः । तेषु सत्सु यूपवदुपपद्यते । यथा औदुम्बरो यूपो भवतीति । न हि औदुम्बरो यूपद्रव्यं प्रकृतौ संकीर्त्तितम् । धर्मनिमित्तस्त्वयं शब्द उपपद्यते । एवमिहापि धर्म्मनिमित्तः कण्वरथन्तरे रथन्तरशब्दो भवति, नान्यथेति ॥ ४३ ॥ पूर्व०

स्वयोनौ वा सर्वाख्यत्वात् ॥ ४४ ॥

न चैतदस्ति, रथन्तरयोनौ गीयेतेति । किन्तर्हि, स्वयोनौ । कुतः सर्वाख्यत्वात् । सर्वविशेषणविशिष्टस्य हि रथन्तरशब्दो वाचकः । प्रस्तोवोद्‌गीथप्रतिहारोपद्रवनिधनवतः सर्वस्य सस्तोभस्वरकालाऽभ्यासस्य कण्वरथन्तरमित्याख्या भवति । तस्माद् योनिरपि विशेषणम् । अपि च अर्थान्तरे कण्वरथन्तरे रथन्तरशब्दः कल्प्यः स्यात् । तस्मात् स्वयोनौ गेयमिति ॥ ४४ ॥ सि० ॥

यूपवदिति चेत् ॥ ४५ ॥

इति चेत् पश्यसि, स्वयोनौ गेयमिति रथन्तरशब्दः तेनोपपद्यते। स हि रथन्तरधर्मेषु सत्सु यूपवदुपपद्यते इति ॥ ४५ ॥ आ० ॥

न कर्मसंयोगात् ॥ ४६ ॥

नैतदेवम् । कर्मसंयोगात् काष्ठस्य यूपता । न हि लोके यूप इति संज्ञातः कश्चिद् वृक्षोऽस्ति । यत्र ते संस्काराः, स यूपः । तस्माद् औदुम्बरो यूपो भवतीति संस्कारनिमित्तः । इह पुनरेवंविशेषणविशिष्टः कण्वरथन्तरशब्दो लोक एवास्ति । नासौ कण्वानां रथन्तरं कण्वरथन्तरमित्येवं कृत्वा उच्यते । रथन्तरत्वे कण्वसम्बन्धे वा अस्य विधीयमाने वाक्यभेदः प्रसज्येत । तस्मात् सांविज्ञायिकः कण्वरथन्तरशब्दः । अत एव स्वयोनौ गीयते ॥ ४६ ॥ आ० नि० ॥ कण्वरथन्तरस्य स्वयोनौ गानाधिकरणम् ॥ २३ ॥

कार्यत्वादुत्तरयोर्यथाप्रकृति ॥ ४७ ॥

कण्वरथन्तर एव भवति संशयः । उत्तरयोर्गायन्तीति । किं रथन्तरयोन्युत्तरयोः, बृहद्योन्युत्तरयोर्वा गेयम् ? उत स्वयोन्युत्तरयोरिति । किं प्राप्तम् । बृहद्योन्युत्तरयोर्वा रथन्तरयोन्युत्तरयोर्वा इति । कुतः । चोदकानुग्रहात् । न तत्रैष दोषो भवति स्वयोनि-

विशिष्टं कण्वरथन्तरमिति। उत्तरयोर्हि यत्कार्यं, तत्र स्वयोनिरवश्यं ज्ञातव्या भवति। तस्मात् प्रकरणमपेक्षितव्यमिति ॥ ४७ ॥ पूर्व० ॥

समानदेवते वा तृचस्याविभागात् ॥ ४८ ॥

न चैतदस्ति, बृहद्योन्युत्तरयोः, रथन्तरयोन्युत्तरयोर्वा गेयमिति। किं तर्हि। स्वयोन्युत्तरयोः। कुतः। तृचशब्दात्। समानच्छन्दसि समानदेवताके च अविशेषितस्तृचशब्दो भवतीत्युक्तम्। अतः श्रुत्या चोदको बाध्यत इति स्वयोन्युत्तरयोर्गेयमिति ॥ ४८ ॥ सिद्धान्तः ॥ कण्वरथन्तरस्य स्वयोन्युत्तरयोर्गानाधिकरणम् ॥ २४ ॥

ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात् ॥ ४९ ॥

अस्ति अग्निष्टुदेकाहः। तत्र श्रूयते, आग्नेया ग्रहा भवन्तीति। तत्र सन्देहः। किं प्राकृतयोः स्तोत्रशस्त्रयोर्यथादेवतमूहः, उत अविकार इति। ऊहबुद्धिं व्यावर्त्तयितुमिदमभिधीयते। ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात, प्रधानकर्मत्वादिति। कस्य पुनरेषा बुद्धिः स्याद्, यं निवर्त्तयेत्?। यो मन्दधीर्मन्यते अभिधानं संस्स्यतीति। मन्दधियामपि चोपदेशः क्रियमाणः फलवान् भवति। अपि च कञ्चिदपेक्ष्य सर्वे मन्दधियः। अथ तु न परितोष एवं, ततोऽन्यथा वर्ण्यते। यत्तद् वृत्तमधिकरणं द्वितीयेऽध्याये। तस्येदं प्रयोजनसूत्रं, ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्याद् इति। यदि संस्कारकर्मणी स्तोत्रशस्त्रे किं भवति प्रयोजनम्?। अग्निष्टुदेकाहे यथादेवतमूहः। अथ प्रधानकर्मणी, ततो ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यादिति ॥ ४९ ॥ सि० ॥ अग्निष्टुति स्तुतशस्त्रयोरविकाराधिकरणम् ॥ २५ ॥

उभयपानात् पृषदाज्ये दध्नः स्यादुपलक्षणं निगमेषु पातव्यस्योपलक्षणात् ॥ ५० ॥

सन्ति चातुर्मास्यानि, चातुर्मास्यैः स्वर्गकामो यजेतेति। तत्रानुयाजान् प्रकृत्य समामनन्ति, पृषदाज्येनानुयाजान् यजतीति। अस्ति तु प्रकृतौ आवाहनं, देवान् आज्यपान् आवह इति। तदिह चोदकेन प्राप्तम्। तत्र संशयः। किमविकारेणावाहनं कर्त्तव्यम्? उत ऊहेनेति। यदा ऊहेन, तदा किम् आज्यपान् दधिपानिति कर्त्तव्यम्? उत

दधिपानिति ? अथ वा पृषदाज्यपानिति ?। किं प्राप्तम्। दध्नोऽपि उपलक्षणं स्याद् आज्यस्यापि। कस्मात्। उभयपानात्। उभयं हि तद् देवतामुद्दिश्य त्यज्यते। यच्च त्यज्यते, तत् पीयत इति मन्त्रेणोक्तम्। यच्च पातव्यं तदुपलक्षितं, प्रकृतौ आज्यपानिति। इह आज्यस्यार्थे दधिसर्पिषी श्रूयेते। अथ पृषदाज्यं गृह्णाति, द्वयं वा इदं सर्पिश्चैव दधि च, द्वन्द्वं वै मिथुनं प्रजननं, मिथुनमेवैतत् प्रजननं क्रियते इति। तुल्यं दधि आज्येन उच्चार्यते। तस्माद् उभयमप्युपलक्षयितव्यं दधि च आज्यं चेति ॥ ५० ॥ पूर्व० ॥ १ ॥

न वा परार्थत्वाद्यज्ञपतिवत् ॥ ५१ ॥

न वा एतदेवं, दधि उपलक्षयितव्यमिति। कुतः। परार्थत्वात्। परार्थं हि पातव्यं द्रव्यं, पातॄणामुपलक्षणम्। तत्राज्येन चेदुपलक्ष्यते, कृतोऽर्थ इति न पुनर्दध्ना उपलक्षयितव्यम्। यज्ञपतिवत्। यथा इमं यज्ञवान्ये च यज्ञपतिं वर्द्धानिति। यज्ञपतिर्मनुष्याणां होतॄणां प्रशंसार्थो, न स्वार्थं कीर्त्यत इति अविकारेण प्रयुज्यते। न सर्वान् यजमानान् प्रत्याहरः। एवमिहापि पातव्यं पातुर्लक्षणार्थं प्रयुज्यते न स्वार्थम्। तत्रैकेनापि येन केनचिल्लक्षिताः पातार इति कृत्वा न द्वितीयः प्रयोक्तव्य इति ॥ ५१ ॥ पूर्व० नि० ॥ १ ॥

स्याद्वा आवाहनस्य तादर्थ्यात् ॥ ५२ ॥

स्याद् दध्न उपलक्षणं, न यज्ञपतिवत्। यज्ञपतिशब्दो हि न स्वाऽर्थमुच्चार्य्यते, इडास्तुत्यर्थेन स उच्यते। आवाहनं पुनः स्मरणार्थम्। तत्र पातापि स्मर्त्तव्यः, पेयमपि। तस्माद्धोदकानुग्रहाय पेयान्तरमुपलक्षयितव्यमिति ॥ ५२ ॥ आ० ॥

न वा संस्कारशब्दत्वात् ॥ ५३ ॥

न वा दधि उपलक्षयितव्यम्। संस्कारशब्दोऽत्र विद्यते आज्यस्य, पृषदाज्येनानुयाजान् यजतीति। पृषदाज्येन चित्रेणेत्यर्थः। संस्कारेण हि मिश्रणे संस्कृतं चित्रमाज्यं भवति। तां च चित्रतामस्य प्रत्यक्षतो दधि उत्पादयति। तस्मात् परार्थं चित्रासञ्जननार्थं न पातव्यम्। अतो नोपलक्षयितव्यमिति ॥ ५३ ॥ आ० नि० ॥

स्याद्वा द्रव्याभिधानात् ॥ ५४ ॥

स्याद्वा दधि उपलक्षणम् । द्रव्यं हि दधि तुल्यमाज्येन प्रधानभूतमुपदिश्यते इत्युक्तमस्माभिः । अथ पृषदाज्यं गृह्णाति, द्वयं वा इदं सर्पिश्चैव दधि च, द्वन्द्वं वै मिथुनं प्रजननं, मिथुनमेवैतत् प्रजननं क्रियते इति । किं पृषदाज्यं गृह्यते ?, सर्पिश्चैव दधि चेति । सर्पिषा दध्ना च यागः कर्त्तव्य इत्यर्थः । पृषदाज्यमिति न द्रव्यान्तरमुच्यते । तस्माद् दधि उपलक्षयितव्यमिति ॥ ५४ ॥ आ० ॥

दध्नस्तु गुणभूतत्वादाज्यपा निगमाः स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वात् ॥ ५५ ॥

न चैतदस्ति, तुल्यं दधि आज्येन, प्रधानभूतमिति । ग्रहणे हि तत्तुल्यमाज्येन, न यागे । यागो हि आज्येन चित्रेण श्रूयते, तस्माच्छ्रुतेराज्यप्रधानत्वाद् यागं प्रतिगुणभूतं दधि स्यात् । न हि, ग्रहणे श्रूयमाणं यागे श्रुतं भवतीति । दधि ग्रहणे श्रूयमाणं न यागार्थं भवति । तत्र श्रुत्या आज्यं करणं, दधि वाक्येनेति । किमर्थं तर्हि तत्र दधिग्रहणम् । गृह्यमाणेन प्रत्यक्षलक्षित्रमाज्यं भवतीति । तस्माद्आज्यपा निगमाः स्युर्न दध्न उपलक्षणं कर्त्तव्यमिति ॥ ५५ ॥ सि० ॥

दधि वा स्यात् प्रधानमाज्ये प्रथमान्त्यसंयोगात् ॥ ५६ ॥

न चैतदस्ति, आज्यपा निगमा भवेयुरिति न दध्न उपलक्षणं कर्त्तव्यमिति । दधिपानित्येव कर्त्तव्यं, दधि एवात्र प्रधानम् । कुतः । आज्ये प्रथमान्त्यसंयोगात् । प्रथमसंयोग उपस्तरणम्, अन्त्यसंयोगोऽभिघारणम् । यदि च सत्रे यजेत द्विरुपस्तृणीयात् सकृदभिघारयेद् ओषधयो वै प्रियङ्गव ओषधिष्वेव पशून् प्रतिष्ठापयतीति । यदि प्रावृषि यजेत सकृदुपस्तृणीयाद् द्विरभिघारयेद् वृष्ट्यैव पशून् अभिजिघर्त्तीति, उपस्तरणमन्यत् तत्र निधापयितुं क्रियते । परार्थेन एष तत्र शब्दार्थो, न ग्रहणमात्रम् । ग्रहणेनान्यस्याधिकरणसंस्कारे उपस्तृणातीति शब्दो वर्त्तते । तथा, अभिघारयतीति न ग्रहणमात्रमभिघारणम् । अन्यस्याभिमुखेनाभिघारयतीति गम्यते । सोऽन्य आज्यसंयुक्तः कथं स्यादिति । तदुपस्तरणाभिघारणशब्दाभ्यां दधि प्रधानभूतं गम्यते । आज्यमपि तस्य गुणभूतम् । तस्माद्दध्न एवोपलक्षणं कर्त्तव्यं, न आज्यस्येति ॥ ५६ ॥ पूर्व० ॥ २ ॥

अपि वाज्यप्रधानत्वाद्गुणार्थे व्यपदेशे भक्त्या संस्कारशब्दः स्यात् ॥ ५७ ॥

अपि वा नैतदेवं- दधि प्रधानं तदुपलक्षयितव्यमिति । आज्यमेव प्रधानं, तद्धि प्रयोजनवत् । यागसम्बन्धात् । पृषदाज्येनानुजान् यजतीति । यत् तेनोपस्तीर्य्यते तत्रद्वयं निष्पद्यते। तच्चैवावत्तं भवति, दधि चोपस्तीर्णम् । तत्र शब्दादाधेयस्याधारसंस्कारोऽवगम्यते दधिसंस्कारः, न तु संस्कृतस्य प्रयोजनं दध्नः । प्रत्यक्षा तु चित्रता निर्वर्त्यमाना लक्ष्यते । तया च प्रयोजनम् । पृषद्धि तदाज्यं श्रूयते । न च यागे दधि करणं भवितुमर्हति वाक्यप्राप्तम्, आज्ये श्रुतिप्राप्ते प्रत्यर्थिनि । तस्मादुपस्तरणमाज्यग्रहणार्थमेव । ततो दधिग्रहणं भविष्यतीति अर्थादाधेयाधारसम्बन्धे उपस्तरणमिव तद् भवतीति भाक्त उपस्तृणातिः प्रयुक्तः । तथाभिघारयतिः । तस्मात् सकृद् द्विरित्येतस्य गुणस्यार्थे व्यपदेशे भक्त्या एष संस्कारशब्द उपस्तृणाति, अभिघारयति, ओषधिष्वेव पशून् प्रतिष्ठापयति, वृष्टयैव पशूनभिजिघर्त्तीति च । तस्माद् आज्यपा निगमा एव भवेयुरिति ॥ ॥ ५७ ॥ पूर्व० नि० ॥ २ ॥

अपि वाख्याविकारत्वात्तेन स्यादुपलक्षणम् ॥ ५८॥

अपि वा इति पक्षव्यावृत्तिः । न आज्यपा निगमा भवेयुः, पृषदाज्यपानिति वक्तव्यम् । कुतः । आख्याविकार एव भवति । दधिसर्पिषोरत्र संसर्गः क्रियते । तत्र यो गुण उपजायते तद्गुणयुक्तस्य संसृष्टस्य आख्याविशेषो भवति पृषदाज्यमिति । तथा रागः षाडवः सुरा इति । तत्र हि उपचरितमेकं शब्दमुपलक्षयामः । उपचाराच्च अभिधानाभिधेयसम्बन्धो गम्यते, तेन च यागनिवृत्तिः श्रूयते, पृषदाज्येनानुयाजान् यजतीति । तस्मादेवमुपलक्षयितव्यं, पृषदाज्यपानिति ॥ ५८ ॥ पूर्व० ॥ ३ ॥

न वा स्याद् गुणशास्त्रत्वात् ॥ ५९ ॥

नैतदेवं स्यात्, संसृष्टस्य रागवत् पृषदाज्यशब्दो वाचक उपचारादिति । सत्यमुपचरितोऽयं तत्र । स तूपचारो लोकादेवावगतः । स गुण आज्ये भवतीति गम्यते । कुतः । आज्यशब्दः सर्पिषो वाचकः । पृषच्छब्दश्चित्रस्य । तद्यथा पृषद्रज्जुः पृषन्मणिः पृषन्मृग

इति । तयोरुच्चरितयोश्चित्राज्याभिधानं गम्यते । तस्मात् तत्रैव स उपचार उपपन्नः । अतश्चाज्यस्यैवोपलक्षणं चित्रमचित्रं वा आज्यम् आज्यशब्देनाभिधीयत एवेति ॥ ५९ ॥ पूर्व० नि० ॥ ३ ॥ चातुर्मास्येषु आज्यशब्दस्याविकारेणावाहनाधिकरणम् ॥ २६ ॥

इति श्रीभट्टशबरस्वामिविरचिते मीमांसाभाष्ये दशमस्य अध्यायस्य चतुर्थः पादः ॥ १० ॥ ४ ॥

अथ दशमाध्याये पञ्चमः पादः ॥ १० ॥ ५ ॥

आनुपूर्व्यवतामेकदेशग्रहणेष्वागमवदन्त्यलोपः स्यात् ॥ १ ॥

द्यावापृथिवीयमेककपालम्, आश्विनं द्विकपालं, वैष्णवं त्रिकपालमित्यादि एकदेशवचनम् । समस्तवचनमपि भवति । आग्नेयमष्टाकपालं निर्वपेदिति । तथा द्विरात्रेण यजेत, त्रिरात्रेण यजेत, चतूरात्रेण यजेत, पञ्चरात्रेण यजेत, षड्रात्रेण यजेत, सप्तरात्रेण यजेत अष्टरात्रेण यजेत, नवरात्रेण यजेत, दशरात्रेण यजेत, एकादशरात्रेण यजेतेत्येकदेशग्रहणम् । समस्तग्रहणमपि भवति, द्वादशाहेन प्रजाकामं याजयेत् । तथा, एकां सामिधेनीमन्वाह तिस्रः सामिधेनीरन्वाह इति एकदेशग्रहणम् । समस्तग्रहणमपि भवति, पञ्चदश सामिधेनीरन्वाह इति । तदत्र संशयः । किं सर्वेष्वेव आद्योपादानम् ? अन्त्यलोपश्च, उत विकल्प इति । किं प्राप्तम् । आनुपूर्व्यवतां क्रमवतामेकदेशग्रहणे ब्रूमः । अन्त्यलोप आद्योपादानञ्चेति । किं कारणम् । मुख्यमाद्यं, जघन्यमन्त्यम् । मुख्यजघन्ययोरन्यतरस्मिन् लोप्तव्ये जघन्यो लुप्येत । मुख्यो हि अनुग्रहीतव्यः । तदुक्तं, मुख्यं वाऽपूर्वचोदनाल्लोकवद् इति । आगमवत् । यथा, समाजेषु समासेषु च ये आगन्तवो भवन्ति । ते पूर्वोपविष्टाननुपमृद्यैव निविशन्ते, एवमिहापि द्रष्टव्यम् ॥ १ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ २ ॥

इतश्च आद्योपादानमन्त्यलोपश्चेति । कुतः । लिङ्गमप्येवं भवति । लुप्येत वा एतत् षष्ठमहो यत् पञ्चाहानुपयन्ति, लुप्येत वा एतत् षष्ठं कपालं यत् पञ्चकपालं निर्वपन्तीति षष्ठस्य लोपं दर्शयति, न प्रथमस्य ॥ २ ॥ युक्तिः ॥

विकल्पो वा समत्वात् ॥ ३ ॥

नैतदस्ति, आद्योपादानमिति, किन्तर्हि विकल्पः । आद्यमन्त्यं वा उपादातव्यमिति । कुतः । समत्वात् । समो हि अन्त्यलोप आद्य-लोपेन । न हि आदिलोपे श्रुतिः, नो खल्वपि अन्त्यलोपे । मुख्ये जघन्ये वा उपादीयमाने प्राकृतमुपात्तं भवति । न हि विशेषश्रुतिरस्ति, मुख्यमुपादातव्यमिति । तस्मादनियम इति ॥ ३ ॥ पूर्व० ॥

क्रमादुपजनोऽन्ते स्यात् ॥ ४ ॥

अथ यदुक्तं, समाजेषु समासेषु चागन्तुर्जनो यथा वास्तव्यान् अनुपमृद्यैव निविशते एवमिहापीति । युक्तं, यद्वास्तव्यैराक्रान्ते देशे आगन्तुर्जनोऽसंभवादन्ते निविशते । इह तु अनाक्रान्ते चिन्त्यते, के प्र-थममाक्रमेयुरिति । तेनात्र न केषाञ्चित् क्रमो विरुद्ध इति ॥४॥ आ० नि०

लिङ्गमविशिष्टं सङ्ख्याया हि तद् वचनम् ॥ ५ ॥

अथ यल्लिङ्गमुक्तं, लुप्येत वा एतत् षष्ठमहः—इति षष्ठस्य लोपं दर्शयति, नाद्यस्येति । तद् अविशिष्टं विकल्पेऽपि । सङ्ख्याया हि षष्ठ-मिति पूरणवचनं भवति, यस्मिन् कस्मिँश्चिदपगते येन प्रथमेन मध्येन अन्त्येन वा सङ्ख्या पूर्य्यते, तत् षष्ठम् । यथा षष्ठो भ्रातॄणां न दृश्य-ते इति, कनीयसि ज्येष्ठे मध्ये वा अदृश्यमाने भवति । एवमिहापि द्रष्टव्यम् ॥ ५ ॥ आ० नि० ॥

आदितो वा प्रवृत्तिः स्यादारम्भस्य तदादित्वाद् वचनादन्त्यविधिः स्यात् ॥ ६ ॥

वाशब्दः पक्षं व्यावर्त्तयति, आदितः प्रवृत्तिर्भवितुमर्हति । कुतः । आरम्भस्य तदादित्वात् । आरम्भो हि तेषाम् आनुपूर्व्यवताम् आदितो न्याय्यः । पूर्वेण हि उपक्रान्तो द्वितीयादिः कर्त्तव्यः । स इह प्रथममेव क्रियमाणोऽनुपक्रान्तः केनचित् क्रियेत । पूर्वो हि पदार्थः क्रियमाण उत्तरं पदार्थमभिनियच्छति । यः पुनराद्यः पदार्थः सोऽनुप-क्रान्त एवान्येन कर्त्तव्यः । तस्मिन्नेव प्रथममुपादीयमाने नानुपक्रम-दोषो भविष्यति । तस्मात् सर्वत्रैवं, ये क्रमवन्तः आरब्धव्याः, ते प्रथमादुपक्रमितव्या इति ॥ अपि च, प्रथमस्य निमित्तमुपसम्प्रा-प्तम् । न च विरोधोऽस्ति तदादिषु कृतेषु । अन्त्यानां निमित्तेऽपि

प्राप्ते, परिपूर्णत्वात् पदार्थानां, लोपो न विरुद्धः । तस्मादाद्योपादानमन्त्यलोपश्चेति । अथैवं न्यायेन प्राप्ते, यत्र वचनं भवति, तत्राऽपनीय मध्यममपि, विधिर्भवति । यथा, अपबर्हिषः प्रयाजान् यजति । अपबर्हिषावनुयाजौ यजतीति । विना वचनेन, अन्त्यलोप एव न्याय्य इति ॥ ६ ॥ पूर्व० नि० ॥ एकदेशग्रहणे प्राथमिकानामेव ग्रहणाऽधिकरणम् ॥ १ ॥

एकत्रिके तृचादिषु माध्यन्दिने छन्दसां श्रुतिभूतत्वात् ॥ ७ ॥

अस्ति एकत्रिकः क्रतुः, अथैष एकत्रिकः । तस्यैकस्यां बहिष्पवमानं, तिसृषु होतुराज्यम् । एकस्यां मैत्रावरुणस्य, तिसृषु ब्राह्मणाच्छंसिनः । एकस्यामच्छावाकस्य, तिसृषु माध्यन्दिनः पवमान इति । तदत्र माध्यन्दिने पवमाने संशयः । किं तृचाद्यासु गानं कर्त्तव्यम्, उत आद्ये तृचे ? इति । किं प्राप्तम् । एकत्रिके क्रतौ माध्यन्दिने पवमाने तृचाद्यासु स्तोत्रियासु गानं स्यात् । कुतः । छन्दसां श्रुतिभूतत्वात्, श्रुतिभूतानि हि त्रीणि छन्दांसि प्रकृतौ, त्रिच्छन्दा आवापः, माध्यन्दिनः पवमानः पञ्चसामेति । तानि इह चोदकेनैव प्राप्तानि । तानि एवमुपसंहर्त्तुं शक्यन्ते । यदि तृचाद्यासु गानम् । तस्मात् तृचाद्यासु इति ॥ ७ ॥ पूर्व० ॥

आदितो वा तन्न्यायत्वादितरस्यानुमानिकत्वात् ॥ ८ ॥

वाशब्दः पक्षं व्यावर्त्तयति । आद्ये तृचे गानं कर्त्तव्यम् । एष हि न्यायः, क्रम एवमनुगृहीतो भवति । इतरस्य छन्दोऽनुग्रहस्य प्राकृतत्वादिह आनुमानिकत्वं भवति ॥ आह । ननु क्रमोऽपि प्राकृतत्वादानुमानिकः । उच्यते । उभयोरानुमानिकयोः क्रमानुग्रहो ज्यायान् भवति । कथम् । तत्र हि प्रथमे गायत्रे छन्दसि अभिनिर्वृत्ते द्वितीया स्तोत्रीया प्रारब्धा, प्रथमारम्भेण हि पदार्थः क्रियमाण उत्तरं पदार्थमभिनियच्छति । अप्रवृत्ते कस्मिँश्चित् पदार्थे सर्वं वैकल्पिकं प्राप्नोति, न प्रवृत्ते । प्रवृत्ते हि ततोऽन्यदशक्तत्वादप्राप्तम् । प्रारब्धस्य च क्रिया प्राप्ता । तस्यामवस्थायामुभयप्राप्त्यभावादविकल्पः । अत्र किं तदेव प्रारब्धं परिसमाप्यताम्, अथान्यदु अप्राप्तमारभ्यतामिति । तत् परिसमापयञ्छ्रुतं करोति, परित्यजञ्छ्रुतं

जहातीति प्रारब्धं परिसमापनीयं गम्यते । अथेदानीं तस्मिन्निर्वृत्ते वैकल्पिकं कृतार्थत्वाद् अप्राप्तम् । तस्मात् क्रमानुग्रहो न्याय्यो न छन्दोऽनुग्रह इति ॥ तत्राह । ननु गायत्रेण छन्दसा पूर्वं क्रियमाणेन उत्तरकालं त्रैष्टुभमप्युपक्रान्तं भवति । उच्यते । सत्यमुपक्रान्तं भवति, न तु द्वितीयां तृतीयामकृत्वा । अथ तयोः पूर्णे तृचे नैव छन्दसां प्रयोजनम् । तस्मात् प्रत्यक्षत्वात् पूर्वया स्तोत्रीयया उत्तरयोः स्तोत्रीययोः क्रमस्य, क्रमानुग्रहो ज्यायान्न छन्दोऽनुग्रह इति ॥८॥सि०

यथानिवेशश्च प्रकृतिवत् सङ्ख्यामात्रविकारत्वात्॥९॥

इतश्चाद्ये तृचे गेयमिति । कुतः । यथानिवेशं प्रकृतिवत्, शब्देन प्राप्तासु स्तोत्रीयासु तिसृषु माध्यन्दिन इति सङ्ख्यामात्रस्य प्रत्याम्नायो न क्रमस्य । आह । ननु यथा क्रमस्य न प्रत्याम्नायः, एवं छन्दसामपि । उच्यते । सत्यमेवमेतत् । मुख्यस्तु क्रमानुग्रहः, जघन्यश्छन्दसाम् । तस्मादपि आद्ये तृचे गातव्यमिति ॥ ९ ॥ युक्तिः ॥ एकत्रिके आद्ये तृचे गानाधिकरणम् ॥ २ ॥

त्रिकस्तृचे धुर्ये स्यात् ॥ १० ॥

अस्ति एकत्रिकः क्रतुः, अथैष एकत्रिकः । तस्य एकस्यां बहिष्पवमानं, तिसृषु होतुराज्यम् । एकस्यां मैत्रावरुणस्य, तिसृषु ब्राह्मणाच्छंसिनः । एकस्यामच्छावाकस्य तिसृषु माध्यन्दिनः पवमान इति । सन्ति तु धुरि सामानि । तेषु संशयः । किं, तृचे गेयानि, उतैकस्याम् ऋचि ? इति । किं प्राप्तम् । त्रिकः स्तोमस्तृचे स्याद् धुरि सामसु । एवं तृचप्रापकश्चोदकोऽनुग्रहीष्यते । तस्मात् तृचे गेयमिति ॥१०॥पूर्व०

एकस्यां वा स्तोमस्यावृत्तिधर्मत्वात् ॥ ११ ॥

एकस्यां वा ऋचि गेयं, स्तोमस्य हि तत्रावृत्तिधर्मता भवति । वचनप्रामाण्यात् । इदं भवति वचनम्—आवृत्तं धूर्षु स्तुवते, पुनरावृत्तं पृष्ठैरुपतिष्ठते इति । किमिव वचनं न कुर्य्यात् । तस्माद् धुरि सामसु एकस्यामृचि गेयमिति ॥ ११ ॥ सिद्धान्तः ॥ एकस्याम् ऋचि धूर्गानाधिकरणम् ॥ ३ ॥

चोदनासु त्वपूर्वत्वाल्लिङ्गेन धर्मनियमः स्यात् ॥ १२ ॥

सन्ति द्विरात्रादयोऽहर्गणाः, द्विरात्रेण यजेतेत्येवमादयः । तेषु किं कृत्स्नस्य द्वादशाहस्य विध्यन्तः प्रवर्त्तते, उत प्रायणीयोदयनीयौ

वर्जयित्वा दशरात्रस्य ? इति । किं प्राप्तम् । अविशेषात् कृत्स्नस्येति॥ एवं प्राप्ते ब्रूमः । चोदनासु तासु प्रायणीयोदयनीययोः पूर्वत्वेनासम्भवाद् दशरात्रस्य विध्यन्तः प्रवर्त्तते । केन हेतुना । लिङ्गेन विध्यन्तो नियम्येत । किं लिङ्गं भवति । एवमाह– यत् प्रथमं तद् द्वितीयं, यद् द्वितीयं तत् तृतीयं जगतीमन्तर्गच्छनीति । एवं ज्ञापयति, यत् प्रथमं द्विरात्रस्य, तद् द्वितीयं द्वादशाहस्य गायत्रम् । यद् द्वितीयं द्विरात्रस्य, तत् तृतीयं त्रैष्टुभं जगतीमन्तर्गच्छतीति षडहतृतीयं जागतम् अहः अन्तरीयमाणं दर्शयन् दशरात्रस्य प्रवृत्तिं दर्शयति । यत् प्रथममिति द्विरात्रस्य वादः, प्रकरणात् । तत् तृतीयमिति द्वादशाहस्य, द्विरात्रे तृतीयाभावात् । अपि चेदमपरं लिङ्गं, गायत्रं प्रथममहस्त्रैष्टुभं द्वितीयं जगतीमन्तर्गच्छतीति, अन्तराये षडहतृतीयं जागतं दर्शयति । तस्माद्दशरात्रस्य प्रवृत्तिः ॥ १२ ॥ सि० ॥

प्राप्तिस्तु रात्रिशब्दसम्बन्धात् ॥ १३ ॥

द्विरात्रेण यजेतेति रात्रशब्दः । इहापि दशरात्र इति स एव । तदेतस्मात् प्रकृतिलिङ्गाद्दशरात्रस्य विध्यन्त इति प्राप्ते लिङ्गदर्शनम् ॥१३॥ उपसंहारः ॥ द्विरात्रादिषु दशरात्रस्य विध्यन्तानुष्ठानाधिकरणम् ॥४॥

अपूर्वासु तु सङ्ख्यासु विकल्पः स्यात् सर्वासामर्थवत्त्वात् ॥ १४ ॥

अग्नौ तु आधूननार्था मन्त्राः, वेशीनां त्वापत्मन्नाधूनोमीत्येवमादयः । तान् प्रकृत्य श्रूयते, सप्तभिराधूनोतीति । तथा अग्नौ वपनार्था मन्त्राः, या ओषधीरित्येवमादयः । तानपि प्रकृत्य श्रूयते, चतुर्दशभिर्वपतीति । तत्र संशयः । किमाद्योपादानम्?उत अनियम इति । किं प्राप्तम् । आद्योपादानम् । आदितो वा तन्न्यायत्वाद् इति ॥ एवं प्राप्ते ब्रूमः । अपूर्वासु तु सङ्ख्यासु अप्रकृतिपूर्विकासु श्रूयमाणासु ब्रूमः । विकल्पः स्यात् । एवं सर्वासां सङ्ख्यानामर्थवत्त्वं भविष्यति । आद्योपादाने हि केषाञ्चिन्मन्त्राणामुत्पत्तिरनर्थिकैव स्यात् । गम्यते च ताभिर्वपनम् । प्रकरणात् । या हि प्रकृतिपूर्विका भवन्ति, तासां प्राकृतप्रयोगेणार्थवत्ता । आनर्थक्येन च कारणेन मुख्यातिक्रमः सङ्ख्यायाः ॥ १४॥ सप्तभिराधुनोतीत्यनेनाग्नौ धूननाद्यर्थानां मन्त्राणामनियमेनोपादानाधिकरणम् ॥ ५ ॥

स्तोमविवृद्धौ प्राकृतानामभ्यासेन सङ्ख्यापूरणमविकारात् सङ्ख्यायां गुणशब्दत्वादन्यस्य चाश्रुतित्वात् ॥ १५ ॥

इह विवृद्धस्तोमकाः क्रतव उदाहरणम् । एकविंशेनातिरात्रेण प्रजाकामं याजयेत्, त्रिणवेनौजस्कामं, त्रयस्त्रिंशेन प्रतिष्ठाकाममिति। तत्रायं संशयः । किं प्राकृतानां साम्नामभ्यासेन सङ्ख्या पूरयितव्या ? उत अप्राकृतानामागमेनेति । किं प्राप्तम् । अनियमः । अविशेषादिति प्राप्ते ब्रूमः । स्तोमविवृद्धौ अभ्यासेन सङ्ख्या पूर्यते । एवं हि प्रकृतग्रहणम् । इतरथा अप्रकृतक्रियेति । सङ्ख्या हि प्राकृतानां प्रधानभूतानां साम्नां गुणभावेनोच्यते, न प्राधान्येन । न चान्यत् सामद्रव्यं श्रुत्या विधीयते । यावांश्च श्रुतस्यार्थस्योत्सर्गे दोषस्तावान् अश्रुतकल्पनायाम् । तस्मादभ्यसितव्यानि प्राकृतानि सामानि। यथा धुरि सामानीति ॥ १५ ॥

आगमेन वाऽभ्यासस्याश्रुतित्वात् ॥ १६ ॥

वाशब्दः पक्षं व्यावर्त्तयति । अप्राकृतानां साम्नामागमेन सङ्ख्या पूरयितव्या इति । कुतः । अभ्यासो न हि श्रूयते, एतावच्छ्रूयते, एकविंशेनातिरात्रेण प्रजाकामं याजयेदिति । यावांश्च श्रुतस्योत्सर्गे दोषः । तावानश्रुतकल्पनायाम् ॥ ननु आगमोऽपि न श्रूयते । उच्यते। उभयस्मिन्नश्रूयमाणे आगमो न्याय्यः । एवमागमपूरिता सङ्ख्या समञ्जसा भविष्यति । इतरथा अभ्यासपूरिता असमञ्जसा स्यात् । तस्मादागमेन पूरयितव्येति ॥ १६ ॥ सि० ॥

सङ्ख्यायाश्च पृथक्त्वनिवेशात् ॥ १७ ॥

इतश्चागमेनेति । कुतः । पृथक्त्वनिवेशिनी हि सङ्ख्या । यथा अष्टौ घटा इति । अभ्यासेनापृथक् स्यात् । तस्मादागमेन पूरयितव्या इति ॥ १७ ॥

पराक्शब्दत्वात् ॥ १८ ॥

इतश्चागमेनेति । कुतः । पराक्शब्दो हि भवति । पराग् बहिष्पवमानेन स्तुवन्तीति । स च अनभ्यासस्य वाचकः । यथा पराचीः सामिधेनीरन्वाह इति, अनभ्यस्ता इति गम्यते। तस्मादप्यागमः॥१८॥

उक्ताविकाराच्च ॥ १९ ॥

इतश्चागमः । एवमुक्तस्याविकारो भवति । किमिदम् अविकार इति ? । अपुनर्वचनम् । तत्र जामितादोषो न भविष्यति । अभ्यासे हि स स्यात् । जामि वा एतद्यज्ञस्य क्रियते यदेकं भूयः क्रियेतेति ॥ १९ ॥ युक्तिः ॥

अश्रुतित्वान्नेति चेत् ॥ २० ॥

इति चेत्, इति पुनर्यदुक्तम् आगमोऽपि नैव श्रूयते इति । तत् परिहर्त्तव्यम् ॥ २० ॥ आ० ॥

स्यादर्थचोदितानां परिमाणशास्त्रम् ॥ २१ ॥

अर्थेन सामानि चोद्यन्ते । कतमेनार्थेन । एकविंशेनातिरात्रेण प्रजाकामं याजयेदित्येवमादीनां वाक्यानामर्थेनेति । न हि अनागम्यमानेषु सामसु एताः सङ्ख्याः सामञ्जस्येन सम्भवन्ति । तस्माद् अर्थचोदितानामिदं परिमाणशासनं कृतार्थः शब्द एकविंशेनातिरात्रेण प्रजाकामं याजयेदिति अर्थप्राप्तमागमं न शक्नोति वारयितुम् । तस्मादागमेन पूरणमिति ॥ २१ ॥ आ० नि० ॥

आवापवचनं चाभ्यासे नोपपद्यते ॥ २२ ॥

इतश्चागम इति पश्यामः । आवापवचनं हि भवति । त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहती अनुष्टुप् । अत्र हि एवावपन्ति, अत एवोद्वपन्तीति । एतदभ्यासे नावकल्पते । तस्मादप्यागम इति ॥ २२ ॥

साम्नां चोत्पत्तिसामर्थ्यात् ॥ २३ ॥

इतश्चागमः । कुतः । साम्नां हि एवमुत्पत्तिरर्थवती भवति—

दश सामसहस्राणि शतानि च चतुर्दश ।
साङ्गानि सरहस्यानि यानि गायन्ति सामगाः ॥
अशीतिशतमाग्नेयं पवमानं चतुःशतम् ।
ऐन्द्रं स्यात् सप्तविंशानि यानि गायन्ति सामगाः, इति ॥ इतरथा एषां साम्नामुत्पत्तिरनर्थिका स्यात् । तस्मादप्यागम इति ॥२३॥ युक्तिः ॥

धूर्येष्वपीति चेत् ॥ २४ ॥

अथ यदुपवर्णितं, यथा धूरिसामस्विति । तत् परिहर्त्तव्यम् ॥२४॥ आ० ॥

नावृत्तिधर्मत्वात् ॥ २५ ॥

नैतदेवं युक्तं, धुरि सामसु आवृत्तिधर्मकाणि हि तानि । वचनप्रामाण्यात् । इदं तत्र वचनम् । आवृत्तं धूर्षु स्तुवते, पुनरावृत्तं पृष्ठैरुपतिष्ठते इति । वचनात् तत्र क्रियते । तद्वदिह वचनं नास्ति । तस्माद् विषममेतदुपवर्णनम् । अत्र आगमेन सङ्ख्या पूरयितव्येति सम्यगेतदिति ॥ २५ ॥ ॥ आ० नि० ॥ त्रिवृद्धस्तोमके अप्राकृतानां साम्नामागमाधिकरणम् ॥ ६ ॥

बहिष्पवमाने तु ऋगागमः सामैकत्वात् ॥ २६ ॥

त्रिवृद्धस्तोमकेषु क्रतुषु संशयः । बहिष्पवमाने किं साम्नामागमः ? अभ्यासः ? इति । पूर्वेण न्यायेनागम इति ॥ एवं प्राप्ते ब्रूमः । बहिष्पवमाने तु नैवम् । ऋगागमस्तत्रेति । कुतः । सामैकत्वात् । कथम् । यदुत्तरयोः पवमानयोस्तृचाय तृचाय हिङ्करोति । अथ कस्माद् बहिष्पवमाने सकृदेव हिङ्करोतीति ॥ एकं हि तत्र सामेति ब्रूयात् । स्वारमेव गायत्रमिति वचनात् । सामैकत्वे ज्ञाते ऋगागमेन सङ्ख्या पूरयितव्येति । सामापि अभ्यसितव्यमिति ॥ २६ ॥ बहिष्पवमाने ऋगागमाधिकरणम् ॥ ७ ॥

अभ्यासेन तु सङ्ख्यापूरणं सामिधेनीष्वभ्यासप्रकृतित्वात् ॥ २७ ॥

स्तो दर्शपूर्णमासौ । तत्र काम्याः सामिधेनीकल्पाः । एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य । चतुर्विंशतिमनुब्रूयाद् ब्रह्मवर्चसकामस्य । एकविंशतिश्चानुब्रूयाद् अन्नकामस्य, द्वाविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य । षड्विंशतिमनुब्रूयात् पशुकामस्येत्येवमादयः । तत्रायमर्थः सांशयिकः । किं सामिधेनीष्वागमेन सङ्ख्या पूरयितव्या, उत अभ्यासेन, उत यावदुक्तमभ्यस्य शेषमागमेन ? इति । किं प्राप्तम् । पूर्वेण न्यायेनागम इति । अपि च अविशेषोऽर्थः । अभ्यासेन हि पूर्य्यमाणा न सामञ्जस्येन स्यात् । तस्मादागम इति ॥ एवं प्राप्ते ब्रूमः । अभ्यासेन तु सङ्ख्यापूरणमिति । तुशब्दः पक्षव्यावर्त्तकः । नागमः । किं तर्हि अभ्यासः । कुतः । अभ्यासप्रकृतित्वात् । प्रकृतौ अभ्यासेन सङ्ख्यापूरिता । त्रिः प्रथमामन्वाह त्रिरुत्तमामिति । कथम् । पञ्चदश सामिधेन्य इति श्रुतिः । एकादश च समाम्नाताः । तत्र अभ्यासेनागमेन वा सङ्ख्यायां पूरयितव्यायाम् अभ्यास उक्तः ।

त्रिः प्रथमामन्वाह, त्रिरुत्तमामिति । अनेन नियमेन प्रथमोत्तमयोरभ्यासः कर्त्तव्य इति । यावत्कृत्वस्तयोरभ्यासे क्रियमाणे पञ्चदशसङ्ख्या पूर्य्यते, तावत्कृत्वोऽभ्यसितव्यम्, इत्येतदभिप्रायं त्रित्वम् । तथा हि दृष्टार्थता । त्रिसङ्ख्याभिप्राये अदृष्टं कल्प्यं स्यात् । तस्माद् इहापि तत्प्रकृतित्वाद्यावत्कृत्वोऽभ्यस्यमानयोर्यथोदिता सङ्ख्या पूर्यते, तावत्कृत्वोऽभ्यसितव्यमिति ॥ २७ ॥ पूर्व० ॥

अविशेषान्नेतिचेत् ॥ २८ ॥

इति यदुक्तं तत् परिहर्त्तव्यम् ॥ २८ ॥ आ ० ॥

स्यात्तद्धर्मत्वात् प्रकृतिवदभ्यस्येत आ सङ्ख्या पूरणात् ॥ २९ ॥

स्यादभ्यासः । कुतः । प्रकृतिधर्मत्वं हि विकृतेः । तस्माद् आ सङ्ख्यापूरणादभ्यसितव्यम् । एवं प्रकृतिवत् कृतं भविष्यति । चोदकाऽनुरोधेन अभ्याससामञ्जस्यमभ्युपगन्तव्यम् । तस्मादभ्यास इति ॥ २९ ॥ आ० नि० ॥

यावदुक्तं वा कृतपरिमाणत्वात् ॥ ३० ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैवम् । आ सङ्ख्यापूरणात् प्रथमोत्तमे अभ्यसितव्ये इति । यावदुक्तमभ्यस्य अवशिष्टानामागमेन पूरयितव्या सङ्ख्येति । कुतः । कृतपरिमाणत्वादभ्यासस्य । कृतं ह्यभ्यासस्य परिमाणम् । त्रिः प्रथमामन्वाह, त्रिरुत्तमामिति । त्रिसङ्ख्या चाभ्यासेन विवक्षिता, न पूरणी सङ्ख्या । तथा श्रुतिः परिगृहीता स्यात् । इतरथा लक्षणा ॥

अथ यदुक्तं, दृष्टार्थता चैवं भवतीति । नैतदेवम् । आदर्त्तव्यो हि त्रित्वानुरोधः । द्विचतुष्केणापि हि सङ्ख्या पूर्यते । तथापि प्रथमोत्तमयोस्त्रिरभ्यासोऽनुष्ठेयः । तेन सङ्ख्या पूरयितव्येति । इहापि तेनैव अभ्यासेन सङ्ख्या पूर्यते । भवति हि सोऽन्यत्र सङ्ख्यापूरणः । प्रकृतौ प्रथमोत्तमे च त्रिरभ्यस्ते । सङ्ख्या च पूरिता । इहापि तद्वदेव कर्त्तव्यम् । प्रथमोत्तमे च त्रिरभ्यसितव्ये । सङ्ख्या च पूरयितव्या । न प्रकृतावेष शब्दार्थो गम्यते, अनेनाभ्यासेन सङ्ख्या पूरयितव्येति । अभ्यासः कर्त्तव्य इति वचनादवगम्यते । सङ्ख्या पूरयितव्येति सामर्थ्यात् । सा च प्रकृतौ अर्थादनेन पूरिता । यश्चार्थात् कृतो, न

स चोदनार्थः । तस्मान्नानेनाभ्यासेन सङ्ख्या पूरयितव्येति चोदक आह । एवं चेद् यावदुक्तमभ्यस्य अवशिष्टानामागम इति॥३०॥ सि० ॥

अधिकानाञ्च दर्शनात् ॥ ३१ ॥

इतश्चागम इति । अधिकदर्शनं हि भवति । न जगत्या परिदध्यात् । यज्जगत्या परिदध्यात् । तच्छन्दांसि गमयेत् । त्रिष्टुभा परिदधातीति । अभ्यासे च जगतीपरिधानाशङ्का नावकल्पते । तस्मादप्यागम इति ॥ ३१ ॥ युक्तिः ॥

कर्मस्वपीति चेत् ॥ ३२ ॥

इति चेत् पश्यसि, यावदुक्तमभ्यस्य अधिका आगमयेदिति, धुरि सामकर्मस्वपि एवमेव स्यादिति ॥ ३२ ॥

न चोदितत्वात् ॥ ३३ ॥

नैतदेवं, धुरिसामकर्मसु युक्तम् । चोदितस्तत्राभ्यासः । आवृत्तं धूर्षु स्तुवते, पुनरावृत्तं पृष्ठैरुपतिष्ठते इति । इह तद्वचनं नास्ति । तस्माद्यावदुक्तम् अभ्यस्य अवशिष्टानामागमेन सङ्ख्या पूरयितव्येति ॥ ३३ ॥ आ०नि०॥ सामिधेनीष्ववशिष्टानामागमेन संख्यापूरणाधिकरणम् ॥८॥

षोडशिनो वैकृतत्वं तत्र कृत्स्नविधानात् ॥ ३४ ॥

अस्ति षोडशी ज्योतिष्टोमं प्रकृत्याम्नातः- य एवं विद्वानेतं षोडशिनं गृह्णाति, भवत्यात्मना, परास्य भ्रातृव्यो भवतीति । तत्र संशयः । किमेष प्राकृतो, वैकृतः ? इति । कथम् । प्राकृतः । ज्योतिष्टोमं प्रकृत्य आम्नानाद् वैकृतो, विकृतौ वचनात् । मध्यमेऽहंस्त्रिरात्रस्य गृह्यते इति । प्रकृतावपि वचनमस्त्येवेत्याशङ्का, अग्निष्टोमे राजन्यस्य गृह्णीयादतिरात्रे ब्राह्मणस्येति । विकृतावपि वचनसामर्थ्याद्विकृतौ अतिरात्रे स्यादित्याशङ्क्यते । प्रकृतावाम्नानात् । प्रकृतौ चातिरात्रस्य भावात् प्राकृत इत्याशङ्का । तस्मात् संशयः ॥ किं प्राप्तम् । षोडशिनो वैकृतत्वं स्यात् । कुतः । तत्र कृत्स्नविधानात् । विकृतावसौ कृत्स्नो विधीयते । कथम् । य एवं विद्वानेतं षोडशिनं गृह्णीत इत्यभिधाय मध्यमेऽहंस्त्रिरात्रस्य गृह्यते इति विधीयते । प्रकरणाच्च वाक्यं बलीयः । एवं वाक्येन प्रकरणे बाधिते, अतिरात्रे ब्राह्मणस्येति वचनं वैकृते अतिरात्रे इति गम्यते । तेन यद्यपि ज्योतिष्टोमं प्रकृत्य विधानाद्विकृतावसौ न कृत्स्न आम्नातः, तथापि कृत्स्न एव विकृतौ वि-

हितो भवति । तस्माद् विकृतिषु परिगणितासु षोडशी ग्रहीतव्यो, न प्रकृताविति ॥ ३४ ॥ पूर्व० ॥

प्रकृतौ चाभावदर्शनात् ॥ ३५ ॥

इतश्च वैकृत इति । कुतः । प्रकृतौ अभावो दृश्यते । कथम् । द्वे संस्तुतानां विराजमतिरिच्येते इति अभावे षोडशिनः । द्वे स्तोत्रीये विराजमतिरिच्येते इति वर्णितं द्वितीयेऽध्याये (२अ०४पा०२६ सू०) तस्मादपि वैकृतः षोडशीति ॥ ३५ ॥

अयज्ञवचनाच्च ॥ ३६ ॥

इतश्च वैकृतः स्यात् । एवं हि भवति वचनम् । न षोडशी नाम यज्ञोऽस्तीत्याहुरिति । न तावद् नास्ति षोडशी ज्योतिष्टोमे प्रकृतौ । इदं भवति वचनम् । यदि ज्योतिष्टोमे नास्ति, एवमुपपद्यते । तस्मादपि वैकृत इति गम्यते ॥ ३६ ॥ युक्तिः ॥

प्रकृतौ वा शिष्टत्वात् ॥ ३७ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति वैकृतः षोडशीति । प्राकृतः स्यात् । कुतः । प्रकृत्यां हि ज्योतिष्टोमे आम्नातः । प्रकरणाच्च ज्योतिष्टोमेनैकवाक्यता स्यात् । सा विकृतावप्युच्यमानस्य नापैति । न हीदं वचनं प्रकृतौ प्रतिषेधकम् । किं तर्हि विकृतावुपदेशकम् । तस्मात् प्रकृतौ शिष्टाप्रतिषिद्धत्वात् षोडशी भवितुमर्हतीति ॥

अपि च न केवलं प्रकरणमस्य साधकम् । किं तर्हि वाक्यमपि तथेति । अग्निष्टोमे राजन्यस्य गृह्णीयादतिरात्रे ब्राह्मणस्येति । न चेदं प्रकृतौ सम्भवद् वैकृतेऽतिरात्रे शक्यते कल्पयितुम् । तस्मात् प्राकृतः षोडशीति ॥ ३७ ॥ सि० ॥

प्रकृतिदर्शनाच्च ॥ ३८ ॥

प्रकृतौ भवति दर्शनमस्य षोडशिनः । तिस्रः संस्तुतानां विराजमतिरिच्यन्ते इति। उक्तमेतत् । षोडशिनि गृह्यमाणे तिसृणां स्तोत्रीयाणां दर्शनमवकल्पत इति । तस्मात् प्राकृतः षोडशीति॥३८॥ युक्तिः

आम्नातं परिसंख्यार्थम् ॥ ३९ ॥

अथ यदुक्तं, वैकृतस्तत्र कृत्स्नविधानादिति । तदुक्तम् । प्रकृतावप्रतिषेधकं तद्वचनमिति । अथ चोदकेन प्राप्तौ किमर्थं पुनरुच्यते इति । अविशेषेण हि तद्वचनं प्रकृतावभिधाय अग्निष्टोमे राजन्य-

स्य, ब्राह्मणस्य चातिरात्रे इति वाक्येनोक्तम् । तद्विकारार्थमेवं प्राप्नोति परिसङ्ख्यानम् । तदर्थमुच्यते । अनतिरात्रेऽप्यनग्निष्टोमेऽपि कथं गृह्येत ? । मध्यमेऽहंस्त्रिरात्रस्य गृह्यते इति ॥ ३९ ॥

उक्तमभावदर्शनम् ॥ ४० ॥

अथ यदुक्तं, प्रकृतौ षोडशी न दृश्यते, द्वे संस्तुतानां विराजमतिरिच्येते इति । तदुक्तम् । अभावदर्शनाद् वैकल्पिकः षोडशी, न विहितप्रतिषेधात् पक्षेऽतिरेक इति ॥ ४० ॥

गुणादयज्ञत्वम् ॥ ४१ ॥

अथ यदुक्तम् । अयज्ञवचनाद् न प्रकृतौ षोडशीति । तदुक्तम् । शिष्टत्वात् प्रकृतौ गृह्यत इति । कथं त्वयज्ञवचनम् । वैकल्पिकत्वात् । पक्षे स यज्ञो नास्तीति भक्त्या अयज्ञ इत्युच्यते । तस्मात् प्राकृतः षोडशीति । प्रयोजनं, पूर्वपक्षे प्रकृतौ न गृह्यते, गृह्यते सिद्धान्ते ॥४१ ॥ आ० नि० ॥ षोडशिनां प्राकृतत्वाधिकरणम् ॥ ९ ॥

तस्याग्रयणाद् ग्रहणम् ॥ ४२ ॥

अस्ति षोडशी । य एवं विद्वानेतं षोडशिनं गृह्णाति, भवत्यात्मना परास्य भ्रातृव्यो भवतीति । तत्रायमर्थः समधिगतः । प्राकृतः षोडशीति । अथेदानीमिदं सन्दिह्यते । किमसौ आग्रयणादुक्थ्याच्च ग्रहीतव्य इति ? उत, आग्रयणादेवेति । किं प्राप्तम् । तस्याग्रयणाद् ग्रहणम् । कुतः । वचनात् । आग्रयणाद् गृह्णाति षोडशिनमिति ॥ ४२ ॥

उक्थ्याच्च वचनात् ॥ ४३ ॥

गृह्णीम एतत्, आग्रयणाद् ग्रहीतव्यः षोडशीति । किन्तु उक्थ्याच्च ग्रहीतव्यः । कुतः । वचनात् । वचनमिदं भवति । उक्थ्याद् गृह्णाति षोडशिनमिति । किमिदं वचनं न कुर्य्यात् । तस्मादुक्थ्याग्रयणाभ्यां ग्रहीतव्य इति ॥ ४३ ॥ पूर्व० ॥

तदेतदपर्य्यवसितं तिष्ठतु तावत् । अथेदानीमेतच्चिन्त्यते–

तृतीयसवने वचनात् स्यात् ॥ ४४ ॥

अस्ति ज्योतिष्टोमः । तत्र श्रूयते । यः षोडशी गृह्यते इन्द्रियमेव वीर्य्यमात्मं धत्ते इति । तत्र संशयः । किं सवने सवने ग्रहीतव्यः ? उत, तृतीयसवने इति । किं प्राप्तम् । सवने सवने इति । कुतः । प्रतिसवनं हि श्रूयते, गृह्णाति षोडशिनमिति । शब्दलक्षणे च

कर्मणि शब्दो नः प्रमाणम् । तस्मात् सवने सवने षोडशी गृह्यते इति ॥ एवं प्राप्ते ब्रूमः । तृतीयसवने स्यादस्य ग्रहणमिति । कुतः । वचनात् । भवति हि वचनम् । तृतीयसवने आग्रयणाद् गृह्णाति षोडशिनमिति वचनं नः प्रमाणम् । तस्मात् तृतीयसवने ग्रहीतव्य इति । अथ यदुक्तं, प्रतिसवनं षोडशिग्रहणमिति । तृतीयसवनग्रहणस्तुत्यर्थं तत् । कथम् । प्रातःसवने गृह्यः । तेजो वै प्रातःसवनम् । तेजस एव वज्रं निर्मिमीते । माध्यन्दिने सवने गृह्यः । तेजो वै माध्यन्दिनं सवनम् । तेजस एव वज्रं निर्मिमीते तृतीयसवने गृह्यः । पशवो वै तृतीयसवनम् । पशुभ्य एव वज्रं निर्मिमीते । यत् प्रातःसवने गृह्णीयाद् वज्र उत्तरे सवने व्यतिरिच्येत । यन्माध्यन्दिने मध्यतः, वज्रं निहन्यात् । तृतीयसवने गृह्यः । तत् सर्वेषु सवनेषु गृह्णाति न पूर्वे सवने आर्त्ति नीत इति ॥ ४४ ॥ तृतीयसवन एव षोडशिग्रहणाधिकरणम् ॥ ११ ॥

अनभ्यासे पराक्शब्दस्य तादर्थ्यात् ॥ ४५ ॥

स्थितादुच्यते । इतश्च पश्यामः । उक्थ्याच्च ग्रहीतव्य इति । कुतः । यत् पराञ्चमुक्थ्यान्निगृह्णाति षोडशिनमिति । उक्थ्यान्निगृह्णातीति सम्बन्धो, नोक्थ्यात् । पराञ्चमिति । कुतः । अनभ्यासे पराक्शब्दो वर्त्तते । कुतः । तादर्थ्यात् । तादर्थ्यं हि अस्यावगम्यते । पराचीः सामिधेनीरन्वाह । अनभ्यस्ताः सामिधेनीरन्वाहेति । यथा, अनभ्यासवचनः सन् नोक्थ्येन सम्बद्ध्यते । न हि भवति सम्बन्धः । उक्थ्यादनभ्यस्तमिति । कथं तर्हि । उक्थ्यान्निगृह्णातिं तमनभ्यस्तामिति । तस्मादप्युक्थ्याग्रयणाभ्यां ग्रहीतव्य इति ॥ ४५ ॥ १० दशमाधिकरणपूर्वपक्षयुक्तिः ॥ १ ॥

उक्थ्यविच्छेदवचनत्वात् ॥ ४६ ॥

इतश्चोक्थ्यादपि ग्रहीतव्य इति । कुतः । उक्थ्यविच्छेदवचनं भवति । विच्छिन्दन्ति ह वा एतदुक्थ्यं यदुक्थ्यानि षोडशिनश्च ततः प्रणयन्तीति । प्रणयतिना सम्बन्धाद्विस्पष्टमपादानं दर्शयति । तस्मादप्युभाभ्यां ग्रहीतव्य इति ॥ ४६ ॥ युक्तिः ॥ २ ॥

आग्रयणाद्वा पराक्शब्दस्य देशवाचित्वात् पुनराधेयवत् ॥ ४७ ॥

आग्रयणाद् एव वा ग्रहीतव्यः । नोक्थ्यात् । कुतः । यदाग्रयणाद् गृह्णाति षोडशिनमिति वचनाद्, न शक्य आग्रयणात् कृत्स्नो गृह्यमाण उक्थ्याद् ग्रहीतुमिति । अगतिका ह्येषा गतिः । यत् कृत्स्नसंयोगे सति विकल्पसमुच्चयौ स्याताम् । सत्यां हि गतौ न तौ आश्रयणीयौ स्तः । अस्ति चात्र गतिः । कथम् । पराक्शब्दस्य देशवाचित्वात् । दिग्देशकालवचनो हि पराक्शब्दो भवति । तथा सति उक्थ्यात् पराञ्चमिति सम्बन्धो भविष्यति, न कृत्स्नसंयोगो विरोत्स्यते । यथा, पराञ्चमग्न्याधेयात् पुनरादधातीति कालसंयोगे पञ्चमी, नापादाने । एवमिहापि द्रष्टव्यम् । तस्मादप्याग्रयणादेव ग्रहीतव्य इति ॥ ४७ ॥ १० दशमाधिकरणपूर्वपक्षोत्तरम् ॥

विच्छेदः स्तोमसामान्यात् ॥ ४८ ॥

अथ यदुक्तं, विच्छेदवचनादपादानदर्शनमिति । नैतदेवम् । विच्छेदः स्तोमसामान्याद् भवति । विच्छिन्दन्ति वा एतदुक्थ्यं यदुक्थ्यानि षोडशिनञ्च ततः प्रणयन्तीति । एकविंशस्तोमत्वादुक्थ्यविग्रह इव षोडशी इति । तत्र पूर्वयोर्विच्छिन्न एवोच्यते । ततः प्रणयन्तीति । इयमपि कालसम्बन्ध एव पञ्चमी, नापादाने । तस्माद् आग्रयणादेव ग्रहीतव्यः षोडशी ॥ ४८ ॥ आ० नि० ॥ आग्रयणादेव षोडशिग्रहणाधिकरणम् ॥ १० ॥

उक्थ्याऽग्निष्टोमसंयोगादस्तुतशस्त्रः स्यात् सति हि संस्थान्यत्वम् ॥ ४९ ॥

षोडशिनि प्रकृते इदमाम्नायते, अग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्य इति । तत्रायमर्थः सांशयिकः । किमस्तोत्रशस्त्रः षोडशी ? उत सस्तोत्रशस्त्र इति । किं प्राप्तम् । अस्तोत्रशस्त्रः स्यात् कुतः । उक्थ्याग्निष्टोमसंयोगात् । उक्थ्याग्निष्टोमसंयोगो भवति । अग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्य इति । अग्निष्टोमसंस्थे उक्थसंस्थे च षोडशी ग्रहीतव्य इत्युच्यते । एवमग्निष्टोमसंस्थोऽसौ क्रतुर्भवति । यद्यत्र स ग्रहो गृह्यते, यदि च तत्र स्तोत्रं शस्त्रं वा क्रियते । सति हि स्तोत्रे शस्त्रे वा षोडशिना स्तोमेन सन्तिष्ठेत । तत्राग्निष्टोमसंस्थो न स्यात् । उक्थ्यसंस्थश्च । तत्रेदं वचनमुपरुद्ध्येत । अग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्य इति । अग्निष्टोम-

विशिष्टे ज्योतिष्टोमे स उच्यते, अग्निष्टोमस्यैवाङ्गम् । न हि यागः स्तुतशस्त्रयोरङ्गं भवति । फलवत्त्वाद् यागस्य । अफलत्वाच्चेतरयोः अग्निष्टोमश्चासौ ज्योतिष्टोमसंस्थोऽनेन भवति, नान्यथा । तस्मादस्तोत्रशस्त्रः स्यादिति ॥ ४९ ॥ पूर्व० ॥

सस्तुतशस्त्रो वा तदङ्गत्वात् ॥ ५० ॥

सस्तुतशस्त्रो वा षोडशी । कुतः । तदङ्गत्वात् । यागस्य हि स्तोत्रशस्त्रे अङ्गभूते ग्रहग्रहणनिमित्ते । कथम् । ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोतीत्युपसम्प्राप्ते निमित्ते भवितव्यं नैमित्तिकेन । तस्मात् सस्तुतशस्त्रः षोडशी स्यात् ॥ ५० ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ ५१ ॥

लिङ्गमप्येतमर्थं दर्शयति, सस्तुतशस्त्रः षोडशीति । कथम् । ऊर्ध्वा वा अन्ये यज्ञक्रतवः सन्तिष्ठन्ते तिर्य्यञ्चोऽन्ये । ये होतारमभिसन्तिष्ठन्ते, ते ऊर्ध्वाः । ये वा अच्छावाकं, ते तिर्यञ्चः । कथं कृत्वा एतल्लिङ्गम् । एतदुक्तं भवति । द्वये एव यज्ञक्रतवो भवन्ति ये होतारमभिसन्तिष्ठन्ते ये चाच्छावाकम् । यदि सस्तोत्रशस्त्रः षोडशीति तत एवम् । अन्यथा अयं षोडशी अध्वर्य्युमभिसन्तिष्ठेत । तस्मादपि सस्तोत्रशस्त्रः षोडशी ॥ ५१ ॥ हेतुः ॥

वचनात् संस्थान्यत्वम् ॥ ५२ ॥

अथ यदुक्तं, सति हि संस्थान्यत्वमिति । वचनादेवं भविष्यति । अग्निष्टोमान्तं यदुक्तं तस्य वचनादयमन्योऽन्तो विधीयते । किमिव वचनं न कुर्य्यात् । तस्मादपि सस्तोत्रशस्त्र इति ॥ ५२ ॥ आ० नि० ॥ षोडशिग्रहस्य सस्तोत्रशस्त्रताधिकरणम् ॥ १२ ॥

अभावादतिरात्रेषु गृह्यते ॥ ५३ ॥

अस्ति अङ्गिरसां द्विरात्रः । तत्रेदमाम्नायते, वैखानसम्पूर्वेद्युः साम भवति षोडश्युत्तरे इति । तत्रायमर्थः सांशयिकः । किमत्र षोडशिनो विधानम् ? उत प्राप्तस्य परिसङ्ख्यानमिति । किं प्राप्तम् । अप्राप्तस्य विधानम् । आनुमानिकश्चोदकः । स विहिते न प्रापयति । विहितश्च, उत्तरेऽहन् द्विरात्रस्य गृह्यते इत्यनेन वचनेन । तस्माच्चोदको न प्रापयतीति अप्राप्तस्य विधानमिति गम्यते ॥ ५३ ॥ पूर्व० ॥

अन्वयो वानारभ्यविधानात् ॥ ५४ ॥

अन्वयो वा षोडशिनोऽन्यस्मिन् क्रतौ परिसङ्ख्यार्थमिदं श्रवणं, वैखानसं साम पूर्वेद्युर्भवति षोडश्युत्तरे इति। कथमन्वयः। अनारभ्यविधानात् । कतमोऽनारभ्यविधिः । उत्तरेऽहन् द्विरात्रस्य गृह्यते इति। तेन प्राप्ते उपसंहारः क्रियते। यदेतद् द्विरात्रस्योत्तरे गृह्यते इति । एतदाङ्गिरसां द्विरात्रस्य गृह्यते, नान्यत्रेति।

अथ वा एवं प्राप्तम्, अभावादतिरात्रेषु गृह्यते इति । यदेतत् प्राकृतमतिरात्रेषु षोडशिग्रहणं, वैकल्पिकं तद् विकल्पेनैव सर्वद्विरात्रेषु प्राप्तं नियम्येत, उत्तरेऽहन् द्विरात्रस्य गृह्यते इति। तस्योपसंहारे कृतेऽन्यद्विरात्रेषु अभावः । अभावादाङ्गिरसां द्विरात्रे नियतो गृह्यते षोडशी उत्तरे इति । अन्वयो वा अनारभ्यविधानात्, अन्वितानि षोडशिना सर्वद्विरात्रेपूत्तराणि अहानि । प्रत्यक्षश्रवणादुत्तरेऽहन् द्विरात्रस्य गृह्यते इति अनारभ्यविधानेन । ननूपसंहारः परिसङ्ख्या वा षोडशी उत्तरे इति। उच्यते। न शक्यं प्रत्यक्षश्रवणं परिसङ्ख्यातुं विशेषवचनेन । त्रयो हि दोषाः प्रादुःष्युः— अस्वार्थग्रहणं, परार्थकल्पना, प्राप्तबाधश्च। न चोपसंहारः। भिन्नत्वाद्वाक्ययोः। किमर्थं तर्हीदं षोडश्युत्तरे इति। नैवैतद्विधानं षोडशिनः। किन्तर्हि वैखानसस्य साम्नः। वैखानसं तत् साम पूर्वेद्युर्भवतीति विधीयते। उत्तरे षोडशीत्यनूद्यते। अनारभ्यविधानेन प्राप्तत्वात्। तस्मात् प्राप्तस्य षोडशिनो ग्रहणमिति ॥ ५४ ॥ सिद्धान्तः॥ अङ्गिरसां द्विरात्रे षोडशिनः परिसंख्याधिकरणम् ॥ १३ ॥

चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्यत इत्यभ्यासेन प्रतीयेत भोजनवत् ॥ ५५ ॥

षोडशिनं प्रकृत्य आमनन्ति, चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्यते इति । अत्रैषोऽर्थः सांशयिकः । किमेकस्मिन्नहीने चतुर्थे दिवसे षोडशी अभ्यसितव्य ? उतैकस्मादहीनादहीनान्तरे चतुर्थेऽहनि गृह्यते इत्येवमभ्यसितव्य इति। किं प्राप्तम्। एकस्मिन्नभ्यसितव्य इति। कुतः। अहीनस्यैकस्येत्युच्यते, नानाऽहीनेषु चेदिष्यते, सा लक्षणा भवति। अस्मिन् पक्षे श्रुतिः। अपिच वीप्सानर्थक्यं नानाहीनेषु चेत् स्यात्। चतुर्थेऽहनि अहीनस्येत्येतावतैव तत् सिद्ध्यति। एकस्मिँस्तु वीप्सा अर्थवती भवति । तस्मादेकस्मिन्नहीने अभ्यसितव्यः।

भोजनवत् । यथा चतुर्थेचतुर्थेऽहनि देवदत्तो भुङ्क्ते इति चतुर्थे भुक्त्वा ततश्चतुर्थे गम्यते एकस्मिन् पक्षे इति । एवमिहापि द्रष्टव्यम् । तस्माद् एकस्मिन्नहीन इति ॥ ५५ ॥ पूर्व० ॥

अपि वा सङ्ख्यावत्त्वान्नानाऽहीनेषु गृह्यते पक्ष-
वदेकस्मिन् संख्यार्थभावात् ॥ ५६ ॥

नानाहीनेषु वा चतुर्थेऽहनि गृह्यते, एवं सङ्ख्यावद्ग्रहणं भवति, चतुर्थेऽहनि इति । एकस्मिन्नहीने एकं चतुर्थमहः, अन्यदष्टमं भवति । यदुक्तं, श्रुतिशब्दो भविष्यतीति अहीन इति । भवति सा हि श्रुतिः । न च तया श्रुत्या किञ्चित् सिद्ध्यति । चतुर्थस्याभावात् । अस्मत्पक्षे लक्षणा । तया तु सिद्ध्यति । अपि च, न लक्षणा, सामान्याभिप्रायमेकवचनम् । यदुक्तं, वीप्सानर्थक्यमिति । न आनर्थक्यमापततीत्यशब्दार्थः कल्पनीयः । तस्माद् नानाहीनेषु ग्रहीतव्य इति । पक्षवत् । यथा, पञ्चम्यां पञ्चम्यां भुङ्क्ते इति पक्षान्तरं गम्यते । एवमिहापि द्रष्टव्यः । तस्मान्नानाहीनेषु ग्रहीतव्य इति ॥ ५६ ॥ सि० ॥

भोजने तत्सङ्ख्यं स्यात् ॥ ५७ ॥

यत्तु भोजनवदित्युक्तम्, अर्थात् तत् तस्माच्चतुर्थादप्यन्यच्चतुर्थं तत्र कल्प्यते । चतुर्थादारभ्य यान्यहानि, तेषां चतुर्थमहीनस्य तदऽष्टमम् । शब्दलक्षणे कर्मणि शब्दाभिहितं गम्यते, न लोकाभिप्रायः । तस्माद् युक्तं भोजने लोकाभिप्रायानुष्ठानम् । अहीने तु शब्दाभिहितं गम्यते ॥ ५७ ॥ आ० नि० ॥ नानाऽहीने षोडशिग्रहणाधिकरणम् ॥ १४ ॥

जगत्साम्नि सामाभावाद् ऋक्तः साम
तदाख्यं स्यात् ॥ ५८ ॥

ज्योतिष्टोमे श्रूयते, यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाऽग्रान् ग्रहान् गृह्णीयात्, यदि बृहत्सामा शुक्राग्रान्, यदि जगत्सामा आग्रयणाग्रानिति । आग्रयणाग्रानित्येतदुदाहरणम् । तत्र संशयः । किमाग्रयणाग्रतायाः प्रकृतौ निवेशः ? उत विकृताविति । किं प्राप्तम् ? प्रकरणानुग्रहात् प्रकृतौ इति । यदि जगत्सामा इति ज्योतिष्टोम एवोच्यते, येन केनचिदभिसम्बन्धेन गुणेन क्रियया वा ॥ एवं प्राप्ते ब्रूमः, जगत्साम्नि श्रूयमाणेऽपि ऋक्तः साम तदाख्यमिति

अध्यवसीयते । कुतः । सामाभावात् । न हि, कृत्स्नेऽपि सामवेदे जगन्नाम सामास्ति । तस्माद्यत्र जगत्यामुत्पन्नं साम स जगत्सामा । स विषुवान् । ननु शुक्राग्रो विषुवानित्युच्यते । नैष दोषः । स कामाय भविष्यति । तस्माद्विकृतौ विषुवति निवेश इति ॥ ५८ ॥ विकृतौ ग्रहाणामाग्रयणाग्रताया अधिकरणम् ॥ १५ ॥ प्रथमवर्णकम् ॥ १ ॥

एवं वा—

जगत्साम्नि सामाभावाद् ऋक्तः साम तदाख्यं स्यात् ॥ ५८ ॥

यदि जगत्सामा आग्रयणाग्रान् ग्रहान् गृह्णीयाद् इत्येतदेवोदाहरणम् । तत्र संशयः । किमन्यतरसामा जगत्सामा, रथन्तरसामा बृहत्सामा वा ? किमुभयसामा जगत्सामा ? किं रथन्तरसामा जगत्सामा ? किं यत्र जगत्यामुत्पन्नं साम जगत्सामा ? इति । किं प्राप्तम् । अन्यतरसामा इति । कुतः । विशेषानवगमात् । ज्योतिष्टोमस्य प्रकृतत्वात् । तस्य च अन्यतरसामत्वात् । एवं प्राप्तम् । अथवा उभयसामा जगत्सामा, जगच्छब्दः कृत्स्नवाची । कृत्स्नपृष्ठता च ज्योतिष्टोमे उभयसामत्वे, अन्यतरसामत्वे जगच्छब्दस्याविशेषणत्वादविवक्षा प्रसज्ज्येत । तस्मादुभयसामा । अथ वा रथन्तरसामा जगत्सामा । तत्र हि ऋचि जगच्छब्दो विद्यते । ईशानमस्य जगतः स्वर्दृशमिति । यदि चोभयसामा जगत्सामा भवेत्, कृतकरो विधिरनर्थकः स्यात् । तेन नैतयोः समुच्चयः प्रकृतौ । तस्माद् रथन्तरसामैव जगत्सामा इति ॥

एवं प्राप्ते ब्रूमः । यत्र जगत्यामुत्पन्नं साम स जगत्सामा इति । तथा हि श्रुतिः, इतरथा रथन्तरसामनि अध्यवसीयमाने ऋचा पदं लक्ष्यते, पदेन साम, सैषा लक्षितलक्षणा स्यात् । तस्माज्जगत्यां यत्र साम, स जगत्सामा । ऋक्तो जगदाख्यं साम, स्याद्विषुवति । ननु शुक्राग्रो विषुवानित्युच्यते । नैष दोषः । स कामाय भविष्यति । तस्माद्विषुवति विकृतौ निवेश इति ॥ ५८ ॥ जगत्सामेति शब्देन विषुवतो ग्रहणाधिकरणम् ॥ १५ ॥ द्वितीयवर्णकम् ॥ २ ॥

उभयसाम्नि नैमित्तिकं विकल्पेन समत्वात् स्यात् ॥ ५९ ॥

सन्ति उभयसामानः क्रतवः, संसव उभे कुर्य्यात् । अपचि-

तावज्ज्येकाहे श्रूयते, उभे बृहद्रथन्तरे कुर्यादिति । तत्रास्ति रथन्तरनिमित्तकं बृहन्निमित्तकञ्च, उपवतीं रथन्तरपृष्ठस्य प्रतिपदं कुर्यादग्रियवतीं बृहत्पृष्ठस्येति । तत्रैषोऽर्थः सांशयिकः । किं रथन्तरनिमित्तकं बृहन्निमित्तकं वा कार्यं, विकल्पः? अथ वा रथन्तरनिमित्तकं कर्त्तव्यम्? अथ वाऽन्यनिमित्तकमेव कर्त्तव्यम्? । किं प्राप्तम् । अन्यतरन्निमित्तकं कर्त्तव्यं, विकल्पः? इति । कुतः । समा प्राप्तिः, विरुद्धश्च समुच्चयः । न हि विनिगमनायां हेतुरस्ति– एवन्निमित्तकं कर्त्तव्यं, नैवन्निमित्तकम् इति । न च द्वे प्रतिपदौ शक्येते कर्त्तुम् । तस्माद्विकल्पः ॥ ५९ ॥ पूर्व० ॥ १ ॥

मुख्येन वा नियम्येत ॥ ६० ॥

यदुक्तं– समा प्राप्तिः, नास्ति विनिगमनायां हेतुरिति । अस्तीति ब्रूमः । मुख्यत्वं नाम रथन्तरस्य प्रथमाधीतत्वम् । तदुक्तं, मुख्यं वा पूर्वचोदनाल्लोकवद्, इति ॥ ६७ ॥ पूर्व० ॥ २ ॥

निमित्तविघाताद् वा क्रतुयुक्तस्य कर्म स्यात् ॥ ६१॥

वाशब्दः पक्षं व्यावर्त्तयति । द्वयोरपि निमित्तयोर्विघातः स्यात्, क्रतुनिमित्तमेवाश्रीयते । तथा सति नैतद्रथन्तरपृष्ठं, न बृहत्पृष्ठं बृहद्रथन्तराभ्यामुभाभ्यां तत्र पृष्ठनिर्वृत्तिः । तस्माद् नोपवती प्रतिपत्, नाग्रियवती अन्यैव क्रतुनिमित्ता भवितुमर्हतीति ॥ ६१ ॥ सि०॥ संसवे उपवत्यग्रियवत्योरभावाधिकरणम् ॥ १६ ॥

ऐन्द्रवायवस्याग्रवचनादादितः प्रतिकर्षः स्यात् ॥६२॥

ज्योतिष्टोमे श्रूयते, वाग् वा ऐन्द्रवायवो यद् ऐन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवावरुन्धे इति । तत्र संशयः । किमैन्द्रवायवस्य सर्वादितः प्रतिकर्षः स्यात्, उपांश्वन्तर्यामाभ्यामपि पूर्वं ग्रहीतव्यः? उत शुक्रामन्थिभ्यां पूर्वं ग्रहणमिति । किं प्राप्तम् । ऐन्द्रवायवस्य सर्वादितः प्रतिकर्ष इति । कुतः । अग्रवचनात् । अग्रताऽत्र विधीयते, ऐन्द्रवायवाग्रं गृह्णातीति ऐन्द्रवायवमग्रे कुर्यादेषामिति । अविशेषात् सर्व एव ऐन्द्रवायवाग्राः कर्त्तव्याः । यदि आदितः प्रतिकर्षो न क्रियेत, उपांश्वन्तर्यामौ ऐन्द्रवायवाग्रौ न स्याताम् । आदितस्तु प्रतिकर्षे क्रियमाणे सर्वे ऐन्द्रवायवाग्राः कृता भवन्ति । न चात्र ऐन्द्रवायवस्याग्रता विधीयते । यदि विधीयेत,

थान् काँश्चित् प्रति ऐन्द्रवायवस्य अग्रतायां कृतं कर्त्तव्यं स्यात् । अथ पुनरन्येषां ग्रहाणामैन्द्रवायवाग्रता धर्म उच्यते, तस्मात् सर्वेषां धर्मः कर्त्तव्य इत्यादितः प्रतिकर्षः स्यात् । कथं पुनरवगम्यते, सर्वेषामेवायं धर्मः ? इति । ऐन्द्रवायवाग्रान् कुर्य्यादिति निर्देशात् । नात्र ग्रहस्य कर्त्तव्यता उच्यते । तदग्रा कर्त्तव्या इति श्रूयते । अग्रता परार्था, न स्वार्था विज्ञायते । तस्मात् सर्वादितः प्रतिकर्षः स्यात् ॥ ६२ ॥ पूर्व० ॥

अपि वा धर्माविशेषात् तद्धर्माणां स्वस्थाने प्रकरणादग्रत्वमुच्यते ॥ ६३ ॥

अपि वा इति पक्षव्यावृत्तिः । न सर्वादितः प्रतिकर्षः स्यात् । किं तर्हि, स्वस्थानस्य ग्रहणम् । कुतः । नात्र तदग्रता विधीयते, वाक्यं हि तदा अनुगृह्यते । किन्तर्हि, तदग्राणां ग्रहणं विधीयते । तथा हि श्रुतिरनुगृहीता भवति । यदि रथन्तरसामा सोमः स्याद् ये ऐन्द्रवायवाऽग्रा ग्रहाः समाम्नातास्तेषामनेनानुपूर्व्येण ऐन्द्रवायवादितया धर्मविशेषेण तद्धर्माणां प्रकृतानां ग्रहणं विधीयते, स्वे स्थाने ये ग्रहा ऐन्द्रवायवाग्राः, तान् प्रकृत्य ग्रहणविधिरिति न सर्वादितः प्रतिकर्ष इति ॥ ६३ ॥ सि० ॥

धारासंयोगाच्च ॥ ६४ ॥

अपि च, धारासंयोगो भवति ऐन्द्रवायवादिवाक्ये, अण्वा अव्यवच्छिन्नया धारया गृह्णातीति । तस्माद्धाराग्रहास्ते । तदग्रान् अधिकृत्य ग्रहणं विधीयते इति ॥ ६४ ॥ युक्तिः ॥ ऐन्द्रवायवस्य सर्वादावप्रतिकर्षाधिकरणम् ॥ १७ ॥

कामसंयोगे तु वचनादादितः प्रतिकर्षः स्यात् ॥६५॥

अथ यत्र कामसंयोगे वचनमैन्द्रवायवस्य, ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयाद्, यः कामयेत यथापूर्वं प्रजाः प्रकल्पेरन्निति । तत्र किं, सर्वादितः स प्रतिकर्षः ? उत तत्रापि स्वक्रमस्थस्य ग्रहणमिति । किं प्राप्तम् । पूर्वेणाधिकरणेन स्वक्रमस्थस्येति ॥ तथा प्राप्ते ब्रूमः । कामसंयोगे तु सर्वादितः प्रतिकर्षः स्यात् । कुतः । वचनात् । वचनं हि भवति, ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयाद् यः कामयेत यथापूर्वं प्रजाः प्रकल्पेरन्निति । तत् सर्वादितः प्रतिकर्षेऽर्थवदग्रतायां

विधीयमानायाम् । अप्रवृत्तिविशेषकरं तदू अग्राणां ग्रहणे विधीयमाने । तस्मात् सर्वादितः प्रतिकर्ष इति ॥ ६५ ॥ पूर्व० ॥

तद्देशानां वाग्रसंयोगात् तद्युक्तं कामशास्त्रं स्यान्नित्यसंयोगात् ॥ ६६ ॥

न चैतदस्ति, यदुक्तं सर्वादितः प्रतिकर्ष इति । स्वक्रमस्थस्य ग्रहणे क्रमानुग्रहो भविष्यति । तस्मात् स्वक्रमस्थस्येति । यदुक्तम्, अग्रताभिधानादादितः प्रतिकर्ष इति । तत्र । तद्देशानां धारादेशानामैन्द्रवायवाग्राणामयमुपदेशः । तद्युक्तानां तदग्राणां ग्रहणेन कामः साध्येत । श्रुतिरेवमनुगृह्यते । त्वत्पक्षे वाक्यम् । श्रुतिश्च वाक्याद्बलीयसी । अथ यदुक्तम्, अप्रवृत्तिविशेषकरं ग्रहणविधाविति । तत्र संयोगपृथक्त्वात् । एकोऽत्र नित्यस्य कामसंयोगः । ग्रहणेन कामं साधयेत् । अपरो नित्यसंयोगः । ये ऐन्द्रवायवाग्रा ग्रहास्तान् गृह्णीयादिति । तस्मादस्ति प्रवृत्तिविशेषः । अतस्तद्देशसंयुक्ते कामसाधनमेतत् । तस्मात् स्वक्रमस्थस्य ग्रहणमिति ॥ ६६ ॥ सिद्धान्तः ॥ कामसंयोगेऽपि ऐन्द्रवायवस्यादावप्रतिषेधाधिकरणम् ॥ १८ ॥

परेषु चाग्रशब्दः पूर्ववत् स्यात् तदादिषु ॥ ६७ ॥

अस्ति ज्योतिष्टोमः । तत्र ऐन्द्रवायवात् परे ग्रहाः कामाय श्रूयन्ते– आश्विनाग्रान् गृह्णीयादामयाविनः, शुक्राग्रान् गृह्णीयादभिचरतः, मन्थ्यग्रान् गृह्णीयादभिचर्य्यमाणस्येति । तत्र संशयः । किमेतेष्वपि स्वक्रमस्थानां ग्रहणम्, उत सर्वादितः प्रतिकर्षः कर्त्तव्य इति । किं प्राप्तम् । परेषु च ऐन्द्रवायवात्, परेष्वेवमादिषु ग्रहणेषु अग्रशब्दः पूर्ववत् स्यात् स्वक्रमस्थग्रहणमिति । यस्य यस्याग्रता श्रूयते, तदग्राणां कामसंयोग इति ॥ ६७ ॥

प्रतिकर्षो वा नित्यार्थेनाग्रस्य तदसंयोगात् ॥ ६८ ॥

प्रागैन्द्रवायवात् प्रतिकर्षः स्यात् । कुतः । न हि अत्र नित्यार्थेन कामस्य संयोगो भवति । यदि हि नित्ये कामो भवेत्, आश्विनाग्रान् मन्थ्यग्रानित्यग्रशब्दोऽस्य नोपपद्येत । न हि, तस्मिन् वचने सति प्रवृत्तेः कश्चिद्विशेष उपलभ्यते, प्रागैन्द्रवायवात् पुनः प्रतिकर्षे वचनमर्थवद् भवति । अपि च प्रकृतास्ते ग्रहाः । तेषामाश्विनाग्रता शुक्राग्रता विधीयते । तस्माद् आदितः प्रतिकर्ष इति ॥ ६८ ॥

प्रतिकर्षञ्च दर्शयति ॥ ६९ ॥

धारयेयुस्तं यं कामाय गृह्णीयुः, ऐन्द्रवायवं गृहीत्वा सादयेत् तं यं कामाय गृह्णीयुरिति कामाय गृहीते धार्य्यमाणे ऐन्द्रवायवस्य ग्रहणं दर्शयति। तस्मात् सर्वादितः प्रतिक्रष्टव्य इति ॥ ६९ ॥ युक्तिः ॥ आश्विनाग्रादीनां ग्रहाणां प्रतिकर्षोऽधिकरणम् ॥ १९ ॥

पुरस्तादैन्द्रवायवस्याग्रस्य कृतदेशत्वात् ॥ ७० ॥

अस्ति ज्योतिष्टोमः, तत्रैन्द्रवायवात् परे ग्रहाः कामाय श्रूयन्ते, आश्विनाग्रान् गृह्णीयादामयाविनः। शुक्राग्रानभिचरतः। मन्थ्यग्रानभिचर्य्यमाणस्येति। तेषां स्वक्रमस्थानां ग्रहणं, प्रतिकर्ष इति समधिगतमेतत्। अथेदानीमिदं सन्दिह्यते। किं सर्वादितः प्रतिकर्षः, यतः कुतश्चिद्वा ? उतैन्द्रवायवस्य पुरस्तात् प्रतिकर्ष इति। किं प्राप्तम्। नियमकारिणः शास्त्रस्याभावादनियम इति ॥ एवं प्राप्ते ब्रूमः। पुरस्तादैन्द्रवायवस्य प्रतिकर्ष इति। कुतः। अग्रस्य कृतदेशत्वात्। एषोऽग्रस्य देशो विज्ञातो, यदुपांश्वन्तर्य्यामाभ्यामूर्ध्वं, पुरस्ताचैन्द्रवायवस्य। कथमिव कृत्वा। पूर्वेण वचनेन ऐन्द्रवायवाग्रा ग्रहाः प्रकृताः, यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादिति। तत्रैन्द्रवायवाग्रानुद्दिश्य तेषां ग्रहणं विहितम्। तेनैव विहितत्वाच्च पुनराश्विनाग्रेषु शुक्राग्रेषु मन्थ्यग्रेषु च ग्रहणं विधीयते। अतो वाक्येन तदग्रताविधीयते। सा पुनरैन्द्रवायवाग्राणां प्रकृतत्वादभिचरतः शुक्राग्रान् किं कुर्यात्। गृह्णीयादिति प्रकृतेनाभिसम्बध्यते। शुक्राग्रान् ग्रहानिति नास्ति सम्बन्धो ग्रहणशब्दाभावात्। केन तर्हि सम्बन्धः। प्रकृतेनैन्द्रवायवाग्रशब्देन, शुक्राग्रान् गृह्णीयाद्, ऐन्द्रवायवाग्रानिति। के ते ग्रहाः ? इति तत्रोक्तम्। तस्मादैन्द्रवायवस्य पुरस्तात् प्रतिकर्ष इति ॥ ७० ॥ सि० ॥

तुल्यधर्मत्वाच्च ॥ ७१ ॥

तुल्यधर्माश्चैते ऐन्द्रवायवाग्रैः। तत्र धारासंयोगो दृश्यते। तस्माद् धाराग्रहानुद्दिश्यैतदग्रता विधीयते ॥ ७१ ॥

तथा च लिङ्गदर्शनम् ॥ ७२ ॥

धारयेयुस्तं यं कामाय गृह्णीयुः। ऐन्द्रवायवं गृहीत्वा सादयेत्। अथ तं सादयेद् यं कामाय गृह्णीयुरिति काम्यस्य धारणानन्तरमैन्द्र-

वायवस्य ग्रहणं दर्शयति । तस्मादैन्द्रवायवस्य पुरस्तात् प्रतिकर्ष इति ॥ ७२ ॥ युक्तिः ॥ आश्विनादीनां ग्रहाणामैन्द्रवायवस्य पुरस्तात् प्रतिकर्षाधिकरणम् ॥ २० ॥

सादनं चापि शेषत्वात् ॥ ७३ ॥

इदमाम्नायते— आश्विनाग्रान् गृह्णीयादामयाविनः, शुक्राग्रान् गृह्णीयादभिचरतः, मन्थ्यग्रान् गृह्णीयादभिचर्य्यमाणस्येति । पुरस्तादैन्द्रवायवस्य प्रतिकर्ष इत्युक्तम् । तत्रायमर्थः सांशयिकः । किं सादनमपि प्रतिकृष्यते, न ? इति । अवचनान्नेति ब्रूमः । शब्दप्रमाणका वयम् । शब्दश्च ग्रहणस्य प्रतिकर्षमाह, न सादनस्य । तस्मान्न सादनं प्रतिकृष्यत इति ॥ एवं प्राप्ते ब्रूमः । सादनमपि प्रतिकृष्यत इति । कुतः । ग्रहणशेषो हि सादनम् । ग्रहणं हि प्रदानार्थम् । तदनेकस्य द्रव्यस्य युगपत् प्राप्तमसादयित्वा न शक्यं युगपद् होमार्थं कर्त्तुम् । सादनेन ग्रहणं होमयोग्यं भवति । तस्माद् ग्रहणशेषः सादनमिति ग्रहणे प्रतिकृष्यमाणेऽवश्यं प्रतिकृष्टव्यमिति ॥ ७३ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ ७४ ॥

लिङ्गमपि दृश्यते, यथा सादनं प्रतिकृष्यते इति । किं लिङ्गम् । धारयेयुस्तं यं कामाय गृह्णीयुः । ऐन्द्रवायवं गृहीत्वा सादयेत्, अथ तं सादयेद् यं कामाय गृह्णीयुरिति सादनस्यापि प्रतिकर्षं दर्शयति ॥ ७४ ॥ युक्तिः ॥ सादनस्यापि प्रतिकर्षाधिकरणम् ॥ २१ ॥

प्रदानश्चापि सादनवद् ॥ ७५ ॥

इदमाम्नायते— आश्विनाग्रान् गृह्णाति आमयाविनः, शुक्राग्रानभिचरतः, मन्थ्यग्रानभिचर्य्यमाणस्येति । तत्र ग्रहणे प्रतिकृष्यमाणे सादनं प्रतिकृष्यते इत्युक्तम् । अथेदानीमिदं सन्दिह्यते— ग्रहणे प्रतिकृष्यमाणं प्रदानं प्रतिकृष्यते ? न ? इति । किं प्राप्तम् । प्रतिकृष्यते इति । कुतः । सम्बन्धात् । सम्बद्धं हि ग्रहणं प्रदानञ्च । प्रदातुं हि तद् गृह्यते । तथा हि दृष्टार्थं तद् भवति । इतरथा यत् सादनादूर्ध्वं तदऽदृष्टार्थं भवेत् । न चेदमदृष्टार्थम् । तस्मादितरस्मिन् काले प्रदानं क्रियते । तत्र ग्रहणं कर्त्तव्यम् । एवं चेद् यत्र ग्रहणं तत्र प्रदानमपि भवितुमर्हतीति सम्बन्धात् । सादनवत् । यथा ग्रहणे प्रतिकृष्यमाणे सादनं प्रतिकृष्यते, एवं प्रदानमपीति ॥ ७५ ॥ पूर्व० ॥

न वा प्रधानत्वाच्छेषत्वात् सादनं तथा ॥ ७६ ॥

न चैतदस्ति, प्रदानं प्रतिकृष्यत इति । प्रधानं हि तत् । न हि तद् ग्रहणस्योपकारकम् । तस्मान्न प्रतिकृष्यते । यदुक्तं, सादनवदिति । शेषो हि सादनम् । तस्मात् प्रतिकृष्यते ॥७६॥ प्रदानस्याऽप्रतिकर्षाधिकरणम् ॥ २२ ॥

त्र्यनीकायां न्यायोक्तेष्वाम्नानं गुणार्थं स्यात् ॥ ७७ ॥

अस्ति द्वादशाहे त्र्यनीका, ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, दशमं चाहः, अथेतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाग्रयणाग्रम्, अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाऽऽग्रयणाग्रम्, अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रमिति । तत्र प्रथमद्वितीययोरह्नोरैन्द्रवायवाग्रता शुक्राग्रता च श्रूयते । सा चोदकेनैव तयोः प्राप्ता, रथन्तरसामत्वाद् बृहत्सामत्वाच्च । तत्र सन्देहः। किमुदितमनुवदितुं पुनः श्रूयते ? किमन्यत् परिसङ्ख्यातुम्? उतार्थवादार्थम् ? अथवा समानविध्यर्थम् ? । किं प्राप्तम् । अर्थवादायेति । कुतः । उदितमनुवदितुं हि उच्यमाने प्रवृत्तिविशेषक्रिया नास्ति । त्रिदोषा परिसङ्ख्या । तस्मादर्थवादायेति । कः पुनरत्र गुणवादः ? । औचित्यमाग्रयणाग्रत्वं हि तृतीयेऽहनि न्याय्यम् । कथमिव । प्रथमद्वितीययोरह्नोरैन्द्रवायवाग्रता च उदिता, न तृतीयेऽहनि । तत्र त्वाग्रयणाग्रता न्याय्या इति ॥ ७७ ॥ पूर्व० ॥

अपि वाहर्गणेष्वग्निवत् समानविधानं स्यात् ॥ ७८ ॥

अपि वेति पक्षव्यावृत्तिः, न गुणार्थं श्रवणं, समानविध्यर्थमिति । न शक्यं वदितुं चोदकेन प्राप्तम् । तत्र पुनर्वचनमनर्थकम् । तस्मात् तदन्यार्थमिति । कथन्तर्हि शक्यम् । वाक्येनेदं ज्योतिष्टोमे रथन्तरसाम्नि प्रवृत्तं चोदकेन प्राप्यते । तस्मात् समानविधिकं करिष्यामीति पुनरुच्यते । अग्निवत् । यथा अथातोऽग्निष्टोमेनैवानुयजति, तमुक्थेन, तमतिरात्रेण, तं चतूरात्रेण, तं पञ्चरात्रेण, तं सप्तरात्रेण, तमष्टरात्रेण, तं नवरात्रेण, तं दशरात्रेण, तमेकादशरात्रेणेति । प्रयोजनं पक्षोक्तं, न परिसङ्ख्या भवतीति ॥ ७८ ॥ सिद्धान्तः ॥ त्र्यनीकायामैन्द्रवायवाग्रतोक्तेः समानविध्यर्थताधिकरणम् ॥ २३ ॥

द्वादशाहस्य व्यूढसमूढत्वं पृष्ठवत् समानविधानं स्यात् ॥ ७९ ॥

द्विविधो द्वादशाहः, व्यूढः समूढश्च । समूढस्तावत् । ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, दशमं चाहः, अथेतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाग्रयणाग्रम्, अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम्, अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रमिति । अथ व्यूढः, ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, अथेतरेषां दशानामह्नामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथ द्वे आग्रयणाग्रे, अथैन्द्रवायवाग्रम्, अथ द्वे शुक्राग्रे, अथाग्रयणाग्रम्, अथ द्वे ऐन्द्रवायवाग्रे इति । तत्र सन्देहः । किमुभयप्रकारमपि द्वादशाहं प्रकृत्य धर्मा आम्नाताः ? उत समूढं प्रकृत्य आम्नातास्तद्विकारो व्यूढ इति । किं प्राप्तम् । द्वादशाहस्य व्यूढसमूढत्वं समानविधानं स्यात् । कुतः । उभयप्रकारस्य प्रकृतत्वाद् न गम्यते विशेषः, कस्य धर्म्माः, कस्य नेति । तस्मात् समानविधानौ । पृष्ठवत् । यथा बृहद्रथन्तरे पृष्ठे प्रकरणस्य तुल्यत्वात् समानधर्म्मणी, एवं व्यूढसमूढं स्यादिति ॥ ७९ ॥ पूर्व० ॥

व्यूढो वा लिङ्गदर्शनात् समूढविकारः ॥ ८० ॥

वाशब्दः पक्षं व्यावर्त्तयति । न व्यूढसमूढौ समानविधानौ, किन्तु व्यूढः समूढविकारः स्यात् । कुतः । लिङ्गदर्शनात् । लिङ्गमिदं भवति, ऐन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहरिति व्यूढे श्रूयते । न च व्यूढे चतुर्थेऽहनि ऐन्द्रवायवाग्रता । का तर्हि आग्रयणाग्रता । तत्र ऐन्द्रवायवस्य वा एतदायतनमिति वचनं नावकल्पते । यदि, व्यूढः समूढविकारः, ततः प्रकृतिमपेक्ष्योपपद्यते वादः, ऐन्द्रवायवस्य एतदायतनं प्राप्तम् । तत्र आग्रयणस्योच्यते इति । तस्माल्लिङ्गदर्शनाद् व्यूढः समूढविकार इति ॥ ८० ॥ सि० ॥

कामसंयोगात् ॥ ८१ ॥

यः कामयेत बहु स्यां प्रजायेयेति काम्यो वा नैमित्तिको वा नित्यमर्थं विकृत्य निविशते, यथाऽक्ष्यामये मुद्गौदनभोजनं निवातशय्या चेति ॥ ८१ ॥ युक्तिः ॥

तस्योभयथा प्रवृत्तिरैककर्म्यात् ॥ ८२ ॥

इदं प्रयोजनसूत्रम् । तस्य उभयप्रकारस्याहर्गणेषु प्रवृत्तिरविशेषेण । ऐककर्म्यात् । यथा पूर्वः पक्षः । यथा तर्हि सिद्धान्तः । यत्र वचनं लिङ्गञ्च तत्र व्यूढः प्रवर्त्तते, अन्यत्राविशेषेण समूढ इति ॥ ८२ ॥ प्रयोजनम् ॥ व्यूढद्वादशाहस्य समूढविकारत्वाधिकरणम् ॥२४

एकादशिनवत् त्र्यनीका परिवृत्तिः स्यात् ॥ ८३ ॥

द्वादशाहे समाम्नायते– ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, दशमं चाहः, अथेतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाग्रयणाग्रम्, अथैन्द्रवायवाग्रम, अथ शुक्राग्रम्, अथाग्रयणाग्रम, अथैन्द्रवायवाऽग्रम, अथ शुक्राग्रम्, अथ आग्रयणाग्रमिति । तद् गवामयने चोदकेन प्राप्तम् । तत्र बहूनि त्र्यनीकानि परिवर्त्तयितव्यानि । तत्रार्थप्राप्तोऽभ्यासः । अथेदानीमभ्यासे सन्देहः, किं दण्डकलितवदभ्यासः कर्त्तव्यः ? उत स्वस्थानविवृद्धिरिति । कथं दण्डकलितवत् स्यात्, कथं वा स्वस्थानविवृद्धिरिति । यदि अह्नामधिकारस्तत आद्येषु नवसु अहःसु परिसमाप्तेषु शिष्टेष्वपि त्र्यनीकां चोदकः प्रापयतीति उपस्थितमिदं भवतीति, ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रमिति । तेष्वपि नवसु परिसमाप्तेषु पुनरिदमेवोपतिष्ठते, ऐन्द्रवायवाग्रं प्रथममहरिति । एवं दण्डकलितवदावृत्तिः।अथाहरधिकारो नास्ति, ततः प्रायणीयोदयनीययोरन्तरं नवभिरनीकैः पूरितमिति गवामयनेऽपि नवभिरनीकैः पूरयितव्यं स्यात् । तत्र पूर्णे पुनरावृत्तिर्नास्तीति दण्डकलितवद् न स्यात् । न च वृद्ध्या विना तदन्तरं पूर्य्यते इति स्वस्थानविवृद्धिरागतेति ॥

किं पुनः प्राप्तम् । दण्डकलितवदावृत्तिरिति । तत्रैतद्वर्ण्यते, अहरधिकारोऽत्रेति । एवं हि आम्नायते–ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम् । प्रकृतत्वादहरिति गम्यते। तस्मादहरधिकारः। अतोऽवगच्छामः, दण्डकलितवदावृत्तिरिति । आवृत्तिन्यायानां दण्डकलितं न्याय्यम् । तथा क्रमानुग्रहो भवति। तद्यथा, कश्चिदुच्यते– अनुवाकस्त्रिः पठ्यतामिति । दण्डकलितवदसौ पठ्यते,क्रमानुग्रहाय । एवमिहापि द्रष्टव्यम्।यथास्मिन्नेव गवामयने एकादशिनी अभ्यस्यमाना दण्डकलितवदभ्यस्यते, न स्वस्थानविवृद्ध्येति ॥ ८३ ॥ पूर्व० ॥

स्वस्थानविवृद्धिर्वा अह्नामप्रत्यक्षसङ्ख्यत्वात् ॥ ८४ ॥

स्वस्थानविवृद्धिर्वा, न दण्डकलितवदावृत्तिः । तत्र इदं वर्ण्यते, नाहरधिकार इति । कुतः । अह्नामप्रत्यक्षसङ्ख्यत्वात् । अप्रत्यक्षा अह्नां सङ्ख्या नवानामह्नामिति । ऐन्द्रवायवाग्रमिति च विधीयमानमिति । कथमहर्न विधीयते इति । वाक्यभेदप्रसङ्गात् । ऐन्द्रवायवाग्रं प्रथमं भवति । तच्च अहः, नाहःसङ्घात इति वाक्यं भिद्येत । तस्मादनुवादमात्रमहर्ग्रहणम् । एवञ्चेत् क्रमानुग्रहाय स्वस्थानविवृद्धिराश्रयणीया । आग्रयणाग्रान् कृत्वा ऐन्द्रवायवाग्राः कर्त्तव्या इति ॥ ८४ ॥ सि० ॥

पृष्ठयावृत्तौ चाग्रयणस्य दर्शनात् त्रयस्त्रिंशे परि वृत्तौ पुनरैन्द्रवायवः स्यात् ॥ ८५ ॥

इतश्च पश्यामः, स्वस्थानविवृद्धिरिति । कुतः । उत्तरस्मिन् पक्षसि पृष्ठयावृत्तौ आग्रयणाग्रताया दर्शनं भवति त्रयस्त्रिंशेऽहनि । कथम् । जगतीं वै छन्दांसि प्रत्यवरोहन्ति आग्रयणं वै ग्रहाः, बृहत् पृष्ठानि, त्रयस्त्रिंशं स्तोमा इति । तदेतत् स्वस्थानविवृद्धावकल्पते, न दण्डकलितवदावृत्तौ । कथम् । पूर्वस्मिन् पक्षसि त्र्यनीका त्रिः परिवर्त्तते, तस्मिन्ननावृत्तैव सा आग्रयणाग्रेषु परिसमाप्यते, उत्तरमपि पक्षो व्यावृत्तमिति कृत्वा आग्रयणाग्रेषु आरभ्यते । तत्र प्रथमे नवमभागे त्रयस्त्रिंशमहरिति कृत्वा तदाग्रयणाग्रं भवति । तत्रैतद्दर्शनमुपपद्यते । दण्डकलितवत् पुनरावृत्तौ सत्यां तदैन्द्रवायवाग्रं स्यात् कथम् । त्रिवृत आरभ्य नवकैरहःसु सङ्कल्प्यमानेषु पूर्वस्मिन् पक्षसि सप्त परिशिष्यन्ते । तत्र सप्तमे ऐन्द्रवायवाग्रता, शुक्राग्रो विषुवान्, आग्रयणाग्रः प्रथमः स्वरसामा, ततो विश्वजिदिति त्र्यनीका समाप्ता । त्रयस्त्रिंशमहरैन्द्रवायवाग्रं प्राप्नोति । तत्रैतद्दर्शनं विरुध्यते । तस्मात् स्वस्थानविवृद्धिरिति ॥ ८५ ॥ युक्तिः ॥

वचनात् परिवृत्तिरैकादशिनेषु ॥ ८६ ॥

अथ यदुक्तम्, ऐकादशिनवदिति । युक्तं, यद् ऐकादशिनेषु दण्डकलितवदावृत्तिरिति । वचनं हि तद्भवति । वारुणमन्ततः पुनः पर्य्यावृत्तेषु आग्नेयमेव प्रथमेऽहनि आलभेतेति वचनाद् दण्डकलितवदावृत्तिः पुनःपर्य्यावृत्तेष्विति । सा द्वादशाहे असम्भवन्ती गवा-

भयनं विशति । किमिव वचनं न कुर्य्यात् । न हि वचनस्यातिभारोऽस्ति ॥ ८६ ॥ आ० नि० ॥

लिङ्गदर्शनाच्च ॥ ८७ ॥

लिङ्गं खलु अप्येवमर्थं दर्शयति, यथा दण्डकलितवद् ऐकादशिना आवर्त्तन्ते इति प्राणा वा एकादशिना यदेकादशिनीभिरीयुरहानि अतिरिच्यन्ते पशवो वा इति । स्वस्थानविवृद्धौ नास्त्यतिरेकः, दण्डकलितवदावृत्तौ न्यूनताऽतिरिक्तता वा भवति । तस्मादपि पश्यामः, ऐकादशिनेषु दण्डकलितवदावृत्तिरिति ॥ ८७ ॥ हेतुः ॥ संवत्सरसत्रेऽनीकानां विवृद्ध्यधिकरणम् ॥ २५ ॥

छन्दोव्यतिक्रमाद् व्यूढे भक्ष-पवमान-परिधि-कपालस्य मन्त्राणां यथोत्पत्तिवचनमूहवत् स्यात् ॥ ८८ ॥

अस्ति द्वादशाहः, समूढो व्यूढश्च । तत्र व्यूढः, ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, अथेतरेषां दशानामह्नाम् ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथ द्वे आग्रयणाग्रे, तथैन्द्रवायवाग्रम्, अथ द्वे शुक्राग्रे, अथाग्रयणाग्रम्, अथ द्वे ऐन्द्रवायवाग्रे इति ॥ तत्र व्यूढे इदं समामनन्ति, छन्दांसि वाऽन्योन्यस्य लोकमभिध्यायन्ति गायत्री त्रिष्टुभः त्रिष्टुब् जगत्याः जगती गायत्र्या इति । तत्र सन्ति भक्षपवमानपरिधिकपालानि । भक्षास्तावद्, भक्षेहि मा विश दीर्घायुत्वाय शन्तनुत्वाय एहि वसो पुरोवसो प्रियो मे हृदये भवाऽश्विनोर्बाहुभ्यां सध्यासं वसुमद्गणस्य रुद्रवद् गणस्यादित्यवद् गणस्य सोमदेवते मतिविदः प्रातःसवनस्य माध्यन्दिनसवनस्य तृतीयसवनस्य गायत्रच्छन्दसस्त्रिष्टुप्छन्दसो जगतीच्छन्दसोऽग्निष्टुत इन्द्रपीतस्य मधुमत उपहूत उपहूतस्य भक्षयामीति । तथा पवमानः, श्येनोऽसि गायत्रच्छन्दाः सुपर्णोऽसि त्रिष्टुप्छन्दाः सखासि जगतीच्छन्दाः, अनु त्वारभे स्वस्ति मा संपारय इति च । तथा परिधयः, गायत्रो मध्यमः परिधिः, त्रैष्टुभो दक्षिणो जागत उत्तर इति । तथा कपालानि अष्टाकपालः प्रातःसवने एकादशकपालो माध्यन्दिनीयो द्वादशकपालस्तार्त्तीयसवनिक इति । तत्र सन्देहः । किं छन्दोव्यतिक्रमे व्यतिक्रमो भक्षमन्त्राणां, भक्षणस्य च, पवमानमन्त्राणां पवमान-

स्य च, तथा परिधीनां कपालानाञ्च, अथ वा मन्त्राणां छन्दोव्यतिक्रमः ? इति, किं प्राप्तम् । मन्त्राणां मन्त्रार्थानाञ्च । कुतः । अविशेषवचनात् । अविशेषेण भवति वचनम् । छन्दांसि वा अन्योन्यस्य लोकमभिध्यायन्ति गायत्री त्रिष्टुभः त्रिष्टुब् जगत्याः जगती गायत्र्या इति । न विशेषः श्रूयते मन्त्राणां व्यतिक्रम इति । तस्मान्मन्त्राणाम् अर्थानाञ्चेति । अतो मध्यमः परिधिर्दक्षिणस्थाने स्थापयितव्यः, दक्षिण उत्तरस्य, उत्तरो मध्यमस्येति । अष्टाकपालो माध्यन्दिनीयः कार्य्यः, एकादशकपालस्तार्त्तीयसवनिकः द्वादशकपालः प्रातःसवनीय इति । तथा प्रातःसवनीयस्य भक्षो माध्यन्दिनस्य भक्षणस्य स्थाने भक्षयितव्यः, माध्यन्दिनस्तार्त्तीयसवनिकस्य, तार्त्तीयसवनः प्रातःसवनीयस्येति । तथा बहिष्पवमानो माध्यन्दिनस्य पवमानस्य लोके माध्यन्दिन आर्भवस्य आर्भवो बहिष्पवमानस्येति ॥ एवं प्राप्ते ब्रूमः । नाविशेषेण च्छन्दसां व्यतिक्रमः स्यात् । मन्त्रगतो हि एष व्यतिक्रमः । मन्त्रगतान्येव व्यतिक्रमेयुः । किं कारणम् । शक्यन्ते मन्त्रगतानि विपर्य्यसितुं भक्षादयः पुनर्विपर्य्यस्ता अपि त एवेति । माध्यन्दिनस्य भक्षस्य कालेऽपि प्रातःसवनीयो भक्षो भक्ष्यमाणो नैव त्रैष्टुभः कृतः स्यात् । एवं सर्वत्र । कथम् । स्वकालेऽपि हि असौ न गायत्रः, गायत्री हि त्रिष्टुभः स्थानमभ्येति नागायत्री । न भक्षादयो गायत्रादयः । तस्मादसम्भवो भक्षादीनां व्यतिक्रमणस्य । मन्त्रगतानि तु छन्दांसि शक्नुवन्ति अन्योन्यस्य लोकं व्यतिक्रमयितुम । तस्मान्मन्त्रगतानां छन्दसां व्यतिक्रम इति ॥ ८८ ॥ व्यूढे मन्त्राणां छन्दोव्यतिक्रमाधिकरणम् ॥ २६ ॥

इति श्रीभट्टशबरस्वामिविरचिते मीमांसाभाष्ये दशमाऽध्यायस्य पञ्चमः पादः ॥ १० ॥ ५ ॥

अथ दशमाध्याये षष्ठः पादः ॥ १० ॥ ६ ॥

एकर्चस्थानि यज्ञे स्युः स्वाध्यायवत् ॥ १ ॥

सामानि उदाहरणम् । रथन्तरं बृहद् वैरूपं वैराजं शाक्करं रैवतमिति । तत्र संशयः । किमेकस्याम् ऋचि गानं कर्त्तव्यम् ? उत तृचे इति । किं प्राप्तम् । एकर्चस्थानि यज्ञे स्युः । एकस्यामृचि गातव्या-

नि। एवं स्वाध्याये गीतानि। यथा स्वाध्याये गीतानि, तथा कर्मणि गातव्यानि। कर्मणि स्वाध्याये च अवैलक्षण्यं न्याय्यम्। कर्माणि कर्त्तुं स्वाध्यायमभ्यस्यन्ति। अतो यथा अभ्यस्तं तत्र प्रयोक्तव्यम्। तस्मादेकस्याम् ऋचि गीयेरन्। एकर्चोत्पत्तीनि उदाहरणं, न तृचोत्पत्तीनि। यथाह सिमा-सन्तनि-यतय-एवागपत्य शाकरवर्णमिति ॥ १ ॥ पूर्व० ॥

तृचे वा लिङ्गदर्शनात् ॥ २ ॥

न चैतदेवम्, एकस्यामेव गातव्यानीति। कुतः। लिङ्गदर्शनात्। लिङ्गं भवति। एवमाह, अष्टाक्षरेण प्रथमाया ऋचः प्रस्तौति द्व्यक्षरेणोत्तरयोरिति। न हि एकस्याम् ऋचि प्रथमोत्तरासम्बन्धो भवति। तस्मात् तृचे गातव्यानीति। अथेदमपरं लिङ्गम्। ऋक् साम उवाच मिथुनीसम्भवावेति, सोऽब्रवीत् न वै त्वं ममालमसि जायात्वं वेदो मे महिमेति। ते द्वे भूत्वा ऊचतुः, सोऽब्रवीन्नैव वां ममालं स्थो जायात्वे वेदो मे महिमेति। तास्तिस्रो भूत्वा ऊचुः, सोऽब्रवीत् सम्भवाम इति। तस्मादेकं साम तृचे क्रियते स्तोत्रीयमिति ॥ आह, लिङ्गमिदं, प्राप्तिरुच्यतामिति। तदभिधीयते। कृत्स्नेऽपि ऋग्वेदे न प्रथमा नाम काचिदृगस्ति, तथा उत्तरे इति, व्यवस्थाकृतं प्रथमात्वम्, उत्तरात्वमिति प्रथमाया ऋचोऽष्टाक्षरेण प्रस्तोतव्यं, द्व्यक्षरेण चोत्तरयोरिति। तस्मिन् वचने सति ऋचस्त्रित्वमापद्यते। तथा, यद्यपि अनुवादसरूपोऽयं शब्दः, तस्मादेकं साम तृचे क्रियते स्तोत्रीयमिति तथापि ऋक् साम उवाच इति पुरस्तादर्थवादप्ररोचनया विदधातीति गम्यते। तदुक्तं, वचनानि त्वपूर्वत्वात् (३अ० ५पा० २१ सू०) इति ॥२॥ सिद्धान्तः ॥ रथन्तरादीनां साम्नां तृचे गानाधिकरणम् ॥१॥

स्वर्दृशं प्रति वीक्षणं कालमात्रं परार्थत्वात् ॥ ३ ॥

ईश्वरं वै रथन्तरमुद्गातुश्चक्षुः। प्रमथिता रथन्तरे प्रस्तूयमाने सम्मीलेत् स्वर्दृशं प्रति वीक्षेत। अत्र संशयः। किं स्वर्दृशं प्रति वीक्षणम् अङ्गप्रयोजनसम्बन्धः, उत कालार्थः संयोगः? इति। तत एतावत् तावन्नः परीक्ष्यं, किं रथन्तरे प्रस्तूयमाने सम्मीलेदित्यस्य शेषः स्वर्दृशं प्रति वीक्षेतेति, उत, स्वर्दृशमित्येवमादि पृथग्वाक्यमिति। किं प्राप्तम्। अङ्गप्रयोजनसम्बन्ध इति पृथग्वाक्यमिति।

कुतः । भेदेनावगमात् । भिन्नमिदमुपलभ्यते, स्वर्दृशं प्रति वीक्षेतेति । ननु अभिन्नमपि लक्ष्यते, रथन्तरे प्रस्तूयमाने सम्मीलेदिति विधाय, स्वर्दृशं प्रति वीक्षेतेत्यनुवदतीति । उच्यते । उभयावगतौ भेदो ग्रहीतव्यः । स भेदो गृह्यमाणेन तेन विरुध्यते । अन्यतरगतिस्तु विध्यनुवादयोर्विरोधात् । तत्र विधिर्न्याय्योऽपूर्वत्वात् । वादमात्रं ह्यनर्थकम् (१ अ० २ पा० १९ सू०) विध्यवगमाच्च । विधिश्चावगम्यते, वीक्षेतेति । श्रुतिश्चैवमनुगृह्यते, स्वर्दृशं प्रति वीक्षेतेति स्वर्दृक्शब्दं प्रति वीक्षणार्थो विधीयते । स्वर्दृक्शब्देन सह वीक्षणस्य साक्षात्सम्बन्धः । इतरथा स्वर्दृक्शब्दः कालं लक्षयेत् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या । तस्मादङ्गप्रयोजनसम्बन्धः ॥

अथ वा, स्वर्दृशं प्रति वीक्षेतेत्येवमङ्गप्रयोजनसम्बन्धः । स्वर्दृक्शब्दो वीक्षणस्य साधनमिति । तथा लिङ्गमप्यनुगृहीतं भवति । स्वर्दृक्शब्दश्रवणाद् वाक्यमपि । तस्मादङ्गप्रयोजनसम्बन्ध एवेति ॥

एवं प्राप्ते ब्रूमः । स्वर्दृशं प्रति वीक्षणं कालमात्रं स्यात् परार्थत्वात् । नैतदेवम् अङ्गप्रयोजनसम्बन्ध इति । किन्तर्हि । स्वर्दृक्शब्देन वीक्षणस्य कालार्थः सम्बन्धः स्यात् । कुतः । परार्थत्वात् साम्नः । रथन्तरं पृष्ठं भवतीति पृष्ठस्तुतौ हि साम विनियुज्यते । तच्च साम पदानां स्तुतिं निर्वर्त्तयतां संश्लेषादिभिर्विशेषैः स्तुतिपदाक्षराण्युपदर्शयत् स्तुतिमभिनिर्वर्त्तयतीत्युच्यते । एवंचेत् साम्नि स्तुतौ विनियुज्यमाने यानि, तानि परस्परस्सव्यपेक्षाणि ऋक्पदानि स्तुतौ विनियुक्तानि सम्भवन्तीत्यतः स्वर्दृक्शब्दस्य तन्मध्यपाठात् स्तुतौ विनियोग उक्तो भवतीत्यतः परार्थत्वादिह कालार्थः संयोग इति अध्यवसीयते ॥

ननु मन्त्रे समाम्नानमात्रं, रथन्तरोपदेशाच्च पदोपदेशमानुमानिकं बाधित्वा एतद्वाक्यं प्रत्यक्षमङ्गप्रयोजनसम्बन्धमेव प्रकल्पयेदिति ॥ उच्यते । तद्धि बाधकं भवति । यदबाधमानमप्रयोजनं भवति । न चैतदबाधमानमनर्थकं, क्रियासु कालपरिच्छेदेनार्थवत्त्वात् । मन्त्रे समाम्नानसामर्थ्यात् । सामोपदेशाच्च स्तुतिसम्बन्धः साक्षात् । वाक्यात् क्रियाकारकसम्बन्धः । उभयोः प्रमाणावगतत्वादुभयसम्बन्धो न विरुध्यते इति यद्युच्येत । तन्न । यो हि मन्त्रवाक्याद् व्यवच्छिन्नस्य क्रियाकारकसम्बन्धमवगच्छति, नाऽसौ सकृदुच्चरितस्य

स्तुतिसम्बन्धमप्यवगच्छति । यद्यवगच्छेत्, पुनरुच्चारयेद् नान्यथा । तस्मात् तस्यामेव स्तुतौ क्रियासम्बन्धं कारकसम्बन्धो, न स्तुतिसम्बन्धे । कारकविशेषणाभावात् । तदेवं मन्त्राम्नानस्य सामोपदेशवाक्यस्य स्वर्दृशं प्रति वीक्षेतेत्यस्याविरोधे साधिते कालार्थः संयोग इति । अत उच्यते, कालार्थः संयोग इति ॥

अथ यदुक्तं, भेदाभेदयोर्भेदो ग्रहीतव्यः । विध्यनुवादयोर्विधिर्ज्यायान् । विधिप्रत्ययदर्शनाच्चैवमेवावगम्यते इति । अत्र ब्रूमः । सत्यं, विध्यनुवादयोर्विधिर्ज्यायान्, अपूर्वार्थप्रकल्पकत्वादिति । यदि तु प्रमाणान्तरप्राप्तिर्नावगम्यते । यत्र तु पदान्तरादर्थाद्वा प्राप्तिरवगम्यतेऽर्थस्य । तत्र प्रमाणान्तरप्रतीतत्वाच्छब्द उच्चरन्ननुवाद इत्यवगम्यते । अत्र च स्वार्थप्रवृत्त्या पुरुषस्य दर्शनमस्ति, नापश्यन् पुरुषं क्रियासु व्यापारमुपगन्तुमुत्सहते, इत्यर्थप्राप्ते विधिप्रत्ययोऽप्यनुवाद इत्यवगम्यते । ननु रथन्तरे प्रस्तूयमाने सम्मीलेदिति प्रत्यक्षवाक्यसमर्थप्राप्तं पुरुषस्य दर्शनं बाधेत । यथा प्रजापतिव्रतानि पौरुषेयीं स्वेच्छाप्रवृत्तिं वचनसामर्थ्यान्निरुन्धन्ति तद्वदिति । नेत्यवगम्यते । कथम् । क्रियाप्रारम्भसम्बन्धाद् रथन्तरे प्रस्तूयमाने इत्युच्यते । तदतीते प्रस्तावे वचनार्थस्य कृतार्थत्वादर्थप्राप्तं न वारयितुमर्हति ॥

अथ यदुक्तं, स्वर्दृक्शब्दवीक्षणयोर्वाक्येन सम्बन्ध इति, वाक्याऽर्थत्वाद् दृशिप्रयोगाच्च लिङ्गादर्शनक्रियासामर्थ्यमस्तीति । अत्र ब्रूमः । प्रतिशब्दः कर्म्मप्रवचनीयत्वात् स्वर्दृक्शब्दस्य लक्षणतामाचष्टे श्रुत्यैव, श्रुतिश्च लिङ्गवाक्ययोर्बाधिका समधिगतैव । अथ वा, नात्र वाक्यं बाध्येत । वाक्यं हि सम्बन्धप्रत्यायकं, यथासम्भवमनेकविधः सम्बन्धो वाक्याद् गम्यते । क्वचित् क्रियाकारकसम्बन्धः, क्वचिद्विशेषणविशेष्यसम्बन्धः, क्वचिल्लक्ष्यलक्षणसम्बन्धः, इत्येवम्प्रकाराः, सम्बन्धविशेषा इति । तत्रेह लक्ष्यलक्षणसम्बन्धः प्रयोजनप्रयुक्त इति गृह्यते एव सम्बन्धविशेष इति, न वाक्यं बाध्यते । यथा लोके, वृक्षं प्रति विद्योतते इति न विद्योतनस्य वृक्षस्य च साध्यसाधनभावो गम्यते इति । अन्यतः प्रवृत्तस्य विद्योतनस्य वृक्षश्चिह्नभावाय उपादीयते इति तद्वदिहापि पुरुषार्थतया प्रवृत्तस्य दर्शनस्य स्वर्दृक्शब्दो लक्षणतयोपादीयते इति न वाक्यानर्थक्यम् । न हि लक्ष्यलक्षणयोरनुच्चार्य्यमाणयोः सम्बन्धोऽवगम्यते इति ॥

यदपि, दृशिप्रयोगाल्लिङ्गानुग्रह इति । तदपि न समर्थमिवेप्सितस्यार्थस्य पश्यामः । स्वार्थो हि दृशिः प्रयुज्यमानो दर्शनमवगमयेद् न परार्थः । स्वर्दृक्शब्दे तु सोपपदो दृशिः कर्तृत्वे गुणभूतोऽवगम्यते, कर्त्ता तु प्रधानभूतः । न च कर्ता प्रत्याय्यमानो वीक्षणलिङ्गत्वेन कल्प्यते, दृशेरत्यन्तपारतन्त्र्यात्, कर्त्रभिधानञ्च सन्नयं नैव वीक्षतिना सामञ्जस्येन सम्बन्धमुपैति । यदि तावदयमर्थ उपदिश्यते, स्वर्दृशं वीक्षेतेति, कोऽसौ स्वर्दृग्, यं प्रति वीक्षणमुपदिष्टम् ? इत्यविजानन्तो नैव क्रियामध्यवस्येम । अथायमर्थः, स्वर्दृशा वीक्षणं निर्वर्त्तयेदिति । तथाप्यप्रज्ञानात् स एव दोषः । तदेवम्प्रकारे सम्बन्धे आञ्जस्येनाऽभ्युपगम्यमाने न लिङ्गं न च वाक्यमनुगृह्यते । लक्षणसम्बन्धेऽनुवीक्षणस्यैतदुच्चारणकाले वीक्षेतेति भवति कयाचिद् युक्त्या सम्बन्धः । स्तुतिसम्बन्धश्च कर्त्रभिधानस्यापि सतो न विरुध्यते । सामानाधिकरण्यादीशानेन विशेषणविशेष्यभावसम्बन्धम् अभ्युपैति, ईशानं स्वर्दृशं तस्थुष इति । अतो वदामः, स्तुत्यर्थस्य सतः स्वर्दृशं प्रति वीक्षेतेत्यत्र कालार्थः सम्बन्ध इति ॥ किं भवति प्रयोजनम् ? । अङ्गाङ्गिसम्बन्धे सति, यदा रथन्तरमुत्तरयोर्गायतीत्यतिदेशः, तदैतदुपतिष्ठते, रथन्तरे प्रस्तूयमाने सम्मीलेदिति । उत्तरयोस्तु स्वर्दृक्शब्दाभावादर्शनानियमः पूर्वपक्षे । सिद्धान्ते तु लक्षणसम्बन्धे सति तावति भागे कालाहानात् स्वर्दृशं प्रति वीक्षेतेति नियमः सिद्धो भवति ॥ ३ ॥ स्वर्दृक्शब्देन वीक्षणस्य कालार्थताऽधिकरणम् ॥ २ ॥

पृष्ठ्यस्य युगपद्विधेरेकाहवद् द्विसामत्वम् ॥ ४ ॥

इदमाम्नायते, पृष्ठ्यः षडहो बृहद्रथन्तरसामा इति । तत्रायमर्थः सांशयिकः । किमहरहर्द्विसामकं कर्त्तव्यम् ? उत केषुचिदहःसु रथन्तरं केषुचिद् बृहद् ? इति । कुतः संशयः ? । यद्येते समस्ते सामनी, यदि विभक्ते, उभयथा पृष्ठ्यः षडहो बृहद्रथन्तरसामा इति शब्दोऽवकल्पते । तत्रैष विचारः । किं द्वन्द्वगर्भो बहुव्रीहिरयं, बृहद्रथन्तरे सामनी यस्येति ? उतानेकपदो बहुव्रीहिः, बृहदस्य, रथन्तरमस्येति । यदि द्वन्द्वगर्भो बहुव्रीहिः, प्रत्यहं समस्ते सामनी, अनेकपदे बहुव्रीहौ विभक्ते इति ॥ किं तावत् प्राप्तम् । समस्ते इति । तत एतद् वर्ण्यते । द्वन्द्वगर्भो बहुव्रीहिरिति । कुतः । बृहद्रथन्तरशब्दयो-

रानन्तर्याद् वृत्तिपक्षस्याश्रितत्वात् । वृत्तिपक्षे च समासस्य नित्यत्वात् । द्वन्द्वे च स्वार्थाभिधानाच्छ्रुत्यनुग्रहोऽन्तरङ्गता च । इतरथा च उभयमपि बाध्येत । अतो द्वन्द्वगर्भो बहुव्रीहिः । एवं चेत्, प्रत्यहं समस्ते सामनी भवेताम् । कुतः । इतरेतरयोगद्वन्द्वस्य भावाद् यत्र रथन्तरं तत्र बृहत्साहितम् । स एष युगपद्विधिर्यदितरेतरयोगः । तस्मात् प्रत्यहं समस्ते इति । एकाहवत् । तथा ज्योगामयाविन उभे कुर्यात् संस्रवे उभे कुर्यात्, अपचितावपि एकाहे बृहद्रथन्तरे कुर्याद् इति ॥ ४ ॥ पूर्व० ॥

विभक्ते वा समस्तविधानात् तद्विभागे विप्रतिषिद्धम् ॥ ५ ॥

न चैतदस्ति, अहरहर्द्विसामकमिति । केषुचिदहःसु रथन्तरं, केषुचिद् बृहत्, न समस्ते सामनी विधीयेते । कुतः । यद्युभयोरपि पक्षयोर्बृहद्रथन्तरसामेतिशब्दोऽवकल्पते, विभक्ते सामनी इति न्याय्यम् । कुतः । प्रकृतावेकेन साम्ना पृष्ठं साधितम् । विकृतावपि एकेन साधितव्यं, चोदकानुग्रहाय । तथा च सति बृहन्निमित्तं रथन्तरनिमित्तञ्च सकलमभिनिर्वर्त्तयिष्यते ॥

अथ बृहद्रथन्तरसमुदायः पृष्ठं साधयति, न बृहत्साधनं, न रथन्तरं साधनमिति तन्निमित्तं न प्रकल्पेत । तत्र चोदकोपरोधः स्यात् । न केवलं तन्निमित्तं न प्रकल्पते, बृहत्पृष्ठताऽपि न प्रकल्पते, रथन्तरपृष्ठताऽपि । तत्र वैषम्यात् स्यादन्यदेव प्रयोगान्तरम् ॥ अपि च समस्तं पृष्ठमित्युपचर्य्यमाणं लक्षितं बृहत्पृष्ठं भवति, रथन्तरं पृष्ठं भवतीति, तत्समुदायाभिधाने लिङ्गम् । अपि च बृहच्छब्दः सामशब्देन सम्बन्धमपेक्ष्यमाणो न रथन्तरशब्देन सम्बद्धः स्यात् । आनन्तर्य्यञ्च तुल्यं रथन्तरशब्दस्य सामशब्देन । अपि च वृत्तिपक्षाश्रये सुतरां द्वन्द्वपक्षेन असामर्थ्यम् । न चैष नियोगो वृत्तिपक्षे नित्यः समास इति । विभाषां हि स्म भगवान् पाणिनिरधीते । सामशब्दश्रुतिश्च बृहद्रथन्तरयोर्लक्षणतामाचष्टे । तस्मादसमस्ते सामनी स्यातामिति । एतच्चोक्तमेव विभागेऽपि साम्नोरविप्रतिषिद्धो बृहद्रथन्तरसामशब्द इति । यथा, मासं घृततैलाभ्यां देवदत्तो भोजयितव्य इत्युक्तोऽर्द्धं मासं घृतेनार्द्धं मासं तैलेन । एवमपि शब्दो-

ऽवकल्पते । एकाहे तु एकत्वादेव विभागासम्भवात् समस्ते ज्योगामयाविन उभे कुर्यादिति ॥ ५ ॥ सिद्धान्तः ॥ गवामयनिके पृष्ठ्यषडहे बृहद्रथन्तरयोर्विभागाधिकरणम् ॥ ३ ॥

समासस्त्वैकादशिनेषु तत्प्रकृतित्वात् ॥ ६ ॥

इदमाम्नायते, ऐकादशिनान् प्रायणीयोदयनीययोरतिरात्रयोरालभेतेति । तत्र संशयः । किमेकादश प्रायणीये, पुनस्त एकादश उदयनीये, आहोस्वित् केचित् पशवः प्रायणीये केचिदुदयनीये ? इति। समानत्वान्निर्देशस्य, संशयः । किं प्राप्तम् । तुशब्दः संशयनिवृत्त्यर्थः । समास एव ऐकादशिनेषु, सर्वे प्रायणीये, सर्वे पुनरुदयनीये भवितुमर्हन्ति । कुतः । तत्प्रकृतित्वात् । प्रकृतौ ज्योतिष्टोमे समस्तानामैकादशिनानामालम्भः, इहापि समासश्चोदकः प्रापयति । अपि च लक्षणत्वेन प्रायणीयमुदयनीयं वा अहः श्रूयते । तत्र प्रायणीये सर्वे विहिता भवन्ति, न गम्यते विशेषः । के इह ऐकादशिनानां विहिताः ? इति, तथोदयनीये । तस्मात् समासस्तत्र ॥ ६ ॥ पूर्व० ॥

विहारप्रतिषेधाच्च ॥ ७ ॥

विहारप्रतिषेधश्चायम, ऐकादशिनान् प्रायणीयोदयनीययोरतिरात्रयोरालभेरन्निति । अन्वहमेकैकमालभेतेति विहारः प्राप्तः । तत्रैकः पशुः प्रायणीये प्राप्त एव । अन्येऽन्येषु अहःसु । ततोऽनेन किं क्रियते ? येऽन्येषु अहःसु, ते प्रतिषिद्ध्यन्ते, प्रायणीये च ते सर्वे भवन्तीति । तथोदयनीये । तस्मात् सर्वे प्रायणीये भवितुमर्हन्तीति ॥ ७ ॥ युक्तिः ॥

श्रुतितो वा लोकवद्विभागः स्यात् ॥ ८ ॥

वाशब्देन पक्षं व्यावर्त्तयति, नैतदस्ति समास इति । विभागः स्यात् । कुतः । द्वित्वश्रुतितः । द्वित्वश्रुतिर्हि भवति, प्रायणीयोदयनीययोरिति । सा च इदानीमुपादेयत्वेन, न लक्षणतया । कुतः । एकादशिनीविधौ सन्निहिते वचनादेकादशिनीं विधाय पुनः श्रुत्या तां लक्षयित्वा प्रयोजनविधित्सया एतदभिधीयते । प्रायणीयोदयनीययोरिति । तत्र द्वन्द्वभाविनोः प्राधान्यात् सत्यामपेक्षायां भवति समासः । समासे च इतरेतरयोगाद् न एकादशिनी केवले प्रायणीये । सा उदयनीययुक्ते भवितुमर्हति, तद्वदुदयनीयेऽपि । तस्मात्

समुदाये वाक्यपरिसमाप्तिः । यदि पुनर्नोपादेयत्वेन अश्रोष्येतां, तत्र द्वन्द्वभाविनोरप्राधान्यम्, अप्राधान्येऽसत्यामाकाङ्क्षायां न समासो भविष्यति । तत्र प्रत्येकं वाक्यपरिसमाप्तिः स्यात् । उपादेयत्वेन तु एतच्छ्रूयते । तस्माद्विभाग इति । लोकवत् । यथा, लोके शतं देवदत्तयज्ञदत्तयोर्दीयतामित्युक्ते समासार्थो विधीयते, यदेतच्छतं, तदेतयोर्दीयतामिति । द्वन्द्वश्रुतिविधानसामर्थ्याच्छतं विभज्यते, एवमेकादशिन्यपि विभज्येतेति ॥ ८ ॥ सि० ॥

विहारप्रकृतित्वाच्च ॥ ९ ॥

इतश्च विभागः । कुतः । विहारः प्रकृतः । एकादशिन्यामन्वहमेकैकमालभेतेति । तस्यैव विकारः । ऐकादशिनान् प्रायणीयोदयनीययोरतिरात्रयोरालभेतेति । यावच्छक्यं तावद्विहारस्यानुग्रहीतव्यम् ॥ ९ ॥ युक्तिः ॥

विशये च तदासत्तेः ॥ १० ॥

इदं पदोत्तरं सूत्रम् । आह । यदि विहारोऽभिप्रेयते, तत्रैकत्र पञ्च आलब्धव्याः, एकत्र षट् । तत्रैकदेशो न निर्णीयते, किं प्रायणीये किमुदयनीये ? इति । अनिर्णयेनानध्यवसानम् । अनध्यवस्यतोऽप्रवृत्तिः, तत्रोपदेशवैयर्थ्यं स्यादिति । अत्रोच्यते । विशये एतस्मिन् संशये प्रकृत्यासत्तिर्मुख्येनानुगृह्येत । तत्र प्रायणीये पञ्च आलभ्यन्ते, षड् उदयनीये इति अध्यवस्यामः ॥ १० ॥ आ० नि० ॥

त्रयस्तथेतिचेत् ॥ ११ ॥

इति चेत् पश्यसि प्रत्यासत्तिर्मुख्येनानुग्रहीतव्येति । तस्मात् त्रय एव प्रायणीये आलब्धव्या, यावत्सु बहुवचनमविरुद्धं भवतीति स्थितायां प्रतिज्ञायां सूत्रेण प्रतिचोदयत्येवम् ॥ ११ ॥ आ०

न समत्वात् प्रयाजवत् ॥ १२ ॥

नैतदेवम् । कुतः । समत्वात् । यदा प्रायणीयोदयनीययोरितरेतरापेक्षयोरैकादशिना विधीयन्ते, न सर्वेऽन्यतरस्मिन् केवले कर्त्तव्यास्तदपेक्षया कात्स्न्यं बाधितं भवति । तत्र यावद्भिरन्यतरत्र भवद्भिरवश्यं बाधितव्यं तावद्भिरनुज्ञातो बाधः । अत एव साम्येनैव विभागः प्रयाजानामिव । यथा षडागन्तवः प्रयाजाः प्रथमोत्तमयोर्विकारभूताः साम्येन प्रविभज्यन्ते, एवमिहापि यावत्सु साम्यं भवति,

तावतः साम्येन विभज्य अभ्यधिक उदयनीये आलप्स्यते प्रत्यासत्ति-र्मुख्येनानुग्रहीष्यते इति तस्माददोषः ॥ १२ ॥ आ० नि० ॥ प्रायणी-योदयनीययोरैकादशिनानां विभागाधिकरणम् ॥ ४ ॥

सर्वपृष्ठे पृष्ठशब्दात्तेषां स्यादेकदेशत्वं पृष्ठस्य कृतदेशत्वात् ॥ १३ ॥

इदमाम्नायते, विश्वजित् सर्वपृष्ठ इति । तत्रायमर्थः सांशयिकः। किं सर्वेषां पृष्ठदेशे निवेशः, उतैकस्य पृष्ठदेशे अन्येषामन्यत्र ? इति । किं प्राप्तम् । सर्वपृष्ठे एतस्मिन् सर्वेषां साम्नां पृष्ठदेशे निवेशः । कः पुनः पृष्ठदेशः । ऊर्ध्वं माध्यन्दिनपवमानात्, प्राग् मैत्रावरुणसाम्नः, इदमन्तरालं पृष्ठदेशः । स एवैको देशः स्यात् सर्वेषां साम्नाम् । कुतः । पृष्ठशब्दात् । पृष्ठकार्ये वर्त्तमानस्य वा अयं कृतो देशः । तस्मात् सर्वेषां पृष्ठदेशे निवेशः ॥ १३ ॥ पूर्व० ॥

विधेस्तु विप्रकर्षः स्यात् ॥ १४ ॥

तुशब्दः पक्षं व्यावर्त्तयति, एवं न्यायेन प्राप्तं वचनादन्यथा भवितुमर्हति । एकस्य पृष्ठकार्ये विधिरन्येषां परिसामकार्ये । कथम् । पवमाने रथन्तरं करोति आर्भवे बृहत् मध्य इतराणि वैरूपं होतुः पृष्ठं वैराजं ब्रह्मसाम शाक्करं मैत्रावरुणसाम रैवतमच्छावाकसाम इति । एवमेकस्य पृष्ठकार्ये विधानमर्थवद् भविष्यति । यदीतरेषां सामकार्ये विशेषः । इतरथा एकस्य पृष्ठकार्ये विधानं नोपपद्यते, यन्मा भूदित्यतः पश्यामः, एकस्य पृष्ठकार्ये निवेशः, अन्येषां परिसामकार्ये इति ॥ १४ ॥ सिद्धान्तः ॥ विश्वजित् सर्वपृष्ठ इत्यत्रैकस्यैव पृष्ठदेशे निवेशाधिकरणम् ॥ ५ ॥

वैरूपसामा क्रतुसंयोगात् त्रिवृद्वदेकसामा स्यात्॥१५॥

अस्ति ज्योतिष्टोमः, तत्रोक्थ्यः षोडशी च संस्थाविशेषः । तत्र श्रूयते । उक्थ्यो वैरूपसामा एकविंशः षोडशी वैराजसामा इति । तत्रायमर्थः सांशयिकः । किं वैरूपं वैराजञ्च कृत्स्ने क्रतौ निविशेते, उत पृष्ठकार्ये इति । किं प्राप्तम् । कृत्स्ने क्रतौ वैरूपमेकं साम स्यात्, षोडशिनि वैराजम् । कुतः । कृत्स्नक्रतुसंयोगात् । अविशेषेण कृत्स्ने क्रतौ वैरूपसाम विधीयते, वैराजञ्च । तत्र विशेषेऽवस्थातुमर्हति पृष्ठकार्ये, त्रिवृद्वत् । यथा, त्रिवृदग्निष्टोमः, त्रिवृत्स्तोमः

कृत्स्ने क्रतौ भवति, एवमिमे अपि सामनी कृत्स्नयोः क्रत्वोर्भवेताम् । यथा वा, धेनुरथैष भूर्वैश्वदेवः त्रिवृदेव सर्वस्तस्य विश्ववत्यः स्तोत्रिया धेनुर्दक्षिणा इति कृत्स्नस्य क्रतुदाक्षिण्यस्य कार्ये धेनुः संयोगात् । एवमिमे अपि सामनी भवितुमर्हतः ॥ १५ ॥ पूर्व० ॥

पृष्ठार्थे वा प्रकृतिलिङ्गसंयोगात् ॥ १६ ॥

पृष्ठकार्ये वा सामनी विधीयेते । कथम् । वैरूपसामा वैराजसामेति सामशब्देन प्रकृतिलिङ्गेन बहुव्रीहिरवगम्यते, न वैरूपं साम विधीयते वैराजञ्च । किन्तर्हि, वैरूपसामता वैराजसामता च क्रतोः। क्रतुसंयोगो हि भवति, न स्तोत्रसंयोगः । एकस्मिन्नपि च स्तोत्रे वैरूपे वैराजे च भवति वैरूपसामता वैराजसामता च क्रतोः । कुतः । यदि हि स्तोत्रे साम विधीयते स्तोत्राविशेषात् सर्वस्तोत्रेषु भवेद्, न त्वेतदेवम् । तस्मादेकस्मिन् स्तोत्रे वैरूपे वैराजे च भवति, वैरूपसामता वैराजसामता चेति । यदेकस्मिँस्तदा पृष्ठकार्ये स्यातां, वैरूपसामता हि गुणो विधीयमानः । वैराजसामताऽत्र एवञ्जातीयकस्य गुणस्य कार्ये भवितुमर्हति, प्रकृतौ च बृहत्सामता रथन्तरसामता चैवञ्जातीयका । तदिह प्रकृतिलिङ्गसंयोगेन वैरूपसामतया वैराजसामतया च पृष्ठकार्य्ये वृत्तिरवगम्यते यस्य लिङ्गमर्थसंयोगादभिधानवदित्यनेन न्यायेन। तस्मादिमे सामनी पृष्ठकार्ये निविशेयातामिति ॥ १६ ॥ सि० ॥

त्रिवृद्वदिति चेत् ॥ १७ ॥

इति चेद् इति यदुक्तं, यथा त्रिवृदग्निष्टोम इति त्रिवृत्त्वं कृत्स्ने क्रतौ निविशते, एवमिहापीति । तत् परिहरणीयम् ॥ १७ ॥ आ० ॥

न प्रकृतावकृत्स्नसंयोगात् ॥ १८ ॥

नैतदेवम्, इह वैरूपवैराजयोः प्रकृतिलिङ्गेनाकृत्स्नसंयोगो गम्यते। नैवं त्रिवृति कश्चित् प्रकृतिलिङ्गेन संयोगोऽस्ति येनाकृत्स्नता अवगम्येत । ततो विशेषस्त्रिवृतः सामभ्याम् ॥ १८ ॥ आ० नि० ॥

विधित्वान्नेति चेत् ॥ १९ ॥

इति चेत् इति यदुक्तं, यथा धेनुविधिर्भुवि कृत्स्नस्य क्रतुदाक्षिण्यस्य कार्ये भवति, एवं सामनी अपीति ॥ १९ ॥ आ० ॥

स्याद् विशये तन्न्यायत्वात् कर्माविभागात् ॥ २० ॥

स्याद् धेनुर्भुवि कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्त्तयित्री। सा हि कृत्स्नं क्रतुदाक्षिण्यं निवर्त्तयेत्, किं वा न ? इत्येतस्मिन् संशये एवं न्याय्यं कृत्स्नं निवर्त्तयेत् । कुतः । कर्माविभागात् । अविभक्तं हि दक्षिणाकार्यं कात्स्न्र्येन वा दाक्षिण्येन क्रियेत धेन्वा वेति । दक्षिणाकार्ये हि धेनुः श्रूयते, धेनुर्दक्षिणा इति । अतस्तत्र युक्तम् । इह प्रकृतिलिङ्गसंयोग इत्यपदिष्टो हेतुः। तस्मादेतदपि विषमम्॥२०॥आ०नि०

प्रकृतेश्चाविकारात् ॥ २१ ॥

इतश्च न कृत्स्नक्रतुसंयोगः । कुतः । प्रकृतेरविकारात् । एवं बहु प्राकृतमविकृतं भविष्यति । तत्र चोदकोऽनुग्रहीष्यते । अतोऽपि न कृत्स्नक्रतुसंयोगः साम्नोरिति ॥ २१ ॥ युक्तिः ॥ वैरूपसामवैराजसाम्नोः पृष्ठकार्ये निवेशाधिकरणम् ॥ ६ ॥

त्रिवृति सङ्ख्यात्वेन सर्वसङ्ख्याविकारः स्यात् ॥२२॥

एवं श्रूयते, त्रिवृदग्निष्टोम इति । तत्र संशयः । किं त्रिवृत्सङ्ख्या अग्निष्टोमस्य साधनमात्रम्, उत स्तोमविषया नियम्यन्ते ? इति । किं प्राप्तम् । त्रिवृद् भवतीति श्रूयमाणे सङ्ख्यामात्रविकारः स्यात् । कुतः । त्रिवृच्छब्दो लोके त्रित्वसम्बद्धे प्रयुक्तः । यथा त्रिवृद्रज्जुस्त्रिवृन्मणिरिति । इहापि त्रिवृदग्निष्टोम इति त्रित्वसम्बद्धोऽग्निष्टोमः कार्य इत्युच्यते । तच्च त्रित्वमग्निष्टोमसाधनपरिच्छेदद्वारेण तत्सम्बद्धमित्युक्तं भवति, न साक्षात् । गुणत्वात् सङ्ख्यायाः । न चेह सङ्ख्येयविशेषः कश्चित् तदीय उपादीयते । तदविशेषाद् यावान् कश्चिदग्निष्टोमसम्बद्धः सङ्ख्यया परिच्छेत्तव्यः सर्वं परिसञ्चक्षीत सङ्ख्यात्वेन सामान्येन तत्सङ्ख्यां विकुर्यात् । यथा दधिघृतशालिभिर्देवदत्तो भोजयितव्यो, देवदत्तवद् यज्ञदत्तस्तैलेनेत्युक्तं स्नेहनसामान्यात् तैलं स्नेहनकार्ये एव विनियुज्यते, न ओदनकार्ये, इत्येवं सङ्ख्यापि सङ्ख्याकार्ये एव विनियुज्यते ॥ २२ ॥ पूर्व० ॥

स्तोमस्य वा तल्लिङ्गत्वात् ॥ २३ ॥

न चैतदस्ति सर्वसङ्ख्याविकार इति । किन्तर्हि । स्तोमगतामेव सङ्ख्यां विकुर्यात् । कथम् । स्तोमविषये त्रिवृच्छब्दस्यान्यत्र दर्शनात् । यथा । त्रिवृद्बहिष्पवमान इत्यत्र स्तोमविषयता परिच्छिन्ना,

एवं त्रिवृदग्निष्टोम इत्यत्रापि स एव शब्द उच्चरितस्तमेव सम्बन्धिनमनुमानाद् बुद्धौ सन्निधापयेत् । अतः स्तोमलिङ्गत्वात् तद्गतामेव सङ्ख्यां विकुर्यात् ॥

अत्राभिधीयते । नैतद्युक्तम् । सङ्ख्याशब्दा हि अनियतवृत्तयो भवन्ति । ते हि येन येन सम्बद्ध्यन्ते सङ्ख्येयेन तं तं परिसङ्ख्यस्यते । तथा चोपदर्शितमेव त्रिवृद्रज्जुस्त्रिवृन्मणिरिति । तस्माद् बहिष्पवमानेन सामानाधिकरण्यात् स्तोत्रं परिसङ्ख्यं, अन्यत्रापि यो यः परिसङ्ख्यातव्यो भविष्यति, तं तं परिसङ्ख्यास्यतीत्यतः स्तोमलिङ्गत्वमप्यहेतुर्नियमस्येति ॥

अत्राभिधीयते । अयमिह त्रिवृच्छब्दोऽतीत्य लौकिकमर्थं विशिष्टसङ्ख्येये आचरितः । यथा त्रिवृद्बहिष्पवमान इति स्तोमविषयिण्यां नवसङ्ख्यायां त्रिवृद्बहिष्पवमान इत्यभिधाय नव स्तोत्रिया उच्यन्ते, तेन तासु वर्त्तत इति गम्यते । तथा परस्मिन्नपि दृश्यते । त्रयस्त्रिकपालास्त्रिवृता स्तोमेन सम्मिता नव प्रकृतिरग्निष्टोमस्येति नवानां कपालानां त्रिवृता स्तोमेन सम्मानं वदन् त्रिवृच्छब्दस्य तत्र प्रसिद्धिं दर्शयतीति । अतः प्रसिद्धवदाचारात्, सामानाधिकरण्यदर्शनाच्च अयमस्यार्थ इति निश्चीयते । लोकेऽपि सामानाधिकरण्यप्रयोगाद्वा आचाराद्वाऽर्थावसानं भवति, यथाऽयं देवदत्त इति । तस्मादयं त्रिवृच्छब्दो विशिष्टसङ्ख्यासङ्ख्येयविषयोऽन्यत्र दृष्ट इति इहापि प्रयुज्यमानो यत्र दृष्टस्तमेव लिङ्गाद् बुद्धौ सन्निधापयतीत्यतः स्तोमविषयो नियम्येत । यदुक्तं, सङ्ख्या ह्यनियतविषया सर्वत्र सम्बन्धमुपयाति । एतद् अवयवार्थनिराकरणात् समुदायाङ्गीकरणाच्च परिहृतमेवेति । एवमन्यगतानां सङ्ख्यानामनिवृत्तौ चोदकानुग्रहो भविष्यतीति ॥ २३ ॥ सिद्धान्तः ॥ त्रिवृदग्निष्टोम इत्यत्र स्तोमगतसंख्याविकाराधिकरणम् ॥ ७ ॥

उभयसाम्नि विश्वजिद्वद्विभागः स्यात् ॥ २४ ॥

सन्ति उभयसामानः क्रतवः । संसव उभे कुर्य्यादपचितावप्येकाहे उभे कुर्य्यादिति । तत्र संशयः । किं बृहद्रथन्तरे विभक्ते भवतः, उत समस्ते ? इति । कुतः समस्तता अवगम्यते, कुतो वा व्यस्ततेति । उच्यते । एतदेव वचनमुभयमर्थमुद्भासयति । कथम् ? ।

उभाभ्यां क्रतुः सम्बन्धयितव्यः । ते यदि समस्ते अथवा व्यस्ते भवतः, उभयथाऽपि क्रतुस्ताभ्यां सम्बद्धो भवति । तत्रोभयथा प्रतिभाति वचने किं युक्तम् ? । व्यस्ते इति । कुतः ? । प्रकृतौ हि बृहद्रथन्तराभ्यामन्यतरेण पृष्ठं साधितमिहापि प्रकृतिवच्चोदकाऽनुग्रहायान्यतरेण साधयितव्यमवगम्यते । एवञ्च पृष्ठसम्बद्धानां कर्मणां कार्त्स्न्येन प्रवृत्तौ चोदकोऽनुग्रहीष्यते, उभयोः पृष्ठं साधयतोरन्योन्येन विहितत्वात् प्रयोगान्तरमापद्येत, न रथन्तरं पृष्ठं, न बृहत् पृष्ठमिति उभयथाऽपि वचनार्थोपपत्तौ न चोदकबाधायां कारणमामस्ति । तस्माद् यथा न विश्वजिति बृहदादीनां सर्वेषामेकत्र निवेशः, एवमिहापीति ॥ २४ ॥ पूर्व० ॥

पृष्ठार्थे वाऽतदर्थत्वात् ॥ २५ ॥

नैतदस्ति, विभक्ते इति । किन्तर्हि । समस्ते सामनी स्याताम् । कुतः । प्रकृतौ हि बृहद्रथन्तराभ्यां विकल्पमानाभ्यां पृष्ठं साधितम् । इह इदानीं विकृतौ तयोरधिगतदेशयोर्विकल्परूपेणैव प्राप्तयोः केवलमेतद्वचनं सामस्त्यविधानार्थम् । उभे बृहद्रथन्तरे कुर्यादिति । एवञ्च सामस्त्यं भवति, यदि ते सामनी परस्परं न जहीतः । उपादेयत्वेन चानयोः श्रुतत्वाद् द्वित्वश्रुतिः समासश्रुतिश्च विवक्षितैव । तेन यत्र बृहत्, तत्र रथन्तरसहितं, न केवलमिति ॥ तत्रैतत् स्यात्, प्रधानक्रियापेक्षमनयोः साहित्यम् । तत्र व्यस्तयोरपि क्रियमाणयोः साहित्यं न विरुध्यते । यथा देवदत्तयज्ञदत्तयोः पाकेन समस्तयोरपि संयोगे उच्यमाने एकः किञ्चित्करोति अपरोऽपि किञ्चित् । न यदेकेन कृतं, तदेव अपरः करोति । तद्वदेकं साम किञ्चित् स्तोत्रमभिनिर्वर्त्तयिष्यति द्वितीयमप्यपरम् । प्रधानोपकारापेक्षं साहित्यमिति समस्तसंयोगो न विरोत्स्यते इति ॥ तत्राभिधीयते यत्र परस्परसव्यपेक्षयोर्योगो भवति, तत्रैतदेवं न्याय्यम् । येन क्रियावयवेन आरम्भेण मध्येन अवसानेन वा योगः, तेन सहितयोर्न पृथक्त्वशः । कुतः । यथैवानेनोपकर्त्तव्यमित्यवगम्यते, एवमितरसहितेनेति । यत्तु, लोके कारकसामस्त्येऽप्यभिहिते भेदेन व्यापारदर्शनमिति । अर्थासम्भवादसौ । न हि उखायामधिश्रीयमाणायां भूयोऽधिश्रयणं शक्यते कर्त्तुमित्यर्थविरोधाद् न करोति, न तु शब्देनासौ

तत्र न चोदितः । यद्यत् कर्त्तव्यं तत्तत्सहिताभ्यामेव, नान्यथा । इह तु नासम्भवः । बृहद्रथन्तरयोर्हि ऋक्संस्कारत्वेन विनियोगात् । ते च शक्नुतः सहिते पृष्ठं संस्कर्त्तुमित्यतस्तयोः साहित्यमेव युक्तम् । यदुक्तम्, उभयथा सम्भवे चोदकानुग्रहो न्याय्य इति धर्मकात्स्न्यैं निमित्तविघातश्च न भविष्यति । तत्र प्रत्यक्षात् समस्तविधानाच्चोदके बाध्यमाने न दोषो भवति ॥ २५ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ २६ ॥

लिङ्गञ्च दर्शयति, यथा समस्तयोः प्रयोगो न व्यस्तयोरिति । किं लिङ्गम् । एवमाह, महावृक्षौ वै बृहद्रथन्तरे निधनेन समाप्येते यन्महावृक्षौ समृच्छयेते । न ह्यत्र विभग्नं प्रभग्नमिति निधनभेदवचनादेकस्थानता अवगम्यते । यदि भिन्नदेशे स्याताम्, अर्थादेव तत्र निधनभेदः सिद्धः । अथ तु सहिते भवतस्ततो निधनभेदवचनमर्थवद् भवति । तस्मादप्यभेदः । तथा अपरं लिङ्गं, पूर्वाह्णो वै रथन्तरम्, अपराह्णो बृहदिति एकेनाह्ना अभिसम्बन्धादेकस्थानतां दर्शयति । तस्मात् समस्तयोः पृष्ठदेशे निवेश इति ॥ २६ ॥ युक्तिः ॥ उभयस्मिन् बृहद्रथन्तरयोः समुच्चयाधिकरणम् ॥ ८ ॥

पृष्ठे रसभोजनमावृत्ते संस्थिते त्रयस्त्रिंशेऽहनि स्यात् तदानन्तर्यात् प्रकृतिवत् ॥ २७ ॥

क्वचित् कर्मविशेषे श्रूयते, पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भण इति । द्वादशाहे वचनं, संस्थिते पृष्ठ्ये षडहे मधु आशयेद् घृतं वा इति । तदिदं मध्वशनं घृताशनञ्च चोदकप्राप्तं सत् सन्दिह्यते । किं त्रयस्त्रिंशान्ते कर्त्तव्यम्, उत षडहान्ते इति । किं प्राप्तम् । ततः सूत्रेणैवोपक्रमः, पृष्ठे रसभोजनमावृत्ते षडहे त्रयस्त्रिंशेऽहनि संस्थिते कार्यम् । कुतः । तदानन्तर्यात् । प्रकृतौ त्रयस्त्रिंशानन्तरं रसभोजनं वृत्तं, प्रकृतिवदिहापि कुर्वाणो यदि त्रयस्त्रिंशानन्तरं करोति, चोदकमनुगृह्णाति । अथ त्वन्यस्याह्नोऽनन्तरं कुर्याच्चोदकं बाधेत । आनन्तर्यं हि क्रमः । स च विशेषसम्बन्धे कारणमिति समधिगतम् । एतदानन्तर्यञ्च रसभोजनस्य, त्रयस्त्रिंशेन सह दृष्टमित्यतस्त्रयस्त्रिंशानन्तरं क्रियत इति ॥ २७ ॥ पूर्व० ॥

अन्ते वा कृतकालत्वात् ॥ २८ ॥

न चैतदस्ति, त्रयस्त्रिंशानन्तरं रसभोजनमिति। किन्तर्हि। षडहान्ते स्यात्। कुतः। संस्थिते षडहे इत्युच्यते, न संस्थिते त्रयस्त्रिंशे इति। षडहाभिगमलक्षिते पर्यवसाने, न त्रयस्त्रिंशाद्युपलक्षिते। षडहश्च षडहःसु पर्यवसितो भवति, नैकस्मिँस्त्रयस्त्रिंशेऽहनि। यदुक्तं, त्रयस्त्रिंशानन्तर्यदर्शनात् प्रकृतिवदिहापि तदानन्तर्ये एव भोजनेन भवितव्यमिति। नैतद्युक्तम्। तत्र ह्यर्थात् त्रयस्त्रिंशानन्तर्यं वृत्तम्। कुतः। तस्मिन्नहनि तत्र द्वादशाहे षडहः पर्यवसित इति। इहापि यत्र पर्यवस्यति तत्र भोजनं भविष्यति। ततः षडहावसानलक्षितेन भोजनस्य सम्बन्धः, संस्थिते षडह इति। न त्रयस्त्रिंशावसानलक्षितेनेति। यत्तु क्रमः कारणं विशेषसम्बन्धे इति। सत्यं कारणं, न तु बलीयसा प्रमाणेन यत्र विरुध्यते। इह तु वाक्येन षडहावसाने विधीयते इत्युक्तम्। तस्माद्वाक्येन विशेषसम्बन्धे सति न आनन्तर्यमात्रं कारणम्। अतः षडहान्ते भोजनं स्यादिति ॥ २८ ॥ सिद्धान्तः ॥ मध्वशनघृताशनयोः षडहान्तेऽनुष्ठानाधिकरणम् ॥ ९ ॥

अभ्यासे च तदभ्यासः कर्मणः पुनः प्रयोगात् ॥२९॥

आवृत्तं पृष्ठ्यं षडहमुपयन्तीति श्रूयते। तत्रैतत् चोदकेन प्राप्यते संस्थिते पृष्ठ्ये षडहे मध्वाशयेद् घृतं वेति। तत् सन्दिह्यते। किं षडहावृत्त्या आवर्त्तेत भोजनम्? उत षडहान्ते सकृदेव क्रियेतेति किं प्राप्तम्। षडहावृत्तौ सत्यामावर्त्तेत भोजनम्। कुतः। कर्मणः पुनः पुनः प्रयोगात्। तद्धि कर्म पुनरावर्त्तते। तदावृत्त्या यदपि तत्सम्बद्धं तदप्यावर्त्तेत। यथा स्तोत्रशस्त्रादि षडहसम्बद्धमावर्त्तते, एवं षडहसम्बन्धि भोजनमप्यावर्त्तेतेति ॥ २९ ॥ पूर्व० ॥

अन्ते वा कृतकालत्वात् ॥ ३० ॥

न चैतदस्ति, यदुक्तं, षडहावृत्त्या भोजनमप्यावर्त्तेतेति, किन्तर्हि षडहान्ते सकृदेवानुष्ठीयेत। कुतः। कृतकालत्वात् कृतो हि भोजनस्य कालः। संस्थिते षडहे इति। संस्थानं, पर्यवसानं, षडहगतस्य व्यापारस्योपरमः। न च पुनः षडहं कुर्वाणः षडहगताद् व्यापारादुपरत इत्युच्यते। न चानुपरतौ कर्त्तुः षडहः सन्तिष्ठते। संस्था हि क्रियां प्रति औदासीन्यं, व्यापारान्तरकरणं वा, पूर्वस्मात् कर्मणः। न च पुनः षडहं कुर्वाण औदासीन्यं भजते। न च व्यापारान्तरं करोति।

तस्यैव कर्मण आवृत्तिं करोति। अतोऽपर्य्यवसितः। अपर्य्यवसिते च संस्थाभावादश्रुतमेव प्राशनमिति न क्रियते॥

यदुक्तं, यथा अन्ये षडहधर्माः स्तोत्रशस्त्रादय आवर्त्तन्ते, तद्वत् प्राशनमप्यावर्त्ततेति। नैतद्युक्तम्। ते हि अहःसम्बद्धाः। तेषामह्ना-मावृत्तिरिति स्तोत्रादीनामावृत्तिरिति युक्तम्। न हि तेऽहःसु अवसानसंयोगेन चोद्यन्ते। इह तु अवसानसंयोगेन भोजनस्य चोदना इत्युक्तो हेतुः। तस्मान्न भोजनस्यावृत्तिर्युक्तेति॥ अपि च यद्येतद् भोजनं षडहाङ्गं भवेत्, ततः प्रधानावृत्त्या आवर्त्तेत। न चैत-दङ्गम्। कुतः। अङ्गत्वप्रख्यापकस्य कारणस्याभावात् प्रकरणा-दङ्गता स्याद्, वाक्यसंयोगाद्वा, प्रत्यक्षोपकारदर्शनाद्वा। एतेषाञ्चेह न किञ्चित् कारणं पश्यामः। प्रकरणं तावद् द्वादशाहस्य, न षड-हस्य। वाक्यसंयोगोऽपि संस्थिते षडहे इति षडहस्य संस्थायां भोजनमाचष्टे। संस्थितश्चैवं षडहो भवति। यद्यस्य न किञ्चिदपरम् अङ्गजातं परिशिष्यते। न च, मध्वशनघृताशने प्रत्यक्षेणोपकुरुतः षडहस्य। कुतः। निवृत्ते करणात्, कामं यया च यावत्या च तर्पण-मात्रया कर्तॄणां यानि पुरस्तात् कर्माणि वर्त्तन्ते, तेषां सामर्थ्योप-जननेनोपकुर्य्यात्। नातिवृत्तस्य षडहस्येति। यान्यपि क्रमादीनि कार-णानि, तान्यपि प्रमाणान्तरसम्बन्धमुपादाय विशेषसम्बन्धे कार-णानि भवन्ति, न केवलानि। तस्मात् षडहाऽवसानलक्षिते काले पुरुषाणां भोजनक्रिया विधीयते इत्यतो नावर्त्तेत भोजनमिति॥ ३०॥ सिद्धान्तः॥ षडहावृत्तावपि मध्वशनघृताशनयोः सकृदनुष्ठानाधि-करणम्॥ १०॥

आवृत्तिस्तु व्यवाये कालभेदात् स्यात्॥ ३१॥

गवामयने श्रूयते, चत्वारोऽभिप्लवाः षडहाः पृष्ठ्यः षडहः स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमः। तत्रैतत् चोदकेन प्राप्तम्। संस्थिते पृष्ठ्ये षडहे मध्वाशयेद् घृतं वेति। तत्र सन्दि-ह्यते। किं प्रतिमासमावर्त्तते रसभोजनम्? उत सर्वान्ते सकृदेव कार्यमिति। किं पुनर्युक्तम्। उक्तेन न्यायेन सकृदिति। सर्वान्ते ह्य-ऽसौ षडहगताद् व्यापाराुपरमते, न प्राक्। अर्वागसौ कृत्वापि षड-हं, पुनः षडहाय प्रयतत एव। न चासौ षडहः संस्थितो भवति, य-

द्धि पुनस्तदर्थं प्रयतत एव । सर्वान्ते तु न पुनः प्रयते, इत्यतः सर्वान्ते कुर्यादित्येवं प्राप्तम् । एवं प्राप्ते ब्रूमः । आवृत्तिस्तु व्यवाये कालभेदात् स्यात् । आवृत्तिः रसभोजनस्य स्यात्, न सकृत् क्रिया । कुतः । निमित्तावृत्तेः, षडहसंस्था निमित्तम् । स च षडहः पुनरावर्त्तते । तस्मिन्नावर्त्तमाने संस्था निमित्तमावर्त्तते इत्यत आवर्त्तेत ॥

यदुक्तं- सर्वान्ते हि असौ षडहादुपरतो भवति, न प्राक् । कृत्वाऽप्यसौ पुनस्तदर्थं प्रयतत एवेति । अत्राभिधीयते । यद्यप्यसौ पुनः प्रवर्त्तते, तथापि तं परिसमाप्य पुनरारभते । पुनश्च परिसमापयति, न यथावृत्ते षडहे । तत्र ह्यनुपरतस्य पृष्ठ्यस्यावृत्तिः । इह चतुर्भिरभिप्लवैर्व्यवधीयते । तेनोत्तरक्रियान्तरव्यवधानात् पृष्ठ्यगतो व्यापारः पर्य्यवसित इति गृह्यते विशेषः । न च तस्मिन्नपर्य्यवसिते क्रियान्तरं शक्यं कर्त्तुम् । उभयप्रकारश्चान्तः क्रियायाः, कृत्वा औदासीन्यं, क्रियान्तरव्यवधानञ्चेत्युक्तमेव । तस्मात् प्रतिमासं सव्यवधानः पृष्ठ्य आवर्त्तते । तस्मिन्नावर्त्तमाने संस्थानिमित्तं भोजनमप्यावर्त्तते इति । अतः प्रतिमासमावर्त्तेत इति ॥ ३१ ॥ गवामयने मध्वशनघृताशनयोः प्रतिमासमावृत्त्यधिकरणम् ॥ ११ ॥

मधु न दीक्षिता ब्रह्मचारित्वात् ॥ ३२ ॥

द्वादशाहे श्रूयते, संस्थिते पृष्ठ्ये षडहे मध्वाशयेद् घृतं वेति । तत्र संशयः । किं सत्रिभिर्मधु भक्षयितव्यं, न ? इति । किं प्राप्तम् । नेति । कुतः । दीक्षिता हि ते ब्रह्मचारिणः । ब्रह्मचारिणाञ्च मधु प्रतिषिद्ध्यते । मधु मांसञ्च वर्जयेदिति । तस्मान्न प्राश्नीयुरिति । ननु एतद्वचनं, सामान्यं प्रतिषेधं बाधेत न बाधते इति ब्रूमः । कथम् ! यद्यबाधमानमेतद्, द्वादशाहेऽनर्थकं भवेत्, ततो बाधेत । न त्वनर्थकम् । कथम् । उभयविधं द्वादशाहमङ्गीकृत्योभयमशितव्यं घृतं मधु वा तत्र सत्रिणां घृतप्राशनं भविष्यति, अहीने मधुनः प्राशनम् ऋत्विजाम् । एवमुभयं द्वादशाहसम्बद्धं भविष्यति विषयभेदेन । न च विरुद्धस्याचारो भविष्यतीति । तस्मान्न प्राश्नीयुरिति ॥ ३२ ॥ पूर्व० ॥

प्राश्येत यज्ञार्थत्वात् ॥ ३३ ॥

न चैतदस्ति, सत्रिभिर्मधु न भक्षयितव्यमिति । किन्तर्हि । भक्षयितव्यम् । कथम् । अविशेषेणोच्यते कर्तृमात्रस्य । उभयप्रकार-

मङ्गीकृत्य द्वादशाहं, संस्थिते पृष्ठ्ये षडहे मध्वाशयेद् घृतं वेति। उभयं विकल्पेन, न कर्तृव्यवस्थया । तस्मात् सत्रिणोऽपि मधु भक्षयेयुः॥ यत्तूक्तं, विषयभेदेनार्थवत्त्वाद् न बाधो न्याय्यः, द्वादशाहाऽङ्गभावश्चैवं सति न विरोत्स्यते इति। अत्रोच्यते । षडहे अतिवृत्ते सत्रसम्बद्धेऽहीनसंबद्धे वा अविशेषेण मध्वशने घृताशने चोच्यमानेऽत्र केन व्यवस्थां ब्रूमः। विरोधेनेति चेद्, न। विषयभेदेन विधिप्रतिषेधयोः समाम्नात्। पुरुषार्थेन प्रतिषेधः।कर्माङ्गत्वेन विधानम्। यदि च प्रतिषेधबलीयस्त्वमिहाङ्गीक्रियते, वचनमनर्थकमेव स्यात् । पक्षेऽर्थवत्तेति चेद्, न । नानाविषयत्वात् । तुल्यार्थयोर्हि तुल्यविषययोर्विकल्पो भवति, न नानार्थयोः। नानार्थता चेहाधिगम्यते । कुतः। विधेः कर्मसाद्गुण्यप्रयोजनत्वात् । प्रतिषेधस्यापि नियमानुष्ठानात् पुरुषस्यादृष्टसिद्धिरिति । तस्मात्त् प्राश्नीयुरिति ॥ ३३ ॥ सिद्धान्तः॥ द्वादशाहे सत्रिभिरपि मध्वशनाधिकरणम् ॥ १२ ॥

मानसमहरन्तरं स्याद् भेदव्यपदेशात् ॥ ३४ ॥

द्वादशाहे श्रूयते, अनया त्वा पात्रेण समुद्रंरसया प्रजापतये जुष्टं गृह्णामीति, प्राजापत्यं मनो ग्रहं गृह्णातीति। तत्र संशयः। किं मानसमहर्द्वादशाहादहरन्तरम् ? उताहरङ्गमिति । तत्रेह कानिचिद्भेदकारणानि प्रतिभान्ति, तानि निराचिकीर्षन् आचार्य उपन्यस्यति, मानसमहरन्तरं स्यादिति। कुतः। भेदेन व्यपदेशात् । द्वादशाहाद् भेदेन व्यपदिश्यते । कथम् ?। वाग्वै द्वादशाहो मनो मानसमिति द्वादशाहानन्तर्भूतं मानसं व्यपदिशति। वाग्वै द्वादशाह इति वाक्संस्तवात् । मनो मानसमिति च मनःसंस्तवात् । यथा वाङ्मनसयोर्भेदो वस्तुतोऽवगम्यते, एवमेतयोरपि द्वादशाहमानसयोः। यतः पृथक्त्वे सति भेदेन व्यपदेशो भवति, नान्यथा । अतो भिद्यते एतदहरिति व्यपदेशाद्गम्यते ॥ ३४ ॥ पूर्व० ॥

तेन च संस्तवात् ॥ ३५ ॥

इतश्च अहरन्तरमिति। कुतः । तेन च मानसेनाह्ना द्वादशाहः संस्तूयते। कथम्। विधूतानि ह वै द्वादशाहस्य गतरसानि छन्दांसि। तानि मानसेनैव आप्याययन्तीति। द्वादशाहस्य यानि गतरसानि छन्दांसि, तानि मानसेनाप्याययन्तीति ब्रुवन् भिन्नं द्वादशाहा-

दर्शयति । कथम् । संस्तवात् । न हि तेनैवात्मना तस्य संस्तुतिर्भवति । कुतः । अत्यन्तभेदात् स्तुतिस्तुत्ययोः । न हि देवदत्तो देवदत्तेन स्तूयते । भिन्नैः शिरःपाण्यादिभिः संस्तूयते । तद्वदिहापि द्वादशाहो मानसेन स्तूयते इति संस्तवाद्भेदोऽधिगम्यते इति ॥३५॥ युक्तिः

अहरन्ताच्च परेण चोदना ॥ ३६ ॥

इतश्च अहरन्तरमेवेति गम्यते । कुतः । द्वादशाहिकादहरन्तात् परेण चोद्यते, पत्नीः संयाज्य प्राञ्च उदेत्य मानसाय प्रसर्पन्तीति । तद्यदि द्वादशाहिकस्याह्नो गुणविधिर्भवेद् द्वादशाहिकी पत्नीसंयाजान्तता स्यात् । अथ त्वहरन्तरं भवति, ततो द्वादशाहिकानामयं धर्मो, नान्यस्येति न दोषो भविष्यति । अतोऽपि वैलक्षण्याद् अहरन्तरसिद्धिरिति गम्यते ॥ ३६ ॥ युक्तिः ॥

पक्षे सङ्ख्या सहस्रवत् ॥ ३७ ॥

परिचोदनापरिहारोऽयम् । किमियं परिचोदना । नन्वेवं द्वादशाह इति त्रयोदशसु अहःसु नोपपद्यते । अत्रोच्यते । यदा प्रमाणान्तरेण शब्द एतावति अर्थे प्रयुक्त इति गम्यते तदा सङ्ख्यासन्निकर्षात् त्रयोदशसु गुणवृत्त्या प्रयोगः सेत्स्यति । यथा अतिरात्रः सहस्रम् अहानि अतिरात्रेण सहस्रसाध्येन यजेतेति अधिकेऽपि सहस्रे सहस्रशब्दो दृष्टः । तद्वदिहापि अधिके भविष्यति । अथ वा कर्मगणनामधेयमेतद्, द्वादशाह इति । यावन्ति कर्माण्यङ्गीकृत्य प्रयुक्तस्तावतां वाचक इति निश्चीयते । सर्वाणि प्रकरणादङ्गीकृत्य प्रयोगात् सर्वेषां वाचको भविष्यतीति न दोषः ॥ ३७ ॥ आ०लि० ॥

अहरङ्गं वांऽशुवच्चोदनाभावात् ॥ ३८ ॥

दशमस्याह्नो गुणस्य विधिः स्याद्, न अहरन्तरचोदना । कुतः । अहरन्तरप्रकल्पकस्य वचनस्याभावात् । कथम् । एवं तावच्छ्रूयते । अनया त्वा पात्रेण समुद्रं रसया प्रजापतये जुष्टं गृह्णामीति प्राजापत्यं मनोग्रहं गृह्णातीति, दशममहरङ्गीकृत्य ग्रहचोदनैषा । गृह्णातीति संस्कारविधानात् । न च संस्कारभेदे कर्मभेदो भवति । अचोदकाश्च संस्कारा इत्युक्तम् । येस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र (२ अ० १ पा० ३ अ०) कर्म न प्रधानमिति । यथा अंश्वदाभ्यौ विधीयमानौ न कर्म भिन्तः । यस्मिन् कर्मणि भवतस्तत्रापरौ ग्रहाभ्यासाविति

विज्ञायेते, न कर्मान्तरं इति । यदि चाहरङ्गमेतद् भवति, न कर्मान्तरम् । एवमल्पीयसी एव अदृष्टानुमानप्रसङ्गकल्पना भविष्यति । प्रकृतसम्बन्धश्च, न अप्रकृतप्रक्रिया क्रियान्तरस्य । अतो न अहरन्तरम् । दशमे एव अहनि गुणविधिरिति ॥ ३८ ॥ सि० ॥

दशमविसर्गवचनाच्च ॥ ३९ ॥

इतश्च न अहरन्तरं, तत्रैव गुणविधिः । कुतः । दशमविसर्गवचनात् । दशमविसर्गवचनं हि भवति । एष वै दशमस्याह्नो विसर्गो यन्मानसमिति । एष दशमस्य विसर्गोऽन्तो यन्मानसमिति ब्रुवन्, अन्तोऽयमन्तवतो दशमस्य, न स्वतन्त्रमेतत् कर्मेति दर्शयति । तस्मादपि दशमस्याङ्गं, नार्थान्तरमिति गम्यते ॥ ३९ ॥

दशमेऽहन्निति च तद्गुणशास्त्रात् ॥ ४० ॥

इतश्चाङ्गम् । कथम् । एवं गुणशास्त्रं युक्तं भविष्यति, दशमेऽहनि मानसाय प्रसर्पन्तीति । दशमेऽहनि सार्पराज्ञीभिर्ऋग्भिः स्तुवन्तीति दशमस्याह्नः प्रधानभावेन निर्देशाद् ग्रहस्याधेयभावेन । तत्स्तोत्रस्य गुणोऽयं दशमस्य, नार्थान्तरमिति गम्यते ॥ ४० ॥

सङ्ख्यासामञ्जस्यात् ॥ ४१ ॥

यदि च गुणोऽयम्, एवं सङ्ख्या समञ्जसा भविष्यति, द्वादशाह इति । इतरथा त्रयोदशसु द्वादशाह इत्यसमञ्जसं सङ्ख्यावचनं स्यात् । अवाच्यत्वात् । यदुक्तं, गुणवृत्त्या सहस्रसाध्यवद् भविष्यतीति । तदनुपपन्नम् । कुतः । तत्र हि प्रमाणान्तरेण सङ्ख्येयावगमादधिके सहस्रशब्दो गौण्या वृत्त्या प्रयुक्त इति निश्चीयते । न त्विह सङ्ख्येयातिरिक्ते प्रमाणमस्ति, येन गौणीयं वृत्तिराश्रीयेत । यदप्येतद्, अनया त्वा पात्रेणेति वचनं, तदपि ग्रहसंस्कारविधानाद्दशमेऽहनि यागाभ्यासं विधत्ते, न कर्मान्तरमिति समधिगतम् । एवञ्चेद्, नैतत् प्रत्यक्षवचनमहरन्तरप्रकल्पकं, नान्यत् प्रमाणान्तरं प्रापकं, येन संख्येयेऽतिरिक्ते शब्दप्रयोग इत्यध्यवस्यामः । तस्माद् नेह गौण्या वृत्त्या प्रयोग इति ॥

यदपि, कर्मगणनामधेयत्वात् प्रकरणवशेन तावतामङ्गीकरणाद् नामधेयरूपेण चावृत्तिर्भविष्यतीति । तदपि न युक्तम् । सत्यं कर्मगणनामधेयमेतत्, न त्वयथार्थसमन्वयेन । द्वादशैतानि कर्माण्यहोभिः

परिमितानि एकत्र समाहृतानीत्यनेन रूपेण तत्कर्मगणस्य नामधेयं, न वर्णानुपूर्व्यमात्रेणेति । तथा हि सर्वेष्वेव कर्मनामधेयेषु अर्थसमन्वयेनानुवादभूतो नामशब्दो वर्त्तते, न लौकिकार्थतिरस्कारेण परिभाषामात्रेण वृद्धिगुणवत् । यथा, अग्निहोत्रं, श्येनः, ज्योतिष्टोम इति । एवं द्वादशाह इत्यर्थान्वयेन नामधेयं, न अर्थाभावेनेति । तस्मादपरिचोदनैषा ॥ ४१ ॥

पश्वतिरेके चैकस्य भावात् ॥ ४२ ॥

इतश्चाहरङ्गमिति विज्ञायते । कुतः । पश्वतिरेकेण एकस्यातिरेकं दर्शयति, न द्वयोः । कथम् । यः पशुरतिरिच्येत स ऐन्द्राग्नः कार्य इति एकादशिनीं द्वादशाहे विधाय विहृतायामेकस्यातिरेकं दर्शयति। तन्न तावदतिरिच्यते, एको न भवति । कथम् । एकादश पशवः, द्वादश अहानि । एकस्यातिरेकं ब्रुवन् द्वादशैतानि अहानीति गमयति। यदि त्रयोदश अहानि स्युर्द्वयोरभावः स्याद्, नैकस्येति । तस्मादप्यहरङ्गं न कर्मान्तरमिति ॥ ४२ ॥ युक्तिः ॥

स्तुतिव्यपदेशमङ्गेन विप्रतिषिद्धं व्रतवत् ॥ ४३ ॥

अस्मिन् सूत्रे द्वयोः सूत्रयोः परिहार उच्यते । यदुक्तं, मानसमहरन्तरं भेदेन व्यपदेशात् । तेन च मानसेन संस्तवाद् भेदः । न हि आत्मनैव आत्मा संस्तूयते इति । अत्राभिधीयते । नैतद् विप्रतिषिद्धम् । अङ्गेनापि समुदायस्य स्तुतिर्दृष्टा । यथा महाव्रतधर्मेण संवत्सरसत्रस्य । यन्ति वा एते मिथुनाद् ये संवत्सरमुपयन्ति । अन्तर्वेदि मिथुनौ सम्भवतस्तेनैव मिथुना न यन्तीति समुदायदोषमभिधाय तदवयवभूतस्य महाव्रतस्य धर्मेणानुजिघृक्षन् समुदायस्यावयवधर्मेण स्तुतिं दर्शयति । लोकेऽप्यवयवधर्मेणावयवी संस्तूयत एवेति । यथा दीर्घैः केशैः शोभनो देवदत्त इति । तद्वदिहापि द्वादशाहः संस्ताविष्यते इति न दोषः ॥ ४३ ॥

वचनादतदन्तत्वम् ॥ ४४ ॥

यदुक्तं– यद्यहरन्तरमेतद्, एवं द्वादशाहधर्मवैलक्षण्यं मानसान्तता युक्ता भविष्यति, न तदङ्गत्वे, पत्नीसंयाजान्तता भवेदिति । अत्र वदामः । वचनादतदन्तत्वं भविष्यति, द्वादशाहिकानामह्नां सामान्येन पत्नीसंयाजान्तता, विशेषेण तु दशमस्याह्नो मानसान्तता

उच्यते । पत्नीः संयाज्य प्राञ्च उदेत्य मानसाय प्रसर्पन्तीति । नास्ति वचनस्यातिभारः । तस्मादप्यदोषः । अतो दशमस्याह्नो मानसमङ्गं न स्वतन्त्रमिति ॥४४॥ आ० नि०॥ मानसस्य दशमाहाङ्गताऽधिकरणम् ॥ १३ ॥

सत्रमेकः प्रकृतिवत् ॥ ४५ ॥

इह द्वादशाहप्रभृतीनि सत्राणि उदाहरणम् । तत्र संशयः । किं सत्रमेकः प्रयुञ्जीत, उत बहवः ? । किं प्राप्तम् । एकः । कुतः । प्रकृतिवत् । ज्योतिष्टोमे एकः कर्त्ता । तत्प्रकृतित्वाच्चोदकानुग्रहाय सत्रमेक एव प्रयुञ्जीतेति । ननु बहवः श्रूयन्ते, य एवंविद्वांसः सत्रमासते, य एवंविद्वांसः सत्रमुपयन्तीति । उच्यते । कामिनां सत्रं विधीयते । ते च परस्परनिरपेक्षा बहव एव । ते यद्येकैकश्येनापि कुर्वन्ति तथापि सत्रक्रियामभिसमीक्ष्य बहव एव कुर्वन्तीति बहुवचनं भविष्यति । यथा लोके पृथक्त्वेनापि कुर्वाणानां बहुवचनं दृश्यते, देवश्चेद् वर्षेद् बहवः कृषिं कुर्य्युः, सस्यं चेत् सम्पद्येत बहवो ब्राह्मणा यजेरन्निति । तथा वेदेऽपि प्रयोगदर्शनं, सत्रादुदवसाय पृष्ठशमनीयेन यजेरन्निति । एवमत्रापि, आसीरन्, उपेयुरिति बहुवचनं भविष्यतीति ॥ ४५ ॥ पूर्व० ॥

वचनात्तु बहूनां स्यात् ॥ ४६ ॥

नैतदस्ति, एको यजेत, न बहव इति । किन्तर्हि । बहवो यजेरन् । कुतः । वचनात् । वचनमिदं भवति । आसीरन् उपेयुरिति । बहुत्वसम्बद्धः प्रयोगो विधीयते । स प्रत्यक्षवचनाच्चोदकप्राप्तामेककर्तृकतां बाधेतेति ॥ ४६ ॥ सि० ॥

अपदेशः स्यादितिचेत् ॥ ४७ ॥

यदुक्तं, सामान्यक्रियासम्बन्धमभिसमीक्ष्य लोकवद् बहुवचनशब्दप्रयोगो भविष्यति । यथा, कृषिं कुर्युरिति । वेदेऽपि दर्शनं, पृष्ठशमनीयेन यजेरन्निति बहुवचनं भवति, एवमत्रापीति । तत् परिहर्त्तव्यम् ॥ ४७ ॥ आ० ॥

नैकव्यपदेशात् ॥ ४८ ॥

नैतत् सत्रे उपपद्यते, एककर्तृकमिति । कुतः । एकव्यपदेशात् । कथम् । एवमाह । एष वै कुणपमत्ति यः सत्रे प्रतिगृह्णाति । एक एव

यजेतेति, सत्रमपोद्य अन्यस्यैककर्तृकतां विदधत् तस्य बहुकर्तृकतां गमयति । यत्तु लोकवदिति । तन्न युक्तम्, लोकेऽन्यतः प्रवृत्तस्यार्थस्य अनुवादभूतः शब्द उच्चार्यमाणः सामान्यक्रियासम्बन्धाभिसमीक्षया उच्चरित इति गम्यते । यदपि उदवसानीयवदिति तदपि उदवसानीये युक्तम् । तत्र हि भिन्नानि उदवसानानि उपलक्ष्य क्रियामात्रं विधीयते, तद्‌बहुत्वञ्च समानकर्तृकत्वादेव प्राप्तमनूद्यते इत्युक्तमेव । इह तु शब्दपूर्विका क्रियाप्रवृत्तिः । शब्दश्च बहुत्वविशिष्टं प्रयोगं सत्रिभिरभिसम्बन्धयति । अतः शब्दप्रामाण्यादुपादीयमानायां क्रियायां बहुत्वं विवक्षितमिति बहवः प्रयुञ्जीरन्निति ॥४८॥ आ० नि०

सन्निवापञ्च दर्शयति ॥ ४९ ॥

इतश्च बहव एव यजेरन्निति । कुतः । सन्निवापदर्शनात् । बहूनामग्नीनामेकत्र सन्निवापमाह । पञ्चभिः पशुभिर्यक्ष्यमाणः सन्निवपेरन्, सावित्राणि होष्यन्तः सन्निवपेरन्निति । यदि संहत्य कुर्वन्ति, एवमग्नीनां सन्निवाप उपपद्यते । अथ त्वेकैकश्येन कुर्युः, सन्निवापदर्शनं नोपपद्यते । तस्मादपि गम्यते बहूनां सत्रमिति ॥ ४९ ॥

बहूनामिति चैकस्मिन् विशेषवचनं व्यर्थम् ॥ ५० ॥

इतश्च पश्यामः, सम्भूय प्रयोग इति । कुतः ? । एवं श्रूयते । यो वै बहूनां यजमानानां गृहपतिः, स सत्रस्य प्रत्येता, स हि भूयिष्ठाम् ऋद्धिमाध्नोतीति । एकस्मिन् गृहपतौ बहुभिर्यजमानैः सह प्रवृत्ते फलविशेषं ब्रुवन् बहूनां सहप्रयोगं दर्शयति । इतरथा एकस्मिन् यजमाने कर्त्तुरेकत्वात् फलैकत्वाच्च सामान्यविशेषभावानुपपत्तेः फलविशेषवचनं व्यर्थं स्यात् । अस्ति तु फलविशेषवचनम् । तस्मादपि गम्यते बहव एव यजेरन्निति ॥ ५० ॥ युक्तिः ॥ सत्रस्य बहुकर्तृकत्वाधिकरणम् ॥ १४ ॥

अन्ये स्युर्ऋत्विजः प्रकृतिवत् ॥ ५१ ॥

इह सत्राण्येवोदाहरणम् । तेषु बहवः कर्त्तार इत्युक्तम् । इदमिदानीं सन्दिह्यते । किं त एव सत्रिण ऋत्विजः, उतान्ये उपादातव्या इति । किं प्राप्तम् । अन्ये उपादातव्या ऋत्विजः । कुतः । ज्योतिष्टोमे हि प्रकृतौ अन्ये कर्त्तार उपादेयाः समाम्नाताः । तद्वदिहापि सत्रिभिः प्रकृतिवत् कुर्वाणैश्चोदकानुग्रहाय अन्ये एवोपादेया इति ।

एवं प्रकृतिवत् कृतं भविष्यतीति ॥ ५१ ॥ पूर्व० ॥

अपि वा यजमानाः स्युर्ऋत्विजामभिधान-
संयोगात्तेषां स्याद्यजमानत्वम् ॥ ५२ ॥

नैतदस्ति, अन्ये ऋत्विज इति । यजमाना एव ऋत्विजः स्युः । कुतः । ऋत्विजामभिधानसंयोगात् । यजमानसंस्कारो हि दीक्षा-पदार्थोऽध्वर्य्वादिसमाख्यासंयोगेन कर्मनिमित्तेन प्रसिद्धिरूपेणा-ऽभिधाय विधीयमानो यजमानानां तेषामाध्वर्य्यवादिसम्बन्धमव-बोधयति । कथम् । यदि ते तान् पदार्थान् कुर्वन्ति एवं ते नामात्ति-कीभिराख्याभिर्युज्यन्ते, नान्यथेति । अतोऽवगम्यते, अस्ति तैः पदा-र्थैरभिसम्बन्ध इति । किं तद्वचनम् । अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति ततो होतारं तत उद्गातारमित्युपक्रम्य सर्वर्त्विजः उपक्रान्ता दीक्षासम्बन्धेन । तस्माद्दृश्यते यजमाना एव आर्त्विज्ये स्युर्नान्ये इति ॥ ५२ ॥ सि० ॥

कर्तृसंस्कारो वचनादाधातृवदितिचेत् ॥ ५३ ॥

इति चेद् मन्यसे, यजमाना एव ऋत्विजः स्युरिति । तन्न युक्तम् । प्रकृतौ हि यजमानादन्ये प्रकृतिवदिहापि यजमानेभ्योऽन्यैरेव भवितव्यमिति पूर्व एव पक्षो व्यपदिश्यते । केवलं तु पूर्वोक्तस्य परिहारो वक्तव्यः । स उच्यते । कर्तृसंस्कारो वचनादाधातृवद् भविष्यति । कथम् । एतावदेव श्रूयते, अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीति । तद् यदि भिन्ना अपि कर्त्तारो भवन्ति तान् आत्मीयाभिः संज्ञाभिरुपलक्ष्य वचनसामर्थ्याद् दीक्षासंस्कारस्तेषां विधीयते इति नानुपपन्नम् । आधातृवत् । यथाऽन्यत्राप्यृत्विजां संस्कारो विधीयते आधाने, यस्तं श्वोऽग्निमाधास्यन् स्यात् स एतां रात्रिं व्रतञ्चरेदिति । न मांसमश्नीयान्न स्त्रियमुपेयादिति वचनादध्वर्योर्नियमो विधीयते । तथा ज्योतिष्टोमे सर्वर्त्विज उपवसन्तीति ऋत्विजामुपवासो विधीयते । तद्वदिहापि ऋत्विजामेष संस्कारो भविष्यति ॥ ५३ ॥ आ० ॥

स्याद्विशये तन्न्यायत्वात् प्रकृतिवत् ॥ ५४ ॥

नैतदस्ति, अन्ये ऋत्विज इति । किन्तर्हि यजमाना एव ऋत्वि-

जः स्युः । कुतः । एतस्मिन् संशये, त एव वा यजमाना ऋत्विजः, अन्ये वा भिन्नाः ? इति । त एवेति न्याय्यम् । उक्तोऽत्र न्यायः । अपि वा यजमानाः स्युर्ऋत्विजामभिधानसंयोगादिति । अनेन न्यायेन पश्यामः, ते एवेति । यदुक्तम्, आधानवत्तत्संस्कार ऋत्विजां भविष्यतीति । तदनुपपन्नम् । कथम् ? । अप्राकृतप्रयोजना वा दीक्षा ऋत्विजां विधीयते । प्रकृतिवद्वा प्राकृतकार्यैका सती यजमानबहुत्वात् क्रमपरतया सङ्कीर्त्येत । प्राप्तायाः सङ्कीर्त्तनं लघीयः । क्रममात्रविधानात् । ऋत्विक्संस्कारे सति अदृष्टकल्पना, अधिकार्थविधानञ्च । तस्मात् प्राप्तायाश्चोदकेन सङ्कीर्त्तनं, न अप्राप्तविधानमिति । यत्तु, यथा ऋत्विजामुपवासविधानम्, आधातुश्च व्रतविधानं, तद्वदिहापीति । तत्र युक्तम् । विस्पष्टं वचनम् । ऋत्विज उपवसन्ति, स तां रात्रिं व्रतञ्चरेदिति । न च तत्रापूर्वत्वात् प्राप्त्याशङ्का । तस्मात् तत्र विधानम् ॥ ५४ ॥ आ० नि० ॥

स्वाम्याख्याः स्युर्गृहपतिवदिति चेत् ॥ ५५ ॥

परिचोदनासूत्रमेतत् । अथ कस्माद् न स्वाम्याख्या एता अध्वर्य्याद्या भवन्ति गृहपतिवत्? इति । किमेवं भविष्यति । एवं चोदकप्राप्ताऽन्यकर्तृकता न बाधिता भविष्यति । अध्वर्य्याद्याश्च समाख्या गृहपतिवद् यजमानाभिधानतयाऽर्थवत्यो भविष्यन्तीति स्थिते अर्थे सूत्रेण परिचोदयति ॥ ५५ ॥ आ० ॥

न प्रसिद्धग्रहणत्वादसंयुक्तस्य तद्धर्मेण ॥ ५६ ॥

नैतद् युक्तं, 'स्वाम्याख्या एता गृहपतिवदिति । कुतः । प्रसिद्धग्रहणत्वात् । आध्वर्य्यवादिकर्म कुर्वाणेषु हि कर्तृषु कर्मनिमित्ता एता आख्याः प्रसिद्धाः, न याजमानं कुर्वाणेषु, यजमानानामाभिः क्रियाभिरसंयुक्तानां भविष्यन्तीत्यनुपपन्नम् । कथं गृहपतिरित्याख्या ? । उच्यते । असंयुक्तस्य ऋत्विग्धर्मेण स्वामिन एवाख्या गृहपतिरिति । अपि चावयवप्रसिद्ध्यापि गृहपतिशब्दस्य पतिर्वाच्य इति यजमानाभिधेयता उपपत्स्यते । प्रकृतावपि स्वामिनि चायं प्रयुक्तः, गृहपतिर्यजेतेति । न त्वध्वर्य्याद्याः स्वामिनि केनचिदपि प्रकारेण तत्क्रियासंयुक्ता उपपद्यन्ते, इत्यन्यक्रियासम्बन्धात् ता भिद्यन्ते इति । बहूनामिति च तुल्येषु विशेषवचनं नोपपद्यते ॥

इतश्च आर्त्विजेषु यजमाना एव । कुतः । एवमाह । यो वै बहूनां यजमानानां गृहपतिः सत्रस्य प्रत्येता स हि भूयिष्ठामृद्धिमाप्नोतीति एकस्मिन् गृहपतिरितिविशेषवचनमसमानत्वे सति उपपद्यते, नान्यथा । यदि सर्वे गृहपतिकर्म कुर्य्युर्न कर्मान्तरं, ततो विशेषाभावाद् गृहपतौ विशेषवचनानुपपत्तिः स्यात्। अथ तु इतरे उभयं कुर्वन्ति, गृहपतिर्याजमानमेव, ततो विशेषवचनं युक्तं भवति । तस्माद्विशेषवचनात् ते एव ऋत्विज इति गम्यते ॥ ५६ ॥ आ० नि०॥

दीक्षितादीक्षितव्यपदेशश्च नोपपद्यते अर्थयोर्नित्यभावित्वात् ॥ ५७ ॥

इतश्च स्वयङ्कर्तृकाणि सत्राणीत्यवगम्यते । कुतः । दीक्षितादीक्षितव्यपदेशात् । एवमाह । दीक्षिताः सत्रैर्यजन्ते, अदीक्षिता अहीनैर्यजन्तीति । एतौ च नियतावेवार्थौ । दीक्षिताः स्वार्थं यजन्ते, याजकाय अपि अदीक्षिता याजयन्तीति । अहीने सत्रे चैतयोरर्थयोर्विशेषाभावाद्व्यपदेशानुपपत्तिः स्यात् ।अथ तु सत्रे यावत् कार्यं तत् सर्वं दीक्षितैरेव, क्रियते अहीने चादीक्षितैः, ततो व्यपदेश उपपद्यते, नान्यथा । अतो व्यपदेशादवगच्छामः, अस्ति सत्रे स्वयङ्कर्तृत्वमिति॥५७

अदक्षिणत्वाच्च ॥ ५८ ॥

इतश्च स्वयंकर्तृकं सत्रम् । कुतः । अदक्षिणत्वात् । अदक्षिणानि सत्राणि आहुः । न ह्यत्र गौर्दीयते न वासो न हिरण्यमिति दक्षिणाभावदर्शनं स्वयंकर्तृकत्वे उपपद्यते, नान्यथा।परकर्तृकत्वे हि दक्षिणाभावो नोपपद्यते । न हि कश्चिदृते स्वार्थात् परार्थे परः प्रवर्त्तते । तस्मादपि गम्यते स्वयंकर्तृकाणि सत्राणीति ॥५८॥ सिद्धान्ते युक्तिः ॥ सत्रे यजमानानामेव ऋत्विक्त्वाधिकरणम् ॥ १५ ॥

द्वादशाहस्य सत्रत्वमासनोपायिचोदनेन यजमानबहुत्वेन च सत्रशब्दाभिसंयोगात् ॥ ५९ ॥

द्वादशाह एवोदाहरणम् । उक्तश्च पूर्वं सत्रमहीनश्च द्वादशाह इति । तस्येदानीं द्विप्रकारस्य लक्षणमन्वाख्यायते, एवँल्लक्षणको द्वादशाहः सत्रम्, एवँल्लक्षणकोऽहीन इति । तद्विवेकज्ञानार्थमिदमुच्यते, आसनोपायिचोदनया यजमानबहुत्वेन च सत्रत्वमवगम्यते।

एते चोदने आसते, उपयन्तीति हि नित्यं सत्रसम्बद्धे दृष्टे । य एवं विद्वांसः सत्रमासते, य एवं विद्वांसः सत्रमुपयन्तीति । यजमानबहुत्वेन च, चतुर्विंशतिपरमाः सप्तदशावराः सत्रमासीरन्निति । तत्सहचरितलिङ्गदर्शनात् । सहचरिते प्रत्ययो भवतीति ॥ ५९ ॥

यजतिचोदनादहीनत्वं स्वामिनां चाऽस्थित-परिमाणत्वात् ॥ ६० ॥

अथ किँलक्षणकोऽहीनः ? इति । तदुच्यते । यत्र यजतिचोदना, अनियतश्च कर्तृपरिमाणं तत्र अहीन इति निश्चीयते । अहीनानां यजतिचोदनया विधानं, द्विरात्रेण यजेतेत्येवमादि । कर्तृपरिमाणञ्च एषामनियतम् । सत्राणान्तु नियतं परिमाणं बहवः । एवँलक्षणस्य च लक्षणे लक्षितं प्रयोजनं नान्यन्मृग्यमिति ॥ ६० ॥ सिद्धान्तः ॥ सत्राहीनयोर्विवेकाधिकरणम् ॥ १६ ॥

अहीने दक्षिणाशास्त्रं गुणत्वात् प्रत्यहं कर्मभेदः स्यात् ॥ ६१ ॥

अस्ति पौण्डरीक एकादशरात्रः, पौण्डरीकेण एकादशरात्रेण स्वाराज्यकामो यजेतेति । तत्र श्रूयते । अयुतं पौण्डरीके दद्यादश्वसहस्रमेकादशमिति । तत्र सन्दिह्यते । किं प्रत्यहमयुतम् अश्वसहस्रञ्च दातव्यम्?उतैकमेवायुतमश्वसहस्रञ्च सकृदिति । किं प्राप्तम् । अहीने दक्षिणाशास्त्रं प्रत्यहं भिद्येत । कुतः । गुणत्वाद् दक्षिणायाः, प्रधानत्वाच्चाह्नाम् । समुदायशब्देन समुदायीनि अहानि उपलक्ष्य दक्षिणा गुणो विधीयमानः प्रतिप्रधानं भिद्येत । यथा गणाय स्नानम्, उपलेपनं वा विधीयमानं गणिनां भवति । एवमत्रापि द्रष्टव्यम् । प्रतिकर्मावसायी च चोदक एवमनुग्रहीष्यते।दक्षिणाभूयस्त्वाच्च फलभूयस्त्वं भविष्यति । अतोऽवगम्यते भेद इति॥ ६१ ॥ पूर्व०

सर्वस्य वैककर्म्यात् ॥ ६२ ॥

न चैतदस्ति, प्रत्यहं दक्षिणाभेद इति । एकमेवायुतं सहस्रं च दीयते । कुतः । ऐककर्म्यात् । एकं हि दक्षिणानां कार्यम् । ऋत्विगानमनम् । आनतिश्च साङ्गक्रतुनिर्वृत्त्यै कृतेति । अन्तरा न तया प्रयोजनमस्तीति न भूयः क्रियते । यत्तु अङ्गभूयस्त्वेन फलभूयस्त्वमिति

सद् अङ्गत्वे प्रज्ञाते भवति, नान्यथा। समुदायाङ्गञ्च दक्षिणा, नावयवाङ्गमित्युक्तम्। अथ यदुक्तं, प्रतिकर्मावसायी चोदकः प्रतिकर्म प्रापयतीति। प्रत्यक्षवचनात् समुदायाङ्गीकरणेन च दक्षिणानां विधानमिति चोदको बाधित इति न दोषः ॥ ६२ ॥ आ० ॥

पृषदाज्यवद्वाऽह्नां गुणशास्त्रं स्यात् ॥ ६३ ॥

न चैतत्, सकृदेव दातव्यमिति। किं तर्हि। भेदेन। कुतः। प्रत्यहं दक्षिणानां प्राप्तानामयं विशेष उच्यमानः प्रत्यहमेव भवितुमर्हतीति। पृषदाज्यवत्। यथा पृषदाज्येनानुयाजान् यजतीति पृषत्ता गुणो विधीयमानः प्रत्यनुयाजं भिद्यते, एवमत्रापि द्रष्टव्यमिति ॥६३॥ आ० नि० ॥

ज्यौतिष्टोमिक्यस्तु दक्षिणाः सर्वासामेककर्मत्वात् प्रकृतिवत्तस्मान्नासां विकारः स्यात् ॥६४॥

न चैतदस्ति, भेद इति। किन्तर्हि। तन्त्रेण सकृदेव। कथम्। ज्यौतिष्टोमिक्यो हि दक्षिणाः साङ्गं कर्मराशिमङ्गीकृत्य दीयन्ते, तथाभूतानाञ्च तासां समुदायानत्यर्थानां प्राप्तानामयं विशेष उच्यते। सहस्रमयुतमिति विशेष उच्यमानो या इह दक्षिणा दीयन्ते तासामयं विकार इति गमयति। एकत्वम् आनतेर्न वारयति। तस्मात् सकृद् दातव्यमिति। यत्तु, अनुयाजवदिति। युक्तम्। यद् अनुयाजेषु द्रव्यस्य भेद इति। यागे हि द्रव्यं गुणभूतं चोद्यते। तद् यागानां भेदादन्यस्य क्रियमाणं नान्यस्योपकरोतीति भिद्यते। इह त्वेका आनतिरित्युक्तम्। तस्माद्विषमो दृष्टान्त इति ॥ ६४ ॥ आ० ॥

द्वादशाहे वचनात् प्रत्यहं दक्षिणाभेदस्तत्प्रकृतित्वात् परेषु तासां संख्याविकारः स्यात् ॥ ६५ ॥

न चैतदस्ति, सकृद्दातव्यमिति। प्रत्यहमयं विशेषो भिद्यते। कुतः। द्वादशाहे हि प्रत्यक्षं वचनम्, अन्वहं द्वादशशतं ददातीति। पौण्डरीकश्च द्वादशाहप्रकृतिः। तस्मात् पौण्डरीके प्रत्यहं चोदकप्राप्त्या प्रसक्तानां दक्षिणानामयं विशेष उच्यमानस्तथैव कर्मावयवसम्बद्धानां विकार इति गम्यते। ततो भेदेन दक्षिणानां विशेष इति ॥ ६५ ॥ आ० नि० ॥

परिक्रयाविभागाद्वा समस्तस्य विकारः स्यात् ॥६६॥

न चैतदस्ति, दक्षिणाभेद इति । किन्तर्हि । सकृदेव दक्षिणा दीयेतेति । कुतः । परिक्रयाविभागात् । समस्ता दक्षिणा विक्रियेरन् । कृत्स्नं हि क्रतुमङ्गीकृत्य दक्षिणा विधीयन्ते । कथम् । तावतः पुरुषार्थत्वात् । यत् फलवत्, तत् पुरुषस्य चिकीर्षितम् । तच्च कुर्वाणस्य, सहायान् उपाददानस्यायं विशेष उच्यते परिक्रयः । न चावयवः फलवान्, समुदायात् फलनिष्पत्तेः । समुदायं चाङ्गीकृत्य परिक्रयः क्रियमाणः, आ समुदायनिर्वृत्तेः परिक्रयः कृत इति अन्तरा न भूयः क्रियते ॥ अपि च । पौण्डरीकशब्दसंयोगेन परिक्रयविशेष उच्यमानस्तच्छब्दवाच्यस्यैव भवतीति गम्यते। समुदायश्च पौण्डरीकशब्दवाच्यो, नावयवः । स हि समुदायशब्देन लक्ष्यते । तत्र लक्षणैव दोषः । असम्भवे हि लक्षणा आश्रीयते । न चेहासम्भवः । अतः समुदायमङ्गीकृत्य सकृदेव ऋत्विजो व्रियेरन्निति । तस्मात् सकृत् परिक्रय इति । सकृद्दाने च प्रयोगवचनानुग्रहः । प्रयोगप्राशुभावाच्च महाविषयता शास्त्रस्येति । तस्मादप्येतदेव न्याय्यमिति ॥ ६६ ॥ सि०

भेदस्तु गुणसंयोगात् ॥ ६७ ॥

यदुक्तं, द्वादशाहप्रकृतित्वात् पौण्डरीकस्य । तत्र च द्वादशाहे दक्षिणाभेदात् तथाभूताया एवेह विशेष उच्यते इति । तत् परिहर्त्तव्यम् । अत्रोच्यते । तत्राप्येकत्वात् क्रतोः, एक एव परिक्रयः । भेदस्तु वचनात् सुत्यासम्बन्धप्रयोजनो दक्षिणासंस्कारप्रयोजनश्च, न तस्मिन् भिद्यमाने परिक्रयैकत्वं भिद्यत इति ॥ ६७ ॥ ॥ आ० नि० ॥

पौण्डरीके सकृदेव दक्षिणादानाधिकरणम् । १७ ॥

प्रत्यहं सर्वसंस्कारः प्रकृतिवत् सर्वासां सर्वशेषत्वात् ॥ ६८ ॥

पौण्डरीक एवोदाहरणम् । तत्रैतत्समधिगतं, सकृदेव परिक्रय इति । अस्ति तु प्रकृतौ, माध्यन्दिने सवने दक्षिणा नीयन्ते इति । तत्र संशयः । किं सर्वासां कार्त्स्न्येन प्रत्यहं नयनम्, उत सकृन्नयनम्, अथ वा प्रविभज्य नयनम् ? इति । किं प्राप्तम् ?, प्रत्यहं सर्वासां संस्कारः स्यात् । कुतः ? । प्रकृतिवत् । प्रकृतौ हि सकला दक्षिणाः तस्मिन् काले संस्कृताः । इहापि तद्वदेव सकलाः संस्कर्त्तव्या इति ।

कथम् । अह्नां प्राधान्यात् । तद्गुणभावाच्च दक्षिणानाम् । सर्वा एताः सर्वेषामह्नां शेषभूताः । शेषभूतस्य चार्थस्य यः संस्कारः, स तेन तेन अह्ना प्रयुज्यते इति । तस्मात् प्रत्यहं सर्वसंस्कारः ॥ ६८ ॥

एकार्थत्वान्नेति चेत् ॥ ६९ ॥

न चैतदस्ति, प्रत्यहं सर्वसंस्कार इति । किन्तर्हि ? । सकृदेव संस्कारः स्यात् । कुतः । एकार्थत्वाद्दक्षिणानाम् । एकं कार्यमानमनं, तासाञ्च नयनादिसंस्कारसंस्कृतानां प्रत्यर्पणं कार्यम् । एकस्मिन्नपि च अहनि तत्संस्कारसंस्कृतासु दीयमानासु कृतश्चोदनाऽर्थ इति भूयः संस्कारेण प्रयोजनं नास्ति । तस्मात् सकृत् संस्क्रियेरन्निति ॥ ६९ ॥

स्यादुत्पत्तौ कालभेदात् ॥ ७० ॥

नचैतदस्ति, सकृत्संस्कार इति । किन्तर्हि । प्रत्यहम् । कुतः । उत्पत्तौ कालभेदात् । उत्पत्तौ दक्षिणानां विशिष्टकालसम्बन्धः श्रूयते । तस्मात् त्रिष्टुभो लोके माध्यन्दिने सवने दक्षिणा नीयन्ते इति। सर्वाश्चैताः सर्वेषामह्नां शेषभूताः । तेषाञ्चाह्नां माध्यन्दिनानि सवनानि भिद्यन्ते । तत्र च अगम्यमानविशेषत्वाद् यस्य माध्यन्दिने सवने न संस्क्रियेरन्, तस्यैव संस्कारलोपः स्यात् । प्रयोगभेदात् । न च अन्यत्र संस्क्रियमाणा अन्यत्र संस्कृता भवन्ति । तस्माद् भेदेन संस्क्रियेरन्निति ॥ ७० ॥ पूर्व०नि० ॥

विभज्य तु संस्कारवचनाद् द्वादशाहवत् ॥ ७१ ॥

न चैतदस्ति, समस्तानां प्रत्यहं संस्कार इति । किन्तर्हि । विभज्य संस्क्रियेरन् । कुतः । वचनात् । द्वादशाहे प्रत्यहं नयनादिसंस्कारो वचनात् क्रियते । अन्वहं द्वादशशतं ददातीति । पौण्डरीकश्च द्वादशाहप्रकृतिः, न ज्योतिष्टोमप्रकृतिः । तस्मात् परिक्रयैकत्वेऽपि सति वचनाद् भेदेन संस्कार इति ॥ ७१ ॥ ॥ सिद्धान्तः ॥
पौण्डरीके सर्वासां दक्षिणानां विभज्य नयनाधिकरणम् ॥ १८ ॥

लिङ्गेन द्रव्यनिर्देशे सर्वत्र प्रत्ययः स्याल्लिङ्गस्य सर्वगामित्वादाग्नेयवत् ॥ ७२ ॥

क्वचित् कर्मविशेषे श्रूयते, मनोर्ऋचः सामिधेन्यो भवन्तीति, तत्र संशयः । किं यावत्यो मनुलिङ्गा ऋचः, ताः सर्वा दाशतयीभ्य

आनीय सामिधेनीषु विनियोक्तव्याः? उत काश्चिदेव, न सर्वा इति। किं प्राप्तम्। सर्वा एवंलिङ्गा उपादेयाः। कुतः। लिङ्गस्य सर्वगामित्वात्। इहैतावच्छ्रूयते मनोर्ऋचः सामिधेन्यो भवन्तीति। मनुशब्दसंयोगो हि लक्षणम् ऋचामुपादीयमानानाम्। मनुसम्बन्धेन च शब्द उपलक्षयन् यावतीषु सम्भवेत्, तावतीरविशेषाच्छक्नोत्युपलक्षयितुम्। एतच्च वचनं लिङ्गमात्रसम्बन्धेन विनियोजकं, न इयत्तापरिच्छिन्नानां विशेषकम्। तस्मादविशेषात् सर्वास्तल्लिङ्गवत्य उपादेयाः। आग्नेयवत्। यथा, ऋजीषाणामाग्नेयेन संवत्सरमुपधाने, आसीत सूक्तेन सूक्तस्य अविच्छेदायेति आग्नेयेन सूक्तेनेत्युक्तम्। यावन्ति आग्नेयानि सूक्तानि दाशतयानि, सर्वैरिष्टका उपधीयन्ते। एवमिहापि मनुलिङ्गाभिः सामिधेनीकार्यं कर्त्तव्यमिति। यथा वा अहर्गणे ऋजीषमप्सु प्रास्यतीति, सर्वेषामह्नां यद् ऋजीषम् अविशेषात् तत् सर्वं प्रास्यते। तद्वदिहाप्यविशेषात् सर्वासामुपादानमिति ॥ ७२ ॥ पूर्व० ॥

यावदर्थं वाऽर्थशेषत्वादल्पेन परिमाणं स्यात् तस्मिंश्च लिङ्गसामर्थ्यम् ॥ ७३ ॥

न चैतदस्ति, सर्वासां मनुलिङ्गानां दाशतयीनामागम इति। किन्तर्हि। यावदर्थमुपादेया इति। कुतः। अर्थशेषत्वात्। कार्यशेषभावेन हि सामिधेनीनामुपादानम्। तच्च कार्यमल्पाभिरपि सिद्ध्यतीति। सिद्धत्वात् कार्य्यस्य। यद्यपि लक्षिताः सन्ति अपरा ऋचः, तथापि प्रयोजनाभावाद् नैवोपादीयन्ते इति॥ ननु कार्यशेषभावः सर्वत्र वाचनिकः, इहापि प्रत्यक्षवचनाल्लिङ्गपरिच्छिन्नाः सामिधेन्यो विधीयन्ते इति सर्वासां विधानं भविष्यतीति। अत्राभिधीयते। सत्यं सर्वत्र वाचनिकः शेषभावः, न त्विह सामिधेन्यो विधीयन्ते। किन्तर्हि। चोदकप्राप्तानामियत्तापरिच्छिन्नानां केवलमनेन विशेष उच्यते, मनोर्ऋच इति। सोऽयं विशेष उच्यमानो यावत्य उपन्यस्ताः, ता एव विशेष्य कृतार्थत्वाद् व्यावर्त्तन्ते, नापरा अपि तल्लिङ्गाः प्रसज्ज्यन्ते। तस्माल्लिङ्गवतीनां नियतानामुपादानं न सर्वासाम्। इति। न च लिङ्गवतीनां भावाद् गुणानुरोधेन प्रधानावृत्तिर्न्याय्या। एवञ्च लाघवं प्रयोगप्राशुभावश्च भविष्यतीति। अपि चास्मिन् पक्षे

लिङ्गमपि समर्थमेव। कथम् । लिङ्गं हि लक्षणत्वेन सामिधेनीनामुच्यते। तत्र यद्यपि न तल्लिङ्गाः सर्वा उपादीयन्ते, यास्त्विह प्रयुज्यन्ते तास्तल्लिङ्गा एव, नान्यलिङ्गाः, तथापि लिङ्गमनुगृहीतमेव, न बाधितमिति। तस्माद् यावदर्थमुपादानं न सर्वासामिति ॥७३॥ सि०॥

आग्नेये कृत्स्नविधिः ॥ ७४ ॥

यदुक्तं, यथा आग्नेयैः सूक्तैरिष्टका उपदधाति इत्युक्ते सर्वाणि लिङ्गविशिष्टानि उपादीयन्ते, न कानिचित्। एवमत्रापि द्रष्टव्यमिति। तत् परिहर्त्तव्यम्। अत्रोच्यते। युक्तमाग्नेयेषु कृत्स्नविधानम्। कुतः। इष्टकाबहुत्वात्, प्रतिसूक्तमुपधातीति वचनाद् बह्वीनामुपधेयानां सूक्तालपत्वात् कार्त्स्न्येनोपादानमविरुद्धम् । इह तु इयत्तापरिमितानां विशेष उच्यते, इत्युपदिष्टो हेतुः। तस्मादयमिह अदृष्टान्त इति ॥ ७४ ॥

ऋजीषस्य प्रधानत्वादहर्गणे सर्वस्य प्रतिपत्तिःस्यात्॥७५

यदप्युक्तम्, अहर्गणे यथा ऋजीषस्य कृत्स्नस्याप्सु प्राशनम्, एवमत्रापि अविशेषात् सर्वासामुपादानमिति । तत् परिहर्त्तव्यम्। अत्रोच्यते। ऋजीषस्य प्रधानत्वाद् युक्तम्, ऋजीषस्य अविशेषात् प्रतिपत्तिरियम् अभिधीयते। सा सर्वस्य ऋजीषस्य स्यात्। यस्य न क्रियेत, तस्य संस्कारपरिलोपः स्यात्। तस्मात् सर्वेषामह्नां यद् ऋजीषं, तत् सर्वं प्रास्यते । इह तु अर्थशेषत्वादित्युपदिष्टो हेतुः। तस्माद् विषममेतद् ऋजीषेणेति ॥ ७५ ॥ आ० नि० ॥ मनोर्ऋच इत्यनेन यावदर्थम् ऋचामुपादानाधिकरणम् ॥ १९ ॥

वाससि मानोपावहरणे प्रकृतौ सोमस्य वचनात् ॥ ७६ ॥

ज्योतिष्टोमे मानोपावहरणे समाम्नाते। तत्र संशयः। किं यत्रक्वचिद् मानं, येन केनचिदुपावहरणं कार्यम्, उत, वाससि मानं वाससा चोपावहरणमिति। किं प्राप्तम्। अर्थाद् यत्र क्वचिन्मानं, येन केनचिदुपावहरणम्। एवञ्च अनियमे लाघवं प्रयोगप्राशुभावश्च भविष्यतीति ॥ एवं प्राप्ते ब्रूमः। वाससि मानं वाससा चोपावहरणञ्च कार्य्यम्। कुतः ?। वचनात्। वचनमिदं भवति। वाससि मिनोति, वाससा च उपावहरतीति वचनस्य सामर्थ्यान्नियम्येत॥

अथ वा, नैवात्र संशयः। वचनाद् वाससि मानं वाससा चोपावहरणम् । एवं प्राप्तमुत्तरविवक्षया कीर्त्यते, विशेषं चिन्तयितुम् । यच्च प्राप्तमुत्तरविवक्षया कीर्त्यते, न तत्र पूर्वोत्तरपक्षाभ्यां प्रयोजनमिति ॥ ७६ ॥ वाससि मानोपावहरणयोरनुष्ठानाधिकरणम् ॥ २० ॥

तत्राहर्गणेऽर्थाद्वासः प्रकृतिः स्यात् ॥ ७७ ॥

अस्ति द्वादशाहः । तत्र चोदकप्राप्तमुपावहरणं, वाससा उपावहरतीति । तत्र संशयः । किमुपावहरणार्थमन्यद्वास उत्पाद्यम् ? उत नेति । किं प्राप्तम् । नोत्पाद्यम् । कुतः । न वचनमस्ति । अन्यद् भेदेनोत्पाद्यमिति । वचनादृते न प्रतीमो भेदेनोत्पत्तिम् । तस्मान्नोत्पाद्यमिति ॥ एवं प्राप्ते ब्रूमः । अहर्गणेऽर्थाद्वास उत्पाद्यम् । कथम् । अहर्बहुत्वात् । बहूनि अहानि । तत्र चोदकेनैतत् प्राप्यते । वाससा उपावहरतीति । भेदेन चानुत्पाद्यमाने उपावहरणार्थं एव न सिद्ध्येत् । तस्मादुत्पादयितव्यमिति ॥ ७७ ॥ अहर्गणेऽर्थाद् वासोऽन्तरोत्पादनाधिकरणम् ॥ २१ ॥

मानं प्रत्युत्पादयेत् प्रकृतौ तेन दर्शनादुपावहरणस्य ॥ ७८ ॥

तत्रैवाहर्गणे चिन्त्यते । उक्तमेतद्, अर्थाद् वास उत्पाद्यमिति । तत्र संशयः । किं मानं प्रति उत्पाद्यम् ? उतोपावहरणं प्रति उत्पाद्यमिति । किं प्राप्तम् । मानं प्रति उत्पाद्यते । कुतः । प्रकृतौ तेन दर्शनादुपावहरणस्य । ज्योतिष्टोमे यस्मिन् मीयते तेनैवोपावहरणं क्रियते । प्रकृतिवच्च विकृतौ, चोदकानुग्रहाय तस्मिन्नेव काले उत्पाद्यमिति ॥ ७८ ॥ पूर्व० ॥

हरणे वा श्रुत्यसंयोगादर्थाद्विकृतौ तेन ॥ ७९ ॥

न चैतदस्ति, मानं प्रति उत्पाद्यमिति । किन्तर्हि । हरणं प्रति उत्पाद्यम् । कथम् । श्रुत्यसंयोगात् । न हि श्रूयते, मानं प्रति उत्पाद्यमिति । श्रुत्यभावाच्च नैकान्ततोऽध्यवसीयते, अत्रैवेति । यस्य चार्थः प्रयोजकः, स प्रयोजनप्रयुक्तत्वात् तत्काल एव न्याय्यो, नान्यकाल इति । हरणकाले चानेन प्रयोजनमिति हरणे एव न्याय्यमुत्पादयितुमिति।यदुक्तं, प्रकृतौ माने यद् वासस्तस्य हरणे दर्शनादिह चोदकानुग्रहाय तत्कालमेवोत्पाद्यमिति । तत् परिहर्त्तव्यम् । अत्रोच्यते ।

न श्रूयते, तेनैव वाससा उपावहरणं कर्त्तव्यमिति । किन्तु अर्थाद् तेन क्रियते । एकत्वादह्नः । न हि तद्वासोऽन्यत्र व्यापृतमिति तेनैव क्रियते । यच्चार्थात् कृतं, न तत् चोदकः प्रापयति । अवाचनिकत्वात् । न चेह तदेव वास उभयार्थं सम्भवति । अहर्बहुत्वात् । तस्माद् हरणकाले एव उत्पाद्यमिति ॥ ७९ ॥ सिद्धान्तः ॥ उपावहरणार्थमेव वासोऽन्तरोत्पादनाधिकरणम् ॥ २२ ॥

इति श्रीभट्टशबरस्वामिविरचिते मीमांसाभाष्ये
दशमाध्यायस्य षष्ठः पादः ॥ १० ॥ ६ ॥

अथ दशमाध्याये सप्तमः पादः ॥ १० ॥ ७ ॥

पशोरेकहविष्ट्वं समस्तचोदितत्वात् ॥ १ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्र संशयः । किं कृत्स्नः पशुरेकं हविः ? उत प्रत्यङ्गं हविर्भेद इति । किं प्राप्तम् । कृत्स्नः पशुरेकं हविरिति । कुतः । समस्तस्य चोदितत्वात् । समस्तो हि पशुरग्नीषोमौ प्रति चोद्यते, न पृथग् अङ्गानामग्नीषोमीयता । तस्मात् पश्वाकृतित्वाद् द्रव्याद् अवदायाग्नीषोमाभ्यां दातव्यम् । अङ्गहविष्ट्वे पशुशब्दे लक्षणा स्यात् । तस्मात् कृत्स्नः पशुरेकं हविः । तच्च दर्शयति । अथो खल्वाहुः, कापेया दक्षिणस्य पूर्वं पदस्यावदेयं, तत् सर्वस्य पशोरवत्तं भवतीति । अथो खल्वाहुः, गोपायना दक्षिणस्य पूर्वं पदस्यावदेयं, तत्सर्वस्य पशोरवत्तं भवतीति कृत्स्नस्य पशोरवदानं दर्शयति । तस्मादपि । कृत्स्नः पशुरेकं हविरिति ॥ १ ॥ पूर्व० ॥

प्रत्यङ्गं वा ग्रहवदङ्गानां पृथक्प्रकल्पनत्वात् ॥ २ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति, कृत्स्नः पशुरेकं हविरिति । किन्तर्हि । प्रत्यङ्गं हविर्भेदः । कुतः । पृथक्प्रकल्पनत्वात् । पृथगङ्गानि प्रकल्पन्ते । हृदयस्याग्रेऽवद्यति जिह्वाया अवद्यति वक्षसोऽवद्यति दोष्णोरवद्यति पार्श्वयोरवद्यति गुदस्यावद्यति । हृदयाकृतिकादिभ्योऽवदानं श्रूयते, नैतद् अविशसिते पशौ सम्भवति । तस्माद् हृदयाद्यर्थेन विशसितव्यः पशुः । तस्मिंश्च विशस्यमाने पश्वाकृतिर्न भवति । तदेवमापतति । पश्वाकृत्या यागस्य क्रियमाणस्योपकुर्यात् । तां पश्वाकृतिमन्तर्धाय च न शक्यते साक्षाद् यागद्रव्यं परिच्छेत्तुम्।

तस्मात् प्रणाड्या सा आकृतिरुपकर्त्तुमर्हतीति पश्वाकृतिकस्य द्रव्यस्य हृदयादीनि यानि, तानि हवींषि । तेभ्योऽवदाय प्रदातव्यमिति ग्रहवत् । यथा, सोमे ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति, आश्विनं गृह्णातीति पृथक्कल्पनत्वात् सोमरसो हविः, न सोमलता एवमत्रापि द्रष्टव्यम् । समस्तचोदना तु अङ्गहविष्ट्वेऽपि प्रणाड्या अवकल्पत एव । अथ यद्दर्शनमुक्तं, तत् सुतरामनेकहविष्ट्वे उपपद्यते । कथम् । कृत्स्नपशोरवदानमन्येनानुजिघृक्षन् न कृत्स्नस्य पशोरवदीयते इति दर्शयति ॥ २ ॥ सिद्धान्तः ॥ ज्योतिष्टोमे प्रत्यङ्गं हविर्भेदाऽधिकरणम् ॥ १ ॥

हविर्भेदात् कर्मणोऽभ्यासस्तस्मात्तेभ्योऽवदानं स्यात् ॥ ३ ॥

प्रत्यङ्गं हविर्भेद इत्येतत् समधिगतम् । इदमिदानीं सन्दिह्यते । किं येन केनचिदङ्गेन हविषा यागो निर्वर्त्तयितव्यः ? उत सर्वेभ्योऽवदातव्यम् ? अथ वा परिसङ्ख्या केनचिदिति । किं प्राप्तम् । सर्वेभ्योऽवदातव्यमित्यवदानकर्म्म अभ्यसितव्यमिति । कुतः । हविर्भेदात् । भिन्नानि हवींषि हृदयादीनि यानि अवदाने सङ्कीर्त्तितानि, अवशिष्टानि च पश्वाकृत्या प्रणाड्या परिच्छिन्नानि । तेभ्यः सर्वेभ्योऽवदातव्यम् । पश्वाकृत्या हि केचिद्विशेषाः परिच्छिद्यन्ते । तद् यदि एकस्मादङ्गाद् अवदीयेत, न पश्वाकृतिपरिच्छिन्नाःसर्वे विशेषा उपसंगृह्येरन् । तत्र पश्वाकृत्या अङ्गभावो न कृतः स्यात् । अनेकविशेषणविशिष्टं हि मांसराशिं परिच्छिन्दती अङ्गभावं नीता भवति, नान्यथा । एकहविष्ट्वे हि पश्वाकृतिपरिच्छिन्नाङ्गराशेः सर्वावदानाऽनभ्यासेनैव यथाश्रुतादेव अवत्तं भवति । पृथक्प्रकल्पितेषु अङ्गेषु एकस्मादङ्गाद् अवद्यन् कांश्चिद् विशेषाञ्जह्यात् । अभ्यस्यंस्तु अवदानानि सर्वान् विशेषान् परिगृह्णाति । तस्मात् सर्वेभ्योऽवदातव्यमिति ॥ आह । ननु पश्वाकृतिपरिच्छिन्नानां विशेषाणां यागार्थत्वाद् अन्यतमेन यागः सिद्ध्येत । उच्यते । सिद्ध्येदेव, यदि विशेषाणां यागसम्बन्धः श्रूयेत । पश्वाकृतेस्तु श्रूयते । तस्माद्विशेषेषु गृह्यमाणेषु अङ्गभावः कृतो भवतीति तदर्थं प्रयोगवचनेन विशेषा गृह्यन्ते, नावगम्यते विशेषः । को वा विशेषो गृहीतः, को वा नेति । अतः

सर्वे गृह्यन्ते प्रयोगवचनानुग्रहाय । यश्च विशेषो न गृहीतः, तेन विनापि यथाश्रुतमेव भवतीति कल्प्यमाने तस्य पश्वाकृत्या परिच्छेदे न कश्चिदप्यधिकोऽर्थोऽङ्गीकृतो भवतीत्यनादरस्तं प्रत्याश्रितः स्यात् । तस्मात् सर्वेभ्योऽवदेयं हृदयादिभ्योऽवशिष्टाच्चेति ॥ ३ ॥ पूर्व० ॥

आज्यभागवद्वा निर्देशात् परिसङ्ख्या स्यात् ॥ ४ ॥

हृदयादिभ्योऽवदातव्यं नावशिष्टात् । कुतः । तेषां निर्देशान्नि- र्दिश्यन्ते हृदयादीनि । एकादश वैतानि पशोरवदानानीति । तत्र प्राप्तत्वादेवैषामेष विधिर्न सम्भवतीति । आनर्थक्यान्नानुवादः । नि- र्गुणश्च पुनःश्रवणमिति इतरेषामश्रुतानां परिसङ्ख्यायकं भवति । यथा, न गन्तव्यं न भोक्तव्यमिति च विस्पष्टं प्रतिषेधः, एवमेव परिसङ्ख्यायां प्रतिषेधः क्रियते । आज्यभागवत् । यथा गृहमेधीये, पञ्चमे पक्षे आज्यभागग्रहणं परिसङ्ख्यार्थमित्युक्तम् । एवमिहापि प्राप्नोति । तस्मात् परिसङ्ख्येति ॥ ४ ॥ उत्तरम् ॥

तेषां वा द्व्यवदानत्वं विवक्षन्नभिनिर्दिशेत् पशोः पञ्चावदानत्वात् ॥ ५ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति, परिसङ्ख्येति । तत्र हि त्रयो दोषाः– स्वार्थप्रहाणं, परार्थकल्पना, प्राप्तबाधश्च । यदुक्तं निर्देशादिति । नैतदेवम् । तेषां हृदयादीनां द्व्यवदानत्वं विवक्षन्नभि- निर्दिशेत् । नैवं वचनव्यक्तिर्भवति । एकादशैव पशोरवदानानि, नाभ्यधिकानि । यानि अवदानानि तानि द्विर्द्विरवद्यतीति । कथन्त- र्हि । एकादश द्विर्द्विरवद्यतीति । कुतः ? । नात्र अवदानमनूद्यते । अप्राप्तत्वात् । कथमप्राप्तिः । पशोः पञ्चावदानत्वात् । पञ्चावदानत्वं हि पशोः श्रूयते । तस्मान्नानुवादः । एतानि द्विर्द्विरवद्यतीति । एतेषां द्विरवदानं विधाय कृतार्थः शब्दो भवति । अवशिष्टानां त्यागं न वारयति । तस्मात् सर्वेभ्योऽवदेयमिति ॥ ५ ॥ पूर्व० ॥

अंसशिरोऽनूकसक्थिप्रतिषेधश्च तदन्यपरिस- ङ्ख्याने ऽनर्थकः स्यात् प्रदानत्वात् तेषां निरवदानप्रतिषेधः स्यात् ॥ ६ ॥

इतश्च न परिसङ्ख्या । कुतः । अंसशिरोऽनूकसक्थिप्रतिषेधात् ।

एवमेतेषां प्रतिषेध उपपद्यते, यदि न परिसङ्ख्यानं भवति, भवति च सः। नांसयोरवद्यति न शिरसो नानूकस्य नापरसक्थ्योरिति। परिसङ्ख्याने अंसशिरोऽनूकसक्थ्नां प्रतिषेधोऽनर्थकः स्यात्। अथ तु न परिसङ्ख्या, ततः प्रदानत्वाद् यानि अंसादीनि, तेषां निरवदानं प्रतिषिद्ध्यते। किमिदं निरवदानमिति। निष्कृष्य तस्मादङ्गाद् अवदानं निरवदानम्। द्विरवद्यतीति तत् प्रतिषिद्ध्यते इति। अतः सर्वैरेवाङ्गैरिज्या क्रियते इति ॥ ६ ॥ युक्तिः ॥

अपि वा परिसङ्ख्या स्यादनवदानीयशब्दत्वात् ॥ ७ ॥

अपि वेति पक्षव्यावृत्तिः। परिसङ्ख्या एव स्यात्। नैव सर्वेभ्योऽवदातव्यम्। कुतः। पुनः श्रवणस्यार्थवत्त्वात्। ननु त्रिदोषा परिसङ्ख्येत्युक्तम्। उच्यते। नात्रायं दोषो भवति। कथम्। अवदानं हि चोदकेन होमार्थं प्राप्नोति। इह तस्य हृदयादिभिः सम्बन्धः क्रियते। तेन हृदयादीनि वाक्येन होमसम्बद्धानि भवन्ति, नान्यानि अङ्गानि पश्वाकृतेर्देवतासम्बन्धीनि। न चैतस्मिन् प्रत्यक्षे हृदयादिवाक्ये सति पश्वाकृतेर्देवतासम्बन्धोऽन्येषामङ्गानां होमसाधनत्वेनोपपद्यते। हृदयादिष्वपि एवमाकृतिकाद् गृह्यमाणेषु आकृतेर्देवतासम्बन्ध उपपद्यत एव। तस्मादन्यानि अङ्गानि परिसङ्ख्यायन्ते ॥ अपि च अनवदानीयशब्दो भवति। मारुत्यान् अनवदानीयान्सुराग्रहांश्च आजिसृद्भ्यो हरतीति। यदि परिसङ्ख्या, ततः किञ्चिदङ्गमनवदानीयं भवति। इतरथा सर्वमवदानीयं स्यात्। अनवदानीयशब्दो नोपपद्यते। तस्मात् परिसङ्ख्येति। ननु शृङ्गखुराभिप्रायमनवदानीयं भविष्यति। नेत्युच्यते। अनवदानीयं हि तत्। अनवदानीयहरणे आजिसृद्भ्य इति चतुर्थी नोपपद्यते। न हि शृङ्गखुरेण आजिसृतोऽभिप्रयन्ते। स्यादेतत्। परिक्रयार्थं तद् भविष्यतीति। उक्तमेतत्। न देवताद्रव्येण स्वकार्य्याणि कर्त्तव्यानीति। तस्मान्न शृङ्गखुराभिप्रायम् ॥ ७ ॥

अब्राह्मणे च दर्शनात् ॥ ८ ॥

इतश्च परिसङ्ख्येति। कुतः। अब्राह्मणे हि भक्षं दर्शयति। कथम्। ककुभो राजपुत्रः प्राश्नाति ध्रुवगोप इति ककुभो भक्षं दर्शयति। इतरथा यागे प्रवृत्तस्यादर्शनं स्यात्। सर्वप्रदानं भवेत्। निरव-

दानप्रतिषेधात् । तस्मादपि परिसङ्ख्येति ॥ ८ ॥

श्रुताश्रुतोपदेशाच्च तेषामुत्सर्गवदयज्ञशेषत्वम् ॥ ९ ॥

इतश्च परिसङ्ख्येति । कुतः । श्रुताश्रुतोपदेशात् । श्रुताश्रुतोपदेशो हि भवति, हृदयानि अङ्गानि अभिमृशति श्रुतानि अश्रुतानि चेति । यदि न परिसङ्ख्या, सर्वेषां श्रपणं स्यात्, अश्रुतदर्शनं नोपपद्येत । परिसङ्ख्याने तु सति हृदयादिभ्योऽन्येषाम् अयज्ञशेषत्वं, यथा पर्य्यग्निकृतं पात्नीवतमुत्सृजन्तीति । तेषां तत्र श्रपणं न स्यात् । अश्रुतदर्शनं चोपपद्यते । तस्मादपि परिसङ्ख्येति ॥ ९ ॥ युक्तिः पशोर्हृदयादिभिरेवाङ्गविशेषैर्यागानुष्ठानाधिकरणम् ॥ २ ॥

इज्याशेषात् स्विष्टकृदिज्येत प्रकृतिवत् ॥ १० ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभेतेति । अस्ति तत्र चोदकप्राप्तः स्विष्टकृत् । इहैवं श्रूयते । त्र्यङ्गैः स्विष्टकृतं यजतीति । तत्र संशयः । किम्, इज्याशेषेभ्यस्त्रिभ्योऽङ्गेभ्यः स्विष्टकृता यष्टव्यम्, उत अनिज्याशेषेभ्यः । किं प्राप्तम् । इज्याशेषेभ्य इति । कुतः । एवं प्रकृतिवच्छब्दानुग्रहो भविष्यति । त्रीणि अङ्गानि यानि इज्याशेषभूतानि । तेभ्य इज्यायां क्रियमाणायां त्रिशब्दोऽप्यनुगृहीतो भवति ॥ १० ॥ पूर्वं० ॥

त्र्यङ्गैर्वा शरवद् विकारः स्यात् ॥ ११ ॥

अनिज्याशेषैस्त्र्यङ्गैरिज्येत, एष विकारः स्याद्, न त्रीणि यानि कानिचिदङ्गानि । यदि यैः कैश्चित्त्रिभिरङ्गैरिज्या कर्त्तव्येत्यभ्युपगम्येत, तत्राङ्गैरिति न विधीयेत । प्राप्तत्वादेव । त्रित्वार्थं विधानं स्यात् । त्रिभिरिज्येतेति । तत्र त्रिशब्दोऽङ्गशब्देनासमर्थ एव स्यात्, असामर्थ्ये समासो नोपपद्येत ॥ अपि च असत्यां त्रयाणामङ्गानामेकस्यां साधारण्यां क्रियायामेकस्मिन् वा साधारणे गुणे त्रिशब्दस्याङ्गशब्देन विशेषणविशेष्यसम्बन्धाभावात् सामर्थ्यं न विद्यते । यानि त्रीण्यङ्गानि त्रित्वसम्बद्धानि तानि त्र्यङ्गानीति । असति विशेषे व्यवहाराभावात् साकाङ्क्षं भवति ॥ कतमानि त्र्यङ्गानीति । त्वत्पक्षेऽपि कथम् । तदुच्यते, समाहार एष समासः । येषां समाहार उक्त एकक्रियागुणसम्बन्धो वा, तानि त्र्यङ्गानि । एषाञ्च समाहार उच्यते । यद्दोष्णः पूर्वार्द्धादग्नये समवद्यति, गुदस्य मध्यतः, श्रोण्या जघनत

इति । समवदानं समाहारः, एकेन अग्निना गुणेन सम्बन्धः, एकया च समवद्यति क्रियया । तस्मादूएतानि ऽयङ्गानि, एतानि चानिज्याशेषाणि । अतो वचनप्रामाण्यादनिज्याशेषैस्त्र्यङ्गैः स्विष्टकृदिज्येतेति । शरवत् । यथा शरमयं बर्हिरिति वचनप्रामाण्याच्छरैः कुशा बाध्यन्ते, एवमिहापीज्याशेषता बाधिष्यते इति ॥

आह, इज्याशेषाणां प्रतिपत्तिरेषा । न चान्येन इज्यायां क्रियमाणायामेतत् प्रतिपादितं भवति । तस्मादिज्याशेषाणां कार्य्ये अवर्त्तमानानि नेज्याशेषविकारभूतानि भवितुमर्हन्तीति । अत्रोच्यते । यद्यपि प्रतिपाद्यन्ते तथापि नान्यथा । तस्यां निर्वृत्तौ इज्याशेषैः कर्त्तव्यायामनिज्याशेषाणि विधीयन्ते । एतानि तत्र प्रतिपादयितव्यानि । एतान्यपि हि कृतकार्य्याणि प्रतिपादयितव्यान्येव । यानि तु शेषभूतानि तानीह प्रतिषिद्धानि यथाकाममन्यत्र प्रतिपादयिष्यन्ते इति ॥ ११ ॥ सि० ॥ ज्योतिष्टोमेऽनिज्याशेषैस्त्र्यङ्गैः स्विष्टकृद्धोमाऽधिकरणम् ॥ ३ ॥

अध्यूध्नी तु होतुस्त्र्यङ्गवदिडाभक्षविकारः स्यात् ॥ १२ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्रेदमाम्नायते, अध्यूध्नीं होत्रे हरन्तीति । तत्राऽयमर्थः सांशयिकः । किमध्यूध्नी होतृभक्षस्य विकारः, उताविकारो होतुर्नियम्यते ? इति कथं विकारः स्यात् । कथं नियम्यते ? इति । यदि अध्यूध्नी विधीयते, होत्रे हरन्तीत्येतदनूद्यते, ततो विकारः । अथ अध्यूध्नीमुद्दिश्य होत्रे हरन्तीति विधीयते, ततो नियमः । किं प्राप्तम् । होतुर्भक्षस्य विकारः स्यात् । कुतः । अपूर्वा अध्यूध्नी अदैवतशेषत्वादिडाभक्षे न प्राप्ता, सा न शक्या अनुवदितुम् । अतो विधीयते, होतृभागहरणोऽध्यूध्नी भवन्ती होतृहरणे प्रत्यक्षा, आनुमानिकमिडाभक्षं निवर्त्तयतीति । त्र्यङ्गवत् । यथा अनिज्याशेषैस्त्र्यङ्गैरिज्याशेषाणि निवर्त्तन्ते, तद्वत् ॥ १२ ॥ पूर्वपक्षे पूर्वपक्षः ॥

शेषे वा समवैति तस्माद्रथवन्नियमः स्यात् ॥ १३ ॥

वाशब्दः पक्षं व्यावर्त्तयति । इडाभक्षविकार इति । कथं स्यादिडाभक्षविकारः, यद्यपूर्वा अध्यूध्नी स्यात् ? । सा हि इडायां समवैति । कथम् । अनस्थिभिरिडां वर्द्धयन्तीति तस्या हरणं प्राप्तं, होतृ-

सम्बन्धो न प्राप्तः । स विधीयते । यामिमामध्यूध्नीं हरन्ति, तां होत्रे नान्यस्मै इति । होत्रे त्वन्यं भक्षं कुर्वन्तीति । अपि च होत्रे हरन्तीत्यानन्तर्य्याद् एकवाक्यता प्रत्यक्षा । इतरतरस्मिन् पक्षे, अध्यूध्नीं हरन्तीति च होतृशब्दव्यवधानात् कल्पयितव्या भवेत् । तस्माद् भागे नियमः । रथवत् । यथा, यजुर्युक्तं रथमध्वर्य्यवे ददातीति रथस्य वाक्यान्तरेण प्राप्तत्वादव्यवधानाच्चाध्वर्युभागे नियमः । एवमिहापि होतृभागे नियमः इति ॥ १३ ॥ पूर्वपक्षे उत्तरपक्षः ॥

अशास्त्रत्वात्तु नैवं स्यात् ॥ १४ ॥

तुशब्दः पक्षं व्यावर्त्तयति । न भागे नियमः । इडाभक्षविकार इति । कुतः । नास्ति शास्त्रं, येन इडाभक्षे अध्यूध्नी स्यात् । नन्विदमुक्तम्, अनस्थिभिरिडां वर्द्धयन्तीति । उच्यते । अनुवादस्वरूपत्वादस्य । प्राप्तत्वाच्च अनस्थिकानां वचनान्तरेण । अथ यच्छ्रूष्परिशिष्यते तत्समवत्त धान्यामानयति तद् हृदयं प्रास्यति जिह्वां वक्षस्तनिममतस्तेस्त्वेस्या वनिष्ठुमिति । अनुवाद इति गम्यते । न चात्र अध्यूध्नी कीर्त्यते । तस्मादप्राप्ता । अप्राप्ता चेद् होतृहरणमुद्दिश्य विधीयते । यत्तु व्यवधानादप्राप्तैव एकवाक्यता कल्पयितव्येति । अपूर्वत्वादध्यूध्न्या अनुवादाभावेऽनर्थकत्वपरिहाराय कल्पयिष्यामः । एवञ्च स्वपदगतं हरणं विहितं भविष्यतीति । इतरथा तु होत्रेऽध्यूध्नीसम्बन्धो विधीयते, न स्वपदगतहरणम् । तस्मादपि भक्षविकारः ॥ १४ ॥ सि० ॥

अपि वा दानमात्रं स्याद् भक्षशब्दानभिसम्बन्धात् ॥ १५ ॥

अपि वेति पक्षव्यावृत्तिः । यदा एवं, न वचनान्तरेण इडाभक्षेऽध्यूध्नी प्राप्ता, साऽपूर्वा हर्त्तव्या विधीयते । न तर्हि भक्षविकारः । दानमात्रमेतद् होत्रे अध्यूध्नीं हरन्तीति । नात्र भक्षशब्देन अभिसंयोगो विधीयते । तस्मान्न भक्षविकार इति ॥ १५॥ पूर्व० ॥

दातुस्त्वविद्यमानत्वादिडाभक्षविकारः स्याच्छेषं प्रत्यविशिष्टत्वात् ॥ १६ ॥

तुशब्दः पक्षं व्यावर्त्तयति । दानमात्रमेतद् न भक्षविकार इति । नैतद्दानम् । दातुरभावात् । पशुर्हि एवं सङ्कल्पितः । यागं वर्जयित्वा

नान्यत् स्वकार्यमनेन कार्यमिति । तेन स्वाम्यभावाद्दानं नास्ति । कथं स्वाम्यभावः । शेषं प्रत्याविशिष्टत्वात् । शेषं प्रति यथा यजमानस्तथा होता । उभावपि न प्रभवतो द्रव्यस्येति नास्ति दानम् । अथ कथं भक्षशब्दानभिसंयोगे भक्षः । चतुर्थी तादर्थ्ये भवति । होत्रर्था अध्यूध्नी । तया होता अभिप्रेयते, होत्रे सा होतुरुपकरोति, सा भक्ष्यमाणा सामर्थ्यजननस्य दृष्टस्य लाभाय । यया च यावत्या च मात्रयोपकारिणी भवति । तत्र चतुर्थीश्रुतिरनुगृह्यते । इतरथा हि अदृश्यमाने उपकारे चतुर्थीश्रुतिर्बाध्यते । तस्मादिडाभक्षविकार इति ॥ १६ ॥ उत्तरम् ॥ अध्यूध्न्यामिडाभक्षविकारताधिकरणम् ॥४॥

अग्नीधश्च वनिष्ठुरध्यूध्नीवत् ॥ १७ ॥

तत्रैवाग्नीषोमीये पशौ श्रूयते, वनिष्ठुरग्नीधे इति।तत्र अधिकरणप्रदेशः । तत्र यः संशयः, स इहापि । किं वनिष्ठुरग्नीधे, विकारो भक्षस्य, उत तस्य भागनियमः ? इति । ततः स एव पूर्वपक्षः । अपूर्वत्वाद् विधीयते । तस्माद्विकार इति । तस्य तदेवोत्तरम् । वचनान्तरेण प्राप्तत्वाद् भागनियम इति । ततस्तदेवोच्यते । अनस्थिभिरिडां वर्द्धयन्तीत्यनुपात्तत्वादप्राप्तो वनिष्ठुर्विधीयते इति॥ अत्राह । ननु वनिष्ठुरपि तत्र सङ्कीर्त्तनात् प्राप्त एवेति । अत्रोच्यते । वनिष्ठुं प्रास्यतीत्येतावत् तत्र । तेन इडायां प्रासनमात्रं तस्य विधीयते इडासंस्कारार्थेन । नाऽसौ इडा न तस्य भक्षशब्दसंयोगः । तस्मात् प्रासनमात्रं, न तस्य भक्षे प्राप्तिः । पूर्वस्मिन् वचने न चतुर्थीसम्बन्धः, तस्यैतदग्नीधे इति । चतुर्थीसम्बन्धेन भक्षणं विधीयते । तस्मात् पूर्वेण अधिकरणेन अतुल्याशङ्कायां तुल्यता सूत्रेणातिदिश्यते । सर्वेष्वेव अधिकरणप्रदेशेषु अतुल्याशङ्का निवर्त्यते ॥१७॥ वनिष्ठोर्भक्षविकारताधिकरणम् ॥ ५ ॥

अप्राकृतत्वान्मैत्रावरुणस्याभक्षत्वम् ॥ १८ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । अस्ति तत्र मैत्रावरुण ऋत्विक् । तं प्रति सन्देहः । किं तस्य चोदकप्राप्तः शेषभक्षोऽस्ति, न ? इति । किं प्राप्तम् । अप्राकृतोऽसौ, न तस्य भक्षे क्रियमाणे प्रकृतिवत् कृतं भवति । तस्मादप्राकृतत्वान्मैत्रावरुणस्याभक्षत्वम् ॥ १८ ॥ पूर्व० ॥

स्याद्वा होत्रध्वर्युविकारत्वात्तयोः कर्माभिसम्बन्धात् ॥ १९ ॥

स्याद्वा मैत्रावरुणभक्षः। प्रैषेषु असौ अध्वर्य्युविकारः। अनुवचनेषु होतुः। तस्मान्मैत्रावरुणः प्रेष्यति चानु चाह इति। अतस्तस्य तयोः कर्माभिसम्बन्धादर्थापत्त्या भक्षं लभते। तस्मात् सभक्षः स्यादिति ॥१९॥ सिद्धान्तः ॥ मैत्रावरुणस्यापि शेषभक्षास्तित्वाधिकरणम् ॥ ६ ॥

द्विभागः स्याद् द्विकर्मत्वात् ॥ २० ॥

अथेदानीं मैत्रावरुणमेव प्रति भवति सन्देहः। किं द्विभागो मैत्रावरुणः? उतैकभाग इति। किं प्राप्तम्। द्विभागः स्यात्। अध्वर्युविकारत्वादध्वर्युभागं प्राप्नोति, होतृविकारत्वाद् होतृभागं प्राप्नोति। तस्माद् द्विभागः स्यादिति ॥ २० ॥ पूर्व० ॥

एकत्वाद्वैकभागः स्याद्भागस्याश्रुतिभूतत्वात् ॥ २१ ॥

वाशब्दः पक्षं व्यावर्त्तयति। न द्विभागः स्यात्। एकभागो भवेदिति। कुतः। भागस्याश्रुतिभूतत्वादिति। नेह अध्वर्युभागो मैत्रावरुणस्य श्रूयते,नापि होतृभागः। यदि ह्युभौ श्रूयेयाताम्, एकेन भागेन कृतेऽपि संस्कारे द्वितीयोऽपि वचनप्रामाण्यात् स्यात्। चोदकेन तयोः प्राप्तिर्गम्यते। तत्रैकत्वान्मैत्रावरुणस्य, एकेनैव भागेन यावती प्राकृती शक्तिः सा कृतेति द्वितीयभागं चोदको न प्रापयति। तस्माद् एकभागः स्यादिति ॥२१॥ सिद्धान्तः ॥ मैत्रावरुणस्यैकभागताऽधिकरणम् ॥ ७ ॥

प्रतिप्रस्थातुश्च वपाश्रपणात् ॥ २२ ॥

अग्नीषोमीये एव पशौ प्रतिप्रस्थाता नाम ऋत्विक् श्रूयते। तं प्रति सन्देहः। किं तस्य शेषभक्षो भवेद्, न? इति। किं प्राप्तम्। भवेदिति। कुतः। वपां हि श्रपयन्नध्वर्युकर्म करोति, प्रतिप्रस्थाता वपां श्रपयतीति। तस्मात् स्यादस्य भक्ष इति ॥ २२ ॥

अभक्षो वा कर्मभेदात्तस्याः सर्वप्रदानत्वात् ॥ २३ ॥

अभक्षः स्यात् प्रतिप्रस्थाता। कुतः। यस्मिन् यागे स अध्वर्योर्विकारः। तस्य द्रव्यशेषो नास्ति। वपामसौ श्रपयति। तस्याः सर्व-

प्रदानत्वम् । तत्र शेषाभावात् किं भक्षयेत् । यत्र शेषोऽस्ति हृदयादिषु अङ्गेषु, न तत्रासौ अध्वर्योर्विकारः । अन्यद्धि वपापूर्वम् अङ्गाऽपूर्वात् । चोदकेन च यस्यापूर्वस्य शेषः प्रतिपाद्यते, तस्य तत्कर्मकरे भक्षः । एवं हि तस्योपकारको भवतीति । अन्यकर्मकरे भक्षयति तदुपकाराभावादनङ्गं स्यात् । तस्मान्नान्यकर्मणि भक्षणं चोदकः प्रापयतीति ॥

ननु अङ्गेष्वपि प्रतिप्रस्थाता अध्वर्युविकारः । स हि अवदानं करोति । दक्षिणतो निधाय प्रतिप्रस्थाता अवद्यतीति । यस्यां शाखायामेतन्नास्ति, तत्रैषा विचारणा । अथ वा अन्यकार्यमेतद् अवदानम्, अन्यकार्यकं प्राकृतम् । तत्र प्रकृतौ यजतिशब्देन प्रदानारम्भेऽवदाने गृहीते द्विसङ्ख्या केवला श्रूयते, नावद्यत्यर्थः । इह पुनः प्रतिप्रस्थातुरवदानं चोद्यते, नारम्भः । यदत्रावदानं भविष्यति, स प्रदानारम्भः। तत्र प्रकृतौ प्रदाने चिकीर्षिते अर्थादध्वर्युरचोदितोऽवदानं निर्वर्त्तयति । तेन वा अन्येन वा तत् कर्त्तव्यम् । सन्निधानादध्वर्युरेव करोति, न नियोगतस्तत् तत्राध्वर्युकर्म । यच्चार्थात् कृतं, न तच्चोदकः प्रापयति । अर्थादेव तदिहाध्वर्युणा अन्येन वा कर्त्तव्यं, प्रतिप्रस्थातुर्वचनं नियमार्थम् । तस्मान्नावद्यन्नपि प्रतिप्रस्थाता अध्वर्युकर्मणि वर्त्तते इति न अस्याङ्गेषु भक्षः स्यात् ॥२३॥ सिद्धान्तः ॥ प्रतिप्रस्थातुर्भक्षाभावाधिकरणम् ॥ ८ ॥

विकृतौ प्राकृतस्य विधेर्ग्रहणात् पुनःश्रुतिरनर्थिका स्यात् ॥ २४ ॥

चातुर्मास्येषु श्रूयते, मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायमोदने इति । तत्रेदं समामनन्ति, आज्यभागौ यजतीति । तत्र संशयः । किं चोदकेन प्राप्तयोराज्यभागयोरनुवादमात्रमेतत, किं वा चोदकेन अनेन च द्वाभ्यामेकं कर्म चोद्यते, किं वाऽर्थवादार्थं ग्रहणम्, उत अधिकयोः कर्मान्तरयोरुत्पत्तिः, अथ परिसङ्ख्यार्थम्, अथ वा आज्यभागौ वर्जयित्वाऽन्यच्चोदकः प्रापयति, अथ वा चोदकेन आज्यभागावेव प्राप्येते, चोदक एव वा नास्ति, अपूर्वो गृहमेधीयः ? इति । किं प्राप्तम् । विकृतौ एतस्यां प्राकृतयोराज्यभागयोः प्राप्तयोर्गृह्यमाणयोः पुनःश्रवणमनर्थान्तरं स्यात् । अनुवादमात्रमेव

सुहृद्भूत्वा आचार्य्य उपदिशति स्म, न अर्थान्तरशङ्कया खेदितव्यं मनः, ज्ञातमेतद् अनुवादमात्रमेतदित्यन्यश्चिन्त्यतामिति । कथम् । तद्धि गम्यते, अन्यच्च नावगम्यते इति । यथाऽस्मिन् गृहे ये ब्राह्मणास्ते आनीयन्तां, देवदत्तो यज्ञदत्तो विष्णुमित्र इति भवन्ति लोकेऽनुवादमात्रस्य वक्तारः । एवमेतदपीति ॥ २४ ॥

अपिवाग्नेयवद् द्विशब्दत्वं स्यात् ॥ २५ ॥

यदि हि एतावदेवास्य सामर्थ्यं गम्येत उदितमनुवदितुं, ततोऽस्य नान्योऽर्थः स्यात् । अथ तु अन्यदपि कर्त्तुमस्य सामर्थ्यमस्ति, ततः कथमर्थान्तरशङ्का न भवतीति । अस्ति च सामर्थ्यं, चोदकेन अनेन च द्वाभ्यां संहत्यैकोऽर्थ उच्यते । गृहमेधीयो हि भवति प्रकृतिवत् । किं तत् साद्दश्यम् । आज्यभागौ यजतीति । प्रकृताविदं श्रूयते, आज्यभागौ यजति । एवं प्राकृतेन यागेन स्वकार्यं करोतीति । इह पुनराज्यभागौ यजतीति । स प्रकारोऽतिदिश्यते । एवमनेन प्रकारेण यागः स्वकार्यं करोति । यथा द्वाभ्यां शब्दाभ्यामेकोऽर्थ उच्यते । आग्नेयवत् । आवाहने अग्निमग्न आवह इति य एवं सम्बोध्यते, स एवोच्यते, आत्मानमावह इति । यथा वा, एष दण्डो, दण्डेन प्रहरेति द्वाभ्यामेक एव दण्ड उच्यते । एवमिहापि प्राकृतौ, आज्यभागौ यजतीति विकृतावपरेण आज्यभागवचनेन तद्वन्तं गृहमेधीयं करोतीति वाक्यं पूर्य्यते, न यागान्तरं चोद्यते । नाऽपि चोदकप्राप्तस्यानुवादमात्रमिति ॥ २५ ॥

न वा शब्दपृथक्त्वात् ॥ २६ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैतदाग्नेयावाहनेन तुल्यम् । तत्र हि अग्ने आवहेत्येतावता आवोढा अग्निरुक्तः । अग्निमावहेत्येतावता वोढव्योऽग्निरुच्यते । न ताभ्यामेकोऽर्थः क्रियते । इह तु प्रकृतिवदित्येकेनैव वचनेन आज्यभागवत्ताऽवगम्यते । पुनराज्यभागौ यजतीति कृतकरं शास्त्रमनर्थकं स्यात् । तस्मादनुवादमात्रमित्यध्यवसातव्यम् । नन्वनुवादोऽनर्थकः । नेत्युच्यते । अर्थवादार्थेन भविष्यति, आज्यभागौ यजति यज्ञताया इति । यदेतत् प्रकृतिवत् करोति । तथा कुर्वन् आज्यभागौ पक्ष्यति । तत्र यज्ञता सम्पत्स्यते इति ॥ २६ ॥

अधिकं वार्थवत्त्वात् स्यादर्थवादगुणाभावे वचना-

दविकारे तेषु हि तादर्थ्यं स्यादपूर्वत्वात् ॥ २७ ॥

अथवा अधिकयोः कर्मान्तरयोरुत्पत्तिः । नानुवाद इति । आज्यभागावत्र क्रियेते एवेति । किन्तर्हि उपदिश्येते, यागावत्र कर्त्तव्याविति । कुतः । अनुवादमात्रं हि अनर्थकम् । शब्दपृथक्त्वाच्च द्वाभ्यामेकं कर्मोच्यते । अथ कस्माद् न अर्थवादार्थता गुणार्थता विकारार्थता वा भवति ? इति । उच्यते । अर्थवादासङ्कीर्त्तनान्नात्रार्थवादार्थता । नन्वत्र यज्ञताया इत्यर्थवादः सङ्कीर्त्यते । उच्यते । न वाक्यान्तरेण विहितेऽर्थे वाक्यान्तरेण अर्थवादेन किञ्चित् प्रयोजनमस्ति । तस्माद्यागान्तरविधानार्थ एवायं नार्थवादः । ननु यागान्तरं नास्ति आज्यभागसंज्ञकम् । उच्यते । आज्यभागधर्मकं भविष्यति । न च, गुणसङ्कीर्त्तनमस्ति, यथा अप्सुमन्तौ आज्यभागौ यजतीति । नचान्यो वचनप्रकारोऽस्ति । यथा नान्यामाहुतिं पुरस्ताज्जुहुयादिति प्रतिषिद्धप्रसवार्थं यदन्यामाहुतिं पुरस्ताज्जुहुयादिति निन्दित्वा स्रुवेणाघारयतीति वचनम् । तेषु हि सत्सु एवमर्थवत्ता स्यात् । तस्मात् कर्मान्तरवचनम् अपूर्वत्वात् । एवमपूर्वमर्थं करिष्यति । इतरथा न विशिष्टोत्पत्तिः स्यात् । किं पुनरत्र कर्मान्तरे लक्षणमिति ? एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यादिति । अतः क्रमेण प्रधानयागादुपरिष्टादपरौ यागौ आज्यभागधर्मकौ विधीयेते । अज्ञातौ ज्ञाप्येते इत्यर्थः ॥ २७ ॥

प्रतिषेधः स्यादिति चेत् ॥ २८ ॥

इति चेत् पश्यसि, कर्मान्तरचोदनेति । तन्न । तस्य आज्यभागौ इति नामसङ्कीर्त्तने सति अनाज्यभागौ न शक्यौ प्रतिपत्तुम् । तद्धर्मकत्वे सति लक्षणशब्दः । आज्यभागौ इति विशेषस्याविवक्षा स्यात् । तस्मान्न कर्मान्तरवचनं, किन्तु परिसङ्ख्यया प्रतिषेधः स्यात् । यथा पञ्च पञ्चनखा भक्ष्या इति शशादीनां पञ्चानां कीर्त्तनादन्येषां भक्षणं प्रतिषिद्ध्यते इत्ययमर्थो वाक्येन गम्यत इति । एवमिहापि अन्येषामङ्गानां प्रतिषेधो भविष्यतीति ॥ २८ ॥ पूर्व० ॥

नाश्रुतत्वात् ॥ २९ ॥

न हि अत्र प्रतिषेधवाचि किञ्चित् पदं श्रूयते । नापि इतराङ्गावचनम् । न चासम्प्रतिपन्नपदार्थको वाक्यार्थः प्रमाणं भवति । पदा-

ऽर्थो हि वाक्यार्थस्य मूलं, नास्य पृथक् सिद्धिरस्तीति। तदुक्तं, तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वाद् इति। तस्मान्न प्रतिषेधः। तत्र हि त्रयो दोषाः—अस्वार्थग्रहणं, परार्थकल्पना, प्राप्तबाधश्च। तस्मात् कर्मान्तवचनमेतदिति॥ २९॥ पूर्व० नि०॥

अग्रहणादितिचेत्॥ ३०॥

इति चेत् पश्यसि कर्मान्तरचोदनेति। उक्तस्तत्र दोषः स एव महान्। तस्मात् किं भवतु? आज्यभागयोः स्वशब्देन ग्रहणम्। अन्येषामङ्गानां चोदकेन। स्वशब्देनाज्यभागौ गृहीतौ दृष्ट्वा चोदकस्तौ न प्रापयति। अन्यानि अङ्गानि अगृहीतानि प्रापयिष्यतीति। किमेवं भविष्यति? इति। संहत्यकारिता न कल्पयिष्यते, चोदकप्राप्तयोर्वाक्यान्तरेणार्थवादवचनमनर्थकं न प्रतिज्ञातं भविष्यति। विस्पष्टं संज्ञाग्रहणेन पुनः श्रुतिरित्येतन्न कर्मान्तरं कल्पयिष्यते। यथा देवदत्तोऽत्र तिष्ठतीत्युक्ते न तिष्ठन्नेव तिष्ठतीत्युक्तः, एतावता देवदत्ताख्योऽयमभिधीयत इति गम्यते। न च परिसङ्ख्यात्रिदोषा सती कल्पिता भविष्यति। तस्माच्चोदकेन अगृहीतावाज्यभागौ गृहीताविति॥

आह, कस्मादिदं गौरवमाश्रितम्। यदि हि प्रत्यक्षमाज्यभागौ न गृहीतौ स्यातां, चोदक एव तौ शक्नुयाद् ग्रहीतुं, प्रत्यक्षवचनेन चोदकग्रहणाशक्तौ गौरवे किं प्रयोजनमिति। उच्यते। न गौरवस्य किञ्चित् साधु प्रयोजनं, न तु गौरवेण यत् कृतं तन्न कृतं भवति। गौरवस्य तु दोषोऽस्ति। न तु दोषोऽपि सति चोदक आज्यभागौ गृह्णाति। यः परिहारेण पथा ग्रामं गच्छति, परिहारदोषमसौ प्राप्नोति, न तु ग्रामगमनं न भवति। तस्माद् अग्रहणादाज्यभागयोर्ग्रहणमिति॥ ३०॥ पूर्व०॥

न तुल्यत्वात्॥ ३१॥

नैतदेवम्। यदि हि चोदकः पृथक् पृथक् प्राकृतान् पदार्थान् अपेक्षेत, तत्र आज्यभागौ गृहीताविति कृत्वा तौ नापेक्षेत। अन्यांश्च गृह्णीयात्। न त्वसौ पृथक् पृथक् पादार्थानपेक्षते। किन्तु प्राकृतमपूर्वमपेक्षते यद्वत तेन, तद्वदनेनेति। तस्मिन्नपेक्ष्यमाणे आज्यभागवत्तापि अपेक्षिता भवति। तत्रैतदेवमागच्छति, कृतकरं शास्त्रमन-

र्थकं भवतीति । तस्मादन्यैरङ्गैस्तुल्यत्वान्न चोदकेनागृहीतयोराज्यभागयोर्ग्रहणमिति ॥ ३१ ॥ पूर्व० नि० ॥

तथा तद्ग्रहणे स्यात् ॥ ३२ ॥

अथ यद्युच्येत, आज्यभागावेव चोदकेन गृहीतौ प्रकृतिवद् गृहमेधीयो भवति । कथमाज्यभागौ यजति ? एवमिति । यथा सप्तदश सामिधेन्यो भवन्ति अध्वरकल्पादिष्विति वाक्यशेषाद् न अन्यासु इष्टिषु साप्तदश्यम् । यथा शिंशपामानय वृक्षमिति नान्योऽपि वृक्ष आनीयेते, शिंशपैव वृक्षशब्देन गृहीता भवति । एवमिहापि चोदकेनाज्यभागावेव गृहीताविति द्रष्टव्यम् । एवं प्राप्ते ब्रूमः । तथा तद्ग्रहणे स्यात् । तुल्यमग्रहणेन तद् ग्रहणम् । पृथक्पदार्थापेक्षिणि चोदके स्यात् । अग्रहणमन्येषामङ्गानां, प्राकृतापूर्वापेक्षिणि तु नैतदुपपद्यत इति ॥ ३२ ॥ पूर्वपक्षतन्निरासौ ॥

अपूर्वतान्तु दर्शयेद् ग्रहणस्यार्थवत्त्वात् ॥ ३३ ॥

एवं तर्ह्यपूर्वो गृहमेधीयः । कुतः ? ग्रहणस्यार्थवत्त्वात् । एवं ग्रहणमाज्यभागौ यजतीति अर्थवद्भविष्यति । पूर्ववत्त्वे तद् अनर्थकं स्यात् । आज्यभागाभ्यां प्रत्यक्षभूताभ्यां गृहमेधीयो निराकाङ्क्षो न चोदकेन अन्यानि अङ्गानि गृह्णातीति । यस्यान्तु विकृतावपूर्वं किञ्चिदङ्गमुक्तं, न तेन सह एकवाक्यतामगत्वा प्राकृतानि अङ्गानि गृह्णातीति । कुतः । केन प्रकारेण कुर्य्यादिति तस्याकाङ्क्षा न किं कुर्य्यादिति । प्रकृतौ चाङ्गावत्ता नाम प्रकारो विदितः प्रयोगवचनेन च आकाङ्क्ष्यते, न तु विकृतावङ्गवत्ता क्लृप्ता । सा कल्पयित्वा आकाङ्क्षिता भवति । न च क्लृप्तामुज्झित्वा कल्पनीयसम्बन्धो न्याय्यः । तस्मात् तत्रापि चोदकेन अङ्गानि गृह्यन्त इति । गृहीतेषु च प्राकृतेषु वैकृतानामङ्गानां विधानमनर्थकं मा भूदिति तेषामङ्गानां कल्पयित्वा सर्वाङ्गोपसंहारिणा प्रयोगवचनेन संग्रहः क्रियत एवेति ॥ ३३॥ सिद्धान्तः ॥ आज्यभागौ यजतीत्यनेन अपूर्वगृहमेधीयविधानाधिकरणम् ॥ ९ ॥

ततोऽपि यावदुक्तं स्यात् ॥ ३४ ॥

गृहमेधीय एवोदाहरणम् । तत्रैषोऽर्थः समधिगतः । आज्यभागाभ्यामेतद् निराकाङ्क्षमन्याङ्गानि न गृह्णातीति । तदुच्यते । किमेष

पवोत्सर्गः, सर्वाण्येवान्यानि अङ्गानि न गृह्णातीति । एवं खलु प्राप्ते, उच्यते । ततोऽपि यावदुक्तं स्यात् । तत एवमुक्तम्, अङ्गानि नान्यानि गृह्णातीति अगम्यमाने विशेषे न गृह्णीयात् । गम्यते चाऽत्र विशेषः । प्रत्यक्षविहितत्वादाज्यभागयोरिति । अतो यस्य यस्य प्रत्यक्षवचनः सर्वेषु तेषु पुनर्गम्यते विशेषस्तस्माद् यावदुक्तं स्यात् । यथा अग्नये समवद्यतीति, इडामुपह्वयतीति ॥ ३४ ॥ गृहमेधीये स्विष्टकृदाद्यनुष्ठानाधिकरणम् ॥ १७ ॥

स्विष्टकृद्भक्षप्रतिषेधः स्यात्तुल्यकारणत्वात् ॥ ३५ ॥

अस्ति गृहमेधीयः । तत्रैषोऽर्थः समधिगतः, अपूर्वो गृहमेधीय इति । तत्रेदमामनन्ति, अग्निं स्विष्टकृतं यजतीति । तत्रेदं सन्दिह्यते । किमन्येषां शेषकार्याणां भक्षणस्य च परिसङ्ख्यायकः स्विष्टकृच्छब्दः, उत नेति । आह, ननु अपूर्वत्वाद् गृहमेधीयस्य नैव शेषभक्षा विद्यन्ते । अत्रोच्यते । पूर्ववान् गृहमेधीय इति कृत्वा चिन्तेयम् । पूर्वस्य अधिकरणस्य प्रयोजनं चिन्त्यते । यदि परिसङ्ख्या भवेद्, आज्यभागाभ्यां यागाः परिसङ्ख्यायेरन्, नान्ये इति । इदमपि प्रयोजनं भवति । स्विष्टकृच्छ्रवणेन शेषभक्षाः परिसङ्ख्यायन्ते, न ? इति । किं प्राप्तम् । स्विष्टकृति श्रूयमाणे परिसङ्ख्या स्याद्भक्षाणाम् । कुतः । तुल्यकारणत्वात् । तुल्यं हि कारणं स्विष्टकृतो भक्षाणाञ्च । उभयमपि शेषसंस्कारार्थम् । तत्र वचनादयं शेषसंस्कारो भवति, नान्य इति प्रतिषिद्ध्येरन् भक्षाः ॥ ३५ ॥ सि० ॥

अप्रतिषेधो वा दर्शनादिडायां स्यात् ॥ ३६ ॥

यथैव स्विष्टकृच्छ्रवणेऽन्येषां शेषकार्याणामदर्शनमिति शेषभक्षा न सन्तीत्युच्यते, एवं भक्षणदर्शनाद्भक्षाः सन्तीति गम्यते । दर्शनाऽदर्शनयोश्च दर्शनं प्रमाणम् । किं तद्दर्शनम् । इडामुपह्वयतीत्युपह्वानं ह्यनुज्ञापनम् । तत् सति भक्षणे भवति, नासति । तस्मान्न प्रतिषेधः ॥ ३६ ॥ पूर्व० ॥

प्रतिषेधो वा विधिपूर्वस्य दर्शनात् ॥ ३७ ॥

प्रतिषेधो वा, तुल्यकारणेन हि प्रत्यक्षश्रुतेन आनुमानिकं बाध्यते । अथ यद्दर्शनमुक्तं, तद्विधिपूर्वस्य भक्षस्य भविष्यति । एवं ह्याम्नायते । अथ इडामेवावद्यति न प्राशित्रमुपहूय प्राश्नातीति तस्य दर्श-

नम् । कृत्वा चिन्तायाः प्रयोजनं न वक्तव्यम् । पूर्वाधिकरणस्य हि तत् प्रयोजनम् । न च प्रयोजनस्य प्रयोजनमुच्यते यत् प्रयोक्तव्यं तच्च पूर्वाधिकरणम् ॥ ३७ ॥ उत्तरम्॥गृहमेधीये प्राशित्राादिभक्षणाभावाधिकरणम् ॥ ११ ॥

शंय्विडान्तत्वे विकल्पः स्यात् परेषु पत्न्यनुयाजप्रतिषेधोऽनर्थकः स्यात् ॥ ३८ ॥

ज्योतिष्टोमे श्रूयते, शंय्वन्ता प्रायणीया सन्तिष्ठते न पत्नीः संयाजयन्तीति । इडान्ता आतिथ्या सन्तिष्ठते नानुयाजान् यजतीति । तत्र संशयः । प्रायणीया किं शंय्वन्ता, कृत्स्नसंस्था वा, उत शंय्वन्तैव ? तथा आतिथ्या किमिडान्ता, कृत्स्नसंस्था वा, उतेडान्तैव । किं प्राप्तम् । शंय्विडान्तत्वे विकल्पः स्यादिति । कुतः । पत्न्यनुयाजस्य प्रतिषेधात् । शंय्वन्ता सन्तिष्ठते इति तावद् व्यक्तमेव वचनम् । अपरमपि वचनं न पत्नीः संयाजयन्तीति । यदि शंय्वन्तैव नित्यं, पत्न्यनुयाजप्रतिषेधोऽनर्थकः स्यात् । तस्मात् पत्न्यनुयाजप्रतिषेधेन कृत्स्नसंस्थानमुच्यते । कथम् । प्रायणीयायां पत्नीसंयाजान् केवलान् न करोति, नान्यं न करोतीति । तथा आतिथ्यायामनुयाजान् केवलान् न करोति,नान्यं न करोतीति, अकर्त्तव्यपरिसङ्ख्यानार्थमेवेदं भिन्नमेव वाक्यद्वयं पूर्वाभ्यां वाक्याभ्यामिति ॥३८॥ पूर्व० ॥

नित्यानुवादो वा कर्मणः स्यादशब्दत्वात् ॥ ३९ ॥

न त्वेतदस्ति, विकल्प इति । एक एव कल्पः शंय्विडान्तत्वम् । तत्र हि विशिष्टं वचनम् । द्वितीयः कल्पो नास्त्येव । न हि तस्य वचनमस्ति । न च पत्न्यनुयाजप्रतिषेधकं कृत्स्नसंस्थानवाचकम् । किन्तर्हि । तन्नित्यानुवादः । नित्यप्राप्तमनुवदति । यथा, नान्तरिक्षे न दिवि अग्निश्चेतव्य इति पूर्वाभ्यां सहैकवाक्यतैवानयोः । शंय्वन्ता प्रायणीया सन्तिष्ठते न पत्नीः संयाजयन्तीति । तथेडान्ता आतिथ्या सन्तिष्ठते । नानुयाजान् यजन्तीति । अत्र यत्नलाघवेन स्तुतिः । ननु प्रतिषेधवचनः कृत्स्नसंस्थानं वदेत् । य एव हि श्रुतस्यार्थस्योत्सर्गे दोषः स एवाश्रुतकल्पनायाम् । तस्माच्छंय्विडान्ततैव स्यादिति ॥३९॥ सिद्धान्तः ॥ प्रायणीयातिथ्ययोः शंय्विडान्ततानियमाधिकरणम्॥१२

प्रतिषेधार्थवत्त्वाचोत्तरस्य परस्तात् प्रतिषेधः स्यात् ॥ ४० ॥

इदमेवोदाहरणं, शंय्वन्ता प्रायणीया सन्तिष्ठते न पत्नीः संयाजयन्तीति। इडान्ता आतिथ्या सन्तिष्ठते नानुजान् यजतीति। तत्र द्वौ शंयू द्वे इडे इति । तत्रायमर्थः सांशयिकः । किं परेण शंयुना शंय्वन्ता सन्तिष्ठते ? उत पूर्वेण । एवं, किं परया इडया इडान्ता सन्तिष्ठते ? उत पूर्वेणेति। किं प्राप्तम्। पूर्वाभ्यां शंय्विडाभ्यामिति। कुतः। पूर्वाभ्यामपि संस्थापयता श्रुत्यर्थः कृतो भवतीति। कृते च शब्दार्थे कस्मादुत्तरान् पदार्थान् कुर्य्यादिति। उच्यते। उत्तराभ्यामपि संस्थापयञ्छब्दार्थमेव करोति। तत्र नियमात् पूर्वाभ्यां संस्थापयन्न शब्दार्थं परिच्छिन्द्यात्। शब्दार्थं परिच्छेत्स्यामः । यदि उत्तराभ्यामपि संस्थापनं शब्दो वक्ष्यति, ततस्ताभ्यां संस्थापयन् भूयांसमुपकारं लप्स्यते। तस्मादनियमः। पूर्वाभ्यामुत्तराभ्यां वेति॥ एवं प्राप्ते ब्रूमः। उत्तराभ्यामिति। कुतः। निषेधार्थवत्त्वात् । तदैव पत्नीसंयाजस्यानुयाजस्य च प्रतिषेधोऽर्थवान् भवति । यद्युत्तराभ्यां न संस्थाप्येत, नैव पत्नीसंयाजानुयाजौ प्राप्नुतः।तस्मादुत्तराभ्यामिति। ननु च प्रतिषेधस्य नित्यानुवादत्वमुक्तम्। उच्यते। न सत्यां गतौ न्याय्यम्। तस्मान्न पूर्वाभ्यामिति। उच्यते । लिङ्गमेतदुपदिष्टम्। न च लिङ्गं साधकं भवति । प्राप्तिरुच्यतामिति। पक्षेऽपि हि लिङ्गस्याऽर्थवत्ता स्यात्। अत्रोच्यते। इयं प्राप्तिः। यदा विशेषो नावगम्यते, शंयुरन्ते यस्या अङ्गरीतेः, सा शंय्वन्ता । एवम् इडान्ता। सैषा अङ्गरीतिर्विधीयते । शंय्वन्ता इडान्ता च । सा च विधीयमाना अन्यानि अङ्गानि परिसञ्चष्टे। कथम्। शय्वन्तया अङ्गरीत्या इडान्तया च सङ्कीर्त्यमानया शंय्विडान्ततायां सत्यामन्यान्यङ्गानि च नाकाङ्क्षन्ते । अनाकाङ्क्ष्यमाणानि च नैकवाक्यतां यान्ति । अतोऽप्राप्तानीति गम्यते।नन्वेवं साति पूर्वाभ्यां शंय्विडान्तता न कञ्चिदर्थमधिकं साधयतीति । उच्यते। नैष दोषः । न हि तस्यार्थे पृथग्वाक्यं, यस्यानर्थक्यं परिजिहीर्ष्यते । अस्य वाक्यस्योत्तरान्तता प्रयोजनं, तस्मादुत्तराभ्यां संस्था स्यादिति ॥ ४० ॥ पूर्व० ॥

प्राप्तेर्वा पूर्वस्य वचनादतिक्रमः स्यात् ॥ ४१ ॥

नैतदस्ति, उत्तराभ्यां शंय्विडाभ्यां सन्तिष्ठते इति। पूर्वाभ्यामेव। कुतः। नेह शंय्वन्ताया अङ्गरीतेर्भावो विधीयते, इडान्तायाश्च। किं तर्हि। संस्था विधीयते। शंय्विडान्ता सन्तिष्ठते, प्रवर्त्तमाना शय्विडान्ता च जाता सन्तिष्ठते, न प्रवर्त्तते। तिष्ठत्स्वेव कर्तृषु सन्तिष्ठतीत्युच्यते। तत्र पूर्वाभ्यामुत्तराभ्यामिति विशेषेऽनवगम्यमाने पूर्वाभ्याञ्च न प्रवर्त्तेत, उत्तराभ्याञ्च। तदेव तत्र पूर्वाभ्यामेव संस्थाने कृतं भवति। प्रतिषेधश्च नित्यानुवाद इत्युक्तम् ॥ ४१ ॥ सि० ॥

प्रतिषेधस्य त्वरायुक्तत्वात्तस्य च नान्यदेशत्वम् ॥ ४२॥

इतश्च पूर्वाभ्यां परं न कर्त्तव्यमिति। कुतः। त्वरायुक्तो हि प्रतिषेधोऽयं कृतः। कथम्। देवासुराः सत्यमभजन्त। अर्द्धं देवाः सत्यस्याभजन्त अर्द्धमसुराः। तदसुरैः सत्यमनूच्यमानं देवानपाक्रामत्। ते प्रायणीयं निरवपन्। तच्छंय्वन्तमासीत्। अथ असुरा यज्ञमायंस्ततो यज्ञः तत्वर इति। तमेवं कृत्वा त्वरितमाद्रियन्ते इति। तथा, आतिथ्यं निरवदंस्तदिडान्तमासीदथा सुरा यज्ञमायंस्ततो यज्ञः तत्वरः इति। तदिडान्तमेव कृत्वा त्वरितमाद्रियन्ते इति। त्वराकृतश्च पूर्वमपेक्षन्ते, नोत्तरम्। तस्मान्नान्यो देशः प्रतिषेधस्य। तस्माच्च पूर्वाभ्यामेव शंय्विडाभ्यां परं न कर्त्तव्यमिति ॥ ४२ ॥ युक्तिः॥

प्रायणीयातिथ्ययोः पूर्वाभ्यामेव शंय्विडाभ्यां संस्थाधिकरणम् ॥१३

उपसत्सु यावदुक्तमकर्म स्यात् ॥ ४३ ॥

अस्ति ज्योतिष्टोमः। तत्रेदमाम्नायते। षडुपसद उपसाद्यन्ते इति। ताः प्रकृत्य आमनन्ति। अप्रयाजास्ता अननुयाजा इति। तत्र संशयः। किं यावत् प्रतिषिद्धं तावन्न कर्त्तव्यम्, अन्यत् सर्वं कर्त्तव्यम्, अथ यावदुपदिष्टं तावत् कर्त्तव्यम्, अन्यत् सर्वं न कर्त्तव्यम्। अथापूर्वा उपसदः ? इति। किं प्राप्तम्। उपसत्सु यावदुक्तं न कर्त्तव्यम्। अप्रयाजास्ता अननुयाजा इति प्रयाजानुयाजानां प्रतिषेधं कृत्वा कृतार्थः शब्दोऽवशिष्टांश्चोदकप्राप्तान् न वारयति। तस्मादविशिष्टं सर्वं कर्त्तव्यमिति ॥ ४३ ॥ पूर्व० ॥

स्रौवेण वा गुणत्वाच्छेषप्रतिषेधः स्यात् ॥ ४४ ॥

न चैतदस्ति, प्रतिषिद्धं वर्जयित्वा सर्वं कर्त्तव्यमिति। यावदुपदिष्टं कर्त्तव्यम्। स्रौवेण आघारेण सर्वमन्यत् परिसङ्ख्यायते।

अविशिष्टो ह्यसौ स्रौव आघारः पुनराम्नायते । न तत्र कश्चिद् गुणो विशिष्टः श्रूयते । तस्मात्तेन तत् परिसङ्ख्यायते ॥ ४४ ॥ पूर्व० ॥

अप्रतिषिद्धं वा प्रतिषिध्य प्रतिप्रसवात् ॥ ४५ ॥

न चैतदस्ति– यावदुक्तं कर्त्तव्यम्, अवशिष्टं नेति । किन्तर्हि । सर्वं कर्त्तव्यं प्रतिषिद्धं वर्जयित्वेति । एवं हि श्रूयते, अप्रयाजास्ता अननुयाजास्ता इति । एवं प्रतिषेधं कृत्वा कृतार्थः शब्दो नान्यस्य बाधको भवितुमर्हति । यदुक्तं, निर्गुणं स्रौवाघारश्रवणमिति । प्रतिप्रसवोऽयं न परिसङ्ख्या । एवं श्रूयते, नान्यामाहुतिं पुरस्ताज्जुहुयाद् यदन्यामाहुतिं पुरस्ताज्जुहुयादन्यन्मुखं कुर्यात् स्रुवेणाघारमाघारयतीति, नान्यामाहुतिं पुरस्ताज्जुहुयात् प्राकृतिकीभ्यः । एता हि आघारादिका आहुतयः सर्वेष्टीनां मुखं, यदन्यामाहुतिमौपसदीमग्न्यादिकां जुहुयादन्यन्मुखं कुर्यात् । तस्मात् स्रुवेणाघारयतीति । आघारादिकान्याहुतीर्जुहोतीत्याघारादीनामभावमाशङ्क्य पुनः प्रतिप्रसवोऽयम् । आघारमाघारयति इति, नान्यत् करोति । किन्तर्हि, आघारयति, न नाघारयतीति । तस्मान्न परिसङ्ख्या । प्रतिषिद्धं वर्जयित्वा सर्वं कर्त्तव्यमिति ॥ ४५ ॥ पूर्व० नि० ॥

अनिज्या वा शेषस्य मुख्यदेवतानभीज्यत्वात् ॥ ४६ ॥

अथ वा अपूर्वा उपसदः, अनिज्या प्राकृतस्य शेषस्य । नित्याऽनुवादोऽयम्, अप्रयाजास्ता अननुयाजा इति । मुख्यदेवतामनभीज्यामुपदिश्य प्रधानदेवता विधीयन्ते । नान्यामाहुतिं पुरस्ताज्जुहुयादाग्नेय्या अग्निर्हि मुखमित्यभिधाय, यदन्यामाहुतिं पुरस्ताज्जुहुयाद् वैकृतीमन्यन्मुखं कुर्यादाग्नेय्या अग्निर्हि मुखं स्रुवेण आघारमाघारयति नान्यं यजते अग्निमनीकं सोमं शल्यं विष्णुतेजनमिति । तदेतदाघारेण निराकाङ्क्षीकृतं, नान्येन प्रकृताङ्गेन सहैकवाक्यतामेति । अतः प्राप्ता मुख्यदेवता अनभीज्या अत्रोपदिश्यन्ते नान्यं यजति । तस्मादग्निः प्रथम इज्यते इति ॥ ४६ ॥ ॥ सि० ॥ षडुपसद उपसाद्यन्ते इत्यादिना अपूर्वोपसत्कर्मविधानाधिकरणम् ॥ १४ ॥

अवभृथे बर्हिषः प्रतिषेधाच्छेषकर्म स्यात् ॥ ४७ ॥

अस्ति ज्योतिष्टोमेऽवभृथः वारुणेनैककपालेनाभृथमभ्यवयन्तीति । तत्रैतदाम्नायते । अपबर्हिषः प्रयाजान् यजति । अपबर्हिषौ

अनुयाजौ यजतीति । तत्रैषोऽर्थः सांशयिकः । किं बर्हिर्मात्रं वर्जयित्वा अन्यत् सर्वं कर्त्तव्यम् ? उत, आज्यभागाभ्यामन्यत् परिसङ्ख्यायते । अथ वाऽपूर्वोऽवभृथ इति । किं प्राप्तम् । बर्हिर्मात्रं वर्जयित्वा शेषकर्म स्यात् । कुतः ? । बर्हिःप्रतिषेधात् । अपबर्हिषौ अनुयाजौ यजतीति बर्हिर्मात्रं प्रतिषिद्ध्यकृतार्थः शब्दोऽन्यच्चोदकप्राप्तं न शक्नोति वारयितुम् । तस्मादन्यत् स्यादिति । ननु आज्यभागौ यजतीति परिसङ्ख्यार्थं ग्रहणम् । अप्सुमन्तावाज्यभागौ यजतीति गुणार्थं तन्मन्यते स्म ॥ ४७ ॥ पूर्व० ॥

आज्यभागयोर्वा गुणत्वाच्छेषप्रतिषेधः स्यात् ॥ ४८ ॥

न चैतदस्ति, शेषकर्म कर्त्तव्यमिति । किन्तर्हि शेषप्रतिषेधः स्यात् । कुतः । आज्यभागयोः श्रवणात् । अप्सुमन्तावाज्यभागौ यजतीति । ननु अप्सुमत्तागुणकविधानार्थं तदित्युक्तम् । नेत्याह । लिङ्गक्रमाभ्यां प्राप्तावेव अप्सुमन्तौ, अप्स्वग्ने सधिष्टव अप्सु मे सोमो अब्रवीदिति । ताभ्यामेतौ आज्यभागौ अप्सुमन्तावेव, निर्गुणमेवेदं वचनमितरेषामङ्गानां परिसङ्ख्यायकं भवितुमर्हति । यत्तु, अपबर्हिषः प्रयाजान् अपबर्हिषौ अनुयाजौ यजतीति । परिसङ्ख्यातानां प्रयाजानाम् अनुयाजयोश्च विधानार्थं भवतीति । तस्माच्छेषाणामेवाङ्गानां परिसङ्ख्येति ॥ ४८ ॥ पूर्व० ॥

प्रयाजानां त्वेकदेशप्रतिषेधाद् वाक्यशेषत्वं तस्मान्नित्यानुवादः स्यात् ॥ ४९ ॥

तुशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति, परिसङ्ख्येति । त्रिदोषा परिसङ्ख्या इत्युक्तम् । किञ्च, अपबर्हिषः प्रयाजान् यजतीति वाक्यशेषो नावकल्पते । यदि प्रयाजान् यजतीत्येष विधिस्तदा बर्हिःप्रयाजोऽपि प्राप्नोति । तत्र अपबर्हिष इत्येतन्नोपपद्यते । अथ बर्हिषः प्रतिषेधः । प्रयाजानां विधिर्नावकल्पते । तत्राप्राप्तस्य बर्हिषः प्रतिषेधोऽनुपपन्नः । उभयविधाने वाक्यं भिद्येत । वाक्यशेषो नोपपद्यते । एकञ्चेदं वाक्यम् । तस्मान्न शेषपरिसङ्ख्या ॥ ४९ ॥ पूर्व० नि० ॥

आज्यभागयोर्ग्रहणं नित्यानुवादो गृहमेधीयवत् स्यात् ॥ ५० ॥

अथ वा अपूर्वोऽवभृथः । यद्वद् गृहमेधीयः, तद्वत् स्यात् । आज्यभागाभ्यां प्रत्यक्षश्रुताभ्यामेकवाक्यतामित्वा निराकाङ्क्षो नान्यैः प्राकृतैरेकवाक्यतामेति । तस्मादपूर्वोऽवभृथ इति ॥५०॥ सि०॥
वारुणेनैककपालेनेत्यादिना अपूर्वस्यावभृथस्य विधानाधिकरणम्॥१९

विरोधिनामेकश्रुतौ नियमः स्याद् ग्रहणस्यार्थवत्त्वा-च्छरवच्च श्रुतितो विशिष्टत्वात् ॥ ५१ ॥

अस्ति वाजपेयः, शरदि वाजपेयेन स्वाराज्यकामो यजेतेति । अत्र श्रूयते । खादिरो यूपो भवतीति । तत्र संशयः । किं खादिरो वा, पालाशो वा, रौहितको वा ? उत खादिर एवेति । तथाऽन्यत्र श्रूयते, बृहत् पृष्ठं, भवतीति । तत्र संशयः । किं बृहद्वा पृष्ठं, रथन्तरं वा ? उत, बृहदेवेति । त्रैधातव्यायां श्रूयते, यवमयो मध्यम इति । तत्र संशयः । किं यवमयो वा, व्रीहिमयो वा ? उत यवमय एवेति । सर्वेष्वेषु किं प्राप्तम् । विरोधिनामन्यतमस्मिञ्छ्रूयमाणे नियमः स्यात् । खादिर एव यूपः, बृहदेव पृष्ठं, यवमय एव मध्यम इति । कुतः । ग्रहणस्यार्थवत्त्वात् । एवं बृहत्खदिरयवानां ग्रहणमर्थवद्भविष्यति, इतरथा प्राप्तानुवादमात्रमनर्थकं स्यात् । श्रुत्या विशिष्टाः खदिरादयश्चोदकप्राप्तान् पलाशादीन् बाधरन् । शरवत् । यथा शरमयं बर्हिर्भवतीति शरेषु श्रुतेषु कुशा निवर्त्तन्ते, एवमिहापीति ॥ ५१ ॥ सि० ॥

उभयप्रदेशान्नेति चेत् ॥ ५२ ॥

इति चेत् पश्यसि, उभयं हि प्रदिशति चोदकः, खादिरं पालाशञ्च, बृहद् रथन्तरञ्च, व्रीहीन् यवांश्च । केनेदानीं चोदकेन तुल्ये प्रदेशे सति पलाशादयो निवर्त्तिताः ? । खदिरग्रहणमशक्तं परिसङ्ख्यातुम् । त्रिदोषत्वात् परिसङ्ख्याया इत्युक्तम् । तस्मान्न नियमो विकल्प एवेति ॥ ५२ ॥ पूर्व० ॥

शरेष्वपीति चेत् ॥ ५३ ॥

यद्युभयप्रदेशादुभयं भवतीत्यध्यवसीयते, शरेष्वपि श्रुतेषु कुशा नैव निवर्त्तेरन्निति स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति स्म ॥ ५३ ॥ आ० ॥

विरोध्यग्रहणात्तथा शरेष्विति चेत् ॥ ५४ ॥

इति चेत् पश्यसि, एष न्यायं उच्यमानः शरेष्वपि दोषं प्रसञ्जयतीति । न शरेषु किञ्चन दोक्ष्यति । तत्र कुशा निवर्त्तन्त इति तथा स्यात् । कुतः । विरोध्यग्रहणात् । न हि विरोधिषु शरेषु अङ्गीक्रियमाणेषु कुशाः शक्या अङ्गत्वेनोपादातुम् । तस्मात् कुशा निवर्त्तन्ते इति ॥ ५४ ॥ आ० नि० ॥

तथेतरस्मिन् ॥ ५५ ॥

तथा इतरस्मिन्नपि खदिरादौ विरोधिनि अङ्गीक्रियमाणे न शक्याः पलाशादयोऽङ्गत्वेनोपादातुम् । तस्मान्निवर्त्स्यन्त इति ॥५५॥ आ० ॥

श्रुत्यानर्थक्यमिति चेत् ॥ ५६ ॥

इति चेत् पश्यसि, विरोध्यग्रहणात् पलाशादीनां निर्वृत्तिर्भविष्यतीति । चोदकश्रुतेरानर्थक्यं स्यात् । प्रापयति हि चोदकः पलाशादीनि । स हि तुल्यः खदिरादिषु पलाशादिषु वा । तदुक्तम्-अग्रहणादितिचेन्न तुल्यत्वादिति । न च शक्यं वक्तुं, खदिरादिभिः प्रयोगवचन एकवाक्यतामेतीति बध्नाति । प्रयोगवचनेन हि स श्रूयमाणः परम्परया पशुयागं यास्यतीति । अथेदानीं यागप्रयोगवचनस्तद्विशिष्टान् यागान् यास्यति । तेषु पलाशादयो विशेषाश्चोदकप्राप्ता न खदिरादिभिर्निवर्त्तिताः । तस्माद्विकल्प इति॥५६॥ आ०नि० ॥

ग्रहणस्यार्थवत्त्वादुभयोरप्रतिपत्तिः स्यात् ॥ ५७ ॥

बध्नाति, प्रयोगवचनो हि प्रत्यक्षश्रुतेन खदिरेणैकवाक्यतामेति । तस्मिन् निराकाङ्क्षे न पलाशः प्रवर्त्तिष्यते । तस्मात् खदिरविशिष्टः पशुयागो यागप्रयोगवचनेन गृहीतो, न पलाशविशिष्टः । तस्मात् खदिरस्यैव वृत्तिर्नोभयोः । एवं रथन्तरे यवमये च । तस्मात् खदिरादीनां नियमः । नैष पलाशादिभिर्विकल्प इति ॥ ५७ ॥ उत्तरम् ॥ वाजपेयादौ यूपादीनां खादिरत्वादिनियमाधिकरणम् ॥ १६ ॥

सर्वासाञ्च गुणानामर्थवत्त्वाद् ग्रहणमप्रवृत्ते स्यात् ॥ ५८ ॥

काम्या इष्टयः श्रूयन्ते । आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः, अग्नीषोमीयमेकादशकपालं निर्वपेच्छ्यामाकं ब्रह्मवर्चसकामः, ऐन्द्र-

मेकादशकपालं निर्वपेत् प्रजाकाम इति । तत्रैतेषु यागेषु अयमर्थः सांशयिकः । किं प्राकृतं द्रव्यदेवतं निवर्त्तते ? उत न निवर्त्तते इति । सर्वासामेवज्ञातीयकानां चोदनानामुत्पन्नानां द्रव्यदेवतेनैव सहोत्पत्तिः । तस्योत्तरकालं चोदकः । तस्मादगृहीतद्रव्यदेवते चोदकेन, विधिनैव प्राप्ते द्रव्यदेवतं प्रति निराकाङ्क्षे यागे अवशिष्टानि अङ्गानि चोदकः प्रापयिष्यतीति । अथ यदुक्तम्, अग्रहणाद् ग्रहणम् (१० । ७ । ३० सूत्रे) इति । तदिह सिद्धम् ॥ ५८ ॥ सि० ॥

अधिकं स्यादिति चेत् ॥ ५९ ॥

इति चेत् पश्यसि, विधिना प्राप्तत्वादवशिष्टानि चोदकः प्रापयिष्यतीति । नैतदेवम् । अधिकं स्यात् । उक्तमेतत् (१० । ७ । ६१ सूत्रे) तुल्यश्चोदकः सर्वेषु अङ्गेषु । न हि स पदार्थमाकाङ्क्षति । पदार्थकृतं प्रकारमाकाङ्क्षति, तस्माद् द्रव्यदेवतमपि चोदकः प्रापयति । प्राप्ते वचनप्रामाण्यादधिकं भविष्यति । एकं वचनप्रापितम्, अन्यच्चोदकेनेति ॥ ५९ ॥ पूर्व० ॥

नार्थाभावात् ॥ ६० ॥

नैतदेवम्, अधिकं कर्त्तव्यमिति । कुतः । अर्थाभावात् । प्रयोजनाभावादित्यर्थः । सत्यं चोदकप्राप्तं प्रत्यक्षश्रुत्या न प्रतिषिद्धं द्रव्यदेवतं, किन्तु परार्थं तद् यागनिर्वृत्तये । स च याग एकेनैव द्रव्येणैकया देवतया निर्वर्त्तयितव्यः श्रूयते । आग्नेयमष्टाकपालं निर्वपेद्रुक्काम इत्येवमादि । तस्मिन् सहायापेक्षे कल्प्यमाने निर्देशो बाध्येत । अथ तेन निवर्त्तते, चोदकप्रापितस्य न किञ्चिदस्ति प्रयोजनमिति तच्छ्रुतमपि सिद्धत्वात् प्रयोजनस्य, न करिष्यते ॥ ६० ॥ उत्तरम् ॥ काम्येष्टिषु प्राकृतद्रव्यदेवतस्य निवृत्त्यधिकरणम् ॥ १७ ॥

तथैकार्थविकारे प्राकृतस्याप्रवृत्तिः प्रवृत्तौ हि विकल्पः स्यात् ॥ ६१ ॥

क्वचित् कर्मविशेषे श्रूयते, औदुम्बरो यूपो भवति । तत्र संशयः। किं प्राकृतमत्र यूपद्रव्यं बाध्यते ? उत प्राप्यते इति । किं प्राप्तम् । एकार्थविकारे अस्मिन् औदुम्बरे, एकार्थश्चासौ खदिरादिभिः, विकारश्च । तत्र प्राकृतस्य खदिरादेरप्रवृत्तिः । यथा प्राकृतस्य द्रव्यदेवतस्य पूर्वस्मिन्नधिकरणे । तथाऽस्मिन् खादिरस्य यूपद्रव्यस्याप्रवृत्तिः।

प्रवृत्तौ हि तस्य विषमशिष्टो विकल्पः स्याच्चोदकप्राप्तस्य प्रत्यक्षश्रुतस्य च । न चैष न्याय्यः । तस्मादप्रवृत्तिः ॥ ६१ ॥ सि० ॥

यावच्छ्रुतीति चेत् ॥ ६२ ॥

इति चेत् पश्यसि, विकल्पः सदोष इति । समुच्चयो भवतु । उभयस्मिन् सह नियुज्यतां पशुः । तदा चोदकानुग्रहो भविष्यति ॥ ६२ ॥ पूर्व० ॥

न प्रकृतावशब्दत्वात् ॥ ६३ ॥

नैतदेवं, केवले हि औदुम्बरे नियोजनं श्रूयते, केवले खादिरे प्रकृतौ, खादिरे बध्नातीति । उभयस्मिंश्च बन्धनद्रव्ये न प्राकृतं वाक्यं, न च प्रत्यक्षश्रुतम् । तेन समुच्चयस्य प्रमाणमेव नास्ति । अतः प्राकृतं यूपद्रव्यं निवर्त्तते इति ॥ ६३ ॥ उत्तरम् ॥ सौमापौष्णपशौ खादिरयूपस्य नियमाधिकरणम् ॥ १८ ॥

विकृतौ त्वनियमः स्यात् पृषदाज्यवद् ग्रहणस्य गुणार्थत्वादुभयोश्च प्रदिष्टत्वाद् गुणशास्त्रं यदेति स्यात् ॥ ६४ ॥

सौमारौद्रं घृते चरुं निर्वपेच्छुक्लानां व्रीहीणां ब्रह्मवर्चसकामः, सौमारौद्रं चरुं निर्वपेत् कृष्णानां व्रीहीणामभिचरन्, नैर्ऋतं चरुं निर्वपेत् कृष्णानां व्रीहीणां, सौर्य्यं चरुं निर्वपेच्छुक्लानां व्रीहीणामिति । तत्र संशयः । किं व्रीहिभिर्यवैर्वा यष्टव्यम्, उत व्रीहिभिरेव । किं प्राप्तम् । विकृतौ तु विरोधिनामन्यतमस्मिन् गृह्यमाणे अनियमः स्यात् । व्रीहिभिर्यवैर्वेति । कुतः । ग्रहणस्य गुणार्थत्वात् । तस्य हि व्रीहेर्ग्रहणं गुणार्थं, न यागसम्बन्धार्थम् । शुक्ला व्रीहयो भवन्ति, यागस्तूभाभ्यामपीति । यथा पृषदाज्येनानुयाजान् यजतीति आज्यं पृषत्तासम्बन्धार्थं भवति । एवमिहापि व्रीहयः शुक्लगुणसम्बन्धार्थाः, न यागसम्बन्धेन अन्यपरिसङ्ख्यानार्थाः । तथा यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्य्या इत्येतच्छ्रवणमुपपद्यते। यद्येवञ्जातीयकेन प्राकृतं न निवर्त्येत । ततः पञ्चावत्तेन चतुरवत्तेऽनिवर्त्तिते यद्यपि चतुरवत्ती इति दर्शनं युक्तं भवति । न चानर्थको गुणोपदेशो भवति । उभयोः प्रदिष्टत्वात् । उभये व्रीहियवाश्चोदकेन प्राप्ता विकल्पन्ते । यदा व्रीहयः, तदा गुणशास्त्रम् । अव्रीहिपक्षे

असम्भवादर्थान्निवर्त्तेत । तस्माद्विकल्प इति ॥ ६४ ॥ पूर्व० ॥

ऐकार्थ्याद्वा नियम्येत श्रुतितो विशिष्टत्वात् ॥६५॥

एकार्थौ हि व्रीहियवाः । तत्र व्रीहीणां श्रुतत्वाद् यवा नैव प्राप्नुवन्ति । ननूक्तं गुणसम्बन्धार्था हि व्रीहय इति । नैतदेवम् । यदि गुणसम्बन्धार्था भवेयुस्ततो न नियमः स्यात् । न तु गुणसम्बन्धाऽर्थाः । विकारसम्बन्धे हि षष्ठी भवेद् व्यतिरिक्ते प्रातिपदिकार्थे । तेन विकारविशेषणं श्रुत्या भवति, गुणविशेषणं वाक्येन । श्रुतिश्च वाक्याद्बलीयसीति । तस्माच्छ्रुत्या व्रीहयो यागेन सम्बद्ध्यमानाः समानार्थान् यवान्निवर्त्तयेयुः ॥ ६५ ॥ सि० ॥

विरोधित्वाच्च लोकवत् ॥ ६६ ॥

विरोधिनश्चैते । कथम् । ये हि एकस्मिन् कार्ये विकल्पेन साधकाः श्रूयन्ते, ते परस्परेण विरोधिनो भवन्ति । विरोधिनाश्च न सहप्रवृत्तिः । लोकवत् । यथा, मत्स्यान् न पयसा समश्नीयादिति । यद्यपि सगुणा मत्स्या भवन्ति तथापि पयसा सह न समश्यन्ते । तस्मात् सगुणा अपि व्रीहयो यवान्निवर्त्तयन्त्येव ॥ ६६ ॥ युक्तिः ॥

क्रतोश्च तद्गुणत्वात् ॥ ६७ ॥

यदि व्रीहीणां विकारेण सम्बन्धः, कथमेषां गुणेनापि सम्बन्धो भविष्यति ? इति । अत्रोच्यते । नैवैषां गुणेन सम्बन्धः श्रुत्या वाक्येन वा, नापि गुणस्य व्रीहिभिः । कथं तर्हि । क्रतोस्तद्गुणत्वात् । क्रतुरयं शुक्लगुणः श्रूयते, कृष्णगुणश्च । तत्रैकवाक्यत्वादेकस्मिन् क्रतावर्थेन द्रव्यगुणौ सम्बद्ध्येते । तेनार्थभेदोऽपि परिहृतो भवति ॥ ॥ ६७ ॥ आ० नि० ॥

विरोधिनाश्च तच्छ्रुतावशब्दत्वाद्विकल्पः स्यात्॥६८॥

विरोधिनाश्च अन्यतमस्मिन् प्रत्यक्षे श्रूयमाणेऽन्यस्मिँश्च चोदकप्राप्ते अशब्दत्वात् प्रत्यक्षे विरोधिनि सति चोदकस्यान्याय्यो विकल्पः स्यात् । तस्मादपि नियमः ॥ ६८ ॥ युक्तिः ॥

पृषदाज्ये समुच्चयाद् ग्रहणस्य गुणार्थत्वम् ॥ ६९ ॥

पृषदाज्ये तु युक्तम् । न हि तत्र केनचिद्विरोध आज्यस्य । तेन

न पाक्षिकमाज्यम् । ततस्तत्र दध्ना आज्यसमुच्चयः । यतः पृषत्ता-सञ्जननार्थं दधि । तेन न पाक्षिकं दधि आज्येन च समुच्चय इति ॥ ॥ ६९ ॥ आ० नि० ॥

यद्यपि चतुरवत्तीति तु नियमे नोपपद्यते ॥ ७० ॥

अथ यदुक्तं, यद्येवञ्जातीयकेषु नियमो भवेत्, यद्यपि चतुरवत्ती इति चतुरवत्तदर्शनं नोपपद्यते इति । तत् परिहर्त्तव्यमिति ॥७०॥आ०

क्रत्वन्तरे वा तन्न्यायत्वात् कर्मभेदात् ॥ ७१ ॥

क्रत्वन्तरे एव वा, दर्शपूर्णमासयोश्चतुरवत्तदर्शनं भविष्यति । यद्यपि दर्शपूर्णमासयोश्चतुरवत्ती यजमानः, तथापि पञ्चावत्तैव वपा भवतीति, अन्यस्मिन् कर्मणि चतुरवत्तम् । अन्यस्मिन् पञ्चावत्तम् । यद्यप्येवञ्जातीयकेषु नियमस्तथापि चतुरवत्तदर्शनमुपपद्यत इति ॥ ॥ ७१ ॥ आ० नि० ॥ ब्रह्मवर्चसकामैर्व्रीहिभिरेव यागाधिकरणम्॥१९

यथाश्रुतीति चेत् ॥ ७२ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्रेदमाम्नायते, यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्येति । तत्रैषोऽर्थः सांशयिकः । किं वपायां श्रूयमाणं पञ्चावत्तमङ्गाऽपूर्वे चतुरवत्तं निवर्त्तयति ? उत नेति । किं प्राप्तम् । इति चेत् संशयः, न इति । कुतः । यस्मिन् श्रूयते पञ्चावत्तं तत्रैव चतुरवत्तं निवर्त्तयति, नान्यत्र । यथा क्रत्वन्तरे न निवर्त्तयति, । एवमङ्गापूर्वेष्वपि पञ्चावत्तश्रुतिर्न निवर्त्तयितुमर्हति ॥७२॥पूर्व०

न चोदनैकत्वात् ॥ ७३ ॥

नैतदेवम् । एका ह्येषा चोदना, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्र प्रकरणे पञ्चावत्तं श्रुतम् । अतः प्रकरणादङ्गापूर्वे भविष्यति । आह । ननु वाक्याद्वपायां भवितुमर्हतीति । नेत्युच्यते । वपा हि द्रव्यम् । न तत्सम्बन्धे प्रयोजनमस्तीति । उच्यते । पञ्चावत्ततां वपाप्रयोगवचन उपसंहरिष्यति । तथा न दोषो भविष्यतीति । अत्रोच्यते । एवं सत्यपि अङ्गापूर्वे पञ्चावत्तं सिद्ध्येत् । कथम् । एका हि सा चोदना । अङ्गयागो वपायागश्च । तेन चेत् पञ्चावत्तं सम्बद्ध्यते, तदा अङ्गेष्वपि भवितुमर्हति । ननु च वपासम्बन्धाद् वपैव पञ्चावत्ता, नाङ्गानीति । उच्यते । नैतदेवं वचनं, वपैव पञ्चा-

वत्तेति । कथन्तर्हि । पञ्चावत्तैव वपेति । यत एवकारकरणं ततोऽन्यत्रावधारणम् । न चाविशेषेण या पञ्चावत्तप्राप्तिः सा शक्या वपासम्बन्धेन निवर्त्तयितुम् । निवर्त्तकस्य शब्दस्याभावात् । तस्मादङ्गेषु न चतुरवत्तम् ॥ अपि चैवञ्जातीयकेषु अङ्गेषु पञ्चावत्ते जाते ततोऽपरा चोदना । तानि द्विर्द्विरवद्यन्तीति, वपाग्रहणं तत्र हविर्लक्षणाऽर्थं, प्राथम्याद् अवसरप्राप्तं श्रूयते । विधित्सिते हि तस्मिन् वाक्यभेदप्रसङ्गः । तस्मादङ्गेष्वपि पञ्चावत्तमेवेति ॥ ७३ ॥ सिद्धान्तः ॥ पञ्चावत्तैव वपा कार्येत्यनेनाङ्गेष्वपि पञ्चावत्तविधानाधिकरणम्॥२०॥

इति श्रीभट्टशबरस्वामिविरचिते मीमांसाभाष्ये दशमस्याध्यायस्य सप्तमः पादः ॥ १० ॥ ७ ॥

अथ दशमाध्याये अष्टमः पादः ॥ १० ॥ ८ ॥

प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद् विकल्पः स्यात् ॥ १ ॥

प्रतिषेधः श्रूयते चोदकेन प्रदिष्टे धर्मे क्वचिद् अनारभ्य वादेन प्राप्ते । चोदकेन प्रदिष्टे महापितृयज्ञे, न होतारं वृणीते नार्षेयमिति । तथा, अनारभ्यवादेन प्राप्ते, ओश्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरं, यजेति द्व्यक्षरं, ये यजामहे इति पञ्चाक्षरम् । द्व्यक्षरो वषट्कारः, एष वै प्रजापतिः सप्तदशो यज्ञेषु अन्वायत्त इति । ततो नानुयाजेषु ये यजामहं करोतीति ।तत्राऽयमर्थः सांशयिकः । किं प्रदेशानारभ्यवादयोः प्रतिषेधः, स च विकल्पः ? उत पर्युदास इति । किं प्राप्तम् । विकल्प इति । प्राप्तिप्रतिषेधयोः प्रमाणवत्त्वात् । उभौ हि प्राप्तिप्रतिषेधौ प्रमाणवन्तौ । प्राप्तिस्तावत् प्रमाणवती । महापितृयज्ञेन यजेत प्रकृतिवदिति । तथा, एष वै प्रजापतिः सप्तदशो यज्ञेष्वन्वायत्त इति भवति वाक्यं प्राप्तेः, प्रतिषेधमनपेक्ष्यमाणं प्रमाणभूतम् । तथा, प्रतिषेधः प्रमाणवान्, न होतारं वृणीते नार्षेयं, मृत्योरेवैनानुत्सृजतीति । तथा, नानुयाजेषु ये यजामहं करोतीति । सर्वेषु यजिषु ये यजामहक्रिया प्राप्ता, न करोत्यनुयाजेष्विति प्रतिषिद्ध्यते । ये यजामहः कर्त्तव्य इतिवचनात् सयेयजामहकः प्रयोगः फलवानिति गम्यते । न कर्त्तव्यो ये यजा-

महे इति वचनाद्येयजामहकः प्रयोगः फलवानिति गम्यते । उभयोः प्रामाण्यादुभयथापि फलमिति गम्यते । तस्माद् विकल्पः । एवं होत्रार्षेयवरणेऽपि । तस्मात् प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात्॥१॥पूर्व०

अर्थप्राप्तवदिति चेत् ॥ २ ॥

इति चेद् अवगम्यते, विकल्पः स्यादिति । तन्न । अर्थप्राप्तवत् स्यात् । तद्यथा लोके अर्थप्राप्ते यत्र प्रतिषेधो भवति, न विषं भक्षयितव्यं, न सर्पाय अङ्गुलिर्देया, न कण्टकः पादेनाऽधिष्ठेय इति । अक्रियैव तस्यार्थस्य भवति, न विकल्पः । तेन मन्यामहे, विधिप्रतिषेधयोः प्रतिषेधो बलीयानिति । प्राप्ते हि विधौ प्रतिषेधो भवति । येन च नाम प्राप्ते यदुच्यते तत् तस्य बाधकं भवति । तस्मादक्रियैवानुयाजेषु ये यजामहस्य, महापितृयज्ञे च होत्रार्षेयवरणस्येति ॥ २ ॥ आ० ॥

न तुल्यहेतुत्वादुभयं शब्दलक्षणम् ॥ ३ ॥

नैतदेवम् । तुल्यो हि हेतुरिह प्राप्तेः प्रतिषेधस्य च । उभयं शब्दलक्षणं, प्राप्तिरपि प्रतिषेधोऽपि । प्राप्तिरपि प्रतिषेधे प्राप्ते, प्रतिषेधोऽपि प्राप्तौ प्राप्तायाम् । लोके पुनरुभयम् अर्थलक्षणं प्रत्यक्षतो गम्यमानं गुणदोषकरम् । तत्र विधिप्रतिषेधयोर्यतरो गुणवान् सोऽनुष्ठीयते । न तु शब्दलक्षणे गुणदोषौ शक्येते अवगन्तुम् । तस्माद् यद्यद् वाक्येन प्राप्तं, तत्तदुभयमवधार्येत । उभौ च प्राप्तिप्रतिषेधौ प्राप्नुतः । तस्माद् विकल्पस्तत्र तत्रेति ॥ ३ ॥ आ० नि० ॥

अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यात् ॥ ४ ॥

अपि त्विति पक्षव्यावृत्तिः । वाक्यशेषः प्रतिषेधः प्रदेशानारभ्यवादयोः । नैवमभिसम्बन्धः, अनुयाजेषु ये यजामहो न कर्त्तव्य इति। कथन्तर्हि । नानुयाजेष्विति, नशब्दोऽनुयाजशब्देन सम्बद्ध्यते, न करोतिना । किमतो, यद्येवम् । नानुयाजेष्वित्येतावदपरिपूर्णं वाक्यम् । तत्साकाङ्क्षं पूर्ववाक्यैकदेशेन सम्भन्त्स्यते । यदेतद् ये यजामहं करोतीत्युक्तं, तद् नानुयाजेषु । यावदुक्तं स्यात् । अनुयाजवर्जितेषु यजतिषु ये यजामहं करोतीति । तस्माद्विधिरेव पर्य्युदस्तानुयाजको, नास्ति प्रतिषेध इति न विकल्पो भविष्यति । महापितृयज्ञेऽपि

प्रकृतिवदितिवचनाद् होत्रार्षेयवरणमिह कर्त्तव्यं प्राप्तम् । तदुच्यते । प्रकृतिवत् कर्त्तव्यं, वरणं वर्ज्जयित्वेति । नशब्दोऽत्र वृणीतेरर्थेन सम्बद्ध्यते । प्रत्ययार्थस्तु अनुवादः । यदत्र प्रकृतिवत् कर्त्तव्यं तद् वरणं वर्जयित्वेति ॥

किमर्थं पुनरनुयाजैर्वृङ्धात्वर्थेन च नशब्दः सम्बद्ध्यते इति । उच्यते । अन्याय्यत्वाद्विकल्पस्य । अन्याय्यो हि विकल्पः । कथम् । इह यजतिषु ये यजामहं करोतीत्युच्यते । यद्येवमवगम्यते, न शक्यः स विना ये यजामहेन यजतिरभिनिर्वर्त्तयितुम् । तत्र प्रतिषेधवचन-मनर्थकम् । प्रतिषेधेऽपि विज्ञाते विधिवचनमनर्थकम् । तस्मादन्याय्यो विकल्पः । नन्वन्यतरस्य विधेरानर्थक्यप्रसङ्गाद्विकल्प आश्रयणीयो भवति । उच्यते । यत्रान्यतरदानर्थक्यमापद्यते, कल्पेताऽपि तत्र विकल्पः, यत्र न केनचिदपि प्रकारेणार्थवत्ता सम्भवति । इह तु अनुयाजसम्बन्धपर्युदासेनार्थवत्ता । तस्मान्न विकल्पः ॥

आह । नन्वनुयाजसम्बन्धे नशब्दस्य समासः प्राप्नोति । नित्यो हि अस्य नशब्दस्य सुबन्तसम्बन्धेन समास इति वार्त्तिककारो भगवान् कात्यायनो मन्यते स्म । वावचनानर्थक्यञ्च स्वभावसिद्धत्वादिति । नेति भगवान् पाणिनिः । स हि विभाषा इति प्रकृत्य ईदृशं समासमुक्तवान् । सद्वादित्वाच्च पाणिनेर्वचनं प्रमाणम् । असद्वादित्वान्न कात्यायनस्य । असद्वादी हि विद्यमानमपि अनुपलभ्य ब्रूयात् । तस्मात् पर्युदास इति ॥ ४ ॥ सिद्धान्तः ॥ प्रदेशानारभ्यविधानयोर्निषेधस्य पर्युदासताधिकरणम् ॥ १ ॥

अपूर्वे चार्थवादः स्यात् ॥ ५ ॥

स्तो दर्शपूर्णमासौ, तत्राज्यभागौ प्रकृत्य समामनन्ति, न तौ पशौ करोति न सोमे इति । तत्रायमर्थः सांशयिकः । किं पर्युदासः, उत प्रतिषेधः, अथवाऽर्थवादः ? इति । किं प्राप्तम् । यथा पूर्वत्र पर्युदासस्तथा तावत् पर्युदासो नावकल्पते । कथम् । दर्शपूर्णमासयोरेतच्छ्रूयते । तत्र कः प्रसङ्गो यत् सोमे स्यात् । यदि सोमः पर्युदस्येत, सम्बन्ध एव न स्यात् । सोमवर्जितयोर्दर्शपूर्णमासयोरिति । तस्माच्चोदकप्राप्तयोः सोमे प्रतिषेधः । नन्वपूर्वः सोमः । नैव तत्र चोदकेनाज्यभागौ प्राप्नुतः । उच्यते । लक्षणार्थः सोमशब्दो भविष्य-

ति । सौमिकेषु दीक्षणीयादिषु पशुबन्धमात्रे च न कर्त्तव्याविति ॥

एवं प्राप्ते ब्रूमः । अपूर्वे चार्थवादः स्यादिति । अपूर्वे सोमे नैव आज्यभागौ प्राप्नुतस्तस्मान्न प्रतिषेधः । अथ दीक्षणीयादीन् सोमशब्दो लक्षयति । तत्रायमेव दोषो भवति यल्लक्षणा । अपि च प्राप्तप्रतिषिद्धत्वाद्दीक्षणीयादिषु विकल्पः प्राप्नोति । विकल्पश्चान्याय्य इत्युक्तम् । तस्मादसम्भवति अस्मिन् विकल्पो भविष्यति । सम्भवति चायं, तौ न पशौ करोतीत्यस्यार्थवादत्वेन । कः पुनरत्र ? । प्रशंसार्थः । सोमे आज्यभागौ न क्रियेते पशावपीति । तद्यथा आदित्यो यूप इति अञ्जने कृते तेजःसामान्यादुच्यते । एवमिहापि पशौ आज्यभागौ कथं न क्रियेयातामिति । तदर्था प्रशंसेति ॥ ५ ॥ न तौ पशौ करोतीत्यादिनिषेधस्यार्थवादताऽधिकरणम् ॥ २ ॥

शिष्ट्वा तु प्रतिषेधः स्यात् ॥ ६ ॥

आह । प्रथमेऽधिकरणे नशब्दः पर्युदासार्थः, द्वितीये त्वर्थवादार्थः । अथ किंलक्षणकः प्रतिषेध इति । लक्षणमुच्यते । शिष्ट्वा तु प्रतिषेधः स्यात् । यथा नातिरात्रे गृह्णाति षोडशिनमिति । न तत्र शक्यं वक्तुं पर्युदास इति । सम्बन्ध एव हि न स्यात् । अतिरात्रवर्जितातिरात्रे गृह्णाति षोडशिनमिति । नापि कस्यचिदर्थवादत्वेन सम्भवति । तस्माद् न गृह्णातीत्यत्र सम्बन्धः ॥

ननु परस्परं विरुद्धौ विधिप्रतिषेधौ न सम्भवतः । उच्यते । वचनप्रामाण्यात् प्रतिषेधो विधिं बाधित्वा भविष्यति । विधिरपि प्रतिषेधम् । नान्या गतिरस्तीति पक्षे मिथ्याप्रत्ययः कल्पयिष्यते । तदा विधिर्यदा न प्रतिषेधः, तदा प्रतिषेधो यदा न विधिरिति । ननु सर्वदा विधिः प्रतिषेधश्च प्राप्नोति । उच्यते । उक्तमेतद् वचनप्रामाण्याद् विरोधाच्च मिथ्याप्रत्ययः प्रयोगवचन एकं कल्पं गृहीत्वा न द्वितीयमपि गृह्णातीति । तस्मादन्यतरेण कल्पेन सिद्ध्यतीति । ननु कल्पान्तरभावे वैगुण्यम् । अत्रोच्यते । सत्यं वैगुण्यम् । वैगुण्येऽपि तत्सिद्धिरेव वाक्यात् प्रमाणादवगम्यते । तस्माददोषः । यत्र पुनरन्या वचनव्यक्तिरस्ति वाक्यस्य, तत्र न विकल्पो भवति । यथा नानुयाजेषु ये यजामहं करोतीति ॥ ६ ॥ नातिरात्रे गृह्णाति षोडशिनमित्यादिनिषेधस्य विकल्परूपताधिकरणम् ॥ ३ ॥

न चेदन्यं प्रकल्पयेत् प्रक्लृप्तावर्थवादः स्यादानर्थक्यात् परसामर्थ्याच्च ॥ ७ ॥

इदं समाम्नायते अग्निहोत्रे, जर्त्तिलयवाग्वा वा जुहुयाद् गवेधुकयवाग्वा वा जुहुयाद् न ग्राम्यान् पशून् हिनस्ति न आरण्यानिति। अथो खल्वाहुरनाहुतिर्वै जर्त्तिलाश्च, गवेधुकाश्च पयसा अग्निहोत्रं जुहयादिति। अत्र सन्देहः। किं जर्त्तिलयवाग्वा गवेधुकयवाग्वा वा जुहोतीति विधिः, अनाहुतिर्वै जर्त्तिलाश्च गवेधुकाश्चेति प्रतिषेधः? अथ वा उभौ एतावर्थवादार्थौ, पयसा अग्निहोत्रं जुहोतीति विधिः? इति। किं प्राप्तम्। जर्त्तिलयवाग्वेति विधिः। विधिशब्दस्य प्रत्यक्षत्वात्। अनाहुतिरित्यपि प्रतिषेधः। पयसा अग्निहोत्रं जुहोतीति अपरो विधिः, प्रत्यक्षत्वादेव। एवं सति विकल्पः। जर्त्तिलयवाग्वा गवेधुकयवाग्वा वा होतव्यं, न वा ताभ्यां, पयसा होतव्यमिति। न चात्र पर्युदासोऽवकल्पते। न हि नशब्दस्य जर्त्तिलयावाग्वा गवेधुकयवाग्वा वा सामर्थ्यमस्ति। आहुतिशब्देन सह समस्तत्वात्। कल्प्यमाने वा सामर्थ्ये सम्बन्ध एव न स्यात्। अजर्त्तिलयवाग्वा जर्त्तिलयवाग्वा जुहोतीति। अनर्थकश्च पर्युदासे विधिर्भवेत्। कृत्स्नस्य पर्युदस्तत्वात्। क्षीरविधाने च पर्युदासानर्थक्यम्। जर्त्तिलगवेधुकानामप्राप्तत्वात्। तस्माद्विकल्प इति ॥

एवं प्राप्ते ब्रूमः। भवेदर्थप्रतिषेधेन विकल्पः। न चेदन्यं विधिं प्रकल्पयेत्। पयसा अग्निहोत्रं जुहोतीत्यस्य विधेः प्रक्लृप्तौ गवेधुकहोमवचनमनाहुतिवचनमप्यर्थवादार्थं स्यात्। आनर्थक्यात्। अनर्थको हि भवति तदा प्रतिषेधः, यदा हि पयसा जुहोति। अर्थादेव तदाऽनाहुतिर्जर्त्तिला गवेधुकाश्च भवन्ति। अथ कथमसावनाहुतिः, या यज्ञे हूयते?। परसामर्थ्याच्च। परेण च पयसा अग्निहोत्रं जुहोतीत्यनेन विधिना सामर्थ्यं जर्त्तिलगवेधुकविधेः प्रतिषेधस्य च भवति। तस्मात् सर्वमेकं वाक्यम्। कथम्। जर्त्तिलयवाग्वा जुहुयाद् गवेधुकयवाग्वा वा इति साक्षान्निन्दावचनेनैवैतत् सम्बध्यते, अनाहुतिर्वै जर्त्तिलाश्च गवेधुकाश्चेति या च तन्निन्दा, सा पयोविधिप्रशंसार्था। कथम्। जर्त्तिलगवेधुकाहुतिर्गुणवती। न तत्र ग्राम्याः पशवो हिंस्यन्ते, न आरण्याः। एवमपि गुणवती पयोहोमं

प्रति अनाहुतिरेव । एवं पयोहोमो गुणवत्तर इति । जर्त्तिलयवाग्वा जुहुयादिति न कर्त्तव्यार्थं कीर्त्यते, किन्तर्हि प्रतिषेद्धुम् । कर्त्तव्योपदेशे हि कल्पनीयं किञ्चित् । प्रतिषेधसम्बन्धे प्रत्यक्षनिन्दया इतरस्तुतिः । आनन्तर्य्यानुग्रहश्च । यथा, विषं भक्षयितव्यं न कदाचिदिति विषभक्षणस्य कर्त्तव्यता प्रतिषेधसम्बन्धार्थं कीर्त्यते, नानुष्ठानाय । एवमिहापि द्रष्टव्यमिति ॥७॥ अनाहुतिर्वै जर्तिलाश्चेत्यादिनिषेधस्यार्थवादताधिकरणम् ॥ ४ ॥

पूर्वैश्च तुल्यकालत्वात् ॥ ८ ॥

चातुर्मास्येषु त्रैयम्बकानधिकृत्य समामनन्ति, अभिघार्य्याः नाभिघार्य्या इति मीमांसन्ते, यदभिघारयेद् रुद्रायास्ये पशूनभिदध्यात् । यन्नाभिघारयेन्न रुद्रायास्ये पशूनभिदध्यात् । अथो खल्वाहुरभिघार्या एव । न हि हविरनभिघृतमस्तीति । तथा, होतव्यमग्निहोत्रं न होतव्यमिति मीमांसन्ते ब्रह्मवादिनः, यदि जहुयाद् यथा पूर्वमाहुतीर्जुहुयात्, यन्न जुहुयादग्निः परापतेत्, तूष्णीमेव होतव्यं, यथापूर्वमाहुतीर्जुहोति, नाग्निः परापततीति । अत्रायमर्थः सांशयिकः । किमभिघारयितव्यास्त्रैयम्बकाः ? उत नाभिघारयितव्याः ? इति । होतव्यमग्निहोत्रम् ?, न होतव्यं वा विधिप्रतिषेधावेतौ । इह, नार्थवादार्थमेतयोः सङ्कीर्त्तनम्?इति । किं तावत् प्राप्तम् । विधिप्रतिषेधाविति ब्रूमः । तद्रूपत्वात् । विधिप्रतिषेधयोर्हि प्रत्यक्षं रूपमुपलभ्यते । श्रुत्या चानुष्ठानार्थता प्रतिषेधार्थता चावगम्यते । वाक्यादर्थवादाऽर्थता श्रुतिश्च वाक्याद्बलीयसी । न च पर्युदासोऽवकल्पते । तस्माद् अग्निहोत्रं होतव्यं न होतव्यं वा । यदा होतव्यं, तदा तूष्णीं त्र्यम्बका अभिघारयितव्याः, न वाभिघारयितव्याः । यदा पुनरभिघारयितव्याः, तदाभिघारयितव्यवचनमर्थवादार्थं प्रतिषेधसङ्कीर्त्तनादभावाशङ्कायां पुनरुच्यते इति ॥ एवं प्राप्ते ब्रूमः—

पूर्वाधिकरणोदाहरणैस्तुल्यकालानीमान्युदाहरणानि । का तुल्यकालता । पूर्वं विधिप्रतिषेधावभिधाय उत्तरेण तयोरभिसम्बन्धः क्रियते इति । तदेतत् पूर्वाधिकरणेनैव तुल्यम् । यौ विधिप्रतिषेधौ श्रूयेते, न तौ अनुष्ठातुं वर्जयितुं वा । किन्तर्हि, मीमांसितुम् । एवमाह, अभिघार्य्या नाभिघार्या इति मीमांसन्ते । तथा होतव्यमग्निहोत्रं, न होतव्यमितिमीमांसन्ते ब्रह्मवादिनइति । मीमांसा चेतरविधिप्रशंसार्था ।

तथा प्रत्यक्षः शब्दार्थेन सम्बन्धः। न किञ्चित् कल्पनीयम्। विधिप्रतिषेधयोर्हि किञ्चित् कल्पनीयं स्यात्। यदभिघारयेद् रुद्रायास्ये पशूनभिदध्यादिति। इदमभिघारणं गुणवत्तरं, यद् ईदृशोऽपि दोषो नाद्रियत इति। तथा यज्जुहुयाद् यथापूर्वमाहुतीर्जुहुयात्, यन्न जुहुयादग्निः परापतेदितीत्थं तूष्णीं होमः प्रशस्तः। यदस्मिन् क्रियमाणे उभावपि दोषौ परिहृतौ भवत इति॥ ८॥ त्रैयम्बकादावभिघारणानभिघारणादीनामर्थवादताधिकरणम्॥ ५॥

उपवादश्च तद्वत्॥ ९॥

अस्त्याधानम्। तत्रेदमामनन्ति। य एवं विद्वान् वारवन्तीयं गायति, य एवं विद्वान् यज्ञायज्ञीयं गायति, य एवं विद्वान् वामदेव्यं गायतीति। तत्रेदमाम्नायते। उपवीता वा एतस्याग्नयो भवन्ति यस्याग्न्याधेये ब्रह्मा सामानि गायतीति। तत्रायमर्थः सांशयिकः। किमयमुपवादः प्रतिषेधार्थः? उत पर्युदासार्थः? उतार्थवादार्थः? इति। किं प्राप्तम्। न पर्युदासः। ब्रह्मणोऽप्राप्तत्वात्। असतो वचनमर्थवादार्थं भवति। यथा प्रजापतिर्वा एक आसीत् स आत्मनो वपामुदखिददिति॥ एवं प्राप्ते ब्रूमः। न ब्रह्मण उपवादः कस्यचिदर्थवादः सम्भवति। न च वाक्यान्तरस्थेनार्थवादेन किञ्चिदपि प्रयोजनमस्ति। तस्मादुपवादस्तद्वत्। किञ्च तत्। यथाऽतिरात्रे गृह्णाति षोडशिनमिति, विधाय प्रतिषेधार्थं स्यात्। कथम्। ब्रह्मणो गानं नैव प्राप्तमिति ब्रह्मगानप्रतिषेधार्थं वचनं नावकल्पते। तस्माद् ब्रह्मग्रहणमविवक्षितम्। सामगानप्रतिषेध एवैष स्यात्। ब्रह्मशब्दः प्रमादपाठ इति चेत्। नैतदेवम्। ब्राह्मणवाचित्वादुद्गात्रभिधानं भविष्यति॥ ९॥ सिं०॥

प्रतिषेधादकर्मेति चेत्॥ १०॥

इति चेद् दृश्यते, सामगानस्यैव निन्देति। अकर्म सामगानस्य। न हि निन्दितं कर्त्तव्यं भवतीति॥ १०॥ आ०॥

न शब्दपूर्वत्वात्॥ ११॥

नैतदेवम्। यथैव हि निन्दया न कर्त्तव्यमिति गम्यते, एवमुपादेयतया कर्त्तव्यमिति गम्यते। न चान्यत् कर्त्तव्यमिति कश्चिद् विधिः प्रकल्पते, यस्य प्रशंसार्थं निन्द्येत। तस्मादनुष्ठातुं विधिः, वर्ज-

यितुमुपवाद इति ॥ ११ ॥ आ० नि० ॥ आधाने उपवादस्य विकल्पता-ऽधिकरणम् ॥ ६ ॥

दीक्षितस्य दानहोमपाकप्रतिषेधोऽविशेषात् सर्वदानहोमपाकप्रतिषेधः स्यात् ॥ १२ ॥

ज्योतिष्टोमे श्रूयते । दीक्षितो न ददाति न जुहोति न पचतीति । अत्रैषोऽर्थः सांशयिकः । किं सर्वदानहोमपाकानां प्रतिषेधः, उताऽक्रतुयुक्तानाम्, अथवा क्रतुयुक्तानामपि चोदकप्राप्तानां प्रतिषेधः, अथवा पर्युदासः ? इति । किं प्राप्तम् । सर्वदानहोमपाकानां प्रतिषेधः । कुतः । अविशेषात् । नास्ति विशेषवचनः शब्दः । तस्मात् सर्वेषां प्रतिषेध इति ॥ १२ ॥ पूर्व० ॥

अक्रतुयुक्तानां वा धर्मः स्यात् क्रतोः प्रत्यक्ष-शिष्टत्वात् ॥ १३ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न सर्वेषां प्रतिषेधः । केषां तर्हि । अक्रतुयुक्तानां धर्मः स्यात् । कुतः । क्रतोः प्रत्यक्षशिष्टत्वात् । प्रत्यक्षं हि श्रुतौ दानादीनां शासनमस्ति । तस्मात् प्रत्यक्षं वर्जयित्वा प्रतिषेधः स्यात् ॥ १३ ॥ पूर्व० ॥

तस्य वाप्यानुमानिकमविशेषात् ॥ १४ ॥

अपि वा तस्य क्रतोर्यद् आनुमानिकं चोदकप्राप्तं, तत् प्रतिषिद्ध्यते । आनुमानिकं हि तन्नाप्रत्यक्षम् । प्रत्यक्षश्रुतश्च प्रतिषेधः ॥ १४ ॥ पूर्व० ॥

अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात् प्रतिषेधे विकल्पः स्यात् ॥ १५ ॥

तुशब्दोऽवधारणायाम् । वाक्यशेषः स्यात् प्रतिषेधः । उक्तानामविशेषेण दानादीनां ज्योतिष्टोमिके पर्युदासेन प्रतिषेधो वाक्यशेषः स्यात् । अहरहर्दद्यादित्यस्य शेषो, न दीक्षित इति । एवं होमपाकवाक्ययोरपि । असति पर्युदासे प्रतिषेधे विकल्पः स्यात् । स चाऽन्याय्य इत्युक्तम् । तस्मात् पर्युदास इति ॥१५॥ सिद्धान्तः॥ दीक्षितो न ददातीत्यादिनिषेधस्य पर्युदासताधिकरणम् ॥ ७ ॥

अविशेषेण यच्छास्त्रमन्याय्यत्वाद् विकल्पस्य तत् सन्दिग्धमाराद्विशेषशिष्टं स्यात् ॥ १६ ॥

इदं समामनन्ति ज्योतिष्टोमे, वर्त्मनि जुहोतीति । राजसूये वल्मीकवपामुपगृह्य जुहुयादिति । इदमपि श्रूयते, यद् आहवनीये जुह्वति तेन सोऽस्याभीष्टः प्रीतो भवतीति । तत्रैषोऽर्थः सांशयिकः । किं ज्योतिष्टोमे वर्त्मनि होतव्यं, राजसूये वल्मीकवपायाम् ? उत विकल्प एतयोराहवनीयेनेति । किं प्राप्तम् । होमार्थत्वात् तावद्वर्त्म-वल्मीकवपयोः, समुच्चयो न प्राप्तः । अन्यतरेण होमनिर्वृत्तेः कृतत्वात् । होमर्थता चैतयोः प्रतिज्ञायेत । कुतः । भूतभव्यसमुच्चारणे भूतं भव्यार्थं भवति । न च बाधोऽत्यन्तमेव वर्त्मविषयः । आहवनीय-होमोऽपन्हुतो भवति । विकल्पे, पक्षे तावदनुगृह्यते इति ॥ एवं प्राप्ते ब्रूमः । अविशेषेण यच्छास्त्रं तस्य आराद्विशेषशिष्टं स्यात् । यद् विशेषेण शिष्यते, तदस्य दूरं स्यात् । असम्बद्धमित्यर्थः । सन्दिग्धं हि तत् । कथमिव । यदि सामान्यं विशेषलक्षणार्थं, ततो विशेषेऽपि प्राप्तम् । अथ न लक्षणार्थं, ततो न प्राप्तम् । एवं सन्दिग्धम् । अथ वा, सामान्यं विशेषेण विरुध्यत इत्येवं सन्दिग्धम् । अथ वा, सामान्यं तस्मिँश्च विशेषे अन्यस्मिँश्चेत्येवं सन्दिग्धम् । तत् सामान्य-विधानं विशेषविधौ न स्यात् । किं कारणम् । अन्याय्यत्वाद् विकल्पस्य । कथमन्याय्यो विकल्पः । अत्रोच्यते । यदि वर्त्माद्यऽधिकरणता एषु होमेषु श्रूयते, स पक्षे न भवतीति विकल्पमाश्रयता प्रमाणापेता कल्पयितव्या । अथ वर्त्माद्यधिकरणता एषु न श्रूयते, ततः पक्षे सा भवतीति प्रमाणापेतैव । वर्त्मग्रहणञ्च श्रूयमाण-विवक्षितं स्यात् । अथोच्येत, अर्थात् पक्षेभावः।स चार्थो होमनिर्वृत्ति-राहवनीयेनेति । तन्न । यदि होमनिर्वृत्तिमात्रं कर्त्तव्यम् । तत-आहवनीयेनाप्यर्थात् सिद्ध्येत । इह तु वर्त्माद्यधिकरणताऽपि विधीयते । सा आहवनीये उपादीयमाने नोपसंह्रियेत । अनुपसंहारे च प्रयोगवचनो बाध्येत ॥ अत्रोच्यते—

यद्यपि वर्त्माद्यधिकरणतापि विधीयते, होमेगुणभूतत्वाद्धोमं समीचीनं करोतीति तत्रानुपसंहारोऽपि न दोषः । अधिकरणान्तरेण समीचीनो भविष्यतीति । तस्माद्विकल्प एवेति । नेत्युच्यते । वर्त्मादिहोम-सम्बन्धोऽत्र विधीयते । स च प्रधानभूतः, न होमः । तस्मिन्ननुपसंह्रियमाणे न यथाश्रुतं कृतं स्यात् ॥ अत्रोच्यते । सम्बन्धेऽपि विधीयमाने द्वयं विधीयते । एकं साध्यम्, एकं साधनम् । यत् साध्यं, तत्

प्रधानम । स च होमः । तस्माद् विकल्पः । सम्बन्धेऽपि च श्रूयमाणेऽवश्योपादातव्यो भवति होमः । होमश्चेद् आहवनीयः प्राप्नोत्येवेति । तन्न । आहवनीयस्यानङ्गत्वात् । कथमनङ्गत्वम् । विशेषेषु अप्राप्तेः । कथमप्राप्तिः । वर्त्माद्यधिकरणतायां सत्यामाहवनीयाधिकरणताया ज्ञानं करणं च प्रत्यसम्भवात् । यद्धि वर्त्माद्यधिकरणमिति ज्ञायते, न तद् आहवनीयाधिकरणं शक्यं ज्ञातुं कर्तुं वा ॥ आह । यथा शक्यते तथा कर्त्तव्यमित्याख्यातार्थो भविष्यति । तस्माद्वर्त्मादि बाधित्वा आहवनीयो भविष्यतीति । उच्यते । स्यादेतदेवं, यदि वर्त्मादिबाधामन्तरेणाहवनीयोपदेशो नावकल्पेत । द्वेधा हि शक्यते कर्तुं, वर्त्मादि बाधित्वा परिहृत्य वा । अत्र बाधायां वर्त्मनीति प्रत्ययोऽपह्नोतव्यो भवति । तस्मात् परिहारः श्रेयानिति । आह । परीहारेऽपि आहवनीयो भवतीति प्रत्ययोऽपह्नूयेत । अपह्नोष्यामहे । भवत्याहवनीयप्रत्ययः । अशक्योऽसौ कर्तुमित्यपि किं न भवति । अशक्यं न करिष्यते । आह । योऽयं सामान्यप्रत्यय उच्यते, स सर्वेषु विशेषेषु कार्यमासञ्जति । एवं चेद्वर्त्मादिहोमेषु चान्यत्र च तेनाहवनीयो विहितः । तत्र, यो वर्त्मादिहोमे आहवनीयप्रत्ययः स न शक्यः परिहर्तुमतो वर्त्मादिहोमं बाधित्वाऽवतिष्ठतेति ॥

अत्रोच्यते । नैतदेवम् । न हि सामान्यवाची शब्दो विशेषानभिवदति । यदि चाभिवदेद्, अद्यजाते गवि नावकल्पेत । पूर्वदर्शनाभावात् । सामान्ये च दृष्टपूर्वत्वादवकल्पते । तस्मान्न सामान्यं विशेषानभिवदति । तस्मान्न वर्त्मादिहोम आहवनीयप्रत्ययः । अभिवदन् वा न मुख्यया वृत्त्याऽभिवदेत् । कथं तर्हि लक्षणया । लक्षणा च श्रुत्या बाध्येत । तस्माद् वर्त्मादिहोमे श्रुत्या वर्त्मादिषु प्राप्तेष्वशक्य आहवनीयो विज्ञातुं कर्तुं चेति ॥ आह । ननु विपरीतमप्येतत् स्यात् आहवनीये प्राप्ते वर्त्मादिप्रत्ययो न शक्य इति । भवेदेवं, किन्तु विशेषे वर्त्मादिप्रत्ययः श्रौतः, आहवनीयप्रत्ययो लक्षणया । तत्र श्रुतिप्रत्ययो बलीयानित्युक्तम् । ननु सामान्येऽप्याहवनीयप्रत्ययः श्रौतः । उच्यते । वर्त्मादिप्रत्ययोऽपि सामान्ये श्रौतः । होमे हि स विशिष्टे विधीयते, नाहोम एतद्विशेषयति । तस्माद्वर्त्मादिहोमं वर्जयित्वाऽन्येषु होमेषु आहवनीयः करिष्यते इति ॥ १६ ॥ वर्त्महोमादिभिराहवनीयस्य बाधाधिकरणम् ॥ ८ ॥

अप्रकरणे तु यच्छास्त्रं विशेषे श्रूयमाणमविकृत-माज्यभागवत् प्राकृतप्रतिषेधार्थम् ॥ १७ ॥

अनारभ्य किञ्चिदाम्नायते, सप्तदश सामिधेनीरनुब्रूयादिति। तत् प्रकृतौ विशेषविहितेन पाञ्चदश्येन बाधितं सर्वविकृतीरनुप्राप्तं कासुचिद् विकृतिषु पुनः श्रूयते । वैमृधेऽध्वरकल्पायां पशौ चातुर्मास्येषु मित्रविन्दायां त्रैधातव्यायामाग्रयणेष्टचामिति। तासु विकृतिष्वस्य श्रवणं किमर्थमिति विचार्य्यते। किं प्राप्तम्। अप्रकरणे यच्छास्त्रमाम्नातं विकृतिविशेषे पुनरविकृतं श्रूयते, तत् प्राकृतमङ्गजातं प्रतिषेद्धुं, वैमृधादिषु सप्तदश सामिधेनीरनुब्रूयादितिं, नान्यत् प्राकृतं कुर्य्यादितिं। न चैवं विज्ञायते, वैमृधादिष्वेव साप्तदश्यं, नान्यासु विकृतिष्विति। तासु तत् प्रत्यक्षेण वाक्येन श्रुतं न शक्यं बाधितुम् ॥ १७ ॥ पूर्व० ॥

विकारे तु तदर्थं स्यात् ॥ १८ ॥

यदि तु सामिधेनीनां विकारः कश्चिच्छ्रूयेत, ततो विकारार्थमाम्नातमिति गम्यते। न तु विकारः श्रूयते। तस्मात् प्राकृतप्रतिषेधार्थमेवेति ॥ १८ ॥ युक्तिः ॥

वाक्यशेषो वा क्रतुना ग्रहणात् स्यादनारभ्य-विधानस्य ॥ १९ ॥

वाशब्दः पक्षं व्यावर्त्तयति। वाक्यशेषोऽयं वैमृधादिषु अनारभ्यविधानस्य। सप्तदश सामिधेनीरनुब्रूयादेतासु विकृतिष्विति। तेन अन्यासु विकृतिषु न स्यात्। ननु प्रत्यक्षश्रुतमन्यासु विकृतिषु तद् न शक्यं बाधितुम्। उच्यते। सत्यं प्रत्यक्षश्रुतं सामिधेनीषु, न तु तत् क्रतुना गृह्यते। क्रतुसम्बन्धाभावात्, प्रयोगवचनोऽपि न गृह्णाति, सति वैमृधादिसम्बन्धकरे वाक्ये। यदेतत् साप्तदश्यमनारभ्योक्तं, तद् वैमृधादीनामङ्गमिति प्रत्यक्षं वाक्यं,तस्मान्नान्या विकृतयस्तद् गृह्णन्ति। अक्रतुग्रहणे च सति सामिधेनीनां साप्तदश्यं निष्फलत्वान्न क्रियेत। तस्मादनारभ्यविधेर्वैमृधादिषु वाक्यशेषः। आह। ननु वाक्यभेदो भवति। सामिधेन्यः सप्तदश भवन्ति। ताश्च वैमृधादिष्विति। उच्यते। द्वे एते वाक्ये। पूर्वेण वाक्येन योऽर्थ

उक्तस्तस्यैव विशेषः परेण वाक्येन विधीयते इति वाक्यशेष इत्युच्यते इति ॥ १९ ॥ सिद्धान्तः ॥ वैमृधादिषु साप्तदश्यविधेर्वाक्यशेषताधिकरणम् ॥ ९ ॥

मन्त्रेष्ववाक्यशेषत्वं गुणोपदेशात् स्यात् ॥ २० ॥

दर्विहोमं प्रकृत्य श्रूयते पृथिव्यै स्वाहा अन्तरिक्षाय स्वाहा वायवे स्वाहा इति । अस्ति च अनारभ्य वचनं, वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते इति । तत्र सन्देहः । किं तस्यायं वाक्यशेषः, स्वाहाकारेण अन्नं प्रदीयते देवेभ्य इत्येतस्मिन् दर्विहोमे पृथिव्यै स्वाहा अन्तरिक्षाय स्वाहा इति ? उत नायं वाक्यशेषः, येष्वपि प्रदानेषु स्वाहाकारो नाम्नातस्तेष्वपि स्वाहाकारः ? इति । किं प्राप्तम् । अनन्तरवृत्तेनाधिकरणेन वाक्यशेष इति ॥ एवं प्राप्ते ब्रूमः । मन्त्रेषु वाक्यशेषत्वं, न स्यात् । न हि विधायकाविधायकवाक्ययोरेकवाक्यत्वं भवति । विधायकं ब्राह्मणम्, अविधायको मन्त्रः । अपि च, अनन्तराधिकरणे न क्रतुसम्बन्धोऽस्ति । इह तु सम्बन्धो गम्यते । वषट्कारेण स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते इति । प्रदानं ह्यत्र प्रधानकर्म । अपि च, गुणोपदेशो भवति । तस्मिन् दर्विहोमे पृथिव्यै स्वाहा इत्येवं समुच्चारणं भवति, न स्वाहा पृथिव्यै इति । तस्मादन्येष्वपि दर्विहोमेषु स्वाहाकारोऽस्तीति ॥ २० ॥ सि० ॥

अनाम्नाते च दर्शनात् ॥ २१ ॥

यत्रापि दर्विहोमे नाम्नायते स्वाहाकारः, तत्रापि क्वचिद्दृश्यते । घृतेन द्यावापृथिवी आपृणेथामिति औदुम्बर्य्यां विशाखे जुहोति आन्त्रान् अवस्रावयति भूमिप्राप्ते स्वाहाकरोतीति प्राप्तं स्वाहाकारं दर्शयति ॥ २१ ॥ युक्तिः ॥

प्रतिषेधाच्च ॥ २२ ॥

क्वचिच्च प्रतिषेधो भवति, न स्वाहेति वचनं करोति मन्त्रं च नाहेति । प्राप्तिपूर्वकः प्रतिषेधो भवतीति अवाक्यशेषता अध्यवसीयते ॥ २२ ॥ युक्तिः ॥ पृथिव्यै स्वाहा इत्यादिविधिना अविहितस्वाहाकारेषु प्रदानेषु स्वाहाकारविधानाधिकरणम् ॥ १० ॥

अग्न्यतिग्राह्यस्य विकृतावुपदेशादप्रवृत्तिः स्यात् ॥ २३ ॥

इदमाम्नायते, य एवंविद्वानग्निं चिनुते इति । तथा उपष्टम्भनं

वा एतद्यज्ञस्य यदतिग्राह्या इति। तत्र सन्देहः। किमग्न्यतिग्राह्यं विकृतौ चोदकः प्रापयति, उत नेति। किं प्राप्तम्। अग्न्यतिग्राह्यस्य विकृतावप्रवृत्तिरिति। अग्निश्चातिग्राह्याश्चाग्न्यतिग्राह्यम्। तद् विकृतौ न प्रवर्त्तते। कुतः। विकृतावुपदेशात्। विकृतौ हि तदुपदिश्यते। अथातोऽग्निमग्निष्टोमेनानुयजाति, तमुक्थेन तमतिरात्रेण तं चतूरात्रेण तं पञ्चरात्रेण तं षड्रात्रेण तं सप्तरात्रेण तमष्टरात्रेण तं नवरात्रेण तं दशरात्रेणेति। तथा यत् पृष्ठ्येति गृह्णीयात् प्राञ्चं यज्ञं पृष्ठानि संगृह्णीयुः, यदुक्थेति गृह्णीयादिति न नूनमग्न्यतिग्राह्यं चोदकः प्रापयति, यत् साक्षात्कस्याञ्चिद् विकृतौ चोद्यते इति ॥२३॥ पूर्व० ॥

मासिग्रहणञ्च तद्वत् ॥ २४ ॥

इदञ्चाम्नायते, मासि मासि अतिग्राह्या गृह्यन्ते इति। यदि चोदकः प्रापयेद् न मासि मास्यतिगृह्यन्ते इत्युपदेशः स्यात् ॥२४॥ युक्तिः ॥

ग्रहणं वा तुल्यत्वात् ॥ २५ ॥

गृह्यते वा चोदकेनाग्न्यतिग्राह्यं, न हि अस्यान्यैरङ्गैरस्ति विशेषः। अन्यानि अङ्गानि गृह्णाति एतद् न गृह्णातीति नैतदवकल्पते ॥२५॥सि०

लिङ्गदर्शनाच्च ॥ २६ ॥

लिङ्गं खल्वपि दृश्यते, कङ्कचितं चिन्वीत शीर्षचितं चिन्वीत यः कामयेत सुशीर्षा अस्मिँल्लोके सम्भवेयमिति। तथा पञ्चैन्द्रानतिग्राह्यान् गृह्णातीति। कङ्काकारतामैन्द्रताञ्च विशेषं ब्रुवन्नग्न्यतिग्राह्यस्य विकृतौ प्राप्तिं दर्शयति ॥ २६ ॥ युक्तिः ॥

ग्रहणं समानविधानं स्यात् ॥ २७ ॥

अथ यदुक्तं, विकृतावुपदिश्य इति। तत् परिहर्तव्यम्। अत्रोच्यते। यस्यां विकृतावुपदिश्यते, तस्यां प्रकृतौ च समानः स विधिः। अवशिष्टासु विकृतिषु चोदकः प्रापयतीति ॥२७॥ आ० नि० ॥

मासिग्रहणमभ्यासप्रतिषेधार्थम् ॥ २८ ॥

अथ मासि ग्रहणं कथमिति। तद् अभ्यासप्रतिषेधार्थम्। न अहन्यहनि गृह्यन्ते, मासि मासि गृह्यन्ते इति ॥ २८ ॥ ॥ आ० नि० ॥ अग्न्यतिग्राह्यस्य विकृतावुपदेशाधिकरणम् ॥ ११ ॥

उत्पत्तितादर्थ्याच्चतुरवत्तं प्रधानस्य होमसंयोगादधिकमाज्यमतुल्यत्वाल्लोकवदुत्पत्तेर्गुणभूतत्वात् ॥ २९ ॥

दर्शपूर्णमासयोराम्नायते, चतुरवत्तं जुहोतीति । तत्रायमर्थः सांशयिकः । किं सहोपस्तरणाभिघारणाभ्यां चतुरवत्तम्, उत प्रधानद्रव्यादेव चतुरवदातव्यम् । अधिकमुपस्तरणमभिघारणञ्च ? इति । किं प्राप्तम् । प्रधानद्रव्यादेव चतुरवदातव्यम् । कुतः । उत्पत्तितादर्थ्यात् । पुरोडाशोत्पत्तेर्होमार्थता भवति । यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्चाच्युतो भवतीति । यज्जुहोति तच्चतुरवत्तं कर्त्तव्यम् । पुरोडाशश्च होमार्थो नोपस्तरणाभिघारणे । तस्मात् पुरोडाशस्य चतुरवदातव्यमिति । अधिकमाज्यं स्यात् । अतुल्यं हि तत् पुरोडाशेन । पुरोडाशो होमार्थे तद् गुणभूतमाज्यम् । तेन यद्यपि सह आज्येन पञ्चावत्तं भवति, तथापि होमे चतुरवत्तमेव कृतम् । यथा लोके, प्रस्थभुग्देवदत्त इत्युच्यते । यद्यपि सूपशाकादिभिरधिकः प्रस्थो भवति, तथापि भुजौ प्रस्थो निर्दिश्यते, व्यञ्जनानि ओदनार्थानि ॥ २९ ॥ पूर्व० ॥

तत्संस्कारश्रुतेश्च ॥ ३० ॥

प्रधानावदानसंस्कारार्थेन चोपस्तरणाभिघारणे श्रूयेते । यदुपस्तृणाति अभिघारयति अमृताहुतिमेवैनां करोतीति । तेनोपस्तरणाभिघारणसंयुक्तं प्रधानद्रव्याच्चतुरवत्तं होतव्यमिति गम्यते ॥ ३० ॥ युक्तिः

ताभ्यां वा सह स्विष्टकृतः सकृत्त्वे द्विरभिघारणेन तदाप्तिवचनात् ॥ ३१ ॥

ताभ्यां वा सह द्विर्हविषोऽवदाय चतुरवत्तं कर्त्तव्यम् । कुतः । स्विष्टकृतः सकृत्त्वे द्विरभिघारणेन तदाप्तिवचनं भवति । सकृदुपस्तृणाति सकृदवद्यति द्विरभिघारयति चतुरवत्तस्याप्त्यै इति द्विरभिघारणेन चतुरवत्तं पूर्णं दर्शयति । इतरथा पञ्चावत्तं तेन पूर्येत । आह । दर्शनमेतत् । प्राप्तिरुच्यतामिति । अत्रोच्यते । चतुरवत्तं होमे श्रूयते, चतुरवत्तं जुहोतीति । न होमार्थे पुरोडाशे सान्नाय्ये वा । नैवं श्रूयते, यद् होमार्थं द्रव्यं तच्चतुरवत्तं कुर्यादिति । चतुरवत्तं श्रूयमाणं होमेनाऽसम्बद्ध्यमानमनर्थकं स्यात् ॥ अथोच्यते । प्रयोगवचनग्रहणादर्थवद् भविष्यति । तन्न । साक्षाद् होमसम्बन्धे वचने

सति चतुरवत्तं जुहोतीति नान्यत् प्रयोगवचनग्रहणं कल्पते। अस्मिँश्च साक्षाद्वचनं तदर्थाद् अवत्तं, नातदर्थादिति न विशेषः श्रूयते। तदर्थादतदर्थाद्वा चतुरवखण्डनसंयुक्तं द्रव्यं होतव्यम्। एवञ्च श्रुतिः परिगृह्यते। इतरस्मिन् पक्षे वाक्यं परिगृह्येत। द्विर्हविषोऽवद्यतीति च विकल्पः स्यात्। यदि हविश्चतुरवत्तं दीयेत, तथा इदमपरं श्रवणमसदनुवादभूतं स्यात्। चतुरवत्तं वा विकल्पयेत्। अभावाच्च पक्षे विकल्पो न न्याय्यः स्यात्। तस्मात् सहोपस्तरणाऽभिघारणाभ्यां चतुरवत्तमिति॥ ३१॥ सि०॥

तुल्यवच्चाभिधाय सर्वेषु भक्त्यनुक्रमणात्॥ ३२॥

चत्वारि वा एतानि देवदधानि अवदानानि यदुपस्तृणाति तदनुवाक्यायै यत् पूर्वमवदानं तद्याज्यायै यदुत्तरं तद्देवतायै यदभिघारयति तद्वषट्कारायेति चतुरवत्तस्य चत्वारि अवदानानि संकीर्त्य अनुवाक्यादिभिर्भक्तिवादेन अवयवशः संकीर्त्तयन्नुपस्तरणादीनि दर्शयति। तस्मात् सहोपस्तरणाभिघारणाभ्यां चतुरवत्तमिति। दधशब्दो भागधेयवचनः। तद्यथा, कुक्कुटकाय दधं, नापिताय दधमिति। देवदधानि देवभागा इत्यर्थः॥ ३२॥ युक्तिः॥ उपस्तराऽभिघारणाभ्यां सहैव चतुरवदानाधिकरणम्॥ १२॥

साप्तदश्यवन्नियम्येत॥ ३३॥

दर्शपूर्णमासयोरुपांशुयाजोऽस्ति। तत्र, चतुरवत्तं जुहोतीति। तत्र संशयः। किमुपांशुयाजे चतुरवत्तं कर्त्तव्यम्? उत नेति। किं प्राप्तम्?। साप्तदश्यवन्नियम्येत। यथा साप्तदश्यमनारभ्याधीतं परिगणितासु विकृतिषु पुनः श्रूयमाणं वाक्यशेषात्तास्वेव नियम्यते। एवमिदमपि चतुरवत्तमुपस्तरणाभिघारणाश्रयत्वाद् यत्र ते, तत्रैव नियम्येत औषधसान्नाय्ययोः। उपांशुयाजे न स्यादिति॥३३॥ पूर्व०

हविषो वा गुणभूतत्वात्तथाभूतविवक्षा स्यात्॥३४॥

वाशब्दः पक्षं व्यावर्त्तयति। नैतदस्ति, नोपांशुयाजे चतुरवत्तमिति। होमे चतुरवत्तं गुणो विधीयते। स उपांशुयाजहोमेऽपि स्यात्। अत्रापि चतुरवदातव्यम्। अथ यदुक्तम्। औषधसान्नाय्ययोरेव चतुरवत्तमुपस्तरणाभिघारणाश्रयत्वादिति। नोपस्तरणाभिघारणवचनं चतुरवत्तस्य वाक्यशेषभूतम्। यथा सप्तदशसामिधेनी-

रनुब्रूयादिति मित्रविन्दादिषु, सप्तदशानुक्रमादिति । नैवमिह चतुरवद्येत, कथमुपस्तृणीयात्, अभिघारयेच्चेति । कथं तर्हि । चतुरवदानसंयुक्तं द्रव्यं जुहुयाद्, हविश्चोपस्तृणीयाद्, अभिघारयेच्चेति । यत्र हविष उपस्तीर्यमाणेऽभिघार्यमाणे च चतुरवत्तयुक्तं प्रदानं भवति तत्र न प्रधानद्रव्याच्चतुरवदातव्यम् । यत्र पुनः प्रधानद्रव्याच्चतुरवखण्डनमन्तरेण न चतुरवत्तं भवति, तत्र प्रधानद्रव्याच्चतुरवदातव्यम् । चतुरवत्तभूतमिह होतव्यं विवक्ष्यते, न इतस्ततो वा चतुरवदातव्यमिति । तस्मादुपांशुयाजेऽपि चतुरवत्तं कर्त्तव्यमिति ॥३४॥
सिद्धान्तः ॥ उपांशुयागेऽपि चतुरवत्तस्यावश्यकताधिकरणम् ॥१३॥

पुरोडाशाभ्यामित्यधिकृतानां पुरोडाशयोरुपदेशस्तच्छ्रुतित्वाद्धैश्यस्तोमवत् ॥३५॥

दर्शपूर्णमासयोरिदमाम्नायते । पुरोडाशाभ्यामेवासोमयाजिनं याजयेत, यावेताग्नेयश्चैन्द्राग्नश्चेति । तत्रैष संशयः । किमधिकारश्रुतिवाक्यशेषोऽयम् । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्याभ्यां पुरोडाशाभ्यामसोमयाजीति । अथ किमधिकयोः कर्मान्तरयोरुत्पत्तिः ? । अपराभ्यामेवञ्जातीयकाभ्यां पुरोडाशाभ्यां यजेतेति । अथ वा, अङ्गकर्त्तुरुपदेशः । आभ्यां पुरोडाशाभ्याम् ऋत्विग् याजयेदिति । अथ वा, असोमयागकाले आभ्यां यजेतेति कालोपदेशः । उतैन्द्राग्नस्य विधिः । आग्नेयस्य चानुवादः । अथ वोभयोरनुवाद इत्येते पक्षाः ॥

किं तावत् प्राप्तम् । अधिकारशेष इति । यदेतत् स्वर्गकामो यजेतेति । तस्य शेषः । आभ्यां पुरोडाशाभ्यामसोमयाजी स्वर्गकामो यजेतेति । कुतः । तच्छ्रुतित्वात् । तच्छ्रुतिमन्तौ हि पुरोडाशौ शब्देनानूद्येते । तेन नाभ्यधिकौ । असोमयाजिनश्च कर्त्तुर्व्यापार आभ्यां सम्बध्यते श्रुत्या, न कालः । स हि लक्ष्येत । श्रुतिश्च लक्षणाया गरीयसी । तत्र सोमयाजिनो वा न पुरोडाशौ, असोमयाजिनो वा न सान्नाय्यम् । यदि पुरोडाशावधिकृत्य असोमयाजी विधीयते, ततो नासोमयाजी सान्नाय्ये । तत्रैवकारः समर्थितो भवति । पुरोडाशाभ्यां केवलाभ्यामसोमयाजी,नसान्नाय्येनेति । अथासोमयाजिनमधिकृत्य पुरोडाशौ विधीयेते, तथा न सोमयाजिनः पुरोडाशौ ।

तत्रास्थाने एवशब्दो भवति । पुरोडाशाभ्यामसोमयाजिनमेवेति । यथा—

यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
यस्ते न द्रुह्येत् कतमच्चनाह तस्मै मां ब्रूया निधिपाय ब्रह्मन्, इति॥

यं शुचिमेव विद्या इति वदितव्ये यमेव विद्याः शुचिमिति । एवमत्रापि । तदुभयोरपि वचनव्यक्त्योरधिकारश्रुतिवाक्यशेष इत्युभयथाऽयं पूर्वपक्षो भवति । यथा वैश्यस्तोमेऽधिकारश्रुतिशेषः । वैश्यो वैश्यस्तोमेन यजेतेति । तद्वदत्राप्यधिकारश्रुतिशेष एवेति ॥३५॥पूर्व०॥

न त्वनित्याधिकारोऽस्ति विधौ नित्येन सम्बन्धस्तस्मादवाक्यशेषत्वम् ॥ ३६ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदेवम् । अधिकारवाक्यशेष इति । नित्यौ हि दर्शपूर्णमासौ । यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । नित्यौ च तत्रेमौ पुरोडाशौ फलं प्रति सहकारिणौ । तावनित्यमसोमयाजिनं प्रति विधीयेते इत्यनुपपन्नम् । कथम् । नित्यौ हि दर्शपूर्णमासयोर्भविष्यतः । यश्चासोमयाजी तस्योपकारिष्यत इति नोपपद्येत । पुरोडाशविधेर्नित्येन दर्शपूर्णमाससमुदायेन सम्बन्धः । तस्मान्नासोमयाजधिकारश्रुतिवाक्यशेषः । किं तर्हि । अग्निकयोः कर्मान्तरयोरुत्पत्तिरिति । नैवमभिसम्बन्धः क्रियते । यावतौ पुरोडाशौ दर्शपूर्णमासयोर्विहितौ, तौ प्रति असोमयाजी विधीयते इति । कथन्तर्हि । असोमयाजी यः स्वर्गकामः स आग्नेयं कुर्यादैन्द्राग्नञ्चेत्येते कर्मणी विधीयेते, विधीयेतेचेत् पूर्वाभ्यां कर्मान्तरे।तत्र यावतौ इत्यनुवादवचनं धर्मापेक्षं भविष्यति । यथा एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वेति । एवशब्दश्च पुनरित्यस्मिन्नर्थे भविष्यति यथा क्षीरेण भुक्त्वा देवदत्तः क्षीरेणैव भुञ्जीतेति । भुञ्जीतैवेति पुनरिति गम्यते। एवमिहापि सोमयाजिनश्चाऽसोमयाजिनश्च दर्शपूर्णमासविधानेन विहितौ पुरोडाशौ पुनरसोमयाजिनस्तौ विधीयेते । पुरोडाशाभ्यामेवासोमयाजिनं याजयेदिति । तद्धर्मकाभ्यामिति गम्यत ॥ ३६ ॥ पूर्व० ॥

सति च नैकदेशेन कर्त्तुः प्रधानभूतत्वात् ॥ ३७ ॥

सति च अधिकारशेषे पुरोडाशयोरसोमयाजिकर्तृसम्बन्धो

नोपपद्यते । अधिकारशेषे हि प्रधानभूतः कर्त्ता निर्दिश्यते । न चासति फले प्रधानभाव उपपद्यते । न च दर्शपूर्णमासैकदेशभूतौ पुरोडाशौ फलस्य साधकौ भवतः । न च वचनप्रामाण्यात् फलं कल्पयिष्यते । वचनव्यक्त्यन्तरस्य भावात् । तस्मादपि नास्त्यधिकारशेष इति ॥ ३७ ॥ युक्तिः ॥

कृत्स्नत्वात्तु तथा स्तोमे ॥ ३८ ॥

यदुपवर्णितं, वैश्यस्तोमवदिति । युक्तं वैश्यस्तोमे । कृत्स्नो वैश्यस्तोमो न कस्यचिदेकदेशः । तत्र फलं सम्भवति । न चात्र फलं सम्भवति । न चात्र किञ्चिदेकं नित्यमनित्येन सम्बद्ध्यते । तस्माद्वैषम्यं वैश्यस्तोमेन ॥ ३८ ॥ आ० नि० ॥

कर्त्तुः स्यादिति चेत् ॥ ३९ ॥

इति चेद् मन्यसे, नाधिकारश्रुतिशेषोऽवकल्पते इति । तत्रोच्यते । कर्मान्तरयोरुत्पत्तिर्नावकल्पते । यावेतौ इति व्यपेक्षावचनं लक्षणया कल्पेत । कथं तर्हीदमिति । अङ्गकर्त्तुरुपदेशः । अङ्गे यः कर्त्ता, न प्रधाने । याजयेदिति हेतुकर्त्तुरेवैतत् प्रत्यक्षं वचनं, लक्षणया यजेः कर्त्तुः । अपि च नित्यानित्ययोर्विरुद्धः सम्बन्धोऽभ्युपगतो न भविष्यति । न चैकदेशस्य फलं कल्पयिष्यते । असोमयाजी पुरोडाशाभ्यां याजयितव्य इति याजयितुरुपदेशोऽभ्युदयाय भविष्यति ॥ ३९ ॥ पूर्व० ॥

न गुणार्थत्वात् प्राप्ते च नोपदेशार्थः ॥ ४० ॥

नैतदेवम् । अङ्गकर्त्तुरुपदेश इति । अङ्गकर्त्ता हि प्रधानकर्त्तुरेव क्रियोपदेशेन गुणभूतः प्राप्नोति । न चास्य फलं श्रूयते । न च कल्पयितुं शक्यमुपग्रहविशेषात् । न च, प्राप्तस्य पुनरुपदेशे किञ्चिदस्ति प्रयोजनम् । अर्थप्राप्तस्य त्वनुवादः पुरोडाशयोर्यागं विधातुम् । न च परिसंख्या । त्रिदोषत्वात् । सोमयाजिनश्च विना अङ्गकर्त्रा, असम्भवात् । तस्मात् कर्मान्तरयोरुत्पत्तिरिति ॥४०॥ पूर्व० नि०

कर्मणोस्तु प्रकरणे तन्न्यायत्वाद् गुणानां लिङ्गेन कालशास्त्रं स्यात् ॥ ४१ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नाधिकयोः कर्मान्तरयोरुत्पत्तिरिति । एतयोः कर्मणोः प्रकरणे काल उच्यते । न असोमयाजिनं कर्त्तारं

प्रति पुरोडाशौ विधीयेयाताम् । कुतः । तन्न्यायत्वात् । स हि न्यायः, योऽस्मदुक्तः । अपि वा कालमात्रं स्याद् अदर्शनाद्विशेषस्य (४अ०४पा० ६ सू०) इति । इहापि स एव न्यायः । असोमयागकाले दर्शपूर्णमासयोरेतौ पुरोडाशौ भवत इति । किमेवं भविष्यति । फलकल्पनादोषो न भविष्यति । यदा समुदायेऽभ्यापरिष्यते तदा सर्वेषां संहतानां फलं भविष्यति । शक्यते चासोमयागेन विशेषलिङ्गेन कालो लक्षयितुम् । तस्मिन् काले पुरोडाशाभ्यामेव यजेत, न सान्नाय्येनेति ॥४१॥ पूर्व०॥

यदि तु सान्नाय्यं सोमयाजिनो न ताभ्यां समवायोऽस्ति विभक्तकालत्वात् ॥ ४२ ॥

तुशब्दः पक्षं व्यावर्त्तयति । यदि सान्नाय्यं सोमयाजिनः, न कालार्थं श्रवणं भवितुमर्हति । सान्नाय्यं च सोमयाजिन एव । अनाशङ्किते तस्मिन्नाशङ्कितवचनम् । यथा, शास्त्राणि चेत् प्रमाणं स्युर्गतास्ते परमाङ्गतिम् * इति ॥

एवं हि श्रूयते, नासोमयाजी सन्नयेदिति । एवं सति न कालार्थं श्रवणम् । कथम् । नैव ताभ्यां पुरोडाशाभ्यां सान्नाय्यस्य समवायः प्राप्तः । विभक्तकालत्वात् । प्राक् सोमयागात् पुरोडाशौ, ऊर्ध्वं सान्नाय्यं प्राप्तमेव । न तदर्थं यतितव्यम् । तस्माद् न कालार्थं विभक्तकालार्थं श्रवणं कर्मान्तरचोदनैवेति ॥ ४२ ॥ पूर्व० नि० ॥

अपि वा विहितत्वाद्गुणार्थायां पुनः श्रुतौ सन्देहे श्रुतिर्द्विदेवतार्था स्याद्यथानभिप्रेतस्तथाग्नेयो दर्शनादेकदेवते ॥ ४३ ॥

अपि वेति पक्षव्यावृत्तिः । नैतत् कर्मान्तरचोदनेति, अनुवादः आग्नेयस्य । विहितत्वात् । विहितो हि असावुभयत्र, यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीति । ऐन्द्राग्न्यस्य भवति विधिः । उभयत्राविहितत्वात् । स यत्र न प्राप्नोति । पौर्णमास्यामैन्द्राग्नविधानार्था एषा श्रुतिः । यथानभिप्रेतस्तथाग्नेय उच्चरितः । विधानं चोभयत्र । तस्य दर्शनं च, आग्नेयं चतुर्द्धा करोतीति । तथा साकंप्रस्थाय्ये आज्यभागाभ्यां प्रचर्य्य आग्नेयेन पुरोडाशेनेति ॥४३॥ पूर्व० ॥

विधिं तु बादरायणः ॥ ४४ ॥

तुशब्द एतमपि पक्षं व्यावर्त्तयति । नैतदेवम् । आग्नेयेऽनुवादः । ऐन्द्राग्ने विधिरिति । उभयोः कालविधिः स्यात् । कुतः । बादरायण आचार्य्यो मन्यते स्म । प्रागपि सोमयागात् सान्नाय्यविधिरिति । असोमयाजिनोऽपि सान्नाय्यं श्रूयते । तदु सं नयेदिति । तथा तथेह स्माहुर्गोपायनाः सान्नाय्यमेवासोमयाजिनः । तस्मात् कालार्थः संयोग इति ॥ ४४ ॥ पूर्व० नि० ॥

प्रतिषिद्धविज्ञानाद्वा ॥ ४५ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति, कालविधिरिति, नाप्यऽधिकयोः कर्मणोरुत्पत्तिः, न वा आग्नेयस्यानुवादः, ऐन्द्राग्नस्य विधिः । किन्तर्हि । उभयोरनुवादः । कथम् । सोमयाजिनः सान्नाय्यविधानार्थमेतद्वाक्यम् । अतो नैन्द्राग्नस्यापि विधिः । भिद्येत हि तदा वाक्यम् । एवमभिसम्बन्धः क्रियते । असोमयाजिनः पुरोडाशावेतौ यौ प्राप्तौ, सोमयाजिनः सान्नाय्यमपरमपीति । पुरोडाशाभ्यामेवासोमयाजिनं याजयेत् । यौ एतौ आग्नेयश्च ऐन्द्राग्नश्च, सान्नाय्येन सोमयाजिनमिति एवमेकेन वाक्येन सोमयाजिनः सान्नाय्यं विधीयते । अपरेणापि वाक्येनासोमयाजिनः । तस्मादुभयोरप्यनुवाद इति ॥ ४५ ॥ सि० ॥

तथा चान्यार्थदर्शनम् ॥ ४६ ॥

अन्यार्थोऽपि चैतमर्थं दर्शयति, न कर्मान्तरे इति । कथम् । चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायामिति । कर्मान्तरोत्पत्तावभ्यधिका आहुतयो भवेयुरिति ॥४६॥ युक्तिः ॥ दर्शपूर्णमासयोराग्नेयैन्द्राग्नयोरनुवादताधिकरणम् ॥ १४ ॥

उपांशुयाजमन्तरा यजतीति हविर्लिङ्गाश्रुतित्वाद् यथाकामी प्रतीयेत ॥ ४७ ॥

दर्शपूर्णमासयोराम्नायते, उपांशुयाजमन्तरा यजतीति । तत्र द्रव्यं प्रति सन्देहः । किम् अनियमः ? उत नियतं किञ्चिद् द्रव्यमिति । किं प्राप्तम् । न किञ्चिद् हवीरूपं श्रूयते । तस्माद् यथाकामी प्रतीयेत । तत्रोच्यते । श्रूयते हवीरूपम् । आज्यस्यैव नावुपांशु पौर्णमास्यां यजन्निति । तस्मादाज्यद्रव्यकं स्यात् । उच्यते । एवमप्यनिय-

मः । यत्किञ्चिदाज्यं गृहीत्वा इज्येतेति ॥ ४७ ॥ पूर्व० ॥

धौवाद्वा सर्वसंयोगात् ॥ ४८ ॥

धौवाद्वा आज्यादिज्येत, न यतः कुतश्चित् । कुतः । सर्वसंयोगात् । सर्वयजतिभिर्हि सम्बद्धं, सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यम् । तस्माद् धौवाज्याद् यजेतेति ॥ ४८ ॥ सिद्धान्तः ॥ उपांशुयाजस्य धौवाज्यद्रव्यताधिकरणम् ॥ १५ ॥

तद्वच्च देवतायां स्यात् ॥ ४९ ॥

देवतां प्रति उपांशुयाजस्य संशयः । किमनियमः, नियमः ? इति । किं प्राप्तम् । यद्वद् द्रव्यं प्रति अनियमः पूर्वाधिकरणपूर्वपक्षे, तद्वद् देवतायामनियमः । ननु अग्नीषोमौ विधीयेते । उच्यते । पुराकल्परूपोऽयं न विधिसरूपः।इमास्तर्हि विष्णुरुपांशु यष्टव्य इत्येवमादिना देवता विधीयन्ते । उच्यते । उक्तमजामिकरणवचनार्था एते अर्थवादा इति । तस्मादनियमः ॥ ४९ ॥ पूर्व० ॥

तान्द्रीणां प्रकरणात् ॥ ५० ॥

न हि देवतामन्तरेण यागो भवति । न च वचनमन्तरेण देवता । न चान्यस्य विहिता देवता अन्यस्यावकल्पते । तस्मात् प्रकृतानां तन्द्रभवानामन्यतमया देवतया प्रकृतत्वादेकवाक्यतां कृत्वा देवतामवगमिष्यामः। एकया च कृतार्थत्वाद् यां काञ्चिद् देवतामिति॥५०॥ सिद्धान्तः॥उपांशुयाजस्य प्रकृतदेवतानियमाधिकरणम् ॥ १६ ॥

धर्माद्वा स्यात् प्रजापतिः ॥ ५१ ॥

तान्द्रीणामन्यतमा देवतेत्युक्तम् । तत्र सन्देहः । किं तान्द्रीष्वऽनियमः, अथ वा प्रजापतिः, अथ वा अग्निः, अथ वा विष्णुः, अमावास्यायां चोपांशुयाजः । अथ वा पौर्णमास्यामुपांशुयाजः, विष्णुर्देवता । अथ वा उभयत्रोपांशुयाजः, देवताविकल्पश्चेति । अथ वा पौर्णमास्यामेव उपांशुयाजः, तत्रैव विष्ण्वाद्या देवताः ? इति पक्षाः । किं तावत् प्राप्तम् । प्रजापतिर्देवता । कुतः । धर्मात् । तस्य हि उपांशुत्वं धर्मः, तस्माद् यत्किञ्चित् प्राजापत्यं यज्ञे क्रियते, उपांश्वेव तत् क्रियते इति । उपांशुयाजनामकत्वाच्चास्य कर्मण इदमवगम्यते । नूनमस्य उपांशुत्वं धर्म इति । आत्मनि साधनेषु च न उच्चैस्त्वेन अस्य सम्बन्ध इति । तेन प्रजापतिरिति गम्यते । स हि अनुच्चैर्धर्मकः ।

न्यस्यां सत्यामुच्चैस्त्वेनास्य सम्बन्धो भवेदिति ॥ ५१ ॥ पूर्व० ॥

देवतायास्त्वनिर्वचनं तत्र शब्दस्येह मृदुत्वं तस्मादिहाधिकारेण ॥ ५२ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति, प्रजापतिर्देवतेति । ताद्धीणां मुख्योऽग्निर्देवता स्यात् । प्रजापतेः देवताया अनिर्वचनं धर्मस्तूष्णीम्भावः । प्रजापतिं मनसा यजेदिति।ननूपांशुत्वं प्रजापतेर्धर्मः। तस्माद् यत्किञ्चित् प्राजापत्यं क्रियते, उपांश्वेव तत् क्रियते इति । उच्यते । अनुवादसरूपत्वादर्थवाद एषः, प्रजापतिं मनसा यजेदित्यस्य विधेः । इह पुनरुपांशुयाजे तत्रशब्दस्य मृदुत्वम् । तस्मान्न प्रजापतिः, अधिकृतानां मुख्योऽग्निः स्यादिति ॥ ५२ ॥ पूर्व० ॥

विष्णुर्वा स्याद्धौत्राम्नानादमावास्याहविश्च स्याद् हौत्रस्य तत्र दर्शनात् ॥ ५३ ॥

वाशब्दात् पक्षो निवर्त्यते । नैतदेवम्, अग्निः स्यादिति । कथन्तर्हि । विष्णुर्देवता स्यात् । हौत्राम्नानात् । अमावास्यां प्रकृत्य वैष्णवं हौत्रमाम्नायते । इदं विष्णुर्विचक्रमे प्रतद्विष्णुः स्तुवते वीर्य्येणेति । तदेवमर्थवद् भवति । यदि विष्णुदेवत्य उपांशुयाजः । एवममावास्यायामाम्नानमर्थवद् भवति । यदि अमावास्यायामुपांशुयाजः । तस्मादमावास्यायामुपांशुयाजः स्यादिति ॥ ५३ ॥ पूर्व० ॥

अपि वा पौर्णमास्यां स्यात् प्रधानशब्दसंयोगाद् गुणत्वान्मन्त्रो यथाप्रधानं स्यात् ॥ ५४ ॥

यदुक्तं विष्णुर्देवतेति तद् गृह्यते, न त्वमावास्यायायामुपांशुयाज इति । विधायको हि तस्य शब्दः पौर्णमास्याम् । आज्यस्यैव नौ उपांशु पौर्णमास्यां यजन्निति । तं मन्त्राम्नानं न शक्नोति अमावास्यायामाक्रष्टुम् । उपांशुयाजे मन्त्रस्य विधानात् । यत्रोपांशुयाजस्तत्र मन्त्र इति गम्यते, न यत्र मन्त्रस्तत्रोपांशुयाज इति । उपांशुयाजस्य हि मन्त्रो विधीयते, न मन्त्रस्योपांशुयाजः ॥ ५४ ॥ पूर्व० ॥

आनन्तर्य्यञ्च सान्नाय्यस्य पुरोडाशेन दर्शयति अमावास्याविकारे ॥ ५५ ॥

इतश्च न अमावास्यायामुपांशुयाजः । अमावास्याविकारे हि

साकम्प्रस्थाय्ये सान्नाय्यस्यानन्तर्य्यं पुरोडाशेन दृश्यते। कथम्। आज्यभागाभ्यां प्रचर्याग्नेयेन च पुरोडाशेनाग्नीध्रे स्रुचौ प्रदाय सह-कुम्भीभिरभिक्रामन्नाह इत्याग्नेयादानन्तर्य्यं सान्नाय्यस्य दर्शयति, न उपांशुयाजस्य। तस्मान्नामावास्यायामुपांशुयाज इति॥ ५५॥ पूर्व० युक्तिः॥

अग्नीषोमविधानात्तु पौर्णमास्यामुभयत्र विधीयते॥ ५६॥

तुशब्दः पक्षं व्यावर्त्तयति। नैतदेवं, पौर्णमास्यामेवोपांशुयाज इति। उभयत्र स्यात्। देवताविकल्पश्च। कुतः। अविशेषेण हि उपांशुयाजः श्रूयते। उपांशुयाजमन्तरा यजतीति। यदेतद् आज्यस्यैव नौ उपांशु पौर्णमास्यां यजेरन्निति। देवताविधानमेतत् पौर्णमास्याम्। तस्मा-दग्नीषोमदेवत्यः पौर्णमास्यामुपांशुयाजः। मन्त्राम्नानाद् वैष्णवोऽमा-वास्यायामिति देवताविकल्पः स्यात्॥ ५६॥ पूर्व०॥

प्रतिषिध्यविधानाद् वा विष्णुः समानदेशः स्यात्॥ ५७॥

न चैतदस्ति, यदुक्तमुभयत्रोपांशुयाजो देवताविकल्पश्चेति। किं तर्हि। पौर्णमास्यामेवोपांशुयाजस्तत्रैव च विष्ण्वाद्या देवता इति। कुतः। प्रतिषिद्ध्य विधानात्। किमिदं प्रतिषिद्ध्य विधानादिति। अमावास्यां वर्जयित्वा पौर्णमास्यां विधानादिति। कथम्?। आज्यस्यैव नौ उपांशु पौर्णमास्यां यजन्निति प्रकृत्य, समाम्नायते, जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशुयाजमन्तरा यजतीति। पौर्णमास्यामिति गम्यते। तत्रैव चेदं वचनं विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशुयष्टव्योऽजामित्वायाग्नीषोमौ उपांशु यष्टव्यावजामित्वायेति। तत्र पौर्णमास्यामेवोपांशुयाजस्तत्रैव च विष्ण्वाद्या देवता इति॥ ५७॥ सि०॥

तथा चान्यार्थदर्शनम्॥ ५८॥

इतश्च नामावास्यायामुपांशुयाजः। कुतः। अन्यार्थोऽप्येतमर्थं दर्शयति। कथम्। चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशा-ऽमावास्यायामिति चतुर्दश भवेयुः। त्रयोदशेति नोपपद्यते। तस्मा-न्नामावास्यायामुपांशुयाज इति॥ ५८॥ युक्तिः॥

न चानङ्गं सकृच्छ्रुतावुभयत्र विधीयेतासम्बन्धात् ॥५९॥

इतश्च नामावास्यायाम् । न हि सकृच्छ्रूयमाणमनङ्गमुभयत्र भवति । अङ्गं हि प्रधानार्थत्वादुभयत्र स्यात् । प्रधानश्चेदं, नाङ्गम् । तस्मात् पौर्णमास्यां श्रूयमाणं नामावास्यायां भवेत् । असम्बन्धात् । न हि प्रधानं प्रधानेन सम्बन्धं यातीति ॥ ५९ ॥ युक्तिः ॥

गुणानां च परार्थत्वात् प्रकृतौ विधिलिङ्गानि दर्शयति ॥ ६० ॥

गुणानां च परार्थत्वात् प्रधानेषु प्रवृत्तौ विधिलिङ्गानि दर्शयति । न प्रधानानामपरार्थत्वात् । कथम् । अग्नीषोमन्तावाज्यभागौ यजतीत्येकादश प्रयाजान् यजत्येकादशानुयाजानिति । तस्मादपि उपांशुयाजो नामावास्यामिति ॥ ६० ॥ युक्तिः ॥

विकारे चाश्रुतित्वात् ॥ ६१ ॥

अमावास्याविकारे च साकं प्रस्थाय्ये उपांशुयाजो न श्रूयते । कथम् । आज्यभागाभ्यां प्रचर्याग्नेयेन च पुरोडाशेनाग्नीधे स्रुचौ प्रदाय सहकुम्भीभिरभिक्रामन्नाहेति आग्नेयादनन्तरं सान्नाय्यं दर्शयति, नोपांशुयाजम् । तस्मादपि नामावास्यायामुपांशुयाज इति ॥ ॥६१॥ युक्तिः ॥ उपांशुयाजस्य विष्ण्वादिदेवताकत्वपौर्णमासीकर्तव्यत्वयोरधिकरणम् ॥ १७ ॥

द्विपुरोडाशायां स्यादन्तरार्थत्वात् ॥ ६२ ॥

दर्शपूर्णमासयोरिदमामनन्ति । उपांशुयाजमन्तरा यजतीति । तत्रायमर्थः समधिगतः । पौर्णमास्यामुपांशुयाजः । तत्र च विष्ण्वाद्या देवता इति । अस्ति चोर्ध्वं सोमाद् द्विपुरोडाशा पौर्णमासी । प्राक् सोमाद् एकपुरोडाशा । तत्रायमर्थः सांशयिकः । किं द्विपुरोडाशायामेवोपांशुयाजः ? उत द्विपुरोडाशायामेकपुरोडाशायाञ्चेति । किं प्राप्तम् । द्विपुरोडाशायां स्यात् । कुतः । अन्तरार्थत्वात् । अन्तरासंयोगेन हि श्रूयते । उपांशुयाजमन्तरा यजतीति प्राक् पुरोडाशसङ्कीर्त्तनात्, पुरोडाशौ अन्तरेति गम्यते। द्विपुरोडाशायामन्तरा शक्यं कर्त्तुं, नैकपुरोडाशायाम् । तत्र क्रियमाणमयथाश्रुतं स्यात् । तस्माद् द्विपुरोडाशायामेवेति ॥ ६२ ॥ पूर्व० ॥

अजामिकरणार्थत्वाच्च ॥ ६३ ॥

इतश्च द्विपुरोडाशायामेवेति । कुतः । अजामिकरणार्थत्वमत्र श्रूयते। जामि वा एतद् यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति । विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वाय अग्नीषोमावुपांशु यष्टव्यावजामित्वायेति । जामि सादृश्यमिति । पुरोडाशयोश्च सादृश्यदोष उच्यते । जामि वा एतद् यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ पुरोडाशं कृत्वा पुनरनूचीनः पुरोडाश एवेति । यत्र दोषस्तत्र दोषविघातार्थेन भवितव्यम्। तस्मात् द्विपुरोडाशायामेवेति ॥ ६३ ॥ युक्तिः ॥

तदर्थमिति चेन्न तत्प्रधानत्वात् ॥ ६४ ॥

इति चेत् पश्यसि, तदर्थत्वादन्तरार्थत्वाद् द्विपुरोडाशायामेव भविष्यतीति । तन्न । तत्प्रधानत्वात् । पौर्णमासी प्रधानतः, अन्तराऽर्थो गुणतः । उपांशुयाजः पौर्णमासस्यावयवो विधीयते । उपांशुयाजस्याप्यन्तरालं गुणः । एकपुरोडाशाऽपि भवत्येव पौर्णमासी । तस्यामुपांशुयाजः केन न स्यात् । अन्तरालं गुणोऽसम्भवान्न भविष्यतीति । तस्मादसति अन्तराले एकपुरोडाशायामुपांशुयाजः कर्त्तव्य इति ॥ ६४ ॥ आ० ॥

अशिष्टेन च सम्बन्धात् ॥ ६५ ॥

अशिष्टेन चाश्रुतेनान्तरालार्थेन उपांशुयाजस्य सम्बन्धः कर्त्तव्यः स्यात् । अन्तरालगुणक उपांशुयाज इति । न हि अन्तरालं गुणत्वेन विधीयमानं पश्यामः । तस्माद् एकपुरोडाशायामपि उपांशुयाजः कर्त्तव्य इति ॥ ६५ ॥ युक्तिः ॥

उत्पत्तेस्तु निवेशः स्याद्गुणस्यानुपरोधेनार्थस्य विद्यमानत्वाद् विधानादन्तरार्थस्य नैमित्तिकत्वात् तदभावेऽश्रुतौ स्यात् ॥ ६६ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति । गुणत्वेनान्तरालं न श्रूयते इति । उत्पत्तिवाक्येनैवोपांशुयाजोऽन्तराले निविशते। अन्तरालमस्य गुण उत्पत्तिवाक्येन श्रूयते । उपांशुयाजमन्तरा यजतीति । तस्मादस्य गुणस्यानुपरोधेन गुणी निविशेत, नैकपुरोडाशायां

स्यात् । नैकपुरोडाशायामक्रियमाणोऽनर्थको भवति । अन्तरालार्थो हि द्विपुरोडाशायां विद्यते । तदभावे अन्तरालार्थस्याऽभावे, अश्रुतौ यदि द्विपुरोडाशा न श्रूयेत । ततः स्यादेकपुरोडाशायामुपांशुयाजः । अस्ति त्ववकाशो द्विपुरोडाशा पौर्णमासी । तस्माद् एकपुरोडाशायां न स्यादिति ॥ ६६ ॥ आ० नि० ॥

उभयोस्तु विधानात् ॥ ६७ ॥

तुशब्दः पक्षं व्यावर्त्तयति । उभयोः पौर्णमास्योरुपांशुयाजः । एकपुरोडाशायामपि स्यादित्यर्थः । कुतः । विधानात् । विधीयते हि स एकपुरोडाशायामपि । साऽपि हि पौर्णमासी । आज्यस्यैव ना उपांशु पौर्णमास्यां यजान्निति पौर्णमासीशब्द एकपुरोडाशां वर्जयन्नुपरुद्ध्येत । तस्माद् एकपुरोडायामपि स्यात् ॥ ६७ ॥ सि० ॥

गुणानाञ्च परार्थत्वादुपवेषवद्यदेति स्यात् ॥६८॥

गुणश्चान्तरालं प्रधानार्थं श्रूयते उपांशुयाजार्थेन । अन्तरालेन उपांशुयाजस्योपकर्त्तव्यमिति । नासौ एकपुरोडाशायामुपांशुयाजं निवर्त्तयितुमर्हति । पौर्णमास्यां श्रूयमाण उपांशुयाज एकपुरोडाशाया अपि पौर्णमासीत्वात्तत्र प्राप्नोति । अन्तराले च श्रुतत्वादन्तरालेऽपि प्राप्नोति । एकपुरोडाशायामन्तरालाभावान्नान्तराले स्यात् । तस्मादन्तरालस्य गुणस्य शास्त्रं यदा पौर्णमासी तदेति स्यात् । उपवेषवत् । यथा उपवेषेण कपालान्युपदधातीति यदोपवेषस्तदा तेनेति गम्यते । एवमिहापि यदाऽन्तरालं, तदा अन्तराले भविष्यति । तस्माद् एकपुरोडाशायामपि स्यादिति ॥ ६८ ॥ युक्तिः ॥

अनपायश्च कालस्य लक्षणं हि पुरोडाशौ ॥ ६९ ॥

उच्यते । नन्वन्तरालगुणक उपांशुयाजः श्रूयमाणोऽन्तरालाभावादुच्यमानोऽपि पौर्णमास्यामेकपुरोडाशायां वैगुण्यात् फलस्याऽसाधक इति न क्रियेत । न हि पौर्णमासीविशेषे यत्रान्तरालमिति अन्तरालगुणता विधीयते । अविशेषेण हि द्विपुरोडाशायामेकपुरोडाशायां च तद्विधानम् । तस्माद् एकपुरोडाशायां प्रयोजनाभावान्न करिष्यते इति । आह । एवं सत्युपांशुयाजाभावादेकपुरोडाशा नैव कर्त्तव्या । अत्रोच्यते । नैष दोषः । फलवती हि सा भविष्यति, यदि द्विपुरोडाशा सम्भविष्यतीति । अत्रोच्यते । यद्येकपुरोडा-

शायां, वैगुण्यमुपांशुयाजस्य स्यात्, ततो न क्रियेत । न तु वैगुण्यमस्ति । न ह्यन्तरालं गुणतः श्रूयते । किन्तर्हि । कालं लक्षयितुं, यौ पुरोडाशौ तयोर्मध्ये इति । कथम् । अनूद्य हि तौ पुरोडाशौ एतद्विधीयते । जामि वा एतद्यज्ञस्य क्रियते, यदन्वञ्चौ पुरोडाशौ उपांशुयाजमन्तरा यजतीति । यौ तावनूदितौ यथा व्यवहितौ भवतः, तथोपांशुयाजः कर्त्तव्यः । तस्मिन् काल इति गम्यते । अनपायश्च तस्य कालस्यैकपुरोडाशायामपि । कथम् । यो हि द्वयोः पुरोडाशयोर्मध्य इति कालोऽवगम्यते, स एव पूर्वस्मादुत्तर इति । एवं चेद् यद्यप्येकपुरोडाशायां द्वौ पुरोडाशौ न स्तः । तथापि स पूर्व आग्नेयोऽस्ति । तस्मादुत्तरः स एव कालः । योऽसावन्तरालेन लक्षितः । यथा, नागवेलायामागन्तव्यं, शङ्खवेलायामागन्तव्यं, पटहवेलायामागन्तव्यमिति । यस्मिन् ग्रामे न नागाः, न शङ्खा, न पटहस्तस्मिन्नपि स एव कालः । तत्र हि आगमनं क्रियते । एवमिहापि द्रष्टव्यम् । तस्माद् एकपुरोडाशायामुपांशुयाजः कर्त्तव्य इति ॥६९॥आ०नि०

प्रशंसार्थमजामित्वम् ॥ ७० ॥

अथ यदुक्तम्, अजामिकरणार्थत्वादिति । तत् परिहर्त्तव्यम् । अत्रोच्यते । प्रशंसा एषा उपांशुयाजस्य वैचित्र्येण, न त्वेतदेवात्र फलं विधीयते, यदजामित्वमिति । कुतः । विहितस्य हि प्रयोजनं विधीयते । न चैवं सति उपांशुयाजो विहितः स्याद् । विधाने चार्थद्वयविधानं दोषः । न च अजामिकरणं नाम किञ्चिदिष्टं फलम् । तस्मात् प्रशंसैषा । यथोपस्तरणाभिघारणयोरमृतार्थत्वम् । अमृतं वा आज्यं मर्त्यं हविर्यदुपास्तृणात्यभिघारयत्यमृतान्हुतिमेवैनां करोतीति । तस्माद् एकपुरोडाशायामप्युपांशुयाजः कर्त्तव्य एवेति॥७०॥ आ० नि० ॥ एकपुरोडाशायामप्युपांशुयाजाधिकरणम् ॥ १८ ॥

इति श्रीमच्छबरस्वामिकृतौ मीमांसाभाष्ये दशमस्याध्यायस्याष्टमः पादः समाप्तः ॥ १० ॥ ८ ॥

अथ मीमांसा दर्शने

एकादशे अध्याये प्रथमः पादः ॥ ११ ॥ १ ॥

प्रयोजनाभिसम्बन्धात् पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात् ॥ १ ॥

दशमेऽध्याये बाधाभ्युच्चयलक्षणं वृत्तम् । इदानीमेकादशे तन्त्राऽऽवापलक्षणं निर्वर्त्तयिष्यामः । तत्र यत्सकृत्कृतं बहूनामुपकरोति तत् तन्त्रमित्युच्यते । यथा, बहूनां ब्राह्मणानां मध्ये कृतः प्रदीपः । यस्तु आवृत्त्या उपकरोति स आवापः । यथा तेषामेव ब्राह्मणानामनुलेपनम् । श्लोकमुदाहरन्ति–

साधारणं भवेत्तन्त्रं परार्थे त्वप्रयोजकः ।
एवमेव प्रसङ्गः स्याद्विद्यमाने स्वके विधौ, इति ॥

साधारणं भवेत्तन्त्रमित्युक्तार्थम् । परार्थे त्वप्रयोजक इति । यः परार्थमुत्पन्नस्तदर्थमेव चानुष्ठीयमानः परस्योपकरोति, स परः तस्याप्रयोजकः।यथा, पश्वालम्भो यागार्थमुत्पन्नस्तदर्थमेव चानुष्ठीयमानो लोहितसकृत्कर्मणोरप्युपकरोतीति । एवमेव प्रसङ्गः स्यात् । अयं तु विशेषः।विद्यमाने स्वके विधौ इति।यद्यप्यस्य अन्यो विधिर्विद्यते परविधिना तु कृतार्थत्वान्न क्रियते । यथा, प्रयाजाः पशोरपि चोदकेन प्राप्ताः पशुपुरोडाशस्यापि । पश्वर्था एव तु कृताः पशुपुरोडाशस्य उपकुर्वन्तीति न पुनस्तदर्थं क्रियन्ते ।

प्रकृतमिदानीमुच्यते । तन्त्रावापलक्षणं प्रतिज्ञातम् । तदुच्यते । दर्शपूर्णमासयोः प्रधानानि आग्नेयादीनि । तेषां स्वर्गः फलं श्रूयते । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । स किं तेषां तन्त्रेण भवति, उत भेदेनेति । एवं चातुर्मास्यादिष्वपि द्रष्टव्यम् ॥

ननु च नैवात्र स्वर्गः फलं श्रूयते । स्वर्गकामपदेन तावत् पुरुषोऽभिधीयते । यजेतेत्यनेनापि यागनिर्वृत्तिः । तयोर्वाक्येन सम्बन्धः । केनेदानीं फलमुच्यते । अनेनैव स्वर्गकामपदेनेत्याह । ननु पुरुषस्याऽयं वक्ता । न खलु कश्चित् पुरुषः स्वर्गकामो नामास्ति । ननु च यस्य स्वर्गे कामः स स्वर्गकाम इति । एतदेव न जानीमः कस्य स्वर्गे

काम इति। य एव हि स्वर्गकामः स एवास्वर्गकामो भवतीति। एवं तर्हि कालोपदेशोऽयं भवति। यदा स्वर्गकामस्तदा यजेतेति। अत्रापि न कश्चित्, कालविशेषोऽस्ति, यस्मिन्नियमेन स्वर्गकामः स्यात्। सर्वेषु कालेषु सर्वे कामा अनियमेनोत्पद्यन्ते। तत्र न कश्चित् कालविशेषोऽनेन शक्यते व्यपदेष्टुम्। एवं तर्हि नैवायं पुरुषोपदेशो नापि कालोपदेशः। किं खलु, फलकामो निमित्तम्। स्वर्गविषये कामे उत्पन्ने यजेतेति। यथा कपाले नष्टे यजेतेति। अस्य पक्षस्य सूत्रेणैव परिहार उक्तः। फलकामो निमित्तमिति चेत् (६ अ० २पा० ९ सू०)। न नित्यत्वात् (६।२।१०) इति। नित्यानि अग्निहोत्रादीनि कर्माणि। तानि यदि निमित्ते विधीयन्ते, नित्यत्वमेषां विहन्येत। तत्र नित्यचोदना यावज्जीविकाद्या अपरुद्ध्यन्ते। लिङ्गानि च, अप वा एष स्वर्गाल्लोकाच्च्यवते यो दर्शपूर्णमासयाजी सन् पौर्णमासीममावास्यां वाऽतिपातयेदित्येवमादीनि॥

परिशेषात् फलसंयोग एवायम्। कथं पुनरनेन शक्यते फलं विधातुम्। तदुच्यते। स्वर्गकामो यजेतेति, यदि वा स्वर्गकामो यागायोपदिश्यते यथा लोहितोष्णीषाः। यदि वा यागः स्वर्गकामाय, यथा मलिनः स्नायात्, बुभुक्षितोऽश्नीयादिति। तत्र यदि स्वर्गकामः कर्मणे उपदिश्यते, उपदिष्टोऽपि न प्रवर्त्तेत। को हि परार्थे प्रयासमातिष्ठेत्। तथा कर्मचोदनाऽनर्थिकैव भवति। अथ यागः स्वर्गकामार्थः, ततोऽसौ पुरुषस्योपकरोति। तं पुरुषः स्वार्थेन करोतीति। तथा कर्मचोदना अर्थवती भवति। अपि च यागविधौ श्रुत्यर्थः परिगृहीतो भविष्यति, स्वर्गकामविधौ वाक्यार्थः। तस्माद्यागः स्वर्गकामस्योपकारकः। स्वर्गकामस्यानेकपुत्रपशुग्रामान्नाद्यादिलाभकरः। स यदि पुत्रान्नाद्यादीनामन्यतमं करोति, ततः स्वर्गकामशब्दोऽविवक्षितार्थः पुरुषमात्रवचनो भवति। तथा चानर्थक्यमेव। अन्तरेणापि हि तद्वचनं पुरुषमात्रमाख्यातादेव गम्यते। तस्माद् यागात् स्वर्गो भवति॥

तत्रानेककर्मसन्निपाते दर्शपूर्णमासादिषु भवति संशयः। किं तन्त्रमेषां फलम्? उत, भेदेनेति। किं प्राप्तम्। भेदेनेति। किं कारणम्। इमानि आग्नेयादीनि प्रधानानि परस्परानपेक्षाभिश्चोदनाभिः पृथग्भूतानि उत्पन्नानि पृथगेव फलमाकाङ्क्षन्ति। तत्सन्निधौ स्वर्गा-

दि फलं श्रूयमाणं भेदेनाकाङ्क्षितत्वाद् भेदेनैव सम्बद्ध्यते । तस्मात् प्रतिप्रधानं फलभेद इत्येवं प्राप्तम् ॥

एवं प्राप्ते, इदमारभ्यते । प्रयोजनाभिसम्बन्धात् पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात् । पृथग्भूतानामप्येतेषामाग्नेयादीनां ततः स्यादैककर्म्यम् । कुतः । प्रयोजनाभिसंयोगात् । प्रयोजनं फलम् । तत् प्रति एषां समेतानां सम्बन्धात् संयोगादित्यर्थः । ऐककर्म्यमिति । कर्मशब्देनात्र फलमुच्यते । क्रियते इति तद् येषामेकं, तानि एककर्माणि । तेषां भाव ऐककर्म्यम् । एकफलमित्यर्थः । कथं पुनर्ज्ञायते, समेतानामाग्नेयादीनां फलेन योग इति।एकशब्दाभिसंयोगात् । य एषां समुदितानामेकः शब्दो वाचकः, तेन एतानि अभिधाय फलसम्बन्धः कृतः, दर्शपूर्णमासाभ्यां स्वर्गकाम इति । अतः समुदितेभ्यः फलं गम्यते । न भेदेन । यथा ग्रामेणोदपानः खेयः, ग्रामेण तडागः खेय इति, ग्रामशब्देन समुदायवचनेन संयुज्य कूपो विधीयमानः समुदितैः पुरुषैरेकः खन्यते । न प्रतिपुरुषं कूपभेदः । एवमिहापि ॥ १ ॥

शेषवद्वा प्रयोजनं प्रतिकर्म विभज्येत ॥ २ ॥

नायमेकान्तः, यत् समुदायशब्देन संयोज्योच्यते तत् समुदितानामेव भवतीति । भेदेनापि किञ्चिद्भवति । यथा, गणाय स्नानं, गणायानुलेपनमिति अनुलेपनादिशेषो गणशब्देन समुदायवचनेनाऽपि संयोज्योक्तो, न समुदायेन सम्बद्ध्यते। केन तर्हि । समुदायिभिः। प्रतिपुरुषं हि स्नानादि आवर्त्तते । अतः शेषवद्वा फलं भिद्येत, कूपवद्वा तन्त्रं स्यादिति अवैशेषिकोऽयं हेतुः समुदायशब्दसंयोगः । तस्माद् हेत्वन्तरं वक्तव्यम् । अत्रैष विशेष इति ॥ २ ॥

सोऽयमुच्यते-

अविधानात्तु नैवं स्यात् ॥ ३ ॥

नात्र यागमुद्दिश्य फलं विधीयते, स्वर्गेण यागं कुर्य्यादिति । किन्तर्हि । फलमुद्दिश्य यागो विधीयते । स्वर्गं यागेन कुर्याद् इति । किं कारणम् । यात्र विधायिका विभक्तिः यजेतेति, सा यागं श्रुत्या विदधाति, फलं वाक्येन विदध्यात् । न च श्रुत्यर्थे सम्भवति वाक्यार्थो ग्राह्यः । श्रुत्यर्थस्य मुख्यत्वात् । किं पुनः स्याद् यदि फले विधीय-

माने यजत्यर्थोऽनूद्येत । न हि द्वयोर्विधीयमानयोः सम्बन्धोऽस्ति। अनुवादश्च सन्निहितानामाग्नेयादीनां स्यात् । तानि च परस्परानपेक्षाणि मिथो विभक्तानि उत्पन्नानीति विभागेनैवैतैः फलं सम्बद्ध्यते। अथ पुनर्यजत्यर्थे विधीयमाने आग्नेयादयो यागाः शब्देन समुदायवचनेन फलनिर्वृत्तावुपादेयत्वेन चोद्यन्ते । चोदितानां समुदितत्वं गुणः सन्निधानविशेषाद् यो गम्यते स विवक्षितो भवति। अविवक्षायां कारणाभावात् ॥

यदि यागा विधीयन्ते, दर्शपूर्णमासशब्देन विशेष्टुं न शक्यन्ते। न हि विधीयमानस्य विशेषणं भवति।यत्कारणं विशेषणमप्यविधीयमानं न भवति । न च द्वयोर्विधीयमानयोः परस्परसम्बन्धो भवति। किं पुनरत्र विशेषणेन कार्य्यम् ? यावता रूपवतामाग्नेयादीनां सन्निधौ अरूपो दर्शपूर्णमासाभ्यां यजेतेति यजतिशब्दः समुदायवचन इति। किमर्थं तर्हि दर्शपूर्णमासशब्दः । अनर्थकश्च नित्यानुवादमात्रम्। यथा, इन्द्रेण देवेन वृष्टम्, इडान्ताऽऽतिथ्या सन्तिष्ठते, नानुयाजान् यजतीति। अथ वा, वाक्यार्थस्यैवात्र विधानं न्याय्यम्। श्रुत्यर्थे हि विधीयमाने दर्शपूर्णमासशब्दोऽनर्थक एवापद्यते। वाक्यार्थे तु दर्शपूर्णमासशब्दो विशेषणेनार्थवान्। यजतिरपि भावनाविधानार्थं प्राप्तोऽपि पुनः श्रूयते। प्राप्तिश्च दर्शपूर्णमासशब्दस्य यागवचनत्वादिति न किञ्चिदनर्थकम्। तस्मादेष पक्षो ज्यायान् ॥३॥ सि०

शेषस्य हि परार्थत्वाद्विधानात् प्रतिप्रधानभावः स्यात् ॥ ४ ॥

यत्तु शेषवदिति, शेषस्य अनुलेपनादेः परार्थेन विधानं पुरुषसंस्कारकत्वेन। एवं दृष्टोऽर्थो भवति । अन्यथा अदृष्टं कल्पयितव्यं स्यात्। तत्र गणः पुरुषलक्षणार्थो भवति । शक्नोति च सम्बन्धात् पुरुषाँल्लक्षयितुम् । अदृष्टं वा कल्प्यतां, लक्षणा वेति। दृष्टा लक्षणा कल्पयितुं न्याय्या। तस्मात् पुरुषलक्षणार्थो गणः । न च लक्षणं कार्येण सम्बद्ध्यते। किन्तर्हि। लक्षितः । तद्यथा शुक्लवाससमानयेति। यदा तु शुक्ले वाससी पुरुषलक्षणार्थमुच्येते, न तदा आनयनेन सम्बद्ध्येते इति। एवमिहापि न गणः कार्येण सम्बद्ध्यते,किन्तु पुरुषा एव कार्येण सम्बद्ध्यन्ते । तस्मादनुलेपनादि प्रतिप्रधानं भिद्यते

॥ ४ ॥ आ० नि० ॥ आग्नेयादीनां समुदितानां तन्त्रेण स्वर्गफलकत्वाऽधिकरणम् ॥ १ ॥

अङ्गेष्विदानीं चिन्ता। किमङ्गानि सम्भूय कार्यं कुर्वन्ति ? उत भेदेनेति। तत्रेदमुच्यते—

अङ्गानान्तु शब्दभेदात् क्रतुवत् फलान्यत्वम् ॥ ५ ॥

यथा प्रधानानां समेतानामेकं फलं, नैवमङ्गानाम्। अङ्गानां पृथक् प्रयोजनम्। अङ्गस्याङ्गस्य पृथक् फलम्। किं कारणम्। शब्दभेदात्। चोदनाभेदादित्यर्थः। समिधो यजति, तनूनपातं यजति, इत्येवमादिभिः परस्परानपेक्षाभिश्चोदनाभिः पृथक्त्वेनाङ्गानि चोद्यन्ते। तानि पृथगेव प्रयोजनानिआकाङ्क्षन्ति,न साहित्येन। साहित्यस्यानुक्तत्वात्। अतस्तेषां पृथगेव प्रयोजनैरभिसम्बन्धो विज्ञायते। क्रतुवत्। यथा क्रतुषु पृथक्त्वेन चोदितेषु पृथगेव फलसम्बन्धो भवति ॥ ५॥ पूर्व०

अर्थभेदस्तु तत्रार्थेह्यैकार्थ्यादैककर्म्यम् ॥ ६ ॥

युक्तं, यत् क्रतुषु फलभेदः। शब्देन तत्र भिन्नानि फलानि उक्तानि। सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः, ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इति। इह ऐकार्थ्ये, सर्वेषामङ्गानामेकोऽर्थः प्रधानेषु उपकारः। उपकारापेक्षायां हि अङ्गानि श्रूयन्ते। तानि सर्वाणि एकाऽर्थानि भवन्ति। नन्वेवं सति एकार्थत्वादेषां विकल्पः प्राप्नोति। वक्ष्यते तत्परिहारः, विधेस्त्वेकश्रुतित्वाद् (१७ सू०) इत्यत्र यथा विकल्पो न भवति। अत ऐकार्थ्यादङ्गानामेकं कार्यमिति ॥६॥ सि० ॥

शब्दभेदान्नेति चेत् ॥ ७ ॥

अथ यदुक्तं,चोदनाभेदादङ्गानामर्थभेदोन्याय्यइति।तत्परिह्रियते। सर्वाणि च प्रधानस्योपकुर्युः भिन्नानि च कार्याणि कुर्युः।तद्यथा कारकाणि कर्त्रादीनि सर्वाणि तावत् क्रियाया उपकुर्वन्ति, अथ च प्रतिकारकं कार्यभेदः, इदं तर्हि परिह्रियते।यदि समिदादिभिर्वाक्यैरङ्गानां प्रयोग उच्यते। समिद्यजिः प्रयोक्तव्यः, तनूनपाद्यजिः प्रयोक्तव्य इति। ततः स्यात् प्रयोजनाकाङ्क्षा। सा च भवन्ती भेदेन स्यात्। न त्वत्र प्रयोग उच्यते।किन्तर्हि।रूपमात्रमाख्यायते। एवँल्लक्षणको याग इह भवतीति। तत् कस्य हेतोः। प्रयोगवचनस्य प्रत्ययस्याभावात्। अन्येन च प्रयोगस्योक्तत्वात्। क्व पुनरेषां प्रयोग उक्तः। उत्तरसूत्रे दर्शयिष्या-

मः। न चेदत्र प्रयोजनाकाङ्क्षा, कुतः प्रयोजनं, कुतो भेदः॥७॥आ०॥

कर्मार्थत्वात् प्रयोगे ताच्छब्द्यं स्यात्तदर्थत्वात्॥८॥

प्रधानानां प्रयोगे उच्यमाने अङ्गानामपि ताच्छब्द्यं स्यात् प्रयोगस्य। तेनैव प्रधानप्रयोगवचनेनैव शब्देन अङ्गानामपि प्रयोग उच्यते। दर्शपूर्णमासाभ्यां यजेतेति। कुतः। कर्मार्थत्वाद्। क्रियार्थत्वादित्यर्थः। फलस्य क्रियार्थौ दर्शपूर्णमासौ श्रूयेते, दर्शपूर्णमासाभ्यां स्वर्गं कुर्यादिति। तत्र आकाङ्क्षा भवति। कथमिति। सा समिदादिभिश्चोदनाभिर्निवर्त्यते। समिधो यजति, तनूनपातं यजतीत्येवमिति। तत् कस्य हेतोः। तदर्थत्वात्। तदर्था एताः समिदादिचोदनाः। तेनाकाङ्क्षितत्वात्, अफलत्वात्, फलवत्सन्निधानाच्च। सैषा दर्शपूर्णमासयोः फलं साधयतोरितिकर्त्तव्यता। न चेतिकर्त्तव्यतामन्तरेण कर्मचोदना अर्थवती भवति। तस्मात् सेतिकर्त्तव्यताकः कर्मणः प्रयोगश्चोद्यते। तथा च सिद्धमेतत् प्रधानप्रयोगवचनेनैव शब्देनाङ्गानां प्रयोगश्चोद्यत इति। एवं च सति एकशब्दचोदितान्येवाङ्गानि। तत्र यथा प्रधानानामेकसङ्ख्याभिसंयोगात् फलैक्यमेवमङ्गानामपीति॥८॥ आ० नि०॥

अत्राह। नैतद्युक्तम्। कुतः।

कर्तृविधेर्नानार्थत्वाद् गुणप्रधानेषु॥९॥

कर्त्तुर्यश्च प्रधाने विधिः दर्शपूर्णमासाभ्यां यजेतेति। यश्चाङ्गेषु साङ्गाभ्यामिति, तयोर्नानार्थत्वम्। प्रधानविधिः फलार्थः। अङ्गविधिः प्रधानार्थः। तत्र प्रधानानि फलं प्रति विधातव्यानि, अङ्गानि प्रति अनूद्यानि। न च विध्यनुवादौ युगपत् सम्भवतः। तस्माद् नैकेन वाक्येन प्रधानानि। तेषाञ्चेतिकर्त्तव्यता शक्या विधातुम्। अतो न प्रधानचोदनागृहीतानि अङ्गानि॥९॥ आ०॥

तत्राह। नैतदयुक्तम्। युक्तमेतत्। कुतः।

आरम्भस्य शब्दपूर्वत्वात्॥१०॥

आरम्भो व्यापारः क्रियेत्यनर्थान्तरम्। यागेनेह स्वर्गस्य क्रिया उच्यते। यजेत यागेन स्वर्गं कुर्यात्। स्वर्गार्थं व्याप्रियेतेत्यर्थः। इदं तु न ज्ञायते, कोऽसौ व्यापारः? इति। तत्सन्निधौ चाग्न्यन्वाधानादि श्रूयते। तस्मिन् आकाङ्क्षितत्वात् सन्निधानाच्चैतद्भवति।

अयमस्मिन् व्यापारः । येन यागः स्वर्गं करोतीति । तस्मिन् विधीयमाने नास्ति वाक्यभेदः ॥

अथ वा प्रधानानां फलं प्रति, अङ्गानाञ्च प्रधानानि प्रति विधिः अविरुद्धः । कथं कृत्वा । दर्शपूर्णमासाभ्यां स्वर्गसाधनमपूर्वमुच्यते । तस्य सविशेषस्य वचनं प्रयुज्यते। यथा, एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो यजेतेति । तस्मात् प्रधानप्रयोगवचनेनैवाङ्गानां प्रयोगो विधीयत इति ॥१०॥ आ० नि० ॥ अङ्गानामेककार्याधिकरणम् ॥ २ ॥

इदं विचार्य्यते । किमग्निहोत्रादीनां कर्मणामेकदेशाङ्गयुक्तानामपि प्रयोगः ? अथ वा सर्वाङ्गोपसंहारेणैवेति । अथ तत्र किं वृत्तम् ? । सर्वशक्तौ प्रवृत्तिः स्यात् (६ अ० ३ पा० १ सू०) इति । तत्र नैयमिकमारम्भं प्रति चिन्ता कृता, यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्यनया चोदनया, योऽयं यावज्जीविकः प्रयोगनियम उच्यते, किं तत्र सर्वाङ्गोपसंहारः ? उत नेति । इहेदानीं फलार्थे प्रयोगे चिन्ता । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनया चोदनया योऽयं स्वर्गार्थ आरम्भः, तत्रापि किं नैयमिकवदेव प्रयोगः ? उत सर्वाङ्गोपसंहार इति । किं तावत् प्राप्तम्—

एकेनापि समाप्येत कृतार्थत्वाद्यथा क्रत्वन्तरेषु प्राप्तेषु चोत्तरावत् स्यात् ॥ ११ ॥

एकदेशेनापि अङ्गानां समाप्येत, कर्म प्रयुज्येतेत्यर्थः । कुतः । कृतार्थत्वात् । याऽसौ, दर्शपूर्णमासाभ्यां स्वर्गार्थं व्याप्रियेतेत्युक्ते कथं व्यापारितव्यमित्याकाङ्क्षा, सा एकेनाऽपि अङ्गेन कृतार्था भवति । समिधो यजत्येवं व्यापारितव्यम् । तथाऽङ्गद्वयेनाऽङ्गत्रयेण च । यो यावन्ति अङ्गानि करिष्यति, स तावत्कृतमुपकारं प्राप्स्यति। यथा क्रत्वन्तरेषु सौर्य्यार्य्यमणप्राजापत्यनैर्ऋतादिषु यो यावन्ति कर्माणि करोति, स तावद्भ्यः फलमश्नुते । न तु तत्सन्निधानाविशेषात् सर्वाण्येवाङ्गानि, प्राप्यन्ते । प्राप्तेषु चोत्तरावत् स्यात् । तद्यथा, वाग्यतास्तिस्रो दोहयित्वा विसृष्टवागनन्वारभ्य तूष्णीमुत्तरा दोहयतीति । यस्य यावत्यो गावः स तावतीर्दोहयतीति । तावतीष्वपि कृतार्थ उत्तराशब्दः । एवमिहापि यो यावन्ति अङ्गानि उत्सहते स तावन्ति करिष्यति ॥ ११ ॥ पूर्व० ॥

फलाभावान्नेति चेत् ॥ १२ ॥

इति चेद् भवान् पश्यति, एकदेशाङ्गयुक्तानामनियतानां कर्मणां प्रयोग इति । तन्न । कुतः । फलाभावात् । यावच्छ्रुतं स्वर्गकामस्य, स्वर्गकामेनेदं कर्त्तव्यमिति । तत् साकल्येनाकुर्वतः फलाभावः स्यात् सर्वं चेद श्रुतं स्वर्गकामो यजेतेत्युक्त्वा सर्वस्य अग्न्यन्वाधानादेः कर्मकलापस्याम्नानात् ॥ १२ ॥ आ० ॥

न कर्मसंयोगात् प्रयोजनमशब्ददोषं स्यात् ॥ १३ ॥

नैतदेवम् । अङ्गवैकल्ये फलाभाव इति । कुतः । कर्मसंयोगात् । प्रधानकर्मणा हि फलं संयुक्तम् । दर्शपूर्णमासाभ्यां स्वर्गकाम इति, न अङ्गैः । अङ्गानि तु तदाकाङ्क्षया गृह्यन्ते । सा चाकाङ्क्षा एकेनापि कृतार्था भवतीत्युक्तम् । एवं चेत् प्रयोजनमङ्गकृत उपकारः । फलं च स्वर्गादि अशब्ददोषं स्यात् । दर्शपूर्णमासयोः फलार्थत्वे दर्शपूर्णमासाभ्यां स्वर्गकाम इत्येवंशब्दो न दुष्येत् । तत्सन्निधौ चाङ्गानां विधायका ये समिदादयः,ते च तदुपकारित्वे न दुष्येयुः । तस्मान्नाऽङ्गाभावे फलाभावः ॥ १३ ॥ आ० नि० ॥

ऐकशब्द्यादिति चेत् ॥ १४ ॥

इति चेत् पश्यसि, दर्शपूर्णमासाभ्यां तत् फलं, न समिदादिभ्य इति । नैतद्युक्तम् । किं कारणम् । ऐकशब्द्यात् । एकःशब्द उपदेशकः प्रयोगस्य दर्शपूर्णमासयोः, समिदादीनाञ्च । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तेन च फलसम्बन्धः कृतः । तत्र कुत एतद् ? दर्शपूर्णमासतः फलं, नेतरेभ्य इति ॥

न सर्वाणि फलसंयुक्तानीति । किन्तर्हि । दर्शपूर्णमासावेव । कथं ज्ञायते । दर्शपूर्णमासाभ्यां स्वर्गं कुर्यादिति दर्शपूर्णमासयोरेव स्वर्गं प्रति करणत्वं श्रूयते, न समिदादीनाम् । आकाङ्क्षया हि तेषां ग्रहणम् । सा च कथम्भावस्याकाङ्क्षा कथं कुर्यादिति, न करणस्य, केन कुर्यादिति । तस्य निर्दिष्टत्वाद्, दर्शपूर्णमासाभ्यामिति । तस्माद् न समिदादीनां फलेन संयोगः।यदि च संयुज्येरन् न समानि आग्नेयादिभिः स्युः ॥

समत्वाच्च गुणत्वं तत्र यदुच्यते, एकदेशाङ्गयुक्तानामपि प्रयोग इत्येतदेव नास्ति । ये त्वैककर्म्यादिति सूत्रं पठन्ति तेषामयमर्थ

इति चेत् पश्यसि प्रधानानामङ्गवत्तया अङ्गानि क्रियन्ते इति। तस्मादैककर्म्यं भवतु एकमेवाङ्गं प्रयुज्यतामेकेनापि प्रधानमङ्गवद्भवति ॥ १४ ॥ आ० ॥

नार्थपृथक्त्वात् समत्वादगुणत्वम् ॥ १५ ॥

नैतदेवम् । कस्मात् । अर्थपृथक्त्वात् । अर्थपृथक्त्वं भवति । उपकारपृथक्त्वमेकेनाङ्गेनार्थ अल्पीयानल्प उपकारो बहुभिर्महान् । कथं ज्ञायते । समत्वादगुणत्वम् । यद्येकेन बहुभिश्च सम उपकारः स्यात् तत्रैकस्यैवाङ्गत्वं भवेद् अन्येषामगुणत्वं स्यात् । अनङ्गत्वमित्यर्थः । तत्र बहूनामाम्नानमनर्थकं स्यात्। न चैषां विकल्प इत्युक्तं,विधेस्त्वेकश्रुतित्वादित्यत्र। तस्मादङ्गभूयस्त्वे फलभूयस्त्वमिति ॥१५॥ आ० नि०

विधेस्त्वेकश्रुतित्वादपर्यायविधानान्नित्यवच्छ्रुतभूताभिसंयोगाद् अर्थेन युगपत् प्राप्तेर्यथाप्राप्तं स्वशब्दो निवीतवत् सर्वप्रयोगे प्रवृत्तिः स्यात् ॥ १६ ॥

नत्वेतदेवमेकदेशेनाप्यङ्गानां प्रयोग इति। कथं तर्हि । सर्वाङ्गोपसंहारेण।कुतः। विधेरेकश्रुतित्वात् । एकेन शब्देनाङ्गानां प्रयोगो विधीयते दर्शपूर्णमासाभ्यां यजेतेति सर्वापेक्षयेत्युक्तम् । सा त्वपेक्षा कृत्स्ने वाऽन्यन्वाधानादिव्यापारे तदेकदेशे वा । तत्रैकदेशापेक्षा न युक्ता । कस्मात् । अपर्यायविधानात् । इमान्यङ्गानि न पर्यायेण विधीयन्ते, कदाचित् समिधो यजति, कदाचित् तनूनपातमिति । कथं तर्हि । नित्यवद्यथाभूतानि च श्रुतानि तथा भूतान्यपेक्षयाभिसम्बद्ध्यन्ते। अथोच्येत । नित्यवच्छ्रुतानामपि सतामेकदेशोऽपेक्षिष्यत इति । नैतद्युक्तम् । कुतः । अर्थेन युगपत् प्राप्तेः । अर्थेन प्रधानोपकारेण खलेकपोतवद्युगपत्सन्निपतन्त्यङ्गानि । तत्र गृह्यते विशेषः । इदं प्राप्यते, इदं नेति । अतः सर्वाणि प्राप्यन्ते। यथाप्राप्तं च स्वशब्दार्थो निवीतवत् । यथा, निवीता ऋत्विजः प्रचरन्तीति ऋत्विग्विशेषाभावात् सर्वेषां च सन्निधानात् सर्वऋत्विजो निवीता भवन्ति । एवमिहापि सर्वप्रयोगे प्रवृत्तिः स्यात् ॥ १६ ॥ सि० ॥

तथा कर्मोपदेशत्वात् ॥ १७ ॥

तथा च कृत्वा चतुर्दश्यां पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायामिति आहुतिसंख्या पाक्षिकी न भविष्यति ॥१७॥ हेतुः ॥

क्रत्वन्तरेषु पुनर्वचनम् ॥ १८ ॥

तत्र यदुक्तं यथा क्रत्वन्तरेष्विति, युक्तं तथा क्रत्वन्तरेषु पार्थक्यम् । सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इत्युक्त्वा पुनरुच्यते—ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इति । किमतः । अतस्तेषां परस्परानपेक्षाणां कार्यं न सम्भूयेति गम्यते । परिसमाप्ते हि पूर्वस्य विधाने उत्तरः पृथक्त्वेन विधीयते । अथेह विधेस्त्वेकश्रुतित्वादित्यनेन न्यायेन सम्भूयकार्य्यमङ्गानां युक्तम् । तस्माद्वैषम्यं क्रतुभिः ॥ ॥ १८ ॥ पूर्व० आ० नि० ॥

उत्तरास्वश्रुतित्वाद्विशेषाणां कृतार्थत्वात् सन्दोहे यथाकामी प्रतीयेत ॥ १९ ॥

यथाप्राप्ते चोत्तरावत् स्यादिति यदुक्तं, तन्न युक्तम् । यदुत्तरासु यावत्स्वं दोहनमश्रुतित्वात् । नात्रोत्तराणां दोहनं विधीयते । किं तर्हि । अनूद्यते । किं कारणम् । विशेषाणां वाग्विसर्जनादीनां विधाने कृतार्थं तद्वाक्यं नोत्तराणां दोहनं विधातुमुत्सहते । विधीयमानेऽर्थद्वयी, भिद्येत वाक्यम् । अनुवादश्च प्राप्तस्यार्थस्य भवति । अर्थाच्च यावत्स्वं दोहनं प्राप्तम् । अर्थादस्वा न दोह्याः, स्वास्तु सर्वाः कथं न दोह्याः । उपरिष्टादेतद्वक्ष्यामः । तथा पयःप्रतिषेधः कुमाराणामित्यत्र । तस्माद्यथा कामी प्रतीयते यावत्यो गावः स तावतीर्दोहयति ॥ १९ ॥ पूर्व० आ० नि० ॥ दर्शपूर्णमासादिकाम्यकर्मणां सर्वाङ्गोपसंहाराधिकरणम् ॥ ३ ॥

कर्मण्यारम्भभाव्यत्वात् कृषिवत् प्रत्यारम्भं फलानि स्युः ॥ २० ॥

काम्येषु कर्मसु चिन्ता । किं काम्यं कर्म सकृदेव प्रयोक्तव्यम्, अथ वा फलस्य भूयस्त्वमिच्छता भूयोऽभ्यसितव्यमिति । किं प्राप्तम् ।

काम्ये कर्मणि प्रतिप्रयोगं फलभेदः । आरम्भभाव्यत्वात् कर्मप्रयोगेण फलं भाव्यते । कथं ज्ञायते । प्राक्कृतात् कर्मणः फलं नाऽस्ति । यदि भवेत्कर्मानर्थक्यं स्यात् । कर्मोत्तरकाले चास्तीति श्रुतितो गम्यते । यच्च प्राक्कर्मणो नास्ति कर्मोत्तरकाले च भवति तत्तेन

कर्मणा भाव्यते । कृषिवत् । यथा कर्षणेन धान्यमसकृद्भाव्यते पुनरपि धान्यवदेतद्भविष्यति ॥ २० ॥ पूर्व० ॥

अधिकारश्च सर्वेषां कार्य्यत्वादुपपद्यते विशेषः॥२१॥

एवं च कृत्वा सर्वेषां कर्मणां पुनः पुनः क्रियमाणानामधिकारो भविष्यति । तत्रेमानि दर्शनान्युपपत्स्यन्ते । तेषां ये प्रथमं यजेरन् तेषां गौरतिरात्रो ये द्वितीयं तेषामायुरिति । प्रथमं यजेरन् द्वितीयं यजेरन् एतदभ्यासे सति। तस्माद्यावदिच्छमभ्यासः॥२१॥पूर्व०युक्तिः

सकृत्तु स्यात् कृतार्थत्वादङ्गवत् ॥ २२ ॥

सकृदेव तु काम्यं कर्म प्रयोक्तव्यम् । कुतः।कृतार्थत्वात्। सकृत् कृतेन कृतश्चोदनार्थः।न च कृते पुनः कर्त्तव्यमस्ति।कः पुनश्चोदनाऽर्थो, यागस्य कर्त्तुः फलं होमस्य कर्त्तुः फलमिति । कथं कृत्वा तदुच्यते। इह यजेज्जुहुयादिति धातुना क्रियोच्यते, प्रत्ययेन कर्त्ता । तयोः कर्ता प्रधानभूतः, उपसर्जनभूता क्रिया । प्रकृतिप्रत्ययौ सहार्थं ब्रूतः अनुप्रयोगश्च कर्त्तृप्राधान्य एव भवति । पचति देवदत्त इति । तेन होतुर्यष्टुश्च फलमुच्यते । सकृद्धुतेन सकृदिष्टेन वाऽसौ होता यष्टा च जातः । तत्र द्वितीयादिप्रयोगोऽनर्थकः स्यात् । कृतार्थत्वादङ्गवत् । तद्यथा प्रधानस्य साङ्गत्वोपपादनायाङ्गानि क्रियन्ते सकृत् कृतैश्च तदुपपादितमिति नाभ्यस्यन्ते तद्वत् ॥ २२ ॥ पूर्व०आ० ॥

शब्दार्थश्च तथा लोके ॥ २३ ॥

लोकेऽपि तथैव शब्दार्थो भवति काष्ठान्याहरेत्युक्तः सकृदाहरति, न पुनः पुनः ॥ २३ ॥ निदर्शनम् ॥

अपि वा संप्रयोगे यथाकामी प्रतीयेताश्रुतित्वाद्विधिषु वचनानि स्युः ॥ २४ ॥

अपि वा नैवं स्यादस्मिन्नर्थिनः कर्मणश्च संयोगे सकृदेवार्थी कर्मप्रयोगे वर्त्ततेति। कथं तर्हि । यथाकामी प्रतीयेत।सकृद् वा बहुकृत्वो वा । फलभूमार्थी बहुकृत्वः, सन्तुष्टः सकृत्।कुतः । अश्रुतित्वात्।नात्र यष्टुर्होतुः फलं श्रूयते । यत्तु प्रकृतिप्रत्ययौ सहार्थं ब्रूत इति, तत् कर्मनिमित्तेषु नामपदेषु पाचको लावक इत्येवमादिषु।आख्याते तु न कर्त्ता क्रियाप्रधानतः । किं तर्हि । भावप्रधानमाख्यातम् । भावना च न कस्यचिच्छ्रूयते । भावनाप्रयुक्तस्य साधनग्रामस्यापेक्षितत्वाद्, यजेत केन

किमर्थं कथमिति। कर्तृप्राधान्ये कार्याभावान्न साधानाकाङ्क्षया भवितव्यम्। न हि भवति पाचकः केन किमर्थं कथमिति। भावना च फलस्योच्यते, न क्रियायाः। तृतीयानिर्देशाद्, उद्भिदा यजेत, बलभिदा यजेतेति। भाव्यत्वे हि द्वितीयाया निरपेक्ष्यत्वम्। स्वर्गस्त्वीप्सितः कामसंयोगात्, स्वर्गकाम इति। तदेतदेवमापद्यते स्वर्गकामो यागेन स्वर्गं भावयेदिति।यच्च भाव्यते तद् व्यक्तमसत्यतो हि भावो नोपपद्यते।असच्चेत् कर्मणा भाव्यते पुनःपुनरपि भावयिष्यति,कृषिवत्। तस्मात् फलार्थिना काम्यं यावदिच्छमभ्यसितव्यमिति। यदि च नियोगतः सकृदेव कर्त्तव्यं भवेत्, ततस्तेषां प्रथमं यजेरन्नित्येवमादिषु गवादिविधिषु वचनान्येतानि कल्प्येरन्न द्वितीयं यजेरन्निति। तथा च वाक्यानि भिद्येरन्। ये च द्वितीयं यजेरँस्तेषां गौरतिरात्र इति ॥ २४ ॥ सि० ॥

ऐकशब्द्यात् तथाङ्गेषु ॥ २५ ॥

यत्तु अङ्गवदिति। युक्तं यदङ्गानां सकृत् प्रयोगः। ऐकशब्द्यात्। एकस्तत्राङ्गानां प्रधानानां वोपदेशकः शब्दः सर्वाङ्गान्यपेक्षया गृह्णातीत्युक्तम्।सा चापेक्षा सकृदेतेष्वङ्गेषु भवति कृतार्था।तस्मात् तत्र पुनः पुनः क्रियाया हेतुर्नास्ति।इह त्वसतः फलस्य कर्मोत्पादकम्।तस्य प्रतिप्रयोगमन्यस्यान्यस्योत्पत्तिरविरुद्धेत्येवमपदिष्टो हेतुः। तस्माद्विषमत्वमङ्गैः ॥ २५ ॥ पूर्व० आ० नि० ॥

लोके कर्मार्थलक्षणम् ॥ २६ ॥

यच्च लोकवदिति लोके कर्मार्थप्रधानं कार्यवशात् सकृदप्युक्तोऽसकृदाहरति, असकृदप्युक्तः सकृदाहरति, नाहरति वा। अथेह शब्दलक्षणे कर्मणि यथाशब्दार्थं प्रवृत्तिः। तस्माल्लोकवदित्यदृष्टान्तः ॥ २६ ॥ निदर्शनम् ॥ काम्यकर्मणः फलाधिक्यायासकृदनुष्ठानाऽधिकरणम् ॥ ४ ॥

क्रियाणामर्थशेषत्वात् प्रत्यक्षतस्तन्निर्वृत्त्याऽपवर्गः स्यात् ॥ २७ ॥

व्रीहीनवहन्ति, तण्डुलान् पिनष्टि इत्येवमादीनां दृष्टप्रयोजनानां क्रियाणामातण्डुलनिर्वृत्तेः प्रयोगः स्यात्। कुतः। एतासां प्रयोगे प्रत्यक्षोऽर्थो निर्वर्त्यते। अवहतास्तण्डुलाः पिष्टाश्च। तैश्चेह प्रयोजनं

पुरोडाशस्य कार्यत्वात् । तस्मादेतासां तदर्थ एव प्रयोगो विज्ञायते । यदि सकृदेव मुसलस्योद्यमननिपातने कृत्वोत्सृज्येत उपलाया वा प्रकर्षणाप्रकर्षणे, यदेषां कार्यं तन्नैव निर्वर्त्येत। अत आसां तन्निर्वृत्त्या अपवर्गः स्यात् । आतण्डुलनिर्वृत्तेरा च पिष्टनिर्वृत्तेरभ्यास इति ॥२७॥

धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यात् ॥ २८ ॥

यत्र तु दृष्टं कार्यं तन्निर्वर्त्यते । यथा, अग्निचित्यामौदुम्बरमुलूखलं सर्वौषधस्य पूरयित्वाऽवहन्त्यत्र तदुपदधातीति । तत्र तण्डुलनिर्वृत्त्या नास्ति प्रयोजनम् । तण्डुलकार्यस्य पुरोडाशादेरचोदितत्वात् । तस्मात् तत्र सकृत् क्रियया कृतः शब्दार्थ इति न स्यादभ्यासः। येषां तु तण्डुलफल एव मुसलस्योद्यमननिपातनकर्मण्यवहन्तिशब्दः प्रवर्त्तते इत्युपगमस्तेषामातण्डुलनिर्वृत्तेरेवाभ्यासः प्राप्नोति । स तु मन्द एवाभ्युपगमः । यत् कारणं विनापि तण्डुलैः प्रयोगो दृश्यते, कषायमवहन्ति, किण्वमवहन्तीति । न चाऽसौ गौणः प्रयोगो, विशेषाभावात् । अवयवप्रसिद्ध्या चाऽवघातमात्रवचन एव प्रतीयते । न च समुदायोऽर्थान्तरे प्रसिद्धः । तण्डुलव्यापारस्य तु प्रायोवृत्ते तत्र प्रयोगप्राचुर्यमतोऽयं व्यामोहः ॥ २८ ॥ सिद्धान्तः ॥ अङ्गस्यानभ्यासाऽधिकरणम् ॥ ५ ॥

प्रयाजादीन्युदाहृत्य चिन्त्यते । किं सकृत्त प्रयोग एषाम् ? उताऽभ्यासोऽपि कर्त्तव्य इति । तत्र धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यादित्यनेन न्यायेन सकृत् प्रयोगे प्राप्ते एवमुच्यते—

क्रतुवच्चानुमानेनाभ्यासे फलभूमा स्यात् ॥ २९ ॥

अभ्यासः कार्यः । कुतः । यतोऽभ्यासे भूमा स्यात् । कथं ज्ञायते । अनुमानेन । किं तदनुमानम् । प्रागङ्गप्रयोगात् प्रधानोपकारो नासीदूर्ध्वं, ततो भवति । तेन विज्ञायते, नूनमङ्गेन क्रियते इति । क्रियते चेत् पुनः पुनरपि करिष्यते । क्रतुवत् । यद्यथा कर्मसु सौर्यादिषु फलं कर्मणा क्रियते इति कर्माभ्यासे फलभूयस्त्वमेवमिहापि॥२९॥पूर्व०

सकृद्वा कारणैकत्वात् ॥ ३० ॥

सकृद्वाङ्गं प्रयोक्तव्यं, नावृत्त्या । कुतः । कारणैकत्वात् । एकं कारणमङ्गानां प्रधानेषु उपकारः । कः पुनरसौ । येन प्रधानानि फलं ददाति । तच्चेत् सकृत् प्रयुक्तो नाङ्गेन कृतं, जातानि प्रधानानि फल-

वन्तीति पुनरङ्गस्याप्रयोगः । अथ न कृतं पुनराप्तप्रयोगः । येन सकृत् कृतेन नोपकृतं स पुनः क्रियमाण उपकरिष्यतीति का आशा ॥ ३० ॥ सि० ॥

परिमाणं चानियमेन स्यात् ॥ ३१ ॥

यदि चानियमः सकृदसकृद्वा प्रयोगः, ततः चतुर्दशपौर्णमास्या-आहुतयो हूयन्ते त्रयोदशामावास्यायामिति योऽयं नित्यवदाहुतिपरि-माणानुवादः स न स्यात् । स तावद्भवतां पाक्षिकः कल्प्येत, तथा-ऽस्य रूपं बाध्येत । तस्मादनभ्यासः ॥ ३१ ॥ युक्तिः ॥

फलस्यारम्भनिर्वृत्तेः क्रतुषु स्यात् फलान्यत्वम् ॥ ३२ ॥

यत्तु क्रतुवदिति । युक्तं, यत् क्रतुष्वभ्यासः । फलस्यारम्भनि-ष्पत्तेः । कर्मारम्भेण तत्र फलं निष्पद्यते । आरम्भान्तरेण परं निष्प-त्स्यत इति । अङ्गस्य पुनरुक्तपरिणामफलं प्रधानम् । फलवत्ता-सम्पादनम् । तच्चेत् सकृत् कृतेन कृतं न भूयः क्रियाऽस्त्विवति । एव-मपदिष्टो हेतुः । तस्मादनुपन्यासः ॥ ३२ ॥ पूर्व० आ० नि० ॥

अर्थवतस्तु नैकत्वादभ्यासः स्यादनर्थको यथा भोजनमेकस्मिन्नर्थस्यापरिमाणत्वात् प्रधाने च क्रियार्थत्वादनियमःस्यात् ॥ ३३ ॥

यदुक्तं, सकृत् कृतेनाङ्गेन कृतत्वादर्थस्यानर्थकोऽभ्यास इति । अत्र ब्रूमः अर्थवांस्तु अभ्यासो ग्राह्यो, नानर्थकोऽभ्यासः । कथं कृत्वा । एक-त्वादभ्यासः स्यादनर्थकः । यद्येकमेवार्थमभ्यस्यमानमपि अङ्गं कुर्यात् तस्याभ्यासोऽनर्थकः स्यात् । यथा भोजनमेकस्मिन् काले अभ्यस्यमानमेकफलं तृप्तिं करोतीति नाभ्यस्यते । अथेहार्थस्यापरि-माणत्वे इयन्तमुपकारं करोत्यङ्गमिति ज्ञायते । ननु यावता प्रधानं फलवद्भवति तावत् करोतीति गम्यते । सत्यमेवं, किन्तु प्रधाने क्रिया-ऽर्थत्वादनियमः स्यात् । प्रधानस्य फलक्रियार्थमङ्गम् । तत्तु प्रधान-फलमपरिमितम् । तदङ्गोपकारस्य भूयस्त्वे भूयो भविष्यति । अल्पत्वे अल्पम् । अभ्यासे चासंशयं भूयानुपकारः स्यात् कार्यत्वात् तस्य । तस्मादनियमः स्यात् सकृद्वा प्रयोगोऽभ्यासो वेति ॥ ३३ ॥ आ० ॥

पृथक्त्वाद्विधितः परिमाणं स्यात् ॥ ३४ ॥

यत्तु आहुतिसंख्या विरुध्यत इति पृथक्त्वादुपकारस्याऽभ्यासे

न्यायप्राप्तोऽयमाहुतिसंख्याऽनुवादः स्यात् स विधितः स्यादाहुतिविधीनभिप्रेत्य । चतुर्दशपौर्णमास्याहुतिविधयस्त्रयोदशामावास्यायामिति । न ह्याहुतिसंख्या युज्येत । आहुतिविधिसंख्या तु लक्षणयोपपद्यते ॥ ॥ ३४ ॥ आ० नि० ॥

अनभ्यासो वा प्रयोगवचनैकत्वात् सर्वस्य युगपच्छास्त्रादफलत्वाच कर्मणः स्यात् क्रियार्थत्वात् ॥३५॥

अनभ्यासो वाऽङ्गानाम् । कुतः । प्रयोगवचनैकत्वात् । एकः प्रयोगवचनोऽङ्गानां प्रधानानां च । तस्यैकत्वात् सर्वस्य युगपच्छासनमनेन कर्मणा साङ्गेन यजेतेति । सकृत् कृतैश्चाङ्गैस्तत्साङ्गं जातमिति न पुनः क्रियायां हेतुरस्ति । ननूपकारभूयस्त्वं भविष्यति । यद्यङ्गान्यदृष्टमुपकारं कुर्युस्ततस्तदभ्यासे उपकारभूयस्त्वमनुमीयेत । दृष्टमेव त्वर्थमङ्गानि कुर्वन्ति प्रधानस्याङ्गवत्ताम् । सा चाभ्यासेऽपि तावत्येवाङ्गवत्ता । सा चेह फलसम्बद्धा साङ्गेन यजेतेति, नाङ्गानि । अङ्गानि तत्सम्पादनेनार्थवन्ति । नन्वेतदयुक्तमिव । यदा हि प्रयाजाः, न तदा प्रधानयजिरपूर्वं वा । यदा च यजिरपूर्वं च, न तदा प्रयाजाः । तदेवमदृष्टरहिते समिदादिमात्रे सत्यङ्गवत्तैव नास्ति, कुत उपकारः । अपि च यदि याजिमात्रमेवाङ्गेषु, नापूर्वफलमस्ति ततः सोमाङ्गभूतानामिष्टिपशुबन्धानां चोदक एव नास्ति । असति ह्यपूर्वे इतिकर्त्तव्यताकाङ्क्षा नास्ति । यजतेः प्रज्ञातेतिकर्त्तव्यताकत्वादितिकर्त्तव्यतां चोदको नातिदिशेत् । तत्रैतानि दर्शनानि नोपपद्येरन् । तस्यैकशतं प्रयाजानुयाजाः । न च समिष्ट यजूंषि जुहोति प्रहृत्य परिधीन् जुहोति हारियोजनमिति । तस्मादियमन्या व्याख्या ॥

अनभ्यासो वाङ्गानां प्रयोगवचनैकत्वात् । एकप्रयोगवचनेऽङ्गानां प्रधानानां च तस्यैकत्वात् सर्वस्याङ्गप्रधानकलापस्य युगपच्छासनप्रधानानामनभ्यासः । कस्य हेतोः । सकृत् कृतैः प्रधानैः कृतः श्रुत्यर्थः । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति कृते श्रुत्यर्थे यच्छास्त्रविहितं फलं तल्लब्धमिति न पुनः क्रियायां हेतुरस्ति । एवमङ्गेष्वपि सकृत्कृतेषु यदङ्गानां प्रापकं शास्त्रं तस्यार्थः कृतः । तस्मिन् कृते यच्छास्त्राधिगतमाङ्गफलं तल्लब्धमिदानीमित्यवगन्तव्यम् । तथा च सत्यभ्यासोऽनर्थकः । यत्तु फलभूयस्त्वं भविष्यतीति । तदयुक्तम् । दर्शपूर्ण-

मासयोर्यत्फलं तद्भावनायामङ्गोपकार उपयुज्यते, नापूर्वस्य फलस्योत्पत्तौ । यद्यपूर्वफलमङ्गैरुत्पाद्येत, अङ्गफलमेव तत् स्यात् । न चाङ्गानि फलवन्ति । प्रधानानां स्वकार्यं साधयतामदृष्ट उपकारस्तैः क्रियते । सकृत्कृतैश्चासौ कृतः । तस्मान्नाङ्गावृत्तौ फलभूयस्त्वमस्ति ॥३५॥ सि० नि० ॥

अभ्यासो वा छेदनसंमार्गावदानेषु वचनात् सकृत्त्वस्य ॥ ३६ ॥

अभ्यासो वाङ्गानाम् । कुतः । पितृयज्ञे हि श्रूयते, सकृदाच्छिन्नं बर्हिर्भवतीति । यथानुयाजे सकृत् परिधीन् संमार्ष्टीति । स्विष्टकृति चोत्तरार्द्धात् सकृदवद्यतीति । तद्यत् सकृदङ्गानां प्रयोगस्तत एतानि वचनान्युपपद्यन्ते । तस्मादभ्यासः ॥ ३६ ॥ आक्षेपः ॥

अनभ्यासस्तु वाच्यत्वात् ॥ ३७ ॥

अनभ्यासस्त्वङ्गानां यथोक्तेन न्यायेन । यत्तु छेदनादिषु वचनात् सकृत्त्वस्यान्यत्राभ्यासो विज्ञायत इति । अत्र ब्रूमः । यद्यप्यनभ्यासस्तथापि छेदनादिषु वाच्यं सकृत्त्वं दर्शपूर्णमासयोरसकृदाच्छिन्नं बर्हिर्भवतीति वचनात् तत्प्रकृतित्वात् पितृयज्ञेऽप्यसकृत् प्राप्तम् । तथा प्राप्तेऽसकृत्त्वं वाच्यम् । एवं प्रयाजेषु त्रिः संमार्ग उक्तः । सोऽनुयाजेषु पुनरावर्त्तते । तत्रापि त्रित्वे प्राप्ते सकृत्त्वं विधातव्यम् । तथा द्विर्हविषोऽवद्यतीत्यविशेषेणोक्ते स्विष्टकृत्यपि द्वित्वं प्राप्तम् । तत्र सकृत्त्वं विधीयते । तस्माच्छेदनादिषु सकृद्वचनान्नान्यत्राभ्यासो विज्ञातुं न्याय्य इति ॥ ३७ ॥ आ० नि० ॥ प्रयाजाद्यङ्गस्य सकृदनुष्ठानाधिकरणम् ॥ ६ ॥

बहुवचनेन सर्वप्राप्तेर्विकल्पः स्यात् ॥ ३८ ॥

वसन्ताय कपिञ्जलानालभेतेति श्रूयते । तत्र विचार्यते । किं तत्र त्रयश्चत्वारः पञ्च वा विकल्पेनालब्धव्याः ? अथवा त्रय एवेति । किं प्राप्तम् ॥ विकल्पेनालब्धव्याः । कस्मात् । सर्वप्राप्तेः । सर्वे एते संख्याविशेषा बहुवचनेन प्राप्यन्ते । सर्वे तस्य वाच्याः । सर्वत्र प्रयोगात् । न च समुच्चयेन सम्भवन्त्यशक्यत्वात् । तस्माद्विकल्पः । नन्वेवं सति एकस्य शब्दस्यानेकार्थता आश्रिता भवति । न चैष न्याय्यः । उच्यते । सत्यमेवमगत्या आश्रीयते । सत्यां गतौ नाश्रयितव्यः ।अस्ति

तु इयं गतिर्यत् त्रित्वं बहुवचनस्यार्थः स्यात् । तद्योगाच्चतुरादिष्वपि वर्त्तते । सर्वेषु तेषु त्रित्वमस्तीति । नैतद्युक्तम् । यदि बहुवचनस्य त्रित्वमर्थः स्यात् ततश्चत्वारो ब्राह्मणा इति सामानाधिकरण्यं नोपपद्यते । ब्राह्मणा इत्यस्य त्रयोऽर्थः । चत्वार इत्यस्य चत्वारः । तयोः सामानाधिकरण्यं न प्राप्नोति । न हि भवति चत्वारस्त्रय इति । एवं सर्वत्र लक्षणया भविष्यति । यथा न्यग्रोधः क्षेत्रमिति । त्रित्वं हि चतुष्ट्वादीनि साहचर्याच्छक्नोति लक्षयितुं सिद्ध्यति। लक्षणा त्वाश्रिता भवति । किं क्रियताम् अगत्या आश्रीयते । सत्यां गतौ नाश्रयितव्या । अस्ति चेयं गतिर्यद् बहुत्वं बहुवचनस्यार्थः स्यात् । सर्वेऽपि ते बहव इति श्रुत्यैव सामानाधिकरण्यम् । यदि बहुत्वं विज्ञायते किं तद् बहुत्वमित्युच्यते । बहुत्वं वृद्धिः उपचयः आधिक्यमित्यर्थः । कथं कृत्वा । बृंहतिरयं वृद्ध्यर्थः । तस्यौणादिक उकारः प्रत्ययः बृंहेर्नलोपश्चेति । तस्य रूपं बह्विति बहु वृद्धमधिकमित्यर्थः । सर्वे चैते त्र्यादयोऽधिकाः । तस्मात् सर्वे बहुशब्दवाच्याः । नन्वापेक्षिकमेतद् बहु अधिकमिति । यदेव हि बहु तदेवान्यापेक्षयाऽबहु भवति । सत्यमेवं, यत्तु यदपेक्ष्य बहु नतदेवान्यदपेक्ष्याबहु। तद्यथा उत्तराः कुरवो दक्षिणान् कुरूनपेक्ष्योत्तरा इत्युच्यते । न च ततोऽन्ये उत्तरा देशा न सन्ति । अथ च नियतापेक्षत्वादुत्तरत्वं न जहति। एवं त्रिप्रभृतयो द्वित्वमपेक्ष्य बहुत्वं लभन्ते । न च ते कदाचिदबहवः । कथं पुनर्ज्ञायते द्वित्वापेक्ष्यं त्रिप्रभृतीनां बहुत्वमित्युच्यते। अपेक्षा तावत् समानजातीयेषु भवति । यथा बलवान् देवदत्त इति न हस्तिनं सिंहं वा अपेक्ष्य भवति । किं तर्हि । समानजातीयान् पुरुषानपेक्ष्य । एवं संख्यापि संख्यामेवापेक्ष्य बहुत्वं लब्धुमर्हति । तत्रैकत्वं तावन्नापेक्ष्यते । द्वयोर्बहुवचनस्यादर्शनात् । त्र्यादिषु च सर्वेषु दृश्यते। तेन विज्ञायते द्वित्वापेक्षमिति । तच्च बहुवचनेनोपलभ्यते । कुतः । तद्भावे भावात् तदभावे तदभावात् । त्रित्वादिषु भवति । तदभावे च द्वयोरेकस्मिँश्च न भवति । एवं बहुवचनमिति समाख्यान्वर्था भवति । अभियुक्तवचनं च बहुवचनमिति । यदि त्रित्वं बहुवचनस्यार्थः स्यात्। त्रिषु वचनमित्येव तद् ब्रूयात् । लाघवादऽसन्देहात् । तस्माद् द्वित्वमपेक्ष्यैते बहवः । अतोऽवस्थितं त्र्यादीनां बहुत्वम् । एवञ्च सति नैकः शब्दोऽनेकार्थो भवति । सर्वेषां च बहु-

त्वान्न कश्चिल्लक्षणया प्रयोगः । अथोच्यते । त्रिषु निरुपपदं प्रयुज्यते चतुरादिषु तु सोपपदम् । चत्वारो ब्राह्मणा इति । तच्च मिथ्या । त्रिष्वपि सोपपदं प्रयुज्यते । यथा, त्रयो लोकास्त्रयो वेदा इति । यदि च निरुपपदं च त्रित्वं प्रत्यापयेत् । ततो वसन्ताय कपिञ्जलानित्युक्ते विचार एवायं न प्रवर्त्तेत । यथा अत्रैव न विचार्यते– किं कपिञ्जला आलब्धव्या, उत मयूराः, कपोता वेति । कस्य हेतोः । यतः कपिञ्जलशब्दस्य न मयूराः कपोता वा वाच्याः । इहापि यदि बहुवचनस्य त्रित्वमेव वाच्यं स्याद् नेतरा संख्या, पूर्ववद्विचार एवायं स्यात् ॥ ३८ ॥

दृष्टः प्रयोग इति चेत् ॥ ३९ ॥

अथोच्येत दृष्टो बहुवचनस्य प्रयोगश्चतुरादिषु, चत्वारो ब्राह्मणा इति । ततो विचार इति तथेह । इहापि कपिञ्जलशब्दस्य दृष्टः प्रयोगः कपोते मयूरे च । महान् कपात उच्यते कपिञ्जलोऽयं न पोत इति । तथाल्पो मयूरः कपिञ्जलोऽयं न मयूर इति ॥ ३९ ॥ पूर्व० आ०

भक्त्येति चेत् ॥ ४० ॥

आह । भक्त्या तत्र कपिञ्जलशब्दः प्रयुज्यते । न च भाक्ते प्रयोगे शब्दार्थशङ्का भवति ॥ ४० ॥ आ० नि० ॥

तथेतरस्मिन् ॥ ४१ ॥

इतरस्मिन्नपि चत्वारो ब्राह्मणा इति लक्षणया प्रयुज्यत इत्युक्तम् । न च लक्षणाप्रयोगे शब्दार्थशङ्का भवति। अपि च प्रातिपदिकार्थस्य या संख्या सा चानेनाभिधीयते । यथा ब्राह्मणा इति । प्रातिपदिकार्थ एव वा यथा द्वावेक इति । न च त्रित्वं प्रातिपदिकस्यार्थो, न तत्संख्या इति । तस्माच्चत्वार इति बहुवचनं न प्राप्नोति। अथोच्यते । अस्ति चतुर्षु अवयवभूतं त्रित्वं तदपेक्षं बहुवचनमिति । द्वित्वमपि तत्रास्ति, एकत्वं च । काममनेनैव द्वित्ववचनमेकवचनं चोत्पद्येत । तस्मान्न त्रित्वयोगाच्चतुरादिषु बहुवचनप्रयोगः । बहुत्वादेव तेषां बहुवचनम् । अतः सर्वे त्र्यादयः परार्द्धपर्यन्ता बहुवचनस्यार्थः । सर्वे चेदर्थतः कपिञ्जलानालभेत इति सर्वे प्राप्यन्ते । तस्माद्विकल्पः ॥ ४१ ॥ पूर्व० आ० ॥

प्रथमं वा नियम्येत कारणादतिक्रमः स्यात् ॥ ४२ ॥

प्रथमं वा बहुत्वं त्रित्वं नियस्येत । किं कारणम् । न हि कश्चिच्चतुर उपाददानो न त्रीनुपादत्ते । यत्तु कारणमनुगतास्त्रयश्चतुर्षु वोपात्तेषु कृतः शब्दार्थो बहूनालभेतेति श्रुतम्, आलब्धव्याश्च बहवः । एवं सति कारणादतिक्रमः स्यात् । यदि च यथाश्रुतानुपादाने किञ्चिदन्यत् कारणं त्रित्वातिक्रमे स्यात्ततोऽतिक्रमः। न तदस्ति । तस्मात् त्रित्वं नियमेन । ननु फलभूयस्त्वं कारणं भविष्यतीति । नैतदस्ति । यत्र बहवः कल्पाः श्रूयन्ते तेषां कश्चिल्लघुः कश्चिद् गुरुः । तत्र गुरोः कल्पस्यानुष्ठानाम्नानसामर्थ्यात् तदनुष्ठानात् फलभूयस्त्वमनुमीयते । यथा एका देया षड्देया द्वादश देया चतुर्विंशतिर्देया इति । इह तु एक एव कल्पो बहूनामालम्भः । स त्रिभिश्चतुरादिभिस्तुल्यः । अतस्तत्र यो लघुमुत्सृज्य गुरुकल्पमातिष्ठेत तस्य फलभूयस्त्वं न भवितुमर्हति ॥ ४२ ॥ सि० ॥

श्रुत्यर्थाविशेषात् ॥ ४३ ॥

यथा पशुमालभेतेति श्रुतये महान्तं महार्घं वा पशुमालभेत, न तस्य फलभूयस्त्वं भवति । यस्तु मांसीयं शिष्टमतिक्रामेत् स यदि तावद्वैदिकीषु हिंसासु प्रत्यवायस्ततः प्रत्यवेयात् । अथाप्रत्यवायस्तथापि शिष्टविगर्हणं च लभेत् । कृते श्रुत्यर्थे मांसीयान् पशून् हन्तीति । तस्मात् त्रयः कपिञ्जला आलब्धव्याः ॥ ४३ ॥ युक्तिः ॥

तथा चान्यार्थदर्शनम् ॥ ४४ ॥

अन्यार्थोऽपि चैतमर्थं दर्शयति, यथा न्याय उपदिष्टः । यथा, कृष्णा याम्या अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः, तेषामैन्द्राग्नो दशम इति।यदि च त्रय एते त्रिकाः,एवं नियोगत ऐन्द्राग्नो दशमः सम्पद्यते। इतरथा पाक्षिकः स्यात् । तस्मात् त्रित्वानियमः॥४४॥ निदर्शनम् ॥

प्रकृत्या च पूर्ववत् तदासत्तेः ॥ ४५ ॥

प्रकृत्याग्नीषोमीयेणैकत्वं प्राप्यते तस्योत्पत्तिर्भविष्यति त्रित्व उपादीयमाने । इतरथा विप्रकर्षः स्यात् । इदं वाऽपि लिङ्गं गृहमेधीये श्रूयते । ओदनानुद्धरतीति । तत्र मध्यमस्येति त्रयाणां निरुपपदं भवति । अन्यत्र सोपपदं पञ्चानां मध्यमः । अष्टानां मध्यम इति ॥४५॥ युक्तिः ॥ कपिञ्जलाधिकरणम् ॥ ७ ॥

उत्तरासु यावत्स्वमपूर्वत्वात् ॥ ४६ ॥

सान्नाये दोहनं प्रकृत्य श्रूयते। वाग्यतास्तिस्रो दोहयित्वा विसृष्टवागनन्वालभ्योत्तरा दोहयतीति। किमयं विधिरनुवाद इति। किं प्राप्तम्। अपूर्वार्थत्वाद् विधिरिति। अनुवादो ह्यनर्थकः स्यादिति प्राप्ते उच्यते ॥ ४६ ॥ पूर्व० ॥

यावत्स्वं वान्यविधानेनानुवादः स्यात् ॥ ४७ ॥

अनुवादः स्याद्, नायं विधिः। उत्तरा दोहयतीति। अन्योऽत्र विधिरुत्सृष्टवागनन्वालभ्येति। यद्येषोऽपि विधिः स्याद्वाक्यं भिद्येत। उत्तरा दोहयति, ताश्चानन्वालभ्येति ॥ ४७ ॥

अथ कुतः प्राप्तेऽनुवादः?

साकल्यविधानात् ॥ ४८ ॥

साकल्यमत्र विधीयते गवां दोग्धव्यानाम्। नास्यैतां रात्रिं पयसाग्निहोत्रं जुहुयात् कुमाराश्च न पयो लभेरन्। ननु कुमाराणां पयोदानप्रतिषेधोऽयम्। न हि पयःप्रतिषेधे किञ्चिद् दृष्टमस्ति। अदृष्टं कल्पयितव्यम्। नन्वितरत्रापि लक्षणाश्रयणीया। बाढम्। दृष्टार्थाच्छब्दवृत्तिर्लघीयसीति। तस्मात् साकल्यविधिर्गवां पयःप्रतिषेधं, नायं लक्षणया। ततः प्राप्तेऽनुवादः ॥ ४८ ॥ हेतुः ॥

बह्वर्थत्वाच्च ॥ ४९ ॥

बहुदुग्धीन्द्राय देवेभ्यो हविरिति च मन्त्रस्य सर्वासु दुह्यमानास्वप्राक्षिकत्वं भविष्यति। बहुत्वं च शक्त्यपेक्षम् ॥ ४९ ॥

अग्निहोत्रे चाशेषवद्यवागूनियमः प्रतिषेधः कुमाराणाम् ॥ ५० ॥

अग्निहोत्रे च श्रूयते। नास्यैतां रात्रिं पयसाग्निहोत्रं जुहुयाद् यथान्यस्यै देवतायै प्रत्तमन्यस्यै देवतायै दद्यात् तादृक् तत् स्याद् यवाग्वा जुहुयादिति। सर्वस्य पयसः सान्नायार्थतां दर्शयति। तथा पयःप्रतिषेधः कुमाराणामिति व्याख्यातम् ॥ ५० ॥ हेतुः ॥

सर्वप्रायणिनापि लिङ्गेन संयुज्यते देवताऽभिसंयोगात् ॥ ५१ ॥

वत्सेभ्यश्च ह वा एता मनुष्येभ्यश्च पुराप्यापयन्ते अथैतर्हि

देवेभ्य एवैता आप्यायन्ति । सर्वप्राप्तेरेतल्लिङ्गम् । कथम् । यावत्भ्यो मनुष्येभ्यश्च पुराप्यायन्ते। तस्मात् सर्वप्राप्तेरेतल्लिङ्गम्।अतो यावत्स्वमुत्तरासु दोहनं स्यात् ॥ ५१॥ हेतुः ॥ उत्तरादोहनानुवादाऽधिकरणम् ॥ ८ ॥

दर्शपूर्णमासयोः प्रधानान्याग्नेयादीनि । तेषामङ्गान्याघारादीनि । तेषु चिन्त्यते । किं तस्य तस्य प्रधानस्य भेदेनाङ्गानां प्रयोगः । अथ वा सर्वेषां तन्त्रेणेति । अथ तत्र किं वृत्तं, क्रतुवच्चानुमानेनाऽभ्यासे फलभूमा स्यादिति । तत्र कृत्स्नौ दर्शपूर्णमासावुद्दिश्य कथा वृत्ता । इह तु तत्तत्प्रधानं प्रति चिन्त्यते । किं प्राप्तम् ।

प्रधानकर्मार्थत्वादङ्गानां तद्भेदात् कर्मभेदः प्रयोगे स्यात् ॥ ५२ ॥

अङ्गानां प्रयोगे कर्मभेदः स्यात् क्रियाभेदः। तस्य तस्य प्रधानस्य भेदेनाङ्गानां प्रयोगः। कुतः। प्रधानकर्मार्थत्वात् । प्रधानार्थत्वादित्यर्थः प्रधानार्थेन ह्यङ्गान्युपदिश्यन्ते। अङ्गवन्ति प्रधानानि कथं स्युरिति। अङ्गसम्बद्धे च प्रधानार्थे अङ्गानां सहत्वं न विवक्ष्यते । न हि तत्र प्रधानानि विधीयन्ते । किं तर्हि । अङ्गानि चाविधीयमानस्याऽर्थस्य गुणो विवक्षितो भवति।यथा ग्रहं संमार्ष्टीत्येकत्वम् । एवञ्चैकैकस्य प्रधानस्याङ्गैः सम्बन्धः कर्त्तव्यः । तानि यदि सकृत् क्रियेरन् न विभागेन सम्बध्येरन् । यथा प्रायणीयोदवसानीययोरेकादशिन्यां समस्तैश्च सम्बन्धः कर्त्तव्य इत्युक्तं, विधेस्त्वेकश्रुतित्वादित्यत्र । तस्मात् प्रतिप्रधानमङ्गभेदः ॥ ५२ ॥ पूर्व० ॥

क्रमकोपश्च यौगपद्यात् स्यात् ॥ ५३ ॥

प्रधानानि च क्रमवन्ति तानि च यथाक्रमं साङ्गानि कर्त्तव्यानि। तत्र यदि तन्त्रमङ्गानि स्युः, ततोऽकृत्वाग्नेयं साङ्गमग्निषोमीयः प्रक्रान्तः स्यात् । तथा च प्रधानानां क्रमकोपः स्यात् । अथ तु भेदस्ततः साङ्गमाग्नेयमपवृज्याग्नीषोमीयः साङ्गः प्रक्रान्तः क्रियत इति नास्ति क्रमकोपः । अपर आह । यदि तन्त्रं भवेयुरङ्गानि ततो यावत्तनूनपादाग्नेयस्योपकरोति तावत् समिधाग्नीषोमीयस्योपकर्त्तव्यमास एव उपकारः क्रमकोपः। अपि चाङ्गारापोहनादीनि संस्पर्शादीनि प्रतिप्रधानं भिद्यन्ते तैश्चाघारादीनामवैलक्षण्यं भविष्यति ॥५३॥ आ०॥

तुल्यानां तु यौगपद्यमेकशब्दोपदेशात् स्याद् विशेषाग्रहणात् ॥ ५४ ॥

तुशब्दः पक्षान्तरं परिजग्राह। नचैष पक्षः श्रेयान्, भेद इति । किं तर्हि । यौगपद्यं,सकृत् प्रयोगः स्यात् । सकृदेव प्रयुक्तान्यङ्गानि सर्वैः प्रधानैर्युगपत् सम्बध्यन्ते । तुल्यानामेकशब्दोपदिष्टानां चेदमर्थं प्रति विशेषाग्रहणात् । इमानि कर्तृतो देशतः कालतश्च तुल्यानि दर्शपूर्णमासयोः यज्ञक्रत्वोश्चत्वार ऋत्विजः। समे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति। प्रधानैश्च सहाङ्गानामेकदेशकालकर्त्तृकत्वं वक्ष्यति। अङ्गानि तु विधात्वात् प्रधानेनोपदिश्येरन्नित्यत्र एकेन च शब्देन प्रधानानि फलं प्रत्युपदिष्टानि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । किमतः,अतस्तेषां फले सम्भूयकारित्वम् । तेन स्वर्गकामस्य सर्वेषां युगपच्चिकीर्षा नैकशः । सर्वचिकीर्षया त्वाघारादीनां क्रियमाणानां तुल्यकर्त्त्रादीनां न गृह्यते विशेषः, कस्यै तान्याग्नेयस्याग्नीषोमीयस्य वेति । सर्वेषां च युज्यन्ते । तस्मात् सर्वार्थानि भवन्ति । तस्मादनावृत्तिः ॥ ५४ ॥ सि० ॥

ऐकार्थ्यादव्यवायः स्यात् ॥ ५५ ॥

यच्च क्रमकोपश्च यौगपद्ये स्यादिति । तत्र ब्रूमः । ऐकार्थ्यादव्यवायः स्यात् । न क्रमकोपः । कुतः । ऐकार्थ्यात् । सम्भूयकारीण्येतानीत्युक्तम् । तेषां सह क्रिया, नैकशः । न हि तत्रैकेन कृतेन कश्चिदर्थः । एकसम्बन्धक्रियायामानुपूर्व्यं स्यात् । तस्मान्न तेषां प्रयोगे क्रमः, कुतः क्रमकोप इति । यच्चोपकारे क्रमकोप इति, तत्रापि नाघारः कृतमात्र एव प्रधानेषूपकरोति । यत् कारणं तस्मिन् काले प्रधानान्येव न सन्ति । यदा तु सर्वाण्यङ्गानि कृतानि तदा तन्यङ्गान्यऽपूर्वाणि सम्भूय प्रधानेषूपकुर्वन्ति । अङ्गानामपि हि सम्भूयकारित्वमुक्तम् । अथहैकार्थ्यादेककर्म्यमिति । तस्मादुपकारेऽपि नास्ति क्रमकोपः ॥ ५५ ॥ आ० नि० ॥

तथा चान्यार्थदर्शनं कामुकायनः ॥ ५६ ॥

तथा चान्यार्थदर्शनं भवति यथा न्याय उपदिष्ट इति कामुकायन आचार्यो मन्यते स्म । किं पुनस्तत् । चतुदर्श पौर्णमास्यामाहुतयो

हूयन्ते त्रयोदशामावास्यायामिति । यद्यावृत्तिः स्यान्न त्रयोदश चतुर्दश वा व्यवतिष्ठेरन् ॥ ५६ ॥ युक्तिः

यच्च संस्पर्शवदारादुपकारिणामप्यावृत्तिरस्तीति । तत्र ब्रूमः—

तन्न्यायत्वादशक्तेरानुपूर्व्यं स्यात् संस्कारस्य तदर्थत्वात् ॥ ५७ ॥

स हि न्यायः सम्भूयकारिणां सहक्रियेति सर्वत्रैव । सहक्रियाऽशक्तेस्तु धर्मसंस्पर्शिष्वानुपूर्व्यं स्याद् भेदेन क्रिया । न शक्यते एकस्याङ्गारापोहनेन सर्वेषां पाकः कर्त्तुम् । न चैकस्मिन् पुरोडाशे श्रपिते सर्वे श्रपिता भवन्ति । संस्कारस्य तदर्थत्वात् । संस्कारोऽयं पाकार्थो विधीयते । तत एव प्रत्यक्षोपकारिणः प्रतिप्रधानमावृत्तिः स्यात् । अन्यथा याग एव न संवर्त्तेत ॥ ५७ ॥ आ०नि० ॥

असंसृष्टोऽपि तादर्थ्यात् ॥ ५८ ॥

असंसृष्टोऽप्याघारादिः प्रतिप्रधानमावर्त्तते । कुतः । तादर्थ्यात् । यस्य समीपे कृतस्तदर्थ इति गम्यते विशेषः । आघारादीन्याज्यभागान्तान्याग्नेयस्य स्विष्टकृदादीन्यग्नीषोमीयस्येति गृह्यमाणे विशेषे भेदः । तस्मादुपांशुयाजादीनां समीपे प्रागाघारादीनि ऊर्द्धं स्विष्टकृदादीनि कर्त्तव्यानि । एवं च संस्पर्शिभिरितरेषामवैलक्षण्यं भविष्यति ॥ ५८ ॥ युक्तिः ॥

विभवाद्वा प्रदीपवत् ॥ ५९ ॥

यदुक्तं यस्य सन्निधौ प्रयुक्तानि तस्येमानीति गृह्यते इति विशेषः । तस्मादावृत्तिरिति । नैतद् युक्तम् । विभवात् । कुतः । विभविष्यन्त्येतान्येकस्यापि सन्निधौ क्रियमाणानि सर्वेषामुपकर्त्तुम् । प्रदीपवत् । तद्यथा प्रदीप एकस्मिन् प्रदेशे भुञ्जानानां ब्राह्मणानामेकस्य सन्निधौ क्रियमाणः सर्वेषामुपकारं करोति । तस्मादनावृत्तिः ॥ ५९ ॥ निदर्शनम् ॥

अर्थाल्लोके विधितः प्रतिप्रधानं स्यात् ॥ ६० ॥

उपवर्णनापरिहारः पूर्वं न कृत इति स तावद्वर्ण्यते । यदुपवर्णितं प्रदीपवदिति । तदयुक्तम् । अर्थाल्लोके प्रदीपस्य सकृदसकृद्वा क्रिया । यदि सकृत् कृतः सर्वं प्रकाशयति सकृत् क्रियते, अथ न प्रकाशयति ततोऽसकृत् । ततश्चास्य प्रत्यक्षसामर्थ्यम् । अथेह त्रिधित

उपकारोऽनुपकारो वा गम्यते, न प्रत्यक्षेण । न चास्ति विधानमस्योपकरोतीति सन्निधानाद् विशेषग्रहणाद् गम्यते यस्य सान्निधौ प्रयुक्तस्तस्योपकरोतीति । तस्मादावृत्तिः ॥ ६० ॥ आ० नि० ॥

सकृदिज्यां कामुकायनः परिमाणविरोधात् ॥ ६१ ॥

अथ यदुक्तं सकृदिज्यां कामुकायन आचार्यो मन्यते । नैवम् । चतुर्दशत्रयोदशेत्याहुतिपरिमाणस्य विरोधः स्यादिति । तस्य कः परिहारः । आभाषान्तं सूत्रम् ॥ ६१ ॥

विधेस्त्वितरार्थत्वात् सकृदिज्या श्रुतिव्यतिक्रमः स्यात् ॥ ६२ ॥

विधीयत इति अङ्गं विधिशब्देनोच्यते । अङ्गस्येतरार्थत्वात् । यदेतत् स्थितं, यत्सन्निधौ यत्कृतं तदर्थमेव तदिति तदावृत्त्याङ्गानां प्रयोगः । तत्र चतुर्दश त्रयोदशेत्याहुतिसंख्या नोपपद्यते । आहुतिविधयस्तु चतुर्दश त्रयोदश । तेषां लक्षणया वचनमुपपद्यते । चतुर्दश पौर्णमास्यामाहुतिविधयः । त्रयोदशामावास्यायामिति । नैतत् संख्याविधानम् । प्रचयेनैव संख्यायाः प्राप्तत्वात् । अनुवादस्त्वयम् । अनुवादश्च लक्षणयोपपद्यते । विदितस्य स भवति । आहुतिविधानां चेयं संख्या विहिता, नाहुतीनाम् । तस्मात्तेषामनुवादः ॥ ६२ ॥ आ० नि० ॥

विधिवत् प्रकरणाविभागे प्रयोगं बादरायणः ॥ ६३ ॥

तन्त्रेण प्रयोगं बादरायणो मन्यते स्म । कुतः । प्रकरणाविभागात् । सर्वेषां प्रधानानामविभक्ता प्रक्रिया सम्भूय कारित्वादित्युक्तम् । तत्रेदमर्थं प्रति न गृह्यते विशेषः । यत्तु सन्निधिप्रयोगेण विशेषग्रहणमुक्तं, तदयुक्तम् । किं कारणम् । विशेषो यः सन्निधिक्रमः स प्रकरणेन बाध्यते । विधिवत् । यथा विधौ तुल्यत्वात् प्रकरणस्य सर्वार्थान्यङ्गानि विज्ञायन्ते, न यस्य सन्निधौ तदर्थानि । क्रमस्य प्रकरणेन बाधितत्वात् ॥ ६३ ॥ सि० ॥

अपि चैकेन सन्निधानमविशेषको हेतुः ॥ ६४ ॥

यद्यपि सर्वार्थाः, तदाप्येकस्य कस्यचिदवश्यं सन्निधौ कर्त्तव्याः । तस्मान्न विशेषः सन्निधेरेकान्ततः शक्योऽवधारयितुम् । अतस्तन्त्रेण प्रयोगः । बादरायणग्रहणं कीर्त्त्यर्थं, नैकीयमतार्थम् ॥६४॥ हेतुः

क्वचिद् विधानान्नेति चेत् ॥ ६५ ॥

नैतद्युक्तं, सकृत् क्रियेति । कुतः । क्वचित् सहत्वमाहत्य विधीयते। सह वघ्नन्ति सह पिषन्तीतिदनावृत्तौ सर्वतः प्राप्तायां परिसंख्याऽर्थं भवति । इहैव सहत्वन्नान्यत्रेत्युच्यते ॥ ६५ ॥ आ० ॥

न विधेश्चोदितत्वात् ॥ ६६ ॥

न तत्र परिसंख्या युज्यते । प्राप्तस्य पुनर्वचनं परिसंख्यार्थं भवति । न चेह सहत्वं प्राप्तम्। कुतः । भेदेन निर्वापस्य चोदितत्वात् । आग्नेयाग्नीषोमीययोर्भेदेन निर्वापस्तूक्तः । तयोर्भेदेनैवावहननपेषणे प्राप्नुतः । तत्रावश्यं विधेयं सहत्वम् । तस्मान्न क्वचित् सहत्वविधानादन्यत्र भेदेन क्रिया विज्ञायेतेति ॥ ६६ ॥ आ० नि० ॥

आघारादीनामङ्गाङ्गानां तन्त्राधिकरणम् ॥ ९ ॥

क्वचिच्छ्रूयते, आग्नेयं कृष्णग्रीवमालभेत, सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवं पुरोधायां स्पर्द्धमान इति। तत्र विचार्यते । किं कृष्णग्रीवस्य प्रथमस्य तृतीयस्य सह प्रदानं कर्त्तव्यम् ? अथवा भेदेनेति । किं प्राप्तम् ।

व्याख्यातं तुल्यानां यौगपद्यमगृह्यमाण-विशेषाणाम् ॥ ६७ ॥

व्याख्यातं प्रयोगे यौगपद्यमिति। तुल्यानां तु यौगपद्यमेकशब्दोपदेशात् स्यादिति । इह तु कृष्णग्रीवयोरेकदेवतत्वात् सह प्रयोगे क्रियमाणे न गृह्यते विशेषः । सहक्रिया चैकफलत्वात् प्राप्ता । तस्मात् सहप्रदानम् ॥ ६७ ॥ पूर्व० ॥

भेदस्तु कालभेदाचोदनाव्यवायात् स्याद्विशिष्टानां विधिः प्रधानकालत्वात् ॥ ६८ ॥

भेदस्तु प्रदानस्य युक्तो, न तन्त्रता । कुतः । कालभेदात् । अथ कालभेदः । चोदनाव्यवायात् । सौम्यचोदनया व्यवहिते कृष्णग्रीवचोदने । तत्र पाठक्रमादेकस्य पुरस्तात् सौम्यस्य प्रयोगः प्राप्तः, एकस्योत्तरत्र । तयोर्यदि सह प्रदानं क्रियेत क्रम उपरुध्येत, अन्यतरस्य पुरस्तात् क्रियायामुत्तरस्योपरिष्टात् पूर्वस्य । तस्माद्भेदेन प्रयोगः ॥ ६८ ॥ सि० ॥

तथा चान्यार्थदर्शनम् ॥ ६९ ॥

अभितः सौम्यमाग्नेयौ भवत इति ॥ ६९ ॥ निदर्शनम् ॥

विधिरिति चेन्न वर्त्तमानापदेशात् ॥ ७० ॥

अथ विध्यभिप्रायं कल्प्येत । श्रुत्यर्थमुत्सृज्य लक्षणार्थः परिगृहीतः स्यात् । तस्मात् प्रदानभेदः ॥ ७० ॥ आ० नि० ॥ कृष्णग्रीवस्य भेदेन ग्रहणाधिकरणम् ॥ १० ॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये एकादशस्याध्यायस्य प्रथमः पादः ॥ ११ ॥ १ ॥

अथ एकादशाध्यायस्य द्वितीयः पादः ॥ ११ ॥ २ ॥

एकदेशकालकर्त्तृत्वं मुख्यानामेकशब्दोपदेशात् ॥ १ ॥

दर्शपूर्णमासयोराग्नेयादीनि प्रधानानि । तत्र देशकालकर्त्तारः, समे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजेत अमावास्यायाममावास्यया यजेत । दर्शपूर्णमासयोर्यज्ञक्रत्वोश्चत्वार ऋत्विज इति । तथा चातुर्मास्ये प्राचीनप्रवणे वैश्वदेवेन यजेत, वसन्ते वैश्वदेवेन यजेत । चातुर्मास्यानां यज्ञक्रतूनां पञ्चर्त्विज इति । तत्र विचार्यते । किम् आग्नेयादीनां प्रधानानां तन्त्रं देशकालकर्त्तारः । अथवा भेद एवेति । तत एतावत्तु परीक्ष्यम् । किं चोदनाविधिशेषा देशादयो यदाग्नेयोऽष्टाकपाल इत्येवमादयः । आग्नेयादिचोदनाविधयस्तेषामिमे समादिविधयः शेषाः । आग्नेयोऽष्टाकपाल एवं भवति । एवं सर्वत्र । अथवा, प्रयोगाङ्गं देशादयः । य एषामाग्नेयादीनां प्रयोगः फलसाधनार्थस्तदङ्गानामिति । किञ्चातः । यदि प्रयोगाङ्गं ततस्तन्त्रम् । अथ चोदनाविधिशेषास्ततो भेदेनेति । किं प्राप्तम् । एकदेशकालकर्त्तृत्वं मुख्यानां तन्त्रमित्येषा प्रतिज्ञा । तत एवं तावद्वर्णयति । प्रयोगाङ्गं देशादय इति । कुतः । न तावदृते देशकालकर्त्तृभ्यः प्रयोगो भवति । यच्च येन विना न भवति तत्तदङ्गमित्यवगम्यते । तस्मात् प्रयोगाङ्गं देशादयः । यदा प्रयोगाङ्गं तदा तन्त्रभावः । कस्मात् । एकदेशोपदेशात् । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति एकशब्दोपदेशादेकं फलम् । एकफलात् सहप्रयोगः । तत्र न गृह्यते विशेषो देशादीनामैदमर्थ्यं प्रति । अगृह्यमाणे विशेषे तन्त्रभावो युक्तः । तस्मात् तन्त्रं देशादयः ॥ १ ॥ पूर्व० ॥

अविधिश्चेत् कर्मणामभिसम्बन्धः प्रतीयेत तल्लक्षणार्थाऽभिसंयोगाद् विधित्वाच्चेतरेषां प्रति प्रधानभावः स्यात् ॥ २ ॥

अविधिश्चेद् यदि चोदनाविशेषो न स्यात् । देशादिविधिस्ततः कर्मणामाग्नेयादीनां भेदेन देशादिभिरभिसम्बन्धो न प्रतीयेत।चोदनाविशेषस्त्वयम् । किं कारणम् । इह समे दर्शपूर्णमासाभ्यामित्येवमादिभिर्वाक्यैर्देशादयो विधीयन्ते । अप्राप्तत्वात् । ते चेद्विधीयन्ते, आग्नेयादीनां दर्शपूर्णमासशब्देनानुवादयितव्यम् । अन्यथा अनेकाऽर्थविधानमेकस्मिन् वाक्ये भवतीति । अनुवादे च तेषां सहत्वं न विवक्ष्यते । विवक्ष्यमाणे वाक्यभेदो भवति। आग्नेयादिना देशादयः । तेषां च सहितानामिति । कथम् । समे दर्शपूर्णमासाभ्यामित्येवमादिभिर्वाक्यैराग्नेयादिषु देशादयो न विधातुं शक्यन्ते। लक्षणार्थाऽभिसंयोगात् । लक्षणार्थेनाभिसंयोगो विज्ञायते दर्शपूर्णमासशब्दः समुदायार्थोऽयम् । समुदायश्च समुदायिलक्षणार्थः शक्नोति साहचर्यात् समुदायिनो लक्षयितुम् । न त्वेवमपि लक्षणाश्रितो भवति। वरं लक्षणा, नैकवाक्यस्यानेकार्थत्वम् । अनेकार्थत्वे अगमकत्वम् । लक्षणानुगामिका । लौकिकत्वात् । अपि च श्रुत्या समुदाये देशादयो विधीयेरन्।न च समुदायस्य देशादिभिः सम्बन्धोऽस्ति। कारकं हि समयः । कारकस्य कर्मणा सम्बन्धो, न कर्मगुणेन । तस्मादपि लक्षणा । यथा पौर्णमासीमभिमृशेदिति हविर्लक्षणा । चोदनाविधित्वाच्चेतरेषां देशादीनां प्रतिप्रधानभावः स्यात् । गृह्यमाणविशेषत्वात् । अथ केन समादय आग्नेयादिषु विधीयन्ते । समे यजेत पौर्णमास्यां यजेतेत्यनेनाख्यातेन । अत्र हि धातुना यागमनूद्य विभक्त्या तेषु समादीनां विधिः कर्त्तारोऽपि, यस्तेषां यागानां रूपविधानार्थो भवति । अच्युतो भवतीति। तेन विधीयन्ते। अथ वा अस्तिर्भवतीति परः प्रथमपुरुषे प्रयुज्यमानोऽप्यस्तीति ॥ २ ॥ सिद्धान्तः ॥ आग्नेयादीनां न देशकालादितन्त्रताधिकरणम् ॥ १ ॥

एवं स्थितमपर्यवसितं भवत्यतोऽन्तरा चिन्तान्तरं क्रियते । किं पुनः कारणमेतस्मिन्नपर्यवसिते चिन्तान्तरमारभ्यते । एतस्मिन्न्याये स्थिते तस्याश्चिन्तायाः पूर्वपक्ष उत्तिष्ठति । अतोऽसौ एतस्माद्-

न्तरमुच्यते ॥

अङ्गेषु च तदभावः प्रधानं प्रति निर्देशात् ॥ ३ ॥

अङ्गेषु इदानीं विचार्य्यते । किं तेषां समुदाय एव देशकालकर्त्तारः । अथवाऽनियम इति । किं प्राप्तम् । अङ्गेषु च तदभावः । कुतः । प्रधानं प्रति निर्देशात् । चोदनाविधिशेषत्वेनाग्नेयादीनि प्रधानानि प्रति समादयो निर्दिष्टा नान्यत्र भवन्ति । तस्मादनियमः । यथा द्रव्यदेवतं यत् प्रधानेषु न तदङ्गेषु । एवं देशादयोऽपि । स्थितादुत्तरम् ॥ ३ ॥ पूर्व० ॥

यदि तु कर्मणो विधिसम्बन्धः स्यादैकशब्द्यात् प्रधानार्थाभिधासंयोगात् ॥ ४ ॥

यदि आग्नेयादेः कर्मणः समादिसम्बन्धः स्यात् ततःस्याच्चोदनाविधिशेषत्वं, भेदेन च समादयः । न तु तदस्ति । कुतः । ऐकशब्द्यात् प्रधानार्थाभिधासंयोगात् । यस्मादाग्नेयादीनां समस्तानामेकशब्दो वाचकस्तेन समादीनामभिसंयोगः । समे दर्शपूर्णमासाभ्यां यजेतेति । न ये व्यस्तानां वाचकाः, यदाग्नेयोऽष्टाकपाल इत्येवमादयः । तत्र प्रत्यक्षं समस्तसंयोगमुत्सृज्य परोक्षो व्यस्तसंयोगः कल्प्यः । सोऽपि लक्षणया । अथ तु प्रधानानामभिसंयोगः क्रियते तत उभयमपि परिहृतं भवति । कः पुनः प्रधानार्थः । प्रधानं फलं, तत्साध्यात् प्रधानार्थो यो व्यापारः । कश्चासौ आग्नेयादीनां प्रयोगः । कथं तेनाभिसंयोगः समादीनां विज्ञायते । उच्यते । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन समस्तानामाग्नेयादीनां फलसाधनाऽर्थः प्रयोग उक्तः । तस्य च यदि पुनः श्रुत्या समादयो विधीयन्ते, याभ्यामेताभ्यां दर्शपूर्णमासाभ्यां यजेत ताभ्यां समे यजेतेति, ततो न परोक्षो व्यस्तसम्बधः कल्पितो भवति । न च लक्षणा । तस्मात् प्रयोगे विधिरेतेषाम् । स च सर्वेषां प्रधानानां साधारणः । तत्रैदमर्थ्यं प्रतिगृह्यते विशेषः । तस्मात्तन्त्रं देशकालकर्त्तारः ॥ ४ ॥ सि० ॥

तथा चान्यार्थदर्शनम् ॥ ५ ॥

अन्यार्थोऽप्येतमेवार्थं दर्शयति उग्राणि ह वा एतानि घोराणि हवींषि यदमावास्यायां सम्भ्रियन्ते आग्नेयं प्रथममैन्द्रे उत्तरे इति । सम्भरणं पौर्वापर्यं चैककालत्व उपपद्यते । तस्मादपि तन्त्रम् ॥ ५ ॥ निदर्शनम्

श्रुतिश्चैषां प्रधानवत् कर्मश्रुतेः परार्थत्वात् ॥ ६ ॥

इतश्च प्रयोगचोदना पुनः श्रुतिरियम् । कुतः । श्रुतिस्तेषां समादीनां प्रधानानामिव । कथं कृत्वा । कर्मश्रुतेः परार्थत्वात् । यात्र कर्मश्रुतिः, दर्शपूर्णमासाभ्यामिति । सा परार्था । तृतीयायोगात् । तथा सामानाधिकरण्यात् । यजेतेति यजिरपि परार्थ एव।तदेतदेवमापद्यते, दर्शपूर्णमासयागेनाऽन्यत् किमपि कुर्यादिति ॥ ६ ॥ हेतुः ॥

कर्मणोऽश्रुतत्वाच्च ॥ ७ ॥

कर्म च न श्रुतं, कार्यं न श्रुतं, प्रधानं न श्रुतमित्यर्थः । तस्य स्थाने समादीनि श्रूयन्ते । प्रधानस्थाने श्रुतत्वात् । श्रुतिरेषां प्रधानवदित्युच्यते । न च तानि प्रधानानि । तत्र यदि आग्नेयादिवाक्यानां पुनः श्रुतिरियं कल्प्येत गुणभावानुवादो भज्येत । न हि तत्र तेषां गुणभाव उक्तः । उत्पत्तिमात्राख्यानानि तानि च किञ्चित् कार्यं निर्देष्टुं यदपेक्ष्यानुक्तोऽपि गुणभावोऽर्थप्राप्तोऽनूद्येत । प्रयोगचोदनायां तु गुणभाव उक्तः । कार्यमपि फलम् । तस्मात् तस्याः पुनः श्रुतिरियम् । तथा च तन्त्रभावः सिद्धः ॥ ७ ॥ हेतुः ॥

अङ्गानि तु विधानत्वात् प्रधानेनोपदिश्येरँस्तस्मात् स्यादेकदेशत्वम् ॥ ८ ॥

अङ्गेषु स्थितादुत्तरम् । यदा प्रयोगाङ्गं देशादय इत्युपपन्नं तदायमुत्तरः पक्ष उत्तिष्ठति । तस्मात् ततोऽनन्तरमुच्यते । यदुक्तम् अङ्गेषु देशादीनामनियम इति । तन्न । अङ्गेषु समादिनियम इति । कुतः ? । यतोऽङ्गान्यपि प्रधानेन फलसिद्धावुद्दिश्यमानेन सहोपदिश्यन्ते । कथम् । विधानत्वात् । प्रधानानां फलं साधयतां विधानमेतद्यदुपेताङ्गप्रयोगो विधानकल्प इतिकर्त्तव्यतेत्यर्थः । अतो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्राङ्गवान् प्रयोगः प्रधानानां युक्तः।यथा विधिस्तत्रोक्तस्तथाविधेन पुनः श्रुत्या समादीनां विधिः । अतोऽङ्गानामपि प्रधानैः सहैकदेशकालकर्तृत्वं स्यात् ॥ ८ ॥ सि० ॥

द्रव्यदेवतं तथेति चेत् ॥ ९ ॥

अथ यदुक्तं यथा द्रव्यदेवतं प्रधानानामङ्गानां च भेदेन भवति एवं देशादयोऽपि स्युरिति । तत् परिहर्त्तव्यम् ॥ आभासान्तं सूत्रम् ॥ ९ ॥ आ० ॥

न चोदनाविधिशेषत्वान्नियमार्थो विशेषः ॥ १० ॥

नैतदेवम् । कुतः । चोदनाविधिशेषत्वात् । चोदनाविधिशेषो हि द्रव्यदेवताविधिः । तेन प्रधानेषु द्रव्यदेवताविशेषो नियतः। इहाऽग्निः पुरोडाशश्च । इहाज्यमग्नीषोमौ चेति । तथाङ्गेष्वपि आज्येन प्रयाजान् यजति, शेषात् स्विष्टकृतं यजतीति । न चान्यत्र निर्दिष्टोऽन्यत्र भवति। तथेह प्रयोगाङ्गत्वाद् देशादीनाम् । तस्य च प्रयोगस्य साधारण्यात् । तन्त्रिभाव इत्यपदिष्टो हेतुः । तस्माद्विषमं द्रव्यदेवतेन ॥ १० ॥ आ० नि० ॥

तेषु समवेतानां समवायात्तन्त्रमङ्गानि भेदस्तु तद्भेदात् कर्मभेदः प्रयोगे स्यात्तेषां प्रधानशब्दत्वात्तथा चान्यार्थदर्शनम् ॥ ११ ॥

यदि च समानं द्रव्यदेवतमङ्गानां प्रधानानां च स्यात् ततस्तेषु द्रव्यदेवतेषु समानेषु समवेतानामङ्गानां प्रधानानां च समवायात् तदवस्थोऽविशेष इति तन्त्रमिज्या स्याद्भेदस्तु तद्भेदात् । अथ तु भेदो द्रव्यदेवतस्य ततस्तद्भेदात् कर्मभेदः प्रयोगे स्यात्।इज्याकर्मणः प्रयोगविशेषग्रहणाद्भेदः स्यात् । तथा चान्यार्थदर्शनं युक्तं भविष्यति चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायामिति । तस्मादपि द्रव्यदेवतस्य भेदः ॥ ११ ॥ हेतुः ॥ अङ्गानां प्रधानदेशादिनियमाधिकरणम् ॥ २ ॥

दर्शपूर्णमासयोर्द्वौ समुदायौ दर्शः पूर्णमासश्च । तथा राजसूयेऽनुमत्यादय इष्टयः पवित्रादयः सोमाः । चातुर्मास्येष्वपि पर्वाणि वैश्वदेवादीनि । तत्र विचार्यते । किं दर्शस्य पूर्णमासस्य च तन्त्रेण अङ्गानां प्रयोगः । तथा राजसूयेष्टीनां सोमानां च चातुर्मास्येषु च पर्वाणामुत तन्त्रभेदेनेति । किं प्राप्तम् ॥

इष्टिराजसूयचातुर्मास्येष्वैककर्म्यादङ्गानां तन्त्रभावः स्यात् ॥ १२ ॥

तत्र तत्र तन्त्रेण प्रयोगः । कुतः । ऐककर्म्यात् । एकफलत्वादित्यर्थः । एकं फलमिह तत्र तत्र श्रूयते । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत । रा जसूयेन स्वाराज्यकामो यजेत । चातुर्मास्यैः स्वर्गकामो

यजेत । एकत्वात् फलस्यैकः प्रयोगः । तत्र न गृह्यते विशेषः । तस्मात् तन्त्रम् ॥ १२ ॥ पूर्व० ॥

कालभेदान्नेति चेत् ॥ १३ ॥

नैतदेवं, तन्त्रमङ्गानीति । किं तर्हि । भेदेन । कुतः । कालभेदात् । क्वचित् कालभेदः, क्वचिद्देशभेदः। दर्शपूर्णमासयोः कालभेदः, पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति। तथा, चातुर्मास्यस्य पर्वणां वसन्ते वैश्वदेवेन यजेत, वर्षासु वरुणप्रघासैर्यजेत, हेमन्ते साकमेधैर्यजेतेति । राजसूये देशभेदः । बार्हस्पत्यश्चरुर्ब्रह्मणो गृह ऐन्द्रमेकादशकपालो राज्ञो गृहे आदित्यश्चरुर्महिष्या गृह इति। कालभेदाद्देशभेदाच्च गृह्यते विशेषः । पौर्णमासी येषामङ्गानां कालस्तानि पौर्णमास्या उपकुर्वन्ति, नामावास्यायाः । वैगुण्यात् । तस्माद्भेदः ॥ १३ ॥ आ० ॥

नैकदेशत्वात् पशुवत् ॥ १४ ॥

नैतदेवं भेद इति । कुतः । एकदेशत्वात् । यत्र फलसम्बन्धस्तत्राङ्गानां चोदना । यत् कारणं फलं साधयतां प्रधानानामङ्गान्युपकारे वर्त्तन्ते । समुदायचोदनायाः फलसम्बन्धः । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । राजसूयेन स्वाराज्यकामो यजेतेति । चातुर्मास्यैः स्वर्गकामो यजेतेति । नैकदेशचोदनायां पौर्णमास्यां पौर्णमास्या यजेत,वसन्ते वैश्वदेवेनयजेत, बार्हस्पत्यश्चरुर्ब्रह्मणो गृह इति। न चेत्तत्राङ्गानां प्राप्तिः कुतो भेदेन प्रसङ्गः । समुदायस्य तु फलैकत्वादेकः प्रयोगः । तस्माद्यस्मिन् कस्मिँश्चिदवयवे क्रियमाणान्यङ्गानि समुदायेन सम्भन्त्स्यन्ते । समुदायस्यावयवैरव्यतिरेकात् । पशुवत् । यथा पशौ भिन्नकालेष्वप्येकदेशेषु वपया प्रातःसवने चरति पुरोडाशेन माध्यन्दिने, अङ्गैस्तृतीयसवन इति नाङ्गानामावृत्तिर्भवति, तद्वत् ॥ १४ ॥ आ० नि० ॥

अपि वा कर्म पृथक्त्वात्तेषां तन्त्रविधानात् साङ्गानामुपदेशः स्यात् ॥ १५ ॥

अपि वा न तन्त्रमङ्गानि स्युः । कुतः । कर्मपृथक्त्वात् । तेषां च तन्त्रविधानात् । कर्माणि तावदेतानि भिन्नानि । अन्यः पौर्णमासीसमुदायोऽन्य आमावास्यः । एवं सर्वत्र। तेषां च देशकालभेदः पौर्णमास्यां पौर्णमास्या यजेतेत्येवमादिः । साङ्गानां च तेषां तत्र

देशकालविधिः ननु नैवात्राङ्गानि प्राप्यन्ते इत्युक्तम्। कुतस्तेषां देशकालविधिः। उक्तमेतत्। प्रयोगे पुनः श्रुत्या समादयो विधीयन्त इति। तत्र समे दर्शपूर्णमासाभ्यां यजेतेति, समुदायप्रयोगे पुनः श्रुतिः। पौर्णमास्यां पौर्णमास्या यजेतेत्येकदेशे पुनः श्रुतिः। एवं सति पौर्णमासप्रयोगे कालो विहितः। अविभक्तश्चाङ्गानां प्रधानेन प्रयोगः। तस्मात् पौर्णमास्यङ्गानां पौर्णमासीकाल। अमावास्याऽङ्गानाममावास्याकालः। तत्र गृह्यते विशेषग्रहणाद्भेदः ॥१५॥ सि० ॥

तथा चान्यार्थदर्शनम् ॥ १६ ॥

चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायामिति तन्त्रभावेन पौर्णमास्यां चतुर्दशाहुतयः स्युरमावास्यायां त्रयोदश। भेदे तूभयत्रोभयं भवति तस्माद्भेदः ॥ १६ ॥ हेतुः ॥

तथा तदवयवेषु स्यात् ॥ १७ ॥

यदा चैष न्यायस्तदावयवेष्वप्यवयवेषु देशकालभेदात् तन्त्रभेदः। तत्र चातुर्मास्यावयवयोरनीकवत् सान्तपनीययोर्बर्हिषः साधारण्यवचनमर्थवद्भवति। यदानीकवतो बर्हिस्तत्सान्तपनीयस्येति इतरथा सिद्धत्वात् तदनर्थकं स्यात्। तस्मादपि भेदः॥१७॥ युक्तिः॥

पशौ तु चोदनैकत्वात्तन्त्रस्य विप्रकर्षः स्यात् ॥ १८ ॥

यत्तूक्तं पशुवदिति। तत्र ब्रूमः। पशौ युक्ता सकृदङ्गानां क्रिया। तत्र ह्येकमेव तन्त्रं केवलं, प्रचारस्य वचनाद्विप्रकर्षः। तदैक्यन्तु चोदनैकत्वात्। एका तत्र चोदना आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति। कर्म्मचोदनायां ह्यङ्गानां ग्रहणं च प्रचारचोदनायां, तदेव हि प्रधानं विप्रकृष्टकालेन प्रचारद्वयेन निर्वर्त्यते। तदर्थानि च कृतान्यङ्गानि। तेषां पुनः क्रियायां हेतुर्नास्ति। तस्माद्विषम उपन्यासः ॥१८॥ पूर्व० आ० नि०॥ राजसूयादावङ्गावृत्त्यधिकरणम् ॥ ३ ॥

तथा स्यादध्वरकल्पेष्टौ विशेषैस्यककालत्वात् ॥ १९ ॥

इदं श्रूयते— आग्नावैष्णवं प्रातरष्टाकपालं निर्वपेत्, सारस्वतं चरुं बार्हस्पत्यं चरुमाग्नावैष्णवमेकादशकपालं माध्यन्दिने, सारस्वतं चरुं बार्हस्पत्यं चरुमाग्नावैष्णवं द्वादशकपालमपराह्णे सारस्वतं चरुं बार्हस्पत्यं चरुं, यस्य भ्रातृव्यः सोमेन यजेतेति। तत्र चिन्त्य-

ते । किं त्रिषु कालेषु युज्यमानानाम् एतेषां कर्म्मसमुदायानां तन्त्रेणाङ्गानां क्रिया ? उत भेदेनेति । किं प्राप्तम् । तथा स्यादध्वरकल्पायां यथा पशौ तन्त्रमङ्गानां प्रयोगः।कुतः। विशेषस्यैककालत्वात् । अङ्गविशेषः कश्चिदेषां भिन्नकालानां समुदायानामेककालः श्रूयते, पुरावाचः प्रवदितो निर्वपेदिति । कथं पुनर्ज्ञायते सर्वेषां निर्वापाणामयं कालविधिरिति । सर्वेषां ह्येषामेकफलत्वादेकप्रकरणम् । सैषाऽध्वरकल्पेष्टिः यज्ञमेवैतया प्राप्नोति चैकशब्देन युगपत् फलं प्रति विधानात् । तस्मान्नैककाले क्रियमाण उत्तरकालयोः समुदाययोर्निर्वापः प्रतिकृष्येत । स प्रतिकृष्यमाणस्ततः प्राग्भाविनामङ्गानां प्रतिकर्षे वर्त्तेत तदा दिवाभिसम्बन्धात्। तदन्तमपकर्षे स्यादिति तानि प्रतिकृष्टानि सर्वेषां तन्त्रं भवन्ति । तेषु तन्त्रेषु उत्तरेषामपि तन्त्रभावो युक्तः । कुतः । यदि सर्वाणि तन्त्रं क्रियन्ते नास्ति तन्त्रभावे क्रमभेदः । अथानुक्रमभेदः ततः पूर्वस्य सर्वं गुणकाण्डमपवृज्योत्तरस्योपक्रमेण भवितव्यम् । तथा निर्वापान्तेषु प्रतिकृष्यमाणेषु क्रमभेदो भवति । न तत्पूर्वस्य प्रोक्षणादीनि क्रियन्ते यावदुत्तरस्य निर्वापान्तानि न कृतानि । अपि च सहोपक्रमे युगपच्चिकीर्षा । तस्यां च सत्यां यद्यदापतति तत्तदगृह्यमाणविशेषत्वात् साधारणं भवति ॥ १९ ॥ पूर्व० ॥

इष्टिरिति चैकवच्छ्रुतिः ॥ २० ॥

सैषाध्वरकल्पेष्टिरिति चैकवच्छ्रवणम् । तत्र तावदेकैवेष्टिः । वहव एते यागाः । यदि तु सह क्रियन्ते ततः सैकसमाप्ते यतीभावः पर्य्यवसितो भवतीति एकवदुपचार उपपद्यते । तस्मात्तन्त्रम् । ॥ २० ॥ पूर्व० युक्तिः ॥

नैतदेवं, तन्त्रमङ्गानीति । किन्तर्हि । भेदेन । कुतः ।

अपि वा कर्मपृथक्त्वात्तेषां च तन्त्रविधानात् साङ्गानामुपदेशः स्यात् ॥ २१ ॥

कर्माणि तावदेतान्याग्नावैष्णवादीनि पृथग्भूतानि । तेषां तन्त्रविधानं नानाकालेषु प्रातर्मध्यन्दिनेऽपराह्ण इति । तत्रैषां साङ्गानामुपदेशः स्यादतः कालभेदादङ्गानां गृह्यते विशेषः । तस्माद्भेदः ॥ २१ ॥ सि०

यत्तु विशेषस्यैककालत्वादिति । तत्र ब्रूमः—

प्रथमस्य वा कालवचनम् ॥ २२ ॥

प्रथमस्य कर्मणो यो निर्वापस्तस्यैतत्कालवचनम् । पुरा वाचः प्रवदितो निर्वपेदिति । ननु प्रकरणात् सर्वेषां प्राप्नोति । न प्रकरणं धर्माणां विशेषकम् । किन्तर्हि । विनियोजकम् । इदमत्र भवतीत्येतत् प्रकरणस्य सामर्थ्यं, नास्येदं, तस्येदमिति । त्रयाणां च निर्वापाणां क्रमप्राप्तस्य पूर्वस्यैव विज्ञायते । तस्मान्नास्ति विशेषस्यैककालत्वम् । कर्मणां च तत्र भेदः कालभेदादिति ॥ २२ ॥ पूर्व० आ० ॥

फलैकत्वादिष्टिशब्दो यथान्यत्र ॥ २३ ॥

यस्त्विष्टिरिति भिन्नानामपि कर्मणामेकफलानां फलस्यैकत्वमपेक्ष्यैकवचनं भवति । फलान्तरत्वादीहायाः । यथा सर्वपृष्ठेष्टिर्मृगारेष्टिः सुमनानामेष्टिरिति ॥ २३ ॥ पूर्व० आ० नि० ॥ आग्नावैष्णवाद्यङ्गानां भेदेनानुष्ठानाधिकरणम् ॥ ४ ॥

वसाहोमस्तन्त्रमेकदेवतेषु स्यात् प्रदानस्यैककालत्वात् ॥ २४ ॥

एकदेवताः पशव उदाहरणम् । सप्तदश प्राजापत्यान् । पशूनालभत इति । अस्ति तु प्रकृतावग्नीषोमीयपशौ वसाहोमः कर्त्तव्यः । याज्यार्द्धर्चा वसां जुहोतीति । स इह चोदकेन प्राप्यते । तत्र चिन्त्यते । किं भेदेन वसाहोमः कर्त्तव्यः, अथवा तन्त्रमिति । किं प्राप्तम् । वसाहोमस्तन्त्रमेकदेवतेषु स्यात् । प्रदानस्यैककालत्वात् । वसाहोमः खल्वेकदेवतेषु तन्त्रं स्यात् । कुतः । प्रदानस्यैककालभावात् । एककालं तेषां प्रदानम् । वैश्वदेवीं कृत्वा प्रचरन्तीति । देवता चैका प्रजापतिः । अतस्तेषामेकप्रदानत्वम् । प्रदानस्यैकत्वाद् एकः सर्वेषां साधारणो याज्यार्द्धर्चान्तः । तत्र क्रियमाणस्य होमस्येदमर्थं प्रति न गृह्यते विशेषः । तस्मात्तन्त्रम् ॥ २४ ॥ पूर्व० ॥

कालभेदात्त्वावृत्तिर्देवताभेदे ॥ २५ ॥

देवताभेद एकादशिनेषु भिन्नप्रदानेषु भिन्ना याज्यार्द्धर्चान्ताः । तेषु गृह्यते विशेषो यस्य प्रदानस्य याज्यार्द्धर्चान्तः कृतः स तदर्थ इति । तस्मात् तन्त्रभेदः ॥ २५ ॥ सिद्धान्तः ॥ वसाहोमे भेदेनाऽनुष्ठानाधिकरणम् ॥ ५ ॥

अन्ते यूपाहुतिस्तद्वत् ॥ २६ ॥

ज्योतिष्टोमे यूपैकादशिनी, एकादश यूपान् छिनत्तीत्याम्नाता। अस्ति तु प्रकृतावग्नीषोमीये पशौ यूपाहुतिः। सा किं भेदेन कर्त्तव्या? उत तन्त्रमिति। किं प्राप्तम्। अन्ते यूपाहुतिः। तद्वत्। यद्वन्नानादेवतेषु वसाहोमो भेदेन, तद्वदियमपि भेदेन कर्त्तव्येत्यर्थः। कुतः?। यूपस्यान्तिकेऽग्निं मथित्वा यूपाहुतिं जुहोतीति श्रूयते। बहूनां च यूपानां भिन्नान्यन्तिकानि। यस्यैव यूपस्यान्तिके न हूयेत तस्यैव तेन गुणेन वर्जनं स्यात्। तस्माद्भेदेन कार्यम् ॥ २६ ॥ पूर्व० ॥

इतरप्रतिषेधो वा ॥ २७ ॥

अथ वा नैव भेदेन कर्त्तव्येति। किन्तर्हि। तन्त्रम्। कस्मात्। इतरप्रतिषेधोऽयम् आहवनीयप्रतिषेधो, नान्तिकविधिः। कथं ज्ञायते। आहवनीये जुहोतीत्युत्सर्गात् सर्वहोमेष्वाहवनीयः प्राप्तः। तत्राग्निं मथित्वेति वाच्यम्। तदपि मन्थनं प्राग्वंशे कर्मणः प्रवृत्तत्वात् प्राग्वंशे प्राप्तम्। तत्रेदमपि वक्तव्यम्। यूपस्यान्तिकेऽग्निं मथित्वेति। उभयस्मिंश्चापि विधीयमाने वाक्यभेदो, मन्थनस्य स्वार्थवद्भावात्। तस्मादन्यतरदविवक्षितं मन्थनमन्तिकं वा। तत्र च मन्थनं विवक्षितमविवक्षितमन्तिकमिति ब्रूमः। कुतः। मन्थनविधिपरत्वाद्वाक्यस्य। एवं ह्याह, यूपमाच्छेत्स्यता होतव्यं, न हि दीक्षितस्याग्नौ जुहोतीति दीक्षितस्याग्नौ होमे दोषं मन्यत इति। तत्परिहारार्थं कल्पान्तरमुक्तं वैष्णवीमनूच्याच्छेत्स्यत इति। तथाप्यहोमे दोषमिव मन्यमानः पुनः पुनराह होतव्यमिति पुरुषस्यैव जुहोत्यायतन इति। तदुभयमपि तत्र न शक्यमितिप्रतिषिद्ध्य तृतीयं कल्पमाह। यूपस्यैवान्तिकेऽग्निं मथित्वा तथा होतव्यम्। तदुभयमपि शक्यं जुहोत्यथ न दीक्षितस्याग्नौ जुहोतीति। तत्र यदि यूपस्यान्तिके जुहोतीत्येतद्विवक्षितं न मन्थनं, तत्राहवनीयमेव यूपस्यान्तिकं नीत्वा होमः प्राप्नोति। आहवनीये जुहोतीति नियमात्। तत्र, न दीक्षितस्याग्नौ जुहोतीत्येतन्न सम्बद्ध्यते। अथ तु अग्निं मथित्वेत्येतद्विधीयते तत आहवनीयप्रतिषेधो भवति। अन्योऽयमाहवनीयाद् यो मथ्यते। तत्रैतत् समर्थितं भवति, जुहोति च, न चाहवनीये जुहोतीति। तस्माद् मन्थनं विधीयते, नान्तिकम्। अनुवादमात्रमन्तिकस्य। कुतः प्राप्ते-

ऽनुवादः ? । सौकर्य्यात् सहाग्निना यूपान्वेषणं दुष्करणम् । यूपाऽन्तिके त्वग्निं मथित्वा सुकरो होमः। न्यायप्राप्तस्यानुवादः । एवं सति यद्यनान्तिके जुहोति, न दोषः । अथ कस्मान्मन्थनमात्रं कृत्वा आहवनीये एव न हूयेत । अदृष्टं कल्पितं भवति । तस्मात् तन्त्रं यूपाहुतिः ॥ २७ ॥ सि० ॥

अशास्त्रवत्त्वाच्च देशानाम् ॥ २८ ॥

न चान्तिकदेशाः शक्याः शासितुमापेक्षिकत्वादन्तिकस्य । अथ परमान्तिकं शिष्येत तदा यूप 'उपदह्येत । तच्च प्रतिषिद्धम् । न च शक्यं परमान्तिकेऽग्निमन्थनं कर्त्तुम्। तस्मादप्यविवक्षितत्वमन्तिकस्य ॥ २८ ॥ युक्तिः ॥ यूपाहुतौ तन्त्राधिकरणम् ॥ ६ ॥

अवभृथे प्रधानेऽग्निविकारः स्यान्न हि तद्धेतुरग्निसंयोगः ॥ २९ ॥

अस्ति ज्योतिष्टोमेऽवभृथः तस्मिँश्च श्रूयते । अप्स्वभृथेन चरन्तीति । तत्र विचार्यते । किं प्रधानमात्रमप्सु कर्त्तव्यमथ वाङ्गान्यपीति । किं प्राप्तम् । अवभृथे प्रधानेऽग्निविकारः । प्रधानमात्रमप्सु कर्त्तव्यम् । कुतः । न हि तद्धेतुरग्निसंयोगः । न ह्यङ्गानां प्रधानहेतुकोऽग्निना संयोगः । यदाहवनीये जुहोतीति होममात्रेऽग्निर्विहितः । स यथा प्रधाने तथाङ्गेषु । आपस्तु प्रधाने केवले विहिताः।अप्स्ववभृथेन चरन्तीति । अवभृथशब्दो हि वरुणदेवतस्यैककपालद्रव्यस्य यागस्य वाचकः । तदुत्पत्तिवाक्ये श्रुतत्वाद्वारुणेनैककपालेनावभृथं यन्तीति । न चात्र गमनं विधीयते । अथ गृहीतं तदप्सु प्रचारवचनात् । न चावभृथो नाम कश्चिद्देशोऽस्ति, यं वारुणेनैककपालेन गच्छेयुः । न च वारुण एककपालोऽस्ति येन गमनमुच्येत । तस्मादेककपालस्य देवतासम्बन्धकरणमेवात्रोच्यते । स च यागस्तद्वचनोऽवभृथशब्दस्तस्मिन्नापो विहिताः । तासामङ्गेषु कः प्रसङ्गः । द्रव्यदेवतवत् । यथा द्रव्यमेककपालो वरुणश्च देवता प्रधाने विहितत्वान्नाङ्गेषु भवतः । एवमापोऽपि ॥ २९ ॥ पूर्व० ॥

साङ्गो वा प्रयोगवचनैकत्वात् ॥ ३० ॥

साङ्गो वावभृथोऽप्सु प्रवर्त्तेत । कुतः । प्रयोगवचनैकत्वात् । नाऽत्रापोऽवभृथे श्रूयन्ते । किन्तर्हि । प्रयोगे । न ह्येतद्वचनमप्स्वभृथ

इति । कथन्तर्हि अप्स्ववभृथेनेति । द्वे अपि पदे कारकवचने । न च विशेषणविशेष्यता । उभयोश्चरन्तीति क्रियया सम्बन्धो, न मिथः। चरन्तीति प्रयोग उच्यते । तस्मात् प्रयोगाङ्गमापः । अविभक्तश्चाऽङ्गप्रधानानां प्रयोग इत्युक्तम् । अङ्गानि तु विधानत्वात् प्रधानेनोपदिश्येरन्नित्यत्र । तस्मात् साङ्गोऽवभृथोऽप्सूपदिष्टो, न केवलः । अतोऽङ्गान्यपि तत्रैव कर्त्तव्यानि ॥ ३० ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ ३१ ॥

लिङ्गं चैतमर्थं दर्शयति, अप्सु तृणं प्रास्याघारयतीति । यद्यङ्गानामग्नौ वृत्तिः स्यादुभयं विधीयेत । अप्स्वाघारयति तृणं प्रास्यतीति च । तद्वाक्यभेददोषः स्यात् । अथ यथोक्तो न्यायस्तथाप्स्वित्यनूद्य तृणप्रासनं केवलं विधीयत इति नास्ति दोषः ॥ ३१ ॥ हेतुः ॥

अथ यदुपवर्णितं द्रव्यदेवतवदिति । तत्र ब्रूमः—

शब्दविभागाच्च देवता नयः ॥ ३२ ॥

विभक्तशब्दः प्रधानस्यावभृथ इति वाचकः । अङ्गानामाघारादयः शब्दाः । अवभृथशब्दसंयुक्तं च द्रव्यदेवतं, वारुणेनैककपालेनाऽवभृथं यन्तीति । तस्मान्न तदङ्गेषु भवति । आपस्तु प्रयोगाङ्गमित्येवमपदिष्टो हेतुः । अतोऽनुपवर्णनमेतत् ॥ ३२ ॥ पूर्व० युक्ति–नि० ॥ अवभृथाधिकरणम् ॥ ७ ॥

वरुणप्रघासेषु विहारपृथक्त्वमाम्नातं, पृथगग्नी प्रणयतः, पृथग्वेदी कुरुत इति । तत्र श्रूयते अध्वावध्वर्युरुत्तरे विहारे हवींष्यासादयति । मारुतीमेव प्रतिप्रस्थाता दक्षिणस्मिन्निति । इह विचार्यते । किं भेदेन दक्षिणविहारेऽङ्गानि कर्त्तव्यानि? अथ वा यान्येवोत्तरे कृतानि तान्येवोत्तरत्राप्युपकुर्वन्तीति । किं प्राप्तम् ।

दक्षिणेऽग्नौ वरुणप्रघासेषु देशभेदात् सर्वं क्रियते॥३३॥

भेदेनाङ्गानि कर्त्तव्यानि । कुतः । देशभेदात् । देशो हि भिद्यते, दक्षिण उत्तर इति । यान्युत्तरे विहारे प्रधानानि तेषां तद्देशान्येवाऽङ्गान्युपकुर्वन्त्यङ्गानि तु विधानत्वात् प्रधानेनोपदिश्येरन् । तस्मात् स्यादेकदेशत्वमिति नान्यदेशाया मारुत्याः । तस्मात् तदर्थं दक्षिणे विहारे भेदेन कर्त्तव्यानीति ॥ ३३ ॥ पूर्व० ॥

अचोदनेति चेत् ॥ ३४ ॥

एवं चेत् पश्यसि देशभेदादङ्गानां पृथक् क्रियेति। नैतद् युक्तम्। यत् कारणमचोदनान्न मारुत्याः। यत्र यागः फलं प्रति चोद्यते तत्राङ्गानि गृह्णाति। न चेह मारुत्याः फलं प्रति चोदना। क तर्हि। चातुर्मास्यैः स्वर्गकामो यजेतेति। नचेदिह कर्म चोद्यते,अङ्गानां प्राप्तिरेव नास्ति, कुतो भेदस्तन्त्रता वा ॥ ३४ ॥ आ० ॥

स्यात् पौर्णमासीवत् ॥ ३५ ॥

स्यादङ्गानां प्राप्तिः। पौर्णमासीवत्। यथा पौर्णमास्यां यजेतेति, न तावत् कर्मफलं चोद्यते। अन्यत्रैव तच्चोदितम्। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। अथ वा साङ्गप्रधानं पौर्णमास्यां क्रियत इत्येवमिहापि भविष्यति ॥ ३५ ॥ आ०नि० ॥

प्रयोगचोदनेति चेत् ॥ ३६ ॥

अथोच्येत प्रयोगस्तत्र पौर्णमास्यां चोद्यते, यजेतेत्याख्यातेन। प्रयोगश्चाङ्गप्रधानानां विवक्षितः। प्रयोगाङ्गं च कालः। तस्मात् तत्र साङ्गं प्रधानं पौर्णमास्यां क्रियत इति तत्र ब्रूमः। तथेह ॥ ३६ ॥ आ० ॥

इहापि मारुत्याः प्रयोगश्चोद्यते ॥ ३७ ॥

आसादयतीत्यनेनाऽऽख्यातेन। यथा च कालः प्रयोगाङ्गमेवं देशोऽपि। तस्माद् मारुत्यपि साङ्गा दक्षिणविहारे कर्त्तव्या। ननु न आसादयतिशब्देन याग उच्यते। कथं तस्य प्रयोगं वक्ष्यति। आह। यागार्थमेतदासादनं, यथा प्रकृतौ। तथा दृष्टार्थं भवति। इतरथाऽदृष्टोऽर्थः कल्पयितव्यः स्यात्। यागार्थं चेत् तत्र यागोऽवश्यं कार्यः। सैषा लक्षणया यागचोदना भवति। यथा सौर्यं चरुं निर्वपेत् सौम्यं बभ्रुमालभेतेति। तस्मादिहापि मारुत्याः प्रयोगश्चोद्यते। तथा च प्राप्तानामङ्गानां भेदेन क्रिया ॥ ३७ ॥ आ० नि० ॥

आसादनमिति चेत् ॥ ३८ ॥

आह। नासादयतिशब्देन याग उच्यते। किन्तर्हि। आसादनम्। ननु लक्षणया यागं वक्ष्यति। न श्रुतिम् उत्सृज्य लक्षणाश्रयणीया। आसादनस्य दृष्टार्थत्वेनाश्रयिष्यते। आश्रीयेत यद्यासादनं दृष्टार्थं सम्भवति। यदि दक्षिणेऽग्नौ मारुत्या होमः सिद्धः स्यात्तत्समीपे नयनं दृष्टार्थं भवेत्। स तु असिद्धः। नादृष्टार्थता युज्यते। श्रुत्यर्थं एव ग्राह्यः। तस्मादासादनमासादयतिशब्देनोच्यते,न यागः ॥३८॥ आ०॥

नोत्तरेणैकवाक्यत्वात् ॥ ३९ ॥

नैतददृष्टार्थमासादनम् । कुतः । उत्तरेणैकवाक्यत्वात् । अदृष्टायोत्तरे विहारे हवींषि आसादयति अनेनोत्तरविहारसम्बन्धेन पदसञ्चयेन मारुतीमेव प्रतिप्रस्थाता दक्षिणस्मिन्नित्येतस्मिन्नेकवाक्यत्वादेव ज्ञायते, यथा नासादनमदृष्टार्थमिदम् । तत् कथं कृत्वा ? । आहवनीयद्वये अव्यवस्थया हविषां होमः प्राप्तस्तदनुविधानादासादनमपि तथैव प्राप्तम् । तत्र व्यवस्थामात्रमनेन क्रियते । यथा प्राप्तस्य च, वसाहोमाय च प्राप्तं, नादृष्टाय । तस्माद्धोमार्थमासादनम् । अपर आह । एकस्मिन् वाक्य एक एवाऽयमासादयतिशब्द उभयोर्विहारयोरासादनमाह । उत्तरस्मिंश्च व्यक्तं तद्धोमार्थम् । तस्मिँश्चोच्चारणे दक्षिणे होमार्थं न भविष्यतीति एतन्नोपपद्यते । तस्मादुभयत्र होमाऽर्थम् । अथोच्येतासादनमेवेदं विधीयते । यतो दृष्टार्थं भवति । तत्र दृष्टार्थं, यत्र न सम्भवति तत्राऽदृष्टार्थमिति । तच्च न विध्यनुवादयोर्यौगपद्यसङ्गात् । यत्र दृष्टार्थं तत्रानूद्यते, प्रकृतितः प्राप्तत्वात् । यत्राऽदृष्टार्थं तत्र विधीयते । तदुभयं युगपन्न सम्भवति । तस्मादयुक्तमेतत् । अथ होमार्थत्वे सति कस्माद् यागचोदना कल्पते । नासादनमात्रमेवेत्याह । होमश्चान्यत्रेति । नैवम् । आसादनं हि होमार्थं भवति । नान्यत्रासाद्यमानमन्यत्र होमार्थं भविष्यति ॥ ३९ ॥ आ० नि० ॥

अपि च ।

अवाच्यत्वात् ॥ ४० ॥

न च होमार्थमासादनं वक्तव्यं, सति होमे प्रकृतित एव प्राप्नोति । यागस्तु वक्तव्यः । स च सति होमे शक्यत लक्षणयानेन वक्तुम् । तस्मादत्राप्यासादयतिशब्देन पौर्णमासीवद् यागस्य प्रयोग उच्यते । तथा च तन्त्रभेदः ॥ ४० ॥ हेतुः ॥

आम्नायवचनं तद्वत् ॥ ४१ ॥

वैदिकवचनं तद्वद् युक्तं भविष्यति यद्वन्न्यायोपदिष्टः । यदेवाध्वर्युः करोति तत् प्रतिप्रस्थाता करोतीति । तथा यस्मिन्नेव होमस्तस्मिन् ब्रूते देवतायजनमिति । दक्षिणेऽपि विहारे देवतायागं दर्शयति । तद् यागार्थमासादयतिशब्दो युज्यते । तस्मादप्येवम् ॥ ४१ ॥ युक्तिः ॥ वरुणप्रघासादिषु विहाराधिकरणम् ॥ ८ ॥

कर्तृभेदस्तथेति चेत् ॥ ४२ ॥

तत्रैव चिन्त्यते। किं कर्त्तारो भेदेन? उत तन्त्रमिति। किं प्राप्तम्। कर्तृभेदस्तथा यथाङ्गभेदः। अष्टानां हविषां साङ्गानां कर्त्तृभिरुत्तरे विहारे प्रचरितव्यमितरैर्दक्षिणे। एवं यथादेशं साङ्गानि प्रधानानि कृतानि भवन्ति। तेनोत्तरवैहारिकाः कर्त्तारो गृह्यमाणविशेषा दक्षिणे विहारे नोपकुर्वन्ति। तस्मात् कर्त्रन्तरैर्भवितव्यम् ॥ ४२ ॥ पूर्व० ॥

न समवायात् ॥ ४३ ॥

नैतदेवमङ्गवत् कर्त्तृभेद इति। किन्तर्हि। तन्त्रेण कर्त्तार स्युः। कुतः। समवायात्। वचनेन हि कर्त्तारः समवयन्त्यत्र। चातुर्मास्यानां यज्ञक्रतूनां पञ्चर्त्विज इति। समुदायसम्बन्धेऽपि सत्यवयवा एककर्तृभिः सम्बद्ध्यन्ते। वरुणप्राघासानाञ्च तदवयवत्वात् पञ्चभिरभिसम्बन्धोऽभ्युपगम्यते। एकश्चायं वरुणप्राघासानां प्रयोगः। एककालत्वात्। समानोपक्रमोपसंहाराच्च। तद् यावद्वचनं तावदेवात्र-भेदेन कर्त्तव्यं, नान्यदपि। न च कर्त्तृणां भेद उक्तः। तस्मात् तन्त्रेण भवन्तीति। तन्नैतत् स्यात्। प्रधानभेद उक्तोऽप्यङ्गानां भेदोऽभ्युपगम्यते। कुतः?। अङ्गानां प्रधानगामित्वात्। यथैव हि प्रयाजादीनां मारुत्या भेदाद्भेदेन क्रिया एवमङ्गभूतत्वात् कर्त्तृणां प्रयाजादिवत्। कस्मान्न भेदोऽध्यवसायत इति। तत्रोच्यते। अङ्गत्वाविशेषेऽपि सति अन्यथाजातीयोपकारोऽन्यजातीयोऽन्यस्य प्रयाजादीनि? उत दृष्टेनोपकारसम्बन्धेनोपकुर्वन्ति?। बर्हिरादीनि यागद्रव्यधारणेन अपराण्यधिकरणसंस्कारद्वारेण। तानि यागदेशाऽधिकरणभेदाद्भिद्यन्ते। कर्त्तारस्तु क्रियानिर्वृत्त्योपकुर्वन्ति। तेन ते देशभेदेऽपि सति प्राकृतोपकारे प्रत्यभिज्ञानतन्त्रेण क्रियानिर्वृत्तिं शक्नुवन्ति कर्त्तुमिति, न भिद्यन्ते। कः पुनः प्राकृते उपकार? इति। होता तावदग्रतो गार्हपत्यस्य पश्चादाहवनीयादवस्थितो याज्यानुवाक्यावचनेन सम्बोधयन् यागस्य कर्त्तेत्युच्यते। शक्नोति तद्देशाऽवस्थित एव सामीप्यात् तन्त्रेण क्रमप्राप्तं यागं कुर्वाणमध्वर्युवत् प्रतिप्रस्थातारमपि सम्बोधयितुमित्यतो न भिद्यते। तथाग्नीध्रः समानत्वादुत्करदेशस्थ, तत्रावस्थित एव प्रत्याश्रावणेनोभौ कर्त्ता-

रावनुग्रहीतुम् । अतोऽसावपि न भिद्यते । तथा ब्रह्मा दक्षिणतोऽवस्थित उभयोराहवनीययोः समानत्वाद् देशस्य य एवोत्तरस्य दक्षिणः स एव दक्षिणस्य दक्षिण इति तत्रावस्थितः कृताकृतप्रत्यवेक्षणेनानुज्ञावचनेन च शक्नोत्युभावनुग्रहीतुम् । अतस्तस्याप्यभेदः । अध्वर्युप्रतिप्रस्थात्रोस्तु वचनाद्भेद उक्त एवेत्यदोषः । तस्मान्न कर्त्रन्तरैर्भवितव्यम् ॥ ४३ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ ४४ ॥

लिङ्गं चैतमर्थं दर्शयति । प्रवयसमृषभं दक्षिणां ददातीति दक्षिणैक्यमाह । तदेककर्त्तृत्वेनोपपद्यते । अन्यत्र दक्षिणाभावान्न याजयेयुः । नन्वन्वाहार्येण याजयिष्यन्ति । न ज्ञायते क्वान्वाहार्यः, क्वर्षभ इति । विशेषाग्रहणादुभयत्रर्षभः । उपादेयत्वेन चोदितस्यैकत्वं विवक्षितम् । तस्माद् दक्षिणैक्यम् । तथा च तन्त्रं कर्त्तारः ॥ ४४ ॥ हेतुः ॥

वेदिसंयोगादिति चेत् ॥ ४५ ॥

अथोच्येत वेदिसंयोगो हेतुः श्रूयते अन्तर्वेद्यन्यः पादो होतुर्भवति बहिर्वेद्यन्य इति । एकश्च होतुः पाद उभयत्रोपकर्त्तुमसमर्थस्तस्मात् कर्त्तृभेदः ॥ ४५ ॥आ० ॥

न देशमात्रत्वात् ॥ ४६ ॥

नैतदेवम् । कस्मात् । देशमात्रत्वात् । नात्र हेतुः पादो वेदेरुपकारार्थत्वेनोपदिश्यते । किन्तर्हि । देशमात्रमेतद्विधीयते । तस्मिन् देशे होत्रा स्थातव्यं, यत्रास्यैकः पादोऽन्तर्वेदि भवति बहिर्वेद्यन्य इति ॥ ४६ ॥ आ० नि ० ॥

कुतः ?

एकवाक्यत्वात् ॥ ४७ ॥

एकमिदं वाक्यं युक्तं सन्निध्यनुग्रहाद् एकार्थत्वाच्च । यदि च होतुः पादो वेद्यङ्गत्वेनोपदिश्येत एकस्मिन्नन्तर्वेदिनिहिते कृतः श्रुत्यर्थ इति द्वितीयस्याऽनियमः स्यात् । सोऽपि विधातव्यो बहिर्वेद्यन्य इति । कथं पुनरेकोऽन्तर्वेदीत्युक्ते द्वितीयोऽपि तत्र प्रसज्ज्येत ? । अप्रतिषिद्धत्वात् । यदि द्वयोरन्तर्वेद्यन्यतः प्राप्तिः स्यात्तत एकस्य वचनं द्वितीयनिवृत्त्यर्थम् । न चास्ति प्राप्तिः । तस्मादस्तिप्रसङ्गः । तथा च वाक्यभेदः । अथ तु देशविशेषविधानार्थमेतत्ततस्तदेताभ्या-

शुभाभ्यां सम्भूय क्रियत इत्येकार्थत्वाद् एकवाक्यत्वमुपपन्नम्। तस्मान्न होतृपादो वेदेरुपकारकः। नोभयत्र विधेयः॥ ४७॥ हेतुः॥ कर्तृतन्त्रताधिकरणम्॥ ९॥

एकाग्नित्वादपरेषु तन्त्रं स्यात्॥ ४८॥

इदमपरं तत्रैव चिन्त्यते। किमापराग्निका होमास्तन्त्रं कार्याः? उत भेदेनेति। किं प्राप्तम्। तन्त्रमिति। कुतः। एकाग्नित्वात्। पौर्वाऽग्निकानामग्निभेदाद् भेद उक्तः। इह स हेतुर्नास्ति। एकाग्नित्वादेतेषाम्। तस्मादेते तन्त्रं भवेयुः॥ ४८॥ पूर्व०॥

नाना वा कर्तृभेदात्॥ ४९॥

नाना भवेयुः। कुतः। कर्तृभेदात्। मारुत्या यान्यङ्गानि तानि प्रतिप्रस्थातुः कर्माणि, इतराण्यध्वर्योः। तन्त्रभावेऽन्यतरेषां कर्तृकृतं वैगुण्यं स्यात्। तस्माद्भेदः॥ ४९॥ सिद्धान्तः॥ अपराग्नितन्त्रताऽभावाधिकरणम्॥ १०॥

पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामान्यादारण्यवत्तस्माद् ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात्॥ ५०॥

वाजपेये प्राजापत्यान् पशून् प्रकृत्य श्रूयते, तान् पर्यग्निकृतानुत्सृजन्ति ब्रह्मसाम्नालभन्त इति। तत्र विचार्यते। तान् पर्यग्निकृतानुत्सृजन्तीति। किमयं कर्मशेषप्रतिषेधो ब्रह्मसाम्नालभत इति कर्मान्तरचोदना। अथ वा पूर्वः पर्यग्निकरणात् परेषां संस्काराणां प्रतिषेधार्थः?। उत्तरश्च तेषामेव कालान्तरे प्रतिप्रसवार्थ इति। किं प्राप्तम्। कर्मोत्सर्गः। कर्मशेषप्रतिषेध इत्यर्थः। श्रुतिसामान्यादारण्यवत्। यथा पर्यग्निकृतानारण्यानुत्सृजन्तीत्ययं कर्मशेषप्रतिषेध इत्युक्तं, शेषप्रतिषेधो वार्थाभावादिडान्तवदिति। तया श्रुत्या तुल्येयं श्रुतिः। किमनयोस्तुल्यम्। तत्र कर्माणि चोदितानि वसन्ताय कपिञ्जलानालभेतेति। तेषु सर्वेषु प्राकृतगुणाः प्राप्ताः। तेषु प्राप्तेषु पर्यग्निकरणान्तं गुणकाण्डं पुनः पर्यग्निकृतानुत्सृजन्तीति निर्गुणं पुनर्वचनमितरपरिसंख्यायकं भवतीति कर्मशेषस्य प्रतिषेधकं विज्ञायते। एवमिहापि प्राजापत्यानालभेतेति चोदितानां कर्मणां तथैव सर्वाङ्गेषु प्राप्तेषु इदं पर्यग्निकरणान्तस्य गुणकाण्डस्य निर्गुणं

पुनर्वचनं कर्मशेषस्य निवर्त्तकम् । यस्माच्चैवं तस्माद् ब्रह्मसाम्नालभत इति कर्मान्तरचोदना स्यात् पूर्वापेक्षया ब्रह्मसाम्नालभते सप्तदश प्राजापत्यानिति ॥ ५० ॥ पूर्व० ॥

संस्कारप्रतिषेधो वा वाक्यैकत्वे क्रतुसामान्यात् ॥५१॥

न वा कर्मशेषप्रतिषेध इति । किं तर्हि । संस्काराणां प्राप्तावसराणाम् । तस्मादवसरात् प्रतिषिद्धब्रह्मसाम्नि प्रतिप्रसवः ॥ ५१ ॥ सि० ॥

किं कारणम् ।

वाक्यैकत्वे क्रतुसामान्यात् ॥ ५२ ॥

एकमिदं वाक्यं, तान् पर्यग्निकृतानुत्सृजन्ति ब्रह्मसाम्नालभत इति । कथं ज्ञायते । आलभत इति द्रव्यदेवतस्याश्रवणात् । समाने च क्रतौ वाक्यैकत्वं भवति । यथा हि केवल आलम्भो वक्तव्यो, द्रव्यदेवतस्योक्तत्वात् । अथ वाक्यभेदः स्यात्, ततः पूर्वेण कर्मशेषः प्रतिषिद्ध्येत, परेण कर्मान्तरं चोद्येत । तत्र द्रव्यदेवतं वक्तव्यम् । यत्तु पूर्वोक्तं सम्भन्त्स्यत इति । तत्तत्रैव कृतार्थत्वादिह न सम्बद्ध्येत । तस्मादेकं वाक्यम् । नन्वेकस्मिन्नपि क्रतौ पूर्वेण संस्काराः प्रतिषिद्ध्यन्ते, परेण विधीयन्त इति । अर्थभेदाद्वाक्यभेद इत्येवं भवति । न हि ब्रह्मसाम्ना लभत इत्युक्ते अर्थादेव पर्यग्निकरणान्त उत्सर्गः सिद्धः । स न विधीयते । तमनूद्यालम्भः केवल उत्कृष्येतेति । नास्ति क्रतुसामान्ये वाक्यभेदः ॥ ५२ ॥ हेतुः ॥

वपानां चानभिघारणस्य दर्शनात् ॥ ५३ ॥

सव्या वा एतर्हि वपा यदनभिघृता ब्रह्म वै ब्रह्मसाम यद् ब्रह्मसाम्नालभते तेनासव्यास्तेनाभिघृता इति । यदि संस्कारप्रतिषेधः, ततो जुह्वाः सवनीयप्रचारेण चिरत्वात् प्रयाजशेषो नास्ति । तदभावादनभिघृतत्वं युज्यते । अथ कर्मप्रतिषेधस्ततो ब्रह्मसाम्नालम्भः कर्मान्तरे । तत्र प्रयाजाः पुनरिज्यन्ते । तेषां शेषोऽस्ति । तेनाऽभिघारणं स्यात् । अनभिघारणदर्शनं नोपपद्येत । तस्मादपि संस्कारप्रतिषेधः ॥ ५३ ॥ युक्तिः ॥ पर्यग्निकृतोत्सर्गाधिकरणम् ॥ २१ ॥

अस्ति पञ्चशारदीयोऽहीनो मारुतीयः पञ्चशारदीयो, यः कामयेत बहु स्यामिति स एतेन यजेतेति । तत्र श्रूयते । वैशाख्याममावास्यायां सप्तदश मारुतीस्त्रिवत्सा अपचिता उपाकरोतीति ।

सप्तदश पृश्नीनुक्ष्णस्तान् पर्यग्निकृतान् प्रोक्षितानितरा आलभन्ते प्रेतरानुत्सृजन्तीति । ततः संवत्सरे राजीवा आनयन्ति तांश्चैवोक्ष्णस्तान् पर्यग्निकृतानितरा आलभन्ते प्रेतरानुत्सृजन्तीति । तत्र सैव चिन्ता । किमुक्ष्णामुत्सर्ग आरण्यवत् कर्मशेषप्रतिषेधः । अथ वा प्राजापत्यवत् संस्कारकर्मप्रतिषेधः। तेषां च सुत्यासु प्रतिप्रसवः। त्रींस्त्रीनुक्ष्ण एकैकस्मिन्नहन्यालभन्ते । पञ्चोत्तम इति। यदि कर्मशेषप्रतिषेधः, प्रतिवर्षमन्ये उक्षाणः। अथ संस्कारप्रतिषेधः, ततस्त एव पञ्चवर्षाण्युपरुद्ध्यन्ते, पुनः पुनः संस्क्रियन्ते । अन्त्यासु सुत्यास्वालभ्यन्त इति । किं तत्र प्राप्तम् ?

पञ्चशारदीयास्तथेति चेत् ॥ ५४ ॥

इति चेत् पश्यसि । कथम् ?। पञ्च शारदीया इति । पञ्च शारदीयास्तथा यथानन्तराः । प्राजापत्यासंस्कारप्रतिषेध इत्यर्थः। एवं प्रकृतप्रत्ययो भवति । स एवमनुग्रहीष्यते । इतरथा प्रकृतहानमप्रकृतप्रत्ययश्च भवेत् । एवञ्च तांश्चैवोक्ष्ण इत्यपेक्षावचनं युक्तं भविष्यतीति । प्रायश्चित्तविधानं च यदि कूटः काणो वा भवेद् बार्हस्पत्यं चरुं निर्वपेत्, यदि प्रापतेद्वायव्यं चरुं, यद्यवसीदेन्नैर्ऋतं चरुमिति निरुद्धानामेतानि निमित्तान्युत्पद्येरन्।तस्मात् संस्कारप्रतिषेधः॥५४॥

न चोदनैकवाक्यत्वात् ॥ ५५ ॥

नैतदेवं संस्कारप्रतिषेध इति । कथं तर्हि । कर्मशेषप्रतिषेधः। कुतः । चोदनैकवाक्यत्वात् । सप्तदश मारुतीः पृश्नीरुपाकरोतीति कर्मचोदनैषा । द्रव्यदेवतासम्बन्धात् । तयैकवाक्यमेतत् । सप्तदश पृश्नीनुक्ष्ण इति । कथं ज्ञायते । सप्तदश पृश्नीनुक्ष्ण इत्येतावदपरिसमाप्तम् । तत् पूर्वापेक्षया परिसमाप्यते मारुतानालभन्त इति । एवं सत्यनुषङ्गोऽवश्यं भवति । तथा च समत्वाद्वाक्यभेदः । किमुच्यते। चोदनैकवाक्यत्वादिति । आह । यद्यसावश्वशेषत्वेनापेक्ष्यते ततोऽनुषङ्गः । अथायं तस्य, तत एकवाक्यत्वम् । इदं तस्य शेषत्वेन अपेक्षिष्यामहे । एतच्चात्र युक्तं, यदयं तस्य शेषः स्याद्, नासावस्य। तच्छेषत्वे अपेक्षामात्रमितरत्रापेक्षयानुषक्तव्यं, स्वार्थेन च सम्बद्ध्येत । सप्तदश च पृश्नीर्मारुतीरुपाकरोति । सप्तदश च पृश्नीनुक्ष्ण इति चार्थो न वक्तव्यः। प्रचयादेव गम्येत । तस्मादेकेनानेन वाक्येन

चतुस्त्रिंशदेतानि कर्माणि चोद्यन्ते।तेषां सप्तदशानां पर्यग्निकरणान्त उत्सर्गः क्रियते। सप्तदशसु यथाप्रकृतानि । एवमुत्तरास्वपि चोदनासु। न चोत्सृष्टानां कर्मान्तर उपयोगो युज्यते । अभ्यत्वात् ॥ ५५ ॥ सि० ॥

यातयामत्वाच ॥ ५६ ॥

तस्मादारण्यवत् कर्मशेषप्रतिषेधः । अन्ये चान्ये चोक्षाणः । पूर्वेषामुक्ष्णामभावात् स्कृतहानम् । प्रायश्चित्तमप्युपाकृतानां प्रागुत्सर्गात् । अपेक्षावचनमपि तेषामभावादन्यांस्तादृशानेवापेक्ष्य भवेत्, पृश्नीन्मरुतीश्च ।यथा तामेव यवागुं स्यहं पिबतीति । तान्येवौषधानि । स एव तित्तिरिरिति ॥ ५६ ॥ हेतुः ॥

संस्काराणां च तद्दर्शनात् ॥ ५७ ॥

संस्कारांश्च प्रतिवर्षं दर्शयति । तान् पर्यग्निकृतान् प्रोक्षितानितरा आलभन्ते प्रेतरानुत्सृजन्तीति । ननु वचनमेतद्भविष्यतीति । न वाक्यभेदप्रसङ्गात् । पर्यग्निकरणं करोति पर्यग्निकृतांश्चोत्सृजन्तीति । अपि च वत्सतरीणामुक्ष्णां च युगपत्पर्यग्निकरणमुच्यते । तद् वत्सतरीषु प्रकृतितः प्राप्तत्वादनूद्यते । इतरेष्वप्राप्तत्वाद्विधीयते । एतन्नोपपद्यते । सत्सु संस्कारेषु । एतदुभयं न युज्यते । यागं च स्तत्वम । तस्मादुभयत्र यागः ॥५७॥ हेतुः ॥ पञ्चदशादीयाधिकरणम् ॥ १२ ॥

राजसूयेऽभिषेचनीयदशपेयावेकाहौ । तत्र चिन्त्यते । किं तयोस्तन्त्रयोगः, अथ वा भेदेनेति । किं प्राप्तम ।

दशपेये क्रयप्रतिकर्षात् प्रतिकर्षस्ततः प्राचां तत्समानं तन्त्रं स्यात् ॥ ५८ ॥

समानं तन्त्रमनयोः । कुतः । दशपेयस्य क्रयः प्रतिकृष्यते । सह सोमं क्रीणात्यभिषेचनीयदशपेययोरिति । अभिषेचनीयस्य पूर्वकालीनत्वात् क्रयकाले दशपेयक्रयस्य प्रतिकर्षः । स प्रतिकृष्यमाणस्ततः प्राग्भाविनः पदार्थान् प्रतिकर्षति । तदादि वाभिसम्बन्धात्तदन्तमपकर्षे स्यादिति । अतस्तयोरेकाहयोस्तन्त्रं क्रमः । तन्त्रप्रक्रान्तयोः प्रवृत्तितस्तन्त्रमेव समाप्तिर्युक्ता । तस्मात् समानतन्त्रौ ॥५८॥ पूर्व० ॥

समानवचनं तद्वत् ॥ ५९ ॥

समानो वा एष यज्ञो यद्दशपेयश्चाभिषेचनीयश्चेति तन्त्रस्य स-

मानत्वाद् यज्ञयोः समानत्वमात्मनाभिन्नत्वात् ॥ ५९ ॥ पूर्व० हेतुः ॥

अप्रतिकर्षो वाऽर्थहेतुत्वात् ॥ ६० ॥

सहत्वं विधीयते। न वा प्रतिकर्षः क्रयस्य। कुतः। अर्थहेतुत्वात्। द्वाविमौ क्रयौ। एकोऽर्थहेतुकोऽन्यः शब्दकृतः। यत् प्राक् क्रतुप्रवृत्तेर्यज्ञसाधनोपार्जनकाले सोमविक्रयिणा सह संवादः सोमस्य परिक्रयणं मूल्यपरिच्छेदः सोऽर्थादवश्यं करणीयः। तस्मिन्नकृते क्रतोरत्र प्रवृत्तिर्न युक्ता। कुतः। क्रतुकाले कदाचित् सोमो न स्याद्, विक्रेता वास्य नार्घेण वा दद्यात्। तथा क्रतुरेव न संवर्त्तेत। तस्यैतत् सहत्वमुच्यते। किं कारणम्। मुख्यत्वात्। तत्रैव च क्रयो निर्वृत्तकल्पो मूल्यापणमात्रं परिशिष्टम्। यदन्यत् तत्र कल्प्यते क्रीणामीत्येवमादि तद्धर्ममात्रम्। परतन्त्रत्वादेव विक्रेतुः। एवञ्च सति भिन्नकालयोर्यथाकालमेवाङ्गानि भविष्यन्ति। दृष्टश्च तस्मिन्नुपसंवादे क्रयार्थे क्रीणातेः प्रयोगो, देवदत्तेन सहास्माभिर्धान्यं क्रीतम्, उपसंवृत्ता इति। अतस्तस्य वादः। स च बहिः क्रतोर्वर्त्तते। तस्मान्नास्ति प्रतिकर्षः। कालभेदाद् यथोक्त एव तन्त्रभेदः ॥ ६० ॥ सि० ॥

पूर्वस्मिँश्चावभृथस्य दर्शनात् ॥ ६१ ॥

पूर्वस्मिँश्चाभिषेचनीये अवभृथदर्शनं भवति। कथं समानं वा एतद्यज्ञं विच्छिन्दन्ति यदभिषेचनीयस्यावभृथमभ्यवयन्तीति। तदेवमवभृथदर्शनं पूर्वस्मिन्नुपपद्येत। यदि भेदेन तन्त्रप्रवृत्तिरितरथा दशपेयान्तोऽवभृथः स्यात्। दीक्षाणां चोत्तरस्य दशपेयस्य च पृथग्दीक्षाणां दर्शनं तथाभिषेचनीयस्य दीक्षा वर्द्धयेयुर्यथा दशमेऽहनि दशपेयः सम्पद्यते। सद्योदीक्षयति सद्यः सोमं क्रीणातीति। इतरथा अभिषेचनीये या एव दशपेयस्यापि दीक्षाः स्युस्तत्रैव दर्शनं नोपपद्यते ॥ ६१ ॥ हेतुः ॥

यत्तु समानवचनं तद्वदिति, तत्र ब्रूमः—

समानः कालसामान्यात् ॥ ६२ ॥

एकस्मिन् ऋतावेतौ सोमौ वर्त्तेते तत उत्तरे संवत्सरादूर्ध्वमेतत् कालसामान्यमपेक्ष्य तत्सामान्यवचनं नान्यथोपपद्यत इति। तस्मात्तन्त्रभेदः ॥ ६२ ॥ पूर्व० हेतु–नि० ॥ दशपेयाधिकरणम् ॥ १३ ॥

वरुणप्रघासेषु श्रूयते, वारुण्या निष्कासेन तुषैश्चावभृथमभ्यवयन्तीति । तत्र विचार्यते । किं प्रदानं विप्रकर्षोऽयमुत कर्मान्तरचोदनेति । किं प्राप्तम् ।

निष्कासस्याऽवभृथे तदेकदेशत्वात् पशुवत् प्रदानविप्रकर्षः स्यात् ॥ ६३ ॥

प्रदानविप्रकर्षोऽयम् । कुतः । तदेकदेशत्वात् । वरुणं प्रत्यामिक्षोत्पन्ना मारुत्यामिक्षा वारुण्यामिक्षेति । सा द्विधा प्रतीयमाना दृश्यते । एकदेशोऽस्या आवापस्थाने, एकदेशः समिष्टयजुरूर्ध्वम् । उभयत्रापि वरुणदेवता । तेन प्रदानविप्रकर्षो विज्ञायते । पशुवद् । यथा सवनीयस्य पशोर्वपया प्रातःसवने चरन्ति, पुरोडाशेन मध्यन्दिने, अङ्गैस्तृतीयसवन इति । अवभृथशब्द इदानीं किमर्थः ? । भक्त्यानुवादमात्रम् । देशसामान्याद्देवतासामान्याच्च । अथ धर्मातिदेशकोऽग्निहोत्रपदवदेव कस्मान्न भवति । अशक्यत्वात् । अनेनैव प्रदानविप्रकर्षोऽनेनैव धर्मातिदेश इत्यशक्यमेकस्य वाक्यस्य । प्रदानविप्रकर्षं कृत्वा कृतार्थस्य धर्मानतिदेष्टुं न शक्तिरिति ॥ ६३ ॥ पूर्व० ॥

अपनयो वा प्रसिद्धेनाभिसंयोगात् ॥ ६४ ॥

न वायं प्रदानविप्रकर्षः । किन्तर्हि । अपनयो निष्कासस्य पूर्वकर्मणः कर्मान्तरोपदेशः । किं कारणम् । प्रसिद्धेनाभिसंयोगात् । प्रसिद्धेन नामधेयेनावभृथशब्देन संयोगाद् निष्कासेनावभृथमभ्यवयन्तीति । ननु भाक्तोऽयमनुवादमात्रमित्युक्तमनुवादः सन्नप्रवृत्तिकरोऽनर्थकः स्याद्, अतिदेशस्तु अर्थवान् । ननु तत्रापि लक्षणा भवति । अस्तु । लक्षणापि हि प्रवृत्तिविशेषकरत्वादर्थवती । यथाऽग्नौ तिष्ठत्यवटे तिष्ठति । अनेकार्थता तर्हि दोषो भवति । पूर्वकर्मचोदनायामसौ दोषः । यथैतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति । कथं पुनरनेन शक्यते अपूर्वं कर्म चोदयितुम् । उच्यते । वारुण्या निष्कासेन तुषैश्चावभृथमपोऽभ्यवयन्तीति श्रूयते । न चावभृथः शक्यतेऽभ्यवेतुम् । तत्रैवं विज्ञायते । निष्कासेन तुषैश्चावभृथं कर्त्तुमपोऽभ्यवयन्तीति । यथा शाटकं कर्त्तुं सूत्राणि वयन्तीति लक्षणया । यथा, य एवं विद्वांसः सत्रमुपयन्तीति ॥ ६४ ॥ सि० ॥

प्रतिपत्तिरितिचेन्न कर्मसंयोगात् ॥ ६५ ॥

अथान्यशेषत्वान्निष्कासस्यावभृथगमनं प्रतिपत्तिर्भवत्विति । तन्न । कुतः । कर्मसंयोगात् । अर्थकर्मणा ह्यस्य गुणभूतस्य संयोगो विज्ञायते । तृतीयासामर्थ्यात् । प्रतिपत्तौ हि द्रव्यप्राधान्याद् द्वितीयया, निरदेक्ष्येत।यथा चात्वाले कृष्णविषाणां प्रास्यतीति । अथ वावभृथशब्दकेनास्य कर्मणा संयोगात् । यदि च प्रतिपत्तिः स्यात्ततोऽवभृथशब्दोऽनर्थक एव भवेत् । अयमवभृथशब्दो धर्मानतिदिशेत् । न च प्रतिपत्तौ प्रधानकर्मणां धर्माः शक्या अतिदेष्टुम् । वैषम्यात् । तथा हि अवभृथेन प्रतिपादयतीत्युक्तं स्यात् । न वावभृथेन किञ्चित् प्रतिपादितं, यदतिदिश्येत ॥ ६५ ॥ आ० नि० ॥ वरुणप्राघासेऽवभृथाधिकरणम् ॥ १४ ॥

उदयनीये च तद्वत् ॥ ६६ ॥

ज्योतिष्टोमे श्रूयते । प्रायणीयस्य निष्काषे उदयनीयमनुनिर्वपतीति । तत्राप्यवभृथवन्निष्कासो गुणतः स्यात् । तत्रापि ह्युदयनीयशब्दकेन प्रधानकर्मणा संयोगो भवति । प्रायणीयस्य निष्काष उदनीयमनुनिर्वपतीति । न च शक्यते उदयनीयो निर्वप्तुम् । अतस्तथेहापि सम्बन्धो विधीयते निष्काषो नोदयनीयं कर्तुं हविष्यं निर्वपतीति । लक्षणया वा पूर्ववत् । अपि च द्वितीयासंयोगात् कर्मणः प्राधान्यं विज्ञायते । निष्काषस्य सप्तमीयोगाद् गुणभावः । प्रतिपत्तौ तु कर्मगुणता स्याद् निष्काषप्रधानता । तत्र कर्म तृतीयासम्बद्धं भवेत् । निष्काषो द्वितीयासम्बद्धः । ननु प्रधानभूतेऽपि सप्तमी भवति । यथा, स्वागारे गावो वास्यन्तां, प्रावारे कुसुमानीति । भवति यत्र प्रमाणान्तरेण द्रव्यं प्रधानं विदितम् । यत्र तु शब्दगम्य एवार्थस्तत्र गुणभावो युक्तः । यत् कारणं, कारकविभक्तिरियम् । कारकं च क्रियार्थं भूतं भव्यम् । उच्चारणे हि भूतं भव्यार्थं भवति । दृष्टार्थत्वात् । भव्यस्य तु भूतार्थत्वेऽदृष्टार्थता कल्प्या स्यात् । न च दृष्टे सत्यदृष्टकल्पना सम्भवति ॥ ६६ ॥ पूर्व० ॥

प्रतिपत्तिर्वाऽकर्मसंयोगात् ॥ ६७ ॥

प्रतिपत्तिर्वा उदयनीयः स्याद् निष्काषस्य, न गुणभावः । कुतः । अकर्मसंयोगात् । नात्र निष्कासस्योदयनीयकर्मणा संयोगः । केन

तर्हि निर्वापेण । निष्कासे निर्वपतीति । ननु मुख्यत्वादुदयनीयस्यैतेन सम्बन्धो न्याय्यः । न हि मुख्यसम्बन्धे साकाङ्क्षमेतद्भवति, निष्कास उदयनीयं किं करोति । तत्रावश्यं निर्वपतीत्यनेन परिसमापयितव्यम् । उदयनीयं निर्वपतीति । न चोदयनीयस्य निर्वापेण सह सम्बन्धोऽस्तीत्युक्तम् । तदेतदवश्यं तथैवापद्यते । उदयनीयं कर्तुं प्रायणीयस्य निष्कासे हविष्यं निर्वपतीति । निष्कासश्च प्रायणीयशेषः । निष्कासशब्दश्च शेषवचन एव, यदुखायां लग्नकं तदनेनोच्यते । शेषस्य चार्थान्तरगमनं प्रतिपत्तिः । तच्च सामवायिकमङ्गं भवति । तच्च प्रधानेन दृष्टसम्बन्धमारादुपकारकत्वेऽनुमेयसम्बन्धं, सप्तमी च विभक्तिः प्राधान्ये न दृष्टा । तस्मात् प्रतिपत्तिः । नन्वेवमपि कर्मान्तरचोदनावभृथवत् प्राप्नोति । भवेद्यदि न चोदितं कर्म भवेत् । चोदितस्तूदयनीय आदित्यः प्रायणीयश्चरुर्भवत्यादित्य उदनीयो दिशां प्रज्ञप्ता इति । तं कर्तुं प्रापणीयनिष्कासे निर्वपेदिति तत्रैव प्रज्ञायते । तस्मान्न कर्मान्तरचोदनेयम् ॥ ६७ ॥ पूर्व० ॥

अर्थकर्म वा शेषत्वाच्छ्रयणवत्तदर्थेन विधानात् ॥६८॥

अर्थकर्म वा निष्कासे निर्वापो, न प्रतिपत्तिः । कुतः । शेषत्वात् । निर्वापं प्रति शेषभूतो निष्कासः । गुणभूत इत्यर्थः । कथं ज्ञायते । तदर्थेनाविधानात् । तदर्थेन शब्देन सप्तम्या विभक्त्या विधानात् । सप्तमी हि विभक्तिराधारे भवति । आधारश्च क्रियायास्तत्कारकाणां च विशिष्टानां धारणे वर्त्तते । तस्माद् गुणभूतः । ननु निष्कासो धारणेऽसमर्थः । स्थाल्येव तत्र धारणं करोति । पात्रीवदेतद् द्रष्टव्यम् । तद्यथा पात्र्योदनं धारयति, पात्रीं भूमिः । न च पात्री नाधारः । तत्रैतत् स्यात्, न दृष्टमुपकारं करोतीति । पात्र्यपि तथा । अपि च हविष्या उदयनीयनिवृत्त्या प्रयोजनवन्तस्ते । यदि निष्कासेण संस्क्रियन्ते निष्कासोऽपि प्रयोजनवान् भवति । अथ तु निष्कासः संस्क्रियते, न च तेन कश्चिदर्थः । न हि तेन किञ्चित् करिष्यते । ननु तेनापि प्रायणीयो निर्वर्त्तितः । तदर्थस्यापि संस्कारोऽर्थवान् भविष्यति । नैवमुपयुज्यमानसंस्कारो गरीयानुपयुक्तसंस्कारादपि च निष्काससंस्कारोऽयं भवन् प्रायणीयस्याङ्गं भवेत् । तत्रोदयनीयसान्निधिर्बाध्येत । तस्मादुदनीयहविष्याणामयं निष्कासससर्गेणादृष्ट उपकारः क्रियते ।

श्रयणवत्। तद्यथा पयसा मैत्रावरुणं श्रीणाति धानाभिर्हारियोजनमिति श्रयणैः सोमस्य ॥६८॥ सिद्धान्तः॥ उदयनीयाधिकरणम्॥१५॥ (निष्कासशब्दस्य दन्त्यान्त्यत्वमपि)॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये एकादशाध्यायस्य द्वितीयः पादः ॥ ११ ॥ २ ॥

अथ एकादशाध्यायस्य तृतीयः पादः ॥ ११ ॥ ३ ॥

अङ्गानां मुख्यकालत्वाद्वचनादन्यकालत्वम् ॥ १ ॥

अङ्गानां मुख्यकालत्वं मुख्यदेशत्वं मुख्यकर्तृत्वं चोक्तम्। अङ्गानि तु विधानत्वात् प्रधानेनापदिश्येरन् ॥ तस्मात् स्यादेकदेशत्वमिति। एवञ्च सर्वत्र प्राप्तम्। वचनादन्यकालत्वम्। यत्र वचनं तत्रान्यकालत्वमन्यदेशत्वमन्यकर्तृत्वमपि भवति। यथा पूर्वेद्युरमावास्यायां वेदिं करोति अवभृथेन चरन्ति। अग्नौ सौत्रामण्यां दक्षिणाभेदादन्यकर्तृत्वं विज्ञायते। वडवा दक्षिणेति ॥ १ ॥ पूर्वपक्षसिद्धान्तौ॥ वचनाद्यङ्गानां प्रधानकालाद्यन्यकालत्वाद्यधिकरणम्॥१॥

द्रव्यस्य कर्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात् स्वकालत्वात् ॥ २ ॥

वसन्ते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति श्रूयते आधानम्। तत्कर्मार्थमित्यभ्युपगमः। किं कारणम्। अफलत्वात्। आहवनीये जुहोति गार्हपत्ये हवींषि श्रपयति दक्षिणाग्नावन्वाहार्यश्रपणादि करोतीति। तेषामग्नीनां कर्मसु प्रयोगः। तत्र विचार्यते किं तस्य कर्मणोऽर्थेन भेदेनाधानं कर्त्तव्यमथ सर्वेषामैष्टिकपाशुकसौमिकदार्विहोमिकानां कर्मणां तन्त्रमिति। किं प्राप्तम्। द्रव्यस्याग्नेरकर्मकालनिष्पत्तेः, वसन्ते ग्रीष्मे शरदीति प्रयोगः। आधानं सर्वार्थं स्यात्। कुतः?। स्वकालत्वात्। स्वोऽस्य कालो वसन्तादिः। न कस्यचित् कर्मणः कालं श्रूयते। तत्र न गृह्यते विशेषोऽस्मै कर्मण इदमाधानमिति। नास्मा इत्यगृह्यमाणविशेषत्वाच्च तन्त्रभावो न्याय्यः। नन्वाधानानन्तरं यस्य कर्मणः प्रयोगस्तदर्थं तदाधानमिति इति गृह्यते विशेषः। स खलु गृह्यते विशेषः। किन्तु आनन्तर्यमकारणम्। यद्यपि सर्वार्थं तदाप्यवश्यं कस्यचित् कर्मणः पूर्वप्रयोगो यौगपद्यस्यासम्भवात्। तदेकेनानन्तर्ये समो हेतुः। सर्वार्थत्वे च एकार्थत्वं च समत्वादहेतुर्भवति। न वाऽऽधानेन कर्मा-

ण्युपक्रस्यन्ते । यथा प्रणयनेन । यद्युपक्रस्येरँस्ततो यदनन्तरं कर्म तस्योपक्रमो विज्ञायेत, नोत्तरेषाम् । तेन व्यवहितत्वात्तदपवर्गे वापवृज्येत, प्रणयनवत् ! न ह्यनेन किञ्चित् कर्म प्रक्रम्यते । अप्राप्तकालत्वात् । अत उत्तरकाला हि कर्मश्रुतयः । किन्तर्हि अनेन क्रियते । द्रव्यमर्ज्यतेऽग्निविशेषः । यथा कश्चिल्लोहं सुवर्णं वार्जयेदनेन स्वाधीनेन यथोपपन्नं कर्म करिष्यामीति । स तेन यथाकालमिष्टं दात्रादि करोति । एवमयमग्निविशेषमर्जयति । अनेन स्वाधीनेन यथोपपन्नं कर्म करिष्यामीति । तत्र न गृह्यते विशेषोऽस्मै कर्मण इदमर्जितम्, अस्मै नेति । सर्वेभ्यश्च युज्यते । तस्मात् सर्वार्थम् । अपि च नित्यकाम्यनैमित्तिकानि कर्माणि यथोपपत्तिकालानि । तेषां वसन्ते आहितेनाग्निना कार्यत्वम् । न चान्यस्मिन् ऋतौ । शक्यो वसन्तेऽग्निराधातुम् । सोऽयमसंयोगो भवति भेदेनाधाने । अथ तु सर्वकर्मणामर्थे तन्त्रमाधानं, नैष निरोधो भवति । तस्मादपि तन्त्रम् ॥ २ ॥ पूर्वपक्षसिद्धान्तौ ॥ आधानादेस्तन्त्रताधिकरणम् ॥ २ ॥

यूपश्चाकर्मकालत्वात् ॥ ३ ॥

ज्योतिष्टोमे पशवः, अग्नीषोमीयसवनीयानुबन्ध्याः । तेषां यूपः खादिरे बध्नाति पालाशे बध्नाति रौहितके बध्नातीति श्रुतेः । तत्र विचार्यते । किं त्रयाणां पशुबन्धानां भेदेन यूपः, अथ वा तन्त्रमिति । किं प्राप्तम् । भेदेनेति । किं कारणम् । अग्नीषोमीये तावत् प्रयोगवचनेन गृह्यते यूपः । उत्तरयोरपि चोदकेन प्राप्यते । कर्मशेषावसायिनश्चोदकप्रयोगवचनाद्भेदेन यूपं प्रापयति । तस्माद्भेदः । एवं प्राप्ते उच्यते । यूपस्य तन्त्रं भवेत् । अकर्मकालत्वात् । नास्य पशुकर्मकाल उत्पत्तिः । किं तर्हि । पृथक्काले दीक्षासु यूपं छिनत्ति क्रीते वा राजनीति । तत्रोत्पद्यमानस्य न गृह्यते विशेषोऽस्मै पशुबन्धाय यूपोऽयमस्मै नेति । सर्वेभ्यश्च प्रयुज्यते । तस्मात् सर्वार्थो भवति ॥ ३ ॥ पूर्व०सि० ॥

एकयूपं च दर्शयति ॥ ४ ॥

एकं यूपं त्रयाणामपि पशूनां साधारणं दर्शयति । सवनीये पशौ त्रिवृता यूपं परिवीयेति त्रिवृता परिव्याणं विदधाति । यदि नानायूपा भवेयुस्ततः पूर्वस्य यूपस्यापवर्गाद्यूपान्तरे चोदकेनैव प्राप्ते त्रिवृता

परिव्याणं न विधातव्यं भवेत् । अथ तन्त्रं यूपे, ततः संस्कारा अपि तन्त्रमित्यग्नीषोमीय एव परिवीतस्य कृतार्थत्वात् पुनः सवनीयपरिव्याणं न प्राप्नोति। तद् विधातव्यं भवति।विधीयते च। तस्मादपि तन्त्रम् ॥४॥ हेतुः ॥ अग्नीषोमीयादिपशौ यूपतन्त्रताधिकरणम् ॥३॥

संस्कारास्त्वावर्तेरन्नर्थकालत्वात् ॥ ५ ॥

यूपसंस्कारा ये पशुतन्त्रमध्ये क्रियन्ते,यथा प्रोक्षणमञ्जनमुच्छ्रयणं परिव्याणं च, तेषु चिन्त्यते । किं तस्य तस्य पशोर्भेदेन कर्त्तव्याः, अथ वा तन्त्रमिति । किं प्राप्तम् । संस्कारास्त्वावर्त्तेरन् यूपस्य न तथा यूपाः,तन्त्रं यथा स्युः । किं कारणम् । अर्थकालत्वात्।अर्थः पशोर्नियोजनम् । तत्काला एते संस्काराः । तत्र गृह्यते विशेषः । यस्य पशोर्नियोजनकाले कृतास्तदर्था इति । इतरयोश्च पश्वोरप्राप्तकालत्वात्तादर्थ्येन नास्ति प्रयोगः । तस्मादावर्त्तेरन् । यथाग्नेः संमार्जनम् ॥ ५ ॥ पूर्व० ॥

तत्कालस्तु यूपकर्मत्वात्तस्य धर्मविधानात् सर्वाऽर्थानां च वचनादन्यकालत्वम् ॥ ६ ॥

सत्यमावर्त्तेरन्, यद्येते नियोजनकाला भवेयुः । तत्कालास्त्वेते दीक्षाकालाः । कथं ज्ञायते । यूपकर्मत्वात् । नैते नियोजनार्थाः । यूप एतैः क्रियते । यूपो नियोजनार्थः । स च दीक्षासु कर्त्तव्यः। दीक्षासु यूपं छिनत्तीति वचनात् । संस्कारैश्च स क्रियते । तस्माद्दीक्षाकाला एवैते संस्काराः । ननु छेदनमात्रं तत्र यूपस्य श्रूयते, न यूपक्रिया । उच्यते । न किञ्चिद्द्रव्यं यूपाख्यमस्ति यस्य छेदनमुच्येत । तदेतदेवं ज्ञायते । दीक्षासु छेदनाभिर्यूपं करोतीति । छेदग्रहणं च मुख्यत्वात् प्रदर्शनार्थम् । यत् कारणं नासौ छेदनेन केवलेन यूपो भवतीति । एवं चेद्दीक्षाकाला एवैते संस्काराः। सर्वार्थानां वसतां वचनात् केषाञ्चिदन्यकालत्वं कृतम् । यथाग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीति । तस्माद्यूपवत् संस्कारा अपि तन्त्रम् । यूपकर्मत्वादित्यस्याऽपरा व्याख्या। यूपकर्म तद्य एते संस्काराश्छेदनाद्याः। यूपोऽयमेतं क्रियते तक्षणादिव्यापारेण । यथा वाजपेयेन सम्राट् सकृत् कृतश्चेत्तस्य पुनः क्रिया निरर्थिका । तस्मादनावृत्तिः । नन्वेवं सति निरूढपशावपि कामं स एव यूपः कर्त्तव्यो भवेत् । बाढं भवेद्यदि

निरिष्टिकेन यागप्रतिषेधो न स्यात् । अस्ति तु स प्रतिषेधः । तस्मान्न भवति । यथा, न तैरेव दर्भैः प्रयोगान्तरमपि क्रियते । अथ वा यदर्थं स यूपः कृतस्तत्कर्मापवृक्तम्।तस्यापवर्गे यूपोऽप्यपवृक्तः॥६॥सि०

सकृन्मानं च दर्शयति ॥ ७ ॥

त्रिवृता यूपं परिवीय सवनीयं पशुमुपाकरोतीति । परिव्याणेन यूपधर्माननुक्रममाणः सकृन्मितं स्नातं यूपं दर्शयति । इतरथा मुख्यत्वात् प्रोक्षणेनोपक्रमेत । आनन्तर्यार्थमिति चेत्, न । प्रतीतितः सिद्धत्वात् । तस्मादपि तन्त्रं संस्काराः ॥ ७ ॥ हेतुः ॥ यूपसंस्कारतन्त्रताधिकरणम् ॥ ४ ॥

अस्ति स्वरुः, यूपस्य स्वरुं (शकलम्) करोतीति श्रुतः । स किं सर्वपशूनां तन्त्रं भेदेन वेति । किं प्राप्तम् ।

स्वरुस्तन्त्रापवर्गः स्यादस्वकालत्वात् ॥ ८ ॥

स्वरुः खलु तन्त्रे तन्त्रे अपवृज्येत । अस्वकालत्वात् । नास्य स्वः काल उत्पत्तौ । कर्मकालेऽयमुपादीयते । स्वरुणा स्वधितिना वा पशुं समनक्तीति यस्य पशोः समञ्जनकाल उपात्तस्तदर्थोऽसाविति गृह्यते विशेषः । तस्माद्भेदः । ननु यूपस्य स्वरुं करोतीति स्वकालैवास्योत्पत्तिः । न खल्वेषाप्यन्तःप्रयोगैव । अपि च कार्यवचनोऽत्र स्वरुशब्दः । स्वरुं करोति, स्वरुकार्यं करोति । यत् कारणं स्वरुर्न ज्ञायते, स्वरुकार्यं तु ज्ञायते पशोरञ्जनम् । ननु कृत्वन्ते स्वरोः प्रतिपत्तिर्दृश्यते । संस्थिते सोमे प्रस्तरं प्रहरति, स्वरुं वा यज्ञवैशसायेति । सत्यमस्ति दर्शनम् । तत्तु स्वरुमात्रस्य, न तु स्वरुविशेषस्य । तत्राऽग्नीषोमीय उपात्तस्य तन्त्रतया प्रवृत्तस्य दर्शनं सोमान्ते स्यात् । अथ वा चोदकप्राप्तस्यानुबन्ध्याकालस्येति संशये, किं न्याय्यं, यदऽनुबन्ध्याकालस्य दर्शनं भवेन्न तन्त्रतया प्रवृत्तस्येति । कुतः । यत उक्तो न्यायः स्वरुस्तन्त्रापवर्गः स्यात् अस्वकालत्वादिति । न च दर्शनं केवलं साधकं भवति । यथासम्भवे तु दर्शनं कल्पितम् । तदेवं यथा प्रस्तरस्यानुबन्ध्याकालस्य दर्शनं तद्वत् स्वरोरपि भविष्यतीति ॥ ८ ॥ पूर्व० ॥

साधारणे वानुनिष्पत्तिस्तस्य साधारणत्वात् ॥ ९ ॥

नैतदस्ति, प्रतितन्त्रं स्वरुभेद इति । किं तर्हि । साधारणः स्यात् ।

कुतः । यतोऽयमनुनिष्पद्यते यूपः साधारणः सर्वपशूनाम् । तस्य साधारणत्वादयमपि साधारण एव न्याय्यः । यथैक एव यूपः सर्वपशूनां साधारणः । एवमयमप्यगृह्यमाणविशेषत्वात् साधारणो भविष्यति । नैतद् युक्तम् । अङ्गप्रकर्षवचनादगृह्यमाणविशेषत्वाद् यूपस्य साधारण्यमुपपद्यते, न तु स्वरोः प्रतिकर्षे किञ्चन वचनमस्ति यतो गृह्यमाणविशेषत्वात्स्यापि साधारण्यमुपपद्येत । यदेतद् यूपस्य स्वरुं करोतीति तदन्तःप्रयोगसम्बद्धं स्वरुकार्यमङ्गं कर्त्तुं यमुपादत्ते तं यूपादिति । न चान्यस्य साधारण्यं युक्तम् । सम्भवन्ति ह्येकस्यापि वहवः शकला इति । चोदकप्रयोगवचनाश्च भिद्यमाना अन्तःप्रयोगसम्बद्धमङ्गमात्मीयं प्रतितन्त्रं प्रापयन्ति गृह्यमाणविशेषादित्यतो भेद एव युक्त इति । तत्रोच्यते । यद्यप्यस्य नास्ति प्रतिकर्षवचनं प्रत्यक्षम् । न चान्यस्मिन् प्रतिकृष्यमाणेऽन्यस्य प्रतिकर्ष इति । नैतद्युक्तम् । असम्बद्धयोर्हि तदेवं भवति, न सम्बद्धयोः । अयं च शकलो यूपमनुनिष्पद्यते । तदस्य यूपप्रतिकर्षादेव सिद्धः प्रतिकर्षः । अतो यत्र यूपस्तत्रायमपि । यच्च यूपस्य स्वरुं करोतीत्यन्तःप्रयोगसम्बद्धा श्रुतिरिति । तदपि नैवम् । द्वौ हि कालौ द्रव्यस्य— एक उपादानकालः, एक उपात्तस्य प्रयोगकालः । यद्धि उपादातव्यं, न हि तदनुपादाय कश्चित् प्रयोगमारभते । न ह्यनुपादाय व्रीहीन् प्रस्तुत्य प्रयोगं व्रीहीन् मृगयति । एवं कुर्वाणस्य प्रयोग एव न संवर्तेत । अयं च यूपं छिद्यमानमनुनिष्पद्यते । अतो यत्र छेदनं तत्रायमपि । यद्यप्येकस्यापि यूपस्य वहवः स्वरवः सम्भवन्तीति । स्यादेवं, यदि प्राथम्यविशिष्टस्य नोपादानं भवेत् । विशिष्टं तु उपादानमुक्तम् । ततो यः प्रथमः शकलः परापतेत् स स्वरुः कार्य इति वचनाद् वहूनां च प्राथम्याभावाद् बहवो न सम्भवन्ति । तस्मादेक एव साधारणः स्वरुरिति ॥ ९ ॥ सि० ॥

सोमान्ते च प्रतिपत्तिदर्शनात् ॥ १० ॥

सोमान्ते चास्य प्रतिपत्तिर्दृश्यते । संस्थिते सोमेऽग्नौ प्रस्तरं प्रहरति स्वरुं वा यज्ञवैशसायेति । तत् साधारण्य एवोपपद्यते । तन्त्रापवर्गे ह्यग्नीषोमीयान्त एव स्यात् । तस्मादपि साधारणः । तत्कालो वा प्रस्तरवदिति यदुक्तं तत् परिहर्त्तव्यम् ॥ १० ॥ हेतुः ॥

न चोत्पत्तिवाक्यत्वात् प्रदेशात् प्रस्तरे तथा ॥ ११ ॥

नास्य नूनं बन्ध्याकालस्य स्वरोः प्रहरणम् । किं कारणम् । इदमेव प्रहरणस्योत्पत्तिवाक्यम् । सोमान्ते प्रस्तरं प्रहरति स्वरुं वा यज्ञवैशसायेति । अनेन क्रमादग्नीषोमीयकालस्य प्रहरणं गम्यते । स यदि साधारणस्ततः सर्वपशूनां कृतार्थे कर्मणि अन्ते अस्याग्नौ प्रहरणस्य दर्शनमुपपद्यते । अथ तु पृथक् स्यात्ततोऽग्नीषोमीयस्यान्त एव दृश्येत । अथ वचनमिदं कस्मान्न भवति । अग्नीषोमीयान्ते प्राप्तस्य सोमान्ते वचनात् । नैतदेवम् । वचनेन द्वावुत्सर्गस्य विशेषावुच्येयाताम् । अग्नौ च प्रहरणं, सोमान्ते च । तथा च वाक्यभेदः स्यात् । तस्मान्नैतद्वचनम् । यत्तु प्रस्तरवदिति । प्रदेशात् प्रस्तरं तथा । प्रस्तरस्य दर्शपूर्णमासयोः प्रहरणमुक्तमाशीर्भिः प्रस्तरं प्रहरतीति । चोदकेन प्रतिपशु प्राप्यते । तत्रानुबन्ध्याकालस्य दर्शनं युज्यते, न स्वरुप्रहरणस्यैतदस्ति । तस्माद्विषमोऽयमुपन्यासः ॥११॥ पूर्व० आ० नि०॥ स्वरुतन्त्रताधिकरणम् ॥ ५ ॥

ज्योतिष्टोमे दीक्षितव्रतमाम्नातं, कृष्णविषाणया कण्डूयतीति । तत्रैव च पुनः श्रुतं, नीतासु चात्वाले कृष्णविषाणां प्रास्यतीति । तदू उभयं द्वादशाहे चोदकेन प्राप्तम् । तत्र विचार्यते । किमन्ते प्रथमे वाऽहनि कृष्णविषाणायाः प्रासनं कर्त्तव्यम्, अथ वान्त्य एवेति । किं प्राप्तम् ।

अहर्गणे विषाणाप्रासनं धर्मविप्रतिषेधादन्ते प्रथमे वाहनि विकल्पः स्यात् ॥ १२ ॥

विकल्पः कर्त्तव्यः । अन्ते प्रथमे वाहनि प्रासनम् । कुतः । धर्मविप्रतिषेधात् । यदि प्रथमेऽहनि करिष्यते । उत्तरेष्वहःसु प्राग्दक्षिणानयनादूर्ध्वं ये पदार्थास्तेषां विषाणाकण्डूयनं धर्मो बाध्यते । अथान्ते ततः पूर्वेषामह्नां दक्षिणानयनादूर्ध्वं ये पदार्थास्तेषां हस्तकण्डूयनं बाध्येत । स एष धर्मविप्रतिषेधः । तस्माद्विकल्पः ॥१२॥ पूर्व० ॥

पाणेस्त्वश्रुतिभूतत्वाद्विषाणानियमः स्यात् प्रातःसवनमध्यत्वाच्छिष्टे चाभिप्रवृत्तत्वात् ॥ १३ ॥

नैतदेवं,स्याद्विकल्प इति । किं तर्हि । विषाणानियमः स्यात् । विषाणाकण्डूयनं सर्वस्मिन्नहर्गणे नियम्येत । अन्तेऽहनि प्रासनं स्यात् ।

कस्मात्। प्रातःसवनमध्यत्वाद्। बहूनि प्रातःसवनानि अस्य अहर्गणस्य मध्ये। तेषां विषाणाकण्डूयनं धर्मोऽनुगृहीतो भविष्यति। नन्वितरयोः सवनयोर्हस्तकण्डूयनं धर्मः। स बाधिष्यते। नैतद्दोषः। नैवं श्रूयते। पाणिना कण्डूयितव्यमिति। अर्थात् प्रत्यासत्त्या क्रियते। यश्चार्थादर्थो न स चोदनार्थः। एवमप्युत्तरयोः प्रत्यासत्त्या हस्त एव प्राप्नोतीति ॥ १३ ॥ पूर्व० ॥

अत्र ब्रूमः।

शिष्टे चाभिप्रवृत्तत्वात् ॥ १४ ॥

प्रातःसवनशेषे कण्डूयनस्य शिष्टत्वादुत्तरयोरपि विषाणाकण्डूयनमेव नियम्येत। अभिप्रवृत्तत्वात्। अभिप्रवृत्तस्य नियमस्योत्सर्गे आचारविरोधः स्यात्। अथ प्रकृतौ कथमुत्सर्गः। विषाणाया अभावात्। अन्या विषाणा। कस्मात्। कण्डूयनार्थेन नोत्पाद्यते। पूर्वविषाणायाः प्रासनं धारयत् तद्विमोकार्थं दृष्टं तद्, यद्यन्या विषाणा आनीयेत। तस्माद् धारणमदृष्टार्थम्। तस्या अदृष्टोऽर्थः कल्पयितव्यः स्यात्। इह तूत्तरप्रातःसवने धारयितव्या विषाणा। यस्यां सत्यां नास्ति नियमोत्सर्गे कारणम्। तस्मादाद्यस्याह्नो दक्षिणानयनकालादूर्ध्वं विषाणाकण्डूयनमेव स्यात् ॥ १४ ॥ ॥ सिद्धान्तः ॥

कृष्णविषाणाप्रासनाधिकरणम् ॥ ६ ॥

वाग्विसर्गो हविष्कृता बीजभेदे तथा स्यात् ॥ १५ ॥

राजसूये नानाबीजिकेष्टिः। अग्नये गृहपतये आशूनामष्टाकपालं निर्वपेत्, सोमाय वनस्पतये श्यामाकं चरुं, सवित्रे प्रसवित्रे सतीनानामष्टाकपालमिति। नानाबीजेष्वेकमुलूखलं विभवादिति युक्तम्। अतस्तस्यां क्रमेणाऽवहन्तिः क्रियते। प्रकृतौ च श्रूयते, अपः प्रणेष्यन् वाचं यच्छति तां सह हविष्कृता विसृजन्तीति। हविष्कृद्ग्रहणं च काललक्षणार्थमित्युक्तम् ॥ १५ ॥ पूर्व० ॥

यथाह्वानमपीति चेत् ॥ १६ ॥

न कालविधिश्चोदितत्वादिति। इहानेको हविष्कृदाह्वानकालः। तत्र पूर्वेव विचारणा। किमन्ते प्रथमे वा हविष्कृत्काले वाग्विसर्गः, अथ वान्त्य एवेति। तथैव च पूर्वः पक्षः। प्राग्घविष्कृत्कालाद् ये पदार्थास्तेषां वाग्यमो धर्मः। स बाध्येत, यदि पूर्वस्मिन् वाग्विसर्गः

क्रियते । अथोत्तरस्मिंस्ततो हविष्कृत्कालादूर्ध्वं ये पदार्थास्तेषां व्याभाषणकरणं धर्मस्तद् बाध्येत । तथैव चोत्तरः पक्षो व्याभाषणस्याश्रुतत्वाच्छिष्टे च वाग्यमस्याभिप्रवृत्तत्वादिति । अधिकरणप्रदेशोऽयम् ॥ १६ ॥ सिद्धान्तः ॥ वाग्विसर्गाधिकरणम् ॥ ७ ॥

पशौ च पुरोडाशे समानतन्त्रं भवेत् ॥ १७ ॥

अग्नीषोमीये पशौ पशुः पुरोडाशश्च । तयोः पाशुकं पौरोडाशिकं च तन्त्रम् । अत्रापि सैव चिन्ता । किं पाशुककर्मार्थं हविष्कृदाह्वानकाले वाग्विसर्गः कर्त्तव्यः ? उत पौरोडाशिककर्मार्थं इति । तथैव पूर्वोत्तरपक्षौ योज्यौ । अयमप्यधिकरणप्रदेश एव । ननु नैव पशौ हविष्कृदस्ति औषध्यर्थत्वात् । सर्वार्थत्येवं कृत्वा चिन्त्यते । कृत्वा चिन्तेयम् ॥१७॥ सि०॥ पशुपुरोडाशयोस्तन्त्रताधिकरणम् ॥८॥

अङ्गप्रधानार्थो योगः सर्वापवर्गे च विमोकः स्यात् ॥१८॥

अग्नौ श्रूयते । अग्निं युनज्मि शवसा घृतेनेति जुहोति । अग्निमेव तद्युनक्तीति । पुनरिमं स्तनं मधुमन्तन्धयामीत्यग्निविमोकं जुहोतीति । तत्र विचार्यते । किमङ्गप्रधानार्थो योगः, सर्वापवर्गे विमोकः कर्त्तव्यः ? उत प्रधानार्थो योगः, प्रधानापवर्गे विमोक इति । किं प्राप्तम् । अग्नियोगः सोमकाले तदर्थत्वात् संस्कृतकर्मणः परेषु साऽङ्गस्य । तस्मात् सर्वापवर्गे विमोकः स्यात् ।

किं कारणम् । अविशेषेण श्रूयते । अग्निं युनज्मि शवसा घृतेनेति जुहोत्यग्निमेवैतद्युनक्तीति । न च श्रूयते । तस्मै अस्मै वा कर्मणे इति । अविशेषात् सर्वार्थं इति विज्ञायते। अपि च तस्मिन् युक्तेऽग्नावङ्गानि प्रधानानि च क्रियन्ते । तस्मादपि सर्वार्थे चेत् सर्वाऽपवर्गे विमोकः कर्त्तव्यः । तदा हि योगकार्यमवसितं भवति । योगाऽपवर्गार्थश्च विमोकः ॥ १८ ॥ पूर्व० ॥

प्रधानापवर्गे वा तदर्थत्वात् ॥ १९ ॥

न वा सर्वापवर्गे विमोकः स्यात् । किं तर्हि प्रधानापवर्गे एव । प्रधानसंयोगेन हि श्रूयते । पञ्चभिर्युनक्ति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमालभत इति यज्ञप्राप्त्यर्थं युनक्तीति विज्ञायते । तस्मात् प्रधानार्थो योगः प्रधानार्थश्चेत्तदपर्गे योगकार्यमवसितं भवति । तस्मात्तत्र विमोकः । अविशेषविधानं यज्ञसंयोगेन विशेषेण युज्यमानं

विशेषार्थं भवति ॥ १९ ॥ सि० ॥

अवभृथे च तद्वत् प्रधानार्थस्य प्रतिषेधो-ऽप्रवृत्तार्थत्वात् ॥ २० ॥

एवं च कृत्वा अवभृथे आर्षेयवरणस्य होतृवरणस्य च प्रतिषेधो युक्तो भविष्यति, न होतारं वृणीते, नार्षेयमिति । यथान्यायोपदिष्टः । सोमार्थं हि होतृवरणं कृतम् । यद्धोतारं वृणीते जगन्ति तद्वृणीते इति । एतस्मिन्न्याये असति तदप्यङ्गप्रधानार्थमिति अवभृथेऽपि प्रसज्ज्येत । तत्र कृतार्थत्वात् प्राकृते होतृवरणं नैव प्राप्नोति । तस्य प्रतिषेधोऽनर्थकः । सति त्वेतस्मिन्न्याये तदपि प्रधानार्थमेव । तत्रापि हि यज्ञसंयोगो यद्वृत्वा वषट् कुर्य्युः भ्रातृव्यं यज्ञस्याशीर्गच्छेत् यद्धूता वषट् कुर्वन्ति एकधा तद् यजमाने यज्ञस्याशीः प्रतिष्ठतीति । प्रधानार्थं चेत्तदपवर्गे तत्कार्य्यमवसितमिति अवभृथे प्राकृतं होतृवरणं प्राप्नोति । तस्य प्रतिषेधो वक्तव्यः । उच्यते च । तस्मात् प्रधानार्थो योगः प्रधानापवर्गे विमोक इति ॥ २० ॥ दृष्टान्तः ॥

अहर्गणे च प्रत्यहं स्यात् तदर्थत्वात् ॥ २१ ॥

अहर्गणे च द्वादशाहे प्रत्यहं योगविमोकौ दर्शयति । स वा अहरहर्युनक्ति अहरहर्विमुञ्चतीति । तदुपपद्यते यदि प्रधानार्थो योगः । इतरथा आद्येऽहनि योगः स्याद्, अन्ते विमोकः । तदा हि सर्वापवर्ग इति ॥ २१ ॥ दृष्टान्तः ॥ अग्नियोगाधिकरणम् ॥ ९ ॥

द्वादशाहे उपसत्काले सुब्रह्मण्याह्वानं प्रति चिन्त्यते । किं भेदेन कर्त्तव्यमन्ते वा तन्त्रेणेति । कर्मभेदाद्भेदेनेति प्राप्ते उच्यते—

सुब्रह्मण्या तु तन्त्रं दीक्षावदन्यकालत्वात् ॥ २२ ॥

सुब्रह्मण्या तु तन्त्रं स्यात् । कुतः । अन्यकालत्वात् । कर्मयोगात् । पृथक्कालेयम् । तत्र न गृह्यते स विशेषः । अगृह्यमाणे विशेषे तन्त्रभावो युक्तो दीक्षावत् । तद् यथा दीक्षा पृथक्कालत्वात्तन्त्रं भवति, तथेयमपि ॥ २२ ॥ पूर्व० ॥

तत्कालत्वादावर्तेत प्रयोगतो विशेषसंयोगात् ॥२३॥

तस्मिन्नेव द्वादशाहे तत्काला या सुब्रह्मण्या सा त्वावर्त्तेत, भेदेन स्यात् । कुतः । प्रयोगं प्रति तस्या विशेषसंयोगो भवति, अद्य सुत्यामागच्छेति । अद्येत्युक्ते श्वः परश्वो वेति नोक्तो भवति । तत्रापि

प्रकृत्यनुद्देशाद् वक्तव्यम् । तस्मादावर्त्तेत ॥ २३ ॥ सि० ॥

अप्रयोगाङ्गमिति चेत् ॥ २४ ॥

इति चेत् पश्यासि अद्येति विशेषसंयोगादावृत्तिरिति । नैतदुक्तम् । कुतः । यतोऽप्रयोगाङ्गमेतद् यदद्येति वचनम् । इदं हि प्रकृतौ एकत्वादह्नोऽविवक्षितमर्थादेव सिद्धत्वादनङ्गीकृतत्वाच्च चोदकेन न प्राप्येत । यावदुक्तं स्यात् सुत्यामागच्छेति तावदेवाद्येति । सुत्यात्वं सर्वेषामह्नामवशिष्टम् । तस्मात्तन्त्रं स्यात् ॥ २४ ॥ आ० ॥

प्रयोगनिर्देशात् कर्तृभेदवत् ॥ २५ ॥

स्याद्भेदः । प्रयोगनिर्देशात् । यद्यप्यद्यशब्दस्यार्थो न विवक्षितस्तथापि यस्मिन्नहनि प्रयुज्यते तत्कालस्य प्रधानस्योपकरोति । नान्यकालस्य कर्तृभेदवत् । तद् यथाऽद्यावध्वर्य्युरुत्तरे विहारे हवींष्यासादयति । मारुतीमेव प्रतिप्रस्थाता दक्षिणस्मिन्निल्यौत्तरवैहारिकाण्यङ्गानि देशभेदान्मारुत्या नोपकुर्वन्ति । यथा तानि देशभेदान्नोपकुर्वन्ति । एवमिदमपि कालभेदादन्यकालस्य नोपकरिष्यन्ति । तस्मादावर्त्तेत ॥ २५ ॥ आ० नि० ॥

तद्भूतस्थानादग्निवदितिचेतं तदपवर्गस्तदर्थत्वात् ॥ २६

अथोच्येत । एकस्मिन्नहन्याहूता देवता आह्वानसंस्कृता भवति । एक एवासौ । तस्याः पुनराह्वानमनर्थकमग्निवद् । यथाग्नेः सकृदाधाने संस्कृतस्य न पुनः कर्मणि संस्कार एकस्य क्रियत इति । तच्चायुक्तम् । तत्कारणं प्रतिकर्मापवर्गः । यस्मिन् कर्मण्याह्वानं क्रियते तदर्थं तद्भवति तस्य कर्मान्ते अपवर्गो यथा अन्येषां सुत्याकालानां संस्काराणामग्निसंमार्गादीनाम् । तस्मादावृत्तिः ॥ २६ ॥ आ० नि० ॥

अग्निवदिति चेत् ॥ २७ ॥

इति यदुक्तं यथाग्नेराधानं सर्वकर्मणि तन्त्रं भवति एवमिदमपीत्येतस्य कः परिहारः । आभाषान्तं सूत्रम् ॥ २७ ॥ आ० ॥

न प्रयोगसाधारण्यात् ॥ २८ ॥

नैतदाधानेन तुल्यमाधानस्य स्वकालत्वात् । स्वकालं हि तत् क्रियते । तत्र न गृह्यते विशेषः । इदं पुनः कर्मकालमाह्वानं तद् यस्य कर्मणः काले क्रियते तदर्थमिति गृह्यमाणविशेषम् । तस्मान्नैतदाधानेन तुल्यम् ॥ २८ ॥ आ० नि० ॥

लिङ्गदर्शनाच्च ॥ २९ ॥

लिङ्गं चैतमर्थं दर्शयति । प्रत्यहं सुब्रह्मण्याह्वानमिति । एवं ह्याह संस्थिते संस्थितेऽहन्याग्नीध्रागारं प्रविश्य सुब्रह्मण्यं सुब्रह्मण्यामाह्वयेति प्रेष्यतीति । प्रेषणमाह्वानक्रियार्थम् । तस्मादपि प्रत्यहमाह्वानम् ॥ २९ ॥ हेतुः ॥

ताद्धि तथेति चेत् ॥ ३०

तदित्यनेन यूपाहुतिं प्रतिनिर्दिशति । ताद्धि यूपाहुतिकर्म यथा यूपैकादशिन्यां तन्त्रं भवति । तथा इदमपि भविष्यति । किं तस्य वास्य च सादृश्यम् । तत् क्रियमाणमवश्यं कस्यचिद् यूपस्यान्तिके भवति । सर्वसाधारणस्यान्तिकस्य दुर्लभत्वात् । यथा तदा कस्यचिद् यूपस्यान्तिके क्रियमाणं सर्वं यूपार्थं भवति । एवमिदमप्येकस्य कस्यचित् सौत्यस्य कर्मणोऽन्तिके क्रियमाणं सर्वार्थं भवतीति ॥ ३० ॥ दृष्टान्त आशङ्का ॥

नाऽशिष्टत्वादितरन्यायत्वात् ॥ ३१ ॥

नैतत् तेन तुल्यम् । कुतः । अशिष्टत्वात् । नात्र यूपान्तिके होमः शिष्यते । अविविक्षितमन्तिकमाहवनीयप्रतिषेधार्थमेतादित्युक्तम् । इतरप्रतिषेधो वा शास्त्रत्वाद्ध देशानामिति । इतरन्यायत्वाच्च । इह त्वितरो न्यायः । कालभेदाद् गृह्यमाणविशेषस्यावृत्त्या भवितव्यमिति । तस्माद्विषम उपन्यासः ॥ ३१ ॥ आ० नि० ॥

विध्येकत्वादिति चेत् ॥ ३२ ॥

अथ कश्चित् ब्रूयाद् इह द्वादशाहिको विधिस्तन्त्रदृष्टो वसतीवरीपर्यन्तोऽवभृथादिश्चायमपि च द्वादशाहिको विधिः । तत्सादृश्यादनेनापि तथा भवितव्यमिति ॥ ३२ ॥ आ० ॥

न कृत्स्नस्य पुनः प्रयोगात् प्रधानवत् ॥ ३३ ॥

तन्न । कुतः ? । कृत्स्नस्य पुनः प्रयोगात् । कृत्स्नोऽन्यो विधिः पुनः प्रयुज्यते अभिषवपवमानग्रहचमसस्तोत्रशस्त्रादिः । प्रधानवत् । तद् यथा प्रधानानि प्रत्यहं क्रियन्ते । तथा तत्र वसतीवरीवद्वा सकृत्त्वं स्यात् स्तोत्रादिवद्वा बहुकृत्वः कृतं स्यात् । तत्र बहुकृत्वः कृतमिति न्याय्यम् । तथा सर्वेषामुपकरोति । सकृत् कृतं तु यत्र क्रियते तत्रैव कालभेदादनुपकुर्यात् । तस्मादावृत्तिः ॥ ३३ ॥ आ० नि० ॥

सुब्रह्मण्याह्वानाधिकरणम् ॥ १० ॥

लौकिके तु यथाकामी संस्कारानर्थलोपात् ॥ ३४ ॥

इह लौकिकार्था उदाहरणम् । यथा देशः, समे दर्शपूर्णमासाभ्यां यजेत् । कर्त्तारः—दर्शपूर्णमासयोः यज्ञक्रतोश्चत्वार ऋत्विजः । स्रुगादीनि च पात्राणि । तेषु विचारः । किं प्रतिप्रयोगमन्यान्युपादेयानि ? उत तानि वा अन्यानि वा उपादाय प्रयोग इति । किं प्राप्तम् । अन्यान्युपादेयानीति । किं कारणम् । निरिष्टिकेन पुनः क्रियां शिष्टा नाचरन्तीत्येवं प्राप्ते ब्रूमः । लौकिकेषु यथाकामी तानि वाऽन्यानि वा, अनियमः । कुतः । संस्कारानर्थलोपात् । न कश्चित् पूर्वस्मिन् प्रयोगे कर्त्रादीनां संस्कारः कृतो योऽन्योपादाने लुप्येत । नाऽप्यर्थलोपः । अन्यैरपि हि शक्यते प्रयोगः कर्त्तुम् । तस्मादनियमः । अथ यदुक्तं निरिष्टिकेन शिष्टा यागं नाचरन्तीति । एतैराचरन्तीति । तस्मान्नैष दोषः । ननु ऋत्विगाचार्यौ नातिचरितव्याविति स्मरन्तीति । पुरुषधर्मोऽसौ, न कर्मधर्मः कर्मसंयोगाभावात् प्रकरणाभावाच्च । देशेषु कर्तृषु च पर्यवसितं पात्रेपूत्तरा कथा करिष्यते ॥ ३४ ॥ पूर्वपक्षसिद्धान्तौ ॥

यज्ञायुधानि धार्येरन् प्रतिपत्तिविधानादृजीषवत् ॥ ३५ ॥

यज्ञपात्राणि तु आन्ताद्धारयितव्यानि । कुतः । प्रतिपत्तिविधानात् । प्रतिपत्तिस्तेषां परिभाषितीये कर्मणि विधीयते । आहिताग्निमाग्निभिर्दहन्ति यज्ञपात्रैश्चेति तदर्थः । ऋजीषवत् । तद्यथा अहर्गणे सर्वेषामह्नाम् ऋजीषोऽवभृथे प्रतिपादनार्थं धार्यते । ऋजीषमप्सु प्रहरन्तीति श्रूयते ॥ ३५ ॥ पूर्व० ॥

यजमानसंस्कारो वा तदर्थः श्रूयते तत्र यथाकामी तदर्थत्वात् ॥ ३६ ॥

न चेयं पात्राणां प्रतिपत्तिः । किं तर्हि । यजमानसंस्कारोऽयम् । तदर्थस्तेषां पात्राणामर्थः श्रूयते । कथं ज्ञायते । तेषां तृतीयया निर्देशात् । यजमानस्य द्वितीयया । तत्र यथाकामी स्यात् । तेषामन्येषां वा प्रासनम् । तदर्थत्वात् । अर्थकर्मत्वात् पात्राणां, यैः कैश्चिदप्यर्थः सिद्ध्यतीति ॥ ३६ ॥ पूर्व० ॥

मुख्यधारणं वा मरणस्यानियतत्वात् ॥ ३७ ॥

मुख्यानां वा आद्यानां पात्राणां धारणं, नानियमः । कुतः । मरणस्यानियतत्वात् । अनियतकालं मरणम् । कदाचित्तानि पात्राण्युत्सृष्टानि भवेयुः, मरणं चापद्येत । तत्र यजमानशरीरसंस्कारलोपः स्यात् । एवमपि तावद्धारयितव्यानि यावदपरः प्रयोगः परतस्तदीयैः पात्रैरथ कर्म भविष्यति । पूर्वेषु विद्यमानेषु उपादानमन्येषामनर्थकम् । तस्मान्मुख्यधारणमेव न्याय्यम् ॥ ३७ ॥ सि० ॥

यो वा यजनीये म्रियेत सोऽधिकृतः स्यादुपवेषवत् ॥ ३८ ॥

अथ वा न मुख्यानां धारणम् । यो यजनीयेऽहनि म्रियेत यजमानः सोऽनेन संस्कारेणाधिकृतः स्यात् । तस्य तानि पात्राणि सन्निहितानि । उपवेषवत् । यथा साान्नाय्ययाजिन एवोपवेषोपधानेनाऽधिकारस्तस्योपवेषः सन्निहित इति ॥ ३८ ॥ पूर्व० ॥

न शास्त्रलक्षणत्वात् ॥ ३९ ॥

तदेतन्नोपपद्यते । किं कारणम् । शास्त्रलक्षणं तद् भवति । यथा सान्नाय्ययाजिन एवोपवेषो, नान्यस्येति । तत्र हि सान्नाय्यार्थां शाखा तामनुनिष्पद्यते उपवेषः । तस्या असान्नाय्ययाजिनोऽसम्भवः । अथेदमनियतसंस्कारविधानं यजनीये वाऽहनि अन्यत्र वाऽनारभ्याविधानादाहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति । न चान्यस्मिन्नहनि यज्ञपात्राणामुपवेषवदसम्भवः । शक्यते हि धारणेन सम्पादयितुम् । तस्मादुपवेषोऽदृष्टान्तः ॥ ३९ ॥ सि० ॥

उत्पत्तिर्वा प्रयोजकत्वादाशिरवत् ॥ ४० ॥

अथ वा न धारणम् । किं तर्हि । संस्कारकाले अन्यानि नवानि पात्राणि उत्पाद्यानि । प्रयोजकत्वात् संस्कारस्य । आशिरवत् । यथा ऋतपेये धृतव्रतौ भवत इति वचनादभावो व्रतदुहोऽन्यां यजमानस्य व्रतदुघास्नाशिरे दुहन्तीति श्रुतेः, आशिरार्थमन्या गौरुपादीयत एवम् ॥ ४० ॥ सि० ॥

शब्दासामञ्जस्यमिति चेत् ॥ ४१ ॥

अथ पश्यस्येवं सति यज्ञपात्रशब्दोऽसमञ्जसो भवति । यज्ञस-

म्बन्धेन हि पात्राणि भवन्ति । न च नवानां यज्ञसम्बन्धोऽस्तीति ॥ ४१ ॥ आ० ॥

तथाशिरेऽपि ॥ ४२ ॥

यासावन्या गौरुपादीयते सा यजमानस्य व्रतधुङ् न भवति । तत्र शब्दस्यासामञ्जस्यमेव । यदि तत्रान्या गौरिहाप्यन्यानि पात्राणि भविष्यन्ति । वक्तव्यो वा विशेष इति ॥ ४२ ॥ आ०नि० ॥

अयमुच्यते ।

शास्त्रात्तु विप्रयोगस्तत्रैकद्रव्यचिकीर्षा प्रकृतावथेहाऽपूर्वार्थवद् भूतोपदेशः ॥ ४३ ॥

शास्त्राद् विप्रयोगस्तत्र शास्त्रेण । तत्र शब्दस्यास्यामञ्जस्यम् । व्रतदुहो विप्रयोगः कृतः । घृतव्रतौ भवत इति । एकद्रव्यंचिकीर्षायां यजमानस्य व्रतयुक्तामाशिरे दुहन्तीति ऋतपेये चोदकेन प्राप्यते । तच्चासम्भवान्निवर्त्तेत । आशिरश्च गां प्रयुङ्क्ते । तस्मात्तत्र शब्दासामञ्जस्यमनुरुद्ध्यते । अथेहापूर्वोऽर्थो नान्यतः प्राप्यते । यज्ञपात्रैश्च दाहोऽविशेषेण प्रत्यक्षश्रुतः । सम्भवति च तेषां सम्पादनं धारणेन । तस्मादिहाकस्मिकं शब्दस्यासामञ्जस्याश्रयणं भवतीति धारणमेव पात्राणाम् । एवं स्थितमपर्यवसितम् ॥ ४३ ॥ दृष्टान्तः ॥

अन्तरा चिन्तान्तरं क्रियते । यज्ञपात्राणि धारयितव्यानीत्युक्तम् । तत्र चिन्त्यते । किं पौर्णमास्या आरभ्य धारयितव्यान्युताऽग्न्याधेयादीनीति । किं प्राप्तम् ।

प्रकृत्यर्थत्वात् पौर्णमास्याः क्रियेरन् ॥ ४४ ॥

पौर्णमास्या आरभ्य धारयितव्यानीति । कुतः । प्रकृत्यर्थत्वात् । इमानि पात्राणि अनारभ्योक्तत्वाद्दर्शपूर्णमासार्थानि । तत्रैषामुत्पत्तिः । उत्पत्तिप्रभृति च धारणम् । तस्मात् पौर्णमास्या आरभ्य धारयितव्यानि ॥ ४४ ॥ पूर्व० ॥

अग्न्याधेये वा विप्रतिषेधात्तानि धारयेन्मरणस्याऽनिमित्तत्वात् ॥ ४५ ॥

न वा पौर्णमास्या आरभ्य धारणम् । किं तर्हि । अग्न्याधेयात् । कुतः । अविप्रतिषेधात् । यद्यपि पौर्णमास्यां विहितानि चोदकेन पवमानहविःषु प्राप्तानि । ततश्च प्रभृति धार्यमाणेषु विप्रतिषेधो

भवति। मरणस्यानिमित्तत्वात् । पौर्णमास्या यदि मरणमापद्येत, यजमानशरीरसंस्कारलोपो भवति। आधानाच्चारभ्य धार्यमाणेष्व-ऽविप्रतिषेधो भवति। तस्मादाधानादारभ्य धारणम् ॥ ४५ ॥ सि० ॥ पात्रधारणाधिकरणम् ॥ १२ ॥

प्रतिपत्तिर्वा यथान्येषाम् ॥ ४६ ॥

स्थितादुत्तरम्। यदुक्तं पात्रैरर्थः क्रियते यजमानस्य संस्कार इति। तत्र किं तर्हि । प्रतिपत्तिरेषां पात्राणामग्नीनां च यजमान-शरीरे। कथम्। यथान्येषां द्रव्याणां सोमलिप्तानां प्रतिपत्तिः। तद्व-त्तुल्यो हेतुः। तान्यपि नानाकर्मरूपयुक्तानि प्रतिपादनार्हाणि। इमान्यपि पात्राण्यग्नयश्च तथैव। तस्मात्तेषामपि प्रतिपत्तिः। ननु तृतीयासंयोग उभयत्र विद्यते। न खलु। यजमानशरीरेऽग्नीनां पात्राणां च निक्षेपणं प्रतिपत्तिः, न दहनम्। आहिताग्नेर्दहने च तृतीया। तत्र तेषां गुण-भाव एव। तर्हि तत् साध्यते । निक्षेपणे तु द्वितीयैव। यथा दक्षिणे पाणौ जुहूमासादयति ॥ ४६ ॥ युक्तिः ॥ देशकर्तृपात्रतन्त्रताधिकरण-म् ॥ ११ ॥

उपरिष्टात् सोमानां प्राजापत्यैश्चरन्तीति ॥ ४७ ॥

तत्र सर्वेषामविशेषादवाच्यो हि प्रकृतिकालः। वाजपेये प्राजापत्यान् पशून् प्रकृत्य श्रूयते,उपरिष्टात् सोमानां प्राजापत्यैश्चरन्तीति । तत्र विचार्यते। किमार्भवकालेप्रचरितव्यमुत शस्त्रवतां सोमानामुपरिष्टा-दुत विकारस्थाने अथवा सर्वसोमानामुपरिष्टादिति। किं प्राप्तमार्भव-काल इति।कुतः।प्रकृतावार्भवकालेप्रचारो वृत्तः। प्रकृतिवदिहापि तत्रैव कर्त्तव्यः। एवञ्च अङ्गविपर्यासो न कृतो भवति। यदि सर्वसोमाना-मुपरिष्टात् प्रचारः क्रियेत तत आग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीति प्रहृत्य परिधीन् हारियोजनमिति । एतदुभयमपि विपर्यस्येत, ना-ऽग्निमारुतादूर्ध्वमनुयाजैश्चर्येत। हुत्वा च हारियोजनं परिधयः प्रह्रिये रन्। सोऽयमङ्गानां विपर्य्यासो विना वचनेन क्रियेत। अथ त्वार्भव-काले प्रचारस्ततो, नैष दोषो भवति। एवं प्राप्ते उच्यते। उपरिष्टात्। सोमानां प्राजापत्यैश्चरन्तीत्युक्तेसर्वसोमानामुपरिष्टात् प्रचर्येत। कुतः। अविशेषात्। सोमानामित्युक्ते सर्वसोमानामविशेषवचनात् प्रतीयते। यत्त्वार्भवकालः प्रकृतितः प्राप्यत इति। वाच्यो हि प्रकृति-

कालश्चोदकेनैव प्राप्तस्तदर्थो विधिः । कृतकरोऽनर्थकः स्यात् । तस्मात् सर्वसोमानामुपरिष्टात् प्रचारः ॥ ४७ ॥ पूर्व० सि०

अङ्गविपर्यासो विनावचनादिति चेत् ॥ ४८ ॥

अथ यदुक्तमेवं सत्यङ्गविपर्यासो विना वचनेन कृतो भविष्यतीति । तस्य कः परिहार इत्याभाषान्तं सूत्रम् ॥ ४८ ॥ आ० ॥

उत्कर्षः संयोगात् कालमात्रमितरत्र ॥ ४९ ॥

नैष दोषो युक्तमङ्गविपर्यास इति । कथं कृत्वा । पशुप्रचारे तावदुत्कृष्यमाणे अनुयाजानां परिधिप्रहरणस्य चोत्कर्षो न्याय्यः।संयोगात्।तानि हि पशुप्रचारेण क्रमतः संयुक्तानि।न चाग्निमारुतस्यानुयाजैः सह हारियोजनस्य वा परिधिप्रहरणेन क्रमो विवक्षितः।न हि परिधिप्रहरणं हारियोजनस्याङ्गं, हारियोजने वा परिधिप्रहरणस्य, उभौ वा कस्यचिदेकस्य प्रधानस्य । एवमाग्निमारुतमनुयाजयोश्चायदि परस्परस्याङ्गभूतानि भवेयुः,एकस्य वा प्रधानस्य,तत एतेन क्रमेणोपकुर्वन्तीतिविवक्षितः क्रमः स्यात् । अथ पुनः पशोरङ्गमनुयाजा आग्निमारुतं सोमस्य तथा परिधिप्रहरणं पशोरङ्गं, हारियोजनः सोमेज्या । तेषां क्रमो निष्प्रयोजनः । तस्मादविवक्षितः । कालमात्रमितरत्र । आग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीतिपरिवृत्य परिधीन् जुहोति हारियोजनमिति । एतस्मिन् काल इति लक्षणमाग्निमारुतं परिधिप्रहणं च । अनपेतश्च लक्षणापाये कालः । यथाऽग्निहोत्रवेलायामागन्तव्यमिति । यत्राग्निहोत्रं नास्ति, तत्राप्यनपेता वेला । न चैवं लक्षणा भवति । न हि काल एवेह श्रुत्यर्थः । क्त्वा तावत् पूर्वकाल एव स्मर्यते । उर्ध्वशब्दोऽपि देशं कालं वा ब्रूयात् । देशस्यासम्भवात् कालार्थो विज्ञायते ॥ ४९ ॥ आ०नि० ॥

प्रकृतिकालासत्तेः शस्त्रवतामिति चेत् ॥ ५० ॥

इति चेत् पश्यसि सर्वसोमानामुपरिष्टात् प्रचार इति । नैतद्युक्तम् । शस्त्रवतां सोमानामुपरिष्टात् प्रचारो युक्तः । कुतः । प्रकृतिकालासत्तेः । एवं प्राकृतस्यासत्त्याः कृतः प्रचारो भविष्यति । अङ्गविपर्यासश्चाकस्मान्न कृतो भविष्यति । अथ कतमोऽसौ कालः ? । तार्त्तीयसवनिकस्य वैश्वदेवस्य यदूर्ध्वम् ॥ ५० ॥ आ० ॥

न श्रुतिप्रतिषेधात् ॥ ५१ ॥

एवं सत्युपरिष्टात् सोमानामित्यविशेषश्रुतिर्विप्रतिषिद्ध्यते। केषाञ्चित् सोमानामधस्तादयं प्रचारः स्यात् । न चासत्या प्राकृतः कालो लभ्यते ॥ ५१ ॥ आ० नि० ॥

विकारस्थाने इति चेत् ॥ ५२ ॥

इति चेत् पश्यसि शब्दवतामुपरि प्रचारोऽयुक्त इति विकारस्थाने भवतु। कतमत् पुनर्विकारस्थानम्। उक्थ्याद्याः संस्था अग्निष्टोमसंस्थाया विकाराः । तासां यत् स्थानमग्निष्टोमप्रचारादूर्ध्वं तत्र प्रचारो भवतु। ऊर्ध्वं सर्वेषामागन्तूनां प्रचाराणां स्थानम्। अयमपि ह्यागन्तुः। तस्मादयमपि तत्रैव भवति ॥ ५२ ॥ आ० ॥

न चोदनापृथक्त्वात् ॥ ५३ ॥

नैतदेवम्। कस्मात् चोदनापृथक्त्वात्। कर्मपृथक्त्वादित्यर्थः। पृथगेते कर्मणी यच्च सौमिकं, यच्च पाशुकम्। सौमिकानां प्रचाराणामेतत् स्थानं, न पाशुकानाम् । तस्माद् एतस्य वचनात् सर्वसोमानामुपरिष्टात् स्थानम् ॥ ५३ ॥ आ० नि० ॥ सोमप्रचाराधिकरणम् ॥ १३ ॥

उत्कर्षे सूक्तवाकस्य न सोमदेवतानामुत्कर्षः पश्वनङ्गत्वाद्यथा निष्कर्षे नान्वयः ॥ ५४ ॥

अनुयाजा उत्कृष्यमाणाः सूक्तवाकमप्युत्कर्षन्ति। तत्र सवनीयानां पुरोडाशानां देवताः सङ्कीर्त्यन्ते, भृज्यानिन्द्रायहरिवते धानाः पूष एव ते करम्भमित्यारभ्य । तासामुत्कर्षो ? नेति सन्देहः । किं प्राप्तम्। उत्कर्षे सूक्तवाकस्य न सवनीयदेवतानामुत्कर्षः । कुतः। पश्वनङ्गत्वात् । अनुयाजाः पशोरङ्गमुत्कृष्यमाणाः पश्वङ्गमेवोत्क्रष्टुमर्हन्ति, न सोमाङ्गम् । सोमाङ्गं च सवनीयदेवताः। तस्मात् तासामनुत्कर्षः । यथा निष्कर्षेऽनन्वयः । यथा पौर्णमास्यां सूक्तवाकस्य प्रयोगे पूर्णमासीदेवतानां निष्कर्षेऽमावास्यादेवतानामन्वयः। इतरत्र चेतसाम् । तत् कस्य हेतोः । इतरेतरस्यानङ्गत्वात्। तद्वदिहाप्यनुत्कर्षः ॥ ५४ ॥ पूर्व० ॥

वाक्यसंयोगाद् वोत्कर्षः समानतन्त्रत्वादर्थलोपादनन्वयः ॥ ५५ ॥

अथ वा उत्कर्ष एव न्याय्यः। कुतः। वाक्यसंयोगात्। सूक्तवाक-

स्यैकदेशभूतानि सौमिकदेवतासंकीर्त्तनानि, भृज्यानिन्द्राय हरिवते धानाः पूष एव ते करम्भं सरस्वतीवते परिवापम्। अयं यजमान इति सम्बद्धयते । तथा इन्द्राय हरिवते धानाभिः पूष एव ते करम्भेण सरस्वतीवते परिवापेण सूपस्था अद्य देवो वनस्पतिरभवादिति सम्बद्धयते । तान्येतानि सूक्तवाकस्य मध्य उच्यमानान्यर्थवन्ति निष्कृष्टानि केवलान्यार्थकानि भवन्ति । न च सवनीयानां सूक्तवाकोऽस्ति यत्रैतान्युच्चार्येरन् । पाशुक एव सूक्तवाकस्तेषां प्रसङ्गसिद्धः । अतस्तत्र एतद्देवतानां संकीर्त्तनं युक्तम् । स चोत्कृष्यते। तस्मात्तासामप्युत्कर्षः। आर्षं चैवमनुग्रहीष्यते।यत्तु यथा निष्कर्षेऽनन्वय इति समानतन्त्रत्वादर्थलोपादनन्वयः। समानतन्त्रौ दर्शपूर्णमासौ। तयोः साधारणं सूक्तवाकाम्नानम् । तद्यथार्थं निविशते अर्थलुप्तं चामावास्यादेवतानां पौर्णमास्यां संकीर्त्तनमितरासां चेतरत्र । यत्कारणं या इष्टा देवतास्ताः संकीर्त्तनेन प्रत्यवेक्ष्यन्ते । इयमपीष्टा, न काचिदन्तरितेति । तस्माद्यथा निष्कर्षेऽनन्वय इत्यदृष्टान्तः ॥५५॥ सि० ॥ सूक्तवाकाधिकरणम् ॥ १४ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये एकादशाध्यायस्य तृतीयः पादः ॥ ११ ॥ ३ ॥

अथ एकादशाध्यायस्य चतुर्थः पादः ॥ ११ ॥ ४ ॥

चोदनैकत्वाद्राजसूयेऽनुक्तदेशकालानां समवायात्तन्त्रमङ्गानि ॥ १ ॥

राजसूये यान्यनुक्तदेशकालानि प्रधानानि, यथा, त्रिसंयुक्ते द्वे एवमादि चिन्त्यते । किं तत्राङ्गानां तन्त्रभावः ? उत भेद इति । किं प्राप्तम् । राजसूयेऽनुक्तदेशकालानां प्रधानानामङ्गानि । कुतः । समवायात् । फलनिवर्त्तने तेषां समवायः । समेत्यैतानि फलं साधयन्ति, नैकशः । कथं ज्ञायते । चोदनैकत्वात् । राजसूयेनेत्येकवचनान्ते तेन शब्देन तानि प्रधानान्युक्त्वा फलसम्बन्धः कृतः । तस्मात् समुदायः फलवान् । यच्च फलवत्तच्चिकीर्षितम् । तदर्थेतिकर्त्तव्यता इति कर्त्तव्यता चाङ्गानि । तस्मात् तन्त्रम् ॥ १ ॥ पूर्व० ॥

प्रतिदक्षिणं वा कर्तृसम्बन्धादिष्टिवदङ्गभूतत्वात् समुदायो हि तन्निर्वृत्त्या तदेकत्वादेकशब्दोपदेशः स्यात् ॥ २ ॥

न चैतदेवं, तन्त्रमङ्गानीति । किं तर्हि । भेदेन । कुतः ? । प्रतिदक्षिणं कर्तृसम्बन्धात् । एतेषु कर्मसु दक्षिणाभेदः श्रूयते । आग्नावैष्णव एकादशकपाल, ऐन्द्रावैष्णवश्चरुः, वैष्णवस्त्रिकपालो वामनो दक्षिणा । सोमापौष्ण एकादशकपालः, ऐन्द्रापौष्णश्चरुः, पौष्णश्चरुः, श्यामो दक्षिणेति । दक्षिणाभेदात् प्रतिदक्षिणं कर्तृसम्बन्धो भवति । वामनक्रीताः पूर्वस्य त्रिसंयुक्तस्य कर्त्तारः, अनङ्गमुत्तरस्य त्रिसंयुक्तस्य । श्यामपरिक्रीता उत्तरस्य त्रिसंयुक्तस्य कर्त्तारस्तेऽप्यऽनङ्गं पूर्वस्यातः कर्तृभेदादङ्गभेदः । इष्टिवत् । तद्यथा पौर्णमासकालान्यङ्गानि कालभेदान्न दर्शस्योपकुर्वन्ति । एवमिहापि कर्तृभेदान्न परस्परस्य । तस्माद्भेदेन कर्त्तव्यानीति । यत्तु चोदनैकत्वादुत्तरस्या-ऽपि समुदायो विवक्षित इति उच्यते । समुदायो हि तन्निर्वृत्त्या । समुदायः फलनिष्पत्त्या विवक्षितः । तदेकत्वात् फलैकत्वात् सह वचनं न प्रयोगैकत्वादिष्टिवत् । तद्यथा दर्शपूर्णमासयोः प्रयोगभेदेऽपि फलैकत्वात् समासवचनम् । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति ॥ २ ॥ सि० ॥

तथा चान्यार्थदर्शनम् ॥ ३ ॥

अन्यार्थोऽप्येतमर्थं दर्शयति । पूर्वं त्रिसंयुक्तमुत्तरं त्रिसंयुक्तमिति । तत्र भेदे हि पौर्वापर्यं स्यात् । नन्वेकतन्त्रत्वेऽपि प्रधानापेक्षं पौर्वापर्यं भवेत् । नैवमेतद् । वाक्यशेषेण तु विज्ञायते, साङ्गयोः प्रधानयोरेतत्पौर्वापर्यमिति । एवं ह्याह, यत् पूर्वं त्रिसंयुक्तं वीरजननं तद्, यदुत्तरं त्रिसंयुक्तं पशुजननं तदिति । फलसम्बन्धश्च साङ्गयोर्भवति, न केवलयोः । तस्माद्दर्शनमेवैतत् ॥ ३ ॥ हेतुः ॥ अङ्गतन्त्रताऽधिकरणम् ॥ १ ॥

अनियमः स्यादिति चेत् ॥ ४ ॥

तत्रैव विचार्यते, किमुपक्रमे ये कर्त्तारस्त एवान्तामुतानियमः-ते वान्ये वेति । किं प्राप्तम् । अनियमः स्यादिति चेत् । इति चेत् पश्यसि प्रतिदक्षिणं कर्तृसम्बन्ध इति अनियमः । पवित्रदक्षिणाभिर्ये परिक्रीताः पवित्रार्थास्ते भवन्ति । पवित्रान्ते एतेषामपवर्गः । उत्तरे कर्मणि यथा कामितं वान्ये वा स्युः । तस्मादनियमः ॥ ४ ॥ पूर्वं० ॥

नोपदिष्टत्वात् ॥ ५ ॥

नैतदेवं युक्तमनियम इति । किं तर्हि । य एव प्रक्रमे त एव अन्ते स्युः । कस्मात् । उपदिष्टत्वात् । आदावेव वरणकाले यजमानेन तेषामुपदिष्टम् । अनेन मां राजसूयसंज्ञकेन कर्मसमुदायेन याजयतेति । वरणञ्च प्राक् कर्मप्रवृत्तेः । तदगृह्यमाणविशेषत्वात् तन्त्रान्तेनाङ्गाः सर्वार्थाः भवन्ति । आह । यदि सर्वमुद्दिश्य क्रियन्ते तत एवम् । अथ पूर्वमवयवं पवित्रमुद्दिश्य ततो न सर्वार्थास्तदर्था एव भवन्ति । किं पुनरत्र युक्तम् ? । समुदायमुद्दिश्येति । तथा सति अविघ्नेन कर्त्तुः कर्म निर्वर्त्तते इतरथा पवित्रान्तेऽन्तरस्मिन् कर्मणि त एव कामतो न संप्रवर्त्तेरन् । अन्ये च कर्त्तारो नोपपद्येरन्, कर्मविघ्नः स्यात्, कालातिपत्तिश्च । एवञ्च सति लाघवं भवति । इतरथा प्रतिकर्मोपादानम् । तत् गुरुः स्यात् । ऋत्विग्याज्ययोश्चाव्यभिचारी धर्मः । तस्मात् समुदायमुद्दिश्य क्रियन्ते तथा च तन्त्रम् ॥५॥ सि०॥

प्रयोजनैकत्वात् ॥ ६ ॥

एकञ्च प्रयोजनमवयवदक्षिणानामपि समुदायसम्पत्तिः । न ह्यवयवेन केवलेन कृतेन कश्चिदर्थोऽवयवैः समुदायः सम्पादयितव्य इति अवयवे परिक्रीयते । तेषां समुदायसम्पत्तौ कृतार्थत्वम् । तस्मात् त एव कर्त्तार आन्तात् स्युः । आह । यदि समुदायसम्पत्त्यै अवयवशः परिक्रयः सकृदेव कर्त्तव्यः, किं पुनरावृत्त्येत्युच्यते ॥ ६ ॥ हेतुः ॥

अविशेषार्था पुनः श्रुतिः ॥ ७ ॥

उभयथा परिक्रये प्राप्ते सकृद्वा प्रत्यवयवं वा परिक्रयविशेषो नियम्यते । प्रत्यवयवं कर्त्तव्यः । द्रव्यसंख्यानियमेन च वामनो दक्षिणा अयुतमभिषेचनीये ददातीत्येवं क्रियमाणमभ्युदयकारि भवतीति ॥ ७ ॥ हेतुः ॥ उपक्रमे वृतकर्तृनियमाधिकरणम् ॥ २ ॥

अवेष्टौ चैकतन्त्र्यं स्याल्लिङ्गदर्शनाद्
वचनात् कामसंयोगेन ॥ ८ ॥

तस्मिन्नेव राजसूये अवेष्टिः । आग्नेयोऽष्टाकपालो हिरण्यं दक्षिणा बार्हस्पत्यश्चरुः शितिपृष्ठो दक्षिणेत्याम्नाता । तस्यां चिन्त्यते किमङ्गानां भेदोऽथ तन्त्रभाव इति । किं प्राप्तम् । अवेष्टौ चैकतन्त्र्यं स्यात् । तन्त्रतालिङ्गदर्शनात् । लिङ्गं हि तन्त्रभावस्य सूचकंश्यते -

ते। यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिं हुत्वाभिघारयेत्। यदि राजन्य ऐन्द्रमिति। यदि वैश्यो वैश्वदेवम्। समस्ते च हविषां मध्ये निधानमुपपद्यते। ऐकतन्त्र्ये च सामस्त्यम्। तस्मादैकतन्त्र्यम्। ननु लिङ्गमुपदिश्यते, कुतः प्राप्तिः। सह चोदनया प्राप्तिः। अथैतां दिशामवेष्टिं, य इमं वा अथ तं लोकं पुनरुपावरोहन्तीति। अवेष्टिरिति चैकवच्छ्रुतेः। एतयैवान्नाद्यकामं याजयेदिति वचनात् कामसंयोगेन। न वा तन्त्रभावः। कुतः। उक्तो न्यायः, प्रतिदक्षिणं वा कर्तृसम्बन्धः स्यादिति। लिङ्गदर्शनादिति यदुक्तम्। तत्र ब्रूमः। वचनादिति कामसंयोगेनापि श्रूयते। एतयैवान्नाद्यकामं याजयेदिति। तत्रैतद्दर्शनम्। न च तत्र दक्षिणाभेदः। न हि राजसूयिक्यो दक्षिणास्तत्र प्राप्स्यन्ते। एतयैवान्नाद्यकामं याजयेदिति एकवचनान्तेन शब्देन फलं प्रति निर्देशात् सह प्रयोग एव। तत्रैतद्दर्शनमुपपद्यते। तस्मात्तदपेक्षमेतत्॥ ८॥ पूर्व०॥

क्रत्वर्थायामितिचेन्न वर्णसंयोगात्॥ ९॥

अथ पश्यसि क्रत्वर्थायामेवैतद्दर्शनं भवतु। एवं प्रकृतदोषत्वं भविष्यसीति। तच्च न। कुतः। वर्णसंयोगात्। यदि ब्राह्मणो यजेत यदि वैश्य इति। न च क्रतौ ब्राह्मणवैश्यौ स्तः। राजन्यस्यैव राजसूयः। राजा राजसूयेनेति वचनात्। तस्मादक्रत्वर्थायामेतद्दर्शनम्॥ ९॥ आ० नि०॥ अवेष्टायज्ञानां भेदेनानुष्ठानाधिकरणम्॥ ३॥

पवमानहविःष्वैकतन्त्र्यं प्रयोगवचनैकत्वात्॥ १०॥

आधाने पवमानेष्टयः। अग्नये पवमानायाष्टाकपालं निर्वपति। अग्नये पावकायाग्नये शुचय इति। तत्र विचार्य्यते। किमासामैकतन्त्र्यं, भेदो वा इति। किं प्राप्तम्। पवमानहविःष्वैकतन्त्र्यं स्यात्। कुतः। प्रयोगवचनैकत्वात्। एक आसां प्रयोगवचनः। अह्नो निरुप्याणीति। प्रयोगवचनैकत्वात् सहप्रयोगः। तत्र न गृह्यते विशेषः। तस्मादैकतन्त्र्यम्॥ १०॥ पूर्व०॥

लिङ्गदर्शनाच्च॥ ११॥

लिङ्गं च सह प्रयोगं दर्शयति। समानबर्हींषि भवन्तीति। अनुवादोऽयम्॥ ११॥ हेतुः॥

वर्तमानापदेशाद्वचनात्तु तन्त्रभेदः स्यात्॥ १२॥

न चैकतन्त्र्यं स्यात् । किं तर्हि तन्त्रभेदः । स च भवन्नेवं प्रथमायां भेदः । उत्तरयोस्तन्त्रम् । कस्मात् । वचनात् । वचनमिदं भवति । अथ यः कामयेत वर्षीयान् श्रेयान् स्यामिति तस्याग्नये पवमानाय निरूप्य अथ पावकाय शुचये चोत्तरे हविषी समानबर्हिषी निर्वपेत् तदेनमग्रहीत् तेन स उत्तरं वर्षीयान् श्रेयान् भवतीति । किमिव वचनं न कुर्यात् । नास्ति वचनस्यातिभारः । तस्मादेवं कर्त्तव्यम् । अथ यदुक्तं प्रयोगवचनैकत्वादिति । तस्य कः परिहारः । नाऽसौ प्रयोगवचनः । कालवचनोऽसावद्धा निरूप्याणीति । तस्मादऽहेतुः स भवति ॥ १२ ॥ सि० ॥

सहत्वे नित्यानुवादः स्यात् ॥ १३ ॥

यच्चोक्तं समानबर्हींषि भवन्तीति समानप्रयोगं दर्शयतीति । तत्र ब्रूमः । सहत्वे नित्यानुवादः स्यात् । इदमपरं श्रूयते । यो ब्रह्मवर्चसकामः स्यात् तस्य सर्वाणि हवींषि निरूप्याणीति । तस्य सह प्रयोगो भवति । तस्मिन् सहत्वे नित्यानुवादोऽयं स्यात् । समानबर्हींषि भवन्तीति । किं पुनर्निरूप्याणीत्युक्ते सहप्रयोगो गम्यते । निरूप्याणीति बहुत्वयुक्तः प्रयोगो विज्ञायते । तच्च बहुत्वमुपादेयत्वेन चोदितानां विवक्षितम् । न चैकशः प्रयोगो बहुसंयुक्तः प्रयोगो भवति । तस्मात् सहप्रयोगो विज्ञायते ॥ १३ ॥ आ० नि० ॥ काम्यपवमानेष्टिभेदाधिकरणम् ॥ ४ ॥

द्वादशाहेन प्रजाकामं याजयेदिति श्रूयते । तत्र विचार्यते । किमेकैकशः पृथक् पृथग्दीक्षोपसदेनाहः सम्पाद्य द्वादश पञ्चविंशतिरात्राः कर्त्तव्याः, अथ वा द्वादश साद्यस्क्राः, अथ वा चतुरहे दीक्षाश्चतुरहे उपसदः, चतुरहे सुत्याः । अथ वा व्यवस्थानानां दीक्षोपसत्सुत्यानां विवृद्धिरिति । किं प्राप्तम् । तत् सूत्रेणैव प्रक्रमः ॥

द्वादशाहे तु प्रकृतित्वादेकैकमहरपवृज्येत कर्मपृथक्त्वात् ॥ १४ ॥

एकैकं सदीक्षोपसदमहरहरपवृज्येत द्वादश पञ्चविंशतिरात्राः कर्त्तव्याः । कुतः । तत्प्रकृतित्वात् । सदीक्षोपसदमहरपवर्जितं ज्योतिष्टोमे यतस्तत् प्रकृतीन्येतानि द्वादशाहानि पृथग्भूतानि कर्माणि पृथक्त्वेनैव धर्मानाकाङ्क्षन्ति तस्माज्ज्योतिष्टोमवत् सदीक्षोपसदमेकैक-

मह: कर्त्तव्यमिति ॥ १४ ॥ पूर्व० ॥

अह्नां चाश्रुतिभूतत्वात् तत्र साङ्गं क्रियेत यथा माध्यन्दिने ॥ १५ ॥

न चैतदस्ति यदुक्तं द्वादश पञ्चविंशतिरात्राः कर्त्तव्या इति । किं तर्हि । द्वादश साद्यस्काः कार्य्याः । किं कारणम्।अह्नां श्रुतिभूतत्वात् । द्वादशाहेनेति द्वादशसंख्याऽह्नां प्रत्यक्षश्रुता। सा बाध्येत, यदि द्वादश पञ्चविंशतिरात्राः क्रियेरन्। तस्माद् द्वादशस्वहःस्वेकैकं प्रधानं प्रयुज्येत । प्रधानकालत्वाच्च अङ्गानाम् । तत्कालं तदीयं दीक्षोपसदम् । यथा माध्यन्दिने। तद् यथा सान्तपनीयस्य माध्यन्दिने निरूप्यन्त इति वचनान्मध्यन्दिनकालान्येवाङ्गानि भवन्त्येवमिहापि तस्माद् द्वादश साद्यस्काः कर्त्तव्याः ॥ १५ ॥ पूर्व० ॥

अपि वा फलकर्तृसम्बन्धात् सहप्रयोगः स्यादाग्नेयाग्नीषोमीयवत् ॥ १६ ॥

अपि च, नैवं स्याद् द्वादश साद्यस्का इति । कथं तर्हि । सहप्रयोगः स्यात् । चतुरहे दीक्षाश्चतुरहे उपसदश्चतुरहे सुत्याः । कुतः । फलकर्तृसम्बन्धात् । फले कर्तृषु चैतेषां, प्रधानकर्मणां समेतानां सम्बन्धो द्वादशाहशब्देन समुदायवचनेन संयोगात् फले सम्बन्धः सत्रे स्वयङ्कर्तृत्वादहीने च दक्षिणैक्यात् । कर्तृषु चैकफलत्वादेककर्तृत्वाच्च सहप्रयोगो भवति । आग्नेयाग्नीषोमीयवत् । यथाग्नेयाऽग्नीषोमीययोरेकफलत्वादेककर्तृत्वाच्च सहप्रयोगो भवति । सहप्रयोगे च विशेषाग्रहणात्तन्त्रं दीक्षोपसदं द्वादशाहश्रुतिश्चानुग्राह्या। तदुभयमेवमुपपादितं भवति सहप्रयोगोऽहःसंख्या च । तस्मादेष पक्षः श्रेयान् ॥ १६ ॥ पूर्व० ॥

साङ्गकालश्रुतित्वाद्वा स्वस्थानानां विकारः स्यात् ॥ १७ ॥

अथ चैतदपि न युक्तम् । कुतः । साङ्गकालश्रुतित्वात् । यद्यत्र प्रधानानामेव कालश्रुतिः स्यान्नाङ्गानां, तत एवं स्यात् । अत्र तु साऽङ्गानां कालः श्रुतः । द्वादश दीक्षा, द्वादशोपसद इति दीक्षाणामुपसदां च पृथक् पृथक् कालः श्रुतः । यदि चतुरहे क्रियेत, ततो

बाध्येत । तस्मात् स्वस्थानानां विवृद्धिः । तदपेक्षं च द्वादशत्वम् । दीक्षोपसत्सुत्यापेक्षं प्रथमं दीक्षाः । तासां तत्रैव द्वादशत्वम् । तत उपसदस्तासामपि तद्देशानामेवान्ते सुत्या, तस्या अपि तत्स्थानाया एव वृद्धिः । तदपेक्षं द्वादशत्वम् ॥ १७ ॥ सि० ॥

दीक्षोपसदां च संख्या पृथक् पृथक् प्रत्यक्षसंयोगात् ॥ १८ ॥

अपि च द्वादशाहेन प्रजाकामं याजयेदित्युक्त्वा त्रिवृदादित्यनुक्रान्तानि । तस्मादपि तदपेक्षा द्वादशसंख्या ॥ १८ ॥

वसतीवरीपर्यन्तानि पूर्वाणि तन्त्रमन्यकालत्वादवभृथादीन्युत्तराणि दीक्षाविसर्गार्थत्वात् ॥ १९ ॥

एवं वसतीवरीपर्यन्तानि पूर्वाण्यन्यकालत्वादगृह्यमाणविशेषाणि तन्त्रं भवति । अवभृथादीनि चोत्तराणि । तस्यावभृथस्य दीक्षाविसर्गार्थत्वात् । स हि दीक्षोन्मोचनार्थः । एवं ह्याह । अप्सु दीक्षां प्रवेशयित्वा देवाः स्वर्गलोकमायन् यदप्सु स्नान्ति तामेव दीक्षामालभन्ते अथ यदपोऽवभृथमभ्यवयन्ति तामेव दीक्षां पुनरप्सु प्रवेशयन्तीति तन्त्रं च दीक्षोत्पन्ना, सा तन्त्रमेवोत्स्रक्ष्यते । विशेषाग्रहणात् । ॥ १९ ॥ हेतुः ॥

तथा चान्यार्थदर्शनम् ॥ २० ॥

एवं च सत्यन्यार्थदर्शनमिदं युक्तं भविष्यति षड्त्रिंशदहो वा एष द्वादशाह इति ॥ २० ॥ उदाहरणम् ॥

चोदनापृथक्त्वे त्वैकतन्त्र्यं समवेतानां कालसंयोगात् ॥ २१ ॥

यच्चाग्नेयाग्नीषोमीयवदिति । युक्तम् । यदाग्नेयाग्नीषोमीययोश्चोदनापृथक्त्वेऽप्यैकतन्त्र्यं सहप्रयोगः । कुतः । समवेतानां कालसंयोगात् । समवेतानामङ्गप्रधानानां कालसंयोगात् । पौर्णमास्यां पौर्णमास्या यजेत साङ्गयेति । तस्मात्तन्त्रम् । पौर्णमास्यामेवाङ्गानि च प्रधानानि च क्रियन्ते । इह पुनः साङ्गकालश्रुतित्वादित्येवमपदिष्टो हेतुः । तस्मादत्र द्वादशाहेऽङ्गप्रधानानि पौर्णमासीवत् सह कार्याणि ॥ २१ ॥

पूर्व० आ० नि० ॥ द्वादशाहे दीक्षाद्यधिकरणम् ॥ ५ ॥

अथ यानि प्रधानैरपृथक्कालान्यङ्गानि तेषु चिन्त्यते। किं तान्यऽपि तन्त्रम्। अथ वा भेदेनेति। किं प्राप्तम्, तन्त्रमिति। किं कारणम्। एवं सहत्वस्य वक्ता प्रयोगवचनोऽनुग्रहीष्यते। द्वादशाहेन प्रजाकामं याजयेदिति। तदुक्तं, विधिवत् प्रकरणाविभागे प्रयोगं बादरायण इति। एवं प्राप्ते ब्रूमः-

भेदस्तु तद्भेदात् कर्मभेदः प्रयोगे स्यात्तेषां प्रधानशब्दत्वात् ॥ २२ ॥

भेदस्तु स्यात्। कुतः। तद्भेदात्। तदित्यनेन पूर्वसूत्रनिर्दिष्टः कालः प्रतिनिर्दिश्यते। कालभेदात्। काले भिद्यमाने तन्त्रभेदो भवति। यथा दर्शे पूर्णमासेऽपि। इहापि कालभेदः। अद्य श्वः परश्व इति। तत इहापि कर्मभेदः स्यात्। करणभेद इत्यर्थः। कथं पुनरङ्गानां कालभेदो विज्ञायते। तेषां प्रधानशब्दत्वात्। प्रधानशब्दगृहीतान्यङ्गानि यत्र प्रधानं तत्र विज्ञायन्ते। यदद्यप्रधानं तस्याद्यकालान्यङ्गानि। यत् श्वस्तस्य श्वःकालानि तस्माद्भेदः ॥ २२ ॥ सि० ॥

तथा चान्यार्थदर्शनम् ॥ २३ ॥

पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्त इति भेदेनाह्नां पत्नीसंयाजान्ततां दर्शयति ॥ २३ ॥ हेतुः ॥

इष्टासुत्या वचनं तद्वत् ॥ २४ ॥

संस्थिते संस्थिते अन्वदग्नीदाग्नीध्रागारं प्रविश्य सुब्रह्मण्ये सुब्रह्मण्यामाह्वयेति प्रेष्यतीति। संस्थिते संस्थित इति वीप्सावचनात् सुब्रह्मण्याभेदं दर्शयति ॥ २४ ॥ उदाहरणम्।

पश्वतिरेकश्च ॥ २५ ॥

पश्वतिरेकश्च दृश्यते, य एकः पशुरतिरिच्यते स ऐन्द्राग्नः कार्यः न तावदतिरिच्यते, एको न भवति एकादशैते पशवो द्वादशाहानि। तत् पश्वालम्भभेद उपपद्यते। तन्त्रभावे सकृदेवैकादशिनानालभेत। तस्मादपि भेदः ॥ २५ ॥ हेतुः ॥ प्रधानापृथक्कालाङ्गानां भेदेनानुष्ठानाधिकरणम् ॥ ६ ॥

सुत्याविवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणं प्रकृत्यन्वयादावाहनवत् ॥ २६ ॥

उपसत्कालं सुब्रह्मण्याह्वाने चतुरहे सुत्यामागच्छ मघवन्निति। द्वादशाहे चोदकेन प्राप्यते। तत्रेदं विचार्यते। द्वादशाहे सुत्याहान्युपलक्षयितव्यानि, उताविकारेणैव प्रयोगः कर्त्तव्य इति। किं प्राप्तम्। सुत्याविवृद्धावेतस्यां सर्वेषामह्नामुपलक्षणं कर्त्तव्यम्। कुतः। प्रकृत्यन्वयात्। प्रकृतौ सौत्यमहरुपलक्षितम्। सर्वाणि चैतानि तत्प्रकृतानि। अतः सर्वाण्युपलक्षणीयानि। नन्वेकैवासौ देवता इन्द्रः सकृदुपलक्षणेन संस्कृतः संस्कृत एव। तस्य पुनरुपलक्षणमनर्थकमित्युच्यते। आद्योपलक्षणकृतः संस्कारः सोऽद्यतनस्य प्रधानस्याङ्गम्। तस्मादुत्तरार्थं पुनः पुनरुपलक्षयितव्यः। आवाहनवत्। तद् यथाऽऽग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवं पुरोधायस्पर्द्धमान इति एकत्वेऽप्यग्नेर्देवतायाः कर्मभेदाद्भेदेनाङ्गानि क्रियन्ते। एवमिहापि ॥ २६ ॥ पूर्व० ॥

अपि वेन्द्राभिधानत्वात् सकृत् स्यादुपलक्षणं कालस्य लक्षणार्थत्वात् ॥ २७ ॥

अपि वा न स्यात् सर्वेषामुपलक्षणम्। अविकारेणैव प्रयोगः स्यात्। कुतः। इन्द्राभिधानात्। इन्द्रोऽत्रोपलक्षणेन संस्क्रियते। स सकृत् संस्कृतः संस्कृत एव, न पुनः संस्कर्त्तव्यः। ननु चतुरहेऽसौ संस्कृतश्चतुरहे सुत्यामागच्छेति वचनात्। अविवक्षितोऽत्र काल इन्द्र आगच्छेत्येतावदेव विवक्षितम्। विवक्षिते सति काले वाक्यं भिद्यते। आगच्छ मघवन् चतुरह आगच्छेति सकृदुच्चरितागच्छेति विभक्तिरुभौ सम्बन्धौ न शक्नोति वदितुम्। अथ कस्मादिन्द्रागमनसम्बन्धो विवक्षितो, न पुनः कालाभिसम्बन्धः। आगच्छ मघवन्निति प्रत्यक्षः संयोगः। चतुरह आगच्छेति परोक्षः। सुत्याशब्देन व्यवायात्। ननु च सुत्यामागच्छेत्यपि सविवक्षितो भवतु। नैव कश्चिद्विरोधः। सुत्यात्वस्याविशेषात्। ननु चतुरह इति सुत्याविशेषोऽवगम्यते। न खलु। किं कारणम्। कालस्य लक्षणार्थत्वात्, चतुरहकालोऽत्र सुत्यालक्षणार्थः। चतुरहादिसुत्यामागच्छेति। यत् कारणं नात्र देवतागच्छति। यजतौ तूद्देशेन केवलमङ्गी भवति। स यजता-

वद्भावोऽयमुपलक्ष्यते । सर्वसुत्यासु चासौ तुल्यः । तत्र चतुरहवचनं प्रदर्शनं मुख्यत्वाद् मुख्येन हि प्रदर्शनं भवति । यथेडान्तातिथ्या सन्तिष्ठते, नानुयाजान् यजतीति ॥ २७ ॥ सि० ॥

अविभागाच्च ॥ २८ ॥

अथ यदुक्तमावाहनवदिति । तत्र ब्रूमः । विभक्तः कालः कृष्णग्रीवयोः सौम्येन व्यवायात् । तत्र गृह्यते विशेषः । पूर्वस्य कृष्णग्रीवस्यैतद्देवतावाहनं नोत्तरस्येति । अत्रेह विभक्तिकालाः सुत्या अव्यवेताः केनचित् । तासु न गृह्यते विशेषः । चतुरहग्रहणं वा विशेषकमित्युक्तम् । तस्मादविकारेण प्रयोगः ॥२८॥ हेतुः ॥ ऊहरूपतन्त्रवापाधिकरणम् ॥ ७ ॥

पशुगणे कुम्भीशूलवपाश्रपणीनां प्रभुत्वात् तन्त्रभावः स्यात् ॥ २९ ॥

वाजपेये प्राजापत्येषु पशुषु कुम्भ्याः शूलस्य वपाश्रपण्याश्च तन्त्रभावः स्यात् । विभुत्वात् । विभवत्येका कुम्भी सर्वपशूनामवदानानां श्रपणे । शूलं हृदयानां वपाश्रपणी वपानाम् । तस्मात्तन्त्रं स्युः ॥ २९ ॥ पूर्व० ॥

भेदस्तु सन्देहाद्देवतान्तरे स्यात् ॥ ३० ॥

एकादशिनेषु तु भेदेन कुम्भ्यादीनि स्युः । सन्देहात् । एकस्यां कुम्भ्यां पशूनां सन्देहः स्यात् । कस्य पशोः कान्यवदानानीति । एवं हृदयादीनां वपानां च ॥ ३० ॥ पूर्व० ॥

अर्थाद्वा लिङ्गकर्म स्यात् ॥ ३१ ॥

अथ वा न स्याद्भेदः । कुतः । सह प्रयोगात् । यत्तु सन्देहादिति । अर्थाच्चिह्नं किञ्चित् करिष्यते, येन विशेषग्रहणं भविष्यति ॥३१॥ पूर्व०

प्रतिपाद्यत्वाद्वसानां भेदः स्यात् स्वयाज्याप्रदानत्वात् ॥ ३२ ॥

कुम्भ्यास्तन्त्रभावो न घटते । आयाज्यत्वाद्वसानाम् । याज्यार्द्धर्चान्ते वसां जुहोतीति श्रुतं प्रकृतौ । तत्र स्वयाज्यार्द्धर्चान्ते वसा हुता । इहापि तथैव होतव्या । न च वसानां लिङ्गं कर्तुं शक्यम् ॥ ३२ ॥ पूर्व० ॥

अपि वा प्रतिपत्तित्वात् तन्त्रं स्यात् स्वत्वस्याश्रुतिभूतत्वात् ॥ ३३ ॥

अपि वा तन्त्रं कुम्भी स्यात् । प्रतिपत्तित्वात् । शेषभूता वसास्तासां प्रतिपत्तिरियम् । प्रतिपत्तिश्च द्रव्यं न प्रयोजयति । कुतः । तद्धारणार्थं पात्रम् । अत्यन्तसंसृष्टाश्च वसास्ताः स्वयाज्यार्द्धर्चान्त एव हुता भवन्ति । ननु परयाज्यार्द्धर्चान्तेऽपि प्रसज्यन्ते । अत्रोच्यते । स्वत्वस्याश्रुतिभूतत्वाद् नात्र श्रूयते स्वयाज्यार्द्धर्चान्ते होतव्या, न परयाज्यार्द्धर्चान्त इति । तस्मात् परत्र होमो न दोषाय, नाभ्युदयाय । अतस्तन्त्रमेव कुम्भ्याः स्यात् ॥ ३३ ॥ पूर्व० ॥

सकृदिति चेत् ॥ ३४ ॥

इति चेत् पश्यसि सहत्वं न श्रुतमिति । तेन तर्हि सकृदेव होमः प्रथमे याज्यार्द्धर्चान्ते भवत्वेवं सहत्वं चानुग्रहीष्यते, याज्यार्द्धर्चान्ते च हुतं भविष्यति । स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति ॥ ३४ ॥ आ० ॥

न कालभेदात् ॥ ३५ ॥

नैतदेवं प्रथमेऽर्द्धर्चान्त इति । किं तर्हि प्रत्यर्द्धर्चान्ते होतव्याः । कुतः । कालभेदात् । भिन्ना याज्यार्द्धर्चान्ताः । निमित्तसप्तमी चेयं याज्यार्द्धर्चान्त इति । अधिकरणस्यासम्भवात् । निमित्तावृत्तौ च नैमित्तिकावृत्तिर्यथा भिन्ने जुहोतीति । तस्मात् सर्वयाज्यार्द्धर्चान्तेषु होमः ॥ ३५ ॥ आ० नि० ॥ पशौ कुम्भ्यादीनां तन्त्रताधिकरणम् ॥८॥

पक्तिभेदात् कुम्भीशूलवपाश्रपणीनां भेदः स्यात् ॥३६॥

अस्ति सौत्रामणी । तत्राश्विनो धूम्रः, सारस्वतो मेषः, ऐन्द्रं ऋषभ ऐन्द्रस्यैवंविधाः पशवः सन्ति । तेष्वपि तन्त्रभावः प्रभुत्वात् प्राप्तोऽपोद्यते । सौत्रामण्यामेवञ्जातीयेषु ॥ ३६ ॥ पूर्व० ॥

जात्यन्तरेषु भेदः स्यात् पक्तिवैषम्यात् ॥ ३७ ॥

एकादशिनेषु तु नानाजातीयेषु कुम्भ्यादीनां भेदः स्यात् । पक्तिवैषम्यात् । विषमा हि पक्तिः, आजानामाविकानाञ्च मांसानाम् । यावता कालेनाजानि पच्यन्ते तावताविकानि विलीयन्ते । तत्रावदानसम्भेदो भवति । तस्मात् पात्रभेदः स्यात् ॥ ३७ ॥ सि० ॥

वृद्धिदर्शनाच्च ॥ ३८ ॥

वृद्धिश्च सौत्रामण्यां शूलानां गोऽजाविषु दृश्यते। शूलैश्च मासरेण वाऽवभृथमभ्यवयन्तीति । तस्मादपि भेदः ॥ ३८ ॥ हेतुः ॥ पाककालभेदाद् वसानां पात्रभेदाधिकरणम् ॥ ९ ॥

कपालानि च कुम्भीवत्तुल्यसंख्यानाम् ॥ ३९ ॥

अश्वप्रतिग्रहेष्ट्यां वारुणाश्चतुष्कपालाः पुरोडाशा अश्वसंख्याः श्रूयन्ते । यावतोऽश्वान् प्रतिगृह्णीयात् तावतश्चतुष्कपालान् वारुणान्निर्वपेदिति । तत्र विचार्यते । किं दीर्घेषु कपालेषु सर्वेषां श्रपणं कर्त्तव्यम्, अथ वा प्रतिपुरोडाशं कपालचतुष्कभेद इति । किं प्राप्तम् । कपालानि कुम्भीवत् । यथा प्राजापत्येषु कुम्भी तन्त्रम्, एवं तुल्यसंख्यानां पुरोडाशानां कपालानि तन्त्रमित्यर्थः ॥ किं कारणम् । एवं सहत्वेनानुग्रहीष्यते । सर्वेषु चतुर्षु कपालेषु संस्कृता भविष्यन्ति ॥ ३९ ॥ पूर्व० ॥

प्रतिप्रधानं वा प्रकृतिवत् ॥ ४० ॥

प्रतिपुरोडाशं कपालचतुष्कभेदः । एवं यथाप्रकृति कृतं भवति । प्रकृतौ दर्शपूर्णमासयोः प्रतिपुरोडाशं कपालानि भिन्नानि इहापि तद्वदेव भेत्तव्यानि चोदकानुग्रहाय । अपि च यदि कपालानि तन्त्रं भवेयुः । नैकोऽपि पुरोडाशश्चतुष्कपालेषु संस्कृतः स्यात् । सर्वे कपालावयवेषु पक्वा भवेयुः । तत्र कपालशब्दो बाध्येत । तस्माद्भेदः ॥ ४० ॥ सि० ॥

सर्वेषां वाभिप्रथनं स्यात् ॥ ४१ ॥

इदं च श्रूयते यावत्कपालं पुरोडाशं प्रथयतीति । तच्चाशक्यं तन्त्रभावे सम्पादयितुम् । तस्मादपि भेदः ॥ ४१ ॥ युक्तिः ॥ कपालभेदाधिकरणम् ॥ १० ॥

दर्शपूर्णमासयोः श्रूयते व्रीहीनवहन्तीति । तत्र मन्त्रः, अवरक्षो दिवः सपत्नं बध्यासमिति । तस्मिन् विचार्यते । किं प्रतिप्रहारं मन्त्रः उत सकृदेवादाविति । किं प्राप्तम् ? । प्रतिहारमिति । कुतः प्रहारात् प्रहारः कर्मान्तरापत्तेः पर्यवसानं, कर्मभेदे च सति गृह्यते विशेषः । येन कर्मणा सन्निपतितो मन्त्रस्तदर्थ इति । गृह्यमाणे च विशेषे भेदो दृष्टः । तस्मात् प्रतिप्रहारं मन्त्र इत्येवं प्राप्ते उच्यते,

एकद्रव्ये संस्काराणां व्याख्यातमेककर्मत्वात् ॥ ४२ ॥

तस्मिन्मन्त्रार्थनानात्वादावृत्तौ मन्त्रस्य सकृत् प्रयोगः स्यात् । एकस्मिन् द्रव्ये व्रीह्यादौ संस्काराणामवहन्त्यादीनां व्याख्यातमेककर्मत्वम् आतण्डुलनिर्वृत्तेरेकमिदं कर्मेति सर्वेषां त्वैककर्म्यादेतेषां च तद्गुणत्वादिति । ननु प्रतिप्रहारं कर्मभेद इत्युक्तमेकस्यैव कर्मणोऽयमभ्यासः फलस्याभ्याससाध्यत्वात् सोमयजिवत् । तस्मिन् मन्त्रार्थनानात्वाद्वावृत्तौ मन्त्रस्य सकृत्प्रयोगः । यत्र मन्त्रार्थस्य नानात्वन्तत्रास्यावृत्तिर्भवति । यथाग्नौ लोकम्पृणायाः । यत्र पुनरेक एव मन्त्रार्थस्तत्रावृत्तिरनर्थिका । इह चैको मन्त्रार्थः । कथं ज्ञायते करणोऽयं मन्त्रः । करणश्च कर्त्तव्यस्य वस्तुतोऽभिधानार्थः समधिगतः । समस्ताश्चैते प्रहाराः कर्त्तव्याः । समस्ता हि कार्यं साधयन्ति, न व्यस्ताः । उप्तानां व्रीहीणां तण्डुलविवेचनं यत्तच्चिकीर्षितं, तदभिसन्धातव्यम् । तस्मात् सर्वप्रहाराणां क्रिया मन्त्रेणाभिसंहिता । तत्रावृत्तिरनर्थिका तस्मान्मन्त्रस्य सकृत्प्रयोगः स्यात् ॥ ४२ ॥ सि० ॥ अवघातार्थमन्त्राणां तन्त्रताधिकरणम् ॥ ११ ॥

द्रव्यान्तरे कृतार्थत्वात् तस्य पुनः प्रयोगान्मन्त्रस्य च तद्गुणत्वात् पुनः प्रयोगः स्यात्तदर्थेन विधानात् ॥ ४३ ॥

राजसूये नानाबीजेष्टिः । अग्नये गृहपतये आशूनामष्टाकपालं निर्वपेत्, सोमाय वनस्पतये श्यामाकं चरुमित्येवमादि । तस्यामवहन्तिः समन्त्रकश्चोदकेन प्राप्यते । अत्रापि पूर्वेण न्यायेन सकृन्मन्त्रस्य प्रयोगः प्राप्तः । सर्वबीजानां वितुषीकरणं, चिकीर्षितं, तदभिसन्धीयत इति । तथा प्राप्ते उच्यते । द्रव्यान्तरे बीजान्तरे पुनः प्रयोगः स्यान्मन्त्रस्य । कुतः । कृतार्थत्वात् । पूर्वस्मिन् बीजे योऽवहन्तिः स कृतार्थः । सन्निपत्योपकारी हि सः । सच येन बीजेन सन्निपतितस्तदेव संस्करोति । तदेव चेत् संस्करोति उत्तरसंस्कारार्थं पुनः प्रयोक्तव्यः । तस्य पुनः प्रयोगान्मन्त्रस्यापि पुनः प्रयोगः । तद्गुणत्वात् । तस्यापि बीजान्तरे, तस्यावहन्तेः स मन्त्रो गुणस्तदर्थेन विधानात्तस्याप्यसौ प्रतिकर्मावसायिना चोदकेन विहितस्तस्मात् प्रतिबीजं मन्त्रस्यावृत्तिः ॥ ४३ ॥ पूर्वपक्षसिद्धान्तौ ॥ नाना-

वीजेष्टौ मन्त्रभेदाधिकरणम् ॥ १२ ॥

निर्वपणलवनस्तरणाज्यग्रहणेषु चैकद्रव्यवत्
प्रयोजनैकत्वात् ॥ ४४ ॥

दर्शपूर्णमासयोश्चतुरो मुष्टीन्निर्वपतीति । तस्य मन्त्रो देवस्य त्वेति । तत्रैव च दर्भाणां लवनमन्त्रः । बर्हिर्देवसदनं दामीति । तथा स्तरणमन्त्रः, ऊर्णाम्रदसं त्वा स्तृणामीति । आज्यग्रहणमन्त्रः, धामनामासीति । तेषु सन्देहः । किं मन्त्रस्य सकृत् प्रयोगः । अथ वा प्रतिमुष्टि प्रतिदानं प्रतिधातु प्रतिग्रहणम् । किं प्राप्तम् । निर्वपणलवनस्तरणाज्यग्रहणेषु चैकद्रव्यवत् प्रयोजनैकत्वात् । निर्वपणादिषु एकद्रव्यवत् स्यात् सकृत् प्रयोग इत्यर्थः । कुतः । प्रयोजनैकत्वात् तत्र तत्रैकं प्रयोजनं निर्वपणे तावद्धविष्याणामावापनम् । लवने वेदिः स्तरणयोग्यस्य बर्हिष उपसादनं, स्तरणे वेद्याच्छादनम् । आज्यग्रहणे यागयोग्यस्याज्यस्योपादानम् । यावता प्रयोजनं तच्चिकीर्षितं तदर्थो मन्त्र इत्युक्तम् ॥ ४४ ॥ पूर्व० ॥

द्रव्यान्तरवद्वा स्यात् तत्संस्कारात् ॥ ४५ ॥

द्रव्यान्तरवद्वा स्यात् । नैकद्रव्यवद्भेदः स्यादित्यर्थः । कुतः । तत्संस्कारात् । ये व्रीहय एकेन मुष्टिना निरुप्तास्ते संस्कृताः संन्निपत्योपकारित्वान्निर्वापस्य । द्वितीयो मुष्टिरप्यन्यान् व्रीहीन् संस्करोति। तत्र यदि मन्त्रो न प्रयुज्येत,मन्त्रकृतेन संस्कारेण तेषां वर्जनं स्यात्। एवं सर्वत्र । तस्मात् तत्र तत्र मन्त्रस्यावृत्तिः ॥ ४५ ॥ ॥ सि० ॥

निर्वापादिषु मन्त्रभेदाधिकरणम् ॥ १३ ॥

वेदिप्रोक्षणे मन्त्राभ्यासः कर्मणः पुनः प्रयोगात् ॥४६॥

वेदिप्रोक्षणं श्रूयते, त्रिः प्रोक्षतीति । तस्य मन्त्रो वेदिरसि बर्हिषे त्वेति । तत्र चिन्त्यते । किं प्रत्यावृत्ति मन्त्रोऽथवा सकृदेवेति । किं प्राप्तम् । वेदिप्रोक्षणे मन्त्रस्याभ्यासः । कुतः । कर्मणः पुनः प्रयोगात् । यस्मिन् कर्मप्रयोग उक्तो मन्त्रस्तदर्थोऽसाविति गृह्यते विशेषस्तस्मादावृत्तिः ॥ ४६ ॥ पूर्व० ॥

एकस्य वा गुणविधिर्द्रव्यैकत्वात् तस्मात्
सकृत् प्रयोगः स्यात् ॥ ४७ ॥

सकृदेव प्रयोगः । कुतः । द्रव्यैकत्वात् । एकं तद्वेदिद्रव्यं सकृदुक्तेन मन्त्रेण संस्कृतम् । तत्र भूयो मन्त्रकार्यं नास्ति । ननु कर्मद्वारेण मन्त्रो द्रव्यं संस्करोति । तच्च कर्म भिन्नम् । अत्रोच्यते । नैतद्भिन्नम् । वृत्तिस्तस्य गुणः । क्रियाभ्यावृत्तौ हि कृत्वसुजर्थः प्रत्ययो, न क्रियाभेदे । तन्मन्त्रवदावृत्तिः । तच्च कर्त्तव्यम् । सकृदुक्तेन मन्त्रेण मन्त्रवत् कृतम् । आवृत्तिसरूपादनार्था पुनः क्रिया । तस्मात् सकृत् प्रयोगः ॥ ४७ ॥ सि० ॥ वेदिप्रोक्षणे मन्त्रतन्त्रताधिकरणम् ॥ १४ ॥

कण्डूयने प्रत्यङ्गं कर्मभेदात् स्यात् ॥ ४८ ॥

ज्योतिष्टोमे कण्डूयनार्थो मन्त्रः । कृषिसु श्याम कृष इति । यदाऽनेकस्मिन्नङ्गे युगपत् कण्डूरुत्पद्यते तदा चिन्ता । किं प्रत्यङ्गं मन्त्रावृत्तिः, अथ वा सकृदेव प्रयोग इति । किं प्राप्तम् । प्रत्यङ्गं मन्त्र इति । कुतः । कर्मभेदात् । अङ्गेऽङ्गे कण्डूयनं कर्म भिन्नं, यजेः पर्यवसानाद् गृह्यते विशेषः । तस्मादावृत्तिः ॥ ४८ ॥ पूर्व० ॥

अपि वा चोदनैककालमैककर्म्यं स्यात् ॥ ४९ ॥

अपि वा नैवं स्यात् । न ह्यत्र कण्डूयनं चोद्यते । अर्थात् क्रियते कण्डूपनयनार्थम् । किमतः । यदि चोद्यते । अदृष्टार्थं स्यात् । अप्राप्ते शास्त्रमर्थवदिति । प्रतिप्रयोगं चादृष्टभेदात् कर्मनानात्वं भवेत् । तथा गृह्येत विशेषः । अथ पुनरर्थगृहीते कण्डूयने यावतोत्पन्ना कण्डूरपनीयते तावच्चिकीर्षितम् । तत्र विशेषो न गृह्यते । ननु यस्याङ्गस्य निष्कर्षणं कृतं तत् संस्कृतमङ्गान्तरे पुनः कर्त्तव्यम् । उच्यते । नाङ्गनिष्कर्षणार्थोऽयं यत्नः । किं तर्हि । कण्डूपनयनार्थः । सा च कण्डूरात्मनो न शरीरस्य । तत्र न गृह्यते विशेषः । तस्मात् सकृदेव प्रयोगः ॥ ४९ ॥ सिद्धान्तः ॥ प्रत्यङ्गं कण्डूयने मन्त्रतन्त्रताधिकरणम् ॥ १५ ॥

स्वप्ननदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणेषु चैवम् ॥ ५० ॥

ज्योतिष्टोमे स्वपनार्थो मन्त्रः, त्वमग्ने व्रतपा असीति । तत्रैव नदीतरणार्थः, देवीराप इति । तथाभिवृष्टस्य, उन्दतीरोजो धत्ते । अमेध्यप्रतिमन्त्रणस्य, अदब्धं चक्षुरिति । स यदा पुनः प्रतिबुद्धः स्वपिति, अनेकस्रोतसं वा नदीन्तरति, सन्तानेन वाभिवृष्यते, अनेकं वा मेध्यमेककालं पश्यति, तत्र किं मन्त्रस्यावृत्तिः ? अथ वा

सकृदेव प्रयोग इति । तत्र विशेषाग्रहणादावृत्तौ प्राप्तायामुच्यते । स्वप्नादिषु चैवम् । यथा कण्डूयने सकृत्प्रयोग इत्यर्थः । कृत्स्नां रात्रिमसावुद्दिश्य स्वप्नमन्त्रं प्रयुङ्क्ते,नैकान्निद्राम् । तथा सर्वस्रोतांसि तितीर्षुः सर्वाभिवर्षाणि सर्वामेध्यानि च युगपत् सर्वेषामुपगमात् तत्र न गृह्यते विशेषः । तस्मादनावृत्तिर्मन्त्रस्य ॥ ५० ॥ सि० ॥ स्वप्न-नदीतरणादिमन्त्रतन्त्रताधिकरणम् ॥ १६ ॥

प्रयाणे त्वार्थनिर्वृत्तेः ॥ ५१ ॥

दीक्षितस्य प्रस्थितस्य प्रयाणमन्त्रः । भद्रादभिश्रेयः प्रेहीति । तत्र विचार्यते । किं विश्रामे पुनः पुनः प्रतिष्ठमानो मन्त्रं प्रयुञ्जीत सकृदेवादाविति । विशेषाग्रहणात् प्रतिप्रस्थानमिति प्राप्ते, उच्यते । प्रयाणे त्वार्थनिर्वृत्तेः । अर्थमसावुद्दिश्य प्रतिष्ठते । आर्थनिर्वृत्तेस्तस्य प्रस्थानाभिसम्बन्धः । तस्मात् सकृदेव प्रयोक्तव्यः ॥ ५१ ॥ सि० ॥ प्रयाणे मन्त्रतन्त्रताधिकरणम् ॥ १७ ॥

उपरवमन्त्रस्तन्त्रं स्याल्लोकवद् बहुवचनात् ॥ ५२ ॥

ज्योतिष्टोमे उपरवमन्त्रः, रक्षोहणो वलगहनो वैष्णवान् खनामीति । तत्र सन्देहः । किं सर्वोपरवेषु सकृदेव मन्त्रः प्रयोक्तव्यः? उत प्रत्युपरवमिति । किं प्राप्तम् । उपरवमन्त्रस्तन्त्रं स्यात् । सकृदेव प्रयोक्तव्यः । कुतः । बहुवचनात् । बहुवचनान्तोऽयं, वैष्णवान् खनामीति । यदि प्रत्युपरवं प्रयुज्ज्येत, एकस्मिन् बहुवचनान्ताभिधानं न साधयेल्लोकवत् । यथा लोके एकस्मिन्नर्थे बहुवचनं न प्रयुज्ज्यते । अपि च सकृदुक्त एकः शक्नोति सर्वोपरवानभिधातुम् । शक्नोति चेदावृत्तिरनर्थिका । तस्मात् सकृदेव प्रयोक्तव्यः ॥ ५२ ॥ पूर्व० ॥ पीठपादचतुष्टयाकारो बाहुमात्रो गर्त्तभेद उपरवः ॥

न सन्निपातित्वादसन्निपातिकर्मणां विशेष-ग्रहणे कालैकत्वात् ॥ ५३ ॥

नैव तन्त्रं स्यात् । कुतः । सन्निपातित्वात् । सन्निपातिखनन-कर्मणा येनोपरवेण सन्निपतितं तदर्थमेव विज्ञायते । मन्त्रोऽपि चाऽर्थसन्निपाती मन्त्रान्तेन । कर्मादिसन्निपातादतो यस्योपरवस्यायं मन्त्रः सन्निपतितस्तस्यैव मन्त्रकारितः संस्कारो, न सर्वेषाम् । अतो न सकृत् प्रयोक्तव्यः । असन्निपातिकर्मणां विशेषा-

ग्रहणे कालैकत्वात् सकृद्वचने ये त्वसन्निपातिकर्मणां मन्त्राः यथा सुब्रह्मण्याह्वाने देवा ब्रह्माणइति औपवसथ्येऽहनि तेषामेककालत्वादगृह्यमाणविशेषाणां सकृद्वचनं स्यात्। यत्तु न बहुवचनान्त एकस्याभिधायक इति । प्रातिपदिकार्थोऽभिहितो विभक्त्यर्थश्च कर्मत्वम्। वचनार्थः केवलो नाभिहितः। स च नैवाभिधानमर्हति। अभिधायकस्य शब्दस्याभावात् । एकस्यैव वा पूजार्थे बहुवचनम् । तस्मादविरोधः ॥ ५३ ॥ सि० ॥ उपरवमन्त्रभेदाधिकरणम् ॥ १८ ॥

हविष्कृदध्रिगुपुरोऽनुवाक्यामनोतस्यावृत्तिः कालभेदात् स्यात् ॥ ५४ ॥

इदं सूत्रं पूर्वसूत्रप्रत्युदाहरणार्थम्। कालैकत्वादिति। किमर्थं हविष्कृदध्रिगुपुरोऽनुवाक्यामनोतस्यावृत्तिः कालभेदात् स्यादिति । अथ वा अधिकरणान्तरम् । ज्योतिष्टोमे प्रतिसवनं सवनीयाः पुरोडाशास्तेषु हविष्कृदाह्वानम्। वाजपेये क्रतुपशवः प्रजापत्याश्च । तत्राध्रिगुप्रैषः । कृष्णग्रीवयोः पुरोऽनुवाक्यामनोतासूक्तं च । तेषु चिन्ता । किं तस्यतस्य सकृत्प्रयोगः, अथवाऽऽवृत्त्येति सहत्वानुग्रहाय सकृदिति प्राप्त उच्यते । आवृत्तिः स्यादिति । कुतः । कालभेदात् । प्रातःसवने यद्धविष्कृदाह्वानमध्रिगुप्रैषश्च तस्य कालभेदादगृह्यते विशेषः।प्रातःसवनीयानां पुरोडाशानामयं हविष्कृत्क्रतुपशूनां चाध्रिगुरिति । तथा कृष्णग्रीवयोःसौम्येन व्यवायात्पूर्वस्य कृष्णग्रीवस्येयं पुरोऽनुवाक्या मनोता चेति । सर्वत्र कालो न भिद्यते । कालभेदाद् गृह्यते विशेषः। तस्मादावृत्तिः ॥ ५४ ॥ प्रत्युत्तरम ॥

अध्रिगोश्च विपर्यासात् ॥ ५५ ॥

अध्रिगोश्चायमपरो विशेषो विपर्यासः स्यात् तन्त्रभावे अध्रिगोर्ये पुरस्तात् पदार्थाः प्राजापत्यानां यथा पश्वालम्भ आश्रुते प्रत्याश्रुते अजैदग्निरिति मन्त्रः । ते यदि तावत् प्रातःसवने क्रियन्ते पर्यग्निकरणान्तं काण्डन्नोत्सृष्टं भवति । अथ मा भूदेष दोष इति ब्रह्मसाम्नि क्रियन्ते, तथापि विपर्यासः कृतो भवति । पुरस्तादध्रिगोः कर्त्तव्यानां पुरस्तात् करणेन। तस्मादप्यावृत्तिः ॥५५॥ प्रत्युत्तरम् ॥

किञ्च,

करिष्यद्वचनात् ॥ ५६ ॥

ऽा चेयमग्निगोर्विभक्तिः, आरब्धमुपनयतेति । सा प्राप्तकालं करिष्यमाणं ब्रूते । स यदि प्रातःसवन उच्यते अप्राप्तकालत्वात् पदार्थस्यासमर्थः स्यात् । अथ प्रेषणार्था, तथापि प्रेषणं वृत्त्यर्थम् । न च प्राजापत्येषु तत् प्रवृत्त्यर्थं युज्यते । बहूनां कर्मराशीनां व्यवायान्नष्टः प्रेषणप्रत्ययो भवति । तथाप्यसमर्थः । तस्मादप्यग्निगोरावृत्तिरिति सिद्धान्तः ॥ ५६ ॥ ॥ हेतुः ॥ हविष्कृदादिमन्त्रभेदाऽधिकरणम् ॥ १९ ॥

इति श्रीभट्टशबरस्वामिनः कृतौ मीमांसाभाष्ये एकादशाध्यायस्य चतुर्थः पादः समाप्तः ॥ ११ ॥ ४ ॥ एकादशोऽध्यायश्च सम्पूर्णः ॥ ११ ॥

अथ द्वादशाध्यायस्य प्रथमः पादः ॥ १२ ॥ १ ॥

एकादशेऽध्याये तन्त्रावापलक्षणं व्याख्यातम् । अधुना प्रसङ्गलक्षणं द्वादशे व्याख्यायते । प्रसङ्गशब्दार्थोऽन्यैरुक्तः । एवमेव प्रसङ्गः स्याद् विद्यमाने स्वके विधाविति । अन्यत्र कृतस्याप्यन्यत्राऽऽसक्तिः प्रसङ्गः । यथा प्रदीपस्य प्रासादे कृतस्य राजमार्गेऽप्यालोककरणम् । तदिह प्रसङ्ग एवादौ विचिन्त्यते । अग्नीषोमीयपशौ पुरोडाशः । अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालन्निर्वपेदिति । किं तस्य पृथक्त्वेनाङ्गानि कर्त्तव्यानि? उत यानि पशौ कृतानि तस्याप्युपकुर्वन्तीति । ततः सूत्रेणैवोपक्रमः ।

तन्त्रिसमवाये चोदनातः समानानामैकतन्त्र्यमतुल्येषु तु भेदः स्याद् विधिप्रक्रमतादर्थ्यात् श्रुतिकालनिर्देशात् ॥ १ ॥

तन्त्रं साधारणो धर्मग्रामः । यथा दर्शपूर्णमासयोराज्यभागादिः पूर्वः, स्विष्टकृदादिरुत्तरः । स येषां प्रधानानां तानि तन्त्रीणि प्रधानानि । तेषां तु समवाय एकदेशकालकर्तृत्वे चोदनातः । समानानामेकवाक्यचोदितानामेकतन्त्रत्वं भवति । यथा दर्शपूर्णमासयोर्यथा च चित्रायामिष्टौ । अतुल्येषु तु भेदः स्यात् ॥

यानि तु चोदनातो न तुल्यानि, नाना वा वाक्यैश्चोदितानि तेषु तु भेदः स्यात् तन्त्रस्य । यथाऽत्रैवाग्नीषोमीयं पशुमालभेत अग्नी-

षोमीयं पशुपुरोडाशमेकादशकपालं निर्वपतीति । किं कारणम् । विधिप्रक्रमतादर्थ्यात् । विधिर्विधानं तदङ्गानां प्रयोगः । तस्य प्रक्रमः तदर्था प्रवृत्तिः । विधिप्रक्रमतादर्थ्यं विज्ञायते । अयं पश्वर्थो विधिप्रक्रमो, न पुरोडाशार्थ इति । कथं पुनः पश्वर्थत्वं विधिप्रक्रमस्य तादर्थ्यम् ? । श्रुतिकालनिर्देशात् । श्रुत्या तत्र कालो निर्दिश्यते । अग्नीषोमीयप्रणयनादनन्तरं पशोः कालः । तत्र तस्य चोदना । वपाप्रचारादूर्ध्वं पुरोडाशस्य कालः । पशोरवसरे यो विधिप्रक्रमः स केवलः पश्वर्थो विज्ञायते, पुरोडाशस्याप्राप्तत्वात् । अतस्तस्य पृथक् तन्त्रं कर्त्तव्यम् । लिङ्गञ्च पश्वर्थतां तन्त्रस्य दर्शयति । यदेकादश प्रयाजान् यजति पशुमेव तत् प्रयजति । यदेकादशानुयाजान् यजति पशुमेव तदनुयजतीति । एवकारकरणादवधारणं विज्ञायते, पशुमेव, न पुरोडाशमिति ॥ १ ॥ पूर्व० ॥

गुणकालविकाराच्च तन्त्रभेदः स्यात् ॥ २ ॥

अपि च पाशुकाः प्रयाजानुयाजा गुणतः कालतश्च विकृता एकादशसंख्याः । पशावुभये वा पञ्चभिश्च प्रयाजैस्त्रिभिरनुयाजैः पुरोडाशस्य कार्यम् । तथाष्टपदाज्येनानुयाजाः पशोरिज्यन्ते केवलेन आज्येन च पुरोडाशस्यार्थः कालविकारेऽपि चासन्ने हविषि पौरोडाशिकैः प्रयाजैर्भवितव्यम् । पाशुकास्तु तिष्ठति पशौ वर्त्तन्ते । तिष्ठन्तं पशुं प्रयजन्तीति वचनात् । उभयेऽपि पुरोडाशस्य पृथक्त्वे वा क्रियमाणा यथा सम्पादिता भवेयुः । तस्मादपि तन्त्रभेदः ॥ २ ॥ आ० ॥

तन्त्रमध्ये विधानाद्वा मुख्यतन्त्रेण सिद्धिः स्यात्तन्त्रार्थस्याविशिष्टत्वात् ॥ ३ ॥

अथ वा नैव भेदेन पुरोडाशस्य तन्त्रं कर्त्तव्यम् । किं तर्हि मुख्यतन्त्रेण सिद्धिः स्यात् । पाशुकमेव तन्त्रं पुरोडाशस्योपकुर्यात् । किं कारणम् । तन्त्रमध्ये विधानात् । पाशुकस्य तन्त्रस्य मध्ये पुरोडाशो विहितः । अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालन्निर्वपतीति । किमतस्तन्त्रार्थस्याविशिष्टत्वं भवतीति । तन्त्रस्यार्थस्तन्त्रार्थः । अङ्गकृत उपकारः । सोऽत्राविशिष्टः पुरोडाशस्य च सन्निधानाऽविशेषात् पशावपि क्रियमाणान्यङ्गानि पुरोडाशस्य सन्निहितानि । सन्निधानाच्च पशोरप्युपकुर्वन्ति प्र-

दीपवद् । यथा प्रासादे कृतः प्रदीपः सन्निधानाद्राजमार्गेऽप्युपकरोति । विषम उपन्यासः । स खलु प्रत्यक्षेण ज्ञायते । अयं पुनरप्रत्यक्षोऽङ्गोपकारः कथं शक्यो विज्ञातुमिति । अयमपि शास्त्रदृश्यः शास्त्रप्रत्ययाद्गम्यते । शास्त्रं चेद् दर्शपूर्णमासवत् कर्त्तव्यानीति । तद्यथैव कृतानि किमिति नोपकरिष्यन्ति । दर्शपूर्णमासयोः स्वप्रधानैरेकदेशकालकर्तृकाणि क्रियमाणान्युपकृतवन्ति । इहापि तथाविधान्येव क्रियन्ते । तस्मादिहापि तद्वदेवोपकुर्वन्तीति विज्ञायते । आह । नेह तद्विधानानि दर्शपूर्णमासयोः स्वप्रधानान्युद्दिश्य कृतान्यङ्गानि । इहापि तद्वदेव कर्त्तव्यानि । न च पुरोडाशमुद्दिश्य कृतान्यङ्गानीहापि तद्वदेव कर्त्तव्यानि । न च पुरोडाशमुद्दिश्येह क्रियन्ते । किं तर्हि । पशुम् । तस्मात् पुरोडाशस्य न प्रकृतिवद् विकृतानि भवन्तीत्युच्यते । प्रकृतौ न शब्द उपदेशः । नहि तत्र श्रूयते, प्रधानान्युद्दिश्याङ्गानि कर्त्तव्यानीति । किं तर्हि । अर्थात् क्रियन्ते । तेषां तत्र चिकीर्षितत्वात् । न चार्थात् कृतं चोदकेन प्राप्यते, यत्कारणं विध्यन्तरम् । तत्राक्षेपात् कृतान्यङ्गानि इहापि तद्वदेव कर्त्तव्यानि । न च पुरोडाशमुद्दिश्य तेन समुच्चितं तत्प्राप्यते न पाठाद् बाह्यम् । तस्मात् त्वनुद्दिश्यापि क्रियमाणानि प्रकृतिवत् कृतानि भवन्ति । एवं सिद्धा प्रसङ्गादुपकारनिर्वृत्तिः । नन्वेवं सति तत्र लक्षणविशिष्टमेव भवति । न खलु तन्त्राङ्गमेव साधारणम् । इह त्वङ्गकृत एवोपकारः । सोऽपि न साधारणः । अन्यकृतोऽन्यस्य भवति ॥ ३ ॥ सि० ॥

विकाराच्च न भेदः स्यादर्थस्याविकृतत्वात् ॥ ४ ॥

अथ यदुक्तं गुणकालविकाराच्च तन्त्रभेदः स्यादिति । तत्र ब्रूमः । विकाराच्च न भेदः स्यादर्थस्याविकृतत्वात् । अथाङ्गजनित उपकारः स न विकृतयोर्दर्शपूर्णमासयोः । स एव कथं ज्ञायते । तदुच्यते । प्रयाजानुयाजास्तावदेते दार्शपौर्णमासिकाः । तत्र प्रयाजानुयाजशब्दौ प्रज्ञायेते । ते च चोदकेनेह प्राप्ताः सन्निहिता विद्यन्ते । प्रकृतिगामित्वं च शब्दस्य न्याय्यम् । न चैकः शब्दोऽनेकार्थो युक्तः । तस्माद्दार्शपौर्णमासिको ह्येतदुपकारोऽप्येषां दार्शपौर्णमासिक एव । स हि तेषां प्रज्ञातः । यदि च प्रकृतादुपकारादुपकारान्तरं प्रकुर्य्युः । ततोऽप्राकृतकार्य्यत्वान्नैव चोदकेन प्राप्येरन् । अपूर्वा भवेयुः । यथा सत्रे

गौग्गुलवादिभिरभ्यञ्जनम् । अप्राप्तौ वाऽनेनैव प्रयाजा विधीयन्ते । अनेनैव प्राप्येरन् । तत्र द्विकरः शब्दः स्यात् । न च सकृदुच्चरितः शक्तो ह्यर्थद्वयं विधातुम् । अपूर्वत्वे चैतेषाम् अकृता अपि चोदकेन प्राप्येरन् । तत्र वैश्वदेवे त्रिंशत् सम्पत्तिराहुतीनां न युज्यन्ते । न च प्रयाजाद् न चानुयाजाद्वाज्यभागौ अष्टौ हवींषि अग्नये समवद्यति वाजिनो यजत्याहुतीनां सम्पत्त्यै त्रिंशत्त्वायेति । तस्माद् गुणविकारेऽप्यविकृतः प्राकृतोऽङ्गोपकारः । तत्कृता एव पुरोडाशस्याप्युपकुर्वन्तीति न गुणकालविकारं तन्त्रभेदः । तदानीं तमुभौ प्रार्थयेते पशुः पुरोडाशश्च । उभयोश्च प्रकृतिवत् क्रियन्तेऽङ्गानि । तस्मात् सकृत्कृतान्येवोभयोरुपकुर्वन्ति । विकार इदानीं किमर्थः, पश्वर्थः । पाशुकेषु हि प्रयाजानुयाजेषु श्रूयन्ते, न तु पशोः पुरोडाशस्य च । न चाऽसाधारणान्यङ्गानि पाशुकान्येव सन्निधानात् पुरोडाशस्याप्युपकुर्वन्तीत्युक्तम् । अपि च, पृषदाज्येनापीज्यमाना अनुयाजा आज्येनेष्टा भवन्ति । न हि पृथक्त्वे आज्यत्वं नाशयति । यस्य क्षीरेण भोजनमुदितं भवति, यदि तस्मै सशर्करं दीयते न कश्चिद्विरोधो भवति । सशर्करमपि पय एवेति । तथा य एकादश प्रयाजान् यजतीति । असौ तदन्तर्गतान् प्राकृतान् पञ्च येभ्योऽधिकाः षट् न तैरिज्यमानैः पञ्च प्राकृता नष्टा भवन्ति । एवं तिष्ठत्यपि पशौ क्रियमाणाः प्रयाजाः कृता एव पुरोडाशस्य भवन्ति । क्रमस्तेषां प्राकृतो हापितो गुणमात्रश्च क्रमः । न च गुणानुग्रहार्थं प्रधानस्यावृत्तिर्युक्ता । न च गुणवशवर्त्ति प्रधानं कामं क्रमविपर्य्यासनिमित्तं प्रायश्चित्तं भवेत् । नावृत्तिः । प्रायश्चित्तं तत्तर्हि कर्त्तव्यम् । क्रियते यो ह्यग्नौ साति सर्वं प्रायश्चित्तं जुहोतीति प्रासङ्गिकत्वाद्वा प्रायश्चित्ताभावः । तस्मादविरोधः ॥ ४ ॥ पूर्व० आ० नि० ॥

एकेषां वा शक्यत्वात् ॥ ५ ॥

एकेषां वा शक्यभेदेन क्रिया । यथा वेदेरग्न्युद्धरणस्य व्रतोपायनस्येति । वेदिः कृता नवपृक्ता तिष्ठति न शक्या कर्तुम् । न ह्यर्थः कृतः सन् कर्तुं शक्यते । अथोच्यते । अन्यां करिष्यतीति ॥५॥ आ०॥

आहोपुरीषकं स्यात् ॥ ६ ॥

तिर्यक् चासौ भवेत्तत्र दिक् संयुज्येत । विहारपृथक्त्वे वाऽश्रुत-

भापद्येत। तत्रैकदेशकालकर्त्तृकत्वमङ्गप्रधानानामिति स्थितो न्यायः प्रत्युदूभ्रियेत। एवमप्युद्धरणं तद्वाहवनीयनिवृत्त्यर्थम्। सकृदुद्धारणेन च निवर्त्तितोऽसौ। न च निवर्त्तिते शक्यो निवर्त्तयितुम्। यथा कृतः कर्त्तुं न। अथोच्यते। अन्यं निवर्त्तयिष्यतीति। न तस्मिन्ननुपरते द्वितीयस्तत्राहवनीयोऽस्ति। यत्कारणं गार्हपत्याहवनीयावुभावेकास्थौ। आहवनीयेऽपपातिते परिशिष्टो गार्हपत्यो भवति। यथा सर्वसाधारणध्रौवादाज्यादुपांशुयाजार्थेऽपपातिते परिशिष्टमन्यदेतदर्थं भवति। विहारपृथक्त्वं च पूर्ववदापद्यते। तत्र पूर्वोक्ता एव दोषाः। तथा व्रतं यद् गृहीतं न तत् पुनरुत्स्रष्टुं शक्यते ग्रहीतुम्। अनुत्सृष्टञ्च तद् आप्रधानापवर्गात् ॥ ६ ॥ आ० नि० ॥

एकाग्निवच्च दर्शनम् ॥ ७ ॥

एकाग्निं पशोः पुरोडाशस्य च दर्शयति। मध्येऽग्नेराज्याहुतीर्जुहोति पुरोडाशाहुतीः पश्वाहुतीश्चेति नाग्न्युद्धरणस्य भेदः। तस्मात् पाशुकं तन्त्रं पुरोडाशे प्रयुज्यत इति ॥ ७॥ हेतुः ॥ पशुपुरोडाशाऽधिकरणम् ॥ १ ॥

जैमिनेः परतन्त्रत्वापत्तेः स्वतन्त्रः प्रतिषेधः स्यात् ॥८॥

तस्मिन्नेव पशुपुरोडाशे चिन्ता। किमाज्यभागौ कर्त्तव्यावुत नेति। आह। तत एतत् परीक्ष्यम्। किं प्रसङ्गेन चोदको बाध्यते। उत प्रयोगवचन इति। यदि चोदको बाध्यते। ततो न कर्त्तव्यावथ प्रयोगवचनस्ततः कर्त्तव्याविति। किं पुनरत्र युक्तम्। चोदको बाध्यत इति। किं कारणम्। आनुमानिकश्चोदकः, प्रत्यक्षः प्रयोगवचनः प्रत्यक्षं चानुमानाद् बलीयः। दुर्बलस्य च बाधो न्याय्यो, न च बलीयसः। एवं चेन्न कर्त्तव्यौ। चोदकेन हि तौ प्राप्येयाताम्। स चेह बाधितत्वान्नास्तीति। एवं प्राप्ते उच्यते। जैमिनेराचार्यस्य मतं, कर्त्तव्यावाज्यभागाविति। कुतः ?। यतः परतन्त्रापत्तेः स्वतन्त्रप्रतिषेधः स्यात्। यस्य स्वस्य तन्त्रस्य कार्यं परतन्त्रमापद्यते तस्य प्रतिषेधः स्यात्। यथा पौरोडाशिकानां पाशुकम्। यस्य तु न किञ्चित् परकीयं कार्यमापद्यते तत्प्रतिषेधो न युक्तः। यथा देवदत्ते यज्ञदत्तयानमारूढे देवदत्तयानं निवर्त्तते। न वस्त्रालङ्कारः। न चेह आज्यभागयोः कार्यं हीयते। न च किञ्चित् पाशुकमङ्गमापद्यते। त-

स्मात्तयोरनुवृत्तिः । यत्तु प्रयोगवचन इति । नैषात्र प्रयोगवचनस्य प्रवृत्तिः सा ह्यङ्गान्यप्रतिगृह्णीयात् पाशुकैरेव चाङ्गैः पुरोडाशोऽङ्गवान् । प्रत्यक्षो ह्ययं नाज्यभागौ गृह्णाति । प्रकरणसन्निहितमङ्गं प्रयोगवचनेन गृह्यते । न च पशौ आज्यभागौ विद्येते । प्रतिषिद्धत्वात् । तौ न सौम्येऽध्वरे न पशाविति।अपि च क्रमे तत्प्रयोगवच उत्पन्नानामङ्गानां ग्राहकश्रुत्या चोदको ग्राहकश्च । तस्मात् स बलवान् ॥ ८॥ पूर्वपक्षसिद्धान्तौ ॥ पशुपुरोडाशे आज्यभागाधिकरणम् ॥ २ ॥

नानार्थत्वात् सोमे दर्शपूर्णमासप्रकृतीनां वेदिकर्म स्यात् ॥ ९ ॥

सोमे यानि दर्शपूर्णमासप्रकृतीनि कर्माणि महावेद्यां वर्त्तन्ते तेषु चिन्ता । तेषां वेदिर्भेदेन कर्तव्या ? उत नेति । किं प्राप्तम् । भेदेन कर्तव्या । किं कारणम् । चोदकं प्रापयति । एवं चोदकानुग्रहो भवति । ननु सौमिकं च प्रसङ्गात् कार्यं साधयेत् । अत्रोच्यते । न साधयेत् । कस्मात् । नानार्थत्वात् । नानार्थे एते वेदी दार्शपूर्णमासिकी हविषामासादनार्था । सौमिकी प्रधानार्था । तत्र प्रसङ्ग उपपद्यते । यत् तन्त्रिणोऽङ्गमध्यपात्यङ्गं न कार्यं तत् प्रसज्ज्यते । यथा पाशुकाः प्रयाजाः पौरोडाशिकेषु।न त्विह तथा।तस्माद्वेदिः कर्त्तव्या ॥९॥ पूर्व०

अकर्म वा कृतदूषा स्यात् ॥ १० ॥

न वा कर्त्तव्या दार्शिकी वेदिः।कुतः । कृतदूषा स्यात् । सा क्रियमाणा केवलं सौमिक्यादेः कृताया दूषणं स्यात् । न किञ्चित् स्वार्थं साधयति । ननु हविषामासादनं तत् करिष्यते । शक्यं तु तन्महावेद्यामपि कर्त्तुम् । नन्वन्यार्था सेत्युक्तम् । अन्यार्थापि सती हविषामासादनेऽधिकरणं भवितुं प्रभवति । वेद्यां हविषामासादनं श्रुतम् । इयमपि च वेदिः, न तत्र तदर्थायामतदर्थायां वेत्येष विशेषः श्रूयते । तस्मान्न कर्त्तव्या ॥ १० ॥ सि० ॥ सोमे वेद्यभेदाधिकरणम् ॥ ३ ॥

पात्रेषु च प्रसङ्गः स्याद्धोमार्थत्वात् ॥ ११ ॥

सोम एव यानि दर्शपूर्णमासप्रकृतीनि ग्रहचमसे प्रयुक्ते वर्त्तन्ते । यथा साततः पशुः सावनाः पुरोडाशाः सौम्यश्चरुरिति । तेषु विचार्यते । किं तेषां ग्रहैश्चमसैर्वा होमः कर्त्तव्यः, अथ वा दार्शिकैः स्रुवादिभिः पात्रैरिति । तत्रोच्यते । पात्रेषु च प्रसङ्गः स्यात् । कुतः ।

होमार्थत्वात्। होमार्थानि तानि पात्राणि। स च होमो ग्रहचमसेनाऽपि निर्वर्त्यते। सोमतन्त्रमध्यपतितानि कर्माणि। तेषु ग्रहैश्चमसैर्वा होमः कर्त्तव्यः॥ ११॥ पूर्व०॥

न्याय्यानि वा प्रयुक्तत्वादप्रयुक्ते प्रसङ्गः स्यात् ॥१२॥

न्याय्यानि वा दार्शपूर्णमासिकानि स्युः। तैर्होमः क्रियते। कुतः। प्रयुक्तत्वात्। प्रयुक्तानि तानि विद्यन्ते। यद् गृहीत्वाज्यान्यासादयन्ति न यजमानमुपहन्तीति प्रथमं तावत्तेषां प्रयोगः। प्रोक्षणं संमार्जनं च। तत आज्यग्रहणम्। तान्येवाज्यप्रयुक्तानि विद्यन्ते। अप्रयुक्ते प्रसङ्गः स्यात्। यन्मध्यपातिनोऽङ्गं न प्रयुक्तं तत्कार्यं तन्त्रिणोऽङ्गं प्रसज्ज्यते। स्वस्याभावे हि परकीयमुपजीव्यते। असन्निहितेऽपि स्वस्मिन् याने देवदत्तो यज्ञदत्तयानमारोहति। सन्निहिते तु स्वयानेनैव हि याति। तत्र हि तस्य यादृशं स्वातन्त्र्येण गमनसुखं न तादृशं परयाने। पुरोडाशानामपि दार्शिकैः पात्रैर्यादृशं सादृगुण्यं तादृशं ग्रहचमसैर्न। न तत्र प्राकृत्यो वृक्षजातयः प्रोक्षणादयश्च संस्कारा लभ्यन्ते। ग्रहचमसे तेषामभावेऽपि सौमिकास्तैः पुरोडाशानामसम्बन्धः। यदि पुनर्दार्शिकान्यप्रयुक्तानि भवेयुः। किं ग्रहचमसं प्रसज्ज्येत। नेति ब्रूमः। दार्शिकान्येव प्रसज्ज्येरन्। तन्त्रं तन्त्रिणोऽङ्गं क्रियमाणमितरस्यापि कृतं भवति। तत्र प्रसङ्गो यथा पाशुकेषु प्रयाजेषु क्रियमाणेषु पौरोडाशिकाः। इह तु ग्रहचमसे प्रयुक्तो,नेतराणि प्रयुक्तानि भवन्ति। न हि सोमे हूयमाने पुरोडाशा हुताः। तस्मादस्त्यत्र प्रसङ्गः। किं तर्हीदमुच्यते। अप्रयुक्ते प्रसङ्गः स्यादिति। यदि प्रयोग एषां नोपपद्यते, प्रतिषिद्ध्येत। तावतः प्रसङ्गः स्यादित्यर्थः। अपि च न्याय्यानि दार्शपूर्णमासिकानि, न ग्रहचमसम्। किं तेषां न्याय्यत्वं दर्शपूर्णमासयोः। तानि शब्देनोक्तानि। ततश्चोदकेन पुरोडाशे अतिदिश्यन्ते। अस्ति शब्दसंस्पर्शः। ग्रहचमसेन, न तु हविर्यज्ञेन क्वचिद्धोमः श्रुतः। अर्थात् क्रियते। असति शब्दोक्तेऽर्थक्रिया भवति। दर्शयति च। एतानि पात्राणि युनज्मि ते पृथिवीं ज्योतिषा सहेति। ध्रुवामभिमृशति। युनज्मि वाचमन्तरिक्षेण ते सहेत्युपभृतं युनज्मि वाचं सह दिवा सूर्येणेति जुहूमिति। तस्मादेतैर्होमः कर्त्तव्यः॥ १२॥ सि०॥ दार्शिकपात्राधिकरणम्॥ ४॥

शामित्रे च पशुपुरोडाशो न स्यादितरस्य प्रयुक्तत्वात् ॥ १३ ॥

पुरोडाश एव चिन्ता । किमेतस्य शामित्रेऽग्नौ श्रपणं कर्तव्यमुत शालामुखीय इति । तत्र स एव न्यायः । इतरस्य प्रयुक्तत्वादिति । गार्हपत्ये च हविषां श्रपणं श्रुतम् । स च प्रयुक्तो विद्यते शालामुखीये,एषोऽत ऊर्ध्वं गार्हपत्यो भवतीति । तस्मात्तत्र श्रपणं कर्त्तव्यम् ॥ १३ ॥ सि० ॥ शामित्रे पशुपुरोडाशाधिकरणम् ॥ ५ ॥

श्रपणं वाऽग्निहोत्रस्य शालामुखीयेन स्यात् प्राजहितस्य विद्यमानत्वात् ॥ १४ ॥

कौण्डपायिनामयने अग्निहोत्रे चिन्त्यते । किं तदीयस्य द्रव्यस्य शालामुखीये श्रपणमथवा प्राजहित इति । प्राजहित इति गार्हपत्यस्य पूर्वाचार्यसंज्ञा । अत्रापि स एव न्यायः । गार्हपत्ये श्रपणं श्रुतम् । स एव प्रयुक्तो विद्यते । अप्रयुक्ते च प्रसङ्गः स्यादिति । भूयांश्चात्र परिहारः । चोदकेन शालामुखीयः प्राप्यते । ज्योतिष्टोमे हि तस्य गार्हपत्यत्वं श्रुतम् । तच्च चोदकपरम्परया कौण्डपायिनामयनमागतम् । नामधेयेन तु प्राजहिते श्रपणं प्राप्यते । चोदकाच्च नामधेयशब्दो बलवत्तरः । तस्मात्तत्र श्रपणं कर्त्तव्यमिति ॥ १४ ॥ सि० ॥ प्राजहिते श्रपणाधिकरणम् ॥ ६ ॥

हविर्द्धाने निर्वपणार्थं साधयतां प्रयुक्तत्वात् ॥ १५ ॥

कृते हविर्द्धाने यान्योपधगुणकान्यैष्टिकानि कर्माणि वर्त्तन्ते यथा, पशुपुरोडाशः, सवनीयाः पुरोडाशाः, सौम्यश्चरुः । तेषु विचार्यते । किं तेषां निर्वापो हविर्द्धाने कर्त्तव्यः ? अथवा नान्तरमुपादेयमिति । किं प्राप्तम् । हविर्द्धाने निर्वपणार्थं साधयेयाताम्, एकं वा । कुतः । प्रयुक्तत्वात् । प्रयुक्तमस्ति, शक्नोति च तेषां निर्वापं साधयितुम् । अन्यस्योपादाने केवलमनर्थको व्यापार आपद्यते । तस्मात्तयोरन्यतरेण निर्वापः कर्त्तव्यः ॥ १५ ॥ पूर्व० ॥

असिद्धिर्वाऽन्यदेशत्वात् प्रधानवैगुण्यादवैगुण्ये प्रसङ्गः स्यात् ॥ १६ ॥

असिद्धिर्वा हविर्द्धानाभ्यां निर्वापस्य, न ताभ्यां साधयितव्यम् ।

कुतः । प्रधानावैगुण्यात् । निर्वापस्य देशः । अपरेण गार्हपत्यं प्रागीषमनोवाञ्छितं भवति । तस्य दक्षिणचक्रमारुह्यानसोपाधि निर्वपतीति । यदि हविर्द्धाने निर्वापः क्रियते तद्देशं तन्नीयेत । तथा प्रधानं सोमकर्म विगुणं भवेत् । हविर्द्धानयोर्मन्त्रवच्च नियमवच्च प्रवर्तनं च कृतं तत् सर्वमनर्थकं स्यात् । अथ च पुनः क्रियेते, तथाप्यावृत्तिरश्रुतानुष्ठीयेत । अवैगुण्ये च प्रधानस्य प्रसवो युक्तः । यत्कारणं प्रधानस्य यो धर्मस्तमितरं न यथाश्रुतमुपजीवन्तीति । परवशत्वात् । यदि यथाश्रुतेनास्य कार्यं न सिद्ध्यतीति ततः कामं कार्यलोपो भवेत् । स्वं वा साधनं प्रयुञ्जीत, न शक्नुयात् प्रधानकार्यं व्यावहृत्य स्वार्थं साधयितुम् । अथ कस्माद्धविर्द्धाने देशे निर्वापो न क्रियते । एवमपि तेषां कर्मणा वैगुण्यं भवेत् । सन्त्युत्तरतन्त्रोपजीवीन्येतानि यथावस्थितं परतन्त्रमुपजीवितुमर्हन्ति । यथा पाशुकान् प्रयाजानन्यकालानपि पशुपुरोडाश उपजीवन्ति । उच्यते । उक्तं तत्र प्रकृतास्ते प्रयाजाः । न च कृतस्य क्रमानुग्रहार्थं पुनः क्रिया न्याय्या । अयं पुनः करिष्यमाणो निर्वापः शक्यते कर्तुम् । स यदि सगुणः शक्यते कर्तुम् । तथा सगुणः कर्त्तव्यः । शक्यते च नोत्तरमुपादेयं तस्मान्न हविर्द्धानयोर्निर्वापः ॥१६॥ सि० ॥ हविर्द्धानयोर्निर्वापाधिकरणम् ॥७॥

अनसाञ्च दर्शनात् ॥ १७ ॥

अनोबहुत्वञ्च दृश्यते । अनांसि प्रवर्त्तयन्तीति । तस्मादप्यनोऽन्तरमुपादेयमिति ॥ १७ ॥ सि० ॥ अनोऽन्तराधिकरणम् ॥ ८ ॥

तद्युक्तत्वञ्च कालभेदात् ॥ १८ ॥

सोमदीक्षाकालरात्रिजागरणमाम्नातम् । यां प्रथमां दीक्षितो रात्रिं जागर्ति तया स्वप्नेन व्यावर्त्तत इति । दर्शपूर्णमासयोरप्यौपवसथ्येऽहन्येवमाम्नातं तत् प्रायणीयादिषु चोदकेन प्राप्यते । तेषां तत्र मध्यपातिदीक्षाकालेनैव जागरणेन प्रसङ्गात् कार्य्यसिद्धौ प्राप्तायामिदमुच्यते । तद्युक्तञ्च दीक्षायुक्तञ्च जागरणं, नेतरेषु प्रसज्ज्येत । कुतः । कालभेदात् । यदि तावद् यज्ञाङ्गानां रक्षणायाप्रसादार्थं ततो दीक्षाकालेषु रक्षितेषु नेतराणि रक्षितानि भवन्ति । इति तद्रक्षणार्थं प्रायणीयादिषूपवसथकाले भेदेन कर्त्तव्यम् । अथाप्यदृष्टार्थम् । तथाप्यौपवसथी रात्रिस्तस्य निमित्तम् । निमित्तप्राप्तौ नैमित्तिकं कर्त्तव्यम् । तस्माद्भेदेन कर्त्तव्यम् ॥ १८ ॥ पूर्वपक्षसिद्धान्तौ ॥ दीक्षाजागरण-

भेदाधिकरणम् ॥ ९ ॥

मन्त्राश्च सन्निपातित्वात् ॥ १९ ॥

वरुणप्रघासेषु विहारपृथक्त्वे सति ये मन्त्राः सन्निपातिनो यथाज्यग्रहणे प्रोक्षणेऽभिमर्शने, तेषां किं तन्त्रेण प्रयोगः ? अथ वा भेदेनेति । तन्त्रावापचिन्तेयं, न प्रसङ्गचिन्ता । तत्र प्रयोगवचनानुग्रहाय तन्त्रभावे प्राप्ते, उच्यते । मन्त्राश्चाज्यग्रहणादयो भेदेन कर्त्तव्याः । कुतः । सन्निपातित्वात् । सन्निपत्योपकारिण एते मन्त्रा उपस्थितं कर्माऽभिदधति । पृथक्कर्माण्यध्वर्युप्रतिप्रस्थातारावुपतिष्ठेते । तस्मात् पृथक् प्रयोक्तव्याः । अपि च कारणानां मन्त्राः । तेन कर्मादिसन्निपातं वक्ष्यति । मन्त्राणां कारणार्थत्वात् । तत्र कर्मादिसन्निपातः स्यात् सर्वस्य वचनार्थत्वादिति । तथा सति येन कर्म्मणा सन्निपतितो मन्त्रस्तदर्थोऽसाविति गृह्यते विशेषः । तस्मादभ्यावृत्तिः ॥ १९ ॥ विहारपृथक्त्वे तन्त्रावापाधिकरणम् ॥ १० ॥

धारणार्थत्वात् सोमेऽग्न्यन्वाधानं न विद्यते ॥ २० ॥

सोमे दीक्षणीयादिष्वैष्टिकेषु कर्मसु चोदकप्राप्तमग्न्यन्वाधानं किं कर्त्तव्यमुत नेति । कर्त्तव्यम् । एवं चोदकोऽनुगृहीतो भविष्यति । एवं प्राप्ते, उच्यते । न कर्त्तव्यम् । कुतः? धारणार्थत्वात् । विधृतस्याग्नेर्द्धारणार्थं तत् सोमार्थेन च विधृतस्य तत्कृतम् । तेन धृतोऽग्निः । न च धृतस्य धारणकार्य्यमस्ति । नन्वमन्त्रकं तत् । सत्यममन्त्रकमपि तु तत्कृतम् । न च कृतस्य मन्त्रार्थं पुनरावृत्तिरस्ति । तस्मान्न कर्त्तव्यम् ॥ २० ॥ सि० ॥ सोमेऽग्न्याधानाधिकरणम् ॥ ११ ॥

तथा व्रतमुपेतत्वात् ॥ २१ ॥

तत्रैव दार्शपौर्णमासिकं व्रतं चोदकप्राप्तं तथैव न क्रियते यथाऽग्न्यन्वाधानमुपेतत्वात् । न ह्युपेतमनपवृक्तं सच्छक्यमुपेतुम् अप्राप्तस्य हि प्रापणमुपगमनं तत्प्राप्तस्य न शक्यम् ॥ २१ ॥ सि० ॥

विप्रतिषेधाच्च ॥ २२ ॥

अग्ने व्रतपते व्रतं चरिष्यामीति वरणतो वचनं विप्रतिषिद्धम् । वर्त्तमानस्य भविष्यद्वचः ॥ २२ ॥ हेतुः ॥

सत्यवदिति चेत् ॥ २३ ॥

अथ सत्यवत् कस्मान्न भवति । यथा सत्यवचनं व्रतं पुरुषधर्म-

त्वादनुवर्त्तमानमपि दर्शपूर्णमासयोः पुनरुपेयत इति स्थितायां प्रतिज्ञायां सूत्रेण चोदयति ॥ २३ ॥ आ० ॥

न संयोगपृथक्त्वात् ॥ २४ ॥

तत्र पुरुषसंयोगः कर्म्मसंयोगश्च । पुरुषार्थमुपेतं कर्म्मार्थे पुनरुपेयते। नन्विहापि संयोगपृथक्त्वात् सोमार्थमुपेतमैष्टिकार्थे पुनरुपेयते इति । नेह उपगमनेनार्थः । यत् सोमार्थं तदेवेतरत्र प्रसङ्गात् कार्यं साधयति । नन्विहापि तद्वदेव साधयिष्यति । साधयेद् यदि कर्मार्थता तस्याज्ञाताचेत् । सा त्विहैव ज्ञाप्यते । ऐष्टिकानां तु प्रकृतौ ज्ञाता । तस्मिन् सत्यदृष्टान्तः।किमर्थमज्ञानस्य तु प्रयोजनं प्रायश्चित्तविशेषस्तृतीयाध्याये व्याख्यातः॥२४॥ आ०नि० ॥ दार्शपौर्णमासिकव्रताधिकरणम् ॥ १२ ॥

ग्रहार्थं च पूर्वमिष्टेस्तदर्थत्वात् ॥ २५ ॥

पूर्वोक्तमग्न्यन्वाधानं सौमिकं प्रसङ्गादैष्टिकेषु कार्यं साधयतीत्युक्तम् । तदिदानीमाक्षिप्यते । धारणार्थत्वात्तस्य प्रसङ्ग उक्तः। न च तत्केवलं धारणार्थं, किं तर्हि, धारणार्थञ्च देवतापरिग्रहार्थञ्च । एवं हि दर्शपूर्णमासयोः श्रूयते, ममाग्ने वर्चो विहवेष्वस्त्विति पूर्वमग्निं गृह्णाति देवता एव तत्पूर्वेद्युर्गृहीताः श्वो भूते यजते इति । तत्र यद्यपि धारणार्थं सौमिकेन प्रसङ्गादेतत् सिद्ध्यति । देवतापरिग्रहार्थं तद्दार्शपौर्णमासिकमैष्टिकेषु कर्म्मसु कर्त्तव्यम् । आह। नैतद् युक्तम् । देवतापरिग्रहार्थमपि प्रसङ्गादेव सिद्ध्यति । कुतः । इष्टेस्तदर्थत्वात् । सोमेऽपि दीक्षणीयेष्टिर्देवतापरिग्रहार्था श्रूयते । आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपेद्दीक्षिष्यमाणः । अग्निः प्रथमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवता यज्ञञ्च तदुभयतः परिगृह्य दीक्षन्त इति । सैव देवतापरिग्रहणार्था प्रसङ्गादैष्टिकानां साधयिष्यतीति ॥ २५ ॥ आ० ॥

शेषवदिति चेन्न वैश्वदेवो हि स्याद्
व्यपदेशात् ॥ २६ ॥

उच्यते, न सिद्ध्यति, दीक्षणीया, न देवतापरिग्रहणे वर्त्तते। शेषास्त्वङ्गाङ्गानां देवता अपरिगृहीतास्तत्परिग्रहार्थे दार्शपौर्णमासिक-

मैष्टिकेषु कर्त्तव्यमिति चेन्न कर्त्तव्यम् । दीक्षणीयैव प्रसङ्गाद्देवतापरिग्रहार्था सेत्स्यति । ननु प्रधानदेवतापरिग्रहार्था दीक्षणीयेत्युक्तम् । प्रधानदेवतार्था सत्यङ्गदेवतां गृह्णाति । कथम् । वैश्वदेवो हि । अस्ति सोमे वैश्वदेवो ग्रहयज्ञः । तत्र सर्वदेवता इज्यन्ते । तन्मध्ये चाङ्गदेवता अपि । तस्मात्ताः परिगृहीताः । अनेन तत्परिग्रहार्थेनैष्टिकेनाग्न्यन्वाधानार्थेन नार्थः स्याद् व्यपदेशात् । स्याद्धार्थः । ऐष्टिकेनाग्न्यन्वाधानेन नाङ्गदेवतापरिग्रहणम् । ननु विश्वेदेवा इज्यन्त इति परिगृहीताः । न तत्र सर्वा देवता इज्यन्ते । किं तर्हि ? विशेषदेवतागणः । यथा साध्या वसवो रुद्रा इति । कथं ज्ञायते । व्यपदेशात् । व्यपदेशो भवति । अग्निर्वसुभिः सोमो रुद्रैरिन्द्रैर्मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वेदेवैरिति वस्वादिभ्योऽप्यन्तरभूतान् विश्वेदेवान् दर्शयति । यदि च सर्वे देवा उच्येरन् विश्वेदेवशब्देन तेभ्योऽर्थान्तरभूता न स्युः । तस्माद्विश्वेदेवशब्दो गणवचन एव । एवं वेदपरिगृहीता अङ्गदेवतास्तदर्थमैष्टिकमग्न्यन्वाधानं कर्त्तव्यम् ॥ २६ ॥ आ० ॥

न गुणार्थत्वात् ॥ २७ ॥

नानेन व्यपदेशेन गणो विश्वेदेवः शक्यः कल्पयितुम् । गुणाऽर्थोऽयं व्यपदेशो बृहस्पतिप्रसङ्गार्थः । अग्न्यादयो वस्वादिभिः केवलैः समेताः । बृहस्पतिस्तत्सर्वैस्तैश्चान्यैश्चेति । यथा सेनापतिर्भृत्यबलेन सहागतः समाहर्त्ता निजेन बलेन राजा तु सर्वैर्बलैस्तैश्चान्यैश्चेति । अपि च । वैश्वदेवो गणः कल्प्यः । सर्वे तु देवाः शब्दादेवाऽवगम्यन्ते । तथाच दीक्षणीययागदेवतापरिग्रहेऽपि प्रसङ्गात् सिद्ध्यतीति न कर्त्तव्यं दार्शपौर्णमासिकमैष्टिकेष्वग्न्यन्वाधानम् ॥ २७ ॥ हेतुराशङ्कानिरासश्च ॥ देवतापरिग्रहाधिकरणम् ॥ १३ ॥

सन्नहनञ्च वृत्तत्वात् ॥ २८ ॥

पत्न्याः सन्नहनं च दर्शपूर्णमासयोः समाम्नातम् । योक्त्रेण पत्नीं सन्नह्यतीति । तत् सोमाङ्गभूतेष्वैष्टिकेषु कर्मसु चोदकेन प्राप्तमपि न कर्त्तव्यम् । कुतः । वृत्तत्वात् । दीक्षाकाले सोमार्थे पत्न्याः सन्नहनं वृत्तं योक्त्रेण पत्नीं संनह्यति । मेखलया दीक्षितां मिथुनत्वायेति । यदाम्नातं सन्नहनं च वाससो धारणार्थं सर्वार्थमसौमिकेनेवाऽकर्मापवर्गात् प्रसङ्गेन सिद्ध्यतीति ॥ २८ ॥ सि० ॥ पत्नीसन्नहनाधिकरणम् ॥ १४ ॥

अन्यविधानादारण्यभोजनं न स्यादुभयं वृत्त्यर्थम् ॥ २९ ॥

दर्शपूर्णमासयोरारण्यभोजनमाम्नातम्। यदारण्यानश्नाति तेनारण्यानथो इन्द्रियमेवात्मनो धत्ते इति तत्प्रायणीयादिषु चोदकेन प्राप्यते। प्राप्तमपि सन्न कर्त्तव्यम। किं कारणम। अन्यविधानात्। यद्दर्शपूर्णमासयोरारण्यभोजनं तद्वृत्त्यर्थम। सोमेऽप्येतदाम्नातं, पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येति। तदपि दृष्टकार्य्यत्वाद् वृत्त्यर्थमेव तयोः सौमिकं प्रत्यक्षं श्रुतत्वात् प्राधान्याच्चावश्यं कार्यम्। तेन वृत्तौ प्रसङ्गात् सिद्धायामितरन्निवर्त्तते ॥ २९ ॥ पूर्वपक्षसिद्धान्तौ ॥ आरण्यभोजनाधिकरणम् ॥ १५ ॥

शेषभक्षास्तथेतिचेन्नान्यार्थत्वात् ॥ ३० ॥

दर्शपूर्णमासयोः शेषभक्ष ऐडादिः सोमे वैष्टिकेषु कर्मसु चोदकप्राप्तः। सोऽपि सौमिकेन व्रतेनारण्यवन्निवर्त्तत इति चेद् न। कस्मात्। न स वृत्त्यर्थः। न ह्यलं वृत्तये संस्कारार्थोऽसौ उपयुक्तशेषत्वाद् भक्षणमिति द्वितीयानिर्देशाच्च। यजमानपञ्चमा ऋत्विज इडां भक्षयन्तीति। तस्मात् कर्त्तव्यम् ॥ ३० ॥ पू० नि० ॥ शेषभक्षाधिकरणम् ॥ १६ ॥

भृतत्वाच्च परिक्रयः ॥ ३१ ॥

दर्शपूर्णमासयोः परिक्रयोऽन्वाहार्य्य आम्नातः, इह चोदकेन प्राप्तः सन्न कर्त्तव्यः। कुतः। भृतत्वात्। भृतास्त ऋत्विजः सोमार्थेन परिक्रयेण, तस्य द्वादशशतं दक्षिणेति। एकदेशकालकर्तृत्वं चाङ्गप्रधानानाम। तस्मात्तैरेवाङ्गानि कर्त्तव्यानि। अतो न पृथगङ्गानां परिक्रयः। तस्मादन्वाहार्य्यो निवर्त्तते ॥ ३१ ॥ सि० ॥

शेषभक्षास्तथेति चेत् ॥ ३२ ॥

अथ शेषभक्षा अपि तथा निवर्त्तेरन् यथा अन्वाहार्य्य इति चेत्, परिक्रयार्थः शङ्कयोच्यते ॥ ३२ ॥ आ० ॥

न कर्मसंयोगात् ॥ ३३ ॥

नेति निवर्त्तेरन्। न ह्येते परिक्रयार्थाः। अन्वाहार्य्येण किमर्थेयमानतानां निर्वृत्तिर्भूयिष्ठे कर्मण्येते। न चाऽलमानमनाय। तस्मान्नैते परिक्रयार्थाः, किन्तु संस्कारार्थाः। अतस्तदर्थं कर्त्तव्याः ॥ ३३ ॥ आ० नि० ॥ परिक्रयाधिकरणम् ॥ १७ ॥

प्रवृत्तवरणात् प्रतितन्त्रवरणात् प्रतितन्त्रवरणं होतुः क्रियेत ॥ ३४ ॥

दर्शपूर्णमासयोर्होतुर्वरणमाम्नातम् । अग्निर्देवो दैव्यो होता देवान् यक्षदिति । तच्चोदकेनैष्टिकेषु कर्म्मसु सोमाङ्गभूतेषु चोद्यते। अस्ति तु सोमेऽपि होतुर्वरणम्, अग्निर्होता स मे होता होतस्त्वं मे होताऽसीति । होतारं वृणीत इति । तत्र विचार्य्यते । किमैष्टिकेषु कर्म्मसु दार्शपौर्णमासिकं होतुर्वरणं कर्त्तव्यम, उत नेति।किं प्राप्तम् न कर्त्तव्यमिति कस्मात् । करणं तावदानत्यर्थं, सौमिकेन च वरणेनानतिर्होतुः । साऽङ्गस्य सोमस्य करणेन चानतस्यानमनकार्य्यमस्ति । तस्मान्न कर्त्तव्यम् । एवं प्राप्ते ब्रूमः । प्रवृत्तवरणान् प्रतितन्त्रं वरणं होतुः क्रियते । नैतदस्ति । सौमिकं वरणं प्रसङ्गाद्दर्शपूर्णमासिकस्य कार्यं साधयिष्यतीति । प्रवृत्ते वरणात् प्रवृत्ते कर्म्मणीति दार्शपौर्णमासिकं वरणं क्रियेत।अतस्तन्नानत्यर्थं,किं तर्हि, कर्म्ममात्रं, नचेत् क्रियेत तेन गुणे वैगुण्यं स्यात् ।तस्मात् प्रतिकर्म्मभेदेन कर्त्तव्यम् ॥३४॥ पूर्व०सि०

ब्रह्मापीति चेत् ॥ ३५ ॥

इति चेत् पश्यसि प्रवृत्तवरणाद्धोतुर्वरणं प्रति कर्म्म कर्त्तव्यमिति । ब्रह्मापि प्रवृत्ते कर्म्मणि क्रियते प्रणीता प्रणयनकाले तस्मात्तस्यापि वरणं धर्ममात्रम् । अतस्तदपि प्रतिकर्म्म कर्त्तव्यम् । वक्तव्यो वा विशेषः ॥ ३५ ॥ आ० ॥

न प्राग् नियमात्तदर्थं हि ॥ ३६ ॥

न ब्रह्मवरणं कर्त्तव्यं, किं कारणं, प्राङ्नियमात् प्राग् वरणादित्यर्थः । सत्यम् । प्रवृत्ते कर्मणि ब्रह्मणो वरणं प्राग्वरणान्न किञ्चिद् ब्रह्मत्वमस्ति वरणादुत्तरकालं ब्रह्मणः कर्म्म, तदर्थं वरणं कर्म्मार्थम् । ततस्मान्न धर्म्ममात्रम् । किमर्थं तर्हि । आनत्यर्थमेव । सौमिकेन वरणेनाऽऽनतः । तस्माद् ब्रह्मवरणं न कर्त्तव्यम् ॥ ३६ ॥ आ० नि० ॥

निर्दिष्टस्येति चेत् ॥ ३७ ॥

अथोच्येत । अस्त्यमावास्यायामौपवसथ्येऽहनि वेदि कर्म्मनिर्दिष्टं पूर्वेद्युरमावास्यायां वेदिं करोतीति । तत्र वेदिपरिग्रहे प्रसवो ब्रह्मणा क्रियते । तेन ब्रह्मापि वृत्तवरण इति ॥ ३७ ॥

नाश्रुतत्वात् ॥ ३८ ॥

पूर्वेद्युरमावास्यायां वेदिकरणं श्रुतं, न परिग्रहणम् । अश्रुतत्वात् । यथाकालमेव वृते ब्रह्मणि परिग्रहः करिष्यते, वरणस्य कर्मार्थत्वात् । न प्राग् वेदिकरणात् पूर्वं परिग्रहः । तत्रापि ब्रह्मणा प्रसवो दातव्यः । बाढम् । अयं तर्ह्यन्यः परिहारः । दर्शपूर्णमासप्रकरणे हविषामधिवासनादूर्ध्वं वेदिकरणमाम्नातम् । ब्रह्मवरणमपि प्रणीताप्रणयनकाले प्राग् जन्मत्वप्रवृत्ते दृष्टार्थत्वादानत्यर्थम् । एवं स्थिते अमावास्यायां वेदिकरणं वचनेनोपदिष्टम् । तस्मिन्नपकृष्यमाणे परिग्रहोऽप्यपकृष्टः प्रसवोऽपि ब्रह्मवरणमपि प्रधानदेशकालत्वाद् गुणानाम् । एवं सति पौर्णमास्यां प्रणयनकाले ब्रह्मवरणममावास्यायां पूर्वेद्युरुभयत्राप्रवृत्ते ब्रह्मत्वे । तस्मादुभयत्रानत्यर्थम् । अतो न प्रतिकर्म ब्रह्मवरणं कर्त्तव्यम् । सौमिकेनैव वरणेनानतत्वाद् ब्रह्मणः ॥ ३८ ॥ आ० नि० ॥

होतुस्तथेति चेत् ॥ ३९ ॥

इति चेत् पश्यसि । यद्यपि प्रवृत्ते कर्मणि ब्रह्मणो वरणं, न च वरणात् प्राक् किञ्चिद् ब्रह्मणः कर्मास्ति । तस्मान्न प्रवृत्तवरणे ब्रह्मेति । होतुस्तथा होतुरपि प्राग् वरणान्न किञ्चित् कर्मास्ति । तस्यापि वरणं न धर्ममात्रम् ॥ ३९ ॥ आ० ॥

न कर्मसंयोगात् ॥ ४० ॥

अस्ति होतुः प्राग्वरणात् सामिधेनीकर्मणा संयोगः प्रवृत्तः । सामिधेनीरन्वाहेति । तस्माद्धोतृवरणमदृष्टार्थम् । तदैष्टिकेषु कर्मसु दीक्षादिषु कर्त्तव्यम् । ब्रह्मवरणं तु दृष्टार्थम् । तत् सौमिकेनैव कृतत्वान्न कर्त्तव्यमिति ॥ ४० ॥ आ० नि० ॥ होतृवरणाधिकरणम् ॥ १८ ॥

यज्ञोत्पत्त्युपदेशे निष्ठितकर्मप्रयोगभेदात् । प्रतितन्त्रं क्रियेत ॥ ४१ ॥

सोमे श्रूयते । यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्येति । तत्र यन्निष्ठितस्य बर्हिषो लूनस्य क्रियते तथा प्रोक्षणमग्राणामपपातनं मूलानामवसेचनं तत् किमातिथ्यादिप्रयोगभेदेन कर्त्तव्यम् । अथ वा यदातिथ्यायां कृतं तदेवेतरत्र प्रसज्ज्यते । किं प्राप्तम् । यज्ञोत्पत्त्युपदेशे एकस्मिन् यदातिथ्यायां बर्हिस्तदुपसदामिति । यन्नियतमिति कर्म क्रियेत । तत्प्रयोगभेदाद्भिन्नम् । भिन्नप्रयोगाण्येतानि आतिथ्यादीनि कर्माणि, तेषु गृह्यते विशेषः । यद् यस्य प्रयोगे प्रोक्षणादि-

कृतं तदर्थमिति तस्मादन्यार्थमावर्त्तयितव्यमिति।एवं प्रतिकर्माभ्यासः न चात्र प्रसङ्गो युज्यते । न ह्यातिथ्यायास्तन्त्रमध्यपातिता उपसद् अग्नीषोमीयो वा । न च कृतत्वादुपदेशो हि । न वा प्रोक्षणादि कर्त्तव्यम् । कुतः ? । कृतत्वात् । कृतं तदातिथ्यायां बर्हिषः। तेन संस्कृतं तद् बर्हिः पुनःक्रियायां हेतुर्नास्ति । ननु कर्मार्थाः संस्काराः । न कर्म भिन्नम् । अतो यस्मिन्नेव कर्मणि क्रियन्ते तदर्था भवन्ति । कर्मार्था अप्येते सन्तानास्कन्दपातिका यत् कर्माणि न सम्बद्ध्यन्ते । किं तर्हि बर्हिर्द्वारेण यदीयं बर्हिः तेन सम्बद्ध्यते । साधारणं चेदमातिथ्यादीनां बर्हिः । कथं ज्ञायते । तदुपदेशो हि यदातिथ्यायां बर्हिरित्यनेन वाक्येन तेषां बर्हिषः साधारण्यमुच्यते । न धर्मातिदेशः। न हि निरिष्टिकोपदेश इत्युक्तम्। अपि वोत्पत्तिसंयोगात्तदर्थसम्बन्धो विशिष्टानां प्रयोगैकत्वे हेतुः स्यादिति । एवं चेदातिथ्यायामपि क्रियमाणाः संस्काराः सर्वार्था एव भवन्ति । तस्मान्न प्रतिकर्त्तव्या इति ॥४१॥ पूर्व० सि० ॥ बर्हिःप्रोक्षणाधिकरणम् ॥१९॥

देशपृथक्त्वान्मन्त्रो व्यावर्त्तेत ॥ ४२ ॥

तत्रैव स्तरणमन्त्रश्चिन्त्यते । किमग्नीषोमीये भेदेन कर्तव्यः ? अथवा आतिथ्यायां प्रयुक्तः स एव प्रसज्ज्यत इति । साधारणे बर्हिषि प्रयोगात् पूर्वोक्तेन न्यायेन प्रसङ्गे प्राप्ते, उच्यते । मन्त्रो व्यावर्त्तेत । भेदेन कर्त्तव्य इति । कुतः । देशपृथक्त्वात् । पृथग्गतौ देशौ उत्तरवेदिसमीपं प्राग्वंशश्च । देशभेदात् स्तरणमावर्त्तेत । स्तरणाङ्गश्च मन्त्रः । ऊर्णाम्रदसं त्वा स्तृणामीति स्तरणावृत्तौ मन्त्रस्य व्यावृत्तिर्न्याय्या । प्रधानतन्त्रत्वाद् गुणानामपि च स्तरणं देशसंस्कारकम् । तेनातिथ्यायां प्राग्वंशदेशः संस्कृतो, नोत्तरवेदिदेशः । तत्र यदि मन्त्रो न प्रयुज्ज्येत विगुणस्तस्य संस्कारः स्यात् । तस्मादावृत्तिस्तरणमन्त्रस्य ॥ ४२ ॥ पूर्व० सि० ॥ तत्र स्तरणमन्त्रस्याऽप्रसङ्गाधिकरणम् ॥ २० ॥

सन्नहनहरणे तथेति चेत् ॥ ४३ ॥

अग्नीषोमीय एव देशान्तरं नीयमानस्य बर्हिषः सन्नहनहरणमन्त्रौ प्रयोक्तव्यौ वा नेति चिन्त्यते । तत्राह । सन्नहनहरणमन्त्रौ तथा यथा स्तरणमन्त्रः । भेदेन प्रयोक्तव्यावित्यर्थः । कुतः । उक्तो न्यायः

सन्नहनहरणमन्त्रौ कर्माङ्गं । ते च कर्मणि आवर्त्तेते । अतो मन्त्रयोरावृत्तिर्न्याय्या । तस्माद्भेदः ॥ ४३ ॥ पूर्व० ॥

नान्यार्थत्वात् ॥ ४४ ॥

नैतद्युक्तम् । कुतः । अन्यार्थत्वात् । लूनस्य बर्हिषो ये सन्नहनहरणे ते उपादानार्थे । तथाहि स्वीक्रियमाणस्यैवोपवर्णनारूपं, पूषा ते ग्रन्थिं ग्रथ्नातु बृहस्पतेर्मूर्ध्ना हरामीति । इमे पुनः स्वीकृतस्य देशान्तरप्रापणार्थे अन्यार्थत्वादप्राकृतकार्येण मन्त्रं गृह्णीतः । यथा तत्रैवातिथ्यायां यदा गार्हपत्यदेशादाहवनीयदेशं प्रोक्ष्य बर्हिर्नीयते न तदाहरणमन्त्रः प्रयुज्यते । एवमिहापि ॥ ४४ ॥ सि० ॥ सन्नहनहरणमन्त्राधिकरणम् ॥२१॥ इति श्रीभट्टशबरस्वामिनः कृतौ मीमांसाभाष्ये द्वादशाध्यायस्य प्रथमः पादः ॥ १२ ॥ १ ॥

अथ द्वादशाध्याये द्वितीयः पादः ॥ १२ ॥ २ ॥

विहारो लौकिकानामर्थं साधयेत् प्रभुत्वात् ॥ १ ॥

विहार इति गार्हपत्यादिरग्नित्रेतोच्यते विहरणात् । स लौकिकानां कर्मणां पर्वणां स्थालीपाकादीनामन्येषां वा अग्निसाध्यानां पचनदहनप्रकाशनादीनामर्थं साधयेद् निर्वृत्तिं कुर्यात् प्रभुत्वात् । प्रभवति ह्याहुतिप्रक्षेपणे पाकादौ च संयुक्तं च केनाचित् प्रयोजनेनाग्निद्रव्यमुत्पन्नं, वसन्तेऽग्नीनादधीतेति । तत्सामर्थ्याद् यत्र यत्रोपयुज्यते तत्र तत्रोपयुज्यते । एवं तस्योत्पत्तिरर्थवती भवति ॥ १ ॥ पूर्व० ॥

मांसपाकप्रतिषेधश्च तद्वत् ॥ २ ॥

मांसपाकप्रतिषेधो भवति तद्वत् । यद्वन्न्यायोऽपदिष्टः, मांसं न पचेयुः । यस्मिन्नग्नौ ये च पचेयुः क्रव्यादं कुर्युरिति । लौकिके हि पाके मांसप्रसङ्गो, न वैदिके शामित्रे मांसपाकः ॥ २ ॥ हेतुः ॥

निर्देशाद् वा वैदिकानां स्यात् ॥ ३ ॥

वैदिकानां वा कर्मणां विहारोऽर्थं साधयेन्न लौकिकानाम् । कुतः। निर्देशात् । निर्दिश्यते, गार्हपत्यादीनां कार्यम् । यदाहवनीये जुहोति तेन सोऽस्याभीष्टः प्रीतो भवतीत्येवमादिभिर्वाक्यैर्यासावुत्पन्ना कार्याकाङ्क्षा सा एतैर्वचनैर्निवर्त्तिता एवमर्थे वैषामुत्पत्तिः । तस्मान्न लौकिकेषु प्रसज्ज्येरन् । माठरादीनामयं परिहारो, न स्थालीपा-

कादीनाम् । तेषामप्याहवनीय एव होमः प्राप्नोति । नैष दोषः । यदाहवनीये जुहोतीति नियमार्थं एष वादः । अन्तरेणापि हि वचनमाहवनीये होमोऽन्यत्र च प्राप्तः । तदेतद् नियमशासनं यत्रानियमप्रसङ्गस्तद्विषयो विज्ञायते । वैदिकेषु चानियमप्रसङ्ग आगतः । आयतनस्यानिर्दिष्टत्वात् । लौकिकानां तु निर्दिष्टमायतनम् औपासनोऽग्निः । तस्मान्न तान्याहवनीये प्रसज्ज्येरन् ॥ ३ ॥ सि० ॥

सति चोपासनस्य दर्शनात् ॥ ४ ॥

सति च विहारे औपासनोऽग्निर्दृश्यते, यः कामयेत राष्ट्रमस्य प्रजायै स्यादिति । तस्यौपासने प्रतिहतमन्या जुहुयादिति । राजसूये प्रवृत्ते कर्मणि एतद्वचनम् । तस्मिंश्च काले विहारोऽस्ति । यदि च तत्रैव लौकिकानां कार्यं साधयेत् । यदि च सत्यां तस्यां नोपासनकार्यभावात् स्यात् ॥ ४ ॥ हेतुः ॥

अभावदर्शनाच्च ॥ ५ ॥

मांसपाकस्य च वैहारिकेऽग्नावभावं दर्शयति । मांसीयति वा एतस्याहुतस्याग्नयो यजमानस्य ते यजमानमेव ध्यायन्ति । यजमानं सङ्कल्पयन्ति पचन्ति ह वा अन्येष्वग्निषु वृथामांसमप्येतेषां नातोऽन्या मांसाशा विद्यते । अन्यत्र पशुबन्धान्मांसस्याशनमेव वैहारिकाणामग्नीनां परिहरति । तस्मादपि न लौकिकेषु विहारप्रसङ्गः ॥५॥ हेतुः

मांसपाको विहितप्रतिषेधः स्यादाहुतिसंयोगात् ॥ ६ ॥

यत्तु मांसपाकप्रतिषेधश्च तद्वदिति । तद्विहितप्रतिषेधः स्यात् । आहवनीये वपायाः श्रपणं विहितम् । तस्यायं प्रतिषेधः । कस्मात् । प्राप्तत्वाद् आहुतिसंयोगाच्च । तस्मान्नाग्नौ मांसं पचति, यस्मिन्नाहुतीर्जुहोति । संयोगवाक्यशेषे श्रूयते । आहवनीये चाहुतयो हूयन्तेऽस्माद्वपाश्रपणस्यायं प्रतिषेधः ॥ ६ ॥ आ०नि० ॥

वाक्यशेषो वा दक्षिणस्मिन्ननारभ्य विधानस्य ॥ ७ ॥

अथवाऽयमन्यः परिहारः । दक्षिणाग्नौ व्रतश्रपणवाक्यस्यायं विशेषः । अन्यत्र मांसादिति । या सरस्वतीवशमतीति पशुपुरोडाशो न स्यात् । न कर्त्तव्यः । कुतः । छिद्रापिधानार्थत्वात् । योऽसौ दक्षिणाग्नौ होमस्तत्रैतच्छ्रूयते । तस्माद्दक्षिणाग्न्यभिप्रायं विज्ञायते ॥७॥ आ०नि०

विहारे लौकिककार्यप्रतिषेधाधिकरणम् ॥ १ ॥

सवनीये छिद्रापिधानार्थत्वात् पशुपुरोडाशो न स्यादन्येषामेवमर्थत्वात् ॥ ८ ॥

पशुपुरोडाशो न कर्त्तव्यः । कुतः । छिद्रापिधानार्थत्वात् । पशोश्छिद्रापिधानार्थः स एवं प्रस्तूयते, सुषिरो वैतर्हि पशुर्वर्हिर्वपामुत्खिदति यद् व्रीहिमयः पुरोडाशो भवत्यपिधानायाऽसुषिरायेति । अन्येषां चैवमर्थत्वात् तच्छिद्रापिधानमन्यैरेव क्रियते सवनीयैः पुरोडाशैः । तत्रापि श्रूयते अनुसवनीयाः पुरोडाशा निरूप्यन्ते पिहित्यै अच्छिद्रताया इति । अतः कृतार्थत्वात् पशुपुरोडाशो निवर्त्तते ॥ ८ ॥ पूर्वं० ॥

क्रिया वा देवतार्थत्वात् ॥ ९ ॥

कर्त्तव्यो वा पशुपुरोडाशः । कुतः । देवतार्थत्वात् । देवतासंस्कारार्थोऽयमित्येतदुक्तम् । अपि वा शेषभूतत्वात् संस्कारः प्रतीयेत स्वाहाकारवदङ्गानामर्थसंयोगादिति न च पुरोडाशश्छिद्रापिधानार्थः प्रत्यक्षविरोधात् । अर्थवादमात्रं तत् पुरोडाशपिधानार्थं वादमात्रं सवनीयेष्वित्येवमेवायात्तस्माच्चोदकप्राप्त्या कार्यः पुरोडाशः ॥९॥सि०

लिङ्गदर्शनाच्च ॥ १० ॥

यथा प्रातःसवने चरन्ति पुरोडाशेन माध्यन्दिने अङ्गैस्तृतीयसवन इति । तन्त्रविप्रकर्षपरे वाक्ये पुरोडाशं दर्शयति । तस्मादपि कार्यः ॥ १० ॥ हेतुः ॥ पशुपुरोडाशाधिकरणम् ॥ २ ॥

हविष्कृत्सवनीयेषु न स्यात् प्रकृतौ यदि सर्वार्था पशुं प्रत्याहूता सा कुर्याद् विद्यमानत्वात् ॥ ११ ॥

सवनीयेषु पुरोडाशेषु हविष्कृदाह्वानं न कर्त्तव्यम् । कुतः । पशुं प्रत्याहूताऽसौ, पशुमध्यपतिताश्च सवनीयाः । तेषु सैव विद्यमानत्वात् प्रसङ्गादुपयोक्ष्यते । नार्थः पुनराह्वानेन । नैव पशोर्हविष्कृदस्ति औषधार्था अवहननार्था वा । यथा पत्नीवत् तुल्यवच्छ्रूयत इति । सङ्कर्षे वक्ष्यति । प्रकृतौ यदि सर्वार्था आग्नेयौषधिसान्नाय्यार्थेत्येवं कृत्वा चिन्त्यते । कृत्वा चिन्तेयम् ॥ ११ ॥ पूर्वं० ॥

पशौ तु संस्कृते विधानात् ॥ १२ ॥

तार्त्तीयसवनिकेषु पुरोडाशेषु तु सौम्याश्विनयोर्ह्यभेदेन हवि-

ष्कृत् स्यात् । कुतः । पशौ संस्कृते विधानात् । पक्वे पशावेते विधीयन्ते । तस्मिन् काले पाशुकी हविष्कृत् कृतार्थत्वादप्रवृत्ता । तस्मादन्या ह्वातव्या ॥ १२ ॥ पूर्व० ॥

योगाद्वा यज्ञाय तद्विमोके विसर्गः स्यात् ॥ १३ ॥

न वान्या आह्वातव्या, सैव कुर्याद्ध्रियमानत्वात् । न तु कृतार्थत्वादप्रवृत्तासौ नापवृज्यते । कुतः । यज्ञायासौ पशुबन्धायप्रवृक्ता आदावेव न केवलं, सा यज्ञाङ्गानि सर्वाणि साधयितुम् । कस्त्वा युनक्ति स त्वा युनक्तीत्येवमादिना मन्त्रेण यज्ञार्थं युक्ता तस्या यद्विमोको विसर्गो न्याय्यः, तत् कारणं कस्याश्चिदापदि पुनस्तथा कदाचित् कार्य्यं भवेत् । तस्मान्न भेदेनाह्वातव्या ॥ १३ ॥ सि० ॥ सवनीयेहविष्कृदाह्वानाधिकरणम् ॥ ३ ॥

निशियज्ञे प्राकृतस्यापवृत्तिः स्यात् प्रत्यक्षशिष्टत्वात् ॥ १४ ॥

इदं श्रूयते । अग्नये रक्षोघ्नेऽष्टाकपालं निर्वपेद् यो रक्षोभ्यो बिभीयादिति । पुनरपि तत्रैवामावास्यायां निशि यजेतेति । तस्मिन् किममावास्या तन्त्रं निशि प्रसज्ज्यते, उत नेति चिन्तायां पक्षः परिगृह्यते । निशियज्ञे प्राकृतस्यापवृत्तिरिति । अस्मिन्निशियज्ञे प्राकृतस्य तन्त्रस्यातन्त्रस्यापवृत्तिर्न प्रसज्ज्येत । कुतः । प्रत्यक्षशिष्टत्वात् । प्रत्यक्षशिष्टा इयमिष्टिः । अग्नये रक्षोघ्नेऽष्टाकपालं निर्वपति यो रक्षोभ्यो विभीयादिति उक्तम् । किमतः । तत एवं विज्ञायते । स्वतन्त्रेयमुत्पन्ना, न कस्यचित् कर्मणस्तन्त्रं मध्ये, यथा पशुपुरोडाशोऽग्नीषोमीयस्य वपया प्रचर्य्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालन्निर्वपतीति । यथा वैष्णवो वैश्वदेवस्य यद्धोऽवमृद्यैतया स्फ्यया आश्लिष्येत तद्विष्णव उरुक्रमायावद्येदिति । न त्वमावास्यायामित्यमावास्या कर्मणो मध्ये श्रुता । नामावास्याशब्दःकर्मवचनः । किं तर्हि । कालवचनः । काले श्रुतिः, कर्मणि लक्षणा । श्रुतिश्च लक्षणातो न्याय्या । न चेत् कस्यचित् कर्मणो मध्ये श्रूयते कस्य तन्त्रं ग्रहीष्यते । न तस्मात् स्वतन्त्रा ॥ १४ ॥ पूर्व० ॥

कालवाक्यभेदाच्च तन्त्रभेदः स्यात् ॥ १५ ॥

कालभेदाद् वाक्यभेदस्तावदमावास्यायां रात्रौ निशि यज्ञः ।

प्रतिपद्यहन्यमावास्या । कालभेदेन वैगुण्यान्नामावास्यातन्त्रं निशि यज्ञस्योपकर्त्तुमर्हति। कथं तर्हि ।पाशुकाः प्रयाजास्तिष्ठति पशौ क्रियमाणाः सन्तस्तस्य पुरोडाशस्योपकुर्वन्ति । उक्तस्तत्र न्यायो, न कृतस्य गुणानुग्रहार्थमावृत्तिरस्तीति । इह पुनरकृतामावास्या । तस्मादऽवैगुण्याय स्वतन्त्रं कर्त्तव्यम् । वाक्यभेदाच्च भिन्नदेशे चैकवाक्ये अमावास्यायां यजेत, अमावास्यायां निशि यजेतेति । एवं दर्शपूर्णमासप्रकरणे । एवं काम्यास्विष्टिषु । किमतः । यदि समानदेशे स्यातां ततोऽमावास्यायां यजेतेति आमावास्ये कर्मणि काल उपात्तस्तस्मिन्नेव च निशियज्ञश्चोदित इति गम्येत । तत्रामावस्यामध्य एव विहितः स्यात् । यथा पुनर्देशभेदे सति यथामावास्यायां यजेतेत्येकं दर्शपूर्णमासप्रकरणे, एकं काम्यास्विष्टिषु अनुपादेयत्वेन चोद्यते । एवमिहापि । न तुल्यकालत्वे प्रसङ्गो भवति । यथा विकृता इष्टयो दर्शपूर्णमासाभ्यां तुल्यकाला अपि सत्यो न दार्शपौर्णमासिकं तन्त्रमुपजीवन्ति । तस्मात्तन्त्रभेदः ॥ १५ ॥सि० ॥निशि यज्ञाधिकरणम्॥४

वेद्युद्धननव्रतं विप्रतिषेधात्तदेव स्यात् ॥ १६ ॥

किमेष एवोत्सर्गः सर्वतन्त्रं भिन्नम् । न खलु वेद्युद्धननं व्रतं तदेव यद्दर्शार्थं वेदेरुद्धननं कृतम् । तेनोद्धतायाः पुनरुद्धनने न हि किञ्चित् कार्यमस्ति । केवलं कृतदूषणं भवेत् । व्रतं चोपेतमनुत्सृष्टं पुनरुपेतुमशक्यम् । उपेयमानञ्च पिष्टपेषणवदकिञ्चित्करं स्यात् । तस्मादेतदुभयमपि तदेव प्रसज्ज्यते ॥ १६ ॥ पूर्व० ॥

तन्त्रमध्ये विधानाद् वा तत्तन्त्रा सवनीयवत् ॥ १७ ॥

तत्तन्त्रा वा निशीष्टिः स्यात् । आमावास्यातन्त्रेयं, न स्वतन्त्रा । कुतः । तन्त्रमध्ये विधानात् । आमावास्यातन्त्रमध्ये इयं विहिता, आमावस्यायां निशि निर्वपेदिति । न तु कालवचनोऽमावास्याशब्दो, न कर्मवचन इत्युक्तम् । सत्यं, कालवचनः । स तु कालस्तन्त्रमध्ये । तत्र विधीयमानत्वात् तन्त्रमध्ये विहिता भवति, सवनीयवत् । तद्यथा सवनीयाः पुरोडाशाः, न तावत् पशुकर्मोद्दिश्य विधीयन्ते । अथ च पशुतन्त्रमध्ये विहिता भवति । यस्मिन् स्थाने विहिता तत्स्थाने पशुतन्त्रा । इयमपि तन्त्रमध्ये पतिता । सवनीयभेदे च न स्वतन्त्रा भवितुमर्हति ॥ १७ ॥ सि० ॥ वेद्युद्धननाधिकरणम् ॥ ५ ॥

वैगुण्यादिध्मबर्हिर्न साधयेदग्न्यन्वाधानं च यदि देवतार्थम् ॥ १८ ॥

अत्राह । किमेष एवोत्सर्गः । सर्वममावास्यातन्त्रनिशीष्ट्यर्थं साधयतीति । न खलु इध्माबर्हिर्न साधयेत् । कुतः । वैगुण्यात् । इध्मो नामाग्निसमिन्धनार्थः । स प्रतिपद्याहितः । अमावास्यायां निशि वर्तमानस्य निशि यज्ञस्याग्निसमिन्धनं साधयेद् बर्हिरपि वेदिस्तरणार्थम् । ते यदि प्रसज्ज्येयातां विगुणो निशियज्ञः स्यात् । तस्माद्भेदेन ते कर्त्तव्ये ॥ १८ ॥ पूर्व० सि० ॥ इध्मबर्हिरधिकरणम् ॥ ६ ॥

अग्न्यन्वाधानञ्च यदि देवतार्थम् ॥ १९ ॥

यदि देवतापरिग्रहार्थमग्न्यन्वाधानं, तदपि भेदेन कर्त्तव्यम् । प्राकृतेनाग्न्यन्वाधानेनामावास्यादेवताः परिगृहीताः । न च रक्षोघ्नोऽग्निः । तत्परिग्रहार्थमप्यग्निधारणार्थम् । ततः प्राकृतेनैव धारितत्वादग्नेर्न कर्त्तव्यम् । देवतापरिग्रहार्थता वाक्यशेषे श्रूयते । ममाग्ने वर्चो विहवेष्वस्त्विति पूर्वमग्निं परिगृह्णाति । देवता एव तत्पूर्वेद्युः परिगृहीताः । श्वो भूते हि यजत इति ॥ १९ ॥ पूर्व० सि० ॥ देवतार्थाऽग्न्यन्वाधानाधिकरणम् ॥ ७ ॥

अत्राशङ्कते,

आरम्भणीया विकृतौ न स्यात् प्रकृतिकालमध्यत्वात् कृता पुनस्तदर्थेन ॥ २० ॥

वैकृतेषु कर्मसु दार्शपौर्णमासिकारम्भणीया कर्त्तव्या, उत नेति । विचारेण कर्त्तव्येत्युच्यते । किं कारणम् । प्रकृतिकालमध्यत्वात् । प्रकृते दर्शपूर्णमासयोर्यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । तन्मध्ये वैकृतानि कर्माणि यत्तत्र कृता पुनस्तदर्थेन कृतस्य यावज्जीविकस्य प्रयोगस्यार्थेन आदौ कृतारम्भणीया ॥ २० ॥ पूर्व० ॥

सकृदारम्भसंयोगात् ॥ २१ ॥

एकः पुनरारम्भो यावज्जीवप्रयोगादित्युक्तम् । एवं सैव तेषां प्रसङ्गात् कार्यं साधयिष्यतीति । तस्मान्न तेषु भेदः स्यात् ॥२१॥हेतुः

स्याद्वा कालशेषभूतत्वात् ॥ २२ ॥

स्याद्वा विकृतिष्वारम्भणीया । कुतः । चोदकेन प्राप्यत इति ।

न तु प्रकृतिकालमध्यपातात् प्रसज्ज्यत इत्युक्तम् । न यावज्जीवकालः । प्रकृतेः शेषभूतत्वात् कर्तृधर्मोऽसावित्युक्तम् । कर्त्तुर्वा श्रुतिसंयोगादिति । योऽसौ कर्तृधर्मनियमः । तस्याकालः । प्रकृतेस्तु दर्शपूर्णमासः स्वकालः । तस्मान्न दर्शपूर्णमासप्रयोगस्य तन्त्रमध्ये प्रतीमा विकृतयः । अतो न स्वारम्भणीया प्रसज्ज्यते । अन्यथा कृत्वा दोष उक्तोऽन्यथा परिहारः । दार्शपूर्णमासिके यावज्जीवं काल इति कृत्वा दोष उक्तः । नैयमिक इति परिहारः । पक्षान्तरैरपि परिहारा भवन्ति ॥ २२ ॥ सि० ॥

आरम्भविभागाच्च ॥ २३ ॥

विभक्तः प्रकृतिविकृत्योरारम्भस्तदा प्रकृतिरुत्पन्नस्यैव हि कामेन निमित्तेन वा चोद्यते । अतस्तस्याः प्रकृत्यारम्भेणारम्भः । आरम्भभेदाच्च तन्निमित्ताया आरम्भणीयाया भेदः स्यात् । तस्माद्विकृतिष्वारम्भणीया ॥ २३ ॥ हेतुः ॥ आरम्भणीयाधिकरणम् ॥ ८ ॥

पञ्चदशरात्रे अग्निष्टुदेकाहः प्रथममहः । ततो ज्योतिर्गौरायुरिति अहः । परिशिष्टेष्वेकादशाहिको धर्मः कर्तव्यः, उताग्निष्टुत इति । ननु सिद्धमेतत् । चोदकनामधेययोर्बलाबलपरीक्षायामेकाहिको धर्मः कर्त्तव्य इत्युक्तम् । न च क्रत्वभिधानादधिकानामशब्दत्वामिति । तथा सिद्धन्यायान्तरेणाक्षिप्यते । अथवा नाम्नामेव मिथश्चिन्ता ।

विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् सधर्मकत्वम् ॥ २४ ॥

विप्रतिषिद्धधर्माणामेतेषामग्निष्टुतश्चैकादशानां चाह्नां समवाय एतस्मिन् पञ्चदशरात्रे भूयसामेकादशानामह्नां सधर्मकत्वं स्यात् । तदीयो धर्मः कर्तव्यः । को हेतुः । भूयस्त्वमेव । बहुषु गुणसम्पन्नेषु महत् फलं भवति । एकस्मिन्नल्पं फलम् । एष लोके दृष्टान्तः । लोके एकादशसु प्रदीपेषु तैलवर्त्तिसम्पन्नेष्वेकस्मिन् गृहे महान् प्रकाशो भवति । विपर्यये अल्पः । किं पुनरिहोदाहरणम् । सुब्रह्मण्याग्निष्टुत्याग्नेयी । इतरेष्वहःस्वैन्द्री । तत्रैन्द्री कर्तव्या ॥ २४ ॥ सि० ॥ विप्रतिषिद्धधर्माणां समवाये भूयसां सधर्मकत्वाधिकरणम् ॥ ९ ॥

मुख्यं वा पूर्वचोदनाल्लोकवत् ॥ २५ ॥

यत्र तुल्यसंख्यानां प्रधानानां धर्मविप्रतिषेधः । तत्र मुख्यधर्मः

कर्त्तव्यः । यथाग्नावैष्णवमेकादशकपालं निर्वपेत् संग्रामे । सारस्वतीं मेषीं वानस्पतये इति । तत्र मुख्यस्याग्नावैष्णवस्य कल्पो भवति । कुतः । पूर्वचोदनात् । पूर्वचोदितत्वात् । पाठक्रमेणापूर्वमाग्नावैष्णवः कर्त्तव्यः । तस्य धर्मा अप्रत्यनीकाः प्राप्नुवन्ति । उत्तरस्य तु पूर्वेण विरुद्धाः । तदुत्तरकाला हि तस्य प्राप्तिः । तद्धर्माणाश्च पूर्वस्य कृते कल्पे उत्तरस्य तेनैव कृतार्थत्वात् । स्वकल्पो निवर्त्तते । एकाधिकरण्यं चैके मन्यन्ते । तेषां पञ्चदशरात्रेऽपि मुख्यधर्माऽनुग्रहणं वा ॥ २५ ॥ सि० ॥

तथा चान्यार्थदर्शनम् ॥ २६ ॥

अन्यार्थोऽपि पूर्वं प्राप्तस्य बलीयस्त्वं दर्शयति । अध्वरस्येव पूर्वमथाग्नेयीज्यते रूपाऽपि ह्येव कर्मवदग्निकर्मेति । इदं चापि यथा वै पूर्वावसायिनो जघन्यावसायिनं नोन्नीयन्ते नावसास्यन्तीत्येवमेवैतदिति ॥ २६ ॥ उदाहरणम् ॥ तुल्यसंख्यानां मुख्यधर्मग्रहणाऽधिकरणम् ॥ १० ॥

अङ्गगुणविरोधे च तादर्थ्यात् ॥ २७ ॥

ज्योतिष्टोमे दीक्षणीया । आग्नावैष्णवमेकादशकपालान्निर्वपेद् दीक्षिष्यमाण इति तत्रैव । स सोम्यमहः तयोः पूर्वं कालो य इष्ट्या पशुना सोमेनाग्रयणेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेतेति वचनात् । यदा एका दीक्षा तिस्र उपसद इत्येवमादयः कल्पास्तदा विरोधः । तत्र चिन्ता । किं दीक्षा पर्वणि कर्त्तव्या, अपर्वणि श्रुत्या, उत विपर्यय इति मुख्यत्वाद्दीक्षा कार्येति प्राप्ते, उच्यते । अङ्गगुणेन प्रधानगुणस्य विरोध एतस्मिन्न गुणो बाध्येत । कुतः । तादर्थ्यात् । अङ्गगुणवत् क्रियते । प्रधानं सगुणं स्यादिति चेदङ्गे गुणवति क्रियमाणे विगुणमापद्यते, कोऽर्थोऽङ्गेनागुणवता कृतेन । तस्मात् पर्वणि श्रुत्या कर्त्तव्या, अपर्वणि दीक्षा ॥ २७ ॥ पूर्व०सि० ॥ ज्योतिष्टोमे दीक्षणीयाधिकरणम् ॥ ११ ॥

परिधेर्द्व्यर्थत्वादुभयधर्मा स्यात् ॥ २८ ॥

पशुमत्सु चातुर्मास्येषु श्रूयन्ते । परिधौ पशुं नियुञ्जन्तीति । स परिधिरुभयधर्मा स्यात् । परिधिधर्मा यूपधर्मा च । कस्मात् । द्व्यर्थत्वात् स करोति अग्नेश्च परिधानं पशोश्च प्राबल्यम् । अर्थप्रयुक्ताश्च

धर्माः। तस्मादुभये कर्त्तव्याः। अविरुद्धाश्च ये। यथा, यवमतीभिरद्भिः प्रोक्षणमञ्जनं परिव्याणमिति यूपधर्माः। इध्मसन्नहनं समानं जुह्वा वसुरसीत्येवमादिभिरञ्जनमभ्याश्रावणमिति परिधिधर्माः॥२८॥

यौप्यस्तु विरोधे स्यान्मुख्यानन्तर्यात् ॥ २९ ॥

विरोधे तु सति यूपधर्माः। कस्मान्मुख्यानन्तर्यात्। मुख्यः पशुः। स हि यज्ञं निर्वर्त्तयति। तस्यानन्तरो यूपः। सन्निपातित्वात्। तेन सोऽन्तरङ्गः परिधिस्त्वग्निना सम्बद्ध्यते, अग्निर्हविषा। स बहिरङ्गः। अन्तरङ्गबहिरङ्गयोश्चान्तरङ्गं बलीयः। तत् कस्य हेतोः। अत्र हि पूर्वः प्रत्ययो भवेत्। इमे धर्मा अपूर्वार्थाः। तत् साक्षादपूर्वेणासम्बद्ध्यमानास्तदङ्गेषु विज्ञायन्ते। अतस्तत्र बुद्धिरपूर्वासम्भवेन निर्वर्त्तमानाऽङ्गेषु प्रवर्त्तमाना अन्तरङ्गे तावदापतति। ततो व्यवहितः। बहिरङ्गे च यत्र पूर्वमापतति तत्रैव तिष्ठति। तदतिक्रमे कारणाभावात्। तस्माद्विरोधे ये ये धर्मास्ते कर्त्तव्याः। कः पुनरसौ तक्षणमुच्छ्रयणं निखननमिति ॥ २९ ॥ पूर्व० ॥

इतरो वा तस्य तत्र विधानादुभयोश्चाङ्गसंयोगः॥३०॥

इतरो वा यूपधर्मो वा अविरोधी कर्त्तव्यः। कुतः?। तस्य तत्र विधानात्। तस्य यूपकार्यस्य पशुनियोजनस्य तत्र परिधौ विधानात्। परिधौ पशुं नियुञ्जन्ति, अवस्थाप्य परिधित्वं नियोजनमुच्यते। तस्य परिधित्वानुपमर्देन विज्ञायते तथाभूतोपदेशात्। यथा खलेवाली यूपो भवतीति। यद्युच्छ्रयेत तक्षेद्वा परिधित्वमेव व्याहन्येत। सत्योक्तोऽसावुपशमश्च। तत्र परिधौ पशुं नियुञ्जन्तीत्येतदेव वा अयथार्थं स्यात्। उभयोश्च पक्षयोरङ्गेनैव धर्मस्य संयोगः। उभयोश्चाङ्गसंयोगो, न क्वचित् प्रधानेन प्रत्यासत्तिरिति। यच्च सत्योपकारविशेषः। तस्मादकरणं सा। अतः परिधिधर्मः कर्त्तव्यः॥ ३० ॥ सि० ॥ परिध्यधिकरणम् ॥ १२ ॥

पशुसवनीयेषु विकल्पः स्याद् वैकृतश्चेदुभयोरश्रुतिभूतत्वात् ॥ ३१ ॥

सवनीये पशौ सवनीयेषु पुरोडाशेषु पुरोडाशे प्रसङ्गे विकल्पः स्यात्, पाशुकं वा तन्त्रं सवनीयेषु प्रसज्ज्यते। सवनीयतन्त्रं वा पशोः। कुतः। विशेषाभावात्। नात्र पुरोडाशाः पशुतन्त्रे विधीयन्ते, न पशु-

पुरोडाशतन्त्रे । उभयोः स्वतन्त्रम आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोति, अनुसवनं सवनीयाः पुरोडाशा निरूप्यन्त इति । तत्र यदि कस्यचित् प्रत्यक्षशिष्टं स्यात् । कस्यचिदानुमानिकं तदा यस्य प्रत्यक्षशिष्टं स तन्त्री स्यादितरः प्रसङ्गभाक् । उभयोश्चाश्रुनभूतत्वम । पशुरपि वैकृतः पुरोडाशा अपि । तेनायमपि विशेषो नास्ति । अत उभयोस्तुल्यप्राप्तेरन्यतरेण कृतार्थत्वाद्विकल्पः । ननु वैकृत एवायं पशुः । तत्र वैकृतश्चेति संशयवचनं न युक्तम् । अत्रोच्यते । असंशयितेऽपि संशयवादो भवति । यथा—ईजाना बहुभिर्यज्ञैर्ब्राह्मणा वेदपारगाः * शास्त्राणि चेत् प्रमाणं स्युर्यतस्ते परमा गतिः ॥ ३१ ॥ पूर्व० ॥

पाशुकं वा वैशेषिकाम्नानात्तदनर्थकं विकल्पे स्यात् ॥ ३२ ॥

पाशुकं वा तन्त्रं पुरोडाशेषु प्रसज्ज्यते । न विकल्पः स्यात् । कुतः । तस्य वैशेषिकाम्नानात् । पशोर्वैशेषिको धर्मस्तत्राम्नातः सूक्तवाकप्रैषः-अग्निमभ्येति । तदाम्नातमनर्थकं विकल्पे सति स्यात् । अन्तरेणापि ह्याम्नानं पक्षे भवत्येव सः । अत आम्नातसामर्थ्यान्नित्योऽसौ । न च पौरोडाशिकं तन्त्रं प्रसज्ज्यते । स हि मैत्रावरुणेन प्रैषो वक्तव्यः । न च तत्र मैत्रावरुणोऽस्ति । दर्शपूर्णमासयोश्चत्वार ऋत्विज इति नियमात् । पशौ तु न सोऽस्ति । पशुतन्त्रे प्रसज्ज्यमाने न किञ्चिद्वैगुण्यम् । पुरोडाशतन्त्रे सति ऋत्विक्संख्या वा वर्जयितव्या, अमैत्रावरुणेन वायं प्रैषो वक्तव्यः । उभयथा प्रकृतिविरोधः । तस्मान्नियमेन पाशुकं तन्त्रं प्रसज्ज्यते ॥ ३२ ॥

पशोश्च विप्रकर्षस्तन्त्रमध्ये विधानात् ॥ ३३ ॥

अपि च पशोस्तन्त्रस्य विप्रकर्षो वपया प्रातःसवनेन चरन्ति पुरोडाशेन मध्यन्दिने सवने अङ्गैस्तृतीयसवन इति।तस्य विप्रकृष्टत्वात्तन्त्रमध्ये पुरोडाशानां विधानं युज्यते । प्रातःसवनीयानां तु पुरोडाशानां तन्त्रं प्रातःसवन एवापवृज्यते । अनुसवनं सवनीयाः पुरोडाशा निरूप्यन्त इति वचनात् । तन्मध्ये पशोः पातो न घटते पुरोडाशाङ्गप्रचारयोर्व्यतिरेकात् । इह च प्रातःसवनीयैरेव सह पशोः सन्देहः । इतरे पुनः पुरोडाशा असंशयं पशोः प्रातःसवनीयानां वा तन्त्रमध्ये पतिताः । ननु आग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीति अनु-

याजानामुत्कर्षात् पौरोडाशिकमपि तन्त्रं प्रवर्तते । नेत्याह । अयमपि पाशुकानामनुयाजानामुत्कर्षः । कथं ज्ञायते । सोमाग्नेश्चरोः प्रतिपत्तिर्दृश्यते । संस्थिते यज्ञे प्रस्तरं प्रासयति । चरुमयज्ञवैशसायेति । सा पश्वनुयाजैरुत्कृष्टस्य युज्यते, न पौरोडाशिकैः । तस्योत्कर्षो न प्राप्नोति । प्रासङ्गिकश्च नोत्कर्षेदसंयोगादिति । तेषां हि हविःप्रचारादूर्ध्वमवसरः । तद्वशाच्च उत्कर्षवादः । प्रातःसवनीयानान्तु ये अनुयाजा न ते तद्देशाः । अतो न तेषामुत्कर्षः । तस्मात् पाशुकं तन्त्रम् । अथ वचनमिदं कस्मान्न भवति । परिहृतमेतद्विकारवाक्यं स्यात् प्रतिपत्तिविशेषं कालं च विदधत् । तस्मात् पाशुकं तन्त्रं पुरोडाशेषु प्रसज्ज्यते, न विकल्पते इति ॥ ३३ ॥ हेतुः ॥ सवनीयपुरोडाशाधिकरणम् ॥ १३ ॥

अपूर्वे च प्रकृतौ समानतन्त्रा चेदनित्यत्वादनर्थकं हि स्यात् ॥ ३४ ॥

यदा प्रकृतिर्विकृत्या समानतन्त्रा तदा किं प्राकृतं तन्त्रं कर्तव्यम्, उत वैकृतम् । ननु नैव प्रकृतिर्विकृत्या समानतन्त्राऽस्ति । समानतन्त्रा चेदित्येवं कृत्वा चिन्तेयम् । किं प्राप्तम् । यदि पूर्वं प्रकृतिः प्रयुज्यते तत् प्राकृतम् । अथ विकृतिस्ततो वैकृतम् । किं पुनरत्र युक्तम् । प्रकृतिरिति नित्या प्रकृतिरागन्तुर्विकृतिरिति । कामे वा निमित्ते वोत्पन्ने आगच्छति पूर्वावसायिनश्च बलीयांसो जघन्यावसायिभ्यः । तस्मात् प्रकृतिः पूर्वं प्रयुज्यते । तस्य तन्त्रं कर्तव्यम् । प्राप्तकालत्वात् । तस्मात् प्राकृतं तन्त्रं कर्तव्यमित्येवं प्राप्तम् । एवं प्राप्ते ब्रूमः । अपूर्वे च वैकृतं तन्त्रं प्रकृतेः प्रसज्ज्यते । समानतन्त्रा चेदानित्यत्वाद्विकृतेः कामे वा उत्पन्ने निमित्तेऽसावागच्छति । नैमित्तिकी चिकीर्षा तान्नित्यां चिकीर्षा बाधते । सत्यां हि नित्यायां सा भवति । अतस्तामबाधमाना नैवोत्पद्यते । यदि न बाध्येत अनर्थकं स्याद्वैकृतं विधानम् । तस्माद्वैकृतं तत्र प्रकृतौ प्रसज्ज्यत इति ॥ ३४ ॥ पूर्वपक्षसिद्धान्तौ ॥ ॥ समानतन्त्रयोः प्रकृतिविकृत्योर्विकृतितन्त्रताऽधिकरणम् ॥ १४ ॥

आग्रयणे द्यावापृथिवीय एककपालः । स वैश्वदेविकैककपालप्रकृतिः । तस्य धर्मः प्रसूनं बर्हिरितरेषां प्रसूनमप्रसूनं वा । तत्र किम-

नियमः, उत प्रसूनमेवेति विचारः । आग्रयणे तु ऐन्द्राग्नस्य मुख्यत्वादनियमे प्राप्ते, उच्यते ।

अधिकश्च गुणः साधारणे विरोधात्
कांस्यभोजिवदमुख्येऽपि ॥ ३५ ॥

साधारण एतस्मिन् दार्शपौर्णमासिके आग्नेयेन्द्रादीनां योऽयमधिको गुणो द्यावापृथिवीयस्य वैशेषिकः सोऽपि मुख्येऽपि सति द्यावापृथिवीये नियम्येत । अविरोधात् । कांस्यभोजिवत् । तद्यथा शिष्यस्य कांस्यपात्रभोजित्वनियम उपाध्यायस्य न नियमः । यदि तयोरेकस्मिन् पात्रे भोजनमापद्यते । अमुख्यस्यापि शिष्यधर्मो नियम्येत मा भूद्धर्मलोप इति । एवमिहापि । तस्मान्न नियमः ॥ ३५ ॥ पूर्व० ॥

तत्प्रवृत्त्या तु तन्त्रस्य नियमः स्याद्यथा
पाशुकं सूक्तवाकेन ॥ ३६ ॥

तस्य प्रसूनस्य प्रवृत्त्या वैश्वदेविकं तन्त्रं सूक्तवाकस्य प्रैषेण वैशेषिकेण नियतम् ॥ ३६ ॥ पूर्व० ॥

न वाऽविरोधात् ॥ ३७ ॥

न वा नियम्यते । कुतः । अविरोधात् । अविरुद्धोऽयं धर्म इतरेषामपि हविषाम् । तेन न वैशेषिकः । अवैशेषिकत्वान्न ततोऽन्यतरन्नियन्तुं शक्नोति । वैशेषिकस्तु सूक्तवाकः । तस्मात् सोऽन्यतरं नियन्तुमुत्सहते ॥ ३७ ॥ सि० ॥

किञ्च,

शास्त्रलक्षणत्वाच्च ॥ ३८ ॥

न च शास्त्रविहिताः प्रसूनाः । किं तर्हि । चोदकप्राप्ताः । किमतः । यदि शास्त्रविहिता भवेयुः ततस्तेन प्रकृतिलिङ्गेन वैश्वदेविकं तन्त्रं नियम्येत । एवं द्यावापृथिवीयधर्मत्वात् प्राप्तानामेव प्रसूनानां पुनर्वचनमानर्थक्यपरिहारलक्षणं वा वैश्वदेविकस्य तन्त्रस्य विधानं विज्ञायते । प्रसूनादितन्त्रं भवतीति न तच्छास्त्रलक्षणम् । तस्मान्नास्ति तन्त्रस्य नियम इति ॥ ३८ ॥ हेतुः ॥ आग्रयणेष्ट्यधिकरणम् ॥ १५ ॥ इत्याचार्यश्रीशाबरस्वामिनः कृतौ मीमांसाभाष्ये द्वादशाऽध्यायस्य द्वितीयः पादः ॥ १२ ॥ २ ॥

अथ द्वादशाध्यायस्य तृतीयः पादः ॥ १२ ॥ ३ ॥

विश्वजिति वत्सत्वग्नामधेयादितरथा तन्त्रभूयस्त्वादहतं स्यात् ॥ १ ॥

अस्त्यष्टरात्रोऽहीनः । तस्य विश्वजिदभिजितावग्निष्टोमावभित उभयतो ज्योतिर्मध्ये षडहः पशुकामो ह्येतेन यजेतेति । विश्वजित्येकाहवत् सत्वगवभृथादुदेत्येतस्य परिधानार्थाम्नाता वत्सत्वचं परिधत्त इति, ज्योतिष्टोमे अहतं वासः, अष्टरात्रे उभयं प्राप्यते । तयोः परिधानयोरेकार्थत्वाद्विकल्पे प्राप्ते,

उच्यते । वत्सत्वक् स्यान्न विकल्पः । नामधेयेन वत्सत्वक् प्राप्यते । चोदकेनाहतम् । चोदकाच्च नामधेयशब्दो बलवत्तर इत्युक्तम् । अपिच वत्सत्वग्विधानादधिकानामशब्दत्वमिति यदि नामधेयतः प्राप्तिर्न स्यात्ततो भूयस्त्वेन ज्योतिष्टोमप्रकृतीनामह्नामहतं स्यात् । अस्ति त्वसौ । तस्मान्नाहतं भवति । नन्वभिजिज्ज्योतिरिति ज्योतिष्टोमिकधर्मग्राहीण्येतानि नामधेयानि सन्ति । तथापि मुख्यत्वाद्विश्वजित एव बलवत्त्वम् ॥ १ ॥ पूर्वं० ॥

अविरोधो वा उपरिवासो हि वत्सत्वक् ॥ २ ॥

न वा नियमो, वत्सत्वगेवेति । किं तर्हि । समुच्चयः । सर्वाङ्गोपसंहारी प्रयोगवचनोऽनुगृह्यते । ननु नामधेयस्य बलवत्त्वादहतं बाध्यते । विरोधे सति बाध्येत । अविरोधश्चानयोः कथम् ? । उपरिवाससः कार्यं वत्सत्वग्भविष्यति । वासोद्वयं पुरुषस्याचारतः प्राप्यते । ननूपरि वाससि परिधत्त इति न भवति । नैतदेवम् । उपरिवाससपि भवति । यथा, केवलं परिधत्ते, रौरवं परिधत्त इति । तस्मात् समुच्चयः ॥२॥ सि० ॥ विश्वजिति वत्सत्वगधिकरणम् ॥१॥

अनुनिर्वाप्येषु भूयस्त्वेन तन्त्रनियमः स्याच्छिष्टकृद्दर्शनाच्च ॥ ३ ॥

अग्नौ श्रूयते, अग्नीषोमीयस्य पुरोडाशमनुदेवसुवां हवींषि निर्वपतीति। अनुबन्ध्यायामपि देविकाहवींषि । तत्र भूयस्त्वेन तन्त्रं नियम्यते । अनुनिर्वाप्याणां बहुत्वात् । तत्तन्त्रं पशुपुरोडाशे प्रसज्ज्येत । किञ्च यत् स्विष्टकृच्छब्दकं स्विष्टकृतो वचनं दृश्यते पशुपुरोडा-

शस्य देविकाहविषां चाग्नये स्विष्टकृते समवद्यतीति । तदनुनिर्वाप्याणां तन्त्र उपपद्यते । यदा तु पशुपुरोडाशतन्त्रं तदा स्विष्टकृच्छब्दकं स्यात् । तस्मादनित्यत्वादागन्तुकत्वाद्वा तथा ॥ ३ ॥ पूर्व० ॥

आगन्तुकत्वाद्वा स्वधर्मा स्याच्छ्रुतिविशेषादितरस्य च मुख्यत्वात् ॥ ४ ॥

आगन्तवोऽनुनिर्वाप्याः । श्रुतिविशेषात् । एवं हि श्रूयते, पशुपुरोडाशमनुनिर्वपतीति । एवं श्रुते पूर्वं पशुपुरोडाशः, पश्चादनुनिर्वाप्या भवन्तीति स मुख्यः, इतरे तु जघन्याः । अतस्तेषामागन्तुत्वादितरस्य च मुख्यत्वात् पशुपुरोडाशः स्वधर्मा स्यात् ॥ ४ ॥ सि० ॥

स्वस्थानत्वाच्च ॥ ५ ॥

अपि च पशुपुरोडाशस्थानं यद्वपाप्रचारात् परतोऽङ्गैरपि तस्य तत्स्थानैरेव भवितव्यं, प्रधानदेशत्वात्तेषाम् । यद्यनुनिर्वाप्याणां तन्त्रं स्यात् । ततस्तस्मिन् स्थाने तदङ्गानि क्रियेरन् । पशुपुरोडाशाऽङ्गान्यन्यस्थानानि भवेयुः । तेषां स्वस्थानाय पशुपुरोडाशस्य तन्त्रं स्यात् कर्तव्यम् ॥ ५ ॥ हेतुः ॥

स्विष्टकृच्छ्रपणान्नेतिचेद्विकारः पवमानवत् ॥ ६ ॥

स्विष्टकृच्छ्रपणान्नेति चेदिति यदुक्तं तत् परिहर्तव्यम् । अत्रोच्यते । विकारः पवमानवत् । एवञ्च पशुपुरोडाशस्य तन्त्रेण अनिरुक्ते स्विष्टकृति प्राप्तो विकारो वचनाद् भविष्यत्यग्नये स्विष्टकृते समवद्यति सस्विष्टकृच्छब्दकं वचनं कर्तव्यमिति । यथाग्नये पवमानाय निर्वपतीति वचनात् पवमानशब्दको निर्वापः क्रियते, एवमिहापि ॥ ६ ॥ आ० नि० ॥

अविकारो वा प्रकृतिवच्चोदनां प्रतिभावाच्च ॥ ७ ॥

अविकारः । अस्विष्टकृच्छब्दकं वचनं कर्त्तव्यं, प्रकृतिवदतिदेशाद्यन्तवचनादिति नात्र विकारो विधीयते । किं तर्हि । समवदानम् । देविकाहविषामग्नये स्विष्टकृते समवद्यतीति । तत्र विकारेऽन्यास्मिन् विधीयमाने वाक्यं भिद्यते । कथं तर्हि । स्विष्टकृद्वचनम् । चोदनां प्रतिभावाच्च । दर्शपूर्णमासयोर्यास्ति स्विष्टकृच्चोदना सा स्विष्टकृच्छब्दिका । तत् प्रत्येतद्वचनं तदुपलक्षणाय । तस्मादग्नये याऽग्नौ शेषभागितया तदुक्तं स्यात्तावदग्नये स्विष्टकृत इति । यथा शरमयं बर्हि-

भवतीति नवनीतमाज्यमिति प्राकृते कार्ये ह्येते प्रकृतिलिङ्गेन द्रव्यशब्देन । एवमिहापि स्विष्टकृच्छब्देन प्राकृती लक्षणया देवतानूद्यते ॥ ७ ॥ सि० ॥ अनुनिर्वाप्याधिकरणम् ॥ २ ॥

एककर्मणि शिष्टत्वाद् गुणानां सर्वकर्म स्यात् ॥ ८ ॥

य एकस्मिन् कर्मणि गुणा बहवः शिष्यन्ते तेषां सर्वेषां क्रिया स्यात् । समुच्चय एव सर्वेषां शासनमर्थवद् भविष्यति । सर्वाङ्गोपसंहारी च प्रयोगवचनोऽनुगृह्यते । यथाऽऽघारे ऋजुमाघारयति सन्ततमाघारयति प्राञ्चमाघारयति च ॥ ८ ॥ सि० ॥ आघारे ऋजुत्वादिसमुच्चयाधिकरणम् ॥ ३ ॥

एकार्थास्तु विकल्पेरन् समुच्चये ह्यावृत्तिः स्यात् प्रधानस्य ॥ ९ ॥

ये त्वेकार्था एककार्यार्थास्ते विकल्पेरन् । यथा व्रीहियवौ, यथा खादिरादीनि यूपद्रव्याणि । बृहद्रथन्तरे ते विकल्पेरन् । तस्मात् समुच्चये ह्यावृत्तिः स्यात् प्रधानस्य । एकेन कार्ये कृते यदि द्वितीय उपादीयते । आवृत्तिः प्रधानस्य भवेत् । सा चायुक्ता । किं कारणम् । प्रधानं हि फलाय वा क्रियते फलवदुपकाराय वा, नाङ्गम् । सकृत् कृतेन च कृतं कार्यम् । तस्य निरर्थिका आवृत्तिः ॥ ९ ॥ सि० ॥

अभ्यस्येतार्थवत्त्वादिति चेत् ॥ १० ॥

इति चेत् पश्यसि अनर्थकोऽभ्यास इति । नानर्थको, गुणान्तरं स तस्यार्थवत्त्वायाभ्यस्येत ॥ १० ॥ आ० ॥

नाश्रुतत्वाद्धि विकल्पवच्च दर्शयति कालान्तरेऽर्थवत्त्वं स्यात् ॥ ११ ॥

नैतद्युक्तम् । कुतः । अश्रुतत्वात् । अश्रुतोऽभ्यासः । तस्य प्रमाणं नास्ति । केन करिष्यति ? । गुणान्तरशासनस्यार्थवत्त्वं वक्ष्यति । कालान्तरे अर्थवत्त्वं स्यादिति । अभ्यासशास्त्रं क्वचिद् भवति, संसव उभे कुर्यात् । गोसव उभे कुर्य्यात् । अभिजित्यवश्यैकाहे श्रूयते । उभे बृहद्रथन्तरे कुर्यादिति । तत् समुच्चये सति न स्यात् । तस्मादपि च विकल्पवच्च दर्शयति । विकल्प इव दर्शनं भवति । बैल्वो वा खादिरो वा पालाशो वाऽन्येषां यज्ञक्रतूनां यूपा भवन्ति तथैतस्य खादिर एव कार्य इति वाजपेये खादिरं नियच्छन्नन्यत्र

विकल्पमनुवदति । तस्मादपि विकल्पः कालान्तरे अर्थतत्त्वं स्यात्। यच्च गुणान्तरशासनस्यानर्थक्यमिति कालान्तरे प्रयोगान्तरेऽर्थवत्त्वं तस्यापि भविष्यति । तस्मिन्नर्थवति नाभ्यासस्य प्रमाणम् । ननु विकल्पस्यापि नास्ति प्रमाणम् । विकल्पेन किञ्चिदश्रुतं क्रियते । व्रीहिभिर्यजेतेति श्रुतैरिज्यते । यवैर्यजेतेत्यपि श्रुतम् । तैरपीज्यते । एकस्मिन् प्रयोगे कार्याभावान्नोभाभ्यामिज्यते । अथ कस्मान्न मिश्रीयते तेन । तदुक्तम् । एकैकस्य निरपेक्षस्य साधकत्वं श्रुतम् । तस्मिन् मिश्रीभावे बाध्येत । तस्माद्विकल्पः ॥ ११ ॥ आ० नि० ॥ विकल्पाऽधिकरणम् ॥ ४ ॥

प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयोग-स्तस्मात् सर्वस्य निर्घातः ॥ १२ ॥

प्रायश्चित्तानि द्विःप्रकाराणि । कानिचिद्वैगुण्यस्य प्रमादादापतितस्य समाधानार्थानि, कानिचिन्निमित्ते कर्माङ्गानि । तत्र समाधानार्थानि यथा यम् ऋक्तो यज्ञ आर्त्तिमियाद् भूः स्वाहेति गार्हपत्ये जुहुयादथ यदि यजुष्टो दक्षिणाग्नौ भुवः स्वाहेति, यदि सामतः स्वः स्वाहेत्याहवनीय एवेति । आर्त्तिमियाद्विनाशमियादित्यर्थः । कः पुनर्यज्ञस्य विनाशः । शिष्टस्याक्रिया, प्रतिषिद्धसेवनं च । कथं पुनर्ज्ञायते, विनष्टस्य समाधानार्थं तत् प्रायश्चित्तमिति । वाक्यसंयोगात् । यद्यार्त्तिमियादिदं कुर्यात् । यदि तस्मिन् कृते यदि नष्टमेव कोऽर्थस्तेन कृतेन । यस्त्वत्र ब्रूते । आर्त्तौ निमित्ते कर्माङ्गं प्रायश्चित्तमिति । स च वक्तव्यः । अङ्गं नाम तद् यत् प्रधानं फलवत् करोति । प्रधानविनाशादफलत्वमापन्नम् । यदि तदनेन फलवत् क्रियते तत एतदङ्गम् । यच्चेदं फलं प्रयुक्तमेतेन फलवत् क्रियते हन्त तर्हि जातस्य विनष्टस्य समाधानार्थम्, अथ न क्रियते न तर्हि कर्माङ्गम् । तत्र यदुच्यते निमित्ते कर्माङ्गमिति तदेव नास्ति । अपि च तत्र तत्र समाधानमेव वाक्यशेषे श्रूयते । अग्निर्वै देवानां पथि कृतः स्वेन भागधेयेनोपासीरन् स एवं पन्थानमपि नयति स एवं व्रतमालम्भयतीति । तस्मादेते दोषनिर्घातार्थाः । तेषु विकल्पः स्यात् । कुतः । ऐकार्थ्यात् । कथमैकार्थ्यमेतेषां निष्पन्नेन दोषेण केवलस्य तस्य तस्याभिसंयोगो यद्युक्तो यज्ञ आर्त्तिमियाद् भूः स्वाहेति जुहुयादिति । तस्मात् सर्वस्य दोषस्यैकेन निर्घातः । एकेन चेन्निर्हतो दोषो द्वितीयादीनि प्रयोगान्तरा-

ऽर्थानि भवन्ति। एवं स्मार्त्तेष्वपि द्रष्टव्यम् ॥ १२ ॥ पूर्व० ॥

समुच्चयस्तु दोषार्थः ॥ १३ ॥

यानि तु दोषनिर्घातानि तेषु समुच्चयः। कानि पुनस्तानि। यानि श्रुतस्याक्रियया प्रतिषिद्धानि वा तानि उच्यन्ते। यथा यस्याहुतमग्निहोत्रं सूर्योऽभ्युदयान्मैत्रं चरुं निर्वपेत् सौर्यमेककपालं यस्याहुतमग्निहोत्रं सूर्योऽभ्युदयादित्यादि। अग्निं समाधाय वाचं यत्वा दम्पती सर्वाहमुपासीयातामिति। तत्र दोषो न दृश्यते। दोषस्याभावान्निर्घातार्थता नास्ति। केवलमभ्युदये निमित्ते कर्मविधीयते। तन्नैमित्तिकं कर्मणः प्रकरण उत्पन्नत्वात् कर्माङ्गं विज्ञायते। यावन्ति चोद्यन्ते तानि सर्वाणि प्रयोगवचनेन गृह्यन्ते, तेषां समुच्चयः ॥ १३ ॥ सि०॥ प्रायश्चित्ताधिकरणम् ॥ ५ ॥

मन्त्राणां कर्मसंयोगः स्वधर्मेण प्रयोगः स्याद् धर्मस्य तन्निमित्तत्वात् ॥ १४ ॥

कर्मणि प्रयुज्यमानानां स्वधर्मेण प्रयोगः स्यात्। य एषां ग्रहणकाले धर्माः— पर्वणि नाध्येयं, वाते नाध्येयं, स्तनयित्नौ नाध्येयमित्यादयः। धर्मस्य तन्निमित्तत्वाद्। धर्मोऽयं मन्त्रप्रयोगनिमित्तः। अयमपि च मन्त्रप्रयोगः। तस्मादत्रापि न भवितव्यम् ॥ १४ ॥ पूर्व० ॥

विद्यां प्रति विधानाद्वा सर्वकारणं प्रयोगः स्यात् कर्मार्थत्वात् प्रयोगस्य ॥ १५ ॥

अध्यायेऽनध्यायेऽपि। कुतः। विद्यार्थोऽयं प्रयोगः। यं प्रत्येतद्धर्मविधानं स एष ग्रहणस्य धर्मः। तस्माद् ग्रहणं गुणवत् करोति। कः पुनर्ग्रहणस्य गुणः। अविघ्नेन निर्वृत्तिः। कथं पुनर्ज्ञायते, ग्रहणार्थोऽयं धर्म इति। ग्रहणकाले श्रूयते, न कर्मकाले। मा भूत् कर्मधर्मो, मन्त्रधर्मो भविष्यति। मन्त्रधर्मश्च स यत्र मन्त्रस्तत्र प्राप्नोति। उच्यते। न धर्मो मन्त्रेषु विधीयते। किं तर्हि। ग्रहणे। एवमभिनिर्वर्त्यते, तेनैव मन्त्रो भवति। तस्माद् ग्रहणधर्मः। न च कर्मणि ग्रहणार्थः। प्रयोगः। किं तर्हि। कर्मार्थः। तस्मात्तत्र धर्मस्याप्राप्तिः। अपि च पर्वणि चाध्ययनस्य प्रतिषेधः। यद्यमन्त्रकं कर्म क्रियते प्रयोगानर्थक्यम्। अथापर्वणि तथापि स एव श्रुत्यनुरोधेन प्रयोगः प्राप्नोति स्मृत्यनुरोधेनाप्रयोगः। श्रुतिश्च स्मृतितो बलीयसी। तस्मान्नाद्रत्यः

प्रयोगनियमः ॥ १५ ॥ सि० ॥ अनध्याये मन्त्रपाठाधिकरणम् ॥ ६ ॥

भाषास्वरोपदेशे ऐरवत् प्रायवचनप्रतिषेधः ॥ १६ ॥

भाषिकेण स्वरेण केचिन्मन्त्रा ब्राह्मण उपदिष्टाः । मन्त्रसमाम्नाये त्रैस्वर्येण पठिताः । यथा इमामगृभ्णन्नित्यश्वमेधे । कः पुनर्भाषिकः स्वरः । उच्यते—

छन्दोगा बह्वृचाश्चैव तथा वाजसनेयिनः ।

उच्चनीचस्वरं प्राहुः स वै भाषिक उच्यते, इति । तेषु मन्त्रेषु प्रायवचनस्य स्वरस्य प्रतिषेधः स्यान्निवृत्तिः । कस्मात् । स्वरान्तरोपदेशात् । ऐरवत् । यथा इरापदस्योपदेशात् कर्मकाले गिरापदेऽस्य निवृत्तिः । कथं पुनर्ज्ञायते स्वरस्यायमुपदेशो, न मन्त्रस्येति । मन्त्रो नोपदेष्टव्यः । रूपादेव प्राप्नोति । स्वरस्त्वनुपदिष्टो, न प्राप्नोति । तस्मात्तस्योपदेशः ॥ १६ ॥ पूर्व० ॥

मन्त्रोपदेशो वा न भाषिकस्य प्रायोपपत्तेर्भाषिकश्रुतिः ॥ १७ ॥

मन्त्रस्य वायमुपदेशो, न स्वरस्येति । कथं ज्ञायते । मन्त्रोपदेशरूपोऽयं शब्दः । किमस्य तत्सारूप्यम् । इत्यश्वाभिधानीमादत्त इत्याह । मन्त्रेण वा साऽभिधीयते । न भाषिकेण स्वरेण । मन्त्रोपादानं प्रत्याययति । नेतरस्य । कस्मात्तर्ह्युच्चार्यते । प्रायापत्तेर्भाषिकश्रुतिः । भाषास्वरो ब्राह्मणे प्रवृत्तः । तन्मध्ये यदि प्रवचनेन पठ्यते । भाषिकस्वरसन्तानो विच्छिद्येत तत्परिहारार्थं भाषिकेणोपदेशः । यथा गायना गीतवस्तुकानि यानि गीतकेषु प्रक्षिपन्ति तान्यपि तेनैव गीतिस्वरेणैवोच्चारयन्ति । मा भूत् स्वरसन्तानस्य विच्छेद इति । तस्मान्न भाषिकस्वरोपदेश इति ॥ १७ ॥ सि० ॥

विकारः कारणाग्रहणे तन्न्यायत्वाद् दृष्टेऽप्येवम् ॥ १८ ॥

इरापदेन तु गिरापदस्य विकारो युक्तः । कारणाग्रहणात् । यथा भाषिकस्यानुपदेशेन कारणेनोक्तेनैव गिरापदस्यानुपदेशे किञ्चित् कारणं गृह्यते । तस्मात्तस्योपदेशः । स कर्मकाले विधानात् समाम्नाये प्राप्तं गिरापदं बाधते । तस्मात्तत्र विकारः । तन्न्यायत्वाद् दृष्टेऽप्येवम् । यो मन्त्रो मन्त्रसमाम्नाये त्रैस्वर्येण दृष्टस्तस्य तथैव प्रयोगः । यस्तु न दृष्टो ब्राह्मणे, न च भाषिकेणोपदिष्टः । यथा तं

प्रोहेद्वानस्पत्योऽसीति । तत्र का प्रतिपत्तिरुच्यते । तन्न्यायत्वात् । अदृष्टेऽपि योऽपि योऽसौ न्याय उक्तः । मन्त्रोपदेशोऽयं तद्रूपत्वाच्छब्दस्येति।तेनैव न्यायेनादृष्टेऽपि मन्त्रोपदेश एव, न भाषिकोपदेशः। तस्मान्न तस्यापि प्रवचनेनैव स्वरेण प्रयोगः ॥ १८ ॥ पूर्व० ॥

तदुत्पत्तेर्वा प्रवचनलक्षणत्वात् ॥ १९ ॥

तदुत्पत्तेर्वा मन्त्रस्य भाषिकेण प्रयोगः स्यात् । प्रवचनलक्षणत्वात् । प्रवचनं मन्त्राणां लक्षणं यथा प्रोच्यते तथाविधा विज्ञायन्ते । ते च भाषिकस्येत्यपरा व्याख्या । इमामगृभ्णन्निति नैतस्योपदेशः। किं तर्हि। आम्नेन प्रतीकेन लक्षणेनासौ यथोत्पन्नो लक्ष्यते, प्रावचनेन स्वरेणोत्पन्ना । तस्मात्तद्विधाया उपदेशः । यस्तु ब्राह्मणोत्पत्तिरेव मन्त्रः । तत्र लक्षणस्याभावान्न लक्षणा । यथाश्रुति प्रयोगः ॥ १९ ॥ सि० ॥ मन्त्रस्वराधिकरणम् ॥ ७ ॥

मन्त्राणां करणार्थत्वान्मन्त्रान्तेन कर्मादिसन्निपातः स्यात् सर्वस्य वचनार्थत्वात् ॥ २० ॥

पदार्थकरणमन्त्राः- यथा इषे त्वेति छिनत्ति, देवस्य त्वा सवितुः प्रसवे इत्यादत्त इति । तेषां मन्त्रान्ते न कर्मादिसन्निपातः, यस्मिन् कर्मण्युपयुज्यते । किं कारणम् । सर्वस्य वचनार्थत्वात् । सर्वो मन्त्रः समस्तं वचनार्थं करोति । कः पुनर्मन्त्रस्य वचनार्थः । प्रयोगकाले पदार्थस्योपस्थानम् । मन्त्रेणोपस्थितः पदार्थः कर्त्तव्यो विज्ञायते । तदर्थस्य मन्त्रस्य आम्नानसामर्थ्याद् वचनाच्च क्वचिदिति । आदत्ते निर्वपतीति मन्त्रान्ते तस्योपस्थानम् । उपस्थितः पर्य्याप्तो यावन्न भ्रश्यत इति। तस्मान्मन्त्रान्तेन कर्मादिः सन्निपातकरणमन्त्रेषु ॥२०॥ सि० ॥ कर्मसु मन्त्रकरणप्रयोगाधिकरणम् ॥ ८ ॥

सन्ततवचनाद्धारायामादिसंयोगः ॥ २१ ॥

श्रूयते, सन्ततं वसोर्द्धारां जुहोतीति । अत्रापि पूर्वोक्तेन न्यायेन तथैव प्राप्ते, उच्यते । धारायामादिसंयोगः कर्मादिमन्त्रादिश्च संनिपत्य सन्ततवचनात् । समित्येकीभावः । ततोऽतिविस्तारः द्वयोर्यत्र सहतननं भवति तत्र सम्पूर्वस्तनोऽपि वर्त्तेत । इह कर्मवन्मन्त्रश्च सन्निपात्यः । तस्मात्तयोः सहतननमुच्यते । तच्चाद्योः सन्निपाते भवति । तस्मादादिसंयोगः ॥ २१ ॥ पूर्व० ॥

कर्मसन्तानो वा नानाकर्मत्वादितरस्या-
ऽशक्यत्वात् ॥ २२ ॥

कर्मणां वा सन्तानोऽयं, सन्ततं जुहोति इति हि होमस्य केवलस्य हि सन्तान उच्यते । नात्र मन्त्रसङ्कीर्त्तनमस्ति । न तु द्वयोः संयोगे संशब्दो भवति, एकश्च होम उच्यतेति । नैष दोषः । नानाकर्मत्वात् । बहून्येतानि कर्माणिं तेषामनुपरमेण क्रियासन्तानो भवति, कर्मनानात्वं वचनात् द्वादश द्वादशानि जुहोतीति । न तु द्रव्यसंख्येयानीत्याह । नात्र द्रव्यसङ्कीर्तनमस्ति । होमोऽत्र संख्यया युज्यते । द्वादश द्वादशानि जुहोतीति । एवंसंख्यान् होमान् करोतीति । किञ्च इतरस्य च मन्त्रकर्मणोः सन्तानस्याशक्यत्वात् क्षणिकं कर्म न मन्त्रेण सहतनितुं शक्यते । तदत्रापि कर्मादिसन्निपात एव ॥ २२ ॥ सि० ॥ वसुधाराधिकरणम् ॥ ९ ॥

आघारे च दीर्घधारत्वात् ॥ २३ ॥

दर्शपूर्णमासयोराघारं प्रकृत्य श्रूयते । सन्ततमाघारयतीति । तत्रापि क्षणिकत्वान्मन्त्रेण कर्मणः सहतननं घटते । एकत्वात् कर्मसन्तानो नास्ति । तस्माद् द्रव्याभिप्रायः सन्तानशब्दः । सन्ततं घारयतीति दीर्घधारया जुहोतीति दीर्घपरत्वात् सन्तानशब्दः ॥ २३ ॥ सि० ॥ आघाराधिकरणम् ॥ १० ॥

मन्त्राणां सन्निपातित्वादेकार्थानां विकल्पः स्यात् ॥ २४ ॥

ये मन्त्रा एककार्या यथा पुरोडाशविभागार्थाः, पूषा वां विभजतु । अर्यमा वां विभजत्वित्येवमादयः । तेषां विकल्पः । कुतः । सन्निपातित्वात् । करणा एते । करणानां च मन्त्रान्तेन कर्मादिसन्निपात उक्तो मन्त्राणां करणार्थत्वान्मन्त्रान्तेन कर्मादिसन्निपातः स्यादिति । न च विकल्पमन्तरेण सर्वेषामन्ते कर्मादिसन्निपातः कर्तुं शक्यः । किं वचनमेतत् । न हि । न्यायः । सर्वस्य वचनार्थत्वादिति । यद्येवं समुच्चयेऽपि स मन्त्र उच्यते । तत्रापि वचनार्थः सिद्ध्यति । एकेन तु कृते कर्मणि द्वितीयस्य प्रयोगोऽनर्थकः । तदेतत् कार्य्यत्वे भवति । तस्मादेकार्थत्वाद्विकल्पः । तच्च पूर्वमेवोक्तम् । एकार्थास्तु विकल्पेरन्निति । ततस्तत्प्राप्तिसूत्रमिदम् उत्तरचिन्तार्थम् ॥ २४ ॥ सि० ॥ मन्त्रसन्निपाते विकल्पाधिकरणम् ॥ ११ ॥

संख्याविहितेषु समुच्चयोऽसन्निपातित्वात् ॥ २५ ॥

संख्यया ये विधीयन्ते मन्त्राः यथाग्नौ चतुर्भिरादत्ते द्वाभ्यां खनति षड्भिराहरति तेषु समुच्चयः स्यात् । किं कारणम् । संख्या शब्देनोच्यते । साऽङ्गीकर्तव्या । न च समुच्चयादृते सा शक्याऽङ्गीकर्तुम् । आह । समुच्चयेऽपि यः कर्मणां सन्निपातः, तेन तत् कर्म कृतं भवति । ये व्यवहिताः, न तैः सह असन्निपातात् । तथा सति न संख्या कर्मण्यङ्गीकृता भवति । नैष दोषः । अर्थाभिधानेन मन्त्रोऽङ्गीकृत इति । सर्वैवैते तमर्थमभिदधति । अनन्तरेण रूपं क्रियते इतरे जपवददृष्टार्था भवन्ति । उच्यते । नादृष्टार्था भविष्यन्ति । सर्वे तदेव कर्म सकृदभिधास्यन्ति । भवति हि कारणार्थस्य मन्त्रस्यासकृत् प्रयोगः । यथा कुरु कुरु, करवाणीति । तत्र यथा अभिधानार्थस्य मन्त्रस्याम्नानसामर्थ्यादभिहितमभ्युदयकरं भवति । एवं चतुर्भिरादत्त इति वचनाच्चतुरभिहितं कृतमभ्युदयकारि भवतीति । तस्मात् समुच्चयेऽपि नादृष्टार्थता समुच्चयश्च सिद्धः ॥ २५ ॥ सि० ॥ मन्त्रसमुच्चयाधिकरणम् ॥ १२ ॥

ब्राह्मणविहितेषु च संख्यावत् सर्वेषामुपदिष्टत्वात् ॥ २६ ॥

ब्राह्मणे च ये मन्त्रा विधीयन्ते यथा उरुप्रथा उरुप्रथस्वेति पुरोडाशं प्रथयन्तीति । तेषु च समुच्चयः स्यात् । सर्वेषामुपदिष्टत्वात् । न प्रयुज्यते । तस्योपदेशो बोध्यते । सर्वाङ्गोसंहारी च प्रयोगवचनोऽनुग्रहीष्यते । संख्याविहितवच्च सर्वेषामसकृदभिधानेन अर्थवत्ता भविष्यति । तस्मात् समुच्चयः ॥ २६ ॥ पूर्व० ॥

याज्यावषट्कारयोश्च समुच्चयदर्शनं तद्वत् ॥ २७ ॥

समुच्चय एव याज्यावषट्कारयोः । समुच्चयोऽवगन्तव्यः । समुच्चयवद् दर्शनं भवति । याज्याया अधिवषट्करोतीति । समुच्चये हि पौर्वापर्यं भवति । तस्मादपि समुच्चयः ॥ २७ ॥ पूर्व०नि० ॥

विकल्पो वा समुच्चयस्याश्रुतित्वात् ॥ २८ ॥

विकल्पो वैष मन्त्राणां, न समुच्चयः । कुतः । उक्तो न्यायः । मन्त्राणां सन्निपातित्वादेकार्थानां विकल्पः स्यादिति । न तु संख्याविहितवदेकार्था अपि सन्तोऽसकृदभिधानेन समुच्चेष्यन्ते । नैतद्यु-

क्रम् । कुतः । समुच्चयस्याश्रुतित्वात् । यथा तत्र संख्याश्रवणात् । कृतकरणमप्यसकृदभिधानमाश्रितं, नैवं समुच्चयश्रवणमस्ति । तस्माद्यथान्यायमेकार्थत्वाद्विकल्पः ॥ २८ ॥ सि० ॥

गुणार्थत्वादुपदेशस्य ॥ २९ ॥ ॥

यश्च सर्वेषामुपदेशोऽर्थवान् भविष्यति । अहेतुः सः । गुणार्थत्वादुपदेशस्य । नैवासौ मन्त्रप्राप्त्यर्थ उपदेशः । किं तर्हि । गुणार्थः । अर्थवादो गुणं विधास्यतीति । तदुक्तं- गुणार्थेन पुनः श्रुतिः परिसंख्या अर्थवादो वेति । यदि तर्हि नैवायं मन्त्रोपदेशः । किमिदमुच्यते । सर्वेषामुपदिष्टत्वात् । एवं तर्हि कृत्वा चिन्तयम् । मन्त्रोपदेश इति कृत्वा चिन्त्यते । अथवा उदाहरणान्तरं द्रष्टव्यम् ॥ २९ ॥ हेतुः ॥ उरु प्रथस्वेतिमन्त्रे विकल्पाधिकरणम् ॥ १३ ॥

वषट्कारे नानार्थत्वात् समुच्चयो हौत्रास्तु विकल्पेरन्नेकार्थत्वात् ॥ ३० ॥

वषट्कारः प्रदानार्थो, याज्या देवतोपलक्षणार्था । तयोर्नानार्थत्वात् समुच्चयः । सर्वोपदेशात् । हौत्रास्तु विकल्प्येरन्नेकार्थत्वात् । हौत्रास्तु ये मन्त्रा, यूपोच्छ्रयणीया वा, उच्छ्रयस्व वनस्पते इति, यूपपरिव्याणार्था वा, युवा सुवासा इति । ते विकल्प्येरन् । कुतः । एकार्थत्वात् । एकार्था एते उच्छ्रयणस्य परिव्याणस्य वाऽभिधायकाः । एकैकश्च तेषामितरानपेक्षस्तदभिदधाति । तस्माद्विकल्पः ॥३०॥ पूर्व०

क्रियमाणानुवादित्वात् समुच्चयो वा हौत्राणाम् ॥ ३१ ॥

क्रियमाणानुवादित्वात् । करणानां विकल्प उक्तः । न चैते करणाः क्रियमाणानुवादिनः, एवं कर्त्तव्यमिति । कथं कृत्वा । उच्यते । अध्वर्योस्तावत् करोमीत्येतेन प्रत्ययेनार्थः । असति ह्येतस्मिन् क्रियैव न प्रवर्त्तते । एष प्रत्ययः सति पूर्वस्मिन् प्रत्यये भवति । यो हि स्मरतीदं मया कर्त्तव्यमिति, स तत् करोति । क्रियमाणानुवादिनश्चाऽध्वर्युणा क्रियमाणमर्थमनुवदन्ति । युञ्जन्ति त्वामध्वरदेवायं न इति । सोऽनुवादोऽलमध्वर्योः स्मृतिं कर्तुम् । अतस्तत् स्वरूपम् । तेन च कर्मणाकाङ्क्षितत्वात् । स्मरणार्था एते विज्ञायन्ते । स्मरणार्थस्य मन्त्र-

स्याम्नानसामर्थ्यात् स्मारितं कृतमदृष्टार्थाय भवति । यथा प्रततं कृतम् । ननु विधिशब्दादेव स्मृतिर्भवति । सत्यं विधेः शब्दादपि सामर्थ्याद्भवति । मन्त्रादपि भवति । मन्त्रस्याम्नानसामर्थ्यान्मन्त्रेण कर्तव्याः । प्रततेषु च कर्म्मसु स्मृतिसन्तानेनार्थ इत्यनेकस्यापि क्रियमाणानुवादिनो मन्त्रस्यैकस्मिन्नेव प्रयोगे स भवति । क्रियमाणाऽनुवादित्वाद्धौत्राणां समुच्चयः ॥ ३१ ॥ सि० ॥

समुच्चयं च दर्शयति ॥ ३२ ॥

त्रिः प्रथमामन्वाह ज्योतिष्मतीरनुब्रूयादिति । अनेकसन्निपाते चैतद्भवति प्रथमा उत्तमेति । तस्मात् समुच्चयः ॥ ३२ ॥ उदाहरणम् ॥ वषट्कारे समुच्चयाधिकरणम् ॥ १४ ॥ इत्याचार्यशबरस्वामिनः कृतौ मीमांसाभाष्ये द्वादशाध्यायस्य तृतीयः पादः ॥ १२ ॥ ३ ॥

अथ द्वादशाध्यायस्य चतुर्थः पादः ॥ १२ ॥ ४ ॥

जपाश्चाकर्मयुक्ताः स्तुत्याशीरभिधानाश्च याजमानेषु समुच्चयः स्यादाशीः पृथक्त्वात् ॥ १ ॥

वैष्णवीमनूच्य वाग् यन्तव्या सारस्वतीमनूच्य वाग् यन्तव्या बार्हस्पत्यमनूच्य वाग् यन्तव्येति स्तुतयः । अग्निर्मूर्द्धा दिव इति आशिषः । आयुर्दाग्ने अस्यायुर्मे देहीति विधानादेषोऽसि त्वेषोऽसीति । अथ जप इति कः शब्दार्थः । जप व्यक्तायां वाचीति । जप्यत इति जपः । यद्येवमग्निर्मूर्द्धा दिव इति । अयमपि जप्यते । सत्यमयमपि जपः । स्तुतिरपि त्विष्यते । अयं तु जप एव केवलः । इतरैः स्तुत्यादिभिः समुच्चार्यमाण एतस्मिन् जपे अकर्मसंयुक्ताः स्तुत्याऽऽशीरभिधानाश्चेति केवला जपाः प्रतीयन्ते ॥

यथा ब्राह्मणाः परिव्राजका ब्रह्मचारिणश्च निर्गच्छन्तीति उक्ते केवलब्राह्मणा ब्राह्मणशब्देनोच्यन्ते, तद्वत्। ननु इदं विष्णुर्विचक्रम इति स्तुतिरियम्। न खलु नामास्ति शब्दो, नापि किञ्चित् स्तोतव्यमस्ति। न च विष्णुः । न च विष्णुना स्तुतेन काश्चिदर्थोऽस्ति । न स्तुत्यो विष्णुः क्वचिदङ्गीक्रियते । नापि स्तुतिः कर्त्तव्या । चोदितवचनमात्रन्तु चोदितं वैष्णवीमनूच्येत । तत्र कर्त्तव्यं वचनं जपनमिति समानार्थौ, यस्माज्जप व्यक्तायां वाचीति स्मर्यते । तेन यत्र वचनमात्रं मन्त्रस्य क्रियते, न स्तूयते, नाऽऽशास्यते स जपः । अथ जपस्याभि-

धानार्थस्य च को विशेषः । जपे वचनमात्रम् । मन्त्रस्य अभिधानेन तु जपतः सता असता वा गुणो नातिदिश्यते । एषोऽसि त्वेषोऽसीति न तत्र । तत्रैकार्थत्वाद्विकल्पे प्राप्ते, उच्यते । समुच्चयः । कुतः । आशीः पृथक्त्वात् । स्तुतिपृथक्त्वात् । अभिधानपृथक्त्वाच्च । न हीदं विष्णुरिति योऽर्थोऽभिधीयते स एव पावमानः सरस्वतीत्यनेन । एवं सर्वत्र । तस्मान्नानार्था एते । अत एषां समुच्चयः स्यात् ॥ १ ॥ पूर्वपक्षसिद्धान्तौ ॥

समुच्चयं च दर्शयति ॥ २ ॥

शास्त्रानुवचनयोस्त्रिः प्रथमामन्वाहेति त्रिरुत्तमामन्वाहेति । समुच्चये च सति प्रथमा च विद्यते न विकल्पे । तस्मादपि समुच्चयः । यजमाने स्थितिप्रायिको निर्देशः । एकस्मिँश्च मन्त्रे त्रितयमपि सम्भवति, स्तुतिरभिधानं जपश्च । यथा इदं विष्णुर्विचक्रम इति यदि विष्णुर्बोध्यते ततः स्तुतिः । अथान्यस्यै वृत्तान्त आख्यायते ततोऽभिधानम् । अथात्मनावबोध्यते ततो जपः ॥२॥हेतुः॥ जपसमुच्चयाऽधिकरणम् ॥ १ ॥

याज्यानुवाक्यासु तु विकल्पः स्याद्देवतोपलक्षणार्थत्वात् ॥ ३ ॥

ऐन्द्राबार्हस्पत्ये कर्मण्यनेकं याज्यानुवाक्यायुगलमाम्नातम् । इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती इत्येकम् । अयं वा परिषिच्यते सोम इन्द्राबृहस्पती । बृहस्पतिर्नः परिपातु पश्चादित्यपरम् । तयोः किं समुच्चयो, विकल्प इति विचारः । तत्रोच्यते । याज्यानुवाक्यासु तु विकल्पः स्यादिति । कस्माद्देवतोपलक्षणार्थत्वात् । कर्मणि गुणभूता देवता याज्यानुवाक्याद्वयेन कर्मसिद्ध्यर्थमुपलक्ष्यते। सकृदुपलक्षणेन च तत् सिद्ध्यति । कर्मसिद्धौ कर्मणि उपलक्षणकार्यं नास्तीति द्वितीयं वै याज्यानुवाक्याद्वयं प्रयोगान्तरार्थं भवति । तस्माद् विकल्पः ॥ ३ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ ४ ॥

लिङ्गं चेदमर्थं दर्शयति । किं लिङ्गं भवति । एवमाह । क्रतुर्वै देवानां याज्यानुवाक्ये एकया प्रत्यागच्छति गमयत्यन्यया अथात्र तिस्रः कार्या इति पितृयज्ञे याज्यानुवाक्यात्रयविधानस्य परे वाक्ये

तयोस्त्रिद्वित्वमुचितं दर्शयति । तथा न सर्वाणि सह यज्ञायुधानि । प्रकृत्या तु मानुषं न क्रियते, नैकैकमेत्य । पितृदैवकं तत् । द्वे द्वे प्रकृते याज्यानुवाक्ययो रूपमिति । तस्मादपि विकल्पः । अथ तयोरेव मिथः । कस्माद्विकल्पो न भवति । एकार्थत्वात् प्राप्नोति । अन्यतरस्यापि हि देवतोपलक्षणं सिद्ध्यति । उच्यते । समाख्यया पुरोऽनुवाक्ये इति पुरोऽनूच्यत इति पुरोनुवाक्या । आपेक्षिकपूर्वशब्दो याज्यामपेक्ष्य भवति । समुच्चये चैतदुपपद्यते । तस्मात् समुच्चयः । ननूपलक्षिते रूपलक्षणकार्याभावादर्थलाभादन्यतरस्याः प्रयोगो न प्राप्नोति । उच्यते । समाख्यासामर्थ्यात् । विरूपलक्षणसाध्यं कर्म भविष्यति । यथा द्वाभ्यां खनतीति वचनसामर्थ्याद्दाभिधानं साध्यम् । तस्मादविरोधः ॥ ४ ॥ हेतुः ॥ याज्यानुवाक्यासु विकल्पाधिकरणम् ॥ २ ॥

क्रयेषु त्वविकल्पः स्यादेकार्थत्वात् ॥ ५ ॥

सोमक्रयणार्थानि द्रव्याणि समाम्नातानि । अजया क्रीणाति हिरण्येन क्रीणातीत्येवमादीनि । तेषु क्रयणेषु विकल्पः स्यात् । सर्वाणि हि क्रयणस्य साधनत्वेन निरपेक्षाणि विधीयन्ते । यथा व्रीहियवौ यागेषु । तथा अजया क्रीणाति हिरण्येन क्रीणाति वाससा क्रीणाति तान्येकार्थानि भवन्ति । तस्मात्तेषु विकल्पः ॥ ५ ॥ पूर्व० ॥

समुच्चयो वा प्रयोगद्रव्यसमवायात् ॥ ६ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति, विकल्प इति । किन्तु, समुच्चयः । कस्मात् । प्रयोगे द्रव्यसमवायात् । क्रयणस्य प्रयोगे अधिकस्यापि द्रव्यस्य समवाय उपपद्यते । तत्र विक्रेतुर्मूल्येनानमनं क्रियते, तद् बहुभिः सुकरतरं भवति । तस्य तस्य द्रव्यस्याम्नानमापेक्षिकं सर्वाङ्गोपसंहारी च प्रयोगवचनोऽनुग्रहीष्यते । अपि च विषमाण्येतानि, अश्वशफेन क्रीणातीति समुच्चयेनानतिं कर्तुं शक्नुवन्ति, न विकल्पेन । विकल्प्यमानानामानर्थक्यमापद्यते । तस्मात् समुच्चयः ॥ ६ ॥ सि० ॥

समुच्चयञ्च दर्शयति ॥ ७ ॥

तं वै दशभिः क्रीणाति दशाक्षरा विराड् विराजमेव प्राप्नोतीति क्रीणात्यनुवादोऽयम् । स एतेन न्यायेन प्राप्तानां स्यात् । तस्मादपि

समुच्चयः । अथार्थवादेन विधिः कस्मान्न विज्ञायेत। तथाप्यनुवादरूपं बाध्यते । तत्र सति सम्भवे न बाधितव्यम् । तस्मादनुवादः ॥ ७ ॥ हेतुः ॥ सोमक्रयद्रव्यसमुच्चयाधिकरणम् ॥ ३ ॥

अग्नीषोमीये पशौ गुदेनोपयजनमाम्नातं, गुदेनोपयजति प्राणो वै गुद इति । एकादशिनेषु पशुष्वनेकगुदसन्निपाते विचारः प्रभवति । किमुपयजनगुदानां समुच्चयो विकल्पो वा। यद्यर्थकर्मोपयजनं ततो विकल्पः । अथ प्रतिपत्तिस्ततः समुच्चयः । किं पुनरत्र युक्तम् अर्थकर्मेति । कुतः । भूतभव्यसमुच्चारणे भूतं भव्याय दृष्टार्थत्वाद् भवति पदार्थकर्म तदेकेनायत्नात् सिद्ध्यतीति बहूनामेकत्र प्राप्तानां विकल्पो भवति । एवं प्राप्ते, उच्यते—

संस्कारे च तत्प्रधानत्वात् ॥ ८ ॥

संस्कारोऽयं, प्रतिपत्तिरित्यर्थः । कुतः । उपयुक्तशेषत्वात् । अग्नीषोमीययागार्थः पशुरुत्पन्नः । तन्निवृत्तेस्तच्छेषाः प्रतिपादनार्थाः । तस्माद् गुदस्य प्रतिपत्तिनियमोऽयं दृष्टार्थः । नन्वर्थकर्मपक्षेऽपि दृष्टार्थतैव हेतुरुक्तः । तुल्योऽसौ प्रतिपत्तावपि हि प्रतिपाद्यमानाः कर्म साधयन्ति । तस्माद् वैशेषिकोऽसौ । यदा प्रतिपत्तिस्तदा समुच्चयः। तत्प्रधानत्वाद् द्रव्यसंस्कारार्थं कर्म । यस्यैव पशोर्गुदो न संस्क्रियते तस्यैव तेन संस्कारेण हानिः स्यात् । तस्मात् समुच्चयः ॥८॥ सि० ॥ गुदोपयजनसमुच्चयाधिकरणम् ॥ ४ ॥

संख्यासु तु विकल्पः स्याच्छ्रुतिप्रतिषेधात् ॥ ९ ॥

आधाने दक्षिणाविधयः । एका देया षड् देया द्वादशदेया इत्येवमादयः । तेषां समुच्चयो विकल्पो वा इति, विचारणम् । तन्त्राङ्गभूयस्त्वाय सर्वाङ्गग्राहिणा प्रयोगवचनेन समुच्चये प्राप्ते, उच्यते । संख्यासु तु विकल्पः स्यात्। कुतः। श्रुतिविप्रतिषेधात् । एका देयेत्येकसंख्यापरिच्छिन्नं द्रव्यं परिक्रयसाधनं श्रूयते । तथा षड् देयेति षट्संख्यापरिच्छिन्नम् । यद्येका च षट्सु समुच्चीयेत संख्यान्तरप्राप्तसंख्योत्पद्यते । तत्परिच्छिन्नेन द्रव्येण परिक्रयवतः स्यात् । तत्रैकश्रुतेः षट्श्रुतेश्च विप्रतिषेधः स्यात् । ननु नैवात्र परिक्रयः श्रूयते । किं तर्हि । दानम् । एका देया षड् देया इति । अत्रोच्यते । दानमात्मीयस्य परस्वत्वापादनम् । तत्र परस्वत्वात् स्यादित्येवमर्थः ।

स्ववानसौ । तस्यार्त्विज्यम् । तेन चास्य दातुरर्थः । एवं दृष्टार्थो भवति । अथ दानमात्रं कल्प्यते । ततोऽदृष्टं कल्पयितव्यम् । परिक्रय एकैकादीनां श्रवणम् । तत्र यः सप्तभिः परिक्रीणीते, न तेनैकया षड्भिः परिक्रीतो भवति । न हि ते एकेत्यामनन्ति, नषडिति । किं तर्हि । सप्तेति । स एष श्रुतिविप्रतिषेधः । तस्माद् विकल्पः संख्यासु ॥ ९ ॥ सि० ॥ आधाने दक्षिणासंख्याविकल्पाधिकरणम् ॥ ५ ॥

द्रव्यविकारात्तु पूर्ववदर्थकर्म स्यात् तया विकल्पेन नियमप्रधानत्वात् ॥१०॥

जाघन्या पत्नीः संयाजयन्तीति श्रूयते । तत्र पशुगुणेषु विचारो भवति । किं जाघन्यादीनां समुच्चयः ? उत विकल्प इति । अत्राऽपि पूर्वन्यायः । यद्यर्थकर्म ततो विकल्पः । अथ प्रतिपत्तिस्ततः समुच्चय इति । किं प्राप्तम् । द्रव्यविकाराच्च पूर्ववदर्थकर्म स्यात् । पूर्ववदेतत् कर्म यज्जाघन्या पत्नीसंयाजनं दर्शपूर्णमासपूर्वकं चोदकपरम्परया पशुगुणप्राप्तदर्शपूर्णमासयोश्चैतदर्थकर्म । न हि तत्र काचिच्छेषभूता जाघन्यस्ति यस्याः प्रतिपत्तिः स्यात् । लौकिकास्तु तत्राज्येन सह विकल्पश्चोदकेनाग्नीषोमीयः पशुः प्राप्तः । तत्रापि श्रूयते जाघन्या पत्नीः सयाजयन्तीति । सा श्रुतिर्विकल्पे प्राप्ते नियमार्था भवति । यथाप्राप्तयोश्च नियमः । गुणभूता च प्राप्ता । तस्मादग्नीषोमीये गुणभूता जाघनी कर्मप्रधानम् । यथा अग्नीषोमीये तथा पशुगुणेषु । तस्मात्तत्राप्यर्थकर्मणि चैकार्थानां जाघन्यादीनां समुच्चयो न युक्तः । तस्माद् विकल्पः ॥ १० ॥

द्रव्यत्वेऽपि समुच्चयो द्रव्यकर्मनिष्पत्तेः प्रतिपशु कर्मभेदादेवं सति यथाप्रकृति ॥ ११ ॥

यद्यपि जाघनी गुणभूता कर्मणि एवमपि समुच्चयो युक्तः । कुतः द्रव्यस्य कर्मनिष्पत्तेः । जाघनी द्रव्यं कर्मणा विशसनेन निष्पन्नमिति । तत्र प्रयोजनापेक्षा भवति । इदं च श्रूयते । जाघन्या पत्नीः संयाजयन्तीति । तदेवं विज्ञायते । इदमस्य प्रयोजनम् । पशुगुणे च प्रतिपशुकर्मभेदस्तस्य तस्य पशोः कर्मनिष्पत्तिः । जाघनी द्रव्यमतस्तत्रापि तत् पत्नीसंयाजार्थमेव कर्त्तव्यम् । एवं सति यथाप्रकृति कृतं भवति । तस्मादर्थकर्मण्यपि समुच्चय एव ॥ ११ ॥ पूर्व० ॥

कपालेऽपि तथेति चेत् ॥ १२ ॥

इति चेत् पश्यसि कर्मनिष्पत्तित्वाज्जाघनीनां समुच्चय इति । तेन तर्हि कपालेऽपि समुच्चयः प्राप्नोति । पुरोडाशकपालेन तुषानुपवपतीति । तदपि कर्मणा प्रयुज्यते । तस्यापि तुषोपवपनं प्रयोजनं भवितुमर्हति । तथा पुरोडाशगणे तस्य तस्य पुरोडाशस्य कपालेन तुषोपवपनं कर्त्तव्यम् । वक्तव्यो वा विशेषः ॥ १२ ॥ आ० ॥

न कर्मणः परार्थत्वात् ॥ १३ ॥

नैतदेवम् । कुतः । कर्मणः परार्थत्वात् । परार्थश्च कपालानां प्रयोगकर्म पुरोडाशश्रपणार्थम् । तदर्थमुपात्ते कपाले तुषोपवपनमप्यन्वासज्ज्यति तद्यथा । काष्ठान्याहर्तुं प्रस्थिते पुरुषे शाकाहरणमप्युपाधिः क्रियते । शाकमप्याहरेदिति । तस्य गमनं शाकार्थमपि भवति । कथं पुनर्ज्ञायते पुरोडाशार्थे कपाले तुषोपवपनमन्वासज्ज्यते । तेन तदुभयार्थमिति उक्तोऽत्र न्यायो भविष्यति । सङ्गस्य तन्निमित्तत्वादिति । न चेत् तुषोपवपनार्था कपालानामुत्पत्तिर्नावश्यं सर्वैस्तुषोपवपनं कर्त्तव्यम् । अथवा उभयोरपि प्रतिषेधो, यतः कर्मणः परार्थत्वादिति । कपाले व्याख्यातं जाघन्यामपि कर्मणा परार्थत्वम् । हृदयादीनां निष्पत्त्यर्थं विशसनकर्म, न जाघन्याः । अपिच, हृदयादिभिरवदानैर्यष्टुं पशोरालब्धव्यविशसनकर्मापि तदर्थमेव । तस्मान्न जाघन्या निष्पत्त्यर्थं विशसनम् । नचेत्तदेवं नैवात्र प्रयोजनाकाङ्क्षा । कुतः सम्बन्धः । हृदयादीन्यनुनिष्पन्ना जाघनी, सा पत्नीसंयाजनिर्वृत्त्यर्थमुपदिष्टा एकया च तया ते निर्वर्त्त्यन्ते । तस्मात् पशुगुणे जाघनीनां विकल्पः ॥ १३ ॥ आ०नि० ॥

प्रतिपत्तिस्तु शेषत्वात् ॥ १४ ॥

भवेद्विकल्पो यद्यर्थकर्म स्यात् । प्रतिपत्तिस्त्वेषा । कस्माच्छेषत्वात् । पशुना निर्वर्तिते यागे शेषभूता जाघनी निष्प्रयोजना, न क्वचिन्निक्षेपार्हा । तस्या निक्षेपः पत्नीसंयाजेषु क्रियते, न जाघनी विधीयते, न पत्नीसंयाजाः । उभये विहितः सम्बन्धो, न विहितः । स विधीयते । तत्र च जाघन्याः प्राधान्यं सूक्तं, न गुणभावः । गुणभावेऽस्यानेकत्र गुणभावः स्यात् । तत्र को दोषः । अग्नीषोमीयं पशुमालभेतत्येषा चोदना बाध्येत । नानादेवतोऽयं तदा भवति । एकदेशोऽस्याग्नीषोमीयः । एकदेशः

पत्नीसंयाजदेवतानामिति । तस्मात् प्रतिपत्तिः । प्रतिपत्तौ पशोर्जाघनी न प्रतिपाद्यते, तस्यैव तेन संस्कारेण वर्ज्जनं स्मादपि समुच्चयः ॥ १४ ॥ पूर्व० ॥

श्रृतेऽपि पूर्ववत् स्यात् ॥ १५ ॥

श्रृते चरुं दधंश्चरुमित्यत्रापि प्रतिपत्तिः स्यात् । कुतः । स्यात् । अन्यपूर्वकं श्रृतं दधि चेन्द्रायोत्पन्नम् । तस्यार्थान्त वि ुं शिपिविष्टम् । तस्मात् तस्याप्युत्पत्तौ येन संयुक्तं त श्रुतिहेतुत्वात्तस्यार्थान्तरगमने शेषत्वात् प्रतिपत्तिः स्या न्यायेन प्रतिपत्तिः प्राप्नोति । वक्तव्यो वा विशेषः ॥ १५ ॥ पृ

विकल्पोऽन्वर्थकर्मनियमप्रधानत्वाच्छेषे च क समवायात्तस्मात्तेनार्थकर्म स्यात् ॥ १६ ।

सूत्रे द्वयोः सूत्रयोः परिहार उच्यते । प्रतिपत्तिस्तु शेष च श्रृते च पूर्ववत् स्यादिति च । यत्तावदुच्यते जाघन्य त्तिरिति । तत्र ब्रूमः । विकल्पः । प्रतिपत्तौ जाघन्या अ पशौ च, तथैव विकल्पे प्राप्ते नियमप्रधाना पुनः श्रुतिः पत्नीः संयाजयन्तीत्याज्यस्य निवर्त्तकत्वात् कृतार्था भवति । अर्थकर्म न वारयति । वस्तुशेषत्वादिति । अशेषस्या देकत्र गुणभावो भवति । यथा प्रस्तरस्य । यच्च श्रुत उत्पन्नस्यान्यत्र गमनं प्रतिपत्तिरिति । तदप्ययुक्तम् । कुतः कर्मकार्यसमवायात् । य उपयुक्तः शेषस्तस्मिन् कर्मकार्ये स किं पुनस्तत्संस्कारः । स हि कर्मणा क्रियते । न चैतच्छ्रुतम वा क्वचिदुपयुक्तम् । यस्मै यागायोत्पन्नं स नैव भवेन्निर्वपेत् । तेन जाघनीद्रव्येण दधिघृताभ्यां चार्थकर्म स्याद्, नप्रतिपत्ति सि०॥ जाघनीविकल्पाधिकरणम् ॥ ६ ॥

उखायां काम्यनित्यसमुच्चयो नियोगे कामदर्शनात् ॥ १७ ॥

अस्त्यग्नावुखाग्निः । सन्तापेनाग्निं जनयतीति । तं प्रकृत वृक्षाग्राज्ज्वलतो ब्रह्मवर्चसकामस्याहृत्यान्वादध्यात् । भ्रा कामस्याहृत्यान्वादध्यात् । वैद्युताद् वृष्टिकामस्येति । त किं काम्यस्य नित्यस्य वा अग्नेः समुच्चयः ? अ

ऽग्निर्विक्रियत इति । तत्रोच्यते । उखायां काम्यनित्ययोरन्येभ्यो
ुच्चयः कृतः । एवं सर्वाङ्गोपसंहारी प्रयोगवचनोऽनुग्रहीष्यते । ननु
कं तु प्रकृत्य तद्विकारः संयोगविशेषादित्यनेन न्यायेन
ानित्यस्य विकारको भविष्यति, न भविष्यति । किं कारणम् ।
कामदर्शनात् । अग्नेर्निर्यापने अयं कामः श्रूयते । आहृत्या-
ादू ब्रह्मवर्चसकामस्य ह्यग्निर्होमार्थो भवतीति । एवं चेदाहृ-
ानात् फलं भविष्यति । होमस्तु यथाप्राप्तमुख्य एव. रग्नि-
च अग्न्योः समुच्चयः । असति वा संस्कृतेषु कर्म स्यात् ।
काम्येन नित्योऽग्निर्विक्रियेत स नैव स्यात् तस्मिँश्चासत्य-
भ्राष्ट्रादिषु कर्म स्यात् । तथा तस्य कर्मार्थता बाध्यते । त-
समुच्चयः ॥ १७ ॥ पूर्व० ॥

तस्य च देवतार्थत्वात् ॥ १८ ॥

चाग्न्यन्वाधाने तद्देवतापरिग्रहणं यदि सोऽग्निरुत्सृज्ज्येत
अपरिगृहीता भवेयुः । अग्न्यन्वाधाने न अग्निर्धार्येत ।
ग्निधारणाद् देवतापरिग्रहः ॥ १८ ॥ हेतुः ॥

ो वा नित्यस्याग्नेः काम्येन तदुक्तहेतुः ॥ १९ ॥

तकं तु प्रकृते तद्विकार इति । सामान्येनैतदुक्तं, यदाहव-
तीति । वृष्टिकामो वैद्युतादिति विशेषणम् । तेन सामान्यं
किं कारणम् । स्वाश्रये वृत्तिर्विशेषस्य सामान्यस्य । ततो-
वृत्तिसम्भवात् । विशेषस्य चान्यपरिच्छिन्नस्य एकावयविन-
वे विषयाभावात् प्रसङ्गादुपदेशवैयर्थ्यं मा भूदिति । अथ
नियोगे कामदर्शनादिति । तत्र ब्रूमः । भ्राष्ट्रादाहृत्यान्वादध्या-
नित्यस्यैव होमार्थस्यान्वाधानस्यायं विशेषकामसंयोगः । शब्दा-
न्नाद्यकामस्येति आदध्यादिति पुनः श्रुतिः । यद्यन्वाधाने काम-
ः स्यादाधानं विधीयेत, नाधीयमानं कामस्य साधनत्वेन युज्यते ।
स्मँश्च विधीयमाने विशेषश्च स चेत्यनेकार्थत्वाद् वाक्यं भिद्येत ।
नियोगे कामश्रुतिः । किं तर्हि । होमायैवायं नित्यनियोगः ।
विधानार्थमनूद्यते । यावदुक्तं स्पष्टम् । वैद्युतमग्निं होमार्थं
वदेवम् । एवं चन्नैमित्तिकस्तस्मिँस्तस्मिन् कार्ये नित्य-
ऽपपन्नम् ॥ १९ ॥ सि० ॥

वचनादसंस्कृतेषु कर्म स्यादिति ॥ २० ॥

तत्र ब्रूमः । वचनादसंस्कृतेषु कर्म स्यादिति किमिव वचनं न कुर्यात् । नास्ति वचनस्यातिभारः । यथा पदे जुहोतीति ॥२०॥सि०॥

संसर्गे चाऽपि दोषः स्यात् ॥ २१ ॥

अपि च यदि समुच्चयः स्यात् प्राधान्येन सह संसर्गः स्यात् । वैहारिकस्य तु तत्र दोषः श्रूयते । अग्नये शुचयेऽष्टाकपालं निर्वपेद्यस्याग्निः प्रधानेन सह संसर्गः संगृह्येत । शुचितर एष योऽग्निर्यः प्रदातव्यः ॥ २१ ॥ आ० ॥

वचनादिति चेदथेतरस्मिन्नुत्सर्गापरिग्रहः कर्मणः कृतत्वात् ॥ २२ ॥

आह । नैष दोषः । वचनात् संसर्गो, न वाचनिके क्रियमाणे दोष उच्यते । अथेतरस्मिन् । इतरस्मिन्नपि पक्षे वाचनिके असंस्कृतेषु होमः । एवमुभयत्र वाचनिकत्वाद् दोषाभावे सति नैमित्तिकत्वाद् विकार आश्रीयते, न समुच्चयः । उत्सर्गोऽपि नित्यस्याग्नेर्देवतापरिग्रहो, न विरुद्धः । कर्मणः कृतत्वादग्न्याधानेन देवताः परिगृह्यन्ते । नाग्निना । एवं श्रूयते । यः पूर्वेद्युरग्निं गृह्णाति स वै श्वोभूते देवता अभियजत इति । तच्च कृतमग्नेर्ग्रहणम् । तेन परिगृहीता देवता अग्न्यन्तरं वचनाद्भक्ष्यन्ते । तस्मादविरोधः ॥ २२ ॥ आ० नि० ॥ उखाग्निविकल्पाधिकरणम् ॥ ७ ॥

स आहवनीयः स्यादाहुतिसंयोगात् ॥ २३ ॥

यश्चासौ वैहारिकोऽग्निः स आहवनीयः स्यात् । कुतः । आहुतिसंयोगात् । एत्य हूयते यस्मिन् स आहवनीयः । हूयते चास्मिन्नित्येतस्मादयमप्याहवनीयः ॥ २३ ॥ पूर्व० ॥

अन्यो वोद्धृत्याहरणात्तस्मिंस्तु संस्कारकर्म शिष्टत्वात् ॥ २४ ॥

अन्यो वा आहवनीयात् स्यान्नाहवनीयः । कस्मात् उद्धृत्याहरणात् । लौकिकोऽयमुद्धृत्य हूयते भ्राष्ट्राहरेत् । प्रावास्यादाहरेदिति । आहवनीयशब्दश्च संस्कारनिमित्तः संस्कारेषु तत्सद्भावात् । अभावाच्च प्राहुतेऽस्यः । यच्चाहुतिसंयोगादिति सिद्धे आहवनीयत्वे

आहुतयो विधीयन्ते यदाऽहवनीये जुहोतीति, न तेनास्य विधानात् । कृतं तद् भवति । तस्मान्नाऽहवनीयः प्रयोजनमाहवनीयधर्म्माभावः । तस्मिन् संस्कारकर्म्मशिष्टत्वात् । तस्मिन् वैहारिकेऽग्नौ आधानिकाः संस्काराः कर्तव्याः । शिष्टत्वात् । सर्वकर्म्मार्थाहिते आधानस्य सर्वशेषत्वात् । यदि न क्रियेरन् कर्म्म तेनाङ्गेन हीनमफलं स्यात् ॥२४॥सि०

स्थानात्तु परिलुप्येरन् ॥ २५ ॥

परिलुप्येरन् आधानिकाः संस्काराः । कस्मात् स्थानात् । तस्य संस्कृतस्याग्नेः स्थानेऽयमसंस्कृतः श्रुतः । स वैशेषिकत्वात् तस्य निवर्त्तकः । स चेन्निर्वृत्तः किमर्थं संस्काराः कारिष्यन्ते । न संस्कृतः स्यादित्येवमर्थं ते क्रियेरन् । असंस्कृतेन चार्थः । तस्माल्लुप्येरन्॥२५॥ हेतुः ॥ उख्याग्नेराहवनीयत्वाधिकरणम् ॥ ८ ॥

नित्यधारणे विकल्पो न ह्यकस्मात् प्रतिषेधः स्यात् ॥ २६ ॥

तस्मिन्नेवोख्ये चिन्ता । किमयं नित्यं धार्यो,न वा । अथ वा, नैव धार्येतेति । तत्रोऽच्यते । नित्यधारणे विकल्पः,धार्यो वा न वा । कुतः। न ह्यकस्मात् प्रतिषेधः स्यात् । धारणात् प्रतिषेधस्तस्य भवति । प्रतिसमिधीत भ्रातृव्यमस्मै जनयतीति श्रुतिर्धारणप्रसङ्गे च प्रतिषेध्यार्थत्वाद् भवति । न यथा गन्तव्यं भोक्तव्यमिति सति गमनप्रसङ्गे भोजनप्रसङ्गे च भवति । न च श्रुतिमन्तरेण प्रसङ्ग उपपद्यत इति नित्यसाधारणस्य विधायिका श्रुतिरनुमीयते । तया प्राप्तिः । प्रतिषेधेन निवृत्तिः । तस्माद् विकल्पः ॥ २६ ॥ पूर्व० ॥

नित्यधारणाद्वा प्रतिषेधो गतश्रियः ॥ २७ ॥

यदि कदाचित् प्रत्यक्षया श्रुत्या प्रसङ्गो न स्यात् । अतोऽर्थादनुमीयेत । अस्ति तु नित्यधारणस्य प्रसञ्जिका गतश्रियः श्रुतिः । नित्यवृत्त आहवनीयो गतश्रिय इति आहवनीयस्थानापन्नत्वादुख्यस्याऽपि नित्यधारणं प्रसक्तम् । तत्प्रतिषेधार्थेयं श्रुतिः । तस्मान्न श्रुत्यन्तरस्यानुमानं भवति । अतो नित्यधारणस्याविधानात् कार्याभावाच्चाधारणमेव स्यात् ॥ २७ ॥ सि० ॥ उख्याग्नेर्नित्यधारणाभावाऽधिकरणम् ॥ ९ ॥

पराार्थान्येकः प्रतियन्तिवत् सत्राहीनयोर्यजमान-गणेऽनियमोऽविशेषात् ॥ २८ ॥

यानि परार्थानि कर्माणि यथा शुक्रं यजमानोऽन्वारभेत यजमान-सम्मितौदुम्बरी भवति । तान्येको यजमानः कुर्यान्न सर्वे । कस्य हेतोः । परार्थत्वादेव । न तत्कर्मणा यजमानस्य कश्चिदुपकारः क्रियते । ततश्च न स्वस्वोपकाराय सर्वे कुर्युः । यजमानेन तु तत्कर्म क्रियते । तदेकेनैव कृतमिति द्वितीयानां प्रवृत्तौ हेतुर्नास्ति । तस्मादेकः कुर्यात् ॥

तत्रैकस्यानियमो यः कश्चिदेकः कुर्यात् । कुतः । अविशेषात् । नात्र शब्दकृतो वाऽर्थकृतो विशेषो गृह्यते । तस्मादनियमः । अहीने मुख्यस्याभावादेवमवस्थितम् ॥ २८ ॥ पूर्व० ॥

मुख्यो वा विप्रतिषेधात् ॥ २९ ॥

सत्रे तु मुख्यः कुर्याद् गृहपतिः । कुतः । विप्रतिषेधात् । कुर्वतो विप्रतिषेधः । न हि तेनार्त्विजः पदार्थाः कर्त्तव्याः । ऋत्विजां तु स्वपदार्थसन्निपाते विप्रतिषेधः स्यात् । एवं हि गृहपतेरर्थवत्त्वं क्रत्वर्थानि याजमानानि ॥ २९ ॥ सि० ॥ सत्राहीनयोरेकैककृतत्वे सर्वेषां करणाधिकरणम् ॥ १० ॥

सत्रे गृहपतिरसंयोगाद्धौत्रवदाम्नायवचनाच्च ॥ ३० ॥

अथ यानि याजमानानि संस्कारार्थानि कर्माणि तान्यपि किं सत्रे गृहपतिनैव कर्त्तव्यानि, उत सर्वैरित्युच्यते । गृहपतिना कर्तव्यानि । कुतः । असंयोगादेवं गृहपतिरिति समाख्याया अन्वर्थेनासंयोगो-न भवति । अन्वर्था भविष्यतीत्यर्थः । कथं कृत्वा । तत्रोच्यते । इहानेन गृहशब्देन कर्मोच्यते, न शाला । शालायामभिधीयमानायामविशेषः स्यात् । सर्वे हि ते शालायाः पतयः । ननु च कर्मणोऽपि ते सर्व एव पतयः सत्यमेवं समाख्यानात् प्रकर्षावगतिर्विज्ञायते । यथा देवदत्तो मथुरायां ब्राह्मण इति । प्रकर्षश्च कर्मभूयस्त्वाद्वा स्यात् फलभूयस्त्वाद्वा । तत्र कर्मभूयस्त्वन्नोपपद्यते । यत इतरेषां बहुतरं कर्म फलभूयस्त्वन्तु युज्यते । यजमानसंस्काराणां तस्याधिक्यात् । तस्माद् गृहपतिसमाख्याया अर्थवत्त्वात् पुरुषार्थानां गृहपतिः कर्त्तेति हौत्रवत् । तद्यथा हौत्रमिति समाख्याया अर्थवत्त्वाद्धोता

हौत्रस्य कर्त्ता भवत्येवमिहापि आम्नायवचनाच्चाम्नायैकवचनं गृहपतेः फलभूयस्त्वे भवति । यो वै सत्रे बहूनां यजमानानां गृहपतिः स सत्रस्य प्रत्येता । स हि भूयिष्ठामृद्धिमृध्नोतीति तथेति । तस्मादेव कारणात् ॥ ३० ॥ पूर्व० ॥

सर्वैर्वा तदर्थत्वात् ॥ ३१ ॥

सर्वे वा यजमानाः पुरुषार्थानि कुर्युः, न गृहपतिरेव । कुतः । तदर्थत्वात् । सर्वार्थमेव हि कर्म अविशेषेण हि श्रुतं द्वादशाहमृद्धिकामा उपेयुरिति । यस्त्वेषां संस्कारैर्न युज्यते । तस्य गुणहीनमफलं कर्म भवेदिति तत्राविशेषश्रुतिर्बाध्येत, गृहपतिरिति समाख्यासामान्यात् । यथा गृहपतिः । स्वयं कर्म न करोत्यन्ये तस्य कर्मकारा भवन्त्येवमस्यापीत्यनेन सामान्येन स्वामित्वप्रकर्षःफलप्रकर्षाभावात् ॥ ३१

ननु स्वार्थलाभेन यजमानाः क्रत्वर्थं परिहापयन्ति । अत्रोच्यते—

विप्रतिषेधे परम् ॥ ३२ ॥

यत्र क्रत्वर्थेन पुरुषार्थत्वाद् विप्रतिषेधः । तत्र स्वार्थं करिष्यति । विप्रतिषेधे तु परकीयं क्रत्वर्थम् । किं कारणम् । क्रत्वर्थे ह्यक्रियमाणे क्रतुरेव न संपद्यते । पुरुषार्थे तु हीने पुरुषो विगुणः । अङ्गगुणविरोधे च तादर्थ्यादिति क्रत्वर्थो बलवान् । तस्मात् कर्तव्यः ॥ ३२ ॥ हेतुः ॥

हौत्रे परार्थत्वात् ॥ ३३ ॥

यत्तु हौत्रवदिति । हौत्रे परार्थः पुरुषः, न कर्म पुरुषार्थम् । तदेकेन केनाचित् कर्तव्यं, न सर्वैः । तत्र समाख्या नियामिका स्यात् । इह पुनर्गृहपतिरिति समाख्यानिवृत्तिंशक्नोति कर्तुम् । अतोऽन्यथापि युज्यते । अयुज्यमानाऽपि काममनर्थिका स्यात् । नैव निवर्तयितुं शक्नुयात् । निवर्तकस्य वचनस्याभावात् ॥ ३३ ॥ दृष्टान्तवैषम्यम् ॥

वचनं परम् ॥ ३४ ॥

यच्च दर्शनमुपदिष्टं सत्रस्य प्रत्येता इति । न तद्दर्शनम् । किं तर्हि । वचनम् । तत्फलभूयस्त्वस्याप्राप्तेः । प्राप्तिपूर्वकं हि दर्शनं भवति ॥३४॥ हेतुः ॥ सत्रे याजमानकर्मणा सर्वेषां कर्तव्यताधिकरणम् ॥ ११ ॥

प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात् ॥ ३५ ॥

ऋत्विक्त्वं सर्ववर्णानां ब्राह्मणराजन्यवैश्यानां स्यात् । कुतः ।

प्रभुत्वात् । प्रभवन्ति सर्वे, शक्नुवन्ति कर्तुम् । सर्वेऽध्ययनवन्तो विद्वांसश्च । न ह्यविद्वान् विहितोऽसौ करणाय । कारणं सर्वेषां कर्मप्रदर्शनार्थं ब्राह्मण इत्युक्तम् ॥ ३५ ॥ पूर्व० ॥

स्मृतेर्वा स्याद् ब्राह्मणानाम् ॥ ३६ ॥

ब्राह्मणानामेवार्त्विज्यं स्याद्, नेतरयोर्वर्णयोः । कुतः । स्मृतेः । एवं शिष्टाः स्मरन्ति । याजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैव वृत्त्युपाया इति । स्मृतिश्च प्रमाणमित्युक्तम् । अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् । तस्माद् ब्राह्मणा एव याजयेयुः ॥ ३६ ॥ सि० ॥

फलचमसविधानाच्चेतरेषाम् ॥ ३७ ॥

इतरेषां राजन्यवैश्यानां फलचमसौ विधीयेते । स यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं बिभक्षयिषीत न्यग्रोधवल्लरीराहृत्य ताः सम्पिष्य दधन्युन्मृज्ज्य ता अस्मै भक्ष्यं प्रयच्छेन्न सोममिति । यदि क्षीरे सति तक्रं दीयते । तत्र यदि चाक्षीराभावो विज्ञायते यदि वा भोक्तुरक्षीराभागित्वमिहापि सोमे बिभक्षयिषिते फलानि दीयन्ते तत्रापि सोमाभावो वा यदि वा भोक्तुरसोमपत्वं विज्ञायते । तत्र सोमस्तावत् सन्निहितः । तस्मान्न सोमाभावो भोक्तुस्त्वसोमपत्वं विज्ञायते, न वाऽसोमपाभ्यां शक्यत आर्त्विज्यं कर्तुम् । नियमात् सोमभक्षस्य । तस्मान्न राजन्यवैश्ययोरार्त्विज्यम् ॥ ३७॥ हेतुः ॥

सान्नाय्येऽप्येवं प्रतिषेधः सोमपीथहेतुत्वात् ॥ ३८ ॥

अपि च सान्नाय्ये भक्ष्ये राजन्यवैश्ययोः प्रतिषेधं तु सोमपीथहेतुमाह । न राजन्यो न वैश्यो वा सान्नाय्यं वा पिबेत्, असोमपीथो ह्येष इति ब्रुवन् सोमपीथाभावे राजन्यवैश्यानामार्त्विजनाभावं दर्शयति ॥ ३८ ॥ हेतुः ॥

चतुर्धाकरणे च निर्देशात् ॥ ३९ ॥

दर्शपूर्णमासयोश्च पुरोडाशस्य चतुर्द्धाकरणे ब्राह्मणा एव निर्दिश्यन्ते । ब्राह्मणानामेवेदं हविः सोम्यानां सोमपीथिनां नेह ब्राह्मणस्यास्तीति शेषभक्षणार्थं चतुर्द्धाकरणमित्युक्तम् । शेषभक्षाश्चर्त्विजः यदि राजन्यवैश्ययोरप्यार्त्विज्यमस्ति, न ब्राह्मणानामेवेदं हविः स्यात् । राजन्यवैश्ययोरपि पक्षे स्यात् । तत्रेदमवधारणमसमर्थं भवेत् ॥ ३९ ॥ हेतुः ॥

अन्वाहार्य्ये च दर्शनात् ॥ ५० ॥

दर्शपूर्णमासिक्यां चान्वाहार्य्यदक्षिणायां ब्राह्मणा एव दृश्यन्ते । त एते वै देवा अहुतादो यद् ब्राह्मणा यदन्वाहार्य्यमाहरन्तीति तानेव तेन प्रीणातीति । दक्षिणा च ऋत्विग्भ्यो दीयते । तस्माद् ब्राह्मणानामार्त्विज्यम् । यस्मादित्थं लक्षणा स्मृतिः । तान्येतानि दर्शनान्युपोद्बलयन्ति तस्मादार्त्विज्यं ब्राह्मणानामेव स्यान्नेतरयोर्वर्णयोरिति ॥ ५० ॥ हेतुः ॥ आर्त्विज्ये ब्राह्मणमात्राधिकरणम् ॥ १२ ॥

इत्याचार्य्यभट्टशबरस्वामिकृतौ मीमांसाभाष्ये
द्वादशस्याध्यायस्य चतुर्थः पादः ॥
सम्पूर्णः ॥ १२ ॥ ४ ॥
मीमांसाशास्त्रञ्च सम्पूर्णम् ॥

